CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मकाण्ड (वेद)
रत्नावली

द. नं. १५८/०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पु. नं. 96CCC

मूल्यम् 2645/-

पुस्तक नामः—

रत्नावली

कर्मकाण्डः

(वेदः)

CC-0. In Public Domain. Digitization by eGangotri

जनक राज १९६५।

॥ स्त ॥
॥ १ ॥

श्रीगणेशाय नमः॥ ॥गजवदनमुमाजं विघ्ननाशं सुरेशम्भवभयदलनन्तं भक्तरक्षासुदक्षम्॥ विदितपरमतत्वैर्यो
गिभिश्चिन्तनीयङ्गणपतिमभिवन्दे सर्वलोकैकनाथम्॥१॥ क्षीणाक्षीणावक्षोभवतियदनुध्यानवशान्नः समस्तार्थप्राप्ते
र्निलयमिति वेदैर्व्यवहृतम्॥ सुरेन्द्रैर्वन्द्यन्नित्यधिनयामानसयदं हरेरङ्घ्रिद्वन्द्वम्भवतु मम भद्राय मधुरिपोः॥२॥ मार्तण्डो म
ण्डलान्तःस्थितसकलजगत्कारणात्मा प्रदेहो ब्रह्माण्डभाण्डान्तनिगरणसहिष्णो भास्करो देवदेवः॥ देवो देवैश्च वन्द्यो दलितदि
निशत्नो दिव्यमूर्त्तिर्दिनेशो धीनो ज्ञानदायालुरुरितदवभरम्भूरि दूरीकरोतु॥३॥ ईशन्देवं पुरमथनममरम्वेदवेदाङ्गगम्यमिन्दूत्तंसंस
कलविबुधानन्दयमेककन्दम्॥ गौरीनाथं गणपजनकं योगिभिर्ध्येयमूर्त्तिं भनाधीशं हृषभगमनन्नायकाम्नेभजेहम्॥४॥
देवीं दुर्गां वासुदेवस्वसारं दिव्यैर्मालैर्वस्त्ररत्नैरुपेताम्॥ भक्तापाशी हंदुःखदावाग्निदग्धो नित्यां हं त्वां नायकाम्नेभजेहम्॥५॥ वे
दाघप्रस्तुताश्रीहेरिपदकमलेदत्तचित्तानुजस्थान्तो विम्बाकारवक्त्रा प्रथममनुजनिर्लोकवन्द्यादिकीर्त्ति॥ साकारा निर्मलाय
विलसत्हृदये पञ्चभूताधिदेवी या गम्यानेकरूपा सकलनिगमगा वह्निभासा समाना॥६॥ लसद्वर्णादिवारसहृतविद्य
णसुतलितानथासन्मार्गाक्वोज्ज्वलितनसुभगालंकृतिसुता॥ नमो घन्यार्निर्ज्ञाज्ञमनपराकल्पलतिकाकवीनामासेव्याज
यति वरदा सा भगवती॥७॥ सुधांशुर्विबसन्नोवसतियः सुधार्निर्मलान्तमानिनमहंसदासकलसद्गुणालंकृतम्॥
असत्कृतिनिहन्तये विबुधवन्दपदाम्बुजं तथैव निगमागमोज्ज्वलजनप्रदेहिप्रियं॥८॥ विराजतेकान्तिधरीविशालालोके

॥ राम ॥
॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रसिद्धा खलु राजधानी ॥ तथामरावत्यपि किं मनोहरा मरुत्वतः किं त्वलका धनेशितुः ॥ ९ ॥ दिव्येनेयाले देशोयश्च पतिनिकटे कान्तिनाम्ना
न्नगर्य्या भार्याधार्य्यः क्षितीशो नृपतिरणवहाद्दूरसाहः सिंहः आसीद्भूराग्रगण्यः करजितवसुधाधीशवर्य्यः वीरो गुडेरानेदया
यामिह खलु हरिवद्वन्दनीयः स राजा ॥ १० ॥ नराकारो लक्ष्मीपतिरपि विधाता शनधृतिः शिवश्श्रेष्ठो वीरः सकलविबुधास्मानर
वरः ॥ प्रतापज्वालाभीरिपुकुलनिरायां सरत्वनादिवनोदासक्तो यत्र पतिसकलक्ष्मायरिहरः ॥ ११ ॥ सन्नृपः कमनीयरूपवेषः
कविमित्रादिविशेषशोभितः ॥ दानकोटिधनः सहस्रदृष्टिः शतमन्युर्नचगोत्रभित्कथम् ॥ १२ ॥ धैर्य्ये सो हिमवान् दारगणाने
यक्षाधिपः संगरे विघ्नवीजसने यस्त्व निगमे ज्ञाने शिवः केवलं ॥ साङ्ख्ये श्रीकपिलो गुरौ र्थ रूतरः ख्यातः श्रियावासवः ॥ श्री
मद्राजशिरोमणिर्विजयते नेपालभूपालकः ॥ १३ ॥ डंमाघोमाघडघान्नटनिभटनटेस्त्रोटयन्कोटिशचून्कोणविष्टः सदिष्टे
वड्डकनटनटः स्यष्टसृष्टिः ॥ नेष्टः क्लिष्टाशयानास्फुटकटककरीकृहिमांसः प्रसिद्धः कृतठोयोल्कटन्योरटतिपटुरवैः
पंडितः कां निराज ॥ १४ ॥ मानाकान्तवनीपिनारणावद्वाहृरः सुतं भूयनिंगीर्वाणादिमगुह्यविक्रमतपशास्तनयम्भूप्टनम्रे
ते नैयाकविनायकेन रचिना सत्कर्मरत्नावलीविस्मोः पादविभूषणाच विद्यया धर्मादिमोक्षप्रदा ॥ १५ ॥ पयोनिधेरारहतन्त
त्तसारः प्रज्योरहचित्राभरणानि कुर्वन् ॥ तथैव वेदोद्धृतधर्ममार्गगीर्वाणभूयो विनिबन्धकर्त्ता ॥ १५ ॥ ग्रन्थाननेकानवलो
क्य सम्यङ् निरूप्य तेकर्मविचारतत्त्वम् ॥ कृपाविधेयाकृतिभिर्मो परिपिनेव पुत्रस्य सरवेव सखुः ॥ १६ ॥ श्रीमहाराजगीर्वा

CC-0. In Public Domain. Digitization by eGangotri

णापुरुविक्रमवर्मणा ॥ सोयोद्यानेगणेशस्य प्रोच्यते पूजनक्रमः ॥ १७ ॥ इह खलु श्रीमन्नारायणस्य वदनविनिर्गतः स्वतः प्र
माणभूतो वेदः कुर्वन्नेवेह कर्माणि जिजीविषेच्छतम् ॥ समाइत्यनेन यावज्जीवं श्रीमत्परमेश्वरप्रीतये वेदोदितानि कर्माणि कर्त्त
व्यानि तान्येवेष्टसाधकानीत्याह ॥ अतएव कर्मणैव हि संसिद्धिमास्थिता जनकादय इति भारते ॥ ॥ तन्त्रपुराणेपि ॥ ज्ञा
नयोगसहस्राद्धि कर्मयोगः प्रशस्यते ॥ कर्मयोगोद्भवं ज्ञानं तस्मात्तत्परमं पदम् ॥ कर्मज्ञानोद्भवं ब्रह्म न च ज्ञानमकर्मणः
तस्मात्कर्माणि युक्तात्मा तत्त्वज्ञो नित्यमाचरेदिति ॥ तथैव कलसकारोपि फलयुक्तानि कर्माणीति ॥ विद्यां चाविद्यां च यस्त
द्वेदोभयं सह ॥ अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इत्यनेनापि कर्मयुक्तेनैव ज्ञानेनामृतप्राप्तिरित्युक्तेश्च ॥ तस्मा
दृष्टादृष्टफलसाधकानि कर्माणि कर्तव्यानि तेषां च दृष्टफलानां स्वरूपनिष्पत्तिरुत्पन्नानां स्वर्गादिफलसाधनत्वं वा विघ्ने
सति न सिध्यतीति ॥ तत्तत्कर्मणो निर्बन्धकदुरितोपशमनाय ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च सिद्धिकांक्षिभिः ॥ कर्मनिर्विघ्न
सिद्ध्यर्थं सम्पूज्यो गणनायकः इति लिंगपुराणात् दासोविनायकः पूज्य अन्नेचह कुलदेवतेनिगृह्य यापि शिष्यान् ॥ यस्मात्तत्र ते
किंचन कर्माक्रियन्ते इति यत्नुर्मैत्वान् ॥ तत्र तत्रैवाद्रियन्ते किंचनारेतिन्नां स्वतन्त्रलिंगाच्च ॥ श्रीमन्महागणपतये पूजनं कुर्या
दतस्तत्पूजाप्रकारः प्रथममुच्यते ॥ तत्र च सर्वमंगलमांगल्यवरेण्यं वरदं प्रभुम् ॥ नारायणं नमस्कृत्य सर्वकर्माणि का
रयेदिति वामनपुराणवचनात्कृतनित्यक्रियः शुचिः कर्ता स्वासुरवदङ्मुखो वोपविश्य पूजासामग्रीं संपाद्याचम्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णानायमाञ्जलिंबध्वानारायणस्मरणपूर्वकंस्वस्तिवाचनंविदध्यात्॥ इतिनिजक्रम्॥ ॥ इत्युक्तोध्यानाविधिकरणम्॥ ॥
तथाहि॥ हरिः ॐ सुमुषश्चैकदन्तश्चकपिलोगजकर्णकः॥ लम्बोदरश्चविकटोविघ्ननाशोविनायकः॥१॥ धूम्रकेतुर्गणाध्यक्षोभा
लचन्द्रोगजाननः॥ द्वादशैतानिनामानियःपठेच्छृणुयादपि॥ विद्यारम्भेविवाहेचप्रवेशेनिर्गमेतथा॥ संग्रामेसंकटेचैवविघ्न
स्तस्यनजायते॥२॥ शुक्लाम्बरधरंविष्णुंशशिवर्णंचतुर्भुजम्॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशान्तये॥४॥ अभीप्सितार्थ
सिद्ध्यर्थंपूजितोयःसुरासुरैः॥ सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः॥५॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः॥ तत्रश्रीर्वि
जयोभूतिर्ध्रुवानीतिर्मतिर्मम॥६॥ अनन्याश्चिन्तयन्तोमांयेजनाःपर्युपासते॥ तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहम्॥७
स्मृतेसकलकल्याणभाजनंयत्रजायते॥ पुरुषंतमजंनित्यंव्रजामिशरणंहरिम्॥८॥ सर्वेष्वारम्भकार्येषुत्रयस्त्रिभुवनेश्वराः
देवादिशन्तुनःसिद्धिंब्रह्मेशानजनार्दनाः॥९॥ सर्वदासर्वकार्येषुनास्तितेषाममङ्गलम्॥ येषांहृदिस्थोभगवान्मङ्गला
यतनोहरिः॥१०॥ तदेवलग्नंसुदिनंतदेवताराबलंचन्द्रबलंतदेव॥ विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेऽङ्घ्रियुगंस्मरामि
॥११॥ सर्वमङ्गलमाङ्गल्येशिवेसर्वार्थसाधिके॥ शरण्येत्र्यम्बकेगौरिनारायणिनमोस्तुते॥१२॥ इतिदेवतास्मरणम्॥ ॥
अथस्वस्तिवाचनम्॥ ॐ स्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः॥ स्वस्तिपूषाअसुरोदधातुनःस्वस्ति द्यावा
पृथिवीसुचेतुना॥१॥ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः॥ बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥
॥३॥

सोभवंतुनः॥२॥विश्वेदेवानोअद्यस्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये। देवाअवन्त्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वंहसः॥३॥स्व
स्तिमित्रावरुणास्वस्तिपथ्येरेवति॥स्वस्तिनइन्द्रश्चाग्निश्चस्वस्तिनोअदितेकृधि॥४॥स्वस्तिपन्थामनुचरेमसूर्याचंद्रम
साविव॥पुनर्ददताघ्नताजानतासंगमेमहि॥५॥स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंमहद्भूतंवायसंदेवतानाम्। असुरघ्नमि
न्द्रसखंसमत्सुबृहद्यशोनावमिवारुहेयम्॥६॥अंहोमुचमांगिरसंजयंतस्वस्त्यात्रेयम्मनसाचतार्क्ष्यम्प्रयतपाणिः
शरणंप्रपद्येस्वस्तिसंबाधेष्वभयन्नोअस्तु॥७॥ॐस्वस्तिनइन्द्रोवृद्धश्रवाः॥८॥इतिस्वस्तिवाचनंविधाय॥ ततःसंक
ल्पःकर्तव्यः॥संकल्पेनविनाविप्रयत्किंचित्कुरुतेनरः। फलंचाल्पाल्पकंतस्यधर्मस्यार्द्धक्षयोभवेदितिभविष्यवाक्यात्काम
नानात्वरेतनत्रविंशतिसङ्ख्याकान्॥संवत्सर१अयने२मासः३पक्षः४पत्राक्रमेवच॥नवग्रहस्थितिंघस्रभागंनक्षत्रकृ
तेकम्॥स्वदेशभेदंसत्तुल्यान्कामनासहितान्वदेत्। द्वीपेअमुकेअमुकेखण्डेअमुकेवर्षेचनीहनो॥अमुकेत्यमुकेक्षेत्रेगोत्रप्र
वरस्वरेण॥स्वनामजातिनामानंद्विजास्कर्मचवर्मच॥ग्रन्थोदासोथामुकस्यकार्यस्यसिद्धिकामुकः॥करिष्येचामुकंकर्म
स्वनित्यपूजनादिकम्॥अथारम्भदिनेरेतेनसन्निसन्निबाधके॥करिष्येइतिसंकल्पमनसैवप्रकल्पयेत्॥वदेद्वाचाभि
लाषंवाकर्मणान्वोपपादयेत्॥इतिमेरुवचनात्॥कुशोदकंसमादायसंकल्पेनहिवाक्यतः॥निष्फलंतनयुनंवाक्यमात्म
नेयदिसूज्यते॥मध्येकामश्चहेतुंचतिथ्यादींवाक्यमुच्चरेत्॥मासपक्षंतथावारंतिथिंनक्षत्रमेवच॥योगंनामस्वगोत्रंच

॥राम॥
॥३॥

3

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथादिःकामस्यैव ॥ इतिस्कंदपुराणात् ॥ ॥ मासपक्षतिथीनांचनिमित्तानांचसर्वशः ॥ उल्लेखनमकुर्वाणोनरकंप्रतिपद्यतइति
शास्त्रानुपवचनाच्चसंकल्पस्वरूपमुच्यते ॥ ॥ ॐतत्सत्‌विष्णुर्विष्णुर्विष्णुःश्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्त्तमान
स्यब्रह्मणोद्वितीयपरार्द्धेश्वेतवाराहकल्पेवैवस्वतमन्वन्तरेष्टाविंशेकलियुगेप्रथमचरणेजम्बूद्वीपेभरतखंडेआर्यावर्त्तान्त
र्गतामुकक्षेत्रेमुकदेशेमुकसम्वत्सरेऽमुकायनेऽमुकमासेमुकपक्षेमुकतिथावमुकवासरेमुकयोगेऽमुककरणेमुकनक्षत्रेऽ
मुकमुहूर्त्तेमुकराशिस्थितेरवावमुकराशिस्थेदेवगुरौशेषेषुग्रहेषुयथायथास्थानस्थितेषुसत्सुएवंगुणविशेषविशिष्टायां
पुण्यतिथौअमुकगोत्रोमुकप्रवरोमुकराशिरमुकनक्षत्रोमुकशर्मावर्म्मागुप्तदासोवाअमुकस्थानस्थाविवाहादिकर्मप्रतिबंध
कदुरितोपशमनद्वारानिर्विघ्नपूर्वकेनतत्कर्मसमाप्त्यर्थंदीर्घायुरारोग्यैश्वर्याभिवृद्ध्यर्थंयथामिलितेनोपचारेणश्रीमन्महाग
णपतेःपूजनमहंकरिष्ये ॥ इतिसंकल्प्य ॥ रक्ताक्षतादिभिरष्टदलंविधायतस्मिन्पूजयेत् ॥ ॥ अथावाहनम् ॥ ॐका
रस्यब्रह्मऋषिर्देवीगायत्रीछन्दःपरमात्माग्निवायवोदेवताःसर्वकर्मारम्भेविनियोगः ॥ ॐभूर्भुवःस्वरितिमहाव्याहृतीनांज
मदग्निभरद्वाजभृगवऋषयोग्निवायुसूर्यादेवतादेवीगायत्र्युष्णिगनुष्टुप्छंदांसिगणपतेरावाहनेविनियोगः ॥ ॐगणानांत्वे
तिमन्त्रस्यप्रजापतिर्ऋषिर्यजुर्गणपतिर्देवतागणपतेरावाहनपूजनयोर्विनियोगः ॥ ॐगणानान्त्वागणपतिंहवामहेप्रिया
णान्त्वाप्रियपतिंहवामहेनिधीनान्त्वानिधिपतिंहवामहेवसोममआहमजानिगर्भधमात्वमजासिगर्भधम् ॥ ॐभूर्भुवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वःश्रीमन्महागणपतेसिद्धिबुद्धिसहितसाङ्गधसवाहनः सपरिवारइहागच्छेहतिष्ठममपूजांगृहाणास्मिन्कर्मणिनिर्विघ्नंकुरु
हेहेरम्बत्वमेह्येहिअम्बिकात्र्यम्बिकात्मजसिद्धिबुद्धिपतेत्र्यक्षलक्षलाभपितःपितः॥ नागास्यनागहाररत्नंगणराजचतुर्भुज॥ भू
षितःस्वायुधैर्दिव्यैःपाशांकुशपरश्वधैःआवाहयामिपूजार्थंरक्षार्थंचममक्रतोः॥ इहागत्यगृहाणत्वंपूजांरक्षक्रतुंचमे
आगच्छागच्छदेवेशतेजोराशेजगत्पते॥ क्रियमाणांमयापूजांगृहाणसुरसत्तम॥ १ ॥ अथासनम्॥ नानारत्नसमायुक्तं
कार्त्तस्वरविभूषितम्॥ आसनंदेवदेवेशप्रीत्यर्थंप्रतिगृह्यताम्॥ गणानान्त्वा॥ २ ॥ अथपाद्यम्॥ गंगादिसर्वतीर्थेभ्यो
मयाप्रार्थनयाहृतम्॥ तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यताम्॥ गणानान्त्वा॥ ३ ॥ अथार्घः॥ नमस्तेदेवदेवेशनमस्ते
धरणीधर॥ गणनाथनमस्तेस्तुअर्घ्यन्नःप्रतिगृह्यताम्॥ गणानान्त्वा॥ ४ ॥ अथाचमनम्॥ कर्पूरवासितंतोयंमन्दाकि
न्याःसमाहृतम्॥ आचम्यतांजगन्नाथमयादत्तंहिभक्तितः॥ ५ ॥ अथस्नानम्॥ गंगाचयमुनाचैवनर्मदाचसरस्वती
तापीपयोष्णीरेवाचताभ्यःस्नानार्थमाहृतम्॥ तोयमेतत्सुखस्पर्शंस्नानायप्रतिगृह्यताम्॥ ६ ॥ पञ्चामृतस्नानम्॥ अथ
वस्त्रम्॥ सर्वभूषाधिकेदेवलोकलज्जानिवारणे॥ मयोपपादितेतुभ्यंवाससीप्रतिगृह्यताम्॥ ७ ॥ अथपुनराचमनीयम्॥
अथयज्ञोपवीतम्॥ गणेश्वरनमस्तेस्तुत्राहिमांभवसागरात्॥ ब्रह्मसूत्रंसोत्तरीयंगृहाणसुरसत्तम॥ ८ ॥ अथचन्दनम्॥
श्रीखंडचंदनंदिव्यंगंधाढ्यंसुमनोहरम्॥ विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यताम्॥ ९ ॥ अथपुष्पम्॥ माल्यादीनिसुगंधीनिमा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लन्याधीनिवेद्यप्रभो॥ मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतानाम्॥१० ॥अथधूपः॥ ॐवानस्पत्योरसोत्पन्नोगन्धाढ्योगन्धउत्तमः। वनस्पतिरसोदिव्योगंधाढ्यःसुमनोहरः॥ आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम्॥११॥ अथदीपः॥ आज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया॥ दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहम्॥१२॥ अथनैवेद्यम्॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितम्॥ भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यताम्॥ ॥अथफलम्॥ इदंफलंमयादेवस्थापितंपुरतस्तव॥ तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि॥ अथपुनराचमनम्॥१३॥ अथताम्बूलम्॥ पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतम्॥ कर्पूरादिसमायुक्तंताम्बूलंप्रतिगृह्यताम्॥१४॥ अथदक्षिणा॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः॥ अनन्तपुण्यफलदमतःशान्तिंप्रयच्छमे॥ नीराजनम्॥ चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच॥ त्वमेवसर्वज्योतींषिआर्तिक्यंप्रतिगृह्यताम्॥१५॥ अथपुष्पाञ्जलिः॥ ॐयज्ञेनयज्ञम्॥ नमस्कारः॥ विघ्नेश्वरायवरदायसुरप्रियायलम्बोदरायसकलायजगद्धिताय॥ नागाननायश्रुतियज्ञविभूषितायगौरीसुतायगणनाथनमोनमस्ते॥ भक्तार्तिनाशनपरायगणेश्वराय सर्वेश्वरायशुभदायसुरेश्वराय॥ विद्याधरायविकटायचवामनायभक्तप्रसन्नवरदायनमोनमस्ते॥ नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः॥ नमस्तेरुद्ररूपायकरिरूपायतेनमः॥ विश्वरूपस्वरूपायनमस्तेब्रह्मचारिणे॥ भक्तप्रियायदेवायनमस्तुभ्यंविनायक॥ इतिनमस्कारविशेषार्घः॥ ॐरक्षरक्षगणाध्यक्षरक्षत्रैलोक्यरक्षक॥ भक्तानामभयंकर्तात्राताभवभवार्णवात्॥ द्वैमातुरकृपासिन्धोषाण्मातुराग्रजप्रभो॥ वरदस्त्वंवरंदेहिवाञ्छितंवाञ्छितार्थद॥ अनेनफलदानेनफलदोस्तुसदामम॥ नमःप्रार्थनम्॥ आवाहनंनजानामिनजानामिविसर्ज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥ नम्॥ पूजांचैव न जानामि क्षमस्व परमेश्वर॥ त्वां विघ्नशत्रुदलनेति च सुंदरेति भक्तप्रियेति सुखदेति फलप्रदेति। विद्याप्रदे
॥ ५ ॥ त्यघहरेति च ये स्तुवंति नित्यं भोगरोऽश्रव रदो भवति त्वमेव॥ ॥ इति श्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविध
विरुदावलिविराजमानश्रीमन्महाराजाधिराजश्रीगीर्वाणयुद्धविक्रमसाहदेवकारितायां गौरीदत्तकृतायां गीर्वाणरत्नावल्यां सर्व
कर्मांगभूतगणेशपूजाप्रयोगरत्नं प्रथमं प्रकरणम्॥ १॥ गीर्वाणयुद्धविक्रमस्य नेपालभूपालनतत्परस्य। रत्नावली
भवनराज्ययां गणेशपूजाभिधकर्मरत्नम्॥ १ ॥ अथ पुण्याहवाचनम्। संपूज्य गंधपुष्पाद्यैर्ब्राह्मणान्स्वस्ति वाचयेत्॥ ध
र्मकर्मणि मांगल्ये संग्रामेद्भुतदर्शने॥ इति व्यासवचनात् त्र्यधिकान्ब्राह्मणान्यथाविभवं प्राङ्मुखो यजमानः पुरतः कलशं स्थापये
त्॥ तन्मंत्रकारो यथा॥ ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतान्नो भरीमभिरिति मंत्रेण भूमिं स्पृष्ट्वा॥ ॐ ओष
यः समिति यवान्॥ आजिघ्र कलशमिति कलशं स्थापयित्वा॥ वरुणस्योत्तंभनमिति निर्मलतीर्थजलादिना पूरयित्वा
गंधद्वारामिति गंधं क्षिपेत्॥ या ॐ ओषधीः॥ पूर्वजाता इति मंत्रेण हरिद्राद्वय २ कुष्ठ मांसी ४ मुरा ५ शैलेय ६ चन्दन ७ वचा ८ क
र्चूर ९ मुस्ता १० ख्याः सर्वौषधीः॥ ओषधयः समिति यवान्॥ कांडात्कांडादिति दूर्वाः॥ अश्वत्थे वइत्यश्वत्थो १ उदुम्बर २ प्लक्ष ३ ॥ राम ॥
चूत ४ न्यग्रोधा ५ ख्याश्च पल्लवान्॥ स्योना पृथिवीति गजस्थानाश्वस्थानगोष्ठवल्मीकसंगमह्रदराजद्वारसमाहृताः सप्त ॥ ५ ॥
मृदः॥ याः फलिनीरिति फलानि परिव्राजयन्तिः कविरिति सुवर्णरजतमणिमुक्ताप्रवालसंज्ञानि पंचरत्नानि॥ अभावे

5

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पंचरत्नानां हेमसर्वत्र योजयेदिति वचनाद्धिरण्यगर्भ इति हिरण्यं वा ॥ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमा
नः ॥ तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति वस्त्रयुग्मेन रक्तवस्त्रेण चवेष्टयेत् ॥ ॐ पूर्णा दर्वी निधान्पूर्णायान्
कलशोपरि न्यसेत् ॥ ततुपरि ॥ ॐ तत्त्वा यामीति वरुणमावाह्य स्नानासन पाद्यार्घाचमनीय स्नान यज्ञोपवीत चन्दनाक्षत पु
ष्प धूप दीप नैवेद्य दक्षिणादीनि वरुणाय नम इति पूजयित्वा ॥ वरुणः सांगः सपरिवारः प्रीयतामिति प्रार्थयित्वा ॥ कलशा
भिमंत्रणम् ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ १ ॥ कलशस्य मुखे विष्णुः कं
ठे रुद्रः समाश्रितः ॥ मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ २ ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजु
र्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ ॥ ततः कलशप्रार्थना ॥ देवदानवसंवादे मथ्यमाने महोद
धौ ॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्र
तिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेपि यतः का
मफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ इति कलशप्रार्थना ॥ ॥ अवनि
कृतजानुमंडलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय ॥ दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा ॥ दीर्घानागानद्रो
गिरयस्त्रीणि विष्णुपदानि च ॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ॥ अतो धर्माणि धारयन् ॥ तेनायुः प्रमाणेन पुण्यप्रमाणं

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ६ ॥

दीर्घमायुरस्तु॥ शिवा आपः संतु॥ सौमनस्यमस्तु॥ अक्षतं चारिष्टं चास्तु॥ गंधाः पांतु॥ सौमंगल्यं चास्तु॥ पुष्पाणि पांतु श्रियमस्तु॥
अक्षताः पांतु श्रियमस्तु॥ तांबूलानि पांतु॥ ऐश्वर्यमस्तु॥ दक्षिणाः पांतु॥ बहुदेयं चास्तु॥ वस्त्राणि पांतु॥ आरोग्यमस्तु॥ दीर्घमायुः
शांतिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः
प्रवर्त्तन्ते॥ तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाथर्ववचनं बहुऋषिमतं संमतं ज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये॥
वाच्यताम्॥ भद्रं कर्णेभिः॥१॥ देवानां भद्रा २ दीर्घायुत्वाओषधे ३ न तद्रक्षाॐसि ४ द्रविणोदाः पिपीषति ५॥ द्रविणोदा द्रवि
णस्तु वस्य द्रविणोदाः सनरस्य प्रयंसत्॥ द्रविणोदा वीरवतीमिषन्नो द्रविणोदा रासते दीर्घमायुः॥१॥ सविता पश्चातात्स
विता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः॥२॥ नवो नवो भवति जा
यमानोऽह्नां केतुरुषसामेत्यग्रम्॥ भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरते दीर्घमायुः॥ उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अ
श्वदाः सह ते सूर्येण॥ हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्रतिरन्त आयुः॥४॥ व्रतनियमतपःस्वाध्यायक्रतुदमदानवि
शिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयतां॥ समाहितमनसः स्मः॥ प्रसीदन्तु भवन्तः॥ प्रसन्नाः स्मः॥ शान्तिरस्तु॥ वृद्धिरस्तु
अविघ्नमस्तु॥ आयुष्यमस्तु॥ आरोग्यमस्तु॥ शिवं कर्मास्तु॥ कर्मसमृद्धिरस्तु॥ वेदसमृद्धिरस्तु॥ शास्त्रसमृद्धिरस्तु॥ धनधान्य
समृद्धिरस्तु॥ इष्टसमृद्धिरस्तु॥ पुत्रपौत्रसंपदस्तु॥ बहिः॥ अरिष्टनिरसनमस्तु॥ यत्पापं रोगमकल्याणं तत्प्रतिहतमस्तु॥२॥

॥ राम ॥
॥ ६ ॥

6

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्धेयस्तदस्तु ॥ उत्तरेकर्मणपवि घ्नमस्तु ॥ उत्तरोत्तरमहरहरभि वृद्धिरस्तु ॥ उत्तरोत्तराः क्रियाः शुभाःशोभनाःसंपद्यंतांम् ॥ तिथिक
रणमुहूर्तनक्षत्रलग्नाधिदेवताःप्रीयन्तांम् ॥ तिथिकरणोमुहूर्त्तनक्षत्रे सग्रहे सदैवते प्रीयेतांम् ॥ दुर्गापांचालौप्रीयेतांम् ॥ अग्नि
पुरोगाविश्वेदेवाः प्रीयंतांम् ॥ इन्द्रपुरोगामरुद्गणाः प्रीयंतांम् ॥ वसिष्ठपुरोगाऋषिगणाः प्रीयंतांम् ॥ माहेश्वरीपुरोगाउमामा
तरः प्रीयंतांम् ॥ अरुंधतीपुरोगाएकपत्न्यःप्रीयंतांम् ॥ विष्णुपुरोगाः सर्वेदेवाः प्रीयंतांम् ॥ ब्रह्मपुरोगाः ॥ सर्वेवेदाःप्रीयंतांम्
ब्रह्मचब्राह्मणाश्चप्रीयंतांम् ॥ श्रीसरस्वत्यौप्रीयंतांम् ॥ श्रद्धामेधेप्रीयेतांम् ॥ भगवतीकात्यायनीप्रीयतांम् ॥ भगवतीमाहेश्व
रीप्रीयतांम् ॥ भगवतीऋद्धिकरीप्रीयतांम् ॥ भगवतीपुष्टिकरीप्रीयतांम् ॥ भगवतोविघ्नविनायकौप्रीयेतांम् ॥ सर्वाग्राम
देवताःप्रीयतांम् ॥ सर्वाःकुलदेवताःप्रीयतांम् ॥ हताब्रह्मद्विषः ॥ हताश्चपरिपंथिनः ॥ हताश्चविघ्नकर्तारः ॥ शत्रवःपराभवंया
तुशाम्यंतुघोराणि ॥ शाम्यन्तुपापानि ॥ शाम्यंत्वीतयः ॥ शुभानिवर्द्धंतांम् ॥ शिवाआपःसंतु ॥ शिवाऋतवःसंतु ॥ शिवाऋतवः
संतु ॥ शिवाअग्नयःसंतु ॥ शिवाआहुतयःसंतु ॥ शिवाओषधयःसंतु ॥ शिवावनस्पतयःसंतु ॥ शिवाअतिथयःसंतु ॥ अहोरात्रे
शिवेस्यातांम् ॥ निकामेनिकामेनःपर्जन्योवर्षतुफलवत्योनओषधयःपच्यंतांयोगक्षेमोनःकल्पतांम् ॥ निकामेनिकामेनःप
र्जन्योवर्षत्विति निकामेनिकामेवैतत्रपर्जन्योवर्षतियत्रैतेनयज्ञेन ॥ यजंतेफलवत्योनओषधयःपच्यंतामितिफलवत्यो
वैनओषधयः ॥ पच्यंतेयत्रैतेनयज्ञेनयजंतेतस्माद्योगक्षेमोनःकल्पतामितियोगक्षेमोवैनत्रकल्पतेयत्रैतेनयज्ञेनयजंते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ८ ॥

तस्माद्यद्वैतेनेनयजनेकृत्स्नः प्रजानांयोगक्षेमोभवति ॥ भुक्तांगारकबुधबृहस्पतिशनिराहुकेतुसोमसहिताः आदित्यप्रमुखाग्रहाः
सर्वेग्रहाः प्रीयन्ताम् ॥ भगवान्नारायणः प्रीयताम् ॥ भगवान्पर्जन्यः प्रीयताम् ॥ भगवान्स्वामीमहासेनः प्रीयताम् ॥ इति
॥ ॥ अथपुण्याहकालेवाचयिष्ये ॥ ॐवाच्यताम् ॥ ब्राह्मंपुण्यमहर्यच्चसृष्ट्युत्पादनकारकं ॥ वेदवृक्षोद्भवंनित्यंतत्पुण्या
हंब्रुवंतुनः ॥ अद्येहामुकगोत्रस्यामुकप्रवरस्यामुकशर्मणोममयजमानस्यगृहेभोब्राह्मणाअस्यामुककर्मणः पुण्याहंभ
वंतोब्रुवंतु ॥ इतित्रिर्मन्द्रमध्यमोच्चस्वरेणश्रावयेत् ॥ ततोब्राह्मणाः ॐपुण्याहम् इतित्रिर्ब्रूयुः ॥ ॐपुनंतुमादेवजनाः पु
नंतुमनसाधियः ॥ पुनंतुविश्वाभूतानिजातवेदः पुनीहिमा ॥ सयः कामयेतमहत्प्राप्नुयामित्युदगयनआपूर्यमाणप
क्षेपुण्याहेद्वादशाहमुपसद्व्रतीभूत्वौदुम्बरेकंसेचमसेवासर्वौषधंफलानीतिसंभृत्यपरिसमुह्यपरिलिप्याग्निमुपसमाधा
यावृताज्यंसंस्कृत्यपुंसानक्षत्रेणमन्थंसन्नीयजुहोति ॥ इतिपुण्याहः ॥ अथशाकुन ॥ ॐउद्गातेवशकुनेसामगायसिब्रह्मपुत्रइव
सवनेषुसंशसि ॥ वृषेववाजीशिशुमतीरपीत्यासर्वतोनः शकुनेभद्रमावदविश्वतोनिःशकुनेपुण्यमावद ॥ इत्यृक ॥ पुनानइति
सामगानम् ॥ पुनानः सोमा२धारा२३४या ॥ आपोवसानोअर्षस्यारत्नधायोनिमृतस्यसा२ यिदसायि ॥ ईहा२३उवा ॥ उत्सोदेवो
हिरा२३२ हायिउहा२३ उवा२३४याहो५ इडा१ ॥ इतिसाम ॥ पृथिव्यामुद्धृतायांतुयत्कल्याणंपुराकृतम् ॥ ऋषिभिः सिद्धगंध
र्वैस्तत्कल्याणंब्रुवंतुनः ॥ १ ॥ अद्येहामुकगोत्रस्यामुकशर्मणोममगृहेभोब्राह्मणाअमुकस्यास्यकर्मणः कल्याणंभवंतोब्रुवंतु ॥ इ

॥ राम ॥
॥ ८ ॥

7

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तिब्राह्मणांस्त्रिः श्रावयेत् ॥ ब्राह्मणाश्च ॥ ॐ कल्याणमिति त्रिर्ब्रूयुः ॥ ॐ यथेमां वाचं कल्याणीमा ॥ अथाध्वर्योः प्रतिगरेणानुरिमेय
जमानाभद्रमेभ्यो यजमानेभ्यो भूयादिति कल्याणमेवैतन्मानुष्यैवाचोवदति ॥ इतियजुः ॥ अथर्क ॥ अयाः सोममसमिंदं प्रयाहि
कल्याणीर्जयासुरसंमृहेते ॥ यत्रा रथस्य बृहतो निधानं विमोचनं वाविनो दक्षिणावत् ॥ इत्यृक ॥ कथानश्चित्रसाम ॥ सागरस्य
यथात्रऋद्धिर्महालक्ष्म्यादिभिः कृता ॥ संपूर्णास्तुप्रभावाचनामृद्धिं प्रब्रुवंतु नः ॥ इतित्रिः ॥ ॐ ऋध्यतामिति त्रिः ॥ ॐ सत्रस्यऋद्धि
रसगन्म ॥ तत उत्तरस्य हविर्धानस्य जघन्यायां कूवर्यां ॐ सामाभिगायंति सत्रस्य ऋद्धिरिति एतद्धि मे वैतदभ्युक्तिष्ठंत्युत्तरं वे
देवैत्तरायाः ॐ श्रोणाविनं तं तुक्तंतनरं यउत्तरस्य हविर्धानस्य जघन्यायां कूवर्यां मगन्म ज्योतिरमृता अभूमेति ज्योतिर्वा एतेभ
वत्यमृता भवंति ये सत्रमासते दिवं पृथिव्या अध्यारुहामेति दिवं वा एते पृथिव्या अध्यारोहंति ये सत्रमासते विदाम देवान्
ति विदंति हि देवान्स्वर्ज्योतिरिति त्रिर्निधनमुपावयंति स्वर्हि ते भवंति तत्य देवैतस्य साम्नो रूपं तद्देवैते भवंति ये सत्रयास
ते ॥ इतियजुः ॥ ॥अथर्क ॥ अध्यामसोमं सत्त्रु यामवाचमानो मंत्रं सरथे होयपातानाम् ॥ यज्ञो नय क्कंमधुगोष्वन्तराभृतां सो अष्टि
नोः काममपाः ॥ चाध्यास्मह व्ये र्नमसोपसद्यमित्रं देवं मित्रधेयं नो अस्तु ॥ अनूराधान् हविषावर्द्धयन्तः ——ज्जीवेमशरदः शुवी
राः ॥ त्रीणि त्रीणि वै देवानामृद्धानि त्रीणि छंदांसि त्रीणि सवनानि त्रय इमे लोकाः ॥ ऋद्ध्यामेव तद्वीर्य एषु लोकेषु प्रतिष्ठति
इत्यृक ॥ ओ होवा अगन्मज्योतिः साम ॐ होवा ॐ होवा ॐ होवा ॥ अगन्मज्योति ॥२॥ अगन्मज्योतिः ॥ अमृता अभूया ॥ अमृता अभू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥ मानरिक्षंपृथिव्याअध्यारुहामा२ ॥ न्तरिक्षमृथिव्याअध्यारुहामा ॥ दिवमंतरिक्षादध्यारुहामा३ ॥ अविदामदेवान् ॥ ३ ॥ समुदेवै
॥ ८ ॥ रगन्महि३ ॥ ॐ होवा ॐ होवा ॥ सुवर्ज्योती२३४५ हाउ २ ॥ इमाःप्रजापतेर्हायि२ प्रजापते हाउ ॥ उ ॥ वा२ए हृदयं२ ॥ स्हृदया३ ॥ उवा२
प्रजारूपमजीजने३ इह्इडा२३४५ ह२ह हाउ यसे हाउ३ ॥ आस्मिन्हायि ॥ आस्मिन्हाउवा३ ॥ इतिसाम ॥ स्वस्तिर्यअविनाशा(
ख्याःपुण्यकल्याणवृद्धिदा ॥ विनायकप्रियानित्यंतांस्वस्तिंप्रब्रुवंतुनः ॥ १ ॥ अमुकगोत्रस्यामुकशर्मणोममगृहेमुककर्मणःस्वस्ति
भवंतोब्रुवंतु ॥ इतिविप्रः ॥ ॐ आयुष्मतेस्वस्ति इतिचविप्रः ॐ स्वस्तिनइन्द्रोवृद्धश्रवाः ॥ गातुंयज्ञायगातुंयज्ञपतये इतिगातु ॐ होषय
ज्ञायेत्यनितगातुंयज्ञपतयेयोयज्ञस्यस्व ॐ स्त्यांदेवीस्वस्तिर्मानुषेभ्य इतिस्वस्तिनोदेवत्रास्तुस्वस्तिमनुष्येभ्येत्येवेनदाहोर्ध्वंजिगातुभे
षजमित्यूर्ध्वोनोयंयज्ञोदेवलोकंजयत्वित्येवैतदाहशंनोअस्तुद्विपदेशंचतुष्पदइत्येतावद्वाइदं ॐ सर्वंयावद्द्विपाच्चैवचतुष्पाच्च
तस्माएवैतद्यज्ञस्यस्व ॐ स्त्यांगत्वाशंकरोतितस्मादाहशंनोअस्तुद्विपदेशंचतुष्पदे ॥ इतियजुः ॥ ॐ स्वस्त्ययेवायुमुपब्रवाम 8
हैसोमंस्वस्तिभुवनस्ययस्पतिः ॥ बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः ॥ अथैदेवावसवः ॥ सौम्यासम्बन्नस्वो
देवीरजराःश्रविष्ठाः तेनंयातुरजसःपरस्तात्संवत्सरीणममृतंस्वस्ति ॥ इयमृक् ॥ त्रातारमिंद्रमितिसाम ॥ त्रातारमिन्द्रमवितार
रमिं२इन्द्राम् ॥ हवेसुहवंशूरमिं२इन्द्राम् ॥ ऊवायिनुशक्रंपुरुहू ॥ तमि२ ॥ इन्द्राम् ॥ इदंस्वस्तिनोमघवाधा ॥ वा२४३यि ॥ तु२वा५ ॥ राम ॥
यिन्द्रा६५६ इतिसाम४ क्षीरोदधिसमुद्भूतामथ्यमानेमहोदधौ ॥ विश्वेश्चैवप्रियानित्यंतांश्रियंप्रब्रुवंतुनः ॥ श्रीरस्त्वितिभवन्तो ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुवंविनिन्दिः॥ ॐश्रीः॥ मनमःकामवाक॥ यजुः॥ श्रियेजातः श्रियएवैनम्॥ यस्मिन्ब्रह्माभ्यजयन्सर्वमेतद्‌मुंचलोकमिदमूंचस
र्वम्॥ तन्नोनक्षत्रमभिजिद्विजित्यश्रियंदधात्वहृणियमाणं॥ अहिर्बुध्न्ययमंत्रंमेगोपायमृषयस्त्रयीवेदाविदुः॥ ऋचःसामानि
यजूं ॐषिसाहिश्रीरमृनासतान्॥ अद्भिर्भिनवतोभुवन्तु॥ ॐहृद्भिः॥ ॐजैपश्चैवचमआधि॥ ई॥ ॐशांतिर्भवंतोब्रुवन्तु॥ २॥ ॐशांतिः३
ॐश्रीःशांतिः ७॥ ॐपुण्याहवाचनसमृद्धिरस्तुभगवान्प्रजायतिःप्रीयताम्॥ ततःकुशाग्रैःपञ्चवैश्वविप्राअभिषिंच्यब्राह्मणा
तिलकाद्याशीर्वादंयजमानायदद्युरिति॥ २॥ इतिश्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलीविरा
जमानमानोन्नतश्रीमन्महाराजाधिराजश्रीश्रीश्रीश्रीश्रीगीर्वाणयुद्धविक्रमसाहदेवकारितायांगोरीदत्तकृतायांसत्कर्मर
त्नावल्यांपुण्याहवाचनप्रयोगरत्नंद्वैतीयकंसकरणम्॥ २॥ गीर्वाणयुद्धादिवविक्रमस्यनेपालभूपालनतन्परस्य॥ कृताव
गाहंसवनिवद्धितीयंपुण्याहसंज्ञंवरकर्मरत्नम्॥ १॥ अथमातृकापूजाप्रयोगः॥ कर्ताप्रक्षालितपाणिपादःस्वाचांतःकृतकुशो
पग्रहःप्रथमंद्वारवहिर्देशेस्थापितगोमयःसप्तदशपिंडिकासुमातृपूजांकुर्यात्॥ ॐअद्येत्यादिदेशकालौस्मृत्वाप्रारीप्सिता
मुककर्मणनिर्वंधकदुरितोपशमनद्वारामृत्तिकामंगलभूतविनायकपूजापूर्वकादित्यादिसप्तदशमोमयमातृपूजामहंक
रिष्यइतिसंकल्प्य॥ पूर्वोक्तप्रकारेण॥ ॐभूर्भुवःस्वःश्रीमन्महागणपतयेनिमावाहयामिस्थापयामिपूजयामि॥ गणानान्त्वेति
मंत्रेणस्नानीयाद्यार्घाचमनीयस्नानवस्त्रयज्ञोपवीतगंधपुष्पाक्षतधूपदीपनैवेद्यताम्बूलदक्षिणाश्रीमन्महागणपत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्ना ॥ ये सिद्धिबुद्धिसहिताय नमः इति पूजयित्वा वक्रतुंड महाकायेत्यादिना प्रार्थयित्वा ॥ अदित्यादिसप्तदशमातॄः पूजयेत् ॥ तद्यथा
॥ ९ ॥ ॐ एतन्ते देवसवितः ॥ ॐ मनोजूतिरिति मंत्राभ्याम् ॥ ॐ भूर्भुवः स्वः अदित्यादिसप्तदशमातर इहागच्छत इह तिष्ठतेत्यावाह्य प्रति
ष्ठाप्य ॥ अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती ॥ कीर्तिर्लक्ष्मी धृतिर्मेधा पुष्टिः श्रद्धा क्रियामतिः बुद्धिर्लज्जा वपुः शांतिर्देता
गोमयमातरः ॥ ॐ अदितिरिति ॥ १ ॥ देवमातासि ॥ २ ॥ ॐ स्वाहासि ॥ ॐ सिद्धिरसि ॥ ॐ सरस्वत्यसि ॥ ॐ कीर्तिरसि ॥ ॐ लक्ष्मी
रसि ॥ ॐ धृतिरसि ॥ ॐ मेधासि ॥ ॐ पुष्टिरसि ॥ श्रद्धासि ॥ क्रियासि ॥ मतिरसि ॥ बुद्धिरसि ॥ लज्जासि ॥ वपुरसि ॥ इति प्रत्येकं
स्तवेन् ॥ एतानि पाद्यार्घ्याचमनीयस्नानपुनराचमनीयवस्त्रगंधसिंदूराक्षतपुष्पधूपदीपनैवेद्यादिभ्यो नमः ॥ एवमोंका
रपूर्वेण चतुर्थ्यंतनमोंतेन स्वस्वनाममंत्रेण देवमात्रादिषोडशमातॄः पूजयित्वा ॥ अदित्यादिसप्तदशमातरः पूजिताः क्षमध्व
मिति प्रार्थयेदिति पूजाक्रमः ॥ ततः समाचारतश्चौभिर्मृत्तिकामंगलविधानं विधेयम् ॥ ॥ इति मृत्तिकामङ्गलविधिः ॥ ॥ 9
अथ कलशस्थापनम् ॥ पुण्याहवाचनप्रकरणोक्तप्रकारेण कलशस्थापनं कृत्वा तमभिमंत्र्य प्रार्थयित्वा ॥ पूर्णादर्वी
ति मंत्रेण कलशमुखे धान्यपरिपूर्णशरावकं निधाय तदुपरि ॐ अमृज्योतिरिति मंत्रेण प्रज्वालितदीपं निधाय कलशस्कं
धप्रदेशे गणपतिदुर्गावाय्वाकाशाश्विनीकुमाराः पंच देवताः स्वस्वमंत्रैरावाहनपूर्वकं पूजयेत् ॥ तत्रैवं संकल्पः ॥ ॐ अद्ये ॥ राम ॥
त्यादिदेशकालादिस्मृत्वा करिष्यमाणामुककर्मनिर्विघ्नपरिसमाप्त्यर्थं गणपतिदुर्गावाय्वाकाशाश्विनीकुमारपूजनमहं क ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

रिषे ॥ ॐकारस्य ब्रह्मऋषिर्देवी गायत्री छंदः परमात्माग्निर्वायवो देवताः पूजने विनियोगः ॥ गणपतिमावाहयामि स्थापया
मि ॥ ॐ अम्बे अम्बिके इति प्रजापतिर्ऋषिर्दुर्गा देवतानुष्टुप् छंदो दुर्गावाहनपूजनयोर्विनियोगः ॥ ॐ अम्बे अम्बिके दुर्गामावा
हयामि स्थापयामि ॥ ॐ वातो वेति गंधर्व ऋषयो वातो देवतो ऽग्निक छंदो वायवावाहनपूजनयोर्विनियोगः ॥ ॐ वातो वा वायुमा
वाहयामि स्थापयामि ॥ इति पूजनम् ॥ ॐ मूर्ध्वानं असे इति प्रजापतिर्ऋषिराकाशो देवतो ऽग्निक छंदो वायावाहनपूजनयोर्वि
नियोगः ॥ ॐ तुर्ध्वो अस्य आकाशमावाहयामीत्यादि ॥ ॐ अश्विनो भैषज्येनेत्यश्विऋषिरश्विनौ देवते अश्विनोरावाहनपूज
नयजनयोर्विनियोगः ॥ ॐ अश्विनो भैषज्येन तेजसे ॥ अश्विनावावाहयामि स्नानीयाद्यार्घाचमनीयमित्याद्युपचारैः पू
जा कार्या ॥ इति कलशमंगलविधि ॥ ॥ अथ नोरणामातृपूजा ॥ ॐ अद्येत्यादि देशकालौ स्मृत्वा कर्तव्यामुककर्मनिर्विघ्नपरि
समाप्त्यर्थं गौर्यादिदशनोरणामातृपूजामहं करिष्ये इति संकल्प ॥ ॐ स्नत मे मनोज्ञुतिः ॐ भूर्भुवः स्वः गौर्यादिदशनोर
णामातरः इहागच्छत इह तिष्ठतेत्यावाह्य प्रतिष्ठापयेत् ॥ नाम्न यथा ॥ गौरी च धनदा नन्दा विमला मंगला बला ॥ गंगा च यमुना
धात्री विधात्री तोरणाम्बिका ॥ ॐ गौर्यसि ॥ धनदासि नंदासि ॥ विमलासि ॥ मंगलासि ॥ बलासि ॥ गंगासि ॥ यमुनासि ॥ धात्र्यसि
विधात्र्यसि ॥ इति प्रत्येकं नाम्ना स्पृशेत् ॥ ततः ॐकारपूर्वकेण नमोन्तचतुर्थ्यन्तेन स्वस्वनाममंत्रेण पाद्यार्घाचमनीयस्नानी
यवस्त्रंऽनराचमनीयगन्धपुष्पाक्षतधूपदीपताम्बूलनैवेद्यद्रव्यैः पूजयित्वा प्रणाम्य विसर्जयेत् ॥ ॥ इति तोरणामातृपूजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ १० ॥

॥३॥ अथ वारमातृपूजनम्॥ ॐ अद्येत्याद्युक्तकर्मनिर्विघ्नपरिसमाप्त्यर्थं पूर्वाङ्गत्वेन नन्दादिसप्तवारमातृपूजां करिष्ये इति
संकल्प्य॥ ॐ मनोजूतिरित्यादिना वा स्थापयित्वा पूजयेत्॥ नामानि यथा॥ नन्दे नन्दिनि वासिष्ठे वसुदेवे च भार्गवि॥ जये च वि
जये चैव सप्तैता वारमातरः॥ ॐ नन्दासि॥ ॐ नन्दिन्यसि॥ वासिष्ठासि॥ वसुदेवासि॥ भार्गव्यसि जयासि॥ विजयासि॥ इति स्व
स्वनाम्ना सम्पूज्य॥ स्नानानि पाद्यार्घ्याचमनीयवस्त्रोपवीताचमनीयगन्धपुष्पाक्षतधूपनैवेद्यताम्बूलफलदक्षिणादीनि नन्दा
यै नमः॥ एवमोंकारपूर्वकचतुर्थ्यन्तनमोन्तस्वस्वनाममन्त्रेण नन्द्यादिवारमातॄः पूजयेत्॥ ॥ इति वारमातृपूजा मंगलम्॥
॥४॥ अथ गौर्यादिषोडशमातृपूजा॥ पूजोपकरणान्यासाद्य शुचिराचान्तः प्राङ्मुख उदङ्मुखो वा उपविश्य कुशयवजलान्यादाय
ॐ अद्येत्याद्युक्तकर्मनिर्विघ्नपरिसमाप्त्यर्थं गणपतिदुर्गास्त्र्यादिनवग्रहपूजापूर्वकगौर्यादिषोडशमातृपूजनमहं करि
ष्ये इति संकल्प्य॥ आवाहनादिप्रार्थनान्तोपचारैर्गणपतिदुर्गाग्रहांश्च पूजयित्वा॥ ॐ भगवन् विनायकः॥ भगवति दुर्गे भग
वन्तो नवग्रहाः युष्माभिस्तु मया दत्तं एकर्मनिर्विघ्नपरिसमाप्यतामित्युक्त्वाक्षतमध्यमिति विसर्जयेत्॥ ततः प्रतिमासु भित्तौ पटे
वा लिखित्वा स्वक्षतपुञ्जेषु वा गौर्यादिषोडशमातॄः पूजयेत्॥ नामानि यथा॥ गौरी पद्मा शची मेधा सावित्री विजया जया॥ देवसे
ना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिस्तुष्टिस्तथा पुष्टिरात्मनः कुलदेवता॥ ॐ गौर्यसि॥ पद्मासि॥ शच्यसि॥ मेधासि॥ सावि
त्र्यसि॥ विजयासि॥ जयासि॥ देवसेनासि॥ स्वधासि॥ स्वाहासि॥ मातरः स्थ॥ लोकमातरः स्थ॥ धृतिरसि॥ तुष्टिरसि॥ पुष्टिरसि॥

॥ राम ॥
॥ १० ॥

10

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आत्मनः कुलदेवतासि ॥ इति प्रत्येकं संपूज्य ॥ एतानि पाद्यादीनि गौर्यै नम इति पूजयित्वा एवमेवोंकारपूर्वकचतुर्थ्यन्तनमोन्तस्व
स्वनाममन्त्रेण पद्माद्याः पूज्याः ॥ ॥ इति गणपतिसहितगौर्यादिमातृपूजामङ्गलम् ॥ ५ ॥ एवमेवाभ्युदयकर्मप्रतिबन्धकदुरितो
पशमनाय ब्राह्म्यादिमातृपूजनं करिष्ये इति संकल्प्य ब्राह्म्यादिमातृपूजनं कुर्यात् ॥ तास्तु यथा ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्ण
वी तथा ॥ वाराही च तथेन्द्राणी चामुण्डा सप्तमातरः ॥ ॐ एतन्त इत्यादिना प्रतिष्ठाप्य ॥ ॐ ब्राह्म्यसीत्यादिस्वस्वनाम्ना संपूज्य एतानि·
पाद्यार्घ्यादीनि ब्राह्म्यै नम इति पूजयेत् ॥ एवमेवोंकारपूर्वकचतुर्थ्यन्तनमोन्तस्वस्वनाममन्त्रैर्माहेश्वर्यादिषण्मातॄः पूजयित्वा विस
र्जयेत् ॥ ॥ इति ब्राह्म्यादिसप्तमातृपूजामंगलम् ॥ ६ ॥ अथ घृतधारामातरः ॥ तत्र सदाचारतो यजमानपत्नी यक्षकान्नादिकमाप
यशिरसि निधाय तत्र घृतेन भित्तौ संलग्नाः पञ्च सप्त वा वसोर्धाराः पातयेदेभिर्मन्त्रैः ॥ ॐ वसोः पवित्रमसि शतधारम् ॥ ॐ नार्ट·
सवितुः ॥ ॐ कराबो हैतां ददर्श साहस्रैः सहस्रधाराः सर्वान्कामान्दुदुहे तथैवैतद्यजमानाय सहस्रधाराः सर्वान्कामान्दुदुहे
इति ॥ ततो श्रीः श्रानि रिति जप्त्वा ॥ घृतधारामातॄर्दूर्वासिन्दूरादिना पूजयित्वा प्रणम्य ॥ आवाहनं न जानामि न जानामि विसर्जन
म् ॥ मन्त्रं पूजां न जानामि क्षमध्वं मातृदेवताः ॥ इति विसर्जयेत् ॥ ॥ इति वसुधारामातृपूजामंगलविधिः ॥ ७ ॥ एवं मूर्तिकामं
गलादि सप्तमंगलानि देशाचारात्कुलाचाराच्च व्यवस्थितानि ॥ तथा च प्राचीनमातृपूजारम्भे ॥ कस्मिन्कुले मङ्गलपञ्चकं च
कस्मिन्कुले मंगलसप्तकं स्यात् ॥ त्रिमंगलं चापि कुलेपि सम्यक् नो ध्वंसघनीयाः कुलदेशधर्मा इति ॥ ॥ इति श्रीगिरिराजचक्र

CC-0. In Public Domain. Digitization by eGangotri

चूडामणिनरनारायणेत्यादिविविधविरुदावलिविराजमानमानोन्नतश्रीमन्महाराजाधिराजश्री ५ गीर्वाणयुद्धविक्रमसाह
देवकारितायां गौरीदत्तकृतायां रत्नावल्यां मातृपूजारत्नं तृतीयप्रकरणम् ॥ ३ ॥ गीर्वाणयुद्धविक्रमस्य राजाधिराजस्य कृ
तिः शुभेयम् ॥ समाप्तमेतत्खलु मातृपूजारत्नं तृतीयं रमणीयमत्र ॥ १ ॥ अथ वास्तुपूजारत्नम् ॥ तत्र मंडपवासो मंडपनिर्ऋ
तिभागे वा हस्तमितां वास्तुवेदिमीशाने ग्रहवेदिं च निर्माय सर्वोपकरणं संपाद्य ॥ ततो यजमानः कृतनित्यक्रियः स्वस्तिवा
चनं पठित्वा प्रधानसंकल्पं कुर्यात् ॥ ॐ तत्सदद्येत्यादि ॥ एतद्गृहस्थितत्वावाप्तये एतद्गृहवाससमृद्धि रत्नप्राप्तिपूर्वकदीर्घा
युरारोग्यपशुसंपत्तिपुत्रपौत्रादिसन्ततिवृद्धये गणपतिसहितगौर्यादिषोडशमातृग्रहपूजापूर्वकं वास्तुपूजनमहं करिष्ये
इति गृहवासोऽविघ्नकर्माङ्गभूतमंडपायिवास्तुपूजनमित्यूहनीयं ॥ इति संकल्पः ॥ गणपतिपूजापूर्वकमातृपूजामाभ्युद
यिकश्राद्धं पुण्याहवाचनं विधाय ॥ ब्राह्मणवरणं विधाय आचार्यो यज्ञभूमिं च विकिरेद्गौरसर्षपानक्षतांश्च क्षिपेत् ॥ तत्र
मंत्राः ॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥ अपक्रामन्तु ये भूता पिशाचाः सर्व
तो दिशम् ॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥ भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः ॥ स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमि
भुवस्त्विमाम् ॥ इति विकीर्य ॥ ततः शन्नो देवीरिति जलेन रक्षोहणमिति पंचगव्येन भुवं सम्प्रोक्ष्य पूर्वरचितायां वास्तुवेद्यामीशा
नादिक्रमेण ॥ उडुम्बरकीलकचतुष्टयरोपणं कुर्यात् ॥ तन्मंत्रः ॥ विशन्तु भूतले नागा लोकपालाश्च सर्वशः ॥ अस्मिन्गृहे वतिष्ठन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आयुर्वलकराः सदा ॥ १ ॥ इति प्रतिरोपणोमन्त्राहुतिः ॥ प्रासादतडागकूपादीनतन्नामो ध्वेरवंदुहनीयः ॥ ततः कीलकपार्श्वेषुरो
पणक्रमेणमाषभक्तवलिंदद्यात् ॥ तत्रमंत्राः ॥ रुद्रेभ्यश्चैवसर्वेभ्यो येचान्ये तत्समाश्रिताः ॥ वलिंतेभ्यः प्रयच्छामिगृह्णंतु सततो
त्सुकाः ॥ १ ॥ अग्निभ्योप्यथसर्वेभ्यो येचान्ये तत्समाश्रिताः ॥ तेभ्योवलिंप्रयच्छामिउदणमोदनमुत्तमम् ॥ २ ॥ नैरृत्याधिपति
श्चैवनैरृत्यांयेचराक्षसाः ॥ वलितेभ्यः प्रयच्छामि सर्वेगृह्णंतु मेवलिम् ॥ ३ ॥ ॐनमोवायुरक्षोभ्यो येचान्ये तत्समाश्रिताः ॥
वलिंतेभ्यः प्रयच्छामिउदणमोदनमुत्तमम् ॥ ४ ॥ ततोदेशांस्तुवर्णशलाकया ॥ शान्ता १ यशोमती २ कान्ता ३ विशाला ४ प्राणवा
हिनी ५ सती च ६ सुमना ७ नन्दा ८ सुभद्रा ९ सुरथा इति ॥ ॐकारादिनमोन्तैर्नामभिः प्रागायता दक्षिणोपक्रमाउदक्संस्था
दशरेखालिखित्वा ॥ पुनः हिरण्या १ सुव्रता २ लक्ष्मीः ३ विभूतिः ४ विमलाः ५ प्रिया ६ जया ७ काला ८ विशोका ९ इडा १० इतिना
मभिस्तथैवदक्षिणायताः पश्चिमोपक्रमाः प्राक्संस्था दशरेखाः कृत्वा तंडुलपिष्टाकदोरकेनताः सम्पूज्य निर्माय ॥ नवभि
र्नवकैरेकाशीतिपदवास्तुमंडलं विदध्यात् ॥ ततोग्रहवेशामष्टदलयमं विलिख्य तन्मध्ये स्वस्वदिक्षुच ग्रहांश्च चतुरस्रा
दिग्रहप्रकरणोक्तमण्डलमुकुर्यात् ॥ मंडलयुगत्वमपि विना न संहितंकुर्यात् ॥ ततो वक्ष्यमाणग्रहशांतिविधिनाग्र
हान् स्थापयित्वाग्रहकलशांश्चस्थापयेत ॥ ततः पूर्वनिर्मितेकुंडे स्थंडिलेवा ॥ भूरसीत्यादिना पंचभूसंस्कारपूर्वकमग्नि
स्थापनं कुर्यात् ॥ ईशानकलशे ॥ मृन्निर्मितां सशैलवनन्दीसमायुक्तां पृथिवीं विधाय ॥ ॐपृथिव्यैनमः इतिगंधादिना संपू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥ ज्य ॥ पूर्वादिदिक्षु इन्द्रादीनीशानपर्यन्तं लेखस्थाने निर्ऋतिवरुणमध्ये नमो नम इति दशदिक्पालान्संपूज्य ॥ नमो वास्तुमं

॥ १२ ॥ डलसमीपं गत्वा तत्र ईशानादि नन्दगोपुच्छे स्वस्वयदेशेषु पुष्प दधि तंडुलैर्व्याहृति पूर्वक स्वस्वनामभिर्वास्तुदेवताः स्था

पयेत् ॥ ॥ तद्यथा ॥ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्री छन्दः ॥ व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजा ऋषयो ऽ

ग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छंदांसि शिखादि देवा ॥ व्याहृते विनियोगः ॥ तत्रेशानकोणे वास्तोः शिरसि ॐ भू

र्भुवः स्वः शिखिन् इहागच्छेत्यावाह्य ॥ इह तिष्ठेति स्थापयेत् ॥ एवमग्रेपि ॥ वास्तो दक्षिणे नेत्रे मरुत् २ इंद्र इति पर्जन्यम्

२ ॥ दक्षिणाकर्णे उतुनम मिनिजयम् ॥ ३ ॥ दक्षिणांशे इन्द्र आसामि निकृतिमायुधम् ॥ ४ ॥ दक्षिणबाहौ सूर्य रश्मिरि

नि सूर्यम् ॥ ५ ॥ तथा हवे वसन्यच्च नशीनस समम् ॥ ६ ॥ भायेदार्वी ल्हरमिनि भृशम् ॥ ७ ॥ दक्षिणबाहुमूर्धे अस्मिन्नाकाश

म् ॥ ८ ॥ तत्स्व वासवेववा नो वेनि वायुम् ॥ ९ ॥ दक्षिणमणिवन्धे पूषायं वा क्षदेण पूषणम् ॥ १० ॥ दक्षपार्श्वे सविता पथमे 12

वितथम् ॥ ११ ॥ वामपार्श्वे गृहमे निस्थ हक्षनम् ॥ १२ ॥ दक्षिणोरौ यमाय त्वेनि यमम् ॥ १३ ॥ दक्षजानु निगंधर्व स्वेति ग

न्धर्वम् ॥ १४ ॥ दक्षजंघायां यमाय त्वा भृङ्गराजम् ॥ १५ ॥ दक्षस्फिचि वंजमा अस्त्विति मृगम् ॥ १६ ॥ पादयोः पितृभ्य इति पित

गणम् ॥ १७ ॥ वामस्फिचि दौवारिकमु आवसन् ॥ १८ ॥ वामजंघायां तस्या ले सुग्रीवम् ॥ १९ ॥ वामजानौ नक्षत्रेभ्य इति पु ॥ राम ॥

ष्पदंतम् ॥ २० ॥ नमो वरुणस्योत्तम्भनमिति वरुणम् ॥ २१ ॥ वामपार्श्वे ये रूपाणीति असुरम् ॥ २२ ॥ तत्रैव असवे स्वाहेति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शोकम्॥२३॥ वाममणिवन्धेपापम्॥२४॥ वामपवाहौशिरोमेरोगम्॥२५॥ नचैवनमोस्तुसर्पेभ्यइति अहिम्॥२६॥ वामकु
र्परेइषेवामुख्यम्॥२७॥ वामवाहौहृन्नाचासीनिभल्लाटम्॥२८॥ नचैवयर्थेऽसोमइतिसोमम्॥२९॥ वामांशेउडुन्मिमिनिस
र्पम्॥३०॥ वामकर्णेअदितिर्योदितिअदितिम्॥३१॥ वामनेत्रेयदिदिवेतिदितिम्॥३२॥ ईशानेमुखेवरुणास्योनमभनमिति
अपः॥३३॥ आग्नेयेदक्षिणहस्तेवसोःपवित्रमितिसावित्रम्॥३४॥ नैर्ऋत्येमेढ्रेयदक्रन्दइतिजयन्तम्॥३५॥ वायव्येवामह
स्तेयानेरुद्ररुद्रम्॥३६॥ पूर्वेदक्षिणस्तनेअर्यमणंवृहस्पतिमित्यर्यमणम्॥३७॥ अग्नेयेदक्षिणस्तनेउदुत्यमितिसवि
तारम्॥३८॥ दक्षिणेजठरेअसियमइतिविवस्वन्तम्॥३९॥ नैर्ऋत्येअरण्योर्विवुधाधियंत्रानारमिति॥४०॥ पश्चिमेजठर
वामभागेमित्रस्यमाचक्षुषेतिमित्रम्॥४१॥ वायव्येवामहस्तेइमंदेवाइतिराजयक्ष्माणम्॥४२॥ उत्तरेवामस्तनेयज्ञानमइतिपृ
थ्वीधरम्॥४३॥ ईशानेउदरेसिञ्चन्त्वाचमितिआपवत्सम्॥४४॥ मध्येनवयदेहस्त्वाभ्योर्ध्वसज्जज्ञानमितिब्रह्माणंसंस्थाप्य
नडनरभागेसुवर्णरुप्यादिनिर्मितवास्तुपतिमायांहषवास्तुनिच॥ ॐवास्तोष्पतइतिमंत्रेणवास्तुपुरुषेहागच्छइतिस्थेनि
स्थापयित्वापूजयेत्॥ वास्तुमंडलवहिर्भागेईशानकोणेचरकीम्॥१॥ आग्नेयेविदारीम्॥२॥ नैर्ऋत्येपूतनाम्॥३॥ वायव्ये
पापराक्षसीम्॥४॥ पूर्वेस्कन्दम्॥५॥ दक्षिणेऽर्यमणम्॥६॥ पश्चिमेजम्भकम्॥७॥ उत्तरेपिलिपिच्छम्॥८॥ आवाह्य एवं
प्रागादिदिक्षुइन्द्रादिदशदिक्पालान्वैदिकैर्नाममन्त्रैर्वावाह्यपूजयेत्॥ नाममन्त्रस्वरूपंयथा॥ ॐकारादिसमायुक्तंनमस्का

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ १३ ॥

तत्तमीरितं स्वनामसर्वसत्त्वानामन्त्र इत्यभिधीयत इति ब्रह्मपुराणोक्तम् ॥ इदं च मंत्रोच्चैरभावे ॥ एवं स्थापितान् शिख्यादीन्वा
स्तुदेवतान् पूर्णावादिचतुर्थ्यंतनाममंत्रैः षोडशोपचारैः पूजयेत् ॥ अस्मिन्नेव समये इंद्रादिध्वजान्येतत्तद्दिक्षु तत्तद्वर्णाप
ताकाः स्थापयेदिति केचित् ॥ इंद्रादिबलिदानसमये ध्वजपताकादानमिति बह्वृचः ॥ मंडपदेवतापूजापक्षे तत्समये तदि
निर्दिष्टाः ॥ ततः ईशाने वास्तुकलशं स्थापयेत् ॥ तत्र गन्धौषधीयवदूर्वापंचपल्लवसप्तमृत्फलपंचरत्नानि प्रक्षिप्य युग्मवस्त्रे
णावेष्ट्य यवपूर्णपात्रं निधाय वरुणमावाह्य तत्र तीर्थान्यावाहयेत् ॥ ततो वास्तुमण्डलाद्बहिः पश्चाद्भागे वास्तुकलशे वास्तोष्पत्रस्य
तिना वयं हि तेनेव जयामसि ॥ गामश्वं पोषयित्वा स नो मृडाती दृशे ॥ इति मंत्रेण क्षेत्रपालमावाह्य तत्रैव इति प्रतिष्ठाप्य र
क्तचन्दनवस्त्रैः संपूज्य माषभक्तबलिं दद्यात् ॥ ततः पताकाः प्रतिष्ठाप्य संपूज्य गृहोपरि स्थापयेत् ॥ सर्ववर्णास्तथा मध्ये पता
का किंकिणीयुताः ॥ बाहुप्रमाणाः कर्तव्यास्तंभं बाहुप्रमाणकं ॥ यद्द्वारमार्गे पूर्वोक्तो ध्वजः षोडशहस्तकः ॥ स्तंभोप्यविधिव
त्स्थाप्यः संघटाभरणीकृतः ॥ पुष्पमालान्वितः स्थाप्यो द्वारमार्गेथ दक्षिणे इति वाक्याद्दक्षिणद्वाराग्रभागे वास्तुदेवताप्रीत
ये पूर्वोक्तं महाध्वजं प्रतिष्ठाप्य संपूज्य संस्थापयेत् ॥ तत्र मंत्रः ॥ वास्तुपुरुष नमस्तुभ्यं ब्रह्मणा निर्मितः पुरा ॥ ध्वजं गृहाण देवेशं सर्वा
न्दोषान्निवारय इति ॥ ततो ब्रह्मोपवेशनादिपर्युक्षणान्तं कर्म निर्वर्त्य द्रव्यत्यागं कुर्यात् ॥ यथा ॥ अग्नये स्वाहेत्यादि ॥ इदं संपादित
माज्यसमित्तिलचरुद्रव्यमाघाराज्यभागदेवताभ्यः शिख्यादिपंचचत्वारिंशद्देवताभ्यो वास्तोष्पतये चरकादिदेवताभ्यः इ

13
॥ राम ॥
॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्रादिदिक्पालेभ्यः क्षेत्रपालाय गणाय इत्यादिलोकपालसहितादित्यादिनवग्रहेभ्यः स्विष्टकृते महाव्याहृतिदेवताभ्यः प्रजापतये च म
यायथा देवतं परिस्मृक्तं नम मनन्न यथा देवनमस्तु इति ॥ ततोग्निसंपूज्य ब्रह्मणान्वारब्ध आघारावाज्यभागौ हुत्वा उदुम्बरादिसमि
तिलमधुपायसाज्यैः ॥ ॐ शिखिने नमः स्वाहा इत्यादिप्रयोगैः प्रत्येकमष्टोत्तरशतं अष्टाविंशत्यष्टान्यतमसंख्यया वा हुत्वा ॥ एवमेवा
न्येषां पर्जन्यादीनां होमं कुर्यात् ॥ ततो वास्तुहोमं विल्वैर्विल्वबीजैर्वा वक्ष्यमाणमन्त्रैः कुर्यात् ॥ ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो
अनमीवो भवा नः ॥ यत्त्वेमहे प्रतिनन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥ १ ॥ इदं वास्तोष्पतये ॥ ॐ वास्तोष्पते प्रतरणो
न एधि गयस्फानो गोभिरश्वेभिरिन्दो ॥ अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रतिनन्नो जुषस्व स्वाहा ॥ इदं वास्तोष्पतये ॥ २ ॥ ॐ
अमीवहा वास्तोष्पते विश्वारूपाण्याविशन् ॥ सखा सुशेव एधि नः स्वाहा ॥ इदं वास्तोष्पते ॥ ४ ॥ ॐ वास्तोष्पते ध्रुवास्थूणांसत्रं सोम्या
नां ॥ द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा स्वाहा ॥ इदं वास्तोष्पतये ॥ ५ ॥ ततः क्षेत्रस्य पतिनेति क्षेत्रपालमन्त्रेण क्षेत्रपा
लहोमं कृत्वा त्रातारमिन्द्रमित्यादिमन्त्रैर्दिक्पालहोमं कृत्वा ॥ आदित्यादिनवग्रहाणामर्कादिसमिद्भिर्यथाशक्तिसंख्यया हो
मं कृत्वा दिक्पालादीनां च होमं विधाय स्विष्टकृद्धोमानन्तरं महाव्याहृति सर्वप्रायश्चित्त प्राजापत्यान्तं होमं विधाय पूर्णपात्रदानान्तं कृत्वा
पूर्णाहुतिं जुहुयात् ॥ ततो वास्तुदेवताभ्यो वास्तुमण्डले पश्चिमदेशे पायसबलिं ॥ भक्षयजमानं पाहि याहि स्वाहा ॥ एवं क्रमेण
सर्वेषां बलिं ततः दद्यात् ॥ एवं शिख्यादिपंचचत्वारिंशद्देवताभ्यो ब्रह्मवास्तुसहिताभ्यः प्रत्येकं पायसबलिं दत्त्वा तेभ्यः प्रत्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ १४ ॥

कंगुवर्णं दत्वाव्रूलरोय पक्षिनीगां दद्यात् ॥ ततो मंडला बहिरीशान कोणो भुव रक्यादिभ्यः प्रागादिचतुर्दिक्षु स्कन्दादिभ्य
श्च माषभक्तवलिं दत्वा इन्द्रादिदिक्पालेभ्यः स्वस्व दिक्षु माषभक्तवलिं दद्यात् ॥ अस्मिन्नेव समयेन त्र दर्शयनाकाश्चदिक्पा
लेभ्यो दद्यादिति पक्षान्तरम् ॥ ॥ वलिदानं यथा ॥ पूर्वे इन्द्र स्तु महसा दीप्तः सर्वदेवाधिपो महान् ॥ वज्रहस्तो महासत्व स्तस्मै नि
त्यं नमो नमः ॥ इन्द्राय सपरिवाराय साङ्गाय सायुधाय सवाहनाय एष माषभक्तवलिर्नमः ॥ भो भो इन्द्र स्वदिशां रक्ष वलिं भक्षय
जमानस्य सपरिवारस्य आयुः कर्ता क्षान्ति कर्ता तुष्टि कर्ता भव ॥ १ ॥ ततआग्नेये ॥ आग्नेयः पुरुषो रक्तः सर्वतेजोमयो वयः ध
मकेतु रजाध्यक्ष स्तस्मै नित्यं नमो नमः ॥ अग्नये स प० भो भो अग्ने स्वदिशां र० ॥ २ ॥ दक्षिणे ॥ यमश्चोत्पलवर्णाभः किरीटी दंडध
क सदा ॥ धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥ यमाय स प० भो भो यम ॥ ३ ॥ नैर्ऋत्ये ॥ निर्ऋतिस्तु पुमान् कृष्णः स
र्व रक्षोधिपो महान् ॥ खड्ग हस्तो महासत्व स्तस्मै नित्यं नमो नमः ॥ निर्ऋतये भो भो ॥ ४ ॥ पश्चिमे ॥ वरुणः सवलो नित्यं पुरु
षो निम्नगाधिपः ॥ पाशहस्तो महासत्व स्तस्मै० वरुणाय स प० ॥ ५ ॥ वायव्ये ॥ वायुस्तु धूम्रवर्णोयं सर्वगंधवहः शुचिः ॥ पुरुषो ध्वजह
स्तश्च तस्मै वायवे स० ॥ ६ ॥ उत्तरे ॥ गौरीयस्तु पुमान् सोम्यः सर्वौषधि समन्वितः ॥ नक्षत्राधिपतिः सोम स्तस्मै० सोमाय स० ॥ ७ ॥
ईशाने ॥ ईशानः पुरुषः शुक्लः सर्वविद्याधिपो महान् ॥ शूलहस्तो विरूपाक्ष स्तस्मै नित्यं नमो नमः ॥ ईशानाय स० ॥ ८ ॥ ईशानपू
र्वयोर्मध्ये ॥ पद्मयोनिश्चतुर्मूर्त्ति र्वेदवासः पितामहः ॥ यज्ञाध्यक्ष श्चतुर्वक्त्र स्तस्मै० ब्रह्मणे स० ॥ ९ ॥ नैर्ऋत्य पश्चिमयोर्मध्ये ॥ यो

14.

॥ राम ॥
॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सावनन्तरूपेण ब्रह्माण्डं सचराचरम् ॥ पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः ॥ अनन्ताय सपरिवाराय साङ्गाय सायुधाय स
वाहनाय सर्षमाषभक्तवलिर्नमः ॥ भो भो अनन्त स्वदिशां रक्ष वलिं भक्ष मम यजः ॥ १० ॥ ततः क्षेत्रपालाय वलिदानं पूजयित्वा
ॐ नमो भगवते क्षेत्रपालाय त्रयस्त्रिंशत्कोटिदेवाधिनिर्मिताय भावभासुरित्रिनेत्र खाङ्ग किंकिणीज्वालामुखभैरवरूपि
णे तुरु तुरु मुरु मुरु रुलु लल लल खरखरखरख फेत्कारपूरितदिङ्मुख मम शवा दोस्य तत्पास्तु कर्मणि यजमानं पाहि पाहि मम आयुः क
र्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्त्ता भव अमुं पशुं मुंडरीयसहितं माषभक्तवलिं गृह्ण २ स्वाहा ॥ इति क्षेत्रपालवलिं
दद्यात् ॥ ततः संध्यायां वस्तुपहारप्रदानान्ते वा नैर्ऋत्यादिदिग्भूतेभ्यः कुशरादिवलिं दद्यात् ॥ प्रसंगाद्दैवभूतवलिविधिरुच्य
ते ॥ साज्यगुडौदनमाषकुलत्थैर्यावकपूपकामिषमत्स्यैः ॥ अद्येत्यादि देशकालौ स्मृत्वा अस्मिन् नमुकवास्तुनि सर्वभूतोपद्र
वनिहतैभूतेभ्यो वलिदानमहं करिष्ये इति संकल्प ॥ अक्षतपुञ्जे सर्वभूतेभ्यो नमः इति भूतानां पूजनं तत्र कुशरादिवलिं दत्वा
जलं गृहीत्वा मंत्रै दद्यात् ॥ मंत्रा यथा ॥ ॐ देवो देवा मुनीशास्त्रिभुवनयतयो दानवाः सर्वसिद्धा यक्षा रक्षांसि नागा गरुडमुख
खगा गुह्यका देवदेवाः ॥ योगिन्यो देववेश्या हरिदधिपतयो मातरो विघ्ननाथाः प्रेता भूताः पिशाचा पितृगणनगराध्याधि
पाः क्षेत्रपालाः ॥ १ ॥ गंधर्वाः किन्नराः सर्वे हृष्ठिताः पितरो ग्रहाः ॥ कूष्माण्डाः पूतना रोगा ज्वरा वेतालकाः शिवाः ॥ २ ॥ मस्तक
कृतास्त्रपिशुना भक्षमांसा अनेकशः ॥ ब्रह्माण्डान्तः स्थिताः सर्वे तृप्यन्तु वलिर्नमः ॥ ३ ॥ अवकोडास्तथा ह्रस्वा दीर्घाः सूक्ष्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ १५ ॥

स्तथैवच ॥ खड्गाःस्थूलास्तथैकाक्षानागपक्षिमुखास्तथा ॥ ४ ॥ बालास्याउग्रवक्त्राश्चअवक्त्राःकोटवर्जिताः ॥ भ्रमराभानमा
लाभाद्विपाभामेघसन्निभाः ॥ ५ ॥ गवलाभाक्षिनिनिभाअस्मनिस्वनसन्निभाः ॥ उन्नताश्चमनोगाश्चवायुवेगसमाजवे ॥ ६ ॥ वज्र
वक्त्रावज्रशिरावज्रबाहुसमन्विताः ॥ वज्रयाशवज्रदंष्ट्राःसर्वाभरणभूषिताः ॥ ७ ॥ विकटमुकुटाःकेचिन्तथावैरत्नधारिणः
सूर्यकोटिप्रतीकाशाविद्युत्तस्तडावर्चसः ॥ ८ ॥ कपिलाञ्जनभूवर्णाःषमथावरुरूपिणः ॥ मृत्तलंतुचवलीस्मवैंनृत्तायातुव
तिर्ममः ॥ ९ ॥ इति ॥ ततआचार्यादयोवैदिकमन्त्रैःशुद्धासनादिर्योराणामन्त्रैश्चयजमानंसपत्नीकंसपरिवारंशान्तिकलशो
दकेनाभिषिञ्च्यसर्वौषधीभिरद्भिरुपलिप्यस्नापयेयुः ॥ ततोयजमानःशुद्धोदकेनस्नानःशुक्लाम्बरधरोभूत्वावास्तुमंडलेब्रह्म
स्थानेसुरूपांदिव्याभरणभूषितांस्त्रीरूपांपृथिवींध्यात्वाप्रणवव्याहृतिपूर्वक ॥ ॐभूर्भुवःधरायैनमइतिमन्त्रेणसम्पूज्य
ततोगृहंशस्तदेवशागारादितत्विस्थापापावमानेनरक्षोघ्नेनचसूक्तेनवेष्टयेद्धनैः ॥ छिद्रेस्तुवेत्वशुभम् ॥ ततोदुग्धपूर्णया
सक्तनकुम्भाजलपूर्णयाचसकलनकुम्भानथैवाविछिन्नंगृहंवेष्टयेत् ॥ ॥ अथगृहस्याग्नेयेआकाशपदेजानुप्रमाणावम
नींखनित्वातस्यांतंगोमयेनोपलिप्यकुचन्दनपुष्पास्तनादिभिरलंकृत्यमाल्यादिसप्तधान्यानिदध्योदनंचप्रक्षिप्य ॥ तत
कुंभंजलपूर्णंशुक्लपुष्पयुतंगंधादिभिरर्चितंहस्तद्वयेनादाययजमानस्तामवनींगत्वा ॥ ॐनमोवरुणायनिजजलेनपूरयेत्
तत्रावर्तेषुदक्षिणेसतिपुष्पेवाह्नगस्वेशुभंभवति ॥ वैपरीत्येत्वशुभम् ॥ ततोन्निर्मितयेटिकायांसप्तबीजंदध्योदनंशैवाल

15

॥ रत्न ॥
॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

फलपुष्पाणि प्रक्षिप्य पूर्वस्थापितं हेमवास्तुं तत्र मंगलघोषेणानीत्वा तस्यां वेदिकायां संस्थाप्य स्वनाममन्त्रेण गंधादिभिरभ्यर्च्य
प्रार्थयेन्मंत्रद्वयेन ॥ ॐ पूजितोसि मया वास्तो होमाद्यैरर्चनैः शुभैः । प्रसीद पाहि विश्वेश देहि मे गृहजं शुभम् ॥१॥ वास्तुपुरुष
नमस्तेस्तु भूशय्याभिरत प्रभो । मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा ॥२॥ इति प्रार्थयित्वा वेदिकामाच्छाद्य तस्मिन् गर्ते शनैः क्षि
पेत् ॥ तत्र मन्त्रः ॥ सशैलसागरां पृथ्वीं यथा वहसि मूर्द्धनि । तथा मां वह कल्याणसंपत्संततिभिः सह ॥ इति ॥ गर्तं च तथा मृदा पूरिते
मृदाधिके उत्तमम् ॥ समे मध्यमम् ॥ न्यूनत्वे त्वधमं विद्यात् ॥ गर्तोपरि भूमिं गोमयेनोपलिप्य शुक्लगंधपुष्पाक्षतैर्भूषयेत् ॥ त
तोन्ते पश्चिमतः आचार्यं संपूज्यालंकृतां सवत्सां गां वासोयुगं दक्षिणां दत्वा ब्रह्मर्त्विक्सदस्येभ्यो यथाशक्ति दत्वा ॥ ग्रहाणां शि
खादिवास्तुदेवतानां चोत्तरांगत्वेन पूजां कृत्वा क्षमाप्य ॥ ॐ उत्तिष्ठन्ति यान्तु देवा निच विसृज्याग्निं संपूज्य गच्छ गच्छेति विसर्जनमन्त्र
पाठादिकारयित्वा ब्राह्मणैः शान्तिं पाठयित्वा ग्रहवास्तुदेवपीठं नैवेद्यं कंचीं स्त्रीनेकं वा यथाशक्ति ब्राह्मणान्संपूज्याशिषो गृहीत्वा
ब्राह्मणानुज्ञातः सुहृद्युतो भुंजीतेति ॥ ॥ इति वास्तुपूजाप्रकारः ॥ एवं वास्तुपूजां विधाय ॥ गृहप्रवेशं कुर्यात् ॥ तत्रेत्थम् ॥ नवं ज
लपूर्णांस्तु कलशं पञ्चपल्लवोपेतं दूर्वायुतं सुधालिप्तं वस्त्रवेष्टितं सफलमञ्जलिना दाय यजमानो ब्राह्मणान्वितः ॥ सदारपुत्र
स्तूर्यघोषेण गृहं प्रविश्य प्रधानगृहमध्ये धान्योपरि कलशं संस्थापयेत् ॥ ततो गृहस्थैर्यार्थं स्वस्ति वाचयित्वा ब्राह्मणान्संपूज्य
भोजयित्वा आशिषो गृहीत्वा सुहृद्युतो भुंजीत ॥ इति गृहप्रवेशविधिः ॥ ॥ अथ वास्तुचक्रोद्धारः ॥ जलादि महामंडस नैर्ऋत्यन्त भा

CC-0. In Public Domain. Digitization by eGangotri

गेवस्तुपूजनम् ॥ वास्तुचक्रस्यैवैविद्ध्यम् ॥ चतुःषष्टिपदंवास्तुदेवानां परमंहितम् ॥ एकाशीतिपदंवास्तु गृहराणां तु पकीर्त्यते ॥
इतिवास्तुशास्त्रवचनात् तु नममास्तु चक्रोद्धारउच्यते ॥ लेखनप्रकारस्तु ॥ सुवर्णशलाकया ॥ ॐ चान्नायैनमः ॥ १ ॥ ॐ यशोमयैनमः
२ ॥ ॐ कान्तायैनमः ॥ ३ ॥ ॐ विशालायैनमः ॥ ४ ॥ ॐ प्राणवाहिन्यैनमः ॥ ५ ॥ ॐ सत्यैनमः ॥ ६ ॥ ॐ सुमनायैनमः ॥ ७ ॥ ॐ नन्दायै
नमः ॥ ८ ॥ ॐ सुभद्रायैनमः ॥ ९ ॥ ॐ सुरथायैनमः ॥ १० ॥ इतिमध्येदशरेखाःप्राग्ग्रीवाऽऽयताःकर्त्तव्याः ॥ ॐ हिरण्यायैनमः
१ ॥ ॐ सुवस्त्रायैनमः ॥ २ ॥ ॐ लक्ष्म्यैनमः ॥ ३ ॥ ॐ विभूत्यैनमः ॥ ४ ॥ ॐ विमलायैनमः ॥ ५ ॥ ॐ प्रियायैनमः ॥ ६ ॥ जयायैनमः ॥ ७
कालायैनमः ॥ ८ ॥ ॐ विशोकायैनमः ॥ ९ ॥ ॐ इन्द्रायैनमः ॥ १० ॥ इतिवक्ष्यमाणैर्दक्षिणोत्तरसंस्थादशकार्या ॥ एवंनवनवकैः
कोष्ठैरेकाशीतिपद ॥ इतिवास्तुचक्रोद्धारः ॥ ॥ श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ॥
कृतारत्नावलीनक्षत्रसमाप्तंवास्तुपूजनम् ॥ १ ॥ ॥ इतिश्रीगिरिराजचक्रचूडामणि
नरनारायणेत्यादिविविधविरुदावलिविराजमानमानोन्नतनेपालदेशनगरविराज
मानहीरत्नयानशोभमानभुवनानकालमानमूर्द्धनाभिरणमरामनामदिव्यगानगीयमा
नयाचमानदानराजमानराजमानमहाराजाधिराजश्रीश्रीश्रीश्रीश्रीगीर्वाणयुद्धवि
क्रमसाहदेवकारितेगौरीदत्तकृतेरत्नावलीनामनिबंधेवास्तुपूजारत्नंसप्तमीयप्रकरणमितिशिवम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ ग्रहशांतिप्रकरणमभिधीयते ॥ ॥ नत्वा स्कन्दपुरएगे सुखोपविष्टं गार्ग्यं तु कौशिकः परिपृच्छति । निखिलां ग्रहशान्तिम्मे
भगवन्वक्तुमर्हसि ॥ १ ॥ गार्ग्य उवाच ॥ ॥ देवदानवगन्धर्वा यक्षराक्षसकिन्नराः ॥ पीडिता ग्रहपीडाभिः किम्पुनर्भुवि मानवाः ॥ २
शनैश्चरेण सौदासो नरमांसे नियोजितः ॥ राहुणा पीडितो राजा नलो भ्रान्तो महीतले ॥ ३ ॥ अङ्गारकविरोधेन रामो राष्ट्राद्विवासि
तः ॥ अष्टमेन शशाङ्केन हिरण्यकशिपुर्हतः ॥ ४ ॥ रविणा सप्तमस्थेन हतो राजा सुयोधनः ॥ पाण्डवा गुरुपीडायां विकर्मणि नि
योजिताः ॥ ५ ॥ षष्ठेनोशनसा युद्धे हिरण्याक्षो निपातितः ॥ एते चान्ये च बहवो ग्रहदोषैः सुपीडिताः ॥ इति ॥ ६ ॥ तथा च याज्ञव
ल्क्योपि ॥ यथा विनायकपूजनेनाविघ्नं कर्मणो भवतीत्यभिधाय ग्रहांश्चैव विधानतः ॥ कर्मणां फलमाप्नोति श्रियं चाप्नो
त्यनुत्तमामित्यनेन ग्रहपूजयाच कर्मणामविघ्नेन फलसिद्धिः श्रीश्च फलमित्युक्त्वा फलान्तराण्युक्तानि ॥ तथाहि ॥ श्रीका
मः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ॥ वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि ॥ श्रीकाम इति पूर्वोक्तस्यानुवादः ॥ शान्ति
कामः आपदुपशान्तिकामः ॥ शस्यादिवृद्ध्यर्थं वर्षणं वृष्टिः ॥ आयुरपमृत्युजयेन दीर्घकालजीवनम् ॥ पुष्टिरनवद्यशरी
रत्वम् ॥ एताः कामयते वृष्ट्यायुःपुष्टिकामो ग्रहयज्ञं समाचरेत् ॥ तथा अभिचरन्नप्युद्दिष्टोपायेन परपीडा अभिचारस्तत्कामश्च
ग्रहपूजां समाचरेदित्यर्थः ॥ ग्रहानाह याज्ञवल्क्यः ॥ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः ॥ शुक्रः शनैश्चरो राहुः केतुश्चै
ते ग्रहाः स्मृताः ॥ एते सूर्यादयो नवग्रहा इत्यर्थः ॥ ग्रहाः पूज्या इत्युक्तं किं कृत्वेत्याह ॥ ताम्रकात्स्फाटिकाद्रक्तचन्दनात्स्वर्णकादुभौ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजतादस्य सः सीसात्कांस्यात्कार्या ग्रहाः क्रमात् ॥ स्ववर्णैर्वा पटे लेख्या गन्धैर्मण्डलकेषु वा ॥ सूर्यादीनां मूर्तयस्ताम्रादिभिर्यथा
क्रमं कार्याः तदलाभे स्ववर्णैर्वर्णकैर्लेख्या मण्डले षु वा गन्धैः रक्तचन्दनादिभिर्यथावर्णं लेख्या इत्यर्थः ॥ ध्यानविशेषो मत्स्य
पुराणे ॥ यथा ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥ सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः ॥ १ ॥ श्वेतः श्वेताम्बर
धरो दशाश्वः श्वेतभूषणः ॥ गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥ २ ॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः ॥ चतुर्भु
जो मेषगतो वरदः स्याद्धरासुतः ॥ ३ ॥ पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः ॥ खड्गचर्मगदापाणिः सिंहस्थो वरदो बु
धः ॥ ४ ॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ ॥ दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू ॥ ५ ॥ ६ ॥ इन्द्रनीलद्युतिः शूली व
रदो गृध्रवाहनः ॥ बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा ॥ ७ ॥ करालवदनः खड्गचर्मशूली वरप्रदः ॥ नीलसिंहासनस्
थश्च राहुरत्र प्रशस्यते ॥ ८ ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः ॥ गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ॥ ९ ॥ स
र्वे किरीटिनः कार्या ग्रहा लोकहितावहाः ॥ स्वाङ्गुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं ॥ सदेति ॥ एतेषां स्थापनदेशाश्च तत्रैवोक्ताः
मध्ये तु भास्करं विन्द्याल्लोहितं दक्षिणेन तु ॥ उत्तरेण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु ॥ पूर्वेण भार्गवं विद्यात्सोमं दक्षिणपूर्व
कं ॥ पश्चिमेन तु शनिं विन्द्याद्राहुं पश्चिमदक्षिणे ॥ पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतण्डुलैरिति ॥ पूजाविधिमाह याज्ञ
वल्क्यः ॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥ गन्धाश्च बलयश्चैव धूपो देयस्तु गुग्गुलुः ॥ कर्तव्या मन्त्रवन्तश्च चरवः प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दैवतमिति ॥ मंत्रांश्चाह स एव ॥ आ कृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत् ॥ उद्बुध्यस्वेति च ऋचा यथासंख्यं प्रकीर्तिताः ॥ बृह
स्पते अति यदर्यस्तथैवान्नात्परिस्रुतः ॥ शन्नो देवी तथा काण्डात् केतुं कृण्वन्निमास्तथा ॥ समिधमाह स एव ॥ अर्कः पलाशः
खदिरश्चापामार्गोऽथ पिप्पलः ॥ औदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ ताश्च आर्द्रा अभग्नाः सत्वचः प्रादेशमात्राः कर्तव्या
इति मिताक्षरायाम् ॥ होमसंख्यामप्याह स एव ॥ एकैकस्याष्टशतमष्टाविंशतिरेव वा ॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण
वा युता इति ॥ भोजनान्याह स एव ॥ गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकम् ॥ दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च ॥ द
द्याद्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं द्विजः ॥ शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं इति ॥ दक्षिणामाह स एव ॥ धेनुः १ शङ्ख २
स्तथानड्वान् ३ हेम ४ वासो ५ हयः ६ क्रमात् ॥ कृष्णा गौ ७ रायसं ८ छाग ९ एता वै दक्षिणाः स्मृता इति ॥ शान्तिकामेनाविशे
षेण सर्वे ग्रहाः पूजयितव्या इत्यभिधाय विशेषमाह स एव ॥ यश्च यस्य यदा दुःस्थः स तं यत्नेन पूजयेत् ॥ ब्रह्मणैषां वरो दत्तः
पूजिताः पूजयिष्यथ इति ॥ एवमविशेषेण शान्तिकपौष्टिकादिकर्मसु ब्राह्मणक्षत्रियवैश्यानां ॐ श्रुतेरिति कल्पकारोक्ते
र्द्विजानामधिकारस्तत्राभिषेकगुणयुक्तस्य एतो विशेषेणाधिकार इति च प्रतिपादयति स एव ॥ ग्रहाधीना नरेन्द्राणामु
च्छ्रायाः पतनानि च ॥ भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहा इति ॥ ॥ अथ ग्रहशान्तिपद्धतिः ॥ ॥ कुशानिलपवजलह
स्नातो यजमानः ॐ अद्येत्यादि देशकालौ स्मृत्वा ॥ अमुकशर्माऽमुककर्मनिर्विघ्नकामो दुष्टस्थानस्थितामुकग्रहशान्तिका

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ १८ ॥

मोचानंवग्रहमखेनाहं यक्ष्ये इति संकल्प ॥ पूजोपकरणान्युपानीय नवग्रहमखनिर्विघ्नार्थं गणेशपूजां करिष्ये इति संकल्पपूर्वकं
पूर्वोक्तविधिना गणेशपूजां कुर्यात् ॥ ततः पुण्याहवाचनविधिना पुण्याहं वाचयित्वा ॥ ब्राह्मणावरणं कुर्यात् ॥ अद्येत्यादि अमु-
कगोत्रममुकदेवशर्मायजमानममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षतवस्त्रादिभिर्नवग्रहमखे आचार्यत्वेनाचार्यकर्म कर्तुं
त्वामहं वृणे इत्याचार्यं वृणुयात् ॥ वृतोऽस्मीति प्रतिवचनम् ॥ एवमेव नवग्रहमखे होमं कर्तुं होतृत्वेन त्वामहं वृणे इति होता-
रं वृणुयात् ॥ एवमेव नवग्रहमखे होमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुं ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृ-
णुयात् ॥ एवं सूक्तजापकत्वेन ब्राह्मणं वृणुयात् ॥ एवमेव ऋत्विक्त्वेन ब्राह्मणावरणं विधाय ॥ ॥ अथावरणे आचार्य-
ऋत्विग्भ्यानावा अग्निस्थापनं कुर्यात् ॥ ततो गुरुर्यजमानान्वितो ग्रहवेद्यां विधिवदष्टदलं निधाय पंचरंगै रंजयित्वा तत्तदा-
कारवद्दशाङ्गुलादिमण्डलेषु सूर्यादिनवग्रहान् स्थापयित्वा पूजयेत् ॥ नवग्रहपूजाप्रकारो यथा ॥ ॐ अद्येत्यादि अमुकका-
मनया ग्रहदेवतानां स्थापनं पूजनं चाहं करिष्ये ॥ इति संकल्प्य पूजयेत् ॥ ॐ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्री छ-
न्दः व्याहृतीनां क्रमेण जमदग्निभरद्वाजात्रयऋषयो अग्निवायुसूर्या देवता दैवीगायत्री दैव्युष्णिग् दैवीबृहत्यश्छन्दांसि सूर्या-
द्यावाहने विनियोगः ॥ तत्राष्टदलमध्ये कर्णिकायां वर्तुले द्वादशाङ्गुले किरीटिनमप्रारुठं हस्तद्वयधृतपद्मद्वयं लोहितव-
र्णं रक्तांबरधरं सप्ताश्वरथस्थं सप्तद्वीपेशं सुरवंद्यं रक्तपुष्पाक्षतैः ॥ ॐ अग्निं दूतम् ॥ ॐ भूर्भुवःस्वः कलिङ्गदेशोद्भव काश्य-

18

॥ रत्न ॥
॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पसगोत्रसूर्य इहागच्छ इत्यावाह्य इहतिष्ठेति स्थापयित्वा ॥ स्नानीयार्घ्याचमनीयपुनराचमनीयानि ॥ ॐ आकृष्णे ॥ ॐ सूर्या
यनमः ॥ इदं रक्तचन्दनं ॐ सूर्याय नमः इदं नैवेद्यं ॐ सूर्याय नमः ॥ १ ॥ ततआग्नेयदले चतुरस्रे चतुर्विंशाङ्गुले मण्डले किरीटि
नं द्विभुजं वरदाहस्तं श्वेतं वर्णं श्वेतदशाश्वरथस्थं सोममादित्याभिमुखं श्वेतपुष्पाक्षतैः ॥ ॐ अप्स्वन्ते ॥ ॐ भूर्भुवः स्वः ॥ यमु
नातीरोद्भव आत्रेयसगोत्र सोम इहागच्छ इत्यावाह्य इहतिष्ठेति स्थापयित्वा पाद्यादिभिरुपचारैः ॥ ॐ इमं देवा ॥ ॐ सोमाय
नमः ॥ इति सोमं पूजयेत् ॥ २ ॥ ततो दक्षिणदले त्रिकोणे त्र्यंगुले मण्डले किरीटिनं रक्तवर्णं रक्तमाल्याम्बरधरं चतुर्भुजं वर
शक्तिभृतं गदाधरं मेषस्थं आदित्याभिमुखं कुजं रक्तपुष्पाक्षतैः ॥ ॐ स्योना पृथिवि ॥ ॐ भूर्भुवः स्वः ॥ अवन्तीसमुद्भव भरद्वा
जसगोत्र भौम इहागच्छेत्यावाह्य इहतिष्ठेति स्थापयित्वा ॥ ॐ अग्निर्मूर्द्धा ॥ ॐ भौमाय नमः ॥ इति पूजयेत् ॥ ३ ॥ ततईशानदले ॥
वाणाकारे चतुरङ्गुले किरीटिनं पीतवस्त्रं पीतमाल्यानुलेपनं पीतवर्णं चतुर्भुजं वरचर्मगदाहस्तं सिंहस्थमादित्याभिमुखं बु
धं पीतपुष्पाक्षतैः ॥ ॐ इदं विष्णुः ॥ ॐ भूर्भुवः स्वः ॥ मगधदेशोद्भव आत्रेयसगोत्र बुध इहागच्छ इहतिष्ठेति स्थापयित्वा ॥ ॐ उ
द्बुध्यस्वेति ॥ ॐ बुधाय नमः ॥ इति पूजयेत् ॥ ४ ॥ ततउत्तरदले दीर्घचतुरस्रे षडङ्गुले मण्डले किरीटिनं पीतवर्णं पीतमाल्या
म्बरधरं चतुर्भुजं वराक्षसूत्रदण्डकमण्डलुधरमादित्याभिमुखं बृहस्पतिं पीतपुष्पाक्षतैः ॥ ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आ(
ङ्गिरससगोत्र बृहस्पते इहागच्छेत्यावाह्य स्थापयित्वा ॐ बृहस्पते अतीत्यं बृहस्पतये नमः इति पूजयेत् ॥ ५ ॥ ततः पूर्वदले प(

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥ श्वकोणे नागकुले किरीटिनं श्वेतवर्णं श्वेतमाल्याम्बरधरं चतुर्भुजं वराक्षसूत्रदण्डकमण्डलुधरमादित्याभिमुखं शुक्रं शुक्लपुष्पा
॥ १९ ॥ क्षतैः ॥ ॐ शुक्रं ज्योतिश्च ॥ ॐ भूर्भुवःस्वः ॥ भोजकटदेशोद्भव भार्गवसगोत्र शुक्र इहागच्छ इत्यावाह्य इह तिष्ठेति स्थापयित्वा ॥ ॐ अन्नात्
परिस्रुतः ॥ ॐ शुक्राय नम इति पूजयेत् ॥ ६ ॥ ततः पश्चिमदले धनुषि षकुले मण्डले किरीटिनं कृष्णवर्णं कृष्णमाल्याम्बरधरं चतुर्भु
जं वरत्रिशूलधनुर्बाणधरं गृध्रवाहनं शनिमादित्याभिमुखं कृष्णपुष्पाक्षतैः ॥ ॐ प्रजापते न ॥ ॐ भूर्भुवःस्वः सौराष्ट्रोद्भव काश्यपस
गोत्र शनैश्चर इहागच्छ इह तिष्ठेति स्थापयित्वा ॥ ॐ शन्नो देवीः ॥ ॐ शनैश्चराय नमः इति पूजयेत् ॥ ७ ॥ ततो नैर्ऋत्यदले शूर्पाकारे द
शाङ्कुले मण्डले किरीटिनं कृष्णवर्णं कृष्णमाल्याम्बरधरं करालवदनं चतुर्भुजं वरखड्गचर्मधनुर्धरं सिंहस्थमादित्याभिमुखं राहुं कृ
ष्णपुष्पाक्षतैः ॥ ॐ आयङ्गौः ॥ ॐ भूर्भुवःस्वः राठिनापुरोद्भव पैठीनसिसगोत्र राहो इहागच्छ इत्यावाह्य इह तिष्ठेति स्थापयित्वा ॥ ॐ क
यानः ॥ राहवे नमः ॥ ८ ॥ ततो वायव्यदले ध्वजाकारे षडङ्कुले मण्डले किरीटिनो धूम्रान् द्विभुजान् गदाहस्तान् विकृताननमुखान् गृध्रवाह
नानादित्याभिमुखान् केतून् धूम्रपुष्पाक्षतैः ॥ ॐ ब्रह्मजज्ञानं ॥ ॐ भूर्भुवःस्वः अन्तर्वेदिसमुद्भव जैमिनिसगोत्राः केतव इहाग
च्छत इत्यावाह्य इह तिष्ठतेति स्थापयित्वा ॥ ॐ केतुं कृण्वन् ॥ ॐ केतुभ्यो नम इति पूजयेत् ॥ ९ ॥ अथाधिदेवताः सर्वाः श्वेतपुष्प 19
तण्डुलैः स्थापयित्वा पूजयेत् ॥ तत्र सूर्यस्य दक्षिणपार्श्वे ॥ ॐ त्र्यम्बकमिति वसिष्ठ ऋषी रुद्रो देवताऽनुष्टुप्छन्दः ईश्वरस्यावाह ॥ राम ॥
नपूजनयोर्विनियोगः ॥ ॐ त्र्यम्बकं यजामहे ॥ ॐ भूर्भुवःस्वः ईश्वर इहागच्छ इह तिष्ठेति स्थापयित्वा ॥ ॐ ईश्वराय नम इति पूजयेत् ॥ १ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः सोमस्य दक्षिणपार्श्वे ॥ ॐ श्रीश्चेत्युत्तरनारायणस्य ऋषिः उमा देवता त्रिष्टुप्छन्दः उमाया आवाहनपूजने विनियोगः ॥ ॐ श्रीश्च ॥ ॐ भूर्भु
वः स्वः ॐ उमे इहागच्छेत्यावाह्य इह तिष्ठेति स्थापयित्वा ॥ ॐ उमायै नमः इति पूजयेत् ॥ २ ॥ भौमस्य दक्षिणपार्श्वे ॐ यदक्रन्द इति भास्करजं
मदग्निर्दीर्घतमसऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दस्यावाहनपूजने विनियोगः ॥ ॐ यदक्रन्दः ॥ ॐ भूर्भुवः स्वः स्कन्द इहागच्छ इ
ह तिष्ठेति आवाह्य ॥ ॐ स्कन्दाय नमः इति पूजयेत् ॥ ३ ॥ बुधस्य दक्षिणपार्श्वे ॥ ॐ विष्णोरराटमसीति उतथ्य ऋषिर्विष्णुर्देवता यजुर्विष्णो
रावाहनपूजने विनियोगः ॥ ॐ विष्णोरराटम् ॥ ॐ भूर्भुवः स्वः ॐ विष्णो इहागच्छ इह तिष्ठेत्यावाह्य ॥ ॐ विष्णवे नमः इति पूजयेत् ॥ ४
गुरोर्दक्षिणपार्श्वे ॥ आब्रह्मन्निति प्रजापतिऋषिर्ब्रह्मा देवता यजुर्ब्रह्मण आवाहनपूजने विनियोगः ॥ ॐ आब्रह्मन् ॥ ॐ भूर्भुवः
स्वः ब्रह्माणमावाहयामि स्थापयामि ॥ ॐ ब्रह्मणे नमः इति पूजयेत् ॥ ५ ॥ ॥ शुक्रस्य दक्षिणपार्श्वे ॥ ॐ सजोषा इन्द्रेति विश्वामित्र
ऋषिः इन्द्रो देवता इन्द्रस्यावाहनपूजने विनियोगः ॥ ॐ सजोषा इन्द्र ॥ ॐ भूर्भुवः स्वः इन्द्र इहागच्छ इह तिष्ठ आवाह्य ॐ इन्द्राय नमः
इति पूजयेत् ॥ ६ ॥ शनैर्दक्षिणपार्श्वे ॥ ॐ यमाय त्वा ॥ ॐ भूर्भुवः स्वः ॥ यम इहागच्छेत्यादि ॥ ॐ यमाय नमः इति पूजयेत् ॥ ७ ॥ राहोर्द
क्षिणपार्श्वे ॥ ॐ आब्रह्मन्निति मन्त्रेण ॥ ॐ भूर्भुवः स्वः कालेत्यादि कालं पूजयेत् ॥ ८ ॥ ॥ केतुदक्षिणपार्श्वे ॥ ॐ चित्रावसो ॥ ॐ भूर्भु
वः स्वः चित्रगुप्त इहागच्छेत्यावाह्य इह तिष्ठेति स्थापयित्वा ॥ ॐ चित्रगुप्ताय नमः इति पूजयेत् ॥ ९ ॥ १८ ॥ ततः शुक्लाक्षतपुञ्जदलैः सर्वाः प्रत्य
धिदेवताः स्थापयित्वा पूजयेत् ॥ ततः सूर्यस्य वामपार्श्वे ॥ ॐ अग्निं दूतमिति अग्निं पूजयेत् ॥ १ ॥ सोमस्य वामपार्श्वे ॥ ॐ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ह्ना ॥
॥ २० ॥

स्वग्ने इत्यपः ॥ २ ॥ भौमस्य वामपार्श्वे ॥ ॐ स्योना पृथिवीति पृथिवीम् ॥ ३ ॥ बुधस्य वामपार्श्वे ॥ ॐ इदं विष्णुरिति विष्णुं ॥ ४ ॥ गुरोर्वामपा
र्श्वे ॥ ॐ इन्द्र आसामिति इन्द्रम् ॥ ५ ॥ शुक्रस्य वामपार्श्वे ॥ ॐ अदित्यै रास्नासीति इन्द्राणीम् ॥ ६ ॥ शनैर्वामपार्श्वे ॥ ॐ प्रजापतेनेति प्रजा
(र्श्वे ॥ ॐ इन्द्र आसा मि) पतिम् ॥ ७ ॥ राहुवामपार्श्वे ॥ ॐ नमोस्तु सर्पेभ्य इति सर्पान् ॥ ८ ॥ केतुवामपार्श्वे ॥ ॐ ब्रह्मयज्ञानमिति ब्र
ह्माणं पूजयेत् ॥ ९ ॥ ६७ ॥ इति प्रत्यधिदेवता ॥ ततः शुक्लतण्डुलपुञ्जे विनायकादिपञ्चदेवताः स्थापयित्वा पूजयेत् ॥ राहो
रुत्तरभागे ॥ ॐ गणानां त्वेति गणपतिं पूजयेत् ॥ १ ॥ शनेरुत्तरभागे ॥ ॐ अम्बे अम्बिके इति दुर्गाम् ॥ सूर्योत्तरभागे ॥ ॐ वायो
ये न इति वायुम् ॥ ३ ॥ राहोर्दक्षिणभागे ॥ ॐ घृतं घृतपावान इति आकाशम् ॥ ४ ॥ केतुदक्षिणभागे ॥ ॐ या वां कशा इति अश्विनौ
॥ ५ ॥ इति पञ्चलोकपालाः ॥ ३२ ॥ ततः पूर्वादिदिक्षु दिक्पालान् स्थापयित्वा पूजयेत् ॥ पूर्वे ॥ ॐ त्रातारमिन्द्रमिति इन्द्रं पूज
येत् ॥ १ ॥ आग्नेये ॥ ॐ अग्निं दूतमित्यग्निम् ॥ २ ॥ दक्षिणे ॥ ॐ यमाय त्वेति यमं ॥ ३ ॥ निर्ऋतिभागे ॥ ॐ असुन्वन्तमिति निर्ऋतिम्
॥ ४ ॥ पश्चिमे ॥ ॐ तत्त्वायामीति वरुणम् ॥ ५ ॥ वायव्ये ॥ ॐ वायो ये न इति वायुम् ॥ ६ ॥ उत्तरे ॥ ॐ सोमो धेनुमिति सोमम् ॥ ७ ॥ ईशा
ने ॥ ॐ तमीशानमिति ईशानम् ॥ ८ ॥ पूर्वेशानमध्ये ॥ ॐ ब्रह्मजज्ञानमिति ब्रह्माणम् ॥ ९ ॥ पश्चिमनिर्ऋतिमध्ये ॥ ॐ नमोस्तु स
र्पेभ्य इति अनन्तं पूजयेत् ॥ १० ॥ इति दशदिक्पालाः ॥ ४२ ॥ ततः इन्द्राग्निमध्ये ॥ ॐ स्तुगावः ॥ ॐ भूर्भुवः स्वः वसव इहागच्छतेह
तिष्ठत ॥ ध्रुवो ध्वरस्तथा सोमश्चापश्चैवानिलोनलः प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्तिताः ॥ ॐ ध्रुवाद्यष्टवसुभ्यो नम इति पू

20
॥ राम ॥
॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयेत् ॥ ५० ॥ इन्द्रेशानमध्ये ॥ ॐ यज्ञो देवानाम् ॥ ॐ भूर्भुवः स्वः आदित्या इहागच्छत इह तिष्ठत ॥ धातार्यमा च मित्रश्च वरुणोंऽशो भग
स्तथा ॥ इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ॥ ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥ इत्येते द्वादशादित्या नामभिः परिकी
र्त्तिता ॥ ॐ धात्रादि द्वादशादित्येभ्यो नमः इति पूजयेत् ॥ ६२ ॥ अग्नियममध्ये ॥ ॐ यदेतावन्तः रुद्रा इहागच्छत इह तिष्ठत ॥ वीरभद्रश्च
शम्भुश्च गिरीशश्च महायशाः ॥ अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः ॥ स्थाणुर्भ
वश्च भगवान् रुद्रास्त्वेकादश स्मृताः ॥ वीरभद्राद्येकादशरुद्रेभ्यो नमः इति पूजयेत् ॥ ७३ ॥ ॥ यमनिर्ऋतिमध्ये ॥ गौरीर्मिमाय स
लिलानि तक्षती ॥ एकपदी द्विपदी त्रीपदीमित्यादिना ॥ ॐ भूर्भुवः स्वः गौर्य इहागच्छत इह तिष्ठत ॥ गौरी पद्मा शची मेधा सावित्री वि
जया जया ॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ॥ ॐ गौर्यादिषोडशमातृभ्यो नम
इति पूजयेत् ॥ निर्ऋतिवरुणमध्ये गणानां त्वेति गणपतिं पूजयेत् ॥ ९० ॥ वायुसोममध्ये ॥ मरुतो यस्य ॥ ॐ भूर्भुवः स्वः मरुत
इहागच्छत इह तिष्ठत ॥ आवहः प्रवहश्चैव उद्वहः संवहस्तथा ॥ विवहः परावहश्चैव तथा परिवहोऽनिलः ॥ ॐ आवहादिसप्त
मरुद्भ्यो नमः इति पूजयेत् ॥ ९७ ॥ वेद्यामेव यथावकाशं ब्रह्मादीन् पञ्चदश स्थापयित्वा पूजयेत् ॥ ॐ ब्रह्म जज्ञानमिति ब्रह्माणम् ॥ ९८
ॐ इदं विष्णुरिति विष्णुम् ॥ ९९ ॥ ॐ मानस्तोक इति रुद्रम् ॥ १०० ॥ ॐ अग्निरस्मीत्यर्कम् ॥ १०१ ॥ ॐ वनस्पते वीड्वङ्गः ॥ ॐ भूर्भुवः स्वः
वनस्पते इहागच्छेमावाहे इह तिष्ठेति स्थापयित्वा स्नानानि पाद्यादीनि वनस्पतये नमः इति पूजयेत् ॥ १०२ ॥ ॥ इति ग्रहदेवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजा॥ ॥एवं पुनरशानदेवानां पूजां विधाय॥ वेदियग्निमभागे भूमावेव वन्हिरैय:॥ ॥तत्र॥ ॐ आकृष्णेन॥ सूर्याय गुडौ
दनाभावे एषदध्यक्षतवलिर्नमः॥१ ॐ इमन्देवा:॥ ॐ सोमाय घृतपायसाभावे एषदध्यक्षतवलिर्नमः॥२॥ ॐ अग्निर्मूर्धा
भौमाय मसूरान्नाभावे एषदध्यक्षतवलिर्नमः॥३॥ ॐ उद्बुध्यस्व॥ बुधाय दुग्धौदनाभावे एषद०॥४॥ ॐ बृहस्पते अति
ॐ बृहस्पतये दध्योदनाभावे एषद०॥५॥ ॐ अन्नात्परिस्रुत:॥ शुक्राय घृतौदनाभावे एषद०॥६॥ ॐ शन्नोदेवी:॥ शनैश्च
राय कृशरान्नाभावे एषद०॥७॥ ॐ कयान:॥ ॐ राहवे छागमांसाभावे एषद०॥८॥ ॐ केतुंकृण्वन्॥ ॐ केतुभ्यश्चित्रौदनाभा
वे एषद०॥९॥ ॥ततोऽधिदेवतानाम्॥ ॐ त्र्यम्बकं यजामहे॥ ॐ ईश्वराय घृतपायसाभावे एषदध्यक्षतवलिर्नमः॥१॥
ॐ श्रीश्च उमायै घृतपयसाभावे एषद०॥२॥ ॐ यदक्रन्द:॥ ॐ स्कन्दाय घृतपायसाभावे एषद०॥३॥ ॐ विष्णोरराटं॥ ॐ
विष्णवे घृतपायसाभावे०॥४॥ ॐ आब्रह्मन्॥ ॐ ब्रह्मणे घृतपायसाभा०॥५॥ ॐ सजोषा इन्द्र॥ ॐ इन्द्राय घृतपायसाभावे०
॥६॥ ॐ असि यम:॥ ॐ यमाय घृतपायसाभावे०॥७॥ ॐ कार्षिरसि॥ ॐ कालाय घृतपायसाभावे०॥८॥ ॐ चित्रावसो॥ ॐ
चित्रगुप्ताय घृतपायसाभावे०॥९॥१८॥ अथ प्रत्यधिदेवतानाम्॥ ॥ॐ अग्निं दूतम्॥ ॐ अग्नये घृतपायसाभावे०॥१॥
ॐ अप्स्वग्ने॥ ॐ अद्भ्यो घृतपायसाभावे०॥२॥ ॐ स्योना पृथिवि॥ ॐ पृथिव्यै घृतपायसाभावे०॥३॥ ॐ इदं विष्णु:॥ ॐ विष्णवे
घृतपायसाभावे०॥ ॐ त्रातारमिन्द्रं॥ ॐ इन्द्राय घृतपायसाभावे०॥५॥ ॐ अदित्यै रास्नासि॥ ॐ शच्यै घृतपायसाभावे०॥६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ प्रजापनेन ॥ ॐ प्रजापनये घृतपायसाभावे० ॥ ७ ॥ ॐ नमोस्तु सर्वेभ्यः ॥ ॐ सर्पेभ्यो घृतपायसाभावे० ॥ ८ ॥ ॐ ब्रह्मजज्ञानम्
ॐ ब्रह्मणे घृतपायसाभावे एष दध्यक्षतवलिर्नमः ॥ ९ ॥ २७ ॥ ॥ अथ विनायकादियंच देवतानाम् ॥ ॐ गणानां त्वा ॥ ॐ विनाय
काय घृतपायसाभावे एष दध्यक्षतवलिर्न्नमः ॥ १ ॥ ॐ अम्बे ऽम्बिके ॥ ॐ दुर्गायै घृतपायसाभावे० ॥ २ ॥ ॐ वानो वा ॥ ॐ वायवे
घृतपायसाभावे० ॥ ३ ॥ ॐ घृतं घृतपावानः ॥ ॐ माकाशाय घृतपायसाभावे० ॥ ४ ॥ ॐ याबाकशा ॥ ॐ अश्विभ्याम् घृतपायसाभा
वे० ॥ ५ ॥ ॥ अथ दिक्पालानाम् ॥ ॥ ॐ इन्द्रस्तु महसादीप्तः सर्वदेवाधियो महान् ॥ वज्रहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥ ॐ
इन्द्राय साङ्गाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय माषभक्ताभावे एष दध्यक्षतवलिर्नमः ॥ भो भो इन्द्र त्वं दिशं र
क्ष मम यजमानस्यायुः कर्त्ता पुष्टिकर्त्ता क्षेमदः तुष्टिदो भव ॥ ॐ आग्नेयः पुरुषो रक्तः सर्वदेवमयोव्ययः ॥ धूमकेतुरजो ध्यक्ष(
स्तस्मै नित्यं नमो नमः ॥ ॐ अग्नये माषभक्ताभावे एष दध्यक्षतवलिर्नमः ॥ २ ॥ ॐ यमश्चोत्पलपत्राभः किरीटी दण्डधृक् सदा
धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥ ॐ यमाय माषभक्ताभावे० ॥ ३ ॥ ॐ निरृतिस्तु पुमान् कृष्णः सर्वरक्षोधियो महान् ॥ ख
ड्गहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥ ॐ निरृतये माषभक्ताभावे० ॥ ४ ॥ ॐ वरुणः सर्वलोकविष्णुः पुरुषो निम्नगाधियः ॥ पाश
हस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥ ॐ वरुणाय माषभक्ताभावे० ॥ ५ ॥ ॐ वायुस्तु सर्वभूतोयं सर्वगः ध्वजः शुचिः ॥ पुरुषो ध्व
जहस्तश्च तस्मै नित्यं नमो नमः ॥ ॐ वायवे माषभक्ताभावे ॥ ६ ॥ ॐ गौरेयस्तु पुमान्सोमः सर्वौषधिसमन्वितः ॥ नक्षत्राधिपतिः सो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्न ॥ ॥२२॥

मस्तस्यै निम्नं नमो नमः॥ ॐ सोमाय माषभक्ताभावे॰॥७॥ ॐ ईशानः पुरुषः शुक्लः सर्वविद्याधिपो महान्॥ शूलहस्तो विरूपाक्ष(
स्तस्मै नित्यं नमो नमः॥ ॐ ईशानाय माषभक्ताभावे॰॥८॥ ॐ पद्मयोनिश्चतुर्मूर्तिर्वेदवासः पितामहः॥ यज्ञाध्यक्षश्चतुर्वक्त्रस
स्मै नित्यं नमो नमः॥ ॐ ब्रह्मणे माषभक्ताभावे॰॥९॥ ॐ योसावनन्तरूपेण ब्रह्माण्डं सचराचरम्॥ पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं
नमो नमः॥ ॐ अनन्ताय माषभक्ताभावे॰॥१०॥ ॐ मुगा वा॥ ॐ ध्रुवाय ध्रुवक्षेत्रेभ्यो माषभक्ताभावे॰॥१॥ ॐ यज्ञो देवानाम्॥ धाता
दिद्वादशादित्येभ्यो माषभक्ताभावे॥२॥ ॐ यत एनावन्त॥ वीरभद्राय एकादशरुद्रेभ्यो माषभक्ताभावे॰॥३॥ गौरीर्मिमाय सलि
लानि तक्षति॥ ॐ गौर्यादिषोडशमातृभ्यो माषभक्ताभावे॰॥४॥ ॐ गणानां त्वा॥ ॐ गणपतये माषभक्ताभावे॰॥५॥ ॐ नमो
यस्य॥ ॐ आवहादिसप्तमरुद्भ्यो माषभक्ताभावे॰॥६॥ ॐ ब्रह्मजज्ञानम्॥ ॐ ब्रह्मणे माषभक्ताभावे॰॥७॥ ॐ इदं विष्णुः॥ ॐ वि
ष्णवे माषभक्ताभावे॰॥८॥ ॐ मानस्तोके॥ ॐ रुद्राय माषभक्ताभावे॰॥९॥ ॐ अग्निरसि॥ ॐ अर्काय माषभक्ताभावे॰॥१०॥ ॐ
वनस्पते वीड्वङ्गः॥ ॐ वनस्पतये माषभक्ताभावे एषदधिक्षीरबलिर्नमः॥११॥ एवं सर्वाग्रहं स्थानदेवताबलिदानं विधाय
भूरिभक्षविनानादीनि नवग्रहेभ्यो धिदेवप्रत्यधिदेवसहितेभ्यो न दद्यादिति दद्यात्॥ ॥दीनबलिदानम्॥ ॥अथ प्रधान
देवत्यानि जपसूक्तानि॥ तत्र सूर्यस्य॥ ॐ विभ्राडिति सप्तदशर्चस्यानुवाकस्य॥ आद्याया विभ्राडनन्तराणां तिसृणां प्रस्कण्व
ऋषिः पंचम्या आवतस्य एकादश्या ऋषिः षष्ठ्या वेन ऋषिः सप्तम्याः कुत्स ऋषिरष्टम्या अगस्त्य ऋषिर्नवम्याः शुनकक्षस्तु कण्व

22

॥ राम ॥ ॥२२॥

ऋषी दशम्याः वस्करावऋषिरथ ह्योर्जमदग्निर्ऋषिः पंचदश्यान्नृमेधऋषिः षोडश्याः कुत्सऋषिरंत्यायाहिरण्यस्तूप आङ्गिरस ऋषिः
पंचम्या विश्वेदेवा देवताषष्ठ्याः सोमो देवता अन्यासां सूर्यो देवता आद्याष्टमीच जगती छन्दो द्वितीयादिनिस्रो नवमी दशमी च गा
यत्र्यश्छन्दांसि सूर्यप्रीतये जपे विनियोगः ॥ ॐ विभ्राड्बृहत्समइपन् ॥ १८ ॥ ॐ अषाढंयुत्सु इति च नस्त्रस्याङ्गोतमऋषिः सोमो देवता त्रि
ष्टुप्छन्दः सोमप्रीतये जपे विनियोगः ॥ ॐ आषाढंयुत्सु० सागविश्वो ॥ ४ ॥ ॐ अग्निर्मूर्द्धेति विरूपाक्षऋषिरग्निर्देवता गायत्री छन्दो
ऽग्निप्रीतये जपे विनियोगः ॐ अग्निर्मूर्द्धा ॥ १ ॥ ॐ उद्बुध्यस्वेति परमेष्ठी ऋषिरग्निर्देवता त्रिष्टुप्छन्दो बुधप्रीतये जपे विनियो
गः ॥ ॐ उद्बुध्यस्व ॥ ॐ बृहस्पते अतीति गृत्समदऋषिर्ब्रह्मा देवता त्रिष्टुप्छन्दो बृहस्पतिप्रीतये जपे विनियोगः ॥ ॐ बृहस्पते अति
॥ १ ॥ ॐ अन्नात्परिस्रुत इति प्रजापतिरश्विनसरस्वतीन्द्राञ्च ऋषयः इन्द्रो देवता जगती छन्दः शुक्रप्रीतये जपे विनियोगः ॥ ॐ अन्नात्परि
स्रुतः ॐ शन्नो देवीरिति दध्यङ्ङाथर्वण ऋषिरापो देवता गायत्री छन्दः शनिप्रीतये जपे विनियोगः ॥ ॐ शन्नो देवी ॥ १ ॥ ॐ कया
नश्चित्र इति वामदेवऋषिरिन्द्रो देवता गायत्री छन्दो राहुप्रीतये जपे विनियोगः ॥ ॐ कया नः ॥ १ ॥ ॐ केतुं कृण्वन्निति मधुच्छन्दऋ
षिरग्निर्देवता गायत्री छन्दः केतुप्रीतये जपे विनियोगः ॥ ॐ केतुं कृण्वन् ॥ ॥ अथाधिदेवता ॥ ॥ तत्रेश्वरस्य ॥ षट्षष्टि
मंत्रात्मनो रुद्राध्यायस्य परमेष्ठी ऋषिराद्यानामेकरुद्रो देवता आद्या गायत्री छन्दस्तिस्रोनुष्टुभश्छन्दांसि द्वे जगत्यौ छन्द
सी नमो हिरण्यबाहव इत्यंतं सप्तविंशत्यन्त्रं विद्रापे अन्धस इत्युपरिष्टाद्बृहती छन्द इमा रुद्रायेति जगती छन्दो या ते रुद्रेत्यनुष्टु

॥ राम ॥
॥ २३ ॥

छन्दस्तनो देवत्रिष्टुभौ छन्दसी विकिरीडेमाघाघा दश्चानुष्टुभः छंदांसि श्रेयाणि त्रीणि यजूंषि रुद्रप्रीनयेजयेविनियोगः
ॐ नमस्ते रुद्र ॥ जम्भे दध्मः ॥ ६६ ॥ द्वामहे इत्यना षोडशी व वासन्तमिनिक्कचिन् ॥ ॐ श्रीश्वेत्तुन्नरनारायणऋषिर्नारायणो
देवतात्रिष्टुप्छन्दस्त्माप्रीनयेजयेविनियोगः ॥ ॐ श्रीश्च ॥ ॐ यदक्रन्दइति भार्गवजमदग्निदीर्घजमसऋषयः स्कन्दो देवता
त्रिष्टुप्छन्दः स्कन्दप्रीनयेजयेविनियोगः ॥ ॐ यदक्रन्दः ॥ १ ॥ ॐ सहस्रशीर्षेति षोडशानां नारायणऋषिः पुरुषो देवता अ
नुष्टुप्छन्दः अन्त्यात्रिष्टुप्छन्दो विष्णुप्रीनयेजयेविनियोगः ॥ ॐ सहस्रशीर्षापुरुषः ॥ सन्ति देवाः ॥ १६ ॥ आब्रह्मन्निति प्रजाप
तिर्ऋषिर्ब्रह्मादेवतायजुर्ब्रह्मप्रीनयेजयेविनियोगः ॥ ॐ आब्रह्मन् ॥ ॐ आशुः शिशान इति द्वादशानां अप्रतिरथऋषिरि
न्द्रो देवतात्रिष्टुप्छन्दः इन्द्रप्रीनयेजयेविनियोगः ॥ ॐ आशुः शिशानः ॥ सर्वंताम् ॥ ॐ यमाय त्वेति दध्यङ्ङाथर्वणऋषि
र्यमो देवता यजुर्यमप्रीनयेजयेविनियोगः ॥ ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा ॥ ॐ कार्षिरसीति दध्यङ्ङाथर्वण
ऋषिरापो देवता अनुष्टुप्छन्दः कालप्रीनयेजयेविनियोगः ॥ ॐ कार्षिरसि ॥ ॐ विश्वावसो इति ऋषयः पञ्च षष्ठ्या रात्रि देव
ताजगती छन्दश्चित्र तप्तप्रीनयेजयेविनियोगः ॥ ॐ विश्वावसो ॥ ॥ अथ पञ्चनामाविदेवानानाम् ॥ ॥ ॐ अस्याजरासइति
सप्तदशार्द्धं आद्यायाः वत्सऋषिरिन्द्रवायू देवते त्रिष्टुप्छन्दः द्वितीयाया विरुपाक्षऋषिरिन्द्रो देवते गायत्री छन्दस्तृती
यायागोतमऋषिर्मित्रावरुणौ देवते गायत्री छन्दः चतुर्थ्या विरूपऋषिरिन्द्रावरुणौ देवते गायत्री छन्दः पंचम्याः ।

23
॥ राम ॥
॥ २३ ॥

कुत्सऋषिःशुक्रोदेवतात्रिष्टुप्छन्दःषष्ठ्यावामदेवऋषिरग्निर्देवताजगतीछन्दःसप्तम्याविश्वामित्रऋषिरिन्द्रोदेवतात्रिष्टु
प्छन्दःदशम्यामेधातिथिऋषिरग्निर्देवतागायत्रीछन्दःएकादश्याःशाकपराशरऋषिर्मरुतोदेवतास्त्रिष्टुप्छन्दःद्वादश्याअ
त्रिरुहिताविश्वव्यचाऋषयर्मरुतोदेवतास्त्रिष्टुप्छन्दःत्रयोदश्याभरद्वाजऋषिरग्निर्देवतात्रिष्टुप्छन्दःचतुर्दश्यापंचदश्योर्व
सिष्ठऋषिरादित्योदेवताबृहतीछन्दःषोडश्यावामदेवऋषिरग्निर्देवतात्रिष्टुप्छन्दःसप्तदश्यानुश्योधानकऋषिःसवितादे
वतात्रिष्टुप्छन्दःअग्निप्रीतयेजपेविनियोगः॥ ॐअस्मानरासः॥ ॐअग्याहृणीमहे॥१७॥ ॐआपोहिष्ठेतितिसृणांसिंधुद्वीप
ऋषिरापोदेवतागायत्रीछन्दोऽपांप्रीतयेजपेविनियोगः॥ ॐआपोहिष्ठेन॥३॥ ॐस्योनापृथिवीतिदध्यङ्ङाथर्वणऋषिःपृ
थिवीदेवतागायत्रीछन्दःपृथिवीप्रीतयेजपेविनियोगः॥ ॐस्योनापृथिवि॥१॥ ॐसहस्रशीर्षेतिनारायणऋषिःपुरुषोदे
वतात्रिष्टुप्छन्दःअन्त्यानुष्टुप्छन्दोविष्णुप्रीतयेजपेविनियोगः॥ ॐसहस्रशीर्षापुरुषःसन्तिदेवाः॥१६॥ ॐआशुःशिशानइ
तिद्वादशार्चमैत्रंशाग्वन्॥१२॥ ॐअदित्यैरास्नेतिदध्यङ्ङाथर्वणऋषिरिन्द्राणीदेवतायजुरिन्द्राणीप्रीतयेजपेविनियोगः
ॐअदित्यैरास्ना॥१॥ ॐहिरण्यगर्भइतिचतुर्णांहिरण्यगर्भऋषिःप्रजापतिर्देवतात्रिष्टुप्छन्दःप्रजापतिप्रीतयेजपेविनियो
गः॥ ॐहिरण्यगर्भःसमवर्त्त॥देवेभ्यःस्वाहा॥ ॐनमोस्तुसर्पेभ्यइतित्र्यृचस्यदेवाऋषयःसर्पादेवताअनुष्टुप्छन्दःसर्पप्रीतयेज
पेविनियोगः॥ ॐनमोस्तुसर्पेभ्यः॥सर्पेभ्योनमः॥३॥ ॐब्रह्मजज्ञानमितिप्रजापतिऋषिरादित्योदेवतात्रिष्टुप्छन्दोब्रह्मप्रीत

CC-0. In Public Domain. Digitization by eGangotri

येजपेविनियोगः ॥ ॐ ब्रह्मजज्ञानम् ॥ १ ॥ ॥ अथविनायकादियज्ञानाम् ॥ ॥ ॐ गणानांत्वेतिप्रजापतिर्ऋषिर्गणपतिर्देवता
यजुर्विनायकप्रीतयेजपेविनियोगः ॥ ॐ गणानांत्वा ॥ नम ॥ १ ॥ ॐ अम्बेअम्बिकेइतिप्रजापतिर्ऋषिर्दुर्गादेवताअनुष्टुप्छ
न्दोदुर्गाप्रीतयेजपेविनियोगः ॥ ॐ अम्बेअम्बिके ॥ १ ॥ ॐ नियुत्वान्वायविनिचस्मांआश्राया ट्त्समदऋषिर्द्विनीयायाः पुरू
मीढसमीढौऋषिनित्ररणाप्रजापतिर्ऋषिर्वायुश्चाप्यश्चआङ्गिरसऋषिर्वायुर्देवताद्विनीयायाअनुष्टुप्छन्दोयंचमोअनुष्टुप्छन्दः
शेषागायत्र्यश्छन्दांसिवायुप्रीतयेजपेविनियोगः ॥ ॐ नियुत्वान्वायो ॥ जवाण्ंस्याहणीमहे ॥ ६ ॥ ॐ हुर्ह्वाअस्मीनिषादशानांइ
जापतिर्ऋषिरग्निर्देवताउष्णिकछन्दआकाशप्रीतयेजपेविनियोगः ॥ ॐ तुर्ह्वाअस्य ॥ हविरिदंजुषस्नाम् ॥ ॐ यावांकशेतिमे
धातिथिर्ऋषिरश्विनौदेवतेगायत्रीछन्दोऽश्विनीप्रीतयेजपेविनियोगः ॥ ॐ यावांकशा ॥ १ ॥ ॥ अथदिक्पालानाम् ॥ ॥ ॐ
आभुःशिशानइतिषादशर्चमैन्द्रंपाग्वत् ॥ १२ ॥ ॐ अस्माजएसइतिसप्तदशार्चमाग्नेयंपाग्वत् ॥ १७ ॥ ॐ यमायत्वेतिदध्यङ्
थर्वणऋषिर्यमोदेवतायजुर्यमप्रीतयेजपेविनियोगः ॥ ॐ यमायत्वांगिरस्वतेपितृमतेस्वाहा ॥ ॐ असुन्वन्तमितिनिऋतप्रजा
पतिर्ऋषिरग्निर्देवतात्रिष्टुप्छन्दोनिर्ऋतिप्रीतयेजपेविनियोगः ॥ ॐ असुन्वन्तमयजमानम् ॥ परिवेदद्विष्वतः ॥ २ ॥ इमम्मेवरु
णेतिद्वयोःशुनःशेफऋषिर्वरुणोदेवतागायत्रीत्रिष्टुभौछन्दसिवरुणप्रीतयेजपेविनियोगः ॥ ॐ इमम्मेप्रमोची ॥ २ ॥ ॐ नि
युत्वान्वायविनिषडर्चंवायवीयंपाग्वत् ॥ ६ ॥ ॐ अषाढंयुत्सितिसौम्यंचतुष्टयंपाग्वत् ॥ ४ ॥ ॐ रुद्राध्यायःषट्षष्ठिमंत्रदृशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नमस्कं शाग्वन् ॥ ९९ ॥ ॐ नमोस्तु सर्पेभ्य इति त्र्यचस्य मनन्नमस्कं शाग्वन् ॥ २ ॥ ॐ ब्रह्मजज्ञानमिति प्रजापतिर्ऋषिरादित्यो देवता त्रि
ष्टुप्छन्दो ब्रह्मप्रीतये जपे विनियोगः ॥ ॐ ब्रह्मजज्ञानम् ॥ १ ॥ ॥ अथ वस्वादिनाम् ॥ ॥ ॐ सुगाव इति देवा ऋषयो वसवो देवता
स्त्रिष्टुप्छन्दो वसुप्रीतये जपे विनियोगः ॥ ॐ सुगावः ॥ १ ॥ ॐ इमा गिर इति गृत्समद ऋषिरादित्यो देवता त्रिष्टुप्छन्द आदित्यप्रीत
ये जपे विनियोगः ॥ ॐ इमा गिरः ॥ अठेस ॥ १ ॥ रुद्राध्यायो रौद्रं शाग्वन् ॥ १६ ॥ ॐ शुक्रज्योतिश्चेति सप्तानां सप्तर्षय ऋषयो मरुतो
देवता आद्या चतुर्थी चोष्णिक् पञ्चमी जगती शेषा गायत्र्यश्छन्दांसि मरुतां प्रीतये जपे विनियोगः ॥ ॐ शुक्रज्योतिश्च ॥ ॐ आ
ब्रह्मन्निति प्रजापतिर्ऋषिर्ब्रह्मा देवता यजुर्ब्रह्मप्रीतये जपे विनियोगः ॥ ॐ आब्रह्मन् ॥ ॐ सहस्रशीर्षेति वैष्णवं शाग्वन् ॥ १६
रुद्राध्यायो रौद्रं शाग्वन् ॥ ॐ विभ्राडिति सप्तदश सौर्यं माकं शाग्वन् ॥ १७ ॥ ॐ वनस्पते वीड्वङ्ग इति प्रजापतिर्ऋषिर्वनस्पतिर्देव
ता त्रिष्टुप्छन्दो वनस्पतिप्रीतये जपे विनियोगः ॥ ॐ वनस्पते वीड्वङ्गः ॥ १ ॥ ॥ इति ग्रहप्रधानदेवताजपसूक्तप्रकरणम् ॥
॥ अथ सर्वकर्मसाधारणाग्निस्थापनप्रकरणम् ॥ ॥ ॐ भूरासीति मन्त्रेण हस्तमितं चतुरस्रं मण्डलं शोधयेत् ॥ न
त्रयं देवा देवहेडनमिति त्रिभिर्दर्भैः पांसूपसारणम् ॥ इदमेव परिसमूहनम् ॥ मानस्तोक इत्युपलेपनं गोमयोदकेन
इदमुपलेपनम् ॥ त्वामिद्धीति खादिरेण हस्तमात्रेण खड्गाकृतिना स्फ्येन प्रागग्रा उदक्संस्थाः स्थण्डिलपरिमाणाभि
स्तो रेखाः कार्याः ॥ इदमुद्धेरन्नाम ॥ ॐ ब्रजङ्क द्रुमनामिकाङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो रेखाभ्यः पांसूपाकरणम् ॥ इद

CC-0. In Public Domain. Digitization by eGangotri

॥ रा.ल ॥
॥ २५ ॥

मुद्वरणम् ॥ देवस्यत्वेत्यभ्युक्ष्य ॥ ततः स्वस्तिनो मिमीतामित्यादि पठन् ॥ संधारयात्र रोधेनाष्टदलादि विलिख्य ॥ तत्र पृथिव्याः स
धस्थादित्तीन्द्रं पूर्वे ॥ अग्निश्चेति दक्षिणे यमम् ॥ वायोर्येनेद्धनि यश्चिमे वरुणम् ॥ सोमो धेनुमित्युत्तरे सोमम् ॥ अग्निर्दूत
मित्याग्नेये ऽग्निम् ॥ कया नश्चित्रेति नैर्ऋत्ये निर्ऋतिम् ॥ वायुरग्निमिति वायव्ये वायुम् ॥ ईशावास्यमिति ईशान्यामीशानम् ॥ ततो
मध्ये प्रजापतेन सूर्यरश्मिर्हरिकेशः सदसस्पतिमिति मंत्रैः प्रजापतिं पूजयित्वा ॥ कस्त्वा सत्यश्चेति दारुणीं शोधयित्वा ॥ त्वा
मिद्धीति स्थापयेत् ॥ ततो मथित्वा हृतात्वीति कांस्यपात्रे ऽग्निमुपसमाधायाग्नेः संस्कारं कुर्यात् ॥ गर्भो अस्येति गर्भाधानम्
विवस्वन्नादित्यैषेति पुंसवनम् ॥ अजीजनोऽसीति सीमन्तोन्नयनम् ॥ एजतु दशमास्य इति जातकर्म ॥ पूषा यन्त्वा क्षत्रेणेति नि
ष्क्रमणम् ॥ अन्नपतेऽन्नस्येत्यन्नप्राशनम् ॥ अग्न आयांषीति चूडाकरणम् ॥ भद्रं कर्णेभिरिति कर्णवेधः ॥ अग्निरेकाक्षरे
णेत्युपनयनम् ॥ ततः उपवेश्य इति पूर्वं गायत्रीं श्रावयेत् ॥ ॐ भूर्भुवः स्वः वैश्वानराय विद्महे सप्तजिह्वाय धीमहि ॥ त
न्नो अग्निः प्रचोदयात् ॥ गावउपेति गोदानकर्म ॥ भगस्तेवेति विवाहः ॥ त्वयाग्निं संस्कृत्य ॥ अग्निं मूर्द्धेति कांस्यपात्रेणाग्निं गृ
हीत्वा ॥ ॐ आ तावा न वैश्वानरम् ॥ वैश्वानरस्य सुमतौ वैश्वानरो न ॥ इति मंत्रैर्मण्डलेऽग्निमुपसमाधाय ॥ स्थिरो भवेति
प्रज्वालयेत् ॥ आयाहि देवं पुरुषं महान्तं सुरासुरैर्वन्दितपादपद्मम् ॥ ब्रह्मादयो यस्य सुखे वसन्ति विश्वस्य कुण्डे सुरलोक
नाथ ॥ अग्नि दक्षिणतो आब्रह्मन्निति षड्दर्भैः ब्रह्मासनम् ॥ ॐ हिरण्यगर्भ इति पंचाशत्कुशनिर्मितं ब्रह्म पवित्रकरणम्

25
॥ राम ॥
॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यस्यकुर्म इत्यान्वासनम् ॥ अग्ने षेहीति यजमानासनम् ॥ आपोहिष्ठेति प्रणीताम्भस्नानीति वोन्तरतः प्रणीतासनम् ॥ ब्रह्मआसा(
मिति द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तारं चतुरङ्गुलखातं प्रणीतापात्रं वामहस्ते कृत्वा ॥ ॐ इदुत्तममिति दक्षिणहस्तो इत्तपात्र
स्थोदकेन पूरयित्वा प्रणीतासने स्थापयित्वा ॥ कयानश्चित्र इति येनेध्मनमिति वा बर्हिर्गृहीत्वा दाय ईशानादिप्रागग्रैर्बर्हिर्भिः
रुदकसंस्थमग्नेः परिस्तरणं कुर्यात् ॥ नत्वा यामीति अर्थवत्पात्रासादनम् ॥ अर्थवत्सात्रेति सत्वेइ हि कुम्भादेः यथायावद्भिः
पदार्थैः प्रयोजनं तावन्तः पदार्थाः द्वन्द्वः ॥ पान्त उद्गयान्नेरुत्तरतः पश्चादासादयेत् ॥ त्र्यम्बकमिति त्रीणि कुशानरुणानि
पवित्रे स्थ इति साग्रेऽनन्तर्गर्भे द्वे कुशतरुणे पवित्रे ॥ द्वादशाङ्गुलदीर्घं करतलसंमितं खातं पन्यपत्राकृतिकमलमुकुलाकृ
ति वा प्रोक्षणीपात्रमिति नम्मेवरुणेति निधाय ॥ घृतवतीति तैजसं मृन्मयं वा द्वादशाङ्गुलविस्तारं प्रादेशोच्चमाज्यस्थालीम्
अन्नयते इति नाइदमेव चरुस्थाली ॥ ब्रादन्दञ्जिरि निष्कृवसम्मार्जनकुशास्त्रीन् ॥ उपयामगृहीतोसीति उपयमनकुशास्त्रिप
भृतय ॥ समिधाग्निमिति समिधस्तिस्रः पालाशः प्रादेशमात्र्यः ॥ स्रुच प्रथम इति स्रुवं खादिरं हस्तमात्रमङ्गुष्ठपर्वमात्रखा
नयरिणाह वर्तुलपुष्कलम् ॥ आज्यं गव्यं ॥ चरवो ब्रीहितण्डुलाः ॥ दक्षिणार्थं हिरण्यादि द्रव्यम् ॥ षट्पञ्चाशदधिकपरि
मितं पराधर्यवहुभोक्तृपुरुषाहारपरिमितमवरार्ध्यन तण्डुलान्नपूर्णपात्रम् ॥ अन्यानि च उपयुक्तानि वस्तूनि अग्नेरुत्तर
तोनिदध्यात् ॥ पवित्रे स्थ इति कुशतरुणे ग्रन्तः प्रादेशमात्रं विहाय द्वे कुशतरुणे प्रच्छिद्य ॥ इमम्मेवरुणेति प्रोक्षणीपात्रं प्र

CC-0. In Public Domain. Digitization by eGangotri

॥ रा० ॥ ॥ २६ ॥

णीतासन्निधौ निधाय । तत्र पात्रान्तरेण हस्तेन वा प्रणीतोदकमासिंच्य । पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु निधाय । दक्षिणेन
हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा तदुदकं दक्षिणेनोच्छाल्य ॥ देवस्त्वेति प्रोक्षणीजलेन आज्यस्थाल्यादीनि पूर्णपात्रप
र्यन्तानि आसादनक्रमेण एकैकशः प्रोक्ष्य असंचरे प्रणीताग्न्योरन्तराले प्रोक्षणीपात्रं निधाय ॥ इषे त्वेति आज्यस्थालीं पश्चाद
ग्नेर्निहितायामाज्यनिक्षेपः ॥ अन्वयनमिति चरुस्थाल्यां प्रणीतोदकमासिच्य आसादितांस्तण्डुलान्प्रक्षिप्य ॥ तेजोसीति घृतं प्रता
प्य ॥ पञ्चभिः पञ्चभिरिति निर्वपणासनम् ॥ धृष्टिरसीति ज्वलदुल्मुकं प्रदक्षिणमाज्यचर्वोः समन्ताद्भ्रामयेत् ॥ स्रुवश्च मे इति द
क्षिणेन हस्तेन स्रुवमादाय । पुनस्तु मे निष्टाप्य अधोमुखमग्नौ तापयित्वा सव्ये पाणौ कृत्वा ॥ दक्षिणहस्तेन संमार्गकुशाग्रैर्मू
लतोग्रपर्यन्तं संमृज्य ॥ शादन्दग्निरिति मूलैरग्रमारभ्य अधस्तान्मूलपर्यन्तं प्रणीतोदकेनाभ्युक्ष्य ॥ तत्त्वा यामीति पूर्ववत्स्रु
वः प्रतपनम् ॥ तत्स्रुवादधहिः निदक्षिणतो निदध्यात् ॥ अथोद्वासनम् ॥ तत्रापं याज्ञिकसम्प्रदायः ॥ आज्यमुत्थाप्य चरोः पूर्वे
णानीत्वा अग्नेरुत्तरतः स्थापयित्वा ॥ चरुमुत्थाप्य आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयित्वा आज्यमग्नेः पश्चा
दानीय चरुस्त्वानीय आज्यस्योत्तरतो निधाय ॥ एवं त्रिचतुरादीनि अन्यान्यपि हवींषि उद्वासयेत् ॥ अधिश्रितानां पूर्वेणोद्वा ॥ राम ॥
सितानां पश्चिमतो हविषामुद्वासनमिति ॥ सवितुर्वः प्रसव उत्पुनामीति पूर्वपवित्राभ्यामाज्योत्पवनम् ॥ आत्वाहार्षे ॥ २६ ॥
नि आज्यमवलोकनं सादयद्रव्यनिरसनम् ॥ विष्णोरराटमसीति पवित्रमाज्ये निधाय ॥ प्रोक्षणीश्च पवित्राभ्यां पूर्ववदुत्पूय

26

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आत्वसन्निनिवृत्सणोर्चनम् ॥ इदंविष्णुरितिविष्णोः प्रजापतेनेतिप्रजापतेः ॥ तदेवाग्निरित्यग्नेः अग्नावेवप्रदक्षिणक्रमेण ॥ अ
ग्निमीळेइतिपूर्वेऋग्वेदायनमः ॥ इषेत्वेतिदक्षिणेयजुर्वेदायनमः ॥ अग्नआयाहीतिपश्चिमेसामवेदायनमः ॥ शन्नोदेवीरिति
उत्तरेअथर्ववेदायनमः ॥ हिरण्यगर्भइतिहिरण्यंनिधाय ॥ ततोदेवस्यत्वेतिप्रोक्षणपुदकेनसपवित्रदक्षिणातुलकगृही
तेनअग्निमीशानादिउदकपर्यन्तम्पारिषिच्य ॥ समिधाग्निमितिनिस्तन्त्रसमिधोभ्याधाय ॥ उपयमनकुशान्दक्षिणपाणिनागृ
हीत्वावामेनिधायजुहुयादिति ॥ अयम्परिसमूहनादिपर्युक्षणपर्यन्तोविधिर्यत्रकचित्लौकिकेस्मार्तेवाग्नौहोममात्रे
वेदितव्यः ॥ एषएवविधिर्यत्रकचित्तोमइतिपारस्करोक्तेः ॥ नमःप्रार्थनमम् ॥ ॐनमोयज्ञपुरुषवैश्वानरपरमदेवता
यजुर्वेदऋग्वयोर्होमेविनियोगः ॥ ॥नारदउवाच ॥ पूर्वामुखःस्थितोवह्निः पूर्वामुखास्तुआद्विजाः ॥ पूर्वामुखादेवताःसर्वे
कथंपश्चान्मुखोभवेत् ॥ पावकस्यतुकिंरूपंकिंवर्णंकिंचलक्षणम् ॥ शिरोवाउदरंप्रिगंणा चक्षुःश्रोत्रमुखस्यच ॥ ॥ब्रह्मोवा
च ॥ ॥आवाहयेत्ततोवह्निंमन्त्रपूतेनवारिणा ॥ अनलश्चजलंदृष्ट्वाभीतःपश्चान्मुखोभवेत् ॥२॥ पावकंद्विजरूपंचत्रिने
त्रंचचतुर्भुजं ॥ त्रिशिरस्कंसप्तजिह्वंपञ्चलक्षणसंयुतम् ॥३॥ त्रिभागंतुमुखंतस्यअधिकंवक्त्रमुच्यतम् ॥ उत्तरेथेस्थितो
विष्णुर्दक्षिणेर्धप्रजापतिः ॥ मध्येवक्त्रेसदेशानस्त्र्यंबकस्सभाषितम् ॥ मूर्ध्निचैवभवेद्ब्रह्मामुखेचैवतुशंकरः ॥५॥ जिह्वा
यांसंस्थितोविष्णुर्दंष्ट्रायांचयमःस्मृतः ॥६॥ ऋग्वेदस्तुहृदिस्थानेवाहृगतंयजुस्तथा ॥ उदरेकटिगुह्येचसामवेदःप्रकी

॥ रत्न ॥
॥ २८ ॥

र्तितः॥ ८ ॥ अथर्वीजस्तुपादौचग्रीवाॐकारमेवच॥ पृष्ठेचैवगुणायचीएवंसात्र्युपडङ्गकम्॥ ९ ॥ हरकमलपिङ्गललोचनलो
हिताक्षसर्वपापप्रणाशन॥ भृङ्गीगोत्रअरणीनेमानाशांडिल्यस्तेपिनाउदानकुक्षिरूर्ध्वमुखललाट॥ कालीकरालीचमनो
जवाचसुलोहिताचैवसुधूम्रवर्णी॥ स्फुलिङ्गिनीविश्वरूपाचचराङीलीलायमानाइतिसप्तजिह्वाः॥ त्रिशिखचक्रधरअक्ष
सूत्रकमण्डलुव्यग्रहस्तदिव्याभरणभूषितदिव्यगन्धानुलेपनदिव्यवस्त्रैःसुपूजितआरूढ्यसमारूढछागमाजितो
त्तरीयकज्ञोपज्ञःसामध्वनिविभूषिताग्रुकनामवैश्वानरआवाहितोभवनावह्निष्ठयावत्स्वलकर्मसमाप्यते॥ ॥ इत्यग्नि
स्थापनम्॥ ॥ अथवैश्वानरस्यकर्मविशेषेणनामविशेषः॥ अग्निश्चमरुतोनामगर्भाधानेविधीयते॥ तथापुंसवने
चैवसीमन्तेमानकर्मणि॥ १॥ नाम्निवैपार्थिवोवह्निःप्राशनेसुचयःस्मृतः॥ चूडायांमङ्गलोनामव्रतदानेसमुद्भवः॥ गो
दानेसूर्यनामाचविवाहेयोजकस्तथा॥ शान्तिकेवरुणोनामपौष्टिकेबलवर्द्धनः॥ ३ ॥ आवसथ्येभवेदग्निःअग्निहोत्रे(
संपदायकः॥ वरदाहेहननामाप्रकोष्ठजठरःस्मृतः॥ ४ ॥ वायव्येदारुणोनामस्थावरःपावकोभवेत्॥ क्रव्यादोमृतभ
क्षीचसमुद्रेवडवानलः॥ ५ ॥ मृगान्तेवाक्षयोनामवह्निःसर्वेप्रलयङ्गतः॥ ६ ॥ ततोयज्ञेकलशस्थापनगणेशपूजनरक्षापू
जनदीपपूजनपुण्याहवाचनानिकृत्वाकुर्यात्॥ ॥ इतिसर्वकर्मसाधारणमग्निस्थापनप्रयोगः॥ ॥ अथप्रधान
होमः॥ ॥ तत्रादौदक्षिणतउपविष्टोऽग्न्यभिमुखोयजमानः॥ कुशयवजलपाणिर्हेमसंकल्पंकुर्यात्॥ ॐअद्येत्यादि

27

॥ राम ॥
॥ २८ ॥

ग्रहशांतिकर्मणि पूर्वमाघाराज्यभागप्रजापतीन्द्राग्निसोमदेवताभ्यः सूर्यादिनवग्रहेभ्य ईश्वराद्यधिदेवेभ्यो ग्न्यादिप्रत्यधिदे
वताभ्यो गणपतिदुर्गावायवाकाशाश्विनीभ्य इन्द्रादिदशदिक्पालेभ्यो ऽष्टवसुभ्यो द्वादशादित्येभ्यः एकादशरुद्रेभ्यः षोडशमातृ
भ्यः सप्तमरुद्भ्यो गणपतिब्रह्मविष्णुरुद्रार्कवनस्पतिभ्यो यथाभिलिंगेनाज्यचरुसमित्तिलादिद्रव्येणाष्टोत्तरसहस्रयाष्टाविंश
तिसंख्याष्टसंख्यया वा यक्ष्ये ॥ इति संकल्प ॥ ततो ऽग्नेः पश्चादुपविश्य शेनापाजिन दक्षिणजानुर्ध्वस्रुणाचार उपयमनकुशान्वा
म हस्तेन कृत्वा य ईक्षणान्न संस्कारसंस्कृते नोपजायतिं मनसा ध्यात्वाज्यपूर्णेन स्रुवेणाजुहुयात् ॥ ततो दारुन्यनन्तरं स्रुवाव
स्थितघृतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ ॥ ॐ प्रजापतये इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता नवग्रहम
खे आज्यहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ इति स्रुवावस्थितघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ इदं प्राजा
पत्यमाघारं ॥ १ ॥ ॐ इन्द्राय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता नवग्रहमखे आज्यहोमे विनियोगः ॥ ॐ इन्द्राय स्वा
हा इदमिन्द्राय ॥ इदमैन्द्रमाघारमग्नेर्दक्षिणभागे जुहुयात् ॥ इत्याघारौ ॥ ॐ अग्नय इति मंत्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छ
न्दो ऽग्निर्देवता नवग्रहमखे आज्यहोमे विनियोगः ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये ॥ इत्याग्नेयमाज्यभागं जुहुयात् ॥ ३ ॥ ॐ सोमा
येति मंत्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता नवग्रहमखे आज्यहोमे विनियोगः ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय ॥ ४
इति सोम्य आज्यभागः ॥ इत्यग्नीषोमावाज्यभागौ अग्नेरुत्तरभागे जुहुयात् ॥ ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषि

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रान ॥
॥ २८ ॥

र्गीयजुष्मिगत्रुष्टुभ छन्दांस्यग्निवायुसूर्या देवता नवग्रहमखे आज्यहोमे विनियोः॥ ॐ भूः स्वाहा॥ इदमग्नये॥ ५॥ ॐ भुवः स्वा-
हा॥ इदं वायवे॥ ॐ स्वः स्वाहा॥ इदं सूर्याय॥ ७॥ एता महाव्याहृतयः॥ ॐ सत्वन्नो अग्न इति मंत्रस्य वामदेव ऋषिर्देवऋषिस्त्रि-
ष्टुप्छन्दो ऽग्नीवरुणौ देवता प्रायश्चित्त होमे विनियोगः॥ ॐ सत्वन्नो ऽग्ने वरुणमुमुग्ध्यस्मत्स्वाहा॥ इदमग्निवरुणाभ्याम्॥ ॐ
सत्वन्न इति मंत्रस्य वामदेव ऋषिस्त्रिष्टुप्छन्दो ऽग्नीवरुणौ देवते प्रायश्चित्त होमे विनियोगः॥ ॐ सत्वन्नो अग्नेवमो० एधि
स्वाहा॥ इदमग्नीवरुणाभ्याम्॥ ९॥ ॐ अयाश्चाग्न इति मंत्रस्य वामदेव ऋषिर्बृहती छन्दो ऽग्निर्देवता प्रायश्चित्त होमे विनि-
योगः॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्त्वमया असि॥ अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा॥ इदमग्नये॥ १०॥
ॐ येते शतमिति मंत्रस्य वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः प्रायश्चित्त होमे वि-
नियोगः॥ ॐ येते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्व-
र्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः॥ ११॥ ॐ उदुत्तममिति शुनःसेफ ऋषिर्वरुणो दे-
वता त्रिष्टुप्छन्दः पाशान्मोचने विनियोगः॥ ॐ उदुत्तमं वरुणपाशमस्मत्स्वाहा॥ इदं वरुणाय॥ १२॥ एताः प्रायश्चित्त संज्ञकाः
॥ ॥ अथ प्रधानदेवता होमः नवग्रहस्य॥ ॐ आकृष्णेनेति हिरण्यस्तूप ऋषिस्त्रिष्टुप्छन्दः सविता देवता आदित्यप्रीतये कपिलाग्ना-
आज्यहोमे ऽर्कसमिद्धोमे विनियोगः॥ ॐ आकृष्णेन० पश्यन्स्वाहा॥ इदं सूर्याय॥ १॥ इमं देवा इति वरुण ऋषिः सोमो देवता सोम

28
॥ रान ॥
॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रीतये पिङ्गलाख्याज्यहोमे यज्ञसमिद्धोमे विनियोगः ॥ ॐ इमन्देवा व्वा लक्ष्याना ँ स्वाहा ॥ इदं सोमाय ॥ २ ॥ ॐ अग्निर्मूर्द्धेति वि
रूपाक्ष ऋषिर्गायत्री छन्दः अङ्गारको देवता कुजप्रीतये धूमकेतुनाम्नो आज्यहोमे खादिरसमिद्धोमे च विनियोगः ॥ ॐ अग्निर्मूर्द्धा
जिन्वति स्वाहा ॥ इदं भौमाय ॥ ३ ॥ ॐ उद्बुध्यस्वेति परमेष्ठी ऋषिर्बुधो देवता त्रिष्टुप्छन्दो बुधप्रीतये जाठरनाम्नो आज्यहो
मे ऽपामार्गसमिद्धोमे च विनियोगः ॥ ॐ उद्बुध्यस्वः सीदत स्वाहा ॥ इदं बुधाय ॥ ॐ बृहस्पते अतीति गृत्समद ऋषिस्त्रिष्टुप्छन्दो
बृहस्पतिर्देवता बृहस्पतिप्रीतये शिखिनाम्नो आज्यहोमे अश्वत्थसमिद्धोमे च विनियोगः ॥ ॐ बृहस्पते अति॰ चित्रं स्वाहा ॥ इदं
बृहस्पतये ॥ ५ ॥ ॐ अन्नात्परिस्रुत इति प्रजापत्यश्विसरस्वतीन्द्रा ऋषयः शुक्रो देवता जगती छन्दः शुक्रप्रीतये हाटकाख्यो आ
ज्यहोमे उदुम्बरसमिद्धोमे च विनियोगः ॥ ॐ अन्नात्परिस्रुतः मधु स्वाहा ॥ इदं शुक्राय ॥ ६ ॥ ॐ शन्नो देवीरिति दध्यङ्ङाथर्व
ण ऋषिः शनिर्देवता गायत्री छन्दः शनैश्चरप्रीतये महातेजोनाम्नो आज्यहोमे शमीसमिद्धोमे च विनियोगः ॥ ॐ शन्नो देवी॰
स्रवन्तु नः स्वाहा ॥ इदं शनैश्चराय ॥ ७ ॥ ॐ कयान इति वामदेव ऋषी राहुर्देवता गायत्री छन्दो राहुप्रीतये कृष्णासनाम्नो आ
ज्यहोमे दूर्वासमिद्धोमे च विनियोगः ॥ ॐ कया नहृता स्वाहा ॥ इदं राहवे ॥ ८ ॥ ॐ केतुं कृण्वन्निति मधुच्छन्दा ऋषिः केतुर्दे
वता गायत्री छन्दः केतुप्रीतये रोहितनाम्नो आज्यहोमे कुशसमिद्धोमे च विनियोगः ॥ ॐ केतुं कृण्वन् रजा यथाः स्वाहा ॥ इदं के
तुभ्यः ॥ ९ ॥ ॥ अथाधिदेवतानाम् ॥ ॥ तत्रेश्वरस्य ॥ ॐ त्र्यम्बकमिति वसिष्ठ ऋषी रुद्रो देवता अनुष्टुप्छन्दः त्र्यम्बकप्रीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ २९ ॥

येआज्यहोमेचरुहोमेचविनियोगः॥ ॐत्र्यम्बकम्मास्तनान्स्वाहा॥ इदंत्र्यम्बकाय अत्रप्रणीनोदकस्पर्शः ॥ ॐश्रीश्चेमृत्ननर
नारायणऋषिःउमादेवतात्रिष्टुप्छन्दउमाप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐश्रीश्चमदुधारास्वाहा॥ इदंउमायै
ॐयदक्रन्दइतिभास्करजमदग्निर्दीर्घतमऋषयः स्कन्दोदेवतात्रिष्टुप्छन्दः स्कन्दप्रीतयेआज्यहोमेचरुहोमेचविनियो
गः॥ ॐयदक्रन्दस्लेअर्वन्स्वाहा॥ इदंस्कन्दाय॥ ३ ॥ ॐविष्णोरराटमितिउथ्यऋषिर्विष्णुर्देवतायजुर्विष्णुप्रीतयेआज्यहो
मेचरुहोमेचविनियोगः॥ ॐविष्णोरराटंविष्णवेस्वाहा॥ इदंविष्णवे॥ ४ ॥ ॐआब्रह्मन्निनिप्रजापतिर्ऋषिर्ब्रह्मादेवता
यजुर्ब्रह्मप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐआब्रह्मन्॥ कल्पनांस्वाहा॥ इदंब्रह्मणे॥ ५ ॥ ॐसजोषाइन्द्रेति
विश्वामित्रऋषिइन्द्रोदेवताइन्द्रप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐसजोषाइन्द्र॰ विश्वनोनःस्वाहा॥ इदमिन्द्रा
य॥ ६ ॥ ॐअसियमइतिभास्करजमदग्निर्दीर्घमतसऋषयोयमोदेवतात्रिष्टुप्छन्दोयमप्रीतयेआज्यहोमेचरुहो
मेचविनियोगः॥ ॐअसियमो॰ दिविवध्वनायस्वास्वाहा॥ इदंयमाय॥ अत्रप्रणीनोदकस्पर्शः॥ ॐकार्षिरसीतिदध्य
ङाथर्वणऋषिःकालोदेवताअनुष्टुप्छन्दःकालप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐकार्षिरसि॰ रोषधीःस्वाहा
इदंकालाय॥ ८ ॥ अत्रप्रणीनोदकस्पर्शः॥ ॐचित्रावसोइतिवसवऋषयश्चित्रगुप्तोदेवताजगतीछन्दश्चित्रगुप्तप्री
तयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐचित्रावसोस्वस्तिनेपारमशीयस्वाहा॥ इदंचित्रगुप्ताय॥ ९ ॥ ॥ अथप्रत्यधिदे

29
॥ राम ॥
॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनानाम्॥ ॥ॐ अग्निन्दूतमिति विरूपाक्षऋषिरग्निर्देवता गायत्री छन्दो ऽग्निप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ
अग्निन्दूतम् दिस्वाहा॥ इदमग्नये॥ ३१॥ ॐ अप्स्वन्तरिति बृहस्पतिर्ऋषिरापो देवताः पुरउष्णिक् छन्दो ऽपांप्रीतये आज्य
होमे चरुहोमे च विनियोगः॥ ॐ अप्स्वन्तरः वाजꣳ से स्वाहा॥ इदमद्भ्यः॥ ३२॥ ॐ स्योना पृथिवीति मेधातिथिर्ऋषिः पृथि
वी देवता गायत्री छन्दः पृथिवीप्रीतये आज्यहोमे चरुहोमे विनियोगः॥ ॐ स्योना पृथिवी सप्रथाः स्वाहा॥ इदं पृथिव्यै
॥ ३३॥ ॐ इदं विष्णुरिति मेधातिथिर्ऋषिर्गायत्री छन्दो विष्णुर्देवता विष्णुप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥
ॐ इदं विष्णुः सुरे स्वाहा॥ इदं विष्णवे॥ ३४॥ ॐ त्रातारमिन्द्रमिति गार्ग्यऋषिरिन्द्रो देवता त्रिष्टुप् छन्द इन्द्रप्रीतये आज्य
होमे चरुहोमे च विनियोगः॥ ॐ त्रातारमिन्द्र धात्विन्द्रः स्वाहा॥ इदमिन्द्राय॥ ३५॥ ॐ अदित्यै रास्नेति दध्यङ्ङाथर्वणऋषि
रिन्द्राणी देवता यजुः शचीप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ अदित्यै रास्नाश्रयानि निस्वाहा॥ इदं शच्यै॥ ३६॥ ॐ
प्रजापतेनेति वरुणऋषिः प्रजापतिर्देवता त्रिष्टुप् छन्दः प्रजापतिप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ प्रजापते
न त्वीराणꣳ स्वाहा॥ इदं प्रजापतये॥ ३७॥ ॐ नमोस्तु सर्पेभ्य इति देवा ऋषयः सर्पा देवता अनुष्टुप् छन्दः सर्पप्रीतये आज्य
होमे चरुहोमे च विनियोगः॥ ॐ नमोस्तु सर्पेभ्यः सर्पेभ्यो नमः स्वाहा॥ इदं सर्पेभ्यः॥ ३८॥ ॐ ब्रह्मजज्ञानमिति प्रजापति
र्ऋषिर्ब्रह्मा देवता त्रिष्टुप् छन्दो ब्रह्मप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ ब्रह्मजज्ञानम्· विवः स्वाहा॥ इदं ब्रह्मणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्न ॥
॥ ३० ॥

॥३९॥ ॥अथविनायकादियज्ञदेवतानाम्॥ ॥ॐ गणानान्त्वेतिमन्त्रस्य प्रजापतिर्ऋषिर्गणपतिर्देवता यजुर्विनायकप्रीत
यआज्यहोमेचरुहोमेविनियोगः॥ॐ गणानान्त्वा मम स्वाहा॥इदंविनायकाय॥४०॥ॐ अम्बेअम्बिके इतिप्रजापति
र्ऋषिर्दुर्गादेवतानुष्टुप्छन्दोदुर्गाप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ॐ अम्बेऽअम्बिकेवासिनींस्वाहा॥इदंदु
र्गायै॥४१॥ॐ वातोवेतिगन्धर्वाऋषयोवातोदेवताउष्णिकछन्दोवायुप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ॐ वातोवा
मादधुःस्वाहा॥इदंवायवे॥४२॥ॐ ऊर्ध्वाअस्येतिप्रजापतिर्ऋषिराकाशोदेवताउष्णिकछन्दआकाशप्रीतयेआज्यहोमेचरुहोमे
चविनियोगः॥ॐ ऊर्ध्वाअस्यस्नोस्वाहा॥इदमाकाशाय॥४३॥ॐ अश्विनोर्भैषज्येनेतिअश्विनीऋषिरश्विनौदेवतेयजुरश्विनी
प्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ॐ अश्विनोर्भैषज्येनभिषिंचामिस्वाहा॥इदमश्विभ्याम्॥४४॥ ॥अथदिक
पालानाम्॥ ॥तत्रेन्द्रस्य॥ॐ त्रातारमिन्द्रमितिगार्ग्यऋषिरिन्द्रोदेवतात्रिष्टुप्छन्दइन्द्रप्रीतयेआज्यहोमेचरुहोमेच
विनियोगः॥ॐ त्रातारमिन्द्रम् धात्विन्द्रःस्वाहा॥इदमिन्द्राय॥४५॥ॐ अग्निन्दूतमितिविरूपाक्षऋषिरग्निर्देवतागायत्री
छन्दोऽग्निप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ॐ अग्निन्दूतम्॥दयादिहस्वाहा॥इदमग्नये॥ॐ असियमइतिभार्ग
वजमदग्निर्दीर्घतमसऋषयोयमोदेवतात्रिष्टुप्छन्दोयमप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ॐ असियमःदिविबन्धना
निस्वाहा॥इदंयमाय॥४६॥ॐ सद्यस्याग्नेदकस्यर्षीः॥ ॥ॐ एषतेनिर्ऋतेइतिवरुणऋषिर्निर्ऋतिर्देवतायजुर्निर्ऋतिप्री

30
॥ राम ॥
॥ ३० ॥

CC-0. In Public Domain. Digitization by eGangotri

नयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐ एषतेनिर्ऋतेभागस्तञ्जुषस्वस्वाहा॥ इदंनिर्ऋतये॥ अनवपाणीनोदकस्पर्शः॥ ४॥ ॐ इममो
इनिभुनःशोफऋषिर्वरुणोदेवतागायत्रीछन्दोवरुणप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐ इमम्मेवकेस्वाहा॥ इदंवरु
णाय॥ ५॥ ॐ वानोवेनिगन्धर्वाऋषयोवायुर्देवताउष्णिकछन्दोवायुप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐ वानोवात्माध
धुःस्वाहा॥ ६॥ ॐ वयं सोमेतिवंधुऋषिःसोमोदेवतागायत्रीछन्दःसोमप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐ वयं
सोमव्रतेमहिस्वाहा॥ इदंसोमाय॥ ७॥ ॐ तमीशानमितिगोतमऋषिरीशानोदेवताजगतीछन्दईशानप्रीतयेआज्यहोमेच
रुहोमेचविनियोगः॥ ॐ तमीशानम्स्वसस्येस्वाहा॥ इदमीशानाय॥ अनवपाणीनोदकस्पर्शः॥ ८॥ ॐ नमोस्तुसर्पेभ्यइतिदेवा
ऋषयोनन्तोदेवताअनुष्टुप्छन्दोनन्तप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐ नमोस्तुसर्पेभ्यःसर्पेभ्योनमःस्वाहा॥ इ
दमनन्ताय॥ ९॥ ॐ ब्रह्मजज्ञानमितिप्रजापतिर्ऋषिर्ब्रह्मादेवतात्रिष्टुप्छन्दोब्रह्मप्रीतयेआज्यहोमेचरुहोमेचविनियोगः
ॐ ब्रह्मजज्ञानम्॥ विवःस्वाहा॥ इदंब्रह्मणे॥ १०॥ अथवस्वादीनाम्॥ ॥ तत्रवसूनाम्॥ ॐ सुगावइतिदेवताऋषयोवस
वोदेवतात्रिष्टुप्छन्दोवसुप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐ सुगावःवसूनिस्वाहा॥ इदंवसुभ्यः॥ १॥ ॐ यज्ञोदे
वानामितिकुत्सऋषिरादित्योदेवतात्रिष्टुप्छन्दआदित्यप्रीतयेआज्यहोमेचरुहोमेचविनियोगः ॐ यज्ञोदेवानाम्सदा
दित्येभ्यःस्वाहा॥ इदमादित्येभ्यः॥ २॥ ॐ यएतावन्तइतिपरमेष्ठिऋषिरुद्रोदेवताअनुष्टुप्छन्दोरुद्रप्रीतयेआज्यहोमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥ चरुहोमे च विनियोगः ॥ ॐ यत्ते नाव त्वः तन्म सिस्वाहा ॥ इदं तेभ्यः ॥ अत्र प्रणीतोदकस्पर्शः ॥ ३ ॥ ॐ मरुतो यस्य नमोजनः स्वाहा
॥ ३१ ॥ इदं मरुद्भ्यः ॥ ४ ॥ ॐ आ ब्रह्मन्निति प्रजापतिर्ऋषिर्ब्रह्मा देवता यजुर्ब्रह्मप्रीतये आज्यहोमे च चरुहोमे च विनियोगः ॥ ॐ आ ब्र
ह्मन् कल्पतां ॐ स्वाहा ॥ इदं ब्रह्मणे ॥ ५८ ॥ २० ॥ इदं विष्णुरिति मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्री छन्दो विष्णुप्रीतये आज्य
होमे च चरुहोमे च विनियोगः ॥ ॐ इदं विष्णुः स्वाहा ॥ इदं विष्णवे ॥ ६० ॥ ॐ मानस्तोक इति कुत्स ऋषी रुद्रो देवता गायत्री छ
न्दो रुद्रप्रीतये आज्यहोमे च चरुहोमे च विनियोगः ॥ ॐ मानस्तोके ह्वामहे स्वाहा ॥ इदं रुद्राय ॥ ६१ ॥ अत्र प्रणीतोदकस्पर्शः ॥
ॐ चित्रं देवानामिति कुत्स ऋषिः सूर्यो देवता जगती छन्दोऽर्कप्रीतये आज्यहोमे च चरुहोमे च विनियोगः ॥ ॐ चित्रं देवानां न
स्तु पश्य स्वाहा ॥ इदमर्काय ॥ ६२ ॥ ॐ वषट्ते हीति प्रजापतिर्ऋषिर्वनस्पतिर्देवता यजुर्वनस्पतिप्रीतये आज्यहोमे च चरुहोमे च
विनियोगः ॥ ॐ वषट्ते हिनारु हेमस्वाहा ॥ इदं वनस्पतये ॥ ६३ ॥ ५१ ॥ ९ ॥ इति प्रधानदेवताहोमः ॥ अत्र केचित्स्वस्तिन
इन्द्र इत्यादिमन्त्रैश्चतुः स्वस्त्यादिदेवताभ्यः प्रधानदेवताहोमानन्तरं होमं मिच्छन्ति ॥ तद्यथाहि ॥ ॐ स्वस्ति न इन्द्र इति चतुः 31
स्वस्तिभ्यः स्वाहा ॥ १ ॥ ॐ पयः पृथिव्यां पयः पंचः स्वाहा ॥ २ ॥ ॐ विष्णो रराटम् ॥ षड्विष्णुभ्यः स्वाहा ॥ ३ ॥ अग्निर्देवता वाद ॥ राम ॥
श देवताभ्यः स्वाहा ॥ ४ ॥ ॐ द्यौः शान्तिः द्वादशशान्तिभ्यः स्वाहा ॥ ५ ॥ ॐ आ नर्भिं षट्पात्रेभ्यः स्वाहा ॥ ६ ॥ ॐ समुद्राय त्वा षट्वातेभ्यः ॥ ३१ ॥
स्वाहा ॥ ७ ॥ ॐ अनड्वान्वयः अनड्भ्यः स्वाहा ॥ ८ ॥ ॐ भगस्व पंचभगेभ्यः स्वाहा ॥ ९ ॥ ॐ प्राणाय स्वाहा ॥ पंचेन्द्रियेभ्यः स्वाहा ॥ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ॐ वरुणस्योत्तम्भनमू·पंचवरुणेभ्यः स्वाहा ॥ ११ ॥ ॐ गायत्री त्रिष्टुप् गायत्र्यै स्वाहा ॥ १२ ॥ ॐ उपयामगृहीतोसि सावित्रोसि·
सावित्र्यै स्वाहा ॥ १३ ॥ ॐ सरस्वतीयोन्यामू·सरस्वत्यै स्वाहा ॥ १४ ॥ ॐ गृहमा·गृहमात्रे स्वाहा ॥ १५ ॥ ॐ अन्नपतेअन्न पूर्णायै
स्वाहा ॥ १६ ॥ ॐ देवीर्द्वारः महादारिद्र्य विनाशिन्यै स्वाहा ॥ १७ ॥ ॐ अम्बेउ अम्बिके·चण्डेश्वरी स्वाहा ॥ १८ ॥ ॐ ग्रोएवीनृवनदेवताभ्य
स्वाहा ॥ १९ ॥ ॐ वसोः पवित्रमू·वास्तुदेवेभ्यः स्वाहा ॥ २१ ॥ भूम्या आरवूनमूमिदेवेभ्यः स्वाहा ॥ २२ ॥ नमः शम्भवाय·गोष्ठदेवताभ्यः
स्वाहा ॥ ॐ क्षत्रस्य योनिः क्षेत्रपालाय स्वाहा ॥ २४ ॥ ॐ यज्ञामे·ग्रामदेवेभ्यः स्वाहा ॥ २५ ॥ ॐ त्रातारमिन्द्रमू स्वर्गेन्द्राय स्वाहा ॥ ॐ
नमोस्तु सर्पेभ्यः वानालवासुकिभ्यः स्वाहा ॥ २६ ॥ ॐ मित्रोनएधिमित्रलोकाय स्वाहा ॥ २८ ॥ ॐ राजन्नमध्वराणामू मांधात्रे स्वाहा
२९ ॥ ॐ येतीर्थानि तीर्थराजाय स्वाहा ॥ ३० ॥ ॐ व्रतेन दीक्षामू·व्रतराजाय स्वाहा ॥ ३१ ॥ ॐ प्राच्यैदिशे पुनर्दिकपालेभ्यः स्वाहा
३२ ॥ ॐ अग्नेः पक्षतिः तिथिभ्यः स्वाहा ॥ ३३ ॥ ॐ नक्षत्रेभ्यः नक्षत्रेभ्यः स्वाहा ॥ ३४ ॥ ॐ योगेयोगे·योगेभ्यः स्वाहा ॥ ३५ ॥ ॐ आदित्यग
र्भम् वासरेभ्यः ॥ ३६ ॥ ॐ भद्रं कर्णेभिः करणेभ्यः स्वाहा ॥ ३७ ॥ ॐ वायोयेते·वायवे स्वाहा ॥ ३८ ॥ ॐ वानाय स्वाहा· मेघेभ्यः स्वा
हा ॥ ३९ ॥ ॐ समुद्रगच्छ समुद्रेभ्यः स्वाहा ॥ ४० ॥ ॐ नदीभ्यः पौंजिष्ठमू नदीभ्यः स्वाहा ॥ ४१ ॥ ॐ इक्षोयज्ञः इक्षुदेवेभ्यः स्वाहा· ॥
४२ ॥ ॐ कुलायनी घृतवती ॥ कुलदेवेभ्यः स्वाहा ॥ ४३ ॥ ॐ नमः शम्भवाय·भैरवाय ॥ ४४ ॥ ॐ देवीर्द्वारः भैरव्यै ॥ ४५ ॥ ॐ अम्बेउ
अंबिके विन्ध्यवासिन्यै स्वाहा ॥ ४६ ॥ ततः स्थानदिशोपाधिष्ठित देवानां तत्तन्नाममंत्रेणाहोमः कर्त्तव्यः ॥ ॐ एषो ह देवः इति

रत्न ३२ सर्वेभ्यो देवेभ्यः स्वाहा॥ ४७॥ ॐ भुक्ज्योतिरिति सर्वहोमपूर्णार्थो होमः॥ ४८॥ ॐ राजन्नमध्वराणामिति यंच यारुद्रेभ्यः स्वाहा
४९॥ ॐ उयथ्थेति विशेषतोभीमसेनाय स्वाहा॥ ५०॥ ॐ पितृभ्य इति पितृभ्यः स्वाहा॥ ५१॥ ॐ आनावानम्वैश्वानरमू वैश्वानर
स्य सुमनो वैश्वानरो नः वैश्वानराय स्वाहा॥ स्वं कृचिद्धोमः॥ आकरयं धेमुजुष्याषा नदेवताहोमानन्तरमुत्तराङ्गव्याहृतिहो
मादिवर्हिर्होमान्तं पूर्णाहुति साग्न्याविकर्म कुर्यादित्युपलभ्यते॥ तद्यथा॥ ॐ भूर्भुवःस्वरिति व्याहृतीनां प्रजापतिर्ऋषिरग्नि
वायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि होमे विनियोगः॥ ॐ भूः स्वाहा॥ इदमग्नये॥ ॐ भुवः स्वाहा॥ इदं वायवे॥ ॐ स्वः
स्वाहा॥ इदं सूर्याय॥ ॐ त्वन्नो अग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते प्रायश्चित्त होमे विनियोगः॥ ॐ त्वन्नः स
त्स्वाहा॥ इदमग्नीवरुणाभ्याम्॥ ४॥ ॐ सत्वन्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दो ग्नीवरुणौ देवते प्रायश्चित्त होमे विनियोगः
ॐ सत्वन्नः सधि स्वाहा॥ इदमग्नीवरुणाभ्याम्॥ ॐ अयाश्चाग्न इति प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता प्रायश्चित्त हो
मे विनियोगः ॐ अयाश्चाग्नेभेषज ॐ स्वाहा॥ इदमग्नये॥ ६॥ ॐ ये ते शतमिति शुनःशेफ ऋषिर्वरुणः सविता विष्णुर्वि
श्वे देवा मरुतः स्वर्का देवताः प्रायश्चित्त होमे विनियोगः॥ ॐ ये ते शतम्॥ स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो दे
वेभ्यो मरुद्भ्यः स्वर्केभ्यः॥ ७॥ ॐ उदुत्तममिति शुनःशेफ ऋषिर्वरुणो देवता त्रिष्टुप्छन्दो [illegible] विनियो
गः॥ ॐ उदुत्तमं स्वाहा॥ इदं वरुणाय॥ ८॥ ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये॥ ९॥ इति मनसा॥ ॐ अग्नये स्विष्टकृते

राम ३२

32

स्वाहा॥ इदमग्नये स्विष्टकृते॥ १० ॥ ततः संस्रवप्राशनम्॥ ततो ब्रह्मणे पूर्णपात्रदानम्॥ ततो वाक्यम्॥ ॐ अद्येत्याद्युक्त्वा कृतै
तन्नवग्रहशांतिहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमपूर्णपूर्णार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रा
यामुकशर्मणे ब्राह्मणाय ब्रह्मणे तुभ्यमहं संप्रददे॥ इति॥ ततः ॐ सुमित्रियान आप ॐ षधयः सन्त्विति सपवित्रप्रणीताजलेन शिरः सं
मृज्य॥ ॐ दुर्मित्रियाद्यादिना ऐशान्यां प्रणीताजलं निनयेत्॥ ततस्तरणक्रमेण वर्हिरुत्थाप्याज्येनाभिघार्य॥ ॐ देवा गातुविद
इति हस्तेन वर्हिर्होमं कुर्यात्॥ ततो महावलिं कुङ्कुमादिरक्तं रक्तपुष्पादियुतं सदीपं दक्षिणां क्षेत्रपालाय दद्यात्॥ ततो मन्त्रः
क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशाकिनीडाकिनीवेतालादिपरिवारयुताय इमं वलिं समर्पयामि भो भो क्षेत्रपाल इमं व
लिं गृहाण मम यजमानस्यायुःकर्त्ता क्षेमकर्त्ता पुष्टिदः तुष्टिदो भवेति मन्त्रेण॥ इमं वलिं शूद्रेण ब्राह्मणेन वा चतुष्पथे क्षिपेत्
ततः आचार्याद्यो ब्राह्मणाः प्राङ्मुखा उदङ्मुखा वा शान्तिकलशजलेन मङ्गलगीतवाद्यपुरःसरं सपरिवारस्य यजमानस्य सुरास्त्वे
त्यादि मन्त्रैर्देवस्यत्वेत्यादिभिरपि मङ्गलाभिषेकं कुर्युः॥ तथाहि॥ ॐ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जग
न्नाथस्तथा संकर्षणो विभुः॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखण्डलोऽग्निर्भगवान् यमो वै निरृतिस्तथा॥ वरुणः
पवनश्चैव धनाध्यक्षस्तथा शिवः॥ ब्रह्मणा सहिताः शेषो दिक्पालाः पांतु ते सदा॥ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः॥ आदित्यश्चन्द्रमा भौमो बुधजीवसित

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्न ॥ केजाः ॥ ग्रहास्त्वामभिषिंचन्तु राहुः केतुश्च तर्पिताः ॥ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥
॥ २३ ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औषधानि च रत्नानि कालस्यावयवाश्च
ये ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिंचन्तु सर्वकामार्थसिद्धये ध्रुवं ॥ ॥ ॐ देवस्य त्वा ॥ एवमाचार्या
दिभिरभिषिक्तो यजमानः ॥ अग्नेः पश्चिमभागे प्राङ्मुखोपविष्ट उदङ्मुखेभ्यः आचार्यऋत्विग्भ्यो दक्षिणान् दद्यात् ॥ तत्र प्रथमं स
र्वाणीयैकपिलादानम् ॥ देयद्रव्याणि सोत्तिः सम्पूज्य देयं कुशजलेनाभ्युक्ष्य कुशयवतिलजलान्यादाय ॐ अद्येत्यादि देशकालौ स्मृ
त्वा कृतैतन्नवग्रहधनिस्वार्थं इमां कपिलां धेनुं गां रुद्रदैवतां सूर्यपीडानिवृत्तये अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्य
महं संप्रददे ॥ ॐ कपिले सर्वभूतानां पूजनीयासि रोहिणी ॥ तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥ इति मन्त्रेण हस्ते जलं द
द्यात् ॥ ब्राह्मणः ॐ स्वस्ति इत्युक्त्वा स्वशाखोक्तां कामस्तुतिं पठेत् ॥ ततो ऽनेनैव प्रकारेण देवताभिधानपुरःसरम् ॥ ॥ सोमाय
सतुङ्गदैवतं शंखं ॥ ॥ भौमाय रुद्रदैवतं वृषभम् ॥ ॥ बुधाय अग्निदैवतं हिरण्यम् ॥ बृहस्पतये बृहस्पतिदैवतं पीतव 33
स्त्रद्वयम् ॥ शुक्राय यमदैवतं श्वेताश्वं ॥ ॥ शनैश्चराय रुद्रदैवतां कृष्णां गाम् ॥ राहवे महाभैरवदैवतं लोहम् ॥ ॥ केतु ॥ राम ॥
भ्यो ऽग्निदैवतं छागम् ॥ ॥ तत्तन्मन्त्रेण दद्यात् ॥ मन्त्राश्च ॥ ॐ पुण्यस्त्वं शंख पुण्यानां मङ्गलानां च मङ्गलं ॥ विष्णुनाधिष्ठितो ॥ २३ ॥
नित्यमतः शान्तिं प्रयच्छ मे ॥ १ ॥ ॥ अथ वृषभदानमन्त्रः ॥ धर्मस्त्वं वृषभरूपेण जगदानन्दकारकः ॥ अष्टमूर्तेरधिष्ठानमतः शान्ति

CC-0. In Public Domain. Digitization by eGangotri

प्रयच्छमे ॥३॥ अथ हिरण्यदानमंत्रः ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे ॥४॥ ॥
अथ पीतवस्त्रदानमंत्रः ॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् ॥ प्रदानात्तस्य मे विष्णुर् अतः शान्तिं प्रयच्छतु ॥५॥ ॥ अथाश्वदा
नमंत्रः ॥ विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः ॥ चन्द्रार्कवाहनं नित्यमतः शान्तिं प्रयच्छ मे ॥६॥ ॥ अथ कृष्णगवीदानमं
त्रः ॥ यस्मात्त्वं पृथिवी सर्वा धेनो केशवसंनिभा ॥ सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ॥७॥ ॥ अथ लोहदानमंत्रः ॥ यस्मा
दुर्गाणि कर्माणि त्वदाधाराणि सर्वदा ॥ हेलो हला हलादीनि तस्माच्छान्तिं प्रयच्छ मे ॥८॥ ॥ अथ छागदानमंत्रः ॥ यस्मात्त्वं स
र्वयज्ञानामङ्गत्वेन व्यवस्थितः ॥ यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे ॥९॥ ॥ सर्वाश्च दक्षिणाः सूर्यदक्षिणासमाना ज्ञा
तव्याः ॥ तेन सोमाय शंखं दत्वा कपिलां गां मूल्यं सुवर्णांशं स्वमूल्यं न्यूनं न दानीमेव दद्यात् ॥ एवं न्यूनस्य ते सर्वत्र दक्षिणा सूर्यद
क्षिणासमा कार्या ॥ आदित्यादिनवग्रहेभ्यः स्वर्णभूषित नामैकैकां गां समानसुवर्णमेव वा दक्षिणां दद्यात् ॥ सुवर्णेन समा का
र्या यजमानेन दक्षिणा ॥ सर्वेषामथवा गावो दत्वा हेमभूषिताः ॥ सुवर्णमथवा दद्याद्गुरुर्वा येन तुष्यति ॥ स्वमंत्रेण प्रदातव्याः स
र्वाः सर्वत्र दक्षिणा इत्युक्ते ॥ ॐ अद्येमामुकानानावेदाध्यायिभ्यो नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च
यथाशक्ति भूयसीं दक्षिणां दातुमुत्सृजे ॥ इति भूयसीं दक्षिणां दद्यात् ॥ ततो यथाशक्ति पूर्वोक्त हेमसंख्यया ब्राह्मणभोजनं सं
कल्पयेत् ॥ तत्र वाक्यम् ॥ ॐ अद्येमादिः कृतैतस्य नवग्रहमखस्य यथावत्फलप्राप्तये नानानामगोत्रान् नानानामशर्मणो नाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ग्रह ॥
॥ ३४ ॥

वेदाध्यायिनो ब्राह्मणान् यथोपपन्नेनान्नेन यथाकाले भोजयिष्ये इति ॥ आमान्नपक्षे यथोपपन्नेनामान्नेन तोषयिष्ये ॥ इति संकल्पः
ततो होता ॥ अद्येत्यादि कृतस्य नवग्रहशान्तिहोमस्य पूर्णतासिद्ध्यर्थं पूर्णाहुतिं होष्ये ॥ इति संकल्प्य घृतपूर्णस्रुवे नारिकेलादि फ
लचन्दनपुष्पयुतं वस्त्रं निधाय यजमानान्वारब्धः पूर्णाहुतिं जुहुयात् ॥ तत्र मंत्राः ॥ ॐ समुद्रादूर्मिः ॥ १ ॥ ॐ वयन्नाम ॥ २ ॥ ॐ च
त्वारि शृङ्गा ॥ ३ ॥ ॐ मूर्द्धानं दिवः ॥ ४ ॥ ॐ पुनस्त्वा ॥ ५ ॥ ॐ पूर्णादर्वि ॥ ६ ॥ ॐ सप्त ते ॥ ७ ॥ ॐ धामन्ते ॥ ८ ॥ ॐ मे धाम्ने ॥ ९ ॥ ॐ इदमेव स ॥ १०
॥ इति सर्वमंत्रपाठान्ते स्वाहाकारेण क्षिपेत् ॥ ततः स्रुवोस्थिधिषीमहीति वस्त्रं ऊर्ध्वा वह्निमृतावानमित्यादिना पूजयित्वा ॐ अभ्यादधा
मीति स्रुवेण किंचिद्भस्म गृहीत्वा ॐ त्र्यायुषं जमदग्नेरिति यजमानस्य ललाटे तिलकं कुर्यात् ॥ ॐ कश्यपस्य त्र्यायुषमिति ग्रीवाया
म् ॥ ॐ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले ॥ ॐ तन्नो अस्तु त्र्यायुषमिति हृदि ॥ ततो यजमानो गन्धपुष्पाद्युपचारैरावाहित
देवताः पूजयित्वा प्रणमेत् ॥ ततो यजमानो गुरुर्वा ॥ ॐ उत्तिष्ठ ब्रह्मणस्पते इति यान्तु देवगणा इति च पठित्वाक्षतादिप्रक्षेपेण
पीठदेवता विसर्जयेत् ॥ ततो यजमानः ताम्रादिपात्रस्थं घृतं ध्रुवासीति मंत्रेणाभिमंत्र्य ॐ लक्ष्मीर्यत्र दौरस्थ्यं मे सर्वगात्रेषु व
स्थितम् ॥ तत्सर्वं समयाज्यं त्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥ इत्यवलोक्य ब्राह्मणाय दत्वा ॥ इदमस्मदुपायकरणमाचार्यायाहं संनिपाद
यामीति पतिपतिरूपं दानं कुर्यात् ॥ ततः प्रमादादिति पठित्वा ॥ ॐ विष्णुरिति त्रिः पठित्वांजलिं बद्ध्वा प्रार्थयेत् ॥ मया यत्कृत
ग्रहशान्तिरूपं कर्म तन्न्यूनातिरिक्तं युष्मद्वचनात्परिपूर्णमस्त्विति ॥ ते च यथापरिपूर्णमस्त्विति ब्रूयुः ॥ ततो ब्राह्मणान् भोजयित्वा

34
॥ राम ॥
॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सातु नयं विसृज्य सुहृन्मित्रादि पुनः सोन्तःपुरे भुंजीतेति ॥ ॥ इति श्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदाव
लिविराजमानमान्योन्नतनेपालदेशनगरवरकान्तिपुरविरोचमानमहाराजाधिराजश्रीगीर्वाणयुद्धविक्रमसाहदेवविरचि
तायां सत्कार्यरत्नाविवायां ग्रहदानिरूपणम् ॥ ॥ श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ॥ कृतारत्नावलीनव्यसहृदयानि हृदि श्रि
तः ॥ अथ तु सर्वदानानां तुलापुरुषसंज्ञितमिति मान्योक्तेस्तुलादानप्रकरणमभिधीयते ॥ तत्र नानारोगघ्नास्तुलागारुडे ॥ तु
लापुरुषदानसम्पूर्णमृत्युञ्जयोदितम् ॥ सौवर्णं सर्वकामार्थं विशेषान्मृत्युनाशनम् ॥ अथ तोहंप्रदानं सर्वरोगोपशान्त
ये ॥ कांस्यं च यक्ष्मके देयं त्रपु चार्शोविकारके ॥ अपस्मारे च सीसं स्यात्ताम्रं कुष्ठेषु दारुणे ॥ पित्तलं रक्तपित्ते च रूप्यं प्रदरमेहयोः
फलोद्भवं तथा देयं ग्रहणीरुजि दारुणे ॥ गोडं भस्मकरोगे स्यात्तोयं गजगण्डमालके ॥ जांगलं चाग्निमान्द्ये च रोमोत्थाने तु योग्यक
म धूम्रवं तथा देयं कासश्वासजलोदरे ॥ घृतोद्भवं तथा देयमायुष्यं वमिनाशनम् ॥ क्षीरं पित्तनिनाशाय दधिकं भगवारणे ॥ ला
वणं वेपनाशाय पैष्टं दद्रुविनाशनम् ॥ अन्नं च सर्वरोगस्य नाशने स्मृतमेव च ॥ रालं सौवर्णवत्प्रोक्तं तैलेन वऊलाः पजाः ॥ कुंकु
मि भर्तृसौहृत्यं वास्त्रं वस्त्रा प्रत्ययेस्मृतम् ॥ शार्करं शत्रुनाशाय सौन्दर्यार्थं तु चांदनम् ॥ जांगलं काष्ठजं मांसजं वा ॥ काष्ठे पि चंदना(
दि ॥ भगवारणं भगंदरम् ॥ यद्यप्यत्रेत्थमेवोक्तं तथापि जयमृत्युञ्जयाय घृतम् ॥ तजो हस्तस्यैसं नायशान्ये च गोक्षीरम् ॥ सर्वरो
गघ्नां त्यै गुडम् ॥ रत्नसुवर्णकर्पूरशशि सर्वार्थसाधकानि ॥ सौभाग्यार्थं चन्दनम् ॥ चंदनं वात्र घृष्टं काष्ठस्य पूर्वोक्तत्वात् ॥ अथ तु

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ ३५ ॥

वराादीनां देवताः॥ सुवर्णे सर्वदेवाश्च लोहे भैरवः॥ कांस्ये अश्विनौ पूषा च॥ ताम्रे सूर्यः सीसके वायुः॥ पित्तले कुजः॥ रूप्ये पितरः॥ फलेसो
मः॥ गुडे आपः॥ कुसुमे गंधर्वाः॥ जांगले वह्निः॥ मधुनि यक्षः॥ घृते मृत्युञ्जयः॥ क्षीरे नागराः॥ दधनि सर्पाः॥ पिष्टे प्रजापतिः॥ अन्ने स
र्वदेवताः॥ अनुक्ते विष्णुः॥ प्रजापतिर्वा॥ ॥ अथ तुलानिर्माणम्॥ विल्वदेवदारुश्रीपर्णीकांचनारेंगुदीवृक्षाणामन्यतमनिर्मितं स
प्तहस्तं स्तंभद्वयम्॥ स च हस्तेषु हस्तद्वयं भूमौ निखेयं उपरि हस्तमिता चूडाकार्या॥ हस्तचतुष्टयं मध्ये ऽवशिष्यते॥ स्तंभयोरंतरा
लमपि हस्तचतुष्टयं कार्यम्॥ चूडाया असंभवे उपरि हस्तमितं त्यक्त्वा छिद्रं कार्यम्॥ स्वगुतरंगोपि स्तंभसजातीयकाष्ठघटितः पं
चहस्तमित उभयतो वितस्तिमात्रं त्यक्त्वा कृतविलस्तंभचूडयोर्निवेश्यः॥ यदि स्तंभौ कृतविलौ तदा तूत्तरंगो ऽकृतविलस्तंभयतो वि
तस्तिं त्यक्त्वा स्तंभविलयोर्निवेशनीयः॥ तुलादंडोपि स्तंभसजातीयकाष्ठकृतो वर्तुलश्चतुर्भिस्सार्द्धैश्चतुर्भिर्वा हस्तैर्दीर्घः प्रांतयोर्द
शांगुलमितसूत्रवेष्टनस्थलो मध्ये विंशत्यंगुलसूत्रवेष्टनक्षमः कार्यः तस्य प्रांतयोर्मध्ये च परितः यवषडंगुलं कार्यं॥ मध्ये वान्ये च
तुर्विंशतिवंधा नवेश्याः॥ तुलायाः षडंगुलयोरंतरयोरधोभागे वडिशाकृतिकटकद्वयं निवेश्यं॥ मध्ये चोर्ध्वभागे एकं कटकं वडि
शाकृतिं निवेश्यं॥ तच्चोत्तरंगमध्यभागे ऽधःप्रदेशे षडंगुलमिते लोहकटके अंकुशे वा अवलंबनीयम्॥ ततस्ताम्रमये काष्ठम
ये वा॥ पंचचतुःसार्द्धत्रिषड्देशव्यासे वर्तुले चतुरस्रे वा पंचचतुस्त्र्यंगुलोच्छ्रितप्रांते ताम्रादिनिर्मितवलयचतुष्टयान्विते फलके द्वि
हस्ताभिः श्वेतसूत्रैर्लोहशृंखलाभिर्गुणैर्वा तुलाप्रांतयोरवलंबयेत्॥ यथा फलकयोर्भूमेश्चांतरालं वितस्तिमात्रमवशिष्टं भवति



35

॥ राम ॥
॥ ३५ ॥

तथानुज्ञाप्यम्॥ षोडश द्वादश दश वा हस्तमिते वेश्ममध्ये तुलाभूमिः कल्पनीया॥ तत्र मध्ये दक्षिणोत्तररेखायां स्तंभारोपणं कार्यम्॥
पूर्वपश्चिमयोस्तुलावलंबनं॥ पश्चिमफलके कर्तुरारोहणम्॥ पूर्वफलके द्रव्यनिक्षेपः॥ पूर्वपश्चिमरेखायां स्तंभारोपणपक्षे दक्षि
णोत्तररेखायां तुलास्थितिः॥ तत्रोत्तरफलके आरोहणम्॥ दक्षिणादिकस्य फलके द्रव्यनिक्षेप इति विवेकः॥ पूर्वपश्चिमस्तंभारो
पणे गोविन्दस्य दक्षभागे स्थितिः॥ दक्षिणोत्तररेखायां स्तंभारोपणे गोविन्दस्य संमुखे स्थितिः॥ एवं च सति गोविन्दस्य दक्षभाग
स्थितत्वापेक्षया संमुखस्थितेरेव सर्वजनसंमतत्वात् प्राच्यत्वाद् अवलोकयितुः पूर्वाभिमुखत्वाच्च दक्षिणोत्तररेखायामेव स्तंभारोपणं
मुख्यमिति पारिजातादौ विस्तरः॥ तुलामध्यावलंबितगोविंदाधस्तात् षोडशारचक्रं लेख्यम्॥ तुलाभूमेः पूर्वतो होमार्थं गृह्योक्ता
ग्निस्थापनम्॥ ईशानदिशि सर्वतोभद्रमंडले ईशानिकलशारोपणम्॥ तत्रैवान्तःप्रदेशे ग्रहयागार्थं स्थंडिलरचनेत्यादि॥
इति तुलानिर्माणम्॥ ॥ अथ ग्रहजन्मादय॥ जन्मभूगोत्रमेतेषां वर्णस्थानमुखानि च॥ यो ज्ञात्वा कुरुते शांतिं ग्रहास्तेना
वमानिताः॥ रक्तः काश्यपजो भानुः शुक्लो ब्रह्मसुतः शशी॥ रक्तो रुद्रसुतो भौमः पीतः सोमसुतो बुधः॥ पीतो ब्रह्मसुताचार्यः शुक्लः
शुक्लो भृगोः सुतः॥ कृष्णः शनी रवेः पुत्रो राहुः पुत्रः प्रजापतेः॥ कृष्णः केतुः कृशानुभ्यः कृष्णाः पापास्त्रयोऽप्यमी॥ उत्पन्नोऽर्कः क
लिंगेषु यमुनायां च चन्द्रमाः॥ अंगारकस्त्ववन्त्यां तु मगधायां बुधो जनि॥ सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा॥ शनैश्च
रस्तु सौराष्ट्रे राहुर्वैराटिके पुरे॥ अंतर्वेद्यां तथा केतुरित्येता ग्रहभूमयः॥ आदित्यः काश्यपो ज्ञेय आत्रेयश्चंद्रमा भवेत्॥ भारद्वा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥ जोभवेज्जैमस्तथात्रेयश्चसोमजः॥ शाक्रपूर्णोङ्गिरोगोत्रः शुक्रो वै भार्गवस्तथा॥ शनिः काश्यपस्त्वाथ राहुः पैठीनसिस्तथा॥ केतवो जै
॥ ३८ ॥ मिनीयाश्च सर्वे लोकहितावहाः॥ भानुं तु मण्डलाकारमर्द्धचन्द्राकृतिं विधुम्॥ अङ्गारकं त्रिकोणं च बुधं बाणाकृतिं विदुः॥ पद्माकारं गु
रुं कुर्याच्चतुष्कोणं च भार्गवम्॥ चापाकृतिं शनिं राहुं मकराकारमेव च॥ खड्गाकारांस्तथा केतून्स्थापयेद्दश पूर्वशः॥ पद्मासनः पद्म
करः पद्मगर्भसमद्युतिः॥ सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः॥ श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः॥ गदापाणिर्द्विबा
हुश्च कर्त्तव्यो वरदः शशी॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः॥ चतुर्भुजो मेषगतो वरदः स्याद्धरासुतः॥ पीनमाल्याम्बरधरः कर्णि
कारसमद्युतिः॥ खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ॥ दण्डिनौ वरदौ कार्यौ साक्षसूत्रक
मण्डलू॥ इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः॥ बाणबाणासनधरः कर्त्तव्योऽर्कसुतस्सदा॥ करालवदनः खड्गचर्मशूली वरप्रदः॥ नी
लः सिंहासनस्थश्च राहुरत्र प्रशस्यते॥ गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः॥ सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः॥ मध्ये तु भास्करं
विद्याच्छशिनं पूर्वदक्षिणे॥ दक्षिणेन धरासूनुं बुधं पूर्वोत्तरेण तु॥ उत्तरेण गुरुं विद्यात्पूर्वेणैव तु भार्गवम्॥ शनैश्चरं पश्चिमायां राहुं दक्षि
णापश्चिमे॥ पश्चिमोत्तरतः केतून्स्थापयेदत्र पूर्वशः॥ सूर्यः प्राचीमुखो ज्ञेयो दैत्याचार्यस्तथा स्मृतः॥ आदित्याभिमुखास्सर्वे ज्ञेया भौमाद 36
यो ग्रहाः॥ इति ग्रहजन्मादि प्रायशो ग्रहाणां निरुक्तं तथापि पुनः पुनस्तत्कथनं स्वरूपनियमार्थमिति विभावनीयम्॥ ॥ अथ नुति ॥ राम ॥
तद्ववदानस्तुतिः॥ हिरण्यस्य हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥ १॥ रत्नस्य॥ यथास ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्वेषु रत्नेषु सर्वे देवा व्यवस्थिताः ॥ तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः ॥ २ ॥ ताम्रस्य ॥ ताम्रं पुष्टिकरं सर्वदोषक्षयकरं शिवम् ॥ सर्वरक्षा
करं नित्यमतः शान्तिं प्रयच्छ मे ॥ ३ ॥ रूप्यस्य ॥ शिवनेत्रसमुद्भूतं रजतं पितृवल्लभम् ॥ तस्मादस्य प्रदानेन रुद्रः संप्रीयतां मम ॥ ४ ॥ वस्त्र
स्य ॥ शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् ॥ सुवेषधारि वस्त्रं च मतः शान्तिं प्रयच्छ मे ॥ ५ ॥ शर्करायाः ॥ अमृतस्य कुलोत्पन्न इक्षुस
द्रसशर्करा ॥ सूर्यप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे ॥ ६ ॥ गुडस्य ॥ यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः ॥ वासुदेवश्च देवानां महा
देवस्तु योगिनां ॥ प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा ॥ तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥ मम तस्मात्परां लक्ष्मीं प्रयच्छ
गुड सर्वदा ॥ ७ ॥ क्षीरस्य ॥ अलक्ष्मीहरणं नित्यं सुखसौभाग्यवर्द्धनम् ॥ क्षीरं मंगलमाग्र्यम् अतः शान्तिं प्रयच्छ मे ॥ ८ ॥ दध्नः ॥ पवित्रं मं
गलं चैव कुन्देन्दुधवलं दधि ॥ सर्वमंगलदं यस्मादतः शान्तिं प्रयच्छ मे ॥ ९ ॥ मधुनः ॥ यस्मात्पितृगणाः श्राद्धेषु प्रियमसम्भूतोद्भव ॥ त
स्मान्मधुप्रदानेन मम संतु मनोरथाः ॥ १० ॥ लवणस्य ॥ रसानामग्रगं श्रेष्ठं लवणं वलवर्द्धनम् ॥ ब्रह्मणा निर्मितं साक्षादतः शान्तिं
प्रयच्छ मे ॥ ११ ॥ दारूणां ॥ सोमोद्भवानि दारूणि जातवेदःप्रियाणि च ॥ तस्मादेषां प्रदानेन श्रेयो देहि विभावसो ॥ १२ ॥ तैलस्य
तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम् ॥ अमंगल्यहरं पापमतः शान्तिं प्रयच्छ मे ॥ १३ ॥ फलानां ॥ इमानि वन्यजातानि सुफ
लानि ददामि ते ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ १४ ॥ चन्दनस्य ॥ चन्दनावासमंदारसरवृन्दारकार्चित ॥ चन्द
नत्वत्प्रदानान्मे सान्द्रानन्दप्रदो भव ॥ १५ ॥ कर्पूरस्य ॥ कर्पूरः कदलीभूतो देवदेवप्रियः सदा ॥ भोगेनानेन नृपाणां च तत् दानात्तु

CC-0. In Public Domain. Digitization by eGangotri

॥ तुला ॥
॥ ३७ ॥

रवमस्तुमे ॥ १६ ॥ सर्वधान्यस्य ॥ अन्नंप्रजायतेनित्यमन्नेप्राणाःप्रतिष्ठिताः ॥ तस्मादन्नप्रदानेनशान्तिरस्तुसदामम ॥ १७ ॥ घृतस्य
कामधेनोःसमुद्भूतंदेवानाममृतंमहद्विः । आयुर्विवर्धनंपुंसामाज्यंयज्ञेसदैवमाम् ॥ १८ ॥ दध्नस्य ॥ ह्लादयतिमनोयस्मात्तस्मात्तुमन
नसःस्मृताः ॥ दध्नादत्तंमेनित्यमत्याह्लादवतींश्रियम् ॥ १९ ॥ पूगीफलस्य ॥ पूगीफलंमयाविप्रप्रदत्तंतव ॥ तेनमेसफलावा
प्तिर्भवेज्जन्मनिजन्मनि ॥ २० ॥ कांस्यस्य ॥ यानिपापानिकाम्यानिकामोत्थानिकृतानिच ॥ कांस्यधातुप्रदानेनतानिनश्यन्तुमेसदा
२१ ॥ खंडस्य ॥ इक्षुदंडसमुद्भूतःखंडोरससमस्तथा ॥ तस्मादस्यप्रदानेनममसन्तुमनोरथाः ॥ २२ ॥ तंडुलस्य ॥ पावनाःसर्वयज्ञे
षुप्रशस्ताहेमकर्मणि ॥ तस्मात्तंडुलदानेनप्रीयतांविश्वदेवताः ॥ २३ ॥ पित्तलसीसत्रयप्रदानम् ॥ पापानियान्यनेकानिकामाका
मकृतानिच ॥ धातुत्रयप्रदानेनतानिनश्यन्तुमेसदा ॥ २४ ॥ कुंकुमस्य ॥ यदङ्गसंलग्नंकुंकुमादिविलेपनं ॥ तस्मादस्यप्रदाने
नविष्णुर्दिशतुवांछितम् ॥ २५ ॥ लोहस्य ॥ यस्मादायसकर्माणितवाधीनानिसर्वदा ॥ लांगलाद्यायुधादीनिअतःशान्तिंप्रयच्छ
मे ॥ २६ ॥ अथसांप्रदायिकतुलाप्रयोगः ॥ गुर्वस्तादिदोषरहितमासेभद्रादिदोषरहितत्रितीयादितिथौकरिष्यमाणतुलादा
नात्पूर्वदिनेविहितसामग्रीकोयजमानोवेदिपश्चिमभूमिमाश्रित्यब्राह्मणाज्ञया ॥ कुशतिलजलान्यादाय ॥ ॐतत्सत् ॥ ३ ॥ अ
मुकमासेअमुकपक्षेअमुकतिथौअमुकगोत्रोऽमुकनामाअमुकफलकामःपरमेश्वरप्रीतिकामोवाश्वःकरिष्यमाणामुकतुलादा
नांगत्वेनपुण्याहवाचनगणेशाराधनमातृकापूजाभ्युदयिकश्राद्धग्रहयागमण्डपसर्वमधिवासनकर्माहंकरिष्ये ॥ इतिसंकल्प्य

37
॥ राम ॥
॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचगव्येन मंडपभूमिमभिषिंच्य पंचगव्यं प्राश्य ॥ कुशादिकमादाय श्वः कर्तव्यतुलादानकर्मनि तदंगाधिवासनकर्माहं त्वेनाचार्यं त्वामहं वृणे
इति वस्त्रगंधाक्षतपुष्पांगुलीयादिभिराचार्यं वृणुयात् ॥ ततो दीपं प्रज्वाल्य ॥ ॐ नमो स्तवनंताय इति दीपं संपूज्य तत्रैकदेशे गणपतिं संपू
ज्य निर्विघ्नार्थं गणपतेः स्वस्त्ययनं विधाय ॥ आचार्यो ब्रह्मकर्मभूमिं प्रोक्ष्य ॥ तत्र पंचभूसंस्कारान् कृत्वा स्वशाखोक्तविधिनाग्निं स्थापयेत् ॥
ततः पुण्याहं वाचयिष्ये इति ब्राह्मणानाज्ञां प्रार्थ्य ॥ त्रीन् चतुरः पंच ब्राह्मणान् वस्त्रादिभिः संपूज्यांजलिं बध्वा पुण्याहं वाचनविधिना अमुकगो
त्रस्यामुकनाम्नः सपरिवारस्य मम गृहे पुण्याहं ऋद्धिं स्वस्ति कल्याणं शांतिं भवंतो ब्रुवंतु ॥ इति यजमानो ब्राह्मणानुद्दिश्य वदेत् ॥ ते च पृ
थक् वा वत्रयं पुण्याहं ॥ स्वस्ति ॥ ऋद्धिः कल्याणं शांतिः ॥ इति ब्रूयुः ॥ इति पुण्याहं वाचयित्वा ॥ ततस्तुलादानांगभूतहोमकर्मणि आकृताकृ
तावेक्षेत्रार्थं ब्राह्मणान् हवनार्थं होतारं सूक्तजपार्थं वैदिकान् ब्राह्मणान् गंधपुष्पाक्षतवस्त्रादिभिर्वृणुयात् ॥ ततः कुशादिकमादाय
श्वः करिष्यमाणतुलादानकर्मणो निर्विघ्नपरिसमाप्त्यर्थं सिद्धिविनायकपूजनं मातृकापूजाभ्युदयिकश्राद्धपुण्यस्मरणं नवग्रहमखेना
हं यक्ष्ये ॥ इति संकल्प्य ॥ सिद्धिविनायकं समाराध्य मातृकापूजाभ्युदयिकश्राद्धे कृत्वा ईशानभागे कलशं स्थापयेत् ॥ ॥ तत्र क्रमः ॥
सति संभवे ग्रहवेद्यां सर्वतोभद्रमंडले भूमिसेचनधान्याधानतूतनघटरोपणदध्यक्षतभूषणतीर्थजलपूरणासप्तमृत्तिकास
र्वौषधीपंचदलपूगीफलयवगंधाक्षतदूर्वापुष्पनिक्षेपणावस्त्रयुग्मवेष्टनपंचपल्लवाच्छादनवरुणपूजनसर्वसमुद्रा इत्या
द्यभिमंत्रणैः ग्रहवेद्यां कलशे वा अधिदेवतासहितसूर्यादिनवग्रहान्संपूज्य दध्यक्षतादिभिर्बलिं दत्वा अर्कादिसमिद्भिर्हवनं वि

Nepal Sanskrit University, Balmeeki Campus ...

॥ रत्न ॥ ३८ ॥

धाय ॥ अधिवासनकर्मांगत्वेन दक्षिणां दत्वा ब्राह्मणान्संभोज्य ॥ ब्राह्मणास्तयास्वयंच हविष्याशी मंगलकर्माचरणेऽधिवासनंकुर्यात्
इत्यधिवासनम् ॥ प्रातर्यजमानः कृतनित्यक्रियः कुशादिकमादाय अद्य कर्तव्यामुकतुलादानकर्मांगत्वेन दशदिक्पतिपूजनं वा हं
करिष्ये इति संकल्प ब्राह्मणान् गंधादिभिस्संपूज्य पुण्याहं वाचयित्वा दिग्देवान्नमस्कृत्य तुलाभूदशदिशासु दिक्पालान्पूजयेत् ॥ न
त्रक्रमः ॥ एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश ॥ संवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते ॥ इतीन्द्रमा
वाह्य ॐ इन्द्राय नम इति संपूज्य ॥ ॐ इन्द्राय सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय एष दध्यादिसहितो माषभक्ता
दिबलिर्नम इति बलिं दद्यात् ॥ एवमग्न्यादिदशदेवतायर्पणं बलिदानं ॥ एह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभितोभिजुष्ट ॥ ते
जोवता लोकगणेन सार्द्धं ममाध्वरं रक्ष कवे नमस्ते ॥ २ ॥ एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित दिव्यमूर्ते ॥ शुभाशुभानन्दशुचा
मधीश शिवाय नः पाहि मखं नमस्ते ॥ ३ ॥ एह्येहि रक्षोगणनायक त्वं विशालवेतालपिशाचसंघैः ॥ ममाध्वरं पाहि पिशाचनाथ लो
केश्वर त्वं भगवन्नमस्ते ॥ ४ ॥ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः ॥ विद्याधरेन्द्रैरभिपूज्यमान पाहि त्वमस्मा
न्भगवन्नमस्ते ॥ ५ ॥ एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः ॥ प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्न
मस्ते ॥ ६ ॥ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धम् ॥ सर्वौषधीभिः पितृभिस्सहैव गृहाण पूजां भगवन्नमस्ते ॥
७ ॥ एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगकरेण सार्द्धम् ॥ लोकेन भूतेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते ॥ ८ ॥ एह्येहि

38

॥ राम ॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातालधवमहेन्द्रनागांगनाकिन्नरगीयमान ॥ यक्षोरगेन्द्रैरपिपूज्यमानअनंतवक्षांभगवन्नमस्ते ॥ ९ ॥ एह्येहिविश्वाधिपतेत्वमी
न्द्रलोकेनसार्द्धंपितृदेवताभिः ॥ सर्वस्यधातास्यमितप्रभावोविशाध्वरंनःसततंशिवाय ॥ १० ॥ ततःसुवर्णोत्पतिमासुश्रीगोविंदं
सूर्यधर्मराजइत्याधिष्ठातृदेवांश्चवेदिकादिमंत्रैराषोडशोपचारैःसंपूज्य ॥ तुलांगंधादिभिरलंकृत्यतत्सांस्वर्णादिसूत्रांततिर्मि
नेषुचतुर्विंशतिबंधेषु ॥ दक्षिणोत्तरस्थितततुलायांदक्षिणभागांतादारभ्य ॥ पश्चिमपूर्वस्थिततुलायांपश्चिमभागांतादारभ्यचतुर्विंशति
तुलाधिष्ठातृदेवताःपूजयेत् ॥ देवतायथा ॥ ईशःशशीमारुतरुद्रसूर्याःसविश्वकर्माग्रुरुरोगरोषी ॥ प्रजापतिर्विश्वजगद्विधाता
पर्जन्यशंभूपितृदेवताश्च ॥ सोमःसधर्मोमरराजदक्षौजलेशमित्रावरुणौमरुद्गणाः ॥ धनेशगंधर्वजलेशविष्णवस्कन्दास्तुपू
ज्यावलिभिस्समर्हणैः ॥ तत्रप्रथमबंधे ॥ पूर्वोत्तरेचित्रनेत्रश्चवृषभस्थश्चशूलधृक् ॥ कपालपाणिश्चजटाधरभूषणःपरमेश्वरः ॥ इ
त्यावाह्यॐईशायनमइतिसंपूज्य ॥ ॐईशायसांगायसपरिवारायसायुधवाहनशक्तयेएषपुष्प्यादिसहितोमाषभक्तादिवलिर्न
मम ॥ १ ॥ द्वितीयबंधे ॥ श्वेतांबरःश्वेतविभूषणाश्चश्वेतद्युतिर्दंडधरोद्विबाहुः ॥ चंद्रोमृतात्मावरदःकिरीटीश्रेयांसिमह्यंप्रद
दातुदेवः ॥ इत्यावाह्य ॥ ॐशशिनेनमइतिपूजयेत् ॥ २ ॥ तृतीयबंधे ॥ धावद्धरिणपृष्ठस्थोध्वजधारीसमीरणः ॥ वरदोंकुशमु
द्गोधानव्याचसमीरणः ॥ ॐमारुतायनमइतिपूजयेत् ॥ ३ ॥ चतुर्थबंधे ॥ रक्तवर्णास्त्रिनयनाद्विभुजाश्चन्द्रमौलयः ॥ ध्यात
व्याजटिलाश्चैवरुद्रावाणधनुर्धराः ॥ इत्यावाह्यॐरुद्रेभ्योनमइतिपूजयेत् ॥ ४ ॥ पंचमबंधे ॥ पद्मासनःपद्मकरोद्विबाहुःपद्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्युतिः सप्ततुरंगवाहनः ॥ दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥ इत्यावाह्य ॐ सूर्याय नम इति पूजयेत् ॥ ५ ॥ षष्ठे
ध्यातव्यो विश्वकर्मा तु श्मश्रुलो रशनाधरः ॥ मंदंशपाणिर्द्विभुजस्तेजोमूर्त्तिरधोमुखः ॥ इत्यावाह्य ॥ ॐ विश्वकर्मणे नम इति पूज
येत् ॥ ६ ॥ सप्तमे ॥ पीतांबरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः ॥ दधाति दण्डं च कमंडलुं च तथाक्षसूत्रं वरदोस्तु मह्य
म् ॥ इत्यावाह्य ॥ ॐ गुरवे नमः इति पूजयेत् ॥ ७ ॥ अष्टमे ॥ कमंडलुं स्रुवं चैव शक्तिं धर्मं परिक्रमात् ॥ कलयत्यंगिरो नामा कराग्रे
ष्वसमंततः ॥ पिंगभ्रूश्मश्रुकेशानी पिंगाक्षो जठरे कृशः ॥ छागस्थः साक्षसूत्रश्च सप्तार्चिः शक्तिधारकः ॥ इत्यावाह्य ॥ ॐ अंगिरो
ग्निभ्यां नमः ॥ इति पूजयेत् ॥ ८ ॥ नवमे ॥ यज्ञोपवीती हंसस्थः एकवक्त्रश्चतुर्भुजः ॥ अक्षस्रुवं स्रुवं धत्ते कुंडिकां च प्रजापतिः ॥ इ
त्यावाह्य ॥ ॐ प्रजापतये नमः ॥ इति पूजयेत् ॥ दशमे ॥ क्रतुर्दक्षो वसुः सत्यः कालकामौ धुरिलोचनौ ॥ पुरूरवाद्रवश्चेति विश्वेदे
वा दश स्मृताः ॥ विश्वेदेवास्तु सर्वेपि दक्षिणे वारायायायः ॥ कर्त्तव्या वामपाणौ च सशरासनयारायः ॥ इत्यावाह्य ॥ ॐ विश्वेभ्यो
नमः ॥ इति पूजयेत् ॥ १० ॥ एकादशे ॥ पद्मासनस्थो जटिलो ब्रह्मा ध्येयश्चतुर्मुखः ॥ अक्षमालां स्रुवं बिभ्रत्पुस्तकं च कमण्डलुम्
वामसव्ये कृष्णाजिनं तस्य पार्श्वे हंसस्तथैव च ॥ इत्यावाह्य ॥ ॐ जगद्विधात्रे नमः इति पूजयेत् ॥ ११ ॥ द्वादशे ॥ पर्जन्यनामा विज्ञेयो रा
जच्छत्रत्रयान्वितः ॥ यो धत्ते सर्वजीवानामावरं बीजं चवंशखकम् ॥ कुठारं च पयोजं चा चत्तारत्नं महाश्रुचिः ॥ पाशं च कंकिसलयं
कुण्डीं च दशभिः करैः ॥ पंचवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः ॥ कपालहस्तः खट्वांगी चन्द्रमौलिः सदाशिवः ॥ इत्यावाह्य ॥ ॐ

39

CC-0. In Public Domain. Digitization by eGangotri

पर्जन्यशंभुभ्यां नमः इति पूजयेत् ॥ १२ ॥ त्रयोदशे ॥ कुश विष्टरयमस्याः पितरः पिण्डपाणिनः ॥ सौम्यास्सावरदाः सर्वे नानालंकारभू
षिताः ॥ इत्यावाह्य ॥ ॐ पितृदेवताभ्यो नमः ॥ इति पूजयेत् ॥ चतुर्द्दशे ॥ पीनांवरः पीनवपुः किरीटी चतुर्भुजो दण्डधरश्च हारी ॥ चर्म
सिध्नृक्सोमसुतः सदा नः सिंहाधिरूढो वरदोस्तु सौम्यः ॥ इत्यावाह्य ॥ ॐ सौम्याय नमः इति पूजयेत् ॥ १४ ॥ पंचदशे ॥ चतुर्मुखश्च
तुर्बाहुः सितमाल्यः सितांवरः ॥ सर्वाभरणवान्देवो धर्मो ध्येयो विजानता ॥ इत्यावाह्य ॥ ॐ धर्मराजाय नमः ॥ इति पूजयेत् ॥ १५
षोडशे ॥ चतुर्दन्तगजारूढो वज्रपाणिः पुरन्दरः ॥ शचीपतिस्तु ध्यातव्यो नानाभरणभूषितः ॥ इत्यावाह्य ॥ ॐ जमरराजाय नमः
इति पूजयेत् ॥ १६ ॥ सप्तदशे ॥ द्विभुजौ देवभिषजौ ध्यातव्यौ चारुलोचनौ ॥ तयोरेषधयः कार्या दिव्या दक्षिणहस्तयोः ॥ वामयोः
पुस्तके कार्ये दर्शनीयौ रुजान्तकौ ॥ इत्यावाह्य ॥ ॐ अश्विभ्यां नमः इति पूजयेत् ॥ १७ ॥ अष्टादशे ॥ नागपाशधरो रक्तभूषणः पद्मि
नीप्रियः ॥ वरुणोम्बुपतिः स्वर्णवर्णो मकरवाहनः ॥ इत्यावाह्य ॥ ॐ जलेशाय नमः इति पूजयेत् ॥ १८ ॥ ऊनविंशे ॥ मित्रः कमल
पाणिश्च कमलासनसंस्थितः ॥ द्विभुजः श्वेतमूर्तिश्च सर्वदेवहितेरतः ॥ नागपाशधरो रक्तभूषणः पद्मिनीप्रियः ॥ वरुणो
म्बुपतिः स्वर्णवर्णो मकरवाहनः ॥ इत्यावाह्य ॥ ॐ मित्रावरुणाभ्यां नमः ॥ इति पूजयेत् ॥ १९ ॥ विंशे ॥ देवाएकोनपंचाशद्देवेन्द्रस
मतेजसः ॥ आनरः पुरुहूतसमरुतः सूर्यवर्चसः ॥ किरीटहारकेयूरकटकादि भूषिताः ॥ खड्गचर्मधरा नित्यं ध्यातव्याः शुभदायकाः
इत्यावाह्य ॥ ॐ मरुद्गणेभ्यो नमः इति पूजयेत् ॥ २० ॥ एकविंशे ॥ ह्रस्वः सपिंगनेत्रश्च गदी नंपीनविग्रहः ॥ पुष्पकस्थं धनाध्यक्षं ध्या

Nepal Sanskrit University ... Campus ...

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥ ॥ ४० ॥

येद्धिवसरवंतथा ॥ इत्यावाह्य ॥ ॐ धनेशायनमः इतिपूजयेत् ॥ २१ ॥ षाविंशो ॥ वरदोभक्तलोकानांकिरीटीकुण्डलीगदी ॥ कार्यःशु
ल्योगंधर्वोवीणावाद्यरतस्तथा ॥ इत्यावाह्य ॥ ॐ गन्धर्वायनमः ॥ इतिपूजयेत् ॥ २२ ॥ त्रयोविंशो ॥ नमोवः सर्वसिंधूनामाधारेभ्यःस
नातनाः ॥ जनानांप्राणदेभ्यश्चसमुद्रेभ्योनमोनमः ॥ इत्यावाह्य ॥ ॐ जलेशायनमः ॥ २३ ॥ चतुर्विंशो ॥ अधश्चक्रंगदामूर्ध्ववामयोः
करयोःक्रमात् ॥ ऊर्ध्वशंखमधःपद्मंगोविन्दंध्यानंस्मरेत् ॥ इत्यावाह्य ॥ गोविंदायनमइतिसंपूज्यबलिंदद्यात् ॥ ततोगोविन्दप्र
तिमांसदक्षांगुलमुक्तायष्ट्यासुवर्णश्रृंखलयासूत्रेणवाबध्वातुलामध्येऽवलम्बयेत् ॥ सूर्यधर्मराजौतुलासमीपेस्थापयि
त्वतःसंपूजितदेवानांयथोक्तमंत्रैरेवनंविधाय ॥ गोविन्दसूर्यधर्मराजेभ्यःस्वमंत्रैरष्टोत्तरशतहवनंकृत्वा ॥ यजमानःसर्वौ
षधजलिप्तेजलैःस्नात्वाभुक्तमाल्यांबरधरःपुष्पांजलिंगृहीत्वासफलकांतोरणावलंविनारक्तवस्त्रवेष्टितांतुलांत्रिःप्रदक्षिणीकृ
त्यानुमंत्रयेत् ॥ ॐ नमस्तेसर्वदेवानांशक्तिस्त्वंसत्यमाश्रिता ॥ साक्षीभूताजगद्धात्री निर्मिताविश्वयोनिना ॥ एकतः सर्वसत्या
नितथानृतशतानिच ॥ धर्माधर्मकृतांमध्येस्थापितासिजगद्धिते ॥ त्वंतुलेसर्वभूतानांप्रमाणमिहकीर्तिता ॥ मांतोलयंतीसंसा
रादुद्धरस्वनमोस्तुते ॥ योसौतत्वाधिपोदेवःपुरुषःपंचविंशकः ॥ सएषोधिष्ठितोदेविन्वयितस्मात्नमोनमः ॥ इतितुलामुद्दिश्यपु
ष्पांजलित्रयंदत्वा ॥ ॐ नमोनमस्तेगोविन्दतुलापुरुषसंज्ञक ॥ त्वंहरेतारयस्वास्मानस्मात्संसारसागरात् ॥ इतिमंत्रेणगोविंद
मनुमंत्र्य ॐ गोविंदायनमइतिपुष्पांजलित्रयंदद्यात् ॥ ततउपविश्यपूर्वाभिमुखःकुशादिकमादाय ॐ तत्सत् अद्यमासेपक्षेतिथौ

40
॥ रत्न ॥ ॥ ४० ॥

अहंस्वर्गकामनयाऽमुकद्रव्यतुलादानमहंकरिष्ये इतिप्रतिज्ञाय ॐतुलायैनमइतितुलांसंपूज्य ॐगोविन्दायनमःइतितुलांगोविं
दंचप्रणम्य॥ दक्षिणहस्तेनसूर्यमादाय॥ वामकरेणधर्मराजमादायतुलामध्यावलंबिनंगोविंदंसंपश्यन्पश्चिमदिक्केपश्चात्तरे
उत्तरदिक्केआरुह्यप्राचीमुखउपविशेत्॥ ततोऽपरेतुलाभागेन्यसेद्द्विजपुंगवाः॥ स्वमादभ्यधिकंयावत्कांचनंचातिनिर्मलम्
पुष्टिकामस्तुकुर्वीतभूमिस्थंतराधिपः॥ इतिमत्स्यपुराणवचनात्॥ पूर्वंद्रव्यन्यासइतिपक्षोनिराकृतः॥ ततोमनुष्यारोहणा
नन्तरमितितदर्शनात्॥ एवंच॥ यजमानारोहणानन्तरंआचार्यादयोब्राह्मणाःकांचनादिद्रव्यंपूर्वदिक्के॥ पश्चात्तरेदक्षिणदिक्के
न्यसेयुः॥ द्रव्योपरिद्रव्यदेवतांनिधाय॥ पुष्टिकामनायांभूमिसंलग्नमितरकामनायांयावदंतरालंनस्याईद्रव्यभागेतुस्वकाल
र्यम्॥ अस्मिन्नवसरेआचार्यादयोब्राह्मणाः॥ द्रव्यदेवतासूक्तपुरुषसूक्तरुद्रसूक्तप्रवणाहवाचनानिपठेयुः॥ यजमानस्तुमुहू
र्तमुहूर्तार्द्धंगोदोहनमात्रंवास्थित्वावक्ष्यमाणमंत्रान्पठेत्॥ नमस्तेसर्वभूतानांसाक्षीभूतेसनातनिपितामहेनदेवित्वंनिर्मि
तापरमेष्ठिना॥ त्वयाधृतंजगत्सर्वंसहस्थावरजंगमम्॥ सर्वभूतात्मभूतेशिनमस्तेसर्वधारिणि॥ त्वंतुलेसर्वभूतानांप्रमा
णमिहकीर्तिता॥ मांतोलयन्तींसंसारादुद्धरस्वनमोस्तुते॥ नमोनमस्तेगोविन्दतुलापुरुषसंज्ञक॥ त्वंहरेतारयस्वास्मानस्मात्सं
सारसागरात्॥ इतिपठित्वाशनैरवतीर्य॥ द्रव्यसमीपेपूर्वाभिमुखउपविश्य॥ द्रव्यदेवतासहितंतुलितद्रव्यंगंधपुष्पादिभि
स्संपूज्य॥ संघयनब्राह्मणांश्चसंपूज्यकुशतिलजलान्यादायद्रव्यंसंकल्प्य॥ ॐतत्सत् मासेपक्षेतिथौअमुकगोत्रोऽमुकनामाहं

॥ रत्न ॥
॥ ४१ ॥

अमुकफलकामनया इदमात्मसमनोलितं अमुकद्रव्यं अधिष्ठातृदेवतासहितं यथादेवतं यथानामगोत्रेभ्यो नारायणस्वरूपेभ्यो
ब्राह्मणेभ्यो दातुमुत्सृजे ॥ इत्युक्त्वा कुशादिकं ब्राह्मणहस्ते दद्यात् ॥ ततः सुवर्णसहितं कुशादिकमादाय ॥ मासे पक्षे तिथौ अहं अमुक
फलकामनया आत्मसमतोलितामुकद्रव्यदानप्रतिष्ठार्थमिदं हिरण्यं अग्निदैवतं यथागोत्रनामब्राह्मणेभ्यो दातुमुत्सृजे ॥ इति
कुशादिकं ब्राह्मणकरे दद्यात् ॥ ततः आचार्यादयः शेषयज्ञहोमपूर्णाहुतिं च दर्भहोमपूर्णाहुतिमेधाकर्मसमापयेयुः ॥ ततो यज
मानो गोविंदसूर्यधर्मराजानां संपूज्य ॥ उत्तिष्ठ ब्रह्मणस्पते इति पठित्वा पुष्पादिनिक्षेपेणायांतु देवगणा इति मंत्रेण देवानुवि
सृज्य भूयसीं दक्षिणां दद्यात् ॥ कुशादिकमादाय ॥ मासे पक्षे तिथौ अहं अमुकफलकामनया कृतैतदमुकद्रव्यतुलादानक
र्मणः सांगत्वेन कृतस्य ग्रहयागपुरस्सराधिवासनकर्मणश्च सांगतासिद्ध्यर्थं यज्ञपुरुषदेवताधीनये इमां भूयसीं दक्षि
णां विष्णुदैवतां नानागोत्रब्राह्मणेभ्यो यथाभागं विभज्य दातुमुत्सृजे इति त्यागं कुर्यात् ॥ ततः आचार्यादयः शांतिकल
शजलेन वारुणसूक्तेन सुरास्त्वाभित्यादिपौराणमंत्रैः स्वस्वशाखोक्तवैदिकमंत्रैश्च यजमानमभिषिंचेयुः ॥ ततो यजमानो
ऽलक्ष्मीरिति मंत्रेण घृतच्छायां पश्येत् ॥ ततो ब्राह्मणा यजमानं ध्रुवगंधमाल्यादिभिरलंकृत्याशिषो दद्युः ॥ ततो यजमानो
गोविंदादिप्रतिमां मण्डपोपकरणं चोद्दिश्य ॥ इमास्तुलादानांगगोविंदादिप्रतिमाः सनत्तुलादानागमण्डपोपकरणं चान्ध
र्यादिब्राह्मणेभ्यः प्रतिपादयामि ॥ इति यज्ञप्रतिपत्तिं कुर्यात् ॥ ततः आचार्यादीन्ब्राह्मणान्भोजयेत् ॥ तुलाधनं वसुस्वर्गे हेन

41
॥ राम ॥
॥ ४१ ॥

प्रवेशयेत् ॥ मात्स्ये ॥ ततोवतीर्य गुरवे पूर्वमर्द्धं निवेदयेत् ॥ ऋत्विग्भ्यो यस्मर्द्धं च दद्यादुदकपूर्वकम् ॥ दानसागरे ॥ वरणाक्रमे
णाचार्यकराधःस्थितोत्तानकरेभ्यः सर्वेभ्यो युगपद्देवगोत्राञ्छ्रुत्वार्घ्य यथाभागं प्रतिपादयेत् ॥ अदक्षिणं तु यद्दानं तत्सर्वं निष्फ
लं भवेदित्युक्त्वा गुरवे सुवर्णमयं देयोभूयसीं दद्यात् ॥ क्षित्रियादित्सु गुरवे ग्रामरत्नादिकं दद्यादित्युक्तम् ॥ रूपनारायणस्तु
गुरवे अर्द्धमर्द्धमस्त्वृत्विग्भ्यो देयमित्याह ॥ अन्ये तु अर्द्धं गुरवे दत्वा तदर्द्धं तत्यार्द्धमृत्विग्जापकद्वारपालदीनानाथेभ्यो देयमित्या
हुः ॥ अपरे तु एकांशो गुरवे द्वितीयः ऋत्विग्भ्यो उपरो जापकेभ्यश्चतुर्थो द्वारपालेभ्यो देयमित्याहुः ॥ दानप्रतिष्ठाद्व्यं तु गुरवे त्र्य
त्विग्भ्य एव तान्येभ्यो देयम् ॥ अत्र सहृदसंमतेनेन व्यवस्थेति दानरत्ने विस्तरः ॥ प्रीयतां पितरः कोसेनाग्रे चैव पितामहाः ॥ त(
द्वरुणो सिन्धुजे लक्ष्मीः प्रीयतां पार्वती गडे ॥ गन्धाद्यौ विश्वधात्रीति दानमन्त्रोभिधीयते ॥ तुलापुरुषतो राजन्यानि तत्पर मंयद
म् आत्मतुल्यं सुवर्णं वा रजतं रत्नमेव वा ॥ यो ददाति द्विजाग्र्येभ्यः सयाति परमं पदम् ॥ सर्वपापहरायैतद्दानं प्रीयतां दि
धुरितिरैष्ये ॥ वसुतोय वसुतोय दैवं तद्दैवं प्रीयतामिति दानमन्त्रः ॥ तत्र मन्त्राहोमो वा कुंकुमे लवणे गुडे ॥ ॥ तुलाध(
सात् षोडशारचक्र लेखनं पाकप्रतियादितम् ॥ कथं तत्र लेखनमतस्तदुच्चारप्रकार उच्यते ॥ तुलावेद्यामध्ये त्रिहस्तविस्तारं च
तुरस्रं प्रसाध्य प्राक्पश्चिमदक्षिणोत्तरतनवनवरेखाभिश्चतुःषष्टिकोष्ठानि सम्पादयेत् ॥ तानि कोष्ठानि नवाङ्गुलप्रमाणा
नि जायन्ते । ततो बहिरन्त्यपंक्तिषु चतुर्दिक्षु मध्यकोष्ठानि चत्वारि चत्वारि मार्जयित्वा तदुपर्युपर्यन्त्यपंक्तिषु पार्श्वयोस्त्र्यं त्र्य

॥ रत्ना ॥
॥ ४२ ॥

स्नाकाशनिर्दिष्टं मध्यकोष्ठद्वयं मार्जयेत्ततश्चतुर्दिक्षु षट्षट्कोष्ठानि त्यक्त्वा
रिष्टानि सिध्यंति ॥ ततो मध्यस्थितकोष्ठानि मार्जयेत् ॥ ततो वायव्यैकैक
कोणकोष्ठं विहाय कोष्ठेष्वारथीथं तरालवर्त्तीन्यवशिष्टानि पंच पंच को
ष्ठानि मार्जयेत् ॥ तथा च मध्यचतुरस्रवीथ्यस्याः सिध्यंति ॥ ततो मध्या
दारभ्य त्यक्त्वा रिक्तानि कुर्यात् ॥ तत्राद्ये त्वार्यंगुलानि व्यासः ॥ द्वितीये षो
ततीये चतुर्विंशतिः ॥ चतुर्थे द्वात्रिंशतिरिति ॥ तत्र त्र्यंगुलं वृत्तं कर्णिका
रूपं पीतेन रजसा पूरयित्वा कर्णिकावधि रेखां सितेन रजसा निर्माज्र्ज्जये
त् ॥ तद्बहिरर्द्धांगुलात्मके वृत्ते पीतरक्तसितरजोभिः संपादितमूलम
ध्याग्राणि षोडशकेशराणि संपाद्य तत्केशरावधिरेखां सितेनैव रजसा
ड्गुलोन्नतां संपाद्य चतुर्विंशांगुलात्मके तद्बहिर्वृत्ते सितरजसा षोडश



षोपत्राणि कुर्यात् ॥ ततो दलांतरेखां सितेन रजसा विधाय दलांतराणि कृष्णेन रजसा पूर यित्वा तद्बहिरेकांगुला
बहिर्वृत्ते रेखां सितेनैव रजसा संपाद्य तद्वृत्तांतं तृतीयवृत्तोष्ठदलाग्रतः संधिचिह्नैः षोडशधा विभज्य प्रतिभागं यवाऽऽकारात्

42

॥ राम ॥
॥ ४२ ॥

ईशाग्रसन्नृपामयीं तारुणाश्वेन रजोभिः कल्पयित्वा तदन्तरा यथायोगं रजोभिः कल्पयित्वा तदन्तरा यथायोगं रजोभिः पूरयित्वा ·
तद्बहिः सितपीतारुणश्यामहरिता पंचरेखा लिखेत् ॥ तद्बहिः पीठक्षेत्रं चतुरस्रं यथाशोभं रजोभि रक्तकृष्णपीतावधिरेखां सि
तेन रजसा चतुरस्रां रचयेत् ॥ तद्बहिः क्षेत्राणि पूर्वादितः पीतश्वेतश्यामहरितरजोभिः पूरयेत् ॥ आग्नेयादिकोणकोष्ठचतुष्ट
यं लोहितहरितश्यामधवलैः पूरयेत् ॥ आग्नेयादिपीठपादचतुष्टयं पंचकोष्ठात्मकं क्रमात् सितरक्तपीतकृष्णरजोभिः पूजये
त् ॥ ततः सितेन रजसा स्थलेन तेन बहिश्चतुरस्ररेखां कुर्यात् ॥ ॥ इति षोडशारनिर्माणम् ॥ अथास्मिन् वारुणमण्डले देव
तापूजा ॥ अग्न्येत्यादिमंडलदेवतास्थापनं करिष्य इति संकल्प्य स्थापयेत् ॥ तत्र मध्ये ब्रह्मजज्ञानमिति ब्रह्माणं ततः उदीचीमा
रभ्य वायवीपर्यन्तं कुवेरादीन् वायव्यन्तान्नष्टौ लोकपालान् ॥ तत्र व्यायस्वेति कुवेरं तत्र रे १ ईशानेत्वमीशानमिन्द्र शानम् २ त्रा
तारमिन्तीन्द्रम् ३ अग्निं दूतमित्यग्निम् ४ यमायत्वेति यमम् ५ असुन्वन्तमिति निर्ऋतिम् ६ तत्वायामीति वरुणम् ७ वायोयेन ह
तिवायवे वायुं ८ वायुसोममध्ये ॐ सुगावःशतनाष्टौ वसून् ॥ सोमेशानमध्ये यस्तावं तद्रा इति वीरभद्राद्येकादशरुद्रान् ॥ ईशानेन्द्र
मध्ये यज्ञो देवानामिति धात्रादि द्वादशादित्यान् इन्द्राग्निमध्ये अश्विनौ भैषज्येन मश्विनौ ॥ अग्नियममध्ये विश्वे देवास इति विश्वा
न्देवान् ४ यमनिर्ऋतिमध्ये अभित्यन्देव ६ सवितारमिति सप्त यक्षान् ॥ निर्ऋतिवरुणमध्ये आयंगौरिति भूतनागान् ॥ ६ वरु
णवायुमध्ये नदीभ्यः पौंजिष्ठमिति गंधर्वाप्सरसः ७ वायुसोममध्ये यदक्रन्दमिति स्कन्दनन्दिनौ ८ ब्रह्मसोममध्ये कार्षिरसीति

॥ रत्न ॥
॥ ४३ ॥

भूत महाकालौ १ ब्रह्मेशानमध्ये सप्तऋषय इति दक्षादीन् सप्त २ ब्रह्मेन्द्रान्तराले नामाग्निवर्णामिति दुर्गाम् ॥ इदं विष्णुरिति विष्णुम् ३ ब्रह्माग्निमध्ये उदीरतामिति स्वधाकारम् ४ ब्रह्मयममध्ये परं मृत्यो इति मृत्युरोगान् ५ ब्रह्मनिर्ऋतिमध्ये गणानां त्वेति गणापतिम् ॥ ६ ब्रह्मवरुणमध्ये शन्नो देवीरित्यपः ७ ब्रह्मवायुमध्ये मरुतो यस्य हीति मरुतः ८ ब्रह्मणः पादमूले कर्णिकाधः स्योना पृथिवीति पृथ्वीम् ॥ तत्रैव पंचनद्य इति गङ्गादिनदीः ॥ तत्रैव धामन्ते धाम्नो राजन्निति सप्तसागरान् ॥ तदुपरि ब्रह्मपर्वतमस्येति मेरुम् ॥ बाह्ये सोमादिसमीपे क्रमेणायुधानि ॥ गदां १ त्रिशूलम् २ वज्रम् ३ शक्तिम् ४ दण्डम् ५ खड्गम् ६ पाशम् ७ अंकुशम् ८ तद्बाह्ये उत्तरादितः ॥ गौतमम् १ भरद्वाजम् २ विश्वामित्रम् ३ कश्यपम् ४ जमदग्निं ५ वशिष्ठम् ६ अत्रिम् ७ अरुन्धतीम् ८ तद्बाह्ये पूर्वादि ॥ ऐन्द्रीं १ कौमारीम् २ ब्राह्मीं ३ वाराहीं ४ चामुण्डां ५ वैष्णवीम् ६ माहेश्वरीम् ७ वैनायकीम् ८ यथाशक्तिशक्त्यः इति स्थाप्य प्रत्येकं सह वा यजयेत् ॥ इति मण्डलदेवताप्रयोगः ॥ ॥ अथ वारुणसर्वतोभद्रमण्डलयोः पूज्या देवाः से महद्यतो ग्रहपूजायां सर्वतोभद्रस्यापेक्षया च वारुणानन्तरं सर्वतोभद्रमण्डलम् ॥ यत्तत्क्वापि महावेद्या ईशानदिग्भागे हस्तमितां हस्तोच्छ्रायां ग्रहादिस्थापनार्थां उपरागे द्विवितस्तिहेमाद्रिमते वितस्त्युच्छ्रायां वा तस्यां सर्वतोभद्रं लिखेदित्युक्ते सङ्क्षेपेण तत्प्रकार उच्यते ॥ प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिः ॥ खण्डेन्दुस्त्रिपदैः कोणेष्व शृङ्खला पञ्चभिः पदैः ॥ एकादशपदा वल्ली भद्रं तु नवभिः पदैः ॥ चतुर्विंशत्पदा वापी परिधिर्विंशकैः पदैः ॥ मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् ॥

43
॥ राम ॥
॥ ४३ ॥

सितेनेंदुः शृङ्खलाक्रमावध्वीनीतेन
न्तरदलभ्वेनाकर्णिकायांनवर्णि॰
पयेद्देवान्द्रुलाद्यासुरासुरानिनि॰
शापूजाकर्त्तव्येत्येतरेति विभावनी
अथ दानप्रकरणम् ॥ तत्र दानस
नम् ॥ दानमित्यभिनिर्दिष्टंमास्वा
मानवाश्चेतिचिरंजीवितमिति ॥
नेसर्वंप्रतिष्ठितं ॥ तस्माद्दानंपरमं
यामिति ॥ मात्स्ये च ॥ दानेन भूतानि
वैरिणि दानाद्दानेन सर्वव्यसनानिहन्ति
हाश्चनः ॥ स्वप्नारोर्व्वसन्ताधाराणान् प
मोरसम् ॥ ब्रासराणार्थमुपाक्तन्यना॰

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्म्मणा
कृतारत्नावलीनवतुलादानपद्धतिरियम् ॥१॥
इति श्रीगीर्वाणयुद्धविक्रमसाहदेवकृते
धर्म्मरत्नावलीनिबन्धे तुलादानरत्नम्

पूरयेत् ॥ भद्रास्त्राणासितावापियरिधिः पीतवर्णकः ॥ वाद्या
का ॥ परिध्यावेष्टितंयत्तमध्येसत्परजसमः ॥ तन्मध्येस्था॰
वसाद्यांस्थापयेद्दिनुक्तिः समन्ततो रौक्तमंडलपूजाप्रयोगे
पम् ॥ ॥ इति सर्वतोभद्रमण्डलम् ॥
रूपमुक्तं देवलेन ॥ अर्थानामुदितेपात्रे श्रद्धयाप्रतिपाद
नं तत्स्यकथ्यत इति ॥ सामवेदोपनिषदि दानेन सर्वान्का॰
दानप्रशंसानैत्तिरीयश्रुतौ ॥ दानेनद्विषन्तो मित्रा भवन्ति दा
वदन्तीति ॥ शातपथेऽपि ॥ तस्माद्देनत्त्रयं शिक्षेद्दमं दानं द
वशीभवन्ति दानेन वैराण्यपयान्ति नाशं ॥ परोपिबंधुत्वमु
ति ॥ दानोद्योतेमहाभारते ॥ अनुनीय यथाकामं सत्यसंधो म
विज्ञाय दिवंगतः ॥ तथा शिविरौशीनरोऽङ्गानां पुत्रं वसुप्र
कयष्ठमितो गतः ॥ प्रतर्दनः काशिपतिः प्रदायनयनेस्वके

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥ ब्राह्मणायातुलां कीर्त्तिमिह चामुत्र चाश्नुते ॥ दिव्यमृष्टशलाकं च सौवर्णाय रमीर्द्दमत् ॥ छत्रं देवगृहे दत्वा सर्वाश्चोभ्ययतद्दिवि ॥
॥ ४४ ॥ मृष्टशलाकमुज्ज्वलपश्चरमिति ॥ तथा ॥ सर्वरत्नगृहे यो दद्यात्र्युवनाथ्यः प्रियः स्त्रियः ॥ रम्यमावसथं चैव दत्वा स्वर्लोकमाश्रितः ॥ लो
मपादश्च राजर्षिर्दत्वाशां तां तु नां पतः ॥ त्वाष्पष्ट्रं ञ्जायविपुलैः सर्वकामैरपूज्यत ॥ दत्वा शतसहस्रं तु गवां राजा प्रसेनजित् ॥ सव
त्सकं महत्तेजा गतो लोकाननुत्तमान् ॥ तत्र दानेऽधिकारश्च तुर्णां वर्णानां स्त्रीणां च ॥ वर्णानामाश्रमाणां च चातुर्वर्ण्ये पयुधिष्ठि
र ॥ दानधर्मं प्रवक्ष्यामि यथा व्यासेन भाषितमिति व्यासोक्तेः ॥ स च निषादस्थपतिर्गावेधुके धिकृत इतिवत् ॥ स्त्रीशूद्रयोरपि
वैदिकमन्त्रवर्ज्जमपि समन्त्रकस्यैवाधिकारः ॥ अतएव मदनरत्ने जातूकर्ण्यः ॥ अधिकारो भवेच्छूद्रः पूर्त्तधर्मे न वैदिके इति ॥ पू
र्त्तधर्मस्तत्रैव स्मृत्यन्तरे ॥ वहिर्वेदि च यद्दानं तत्पौर्त्तिकमुदाहृतमिति ॥ तत्रैव व्यासः ॥ अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयत
इति ॥ ॥ अथ दानपात्रम् ॥ याज्ञवल्क्यः ॥ न विद्यया केवलया तपसा वापि पात्रता ॥ यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते इति
दक्षः ॥ सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ॥ सहस्रगुणमाचार्ये त्वनन्तं वेदपारगे ॥ इति व्यासः ॥ ब्राह्मबीजसमुत्पन्नो मन्त्र(44
संस्कारवर्जितः ॥ जातिमात्रोपजीवी च भवेद्ब्राह्मणः समः ॥ गर्भाधानादिभिर्युक्तस्तथोपनयेन च ॥ न कर्मकृन्न चाधीते स ॥ रत्न ॥
भवेद्ब्राह्मणब्रुवः इति ॥ तथा ॥ देवार्चनपरो नित्यं ब्राह्मणो वत्सरत्रयम् ॥ असौ देवलको नाम हव्यकव्येषु गर्हित इति ॥ यत्तु ॥ ४४ ॥
वृहस्पतिना ॥ शूद्रे समगुणं दानं वैश्ये तद्द्विगुणं स्मृतम् ॥ क्षत्रिये त्रिगुणं प्रोक्तं ब्राह्मणे तत्षड्गुणमिति शूद्रादीनामपि पात्र

मोक्ता ॥ साऽन्नाऽऽच्छादनपरा ॥ अन्नाच्छादनदानेषु पात्रं नैव विचारयेत् ॥ अन्नस्य क्षुधितं पात्रं विवासा वसनस्य चेति विष्णुधर्मोक्तेः
अपात्राया ऽमंत्रकं दानं ॥ मंत्रपूर्वं तु यद्दानमपात्राय प्रदापयेत् ॥ दातुर्निहंत्यसद्दत्तं तु जिह्वां चैव निकृन्तनीति शातातपोक्तेः ॥ अथ द्र
व्यदेवतास्तैत्तिरीये ॥ सोमाय वासः रुद्राय गाम् ॥ वरुणायाऽश्वम् ॥ प्रजापतये पुरुषान् ॥ मनवे तल्पम् ॥ त्वष्ट्रेऽजां ॥ पूष्णे निताः ॥
निर्ऋत्या अश्वतरगर्दभौ ॥ हिमवते हस्तिनम् ॥ गंधर्वाप्सरोभ्यः स्रगलंकरणे ॥ विश्वेभ्यो देवेभ्यो धान्यम् ॥ वाचेऽन्नम् ॥ ब्रह्मणे
ओदनम् ॥ समुद्राय अपः ॥ उत्तानायाङ्गिरसायानम् ॥ वैश्वानराय रथमिति ॥ विष्णुधर्मोत्तरे ॥ अभयं सर्वदेवानां भूमिर्वै विष्णु
देवता ॥ कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्तिताः ॥ तथा चैकशफं सर्वं कथितं यमदैवतम् ॥ महिष्याश्च तथा याम्या उष्ट्र
वै नैर्ऋतो भवेत् ॥ रौद्री धेनुर्विनिर्दिष्टा छागमाग्नेयमादिशेत् ॥ मेषं तु वारुणं विन्द्याद्वराहं वैष्णवं तथा ॥ आरण्याः पशवः स
र्वे कथिता वायुदेवताः ॥ जलजान्यपि सर्वाणि वारिधानी कमण्डलुं ॥ कुंभं च करकं चैव वारुणानि निबोधत ॥ जलोद्भूता
नि सर्वाणि वारुणानि द्विजोत्तमाः ॥ आग्नेयं कनकं प्रोक्तं सर्वलोहानि चाप्यथ ॥ प्राजापत्यानि सस्यानि पक्वान्नमपि वै द्विज
ज्ञेयास्तु सर्वगंधा वै गांधर्वाश्च विचक्षणैः ॥ बार्हस्पत्यं तु वासः स्यात्सौम्या ज्ञेयास्तथा रसाः ॥ पक्षिणश्च तथा सर्वे वायव्याः प
रिकीर्तिताः ॥ विद्या ब्राह्मी विनिर्दिष्टा विद्योपकरणानि च ॥ सारस्वतानि देयानि पुस्तकादीनि पंडितैः ॥ सर्वेषां शिल्पिभांडा
नां विश्वकर्मा तु देवता ॥ द्रुमाणामथ पुष्पाणां शाकैर्हरितकैः सह ॥ फलानामपि सर्वेषां तथा स्याद्वनस्पतिः ॥ मत्स्यमांसेवि

॥ दान ॥ ॥ ४५ ॥

निर्दिष्टे पाजापनेन तथैव च ॥ छत्रं कृष्णाजिनं शय्या रथमासनमेव च ॥ उपानहौ च यानं च यच्चान्यत्प्राणवर्जितम् ॥ नतु चाङ्गिरस
त्वेन प्रतिगृह्णीत मानवः ॥ भूरेपयोगि नक्षं वा शस्त्रं वर्मध्वजादिकम् ॥ रणोपकरणं सर्वं विज्ञेयं सर्वदैवतम् ॥ गृहं तु सर्वदे
वत्यं यदनुक्तं द्विजोत्तम ॥ विज्ञेयं विष्णुदेवत्यं सर्ववेदविदसत्तमाः ॥ ॥ इति उक्तदेवता ॥ ॥ दानवस्तुग्रहणे विशेषोपि तत्रैव
मन्त्रैः प्रतिग्रहं कुर्याद्भूमिं कुर्वन्प्रदक्षिणाम् ॥ करे गृहीत्वा कन्यां तु दासदास्यौ द्विजोत्तमाः ॥ करं तु हृदि विन्यस्य धर्मज्ञेयः प्रतिग्रहः
आरुह्य तु गजं प्रोक्तं कर्णे चाश्वस्य कीर्तितः ॥ तथा चैकशफानां तु सर्वेषां तु विशेषतः ॥ तथा कर्णे ॥ प्रतिगृह्णीत नान्यत्र केशपु
च्छे कृष्णाजिनं तथा ॥ नानेकशफान् ॥ अत्रश्रृङ्गिणामेकशफानां पृष्ठे इतरेषां कर्णे इति व्यवस्था ॥ कर्णोऽजः पशवः सर्वे ग्राह्याः
पुच्छे विचक्षणैः ॥ गृह्णीयान्महिषं पृष्ठे खरं वै पृष्ठदेशतः ॥ प्रतिगृह्य तथोष्ट्रस्य नानां चाधिरोहणात् ॥ बीजानां तु मुष्टिमादाय
रत्नान्यादाय सर्वतः ॥ वस्त्रं दशान्तादादद्यात्परिधायाथवा पुनः ॥ आरुह्योपानहौ मंच मारुह्यैव तु पादुके ॥ वर्मध्वजौ तु संस्पृश्य प
विशेत्तु तथा गृहम् ॥ अवतीर्य वसं वापीजलस्थानानि वै द्विजाः ॥ ईशायां तु रथो ग्राह्यः पश्चाच्चन्द्रकेन तथैव च ॥ उमां च प्रतिगृह्णीयात्मूल
न्यस्य करे द्विजः ॥ आरुह्य धानि समादाय तथा पुच्छा विभूषणानि तु ॥ परिधिश्वेतनु ॥ प्रतिगृह्णीत गां पुच्छे करेणीं वा हस्तिनं करे ॥ मूर्ध्नि
दासीमजं चैव पृष्ठे श्वानरगर्दभौ ॥ अश्वं कर्णे सटे वापि अन्नं तु हिरण्यधारयेत् ॥ शय्यासनं गृहं क्षेत्रं संस्पृश्यादाय काञ्चनम् ॥ उष्ट्रं च
ककुदे स्पृष्ट्वा मृगांश्च महिषादिकान् ॥ गोधामश्वविधानेन पुच्छे संस्पृश्य पक्षिणः ॥ दंष्ट्रिणो दंष्ट्रिणश्चैव तथा पुच्छे मृगांश्चये

45
॥ दान ॥ ॥ ४५ ॥

ओजस्विनां च सर्वेषामेव मेवविधिः स्मृतः ॥ छत्रं च चामरं मूले फलं संगृह्य गोरवात् । प्रगृह्योयानसेमंत्रं वाचयेत्सुनिमुच्यते ॥
वासस्त्वथ समादाय कन्यां शीर्ष्यं यथैव केरे । रतिभार्यांपरां पूर्वां प्रतिगृह्णीनचाक्षनाम् ॥ प्रत्तमुत्संगमारोप्य प्रतिगृह्णीनदंनकम् ॥
रथं रथमुखे स्पृष्ट्वा प्रतिगृह्णीनकूरवे ॥ कूबरोयुगाधारं काष्ठं । युग्यकां च नवस्त्राणां नागशक्ति प्रतिग्रहः ॥ इति सनवस्तुग्रहणम् ॥
स्यन्दर्थं श्लोकाश्च । गोरूपो हिमवान् गजस्सकथितो वाचस्पतिर्वासुकी नागस्तुरगश्छिडेकशफयोर्खस्यंनथा चन्दनं । प्रोक्तः
सिंधुरपां वराहश्चरयोर्विष्णुः प्रजानां पतिर्नूर्वीक्षत्रपलाधसामथरविसामूरसयोम्योरसः ॥ १ ॥ पाशी मेषजलाशयाद्विजघन
दीनामसेभैरवोवायव्यामृगपक्षिरोऊनवरोजांवृनदजाययसा ॥ विद्यायास्तु सरस्वती निगदिता ३ लंकारगंधस्त्रजां गंधर्वाप्स
रसो वनस्पतिरसो पुष्पादिपुकश्चारिवना ॥ २ औन्नानां गिरसौ रथादिशयन छत्रासनोयानहाम्मं चश्चामरसंयुतो ३ ध्वनिखि
लावर्म्मास्त्रशस्त्राणि यान् ॥ भांडस्थानि विचित्रितस्सभुवनेयो विश्वकर्मोच्यते सोस्माभिर्मुनिसम्मतेनकथितास्तेषामम् देव
ताः ॥ ३ ॥ मृष्टभूमेः प्रवरोत्वजैकशफयोः भृङ्गनथाभृङ्गिणां हस्तोवारणाकम्पयोरथकचोदाससस्पशस्सा अपि ॥ पुरुष्केपशुपक्षिणां
पिटपितो मूलं पविशाल पंथास्तेषानुरथस्पतीरगमनं वाप्यादिकानाम्मनम् ॥ ४ ॥ खड्गमन्त्रकपाडकादिवचनादारूपसंस्
त्रणां शय्यासनमंबरस्सच दशाउत्रसथां केकनः स्मृक्षावर्मसचामरध्वजमथान्येषांस्वघनांजनोविशाम्भारणामाचरेन्
रनलेस्यूलंतनुवस्तुस्पर्शेन ॥ ५ ॥ ॥ अथनानाद्रव्यदानमंत्राः ॥ हेमाङ्गोब्रह्मनरत्नाडेः धनपङ्करोनिदानारमिह लोके परत्र च । नस्मा

CC-0. In Public Domain. Digitization by eGangotri

॥रत्न॥
॥४६॥

स्पर्शयनेधान्यमतःशांतिंप्रयछमे॥ इतिधान्यमंत्रः॥ अन्नेनजायतेविश्वंप्राणिनांप्राणरक्षणं॥ तंदुलावैश्वदेवत्याःपाकेनान्नंभ
वंतिये॥ पावनाःसर्वयज्ञेषुहस्ताहोमकर्मणि॥ तस्मात्तंदुलदानेनप्रीयंतांविश्वदेवताः॥ तंदुलानां॥ यस्मादन्नमयाजम्बूद्वी
पगोधूमसंभवाः॥ गंधर्वसौख्यधनदाअतःशांतिंप्रयछमे॥ गोधूमानां॥ धान्यराजाश्चमांगल्याद्विजप्रीतिकरायवाः॥ तस्माद्दे
षांप्रदानेनममास्त्वभिमतंफलं॥ यवानां॥ मुद्गबीजानिवैयस्मात्प्रियाणिपरमेष्ठिनः॥ तस्माद्देषांप्रदानेनप्रीतिःसिध्यतुमे
सदा॥ मुद्गानां॥ यस्मान्मधुवधेकालेविष्णुदेहसमुद्भवाः॥ पितृप्रीतिकरामाषाअतःशांतिंप्रयछमे॥ माषाणां॥ पुराणेवर्णितो
द्वारसमयेहरिभक्षिताः॥ चणकाःसर्वपापघ्नाअतःशांतिंप्रयछमे॥ चणकाणां॥ अग्निवर्णोद्भवानामबलकीर्तिप्रवर्द्धनाः
कुलत्थाःसर्वपापघ्नाअतःशांतिंप्रयछमे॥ कुलत्थानां॥ तिलाःपापहराणित्यंविष्णोर्देहसमुद्भवाः॥ तिलदानेनसर्वंमेपापंनाश
यकेशव॥ तिलानां॥ तिलाःस्वर्णमयायुक्तादुरितक्षयकारकाः॥ विष्णुप्रीतिकराणित्यमतःशांतिंप्रयछमे॥ स्वर्णतिलानां॥
तिलाःपुराणाःपवित्राश्चसर्वकामकराःशुभाः॥ शुक्लाश्चैवतथाकृष्णाविष्णुगात्रसमुद्भवाः॥ यानिकानिचपापानिब्रह्महत्यास
मानिच॥ तिलपात्रप्रदानेनतानिनश्यंतुमेसदा॥ सहिरण्यतिलपात्रस्य॥ देवदेवजगन्नाथवांछितार्थफलप्रद॥ तिलपात्रंप्र
दास्यामितवांगेसंस्थितेरहं॥ स्वर्णादितिलपात्रस्य॥ अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः॥ अन्नंब्रह्माशिवस्त्राणांअस्तुमे
जन्मजन्मनि॥ अन्नस्य॥ चंद्रमंडलमध्यस्थंचशंखकुंदसमप्रभं॥ दध्यन्नंतस्यदानेनप्रीयतांवामनोमम॥ दध्यन्नस्य॥ दध्यन्नंसो

46
॥राम॥
॥४६॥

CC-0. In Public Domain. Digitization by eGangotri

पदंशांवचलविस्त्रशिवात्मकम्॥ प्रीयतां धर्मराजोहितृप्तानात्ममसर्वदा॥ सोपदंशदध्यन्नस्य॥ पानीयसहितंचैवसदध्योदनया
न्वकं॥ समर्पितंनवसफलंसदक्षिणंगृहाणमे॥ सपानीयदध्यन्नस्य॥ सर्वात्मासर्वलोकेशः सर्वव्यापीसनातनः॥ नारायणःप्रसन्न
स्यात्कृशरान्नप्रदानतः॥ कृशरान्नस्य॥ पायसंपरमानन्दंसर्वदानोत्तमोत्तमं॥ सर्वदादेवयोग्यंतुश्रेयःपुष्टिप्रयच्छतु॥ पायसान्न
स्य॥ केशवप्रीतिदाभक्ष्याःशंभुब्रह्मार्कतुष्टिदाः॥ पृथग्विधापूपकाद्यायच्छतुवलमीरसं॥ भक्ष्याणां॥ आदित्यतेजसोत्पन्नाःसर्वम
ङ्गलकारकाः॥ नरकाःसर्वपापघ्नाअनःशान्तिंप्रयच्छमे॥ मराङ्कनां॥ आदित्यतेजसाम्यक्तंज्ञानिश्रेष्ठकरंपरं॥ दत्तेनेमनविष
न्नंप्रतीद्याप्यनुत्तमं॥ अपूपान्नस्य॥ प्राजापत्यमायनःश्लोकासक्तोवोयज्ञकर्मणि॥ तस्मात्सक्तुप्रयच्छामिप्रीयतांमेप्रजापतिः॥ स
क्तूनां॥ अलक्ष्मीमरणंनित्यंनित्यंसौभाग्यवर्द्धनं॥ क्षीरंमङ्गलमायुष्यमनःशान्तिंप्रयच्छमे॥ दुग्धस्य॥ कामधेनोःसमुद्भूतं
विष्णोःप्रीतिकरंपरं॥ नवनीतंप्रदास्यामिवलंपुष्टिंचदेहिमे॥ नवनीतस्य॥ कामधेनोःसमुद्भूतंदेवानामुत्तमंहविः॥ आयु
र्विवर्द्धनंदातुराज्यपातुसदैवमां॥ आज्यस्य॥ यालक्ष्मीर्यच्चमेदोस्यंसर्वगात्रेव्यवस्थितं॥ तत्सर्वंशमयाज्यंत्वंलक्ष्मींपुष्टिंचव
र्द्धय॥ आरोग्यार्थाज्यस्य॥ आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंपरम्॥ आज्यंसुराणामाहारआज्येदेवाःप्रतिष्ठिताः॥ पापक्षया
र्थाज्यस्य॥ तैलंपुष्टिकरंनित्यमायुष्यंयापनाशनं॥ अमांगल्यहरंपुण्यमनःशान्तिंप्रयच्छमे॥ तैलस्य॥ अमृतसकुलोत्पन्नाश्चशु
धारानिर्ज्झरा॥ सूर्यप्रीतिकरानित्यमनःशान्तिंप्रयच्छमे॥ शर्कराया॥ मनोभवधनुर्मध्यादुद्भूताशर्करावनि॥ तस्मादस्यप्रदाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ ४७ ॥

नममसंतुमनोरथा॥ खण्डस्य॥ प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा। तथारसानांप्रवरःसदैवेक्षुरसोमतः। ममतस्मात्परांशां
तिंददस्वखण्डसर्वदा॥ गुडस्य॥ इक्षुदंडंमहापुण्यंरसालंसर्वकामदं। तुभ्यंददामितेनाम्नाप्रीयतांपरमेश्वरः॥ इक्षोः॥ यस्मात्त्वत्र
णांश्रादेत्वंपीतंमध्वमृतोद्भवं॥ तस्मात्त्वंबहुदानेनरक्षमांदुःखसागरात्॥ मधुनः॥ वारिपूर्णाघटोयेतंदेवत्रयमयंयतः। प्री
यतांधर्मराजस्तुदानेनानेनपुण्यदः॥ उदकुंभस्य॥ यमायमतंनितिविश्वेशंविश्वनाथस्तमास्तुतं। विघ्नेश्वरदक्षिणवरतुभ्यंददाम्य
भीतिदं॥ गणेशप्रतिमायाः॥ ददामिभानुंभवतेसर्वोपस्करसंयुतम्॥ मनोभिलषितावाप्तिंकरोतुममभास्करः॥ सूर्यमूर्तेः॥
त्वयासुराणाममृतंविशायहालाहलंसंहृतमेवयस्मात्। तथासुराणांत्रिपुरंचदग्धमेकेषुणालोकहितार्थमीश॥ त्वद्रूपदा
नादहमप्यदोषोदोषैर्वियुक्तःसुगुणान्वयश्च॥ तथाकृतंत्वंशरणोपपन्नमपिप्रभोदेववरप्रसादं॥ शिवमूर्तेः॥ प्रसीदतुभवो
नित्यंकृत्तिवासामहेश्वरः। पार्वत्यासहितोदेवोजगदुत्पत्तिकारकः॥ उमामहेश्वरयोः॥ शिवशक्त्यात्मकंयस्माज्जगदेतच्चराचरं
तस्मादनेनसर्वंमेकरोतुभगवान्शिवः॥ कैलाशवासीगौरीसोभगवान्भगनेत्रभित्॥ चराचरात्मकोलिंगरूपीदिशतुवांछि
तं॥ लिंगस्य॥ इदंमारकतंलिंगंरौप्यपीठसमन्वितं। धान्यैर्दशभिर्युक्तंरत्नकादशफलान्वितं॥ संप्रदत्तविधानेनयथोक्तफ
लमस्तुमे॥ मरकतलिंगस्य॥ काश्मीरलिंगपक्षेतुइदंकाश्मीरजमितिवदेत्॥ महाकोशनिवासेनचक्राथेश्वरयशोभितं॥ अस्य
देवप्रदानात्तुममसंतुमनोरथाः॥ आलयाख्यस्य॥ महाकोशनिवासत्वंमहादेवोमहेश्वरः॥ प्रीयतांतवदानेननमःशांतिंप्रयच्छ

47
॥ राम ॥
॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मे ॥ शिवनामस्य ॥ शंकुकर्णः प्रलंबोष्ठ लंबभ्रू दीर्घनासिक ॥ अष्टनेत्रचतुर्वक्त्र विस्तीर्णास्य जयोजन ॥ च्यनिपातनमस्तेस्तु सोमसूर्य
स्तु नयनो ॥ यद्दनादिक्कनं किंचिन्न दृक्षयामिशस्तु मे ॥ च्यनीयानस्य ॥ विध्वंसनुदनमस्तेस्तु सिंहिकानन्दनाव्ययः ॥ दानेनानेन नाग
स्यरक्षमां वेध्वजाद्भ्यात् ॥ स्वर्णनागस्य ॥ जन्मान्तरसहस्त्रेषु यत्कृतं दुरितं मया ॥ स्वर्णपात्रप्रदानेन शांतिरस्तु सदा मम ॥ स्वर्ण
पात्रस्य ॥ त्वहुद्भवीजगगत्सर्वस्तुर्वेधसो हेमपंकज ॥ यमावास हरेर्नाभिजा नमो पाहि मर्दरा ॥ स्वर्णपद्मस्य ॥ कांतारवनदुर्गेषु चौ
रव्यालाकुलेयधि ॥ सिंहकाष्ठनहिंसंतु सिंहदानप्रभावतः ॥ स्वर्णसिंहस्य ॥ हिरण्यगर्भसंभूतं सौवर्णं चांगुलीयकं ॥ धर्मप्रदं प्र
यच्छामि प्रीयतां कमलापतिः ॥ अंगुलीयस्य ॥ कांचनं हस्तवलयं रूपकांतिसुखप्रदं ॥ विभ्रष्वर्णाप्रदस्यामि विभूषयतु मां सदा ॥ व
लयस्य ॥ क्षीरोदमथनोद्भूतं तद्भूतं कुंडलद्वयं ॥ श्रियासहसमुद्भूतं ददे श्रीः प्रीयतां मम ॥ कुंडलस्य ॥ अगम्यागमनं चैव परदाराभि
मर्शनं ॥ रौप्यपात्रप्रदानेन तानि नश्यंतु मे सदा ॥ रौप्यपात्रस्य ॥ अन्तरेषु समुद्भूतं रजतं पितृवल्लभं ॥ तस्मादस्य प्रदानेन रुद्रः सं
प्रीयतां मम ॥ रजतस्य ॥ परापवादपैशुन्याद् भक्षस्य चक्षणात् ॥ तन्त्रजातं च यत्पापं ताम्रपात्रात्प्रणश्यतु ॥ ताम्रपात्रस्य ॥ पा
नियापानि काम्यानि कामोक्तानि कृतानि वै ॥ कांस्यपात्रप्रदानेन तानि नश्यंतु मे सदा ॥ कांस्यपात्रस्य ॥ यानि पापान्यनेकानि मया पा
पकृतानि च ॥ लोहपात्रप्रदानेन तानि नश्यंतु सर्वदा ॥ लोहपात्रस्य ॥ यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः ॥ तथा शांतिं प्रय
च्छंतु रत्नदानेन मे सुराः ॥ रत्नमन्त्रः ॥ ताम्रपर्णपर्णवोमन्त्रावर्णाख्याः कल्पवर्णिताः ॥ मुक्ताश्रृक्तेसुद्भवाः संतु भुक्तिमुक्तिप्रदा मम

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ४८ ॥

म॥ भूमिमंत्रः॥ यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीं॥ दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह॥ भुवः॥ सर्वभूताश्रया भूमि
र्वराहेण समुद्धृता॥ अनन्तसस्यफलदा अतः शान्तिं प्रयच्छ मे॥ सस्यमन्त्रः॥ सदा रोहन्ति बीजानि फलाकृष्टे महीतले॥ तस्मात्प्रदा
नात्सकला मम सन्तु मनोरथाः॥ कृष्णक्षेत्रस्य॥ इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतं॥ तव विप्र प्रदानेन ममास्त्वभिमतं फलं
गृहस्य॥ समाश्रयं प्रयच्छामि प्रीयतां मे जगन्निधिः॥ आश्रयस्य॥ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश॥ यस्मात्तस्माच्छिवं मे
स्यादिह लोके परत्र च॥ गोः॥ यमद्वारे महाघोरे या सा वैतरणी नदी॥ तां तर्तुकामो यच्छामि कृष्णां रसमुखे नमां॥ वैतरण्याः
यस्मात्त्वं पृथिवी सर्वा धेनुर्वै सवसन्निभा॥ सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे॥ तिलधेनोः॥ भूम्यन्नकानीषहतस्य मुखो
त्कानि विहरन्त्ये॥ तुभ्यं संप्रदे देवानां गां समुत्कानि संज्ञितां॥ जलधेनोः॥ इन्द्रादिलोकपालानां या राजमहिषी शुभा
महिषीदानमाहात्म्यात्सास्तु मे सर्वकामदा॥ धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः॥ महिषासुरस्य जननी सास्तु मे सर्व
कामदा॥ महिष्याः॥ महिषीवत्ससंयुक्तां सुशीलां च पयस्विनीं॥ रक्तवस्त्रेण पुष्पेण दत्वा मृत्युं जयेन्नरः॥ मृत्युमहिष्याः॥ वाङ्मनः
कायजं नित्यं यत्किंचिन्मम दुष्कृतं॥ तत्सर्वं विलयं यातु त्वद्दाने नोयसे विनं॥ मेष्याः॥ रोमत्वक्प्रासमज्जाद्यैः सर्वोपकरणैः स
दा॥ जगतः संग्रहत्नोसि त्वामतः प्रार्थयेप्सितम्॥ मेषस्य॥ देवानां योमुखं हव्यवाहनः सर्वपूजितः॥ तस्मात्त्वं वाहनं पूज्यं देवैः
सेन्द्रैर्महर्षिभिः॥ अग्निमांद्यं पूर्वकर्मविपाकोत्थं तु यन्मम॥ तत्सर्वं नाशयाशु त्वं जठराग्निं विवर्द्धय॥ मेषस्य॥ त्वं पर्वतलगा

48
॥ रत्न ॥
॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुस्तापवित्रां भवनीं परां ॥ त्वमस्मन्नोस्थिनायत्तास्तु नस्मा छांतिकराभव ॥ अजायाः ॥ गौरीं कन्यामिमां विप्र यथाशक्तिविभूषितां ॥ गोत्राय श
र्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ कन्यायाः ॥ इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता ॥ नवकर्मकरी भोग्याय थे हं भद्रमस्तु ते ॥ दास्याः
यस्माद्दशमत्वं शयनं केशवस्य शिवस्य च ॥ शय्याममाप्यभूत्यास्तु तस्माज्जन्मनि जन्मनि ॥ शय्यायाः ॥ देवदेवजगन्नाथ विश्वात्मन्
न्नयानया ॥ प्रभोसि विकया देवधीनो भव जनार्दन ॥ शिविकायाः ॥ रथाय रथनाथाय नमस्ते विश्वकर्मणे ॥ विश्वभूताय नाथा
य अरुणाय नमो नमः ॥ रथस्य ॥ कंटकोद्भिदपाषाणादृश्चिकादिनिवारणे ॥ पादुके संप्रदास्यामि विप्रधीमन् प्रगृह्यतां ॥ पादु
कयोः ॥ उपानहौ प्रदास्यामि कंटकादिनिवारणे ॥ सर्वस्थाने सुखदायनः शांतिं प्रयच्छ मे ॥ उपानहोः ॥ इलमुत्तानपत्राकु
रु केशव मे प्रभो ॥ छत्रं त्वत्तीनये दत्तं ब्रासरणायमयाभुभम् ॥ छत्रस्य ॥ कमंडलुर्जलैः पूर्णः स्वर्णगर्भः सुलक्षणः ॥ अर्पित
स्ते मया सेन प्रसभस्तेन मे भव ॥ कमंडलोः ॥ शशांककरसंकाश हिमडिंडीरपांडुर ॥ प्रोत्तारणात्सुदुरितं चामरामरवल्लभ ॥ चामरस्य ॥ प
त्रिका सर्वजंतूनां सेन्यानन्दकरी शुभा ॥ पित्तॄणां तृप्तिदा नित्यमनः शांतिं प्रयच्छ मे ॥ व्यजनस्य ॥ दर्शनेनन्त्वया दर्शनृणां मंगलदाय
कः ॥ सौर्यसौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव ॥ दर्पणस्य ॥ भगवन् भूलहस्तेश दक्षाध्वरविनाशन ॥ नवायुधधारनेन भूलं न स्यं
तु मे सदा ॥ भूलस्य ॥ सर्वग्रहर्क्षनारेश सर्वेश त्वं हि भास्कर ॥ संक्रांतिभूतदोषं मे निवारय दिवाकर ॥ संक्रांति भूलस्य ॥ त्वं देवा
नां मनुष्याणां रक्षसामायुधावसि ॥ तस्मात्सर्वप्रयत्नेन शांतिर्भवतु सर्वदा ॥ आयुधस्य ॥ सोमो द्रवति दारुणि जानवे दसियानिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मां देवांश्च दानेन श्रियं देहि विभावसो ॥ काञ्चनं ॥ सारत्वं सर्वलोकानां लज्जायां रक्षणं परं ॥ सुवेषधारि त्वं यस्मात् अतः शान्तिं प्रयच्छ
मे ॥ वस्त्रस्य ॥ रक्तवस्त्रयुगं यस्मात् दिनेशस्य प्रियं सदा ॥ प्रदानादस्य मे सूर्य अतः शान्तिं प्रयच्छ मे ॥ रक्तवस्त्रयुग्मस्य ॥ धर्मराजेन विधृ
तं कृष्णवस्त्रं सुशोभितं ॥ सर्वक्लेशविनाशाय कृष्णवस्त्रं ददाम्यहं ॥ कृष्णवस्त्रस्य ॥ और्णं पट्टमनुध्येयं स्वर्णवीजं नवप्रभो ॥ दत्तं गृह्ण
ण देवेशाय संहरस्व त्वरं ॥ और्णमेव समुत्पन्नं शीतवातभयापहं ॥ यस्मात्तु धारणाद्वीस्यादतः शान्तिं प्रयच्छ मे ॥ ऊर्णायाः ॥ ब्रह्मसूत्रं
मसृदिव्यं मयायत्नेन निर्मितं ॥ ब्राह्मजन्मा सुमे देवब्रह्मसूत्रप्रदानतः ॥ उपवीतस्य ॥ अष्टाविंशति संख्याकै रुद्राक्षैर्योजिताम
या ॥ अर्पितानव हस्ते च गृहाण सुरसेव्य ॥ अक्षमालायाः ॥ सर्वविद्याश्रयं ज्ञानकरणं ललिताक्षरं ॥ पुस्तकं संप्रयच्छामि प्रीता भवतु
भारती ॥ पुस्तकस्य ॥ कर्पूरः कदलीभूतो देवदेवप्रियः सदा ॥ भाग्योत्तमो नृपाणां च तद्दानात्सुखमस्तु मे ॥ कर्पूरस्य ॥ जयमंसुभ्रवां
देवी मेणनाभिसमुद्भवां ॥ भक्त्या हं संप्रयच्छामि मम संतु मनोरथाः ॥ गंधद्रव्यस्य ॥ नन्दनावासमन्दारसखे हन्दारकार्चित ॥ चं
दनत्वन्मयासादरे सांज्ञानंद्रव्यदो भव ॥ चन्दनस्य ॥ श्रीखण्डागुरुकर्पूरकस्तूरीकुंकुमान्वितम् ॥ विलेपनं प्रयच्छामि सौख्यमस्तु स
दा मम ॥ चंदनाद्यनुलेपनस्य ॥ समस्तेभ्योपि वस्तुभ्यः संस्तुतासि सुरासुरैः ॥ त्रिमस्तां गेषु कस्तूरी सुखदास्तु सदा मम ॥ कस्तूर्याः
कंदर्पदर्पदं यस्मात्कर्पूरं धारणात्परं ॥ अहर्यनिभवलायः त्वद्दानादपसर्पतु ॥ कर्पूरस्य ॥ यदम्बुरंगसलग्नं कुंकुमादि विलेप
नं ॥ जलक्रीडासु गोपीनां वारवन्यां जलार्पितं ॥ गोपीचन्दनमित्युक्तं मुनीन्द्रैः कल्मषापहं ॥ तस्मादस्य प्रदानेन विष्णुर्दिशतु वाञ्छितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गोपीचन्दनस्य॥ मणिकांचनपुष्पाणि मणिमुक्तामयानि च॥ तुलसीपत्रदानस्य कलां नार्हन्ति षोडशीं॥ तुलसीपत्रदानाद्वा ब्रह्मण:
कायसंभवं॥ पापं प्रशमनमायातु सर्वसंतु मनोरथाः॥ जलस्य:॥ ह्लादयं निर्मनीयस्मान्न स्मात्तु मनसः स्मृताः॥ दत्तादद स्तु मे नित्य
मया ह्लादं समनीप्सियम्॥ पुष्पस्य॥ इदं फलं मया विप्र स्थापितं पुरतस्तव॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥ ॥फलस्य
ब्रह्म इत्यादि पायघ्नं ब्रह्मणा निर्मितं पुरा॥ कूष्माण्डबहुबीजाढ्य मनःशान्तिं प्रयच्छ मे॥ ॥कूष्माण्डस्य॥ ॥ताम्बूलं श्रीकरं भद्रं
ब्रह्मविष्णुशिवात्मकम्॥ चूर्णेन चूर्णपात्रेण कर्पूरपिष्टकेन च॥ सपूगखण्डनं दिव्यं गन्धर्वाप्सरसां प्रियं॥ करकत्वं निराणं कं
कुरुष्व त्वं प्रसादनः॥ ॥ताम्बूलकरण्डस्य॥ लक्ष्मी प्रिया च लक्ष्मीदा लक्ष्मी च वसनप्रिया॥ सौभाग्यकृद्दन स्त्रीणां हरिद्रा श्रीप्र(
दास्तु मे॥ ॥हरिद्राया:॥ जगन्नो जायते यस्मान्मण्डनं शुभकर्मसु॥ तस्माज्जीरकदानेन प्रीयतां गिरिजा मम॥ जीरकस्य॥ कंचु(
कीवस्त्रयुग्मेभ्यस्तथा कर्णावतंसकैः॥ कण्ठसूत्रैश्च भूषाभिः प्रीयतां गिरिनन्दिनी॥ ॥सौभाग्यद्रव्यसंपुटकस्य॥ रामयन्निमहाभा
गे पुराणमूर्तिर्निरामये॥ गृहाणेमानि सूर्याणि मया दत्तानि जानकि॥ ॥सूर्यस्य॥ तद्वय हदक्षिणादानमंत्रा पठ्यन्ते यंत भू
नास्तथापि पूर्वोक्तग्रहर्षाणि प्रकरणोपयोगित्वाद्ध्यानवाक्यपूर्वकं मात्स्यानुसारेणोच्यन्ते॥ तथाहि ग्रहर्षाणि कर्त्ता यजमानः आ(
चार्यादिभिरभिषिक्तोऽस्मैः पश्चाद्धुर्यविस्तउदङ्मुखेभ्य आचार्यर्त्विग्भ्यो दक्षिणान्दद्यात्॥ तत्र प्रथमं सूर्यप्रीत्यै कपिलादानं॥ देय
ब्राह्मणो त्रिः संपूज्य॥ देयं कुशजलेन प्रोक्ष॥ कुशाद्यवतिलजलान्यादाय॥ अद्येत्यादि देशकालौ स्मृत्वा कृतैतन्नवग्रहयज्ञप्रतिष्ठा

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ५० ॥

र्थमिमांकपिलांधेनुंगांरुद्रदेवतांसूर्यपीतनयेमुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणांतुभ्यमहंसंप्रददे ॥ ॐकपिलेसर्वदेवानां
पूजनीयासिरोहिणी ॥ तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमे ॥१॥ ब्राह्मणश्च ॥ ॐस्वस्तीस्तुस्काकोदादितिकामस्तुतिंपठेत् ॥ त
तोनेनैवप्रकारेणदेवताभिधानपुरःसरंसोमायसप्तद्रदेवतद्रव्यंदद्यात् ॥ नत्रमंत्रः ॥ ॥ ॐपुण्यस्त्वंशंखपुण्यानांमङ्गलानांचम
ङ्गलम् ॥ विष्णुनाविधृतोनित्यमतःशांतिंप्रयच्छमे ॥ भौमायरुद्रदेवतंवृषभम् ॥ धर्मस्त्वंवृषरूपेणजगदानन्दकारकः ॥ अष्टमूर
र्तेरधिष्ठानमतःशांतिंप्रयच्छमे ॥२॥ बुधायहिरण्यम् ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनन्तपुण्यफलदःमतःशांतिंप्र
यच्छमे ॥ ४ ॥ बृहस्पतयेपीतवस्त्रंबृहस्पतिदेवतम् ॥ पीतवस्त्रयुगंयस्माद्वासुदेवस्यवल्लभम् ॥ प्रदानात्तस्यमेविष्णुःप्रीयतांसर्वका
रणः ॥ ५ ॥ शुक्रायश्वेतमश्वंयमदेवतम् ॥ विष्णुस्त्वमश्वरूपेणयस्मादमृतसंभवः ॥ चन्द्रार्कवाहनंनित्यमतःशांतिंप्रयच्छमे ॥
६ ॥ शनैश्चरायरुद्रदेवत्यांगाम् ॥ यस्मात्त्वंपृथिवीसर्वाधेनोकेशवसंनिभा ॥ सर्वपापहरानित्यमतःशांतिंप्रयच्छमे ॥७॥ राहवेन
लनैरृतदेवतंलोहम् ॥ यस्मादुग्राणिकर्माणितदाधारणीसर्वदा ॥ हेलोहलाङ्गलादीनितस्माच्छांतिंप्रयच्छमे ॥८॥ केतुभ्योग्निदै
वतंछागम् ॥ यस्मात्त्वंसर्वयज्ञानामङ्गत्वेनव्यवस्थितः ॥ यानंविभावसोर्नित्यमतःशान्तिंप्रयच्छमे ॥९॥ इति ॥ सर्वाश्चदक्षिणाः
सूर्यसमानदक्षिणाज्ञातव्या ॥ तेनसोमायशङ्खंदत्वाकपिलागोमूल्यंसुवर्णंशङ्खमूल्यमूनंदद्यात् ॥ सर्वंन्यूनस्थलेसर्वत्रसू
र्यदक्षिणासमाकार्या ॥ सूर्यादिग्रहेभ्यःसुवर्णभूषितामेकैकांगांसुवर्णसमानंवादद्यात् ॥ सुवर्णेनसमाकार्यायजमानेनदक्षिणा

50

॥ राम ॥
॥ ५० ॥

सर्वे यामथवा गावो दातव्या हेमभूषिताः ॥ सुवर्णमथवा दद्याद्गुरुर्वा येन तुष्यति ॥ एवमन्ते गोप्रदानयाः सर्वाः सर्वत्र दक्षिणा ॥ इत्युक्ते ॥ ए
वं दानं दत्वा ॥ ब्राह्मणानपि भोजयेत् ॥ नववाक्यम् ॥ ॐ अद्येत्यादि अमुकाहमस्य नवग्रहमखस्य यथावत्फलप्राप्त्यर्थं नानानामगोत्रान्नाना
नामग्नीन् नानावेदाध्यायिनो ब्राह्मणान् यथोपपन्नेनान्नेन यथाकालं भोजयिष्ये इति ॥ आमान्नपक्षे यथोपपन्नेनामान्नेन तोषयि
ष्ये इति ॥ इदमामान्नं ब्राह्मणेभ्यो दातुमहं सम्प्रददे इति वा संकल्पः ॥ एवमेव भूयसीं दक्षिणां दद्यात् ॥ नववाक्यम् ॥ ॐ अद्येत्यादि नाना
वेदाध्यायिभ्यो नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथाशक्ति भूयसीं दक्षिणां दातुमहं समुत्सृजे सम्प्रददे इति वा भूयसीं द
क्षिणां दद्यात् ॥ इति नानाप्रदानमन्त्राः ॥ ॥ अथ गोदानप्रकरणम् ॥ दानवाक्ये गोदानप्रशंसा ॥ देवदेवं नमस्कृत्य सर्वविघ्नप्रणा
नम् ॥ वक्ष्ये सद्गुरुणा दिष्टं गोदानं फलसंस्मृतम् ॥ १ ॥ तत्र ॥ तरुणीं रूपसम्पन्नां सुशीलां च पयस्विनीम् ॥ सवत्सां गां समानीय ब्रा
ह्मणाय निवेदयेत् ॥ २ ॥ वृद्धा सरोगा गौ गाहीनाङ्गी वन्ध्या दुष्टा मृतप्रजा ॥ दूरस्था न्यायलब्धा या न देया ब्राह्मणाय गौः ॥ ३ ॥ सीदन्ते वत्सभु
क्त्या यस्यां त्रियायां हि नान्नये ॥ अतिथिप्रियाय दानाय धेनुं दद्याद्द्विजातये ॥ ४ ॥ भोगप्रसौख्यप्रदा श्वेता धूम्रा या पापनाशिनी ॥ कृष्णा स्वर्ग
प्रदा प्रोक्ता गौरी च कुलवर्द्धिनी ॥ ५ ॥ धूम्राक्षी सुखदा ज्ञेया पीता दारिद्र्यनाशिनी ॥ पाटला पुत्रदा प्रोक्ता नीला धर्मप्रवर्द्धिनी ॥ ६ ॥ कपिला
सर्वपापघ्नी नानावर्णा च मोक्षदा ॥ सुवर्णेन प्रकर्तव्यम्मण्डलं शृङ्गयोर्द्वयोः ॥ ७ ॥ एकैकस्मिन् प्रदेशे जनैर्यत्र खुरमण्डनम् ॥ ताम्रपृ
ष्ठप्रमाणान्तु पश्चाद्रौप्यलसंख्यया ॥ ८ ॥ नददेन्नप्रमाणेन कर्तव्यं कांस्यदोहनं ॥ गोदानस्य प्रतिष्ठार्थं स्वर्णमेकं प्रतिष्ठितम् ॥ ९ ॥ भूर्णी

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ५१ ॥

शृंगी ताम्रपृष्ठी सुशीला वस्त्रसंयुता ॥ सकांस्यरौप्याधानव्याक्षीरिणी गौः सदक्षिणा ॥१०॥ दानेन स्वर्गमाप्नोति वत्सरान् रोमसम्मितम् ॥ क
पिला चोन्नारयति पितृन्वै कुलसप्तकम् ॥११॥ इति ॥ गोमयोपलिप्तभूमौ गोदाननिमित्तं ब्राह्मणपूजनमहं करिष्ये इति संकल्प्य ॥ ॐ
नमोस्त्वनन्ताय सह ॥१॥ ॐ नमो ब्रह्मण्यदेवाय० ॥२॥ ॐ युञ्जन्ति ब्रध्नं ॥३॥ ॐ अक्षन्नमीमदन्त ॥४॥ इति मंत्रैर्गन्धपुष्पाक्षतादिभिर्ब्राह्म
णं समभ्यर्च्य ॥ अमुकमासे इत्यादि ॥ अमुकगोत्रो ऽमुकशर्मा ऽमुकगोत्रममुकशर्माणममुकवेदाध्यायिनमेभिस्ताम्बूलस्त्रक्चन्द
नवस्त्रादिभिः गोदानजनितश्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामो गोगृहीतृत्वेन त्वामहं वृणे इति वृणुयात् ॥ वृतोस्मीति प्रतिव
चनं ॥ ॐ व्रतेन दीक्षाम्० ॥१॥ यदर्चनं कृतं विप्र नवविष्णुस्वरूपिणा ॥ तत्सर्वं मम दानस्य विष्णवे निसमर्पणम् ॥२॥ ॐ गावो य
ज्ञाः प्रवर्तन्ते गोभ्यो देवाः समुत्थिताः ॥ गोभिर्वेदाः समुत्कीर्णाः सषडङ्गपदक्रमाः ॥३॥ इति प्रार्थयित्वा ॥ कलशस्थापनविधिना कल
शं संस्थाप्य वरुणं पूजयित्वा ॥ गणपतिं पूजयेत् ॥ नवैव ॥ वृषणेनमत्रति ब्रह्मपूजनम् श्रीश्च सरस्वती यो मां ॥ इति मन्त्राभ्यां ल
क्ष्मीसरस्वत्योर्गन्धपुष्पधूपादिना पूजां विधाय गोपूजां कुर्यात् ॥ प्राङ्मुखीं गामवस्थाप्य वत्सयुक्तां तोमसेत् ॥ दानात्पूर्वमुदङ्मुखस्तिष्ठन्म
नियाहीउदङ्मुखः ॥१॥ या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥२॥ गवाग्रपादाभ्यां न
मः ॥ देहस्था वैव या देवी रुद्राणी शंकरप्रिया ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥३॥ गोमुखाय नमः ॥ विष्णोर्वक्षसि या ल
क्ष्मीः स्वाहा चैव विभावसोः ॥ चन्द्रार्कशक्रशक्तिर्या धेनुरूपा तु सा श्रिया ॥४॥ गोशृङ्गाभ्यां नमः ॥ चतुर्मुखस्य या लक्ष्मीर्या धेनुर्धनदस्य

51
॥ राम ॥
॥ ५१ ॥

CC-0. In Public Domain. Digitization by eGangotri

व॥ या लक्ष्मीर्लोकपालानां सा धेनुर्वरदास्तु मे॥ ५ ॥गोपुच्छायनमः॥ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजस्तथा॥ सर्वपापहरा धेनुस्तस्माच्छान्तिं प्र
यच्छ मे॥ ६ ॥गोपुच्छायनमः॥ ततो गंधपुष्पाक्षतादिभिः पूजयेत्॥ ॐ गोभ्यो नमः॥ ॐ श्रीमतीभ्यो नमः॥ ॐ सौरभेयिभ्यो नमः॥ ॐ ब्रह्मसुताभ्यो न
मः॥ ॐ पवित्राभ्यो नमः इति॥ ॐ वनस्पतिरसो दिव्यो गंधाढ्यः सुमनोहरः॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतामू॥ इति धूपं दद्यात्॥ १॥
आनन्दः सर्वलोकानां देवानामपि च प्रियः॥ गौ स्वं पाहि जगन्नाथ दीपोयं प्रतिगृह्यतामू॥ इति दीपम्॥ २॥ आच्छादनं मया दत्तं सम्यक् छुद्धं
सुनिर्मलम्॥ सुरभिर्वस्त्रदानेन प्रीयतां परमेश्वरि॥ ३॥ इति वस्त्रम्॥ सुरभे त्वं जगन्माता देवि विष्णुपदे स्थिता॥ सर्वदेवमयो ग्रासो द
त्तोयं प्रतिगृह्यतामू॥ ४ ॥इति गोग्रासं॥ इदम्मयार्पितं भव्यं घएटाचामरमण्डितमू॥ ग्रैवेयकं गृहाण त्वं मनि त्रिदशवन्दिते॥ इति ग्रैवेय
कम्॥ ५ ॥अथावाहनं॥ आवाहयाम्यहं देवीं सुरभिं लोकमातरमू॥ पूज्यां त्रिभुवने देवीं गन्धर्वैः किन्नरैः सह॥ ६ ॥मातृभिर्योगिभिश्चैव
क्षीराब्धिजननीं परामू॥ अमृतस्रावणीं दद्यात् सर्वयज्ञप्रकीर्तिनीं॥ ७ ॥देवी त्वं सर्वभूतानां जननी सर्वकामदा॥ मम कामदुघा धेनुर्भ
वेज्जन्मनि जन्मनि॥ ३९॥ तारयस्व महादेवि दुःसहाद्दुःखसागरात्॥ दिव्यांगानिं च मे देवी प्रयच्छ सुरवंदिते॥ ४०॥ इत्यावाहनं॥ उरः स्क
न्धः शिरो ब्रह्मा ललाटे गरुडध्वजः॥ कर्णयोरश्विनौ देवौ चक्षुषोः शशिभास्करौ॥ ४१॥ दंतामरुद्गणा देवा जिह्वायां मरुतः स्थिताः॥ कंठे च
सर्वशास्त्राणि हृदयं हव्यवाहनः॥ ४२॥ अपाने सर्वतीर्थानि प्रस्रवे जाह्नवीजलं॥ नासयोरेमकूपेषु गंडयोः शमनो यमः॥ ४३॥ धनदो
वरुणश्चैव दक्षिणां कुक्षिमाश्रितः॥ वामपार्श्वे स्थिता यक्षास्तेजो वं तो महाबलाः॥ ४४॥ खुरमध्ये तु गंधर्वाः खुराग्रे पन्नगाः॥ खुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्ना ॥
॥ ५२ ॥

णांपश्चिमेभागेवेदचत्वारिऊंकने ॥४५॥ रंभाद्याद्देऽप्सरसांगणनाःस्मृताः ॥ गोमयेवसतेलक्ष्मीःपवित्रासर्वमंगला ॥४६॥ प्रजापतिश्च
पादेषुजंघासुधर्मोयज्ञकः ॥ स्थावराणिचगात्रेषुवसवःसर्वसंधिषु ॥४७॥ श्रोणितरस्थापितरःसोमोलांगूलमाश्रितः ॥ रुद्रास्त(
कादशाःपृष्ठेसाध्याश्चोरसिसंस्थिताः ॥४८॥ चत्वारःसागराःपूर्णागवांगेषुपयोधराः ॥ क्षीरेसरस्वतीदेवीनर्मदादधिसंस्थिता ॥
४९ ॥ हुताशनःस्वयंसर्पिष्ठासमान्यगुरूपरः ॥ अष्टाविंशतिदेवानांरोमकूपेषुसंस्थिताः ॥५०॥ उदरेपृथिवीज्ञेयासशैलवनकान
ना ॥ एतत्तेकथितंसर्वंपुराणोक्तंमयाविभो ॥ ५१ ॥ अथकपिलांत्रिःप्रदक्षिणीकृत्यपूजयेत् ॥ गावःपुण्याःपवित्राश्चगावोवेदमयाश्च
ताः ॥५२॥ गावःसर्वजनेष्वाद्यानमोगोभ्योनमोनमः ॥५३॥ कपिलासर्वभूतानांपूजनीयासरोहिणी ॥ तीर्थदेवमयीयस्मात्तस्मा(
च्छांतिंप्रयच्छमे ॥ पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ ॥ तासांमध्येतुयाश्वेतातस्यैधेन्वैनमोनमः ॥५४॥ पूजितासिवसिष्ठेनविश्वा
मित्रेणधीमता ॥ सुरभेहरमेपापंयन्मयादुष्कृतंकृतं ॥ ५५ ॥ [illegible]निप्रार्थना ॥ ॥ नगोषुतुल्यंधनमस्तिकिंचिद्दुरंनिपापंचसमुद्य
मानाः ॥ तृणांचरंत्योऽमृतसंस्रवंतिविप्रेषुदत्ताःकुलमुद्धरंति ॥५६॥ एककालंद्विकालंवायोददातिगवाह्निकं ॥ वल्लवानरसंयुक्तं
विमानैःसोधिगच्छति ॥५७॥ इत्यंगन्याशंयजमानःसपत्नीकःकुर्यात् ॥ अथगोपुच्छोदकतर्पणं ॥ गणपतिस्तथाब्रह्माकेशवोरु
द्रएवच ॥ लक्ष्मीःसरस्वतीचैवयेचान्येवनवग्रहाः ॥५८॥ तेसर्वेतृप्तिमायांतुगोपुच्छोदकतर्पणैः ॥ देवाधिदेवताश्चैवतथाप्यधि
देवताः ॥ नक्षत्रावसवोरुद्राविश्वेदेवामरुद्गणाः ॥ तेसर्वेतृप्तिमायांतुगोपुच्छोदकतर्पणैः ॥ ६० ॥ गन्धर्वाःकिन्नराश्चैवदत्तान्येया(

52
॥ राम ॥
॥ ५२ ॥

त्रिभार्गवाः ॥ वासिष्ठाश्चांगिराश्चैव काश्यपेयाश्च काश्यपाः ॥ ६१ ॥ ते सर्वे तृप्तिमायान्तु गोप्रक्षोदकतर्पणैः ॥ ऋषयो मुनयो देवा अधः स्था
भूमिदेवताः ॥ वधाधाराजलेधाराअंतःस्था मुनयस्तथा ॥ सरितः सागराश्चैव पर्वता वनमेव च ॥ ६३ ॥ स्वाहा स्वधा तथा लक्ष्मीर्बुद्धिः श्रद्धा
सरस्वती ॥ मेधाधीर्निस्तथा लज्जा कीर्तिर्दिप्तिस्तथैव च ॥ ६४ ॥ ते सर्वे तृप्तिमायान्तु गोप्रक्षोदकतर्पणैः ॥ ब्रह्मादिदेव देवेषु त्रयस्त्रिंशाश्चको
टयः ॥ एते चैवागता देवा वसंति प्रत्यक्षगोचरे ॥ ६५ ॥ ते सर्वे तृप्तिमायान्तु गोप्रक्षोदकतर्पणैः ॥ ६६ ॥ ब्रह्मादिभुवनयआदिनवग्रहा ———
सर्वे मरुद्याचान्यत्र वसंति प्रत्यक्षगोचरे ॥ ६७ ॥ मेषादिराशयश्चैव योगाविष्कुंभकादयः ॥ ते सर्वे तृप्तिमायान्तु गोप्रक्षोदकतर्पणैः ॥ ६८ ॥
ततः कंठसूत्रीभूत्वोत्तराभिमुखः ॥ सनकश्च सनंदश्च तृतीयश्च सनातनः ॥ ६९ ॥ कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा ॥ ते सर्वे
तृप्तिमायान्तु गोप्रक्षोदकतर्पणैः ॥ ७० ॥ ततोऽपसव्यं दक्षिणाभिमुखः ॥ कव्यवाडनलादिभ्यो नमः ॥ यमाय नमः ॥ धर्मराजाय नमः
अंतकाय नमः ॥ मृत्यवे नमः ॥ वृकोदराय नमः ॥ परमेष्ठिने नमः ॥ औदुम्बराय नमः ॥ कालाय नमः ॥ दध्नाय नमः ॥ चित्राय नमः ॥
चित्रगुप्ताय नमः ॥ ततः पितृपितामहप्रपितामहाः ॥ मातृपितामही प्रपितामहि ॥ मातामहप्रमातामह ॥ वृद्धप्रमातामहाः ॥ ते
सर्वे तृप्तिमायान्तु गोप्रक्षोदकतर्पणैः ॥ ७३ ॥ येचास्मेत्रुप्तपिंडाश्च पुत्रदा —विवर्जिताः ॥ आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंस
एकीयरम्य ॥ ते सर्वे तृप्तिमायान्तु गोप्रक्षोदकतर्पणैः ॥ ७४ ॥ कालत्रये येममचांशभूताभृत्यास्तथैवाश्रितसेवकाश्च ॥ ७५ ॥ मित्राणि
शिष्याः पश्वावस्पृष्टाश्चवृक्षकाः कालोपगनश्चानायेयेचान्धायवगेस्तथा ॥ ७६ ॥ ते सर्वे तृप्तिमायानि गोप्रक्षोदकतर्पणैः ॥ विरू

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्ना ॥
॥ ५२ ॥

पाषाणमगर्भा ये येऽज्ञानकृतसंभवाः ॥ ७७ ॥ आमगर्भाश्च ये केचिद्द्राग्गताः पृथग्गोचरे ॥ ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥ ७८ ॥ वृ
क्षयोनिं गता ये च ये च कीटपतङ्गकाः ॥ नरके रौरवे ये च कुम्भीपाके तथैव च ॥ ७९ ॥ ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥ सव्यं कृत्वा
चमेत् ॥ ॥ कुशाक्षतयवतिलजलान्यादाय ॥ ॐ अद्येत्यादि समशैलवनकाननसचतुरर्णवमहीदानजन्यफलसमफलप्राप्तिकाम अमु
कगोत्रोऽहममुकशर्माऽस्मिन्जन्मसमसंख्यावच्छिन्नसकलदुरितविनाशनाय इहजन्मनि ज्ञाताज्ञातकृतपापक्षयपूर्वकं पुत्रपौत्रा
दिसंततिसंवृद्धये सकलपापक्षयपूर्वकदिव्यवीपरिमण्डितकाञ्चनविमानाधिरोहणस्वर्गपूर्वकगमनाय कारादेशान्तरे
ये मम संगतास्तेभ्यः ॥ स्वधाऽहं नमं जलं ददामि ॥ ये बान्धवा बान्धवा वा ये चान्ये जन्मनि बान्धवाः ॥ आहूदसजन हमस्मरितनिर्वृ
नष्टजिनामलपवित्रसर्वाङ्गिनिजस्तुविराजमानां गपदमयदशाग्निकाम इमां कपिलां गां हेमशृङ्गीं रौप्यखुरां ताम्रपृष्ठिकां कांस्यदोग्ध्री
घंटाभरणभूषितांमुक्तानृषितालांगूलां पट्टवस्त्रवृन्दां रुद्रदैवतां सदक्षिणाममुकगोत्रायामुकशर्मणे विप्राय तुभ्यमहं संप्रददे
॥ ॥ ॐ तत्सन्नुपयतउरुधःप्रोध्यताम् ॥ ॥ ॐ अद्य कृतैतत्कपिलगवीदानप्रतिष्ठार्थं सुवर्णमग्निदैवतमित्यादि० ॥ हे मममयि
तनस्तुभ्यं सूर्यरश्मिस्तु भवेत् ॥ रक्ष मां सर्वभूतेभ्यो विश्वमातर्नमोऽस्तु ते ॥ ८० ॥ ततः प्रदक्षिणा ॥ ॥ यानि कानि च पापानि ब्रह्म
हत्यासमानि च ॥ तानि तानि विनश्यन्तु प्रदक्षिणा पदे पदे ॥ ८१ ॥ या लक्ष्मीर्लोकपालानां सर्वदेवेषु संस्थिता ॥ सा लक्ष्मीर्धेनुरूपे
ण मम पापं व्यपोहतु ॥ ८२ ॥ ततः स्तुतिः ॥ गावो मामुपतिष्ठन्तु हेमशृङ्गाः पयोमुचः ॥ सुरभ्यः सौरभेयाश्च सरितः सागरास्तथा ॥ ८३

53

॥ राम ॥
॥ ५२ ॥

गावो मे पश्चात्पमस्तु नित्यं गावः पश्यंतु मां सदा ॥ गावोस्माकं वयं तासां यतो गावस्ततो वयं ॥ ८४ ॥ ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतं ॥ ए
कत्र मंत्रास्तिष्ठंतु हविरेकत्र तिष्ठतु ॥ ८५ ॥ ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥ एकत्र मंत्रास्तिष्ठंति हविरेकत्र तिष्ठति ॥ ८६ ॥
गावः सुरभयो नित्यं गावो गुग्गुलुसन्निभाः ॥ गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् ॥ ८७ ॥ अन्नमेव परं गावो देवानां हविरुत्तमं
पावनं सर्वभूतानां रक्षंति च नहंति च ॥ ८८ ॥ हविषा मंत्रपूतेन तर्पयंत्यमरान्दिवि ॥ ऋषीणामग्निहोत्रेषु गावो होमेषु निष्ठिताः ॥ ८९
सर्वेषामेव भूतानां गावः शरणमुत्तमं ॥ गावः पवित्रं परमं गावो मंगलमुत्तमम् ॥ ९० ॥ यासां खुरोद्धृतो रेणुर्गंगावारिसमो भवेत् ॥ स्व
र्गस्थाः पितरो देवास्तृप्यंति तेन हेतुना ॥ ९१ ॥ सर्वेषामपि देवानां गावः शरणमुत्तमम् ॥ गावः स्वर्गस्य सोपानं गावो धन्याः सनातनाः
९२ ॥ घृतक्षीरप्रदा गावो घृतयोन्योद्भवाः शुभाः ॥ घृतनद्यो घृतावर्तास्ता मे संतु सदा गृहे ॥ ९३ ॥ घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठि
तं ॥ घृतं मे सर्वतश्चैव घृतं मे मनसि स्थितं ॥ ९४ ॥ गावो मे चाग्रतः संतु गावो मे संतु पृष्ठतः ॥ गावो मे पार्श्वतः संतु गवां मध्ये वसाम्यहं ॥
९५ ॥ शृंगाग्रे सर्वतीर्थानि खुराग्रे सर्वपर्वताः ॥ शृंगयोरंतरे यासां साक्षाद्गौरी महेश्वरौ ॥ ९६ ॥ गोमयं यमुना साक्षाद्गोमूत्रं नर्मदा शुभा
क्षीरं तु यासां वै ताः संतु वरदा मम ॥ ९७ ॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ ९८ ॥ इति
प्रदक्षिणीकृत्य नमो गोभ्य इति गां नत्वा ॥ ततो दाता सूर्यमवलोक्य प्रतिब्राह्मणं नमस्कुर्यात् ॥ १२८ ॥ अथ वज्रगोदाने पूजादिपूर्वव
त् ॥ ॥ ॐ अद्य श्रीविष्णोः परमपदप्राप्तिपूर्वकैनस्त्रो किंकरोरव्याघुरारोगेस्वर्गप्राप्तिं च हरिस्मरणदर्शनार्थं दश हस्तप्रमाणदशस्व

CC-0. In Public Domain. Digitization by eGangotri

हस्ताववह्निन्नधर्मविराप्राप्निपावयग्राः कर्त्तव्यः स्वदेशेर्भाग्यदैर्गन्धोयसग्रामनकामर्दमानरगाः सालंकारावस्त्रयुताः ॥ सदक्षिणा
नानानामगोत्रेभ्यो ब्राह्मणेभ्योहं संप्रददे ॥ ॥इत्युत्सृजेत् ॥ ॥स्पर्शनं पूर्ववत् १२३ ॥ ॥दशगोदानपक्षे ॥ ॥इमा दशगाः सालं
कारा रुद्रदैवता इत्यादि ॥१२४ गोशतदानपक्षे ॥ ॥इदं गोशतं सालंकारं वस्त्रयुतं रुद्रदैवतमित्यादि ॥१२५॥ अथ वृषभदाने
अग्निपुराणे ॥ ॥दशधेनुसमो नड्वानेकश्चैव धुरंधरः ॥ अलंकृत्य वृषं सम्यक्वैपुरे समुपस्थिते ॥१॥ सुवर्णशृंगं रजतैः खुरैः रौ
प्यैरलंकृतम् ॥ स्वच्छं पट्टवस्त्रेणाच्छाद्योपपादयेत् ॥२॥ नमस्कारान्तकं कृत्वा जपपूजां समाप्य च ॥ वृषदानं समभ्यर्च्य वृष
मंत्रेणामंत्रवित् ॥३॥ मंत्रः धर्मस्त्वं वृषरूपेण जगदानंदकारकः ॥ अष्टमूर्त्तेरधिष्ठानं पाहि मां दुष्कृतात्पुवि ॥४॥ पृथिव्यां या
नि तीर्थानि सागरांतानि तानि च ॥ अंत्रमाश्रित्य निवंति प्रदेशे गो वृषस्य तु ॥५॥ सृक्क्वा वृषस्य वृषरोम्णं गमध्ये निक्षिपेच्च ॥ पुछं च
ककुदं चैव सर्वपापैः प्रमुच्यते ॥६॥ भयनेकमनसा यजन्तं पुमनसर्वदा ॥ श्रीयतां धर्मराजो मे उनिपृष्ठविसर्जयेत् ॥७॥ सप्तज
न्मकृतं पापं मनसा कायकर्मभिः ॥ तत्सर्वं विलयं याति वृषदानान्न संशयः ॥८॥ यानं वृषभसंयुक्तं दीप्यमानं स्वतेजसा ॥ गंधर्व
प्सरसकीर्णं गीतनृत्यसमाकुलं ॥९॥ आरुह्य कामगं दिव्यं स्वर्लोकमधितिष्ठति ॥ यावंति तस्य रोमाणि गोवृषस्य महीयते ॥१०॥ स्व
र्गेष तत्रोति तावंति अनायासेन नृपो भवेत् ॥ अलंकृत्य वृषं श्रेष्ठं ब्राह्मणं च प्रपूजयेत् ॥११॥ पूजादि पूर्ववत् ॥ ॐ अद्यामुकतिथौ वा
द्यन्तः कायकृतनस्य जन्मार्जित पापक्षयपूर्वकवृषभसंयुक्तस्वतेजसा गंधर्वाप्सरसाकीर्णगीतनृत्यसमाकुलकामगदिव्यवि

मानाधिरोहणपूर्वकस्वश्लोकगमनं तदुक्तं दैन वृषभलोमसमसंख्यवर्षावच्छिन्नस्वर्गस्थितिस्तदुक्तं रत्नपराजन्यकामहमं हयभं वस्त्राल
कृतं सुवर्णशृंगं रौप्यखुरं ताम्रपृष्ठं पट्टवस्त्राच्छादितं गंधपुष्पार्च्चितं रुद्रदेवतं सदक्षिणामित्यादि ॥ ॐ अद्य कृतैतन्वृषभदानप्रतिष्ठार्थं
मिदं स्वर्णमग्निदेवतमित्यादि ॥ १२६ ॥ ततः कृतांजलिः पठेत् ॥ धर्मस्त्वं वृषरूपेण जगदानंदकारकः ॥ अष्टमूर्त्तेरधिष्ठानमतः पाहि मां द्रुतः कृता
ञ्जुवि ॥ १ ॥ ततो ब्राह्मणभोजनम् ॥ ॥ इति श्रीमन्महाराजाधिराजश्री ५ गीर्वाणयुद्धविक्रमसाहदेवकृतायां सदनरत्नसमिधायां दान
प्रकरणरत्नम् ॥ ॥ दिलीप उवाच ॥ भगवन् श्रोतुमिच्छामि हरिवंशविधिं परम् ॥ दानेव श्रवणे पाठे समाप्ते पूजनं तथा ॥ १ ॥ समारंभे
हरेर्ज्ञाने पूजनं च पृथक् पृथक् ॥ तथा पारायणफलं श्रवणस्य फलं महत् ॥ २ ॥ समाख्याहि महायोगिन् यथापकं नाशकं यथा ॥ ॥ व
सिष्ठ उवाच ॥ शृणु त्वं राजशार्दूल यन्मृष्टोस्मि महाबल ॥ ३ ॥ हरिवंशविधिं कृत्स्नं यथावन्मुनिदाकृतम् ॥ श्रद्धधानेनैव भाव्यं सर्वं च नृप
नन्दन ॥ ४ ॥ लिखापयित्वा यो दद्याद्विबुधे ब्राह्मणाय च ॥ सविधूय हया यानि कल्पकोटिकृतानि च ॥ ५ ॥ अप्सरोगणसंकीर्णः स्वर्गलोके
महीयते ॥ श्रवणस्य विधिं राजन् वक्ष्याम्यनुपूर्वशः ॥ ६ ॥ शुभे दिने शुभे पक्षे स्वस्तिवाचनपूर्वकम् ॥ समारंभेत मतिमान् श्रद्धा
नो जितेन्द्रियः ॥ ७ ॥ मलमासे गुरौ त्रस्ते शुक्रे वा सप्त पागते ॥ पौषे चैत्रे ऽपरे पक्षे तु जार्थी नारभेत् क्वचित् ॥ ८ ॥ ब्रह्मचारी भवेन्नित्यं मन्त्र
तोऽन्नं शयनं तथा ॥ एकभक्तैकभुक्तो वा नमधुमांसविवर्जितम् ॥ ९ ॥ शोकादि परवश्यं च न कुर्याद्गुरुनं देवतम् ॥ कलशं स्थापयेत्पूर्वं यंत्र
रत्नसमन्वितं ॥ १० ॥ संहितापुस्तकं चैव नित्यमेवं प्रपूजयेत् ॥ वस्त्रांजलामहिषांच गंधपुष्पाक्षतैर्नरः ॥ ११ ॥ धूपदीपैस्तु नैवेद्यैर्नालि

CC-0. In Public Domain. Digitization by eGangotri

केरसदक्षिणे॥ एवं हि पूजयेन्नित्यं पूर्वाह्णे मतिमान्नरः॥१२॥ एकचित्तेन ध्यानेन अंसर्वकामसमृद्धये॥ अभिषेकं च गृह्णीयात्स्वयं हं पाय
त्तन्नये॥१३॥ तज्जलं चापि वेदेन्निमंदं पत्नीपुत्रयान्वितो॥ आशिषं प्रतिगृह्णीतां नालिकेराक्षतैर्युताम्॥१४॥ वाचकं पूजयेन्नित्यं गंधपुष्पाक्ष
तैर्नृप॥ वाचके हि प्रसन्ने हि फलप्राप्तिर्न चान्यथा॥१५॥ यदन्नं स्वयमश्नीयाद्वाचकेन स्वरापयेत्॥ वित्तशाठ्यं न कुर्वीत यदीच्छेद्विपुलं
धनम्॥१६॥ ततो वत्सरसमये विष्णोरमिततेजसः॥ देवकीवसुदेवं च पूजयेद्रत्नभूषणैः॥१७॥ संहितापुस्तकं चैव पूजयेत्तत्स्व
मेधया॥ पीतांबरैः कंकणैश्च कौसुंभेनांगुलीयकैः॥१८॥ कटिसूत्रेण विरजैः कुंडलैः सहिरण्यकैः॥ धूपदीपोपहारैश्च प्रख्याराति
कसंयुतैः॥१९॥ वाचकं पूजयेद्भक्त्या नृत्यगीतसमन्वितः॥ बंधुवर्गसमासाद्य जातकर्मादि कारयेत्॥२०॥ एवं कृत्वा हि मनुजा इह
त्र च नंदति॥ ततः कृत्वाभिधाने न समाप्ते पूजनं ततः॥२१॥ पूजये दंपती सवस्त्राभरणकांचनैः॥ गावः कांस्योपदोहिन्यः शय्या दे
याः सुभूषिताः॥२२॥ रत्नानि रमणीयानि पात्राण्याभरणानि च॥ यद्यदिष्टतमं गेहे तत्तत्सर्वं परिकल्पयेत्॥२३॥ एवं हि विधिवत्कृ
त्वा सर्वपापैः प्रमुच्यते॥ स्ववंशधारणं कृत्वा स्वर्गलोके महीयते॥२४॥ चतुर्विधापि या वंध्या सापि पुत्रवती भवेत्॥ किमन्यद्बहुनो
क्तेन राजन्नवहितः शृणु॥२५॥ सर्वपापप्रशमनं सर्वकामफलप्रदम्॥ हरिवंशं खिलं प्राह व्यासः सत्यवतीसुतः॥२६॥ ॥इति पद्मपु
राणे हरिवंशश्रवणविधिः॥ ॥अथ प्रयोगः॥ ॥ज्योतिर्विदुपदिष्टे शुभकाले गुर्वस्तपो बाल्यादिदोषरहिते दंपत्योश्चन्द्रतारानुकूले शुभदि
ने कर्ता स्नातः शुचिवस्त्रधरः कृताचमनो दीपं प्रज्वाल्य तं संपूज्य तांबूलवस्त्रादिभिस्त्रीन् चतुरो वा ब्राह्मणान्संपूज्य॥ अमुकगोत्रस्या

मुकप्रवरस्यामुकनाम्नो मम अस्मिन्कर्मणि ॐ पुण्याहं भवन्तो ब्रुवंतु ॥ इति त्रिवारं ब्राह्मणाननुश्रावयेत् ॥ ते च ॐ पुण्याहं ३ इति त्रिः प्रति
ब्रूयुः एवं स्वस्ति भवन्तो ब्रुवंतु ॥ ॐ स्वस्ति ३ तथा ॥ ॐ ऋद्धिं भवन्तो ब्रुवंतु ३ ॐ ऋध्यतामिति त्रिः ॥ २ ॥ ततः स्वशाखानुसारेण विनायकं
शान्तिपूजां वा गणानां त्वेति मन्त्रेण विधाय प्रार्थयेत् ॐ वक्रतुंड महाकाय कोटिसूर्यसमप्रभ ॥ अविघ्नं कुरु मे देव सर्वकार्येषु सर्व
दा ॥ १ ॥ ततः कुशादीन्यादाय ॥ ॐ तत्सद्विष्णुः ३ अद्येत्यादि देशकालौ कीर्तनं कृत्वा पुत्रप्राप्तिकाम मया हरिवंशश्रवणं करिष्यावहे कारि
ष्ये इति वा संकल्प्य अक्षताद्यर्पणेन संपन्नब्राह्मणं विभवानुसारेण वस्त्रमुद्रिकाताम्बूलादिभिः संपूज्य एभिश्चन्दनताम्बूलवस्त्रादिभिर्ह
रिवंशश्रवणे अमुकगोत्रममुकशर्माणं त्वामहं वृणे ॥ इति संकल्प ॥ ॐ धान्यमसीति धान्यं संस्थाप्य ॐ आजिघ्र कलशमिति कलशं सं
स्थाप्य ॐ वरुणस्योत्तम्भनमिति निर्मलजलेन पूरयेत् ॥ ततो बहिर्भागे दध्यक्षतविभूषितं चन्दनादियं च यवक्षतवस्त्रयुग्मं पंचरत्नस
प्तमृत्तिकासर्वौषधिभिः संयुक्तं स्वस्वमन्त्रेण कुर्यात् ॥ तत्र तत्त्वायामीति वरुणमावाह्य पूजयेत् ॥ तत्रैव गंगादीनावाहयेत् गङ्गाद्याः
सरितः सर्वाः समुद्राश्च सरांसि च ॥ आयान्तु यजमानस्य दुरितक्षयकारकाः इति ० ततः कलशाभिमन्त्रणम् ॥ कलशस्य मुखे विष्णुः कंठे
रुद्रः समाश्रितः ॥ मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ १ ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोऽथ यजुर्वेदः सा
मवेदो ह्यथर्वणः ॥ २ ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ ततः पंचोपचारैः संहितापुस्तकं पूजयेत् ॥ ततो गणेशादिमङ्ग
लपूर्वकं ब्राह्मणेन सवाचमानं अलंकृतो दंपती एकचित्तेन याम्भरूपयानाम् ॥ प्रतिदिनमाचार्यं पुस्तकं च पूजयेत् ॥ प्रत्यहं पा

CC-0. In Public Domain. Digitization by eGangotri

पायत्तन्नयेऽभिषेकंगृह्णीयानां·ऽनिवासरंकलशजलंचपिवेनां· सअग्रहंयावत्कालंश्रावयित्वा·आचार्यः कस्यनूनमित्यादिपंचदशभिः प
वमानइत्यादिसप्तदशभिर्वरुणदेवताकाभिर्ऋग्भिर्दंपतीअभिषिंचेत् ॥नायथा॥ कस्यनूनमितिमस्यपंचदशर्चस्यसूक्तस्याजीगर्त्तिशुनःशे
फऋषिस्त्रिष्टुप्गायत्र्यौछंदसीवरुणोदेवताविहितार्थेविनियोगः॥ ॐ कस्यनूनंकतमस्यामृतानांमनामहेचारुदेवस्यनाम॥ १ ॥को
नोमह्याअदितयेपुनर्दात्पितरंचदृशेयंमातरंच॥ २ ॥ अभित्वादेवसवितरीशानंवार्याणांसदावन्भागमीमहे॥ २ ॥ यश्चिद्धितइत्थाभ्यां
भागःशशमानःपुरानिदः॥ अद्वेषोहस्तयोर्दधे॥ ४ ॥ भगभक्तस्यतेवयमुदशेमतवावसा·मूर्धानंरायआरभे॥ ५ ॥ नहितेक्षत्रेण(
सहोनमन्युंवयश्चनामीपतयंतआपुः॥ नेमाआपोअनिमिषंचरंतीर्नयेवातस्यप्रमिनंत्यभ्वं॥ ६ ॥ अबुध्नेराजावरुणोवनस्योर्ध्वं(
स्तूपंददतेपूतदक्षः॥ नीचीनाःस्थुरुपरिबुध्नएषामस्मेअंतर्निहिताःकेतवःस्युः॥ ७ ॥ उरुंहिराजावरुणश्चकारसूर्यायपंथामन्वेतन
वाउ॥ अपदेपादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित्॥ ८ ॥ शतंतेराजन्भिषजःसहस्रमुर्वीगभीरासुमतिष्टेअस्तु·
बाधस्वद्वेषोनिर्ऋतिंपराचैःकृतंचिदेनःप्रमुमुग्ध्यस्मत्॥ ९ ॥ अमीयऋक्षानिहितासउच्चानक्तंददृश्रेकुहचिद्दिवेयुः॥ अदब्धानिवरु
णस्यव्रतानिविचाकशच्चंद्रमानक्तमेति॥ १० ॥ तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥ अहेडमानोवरुणेहबो
ध्युरुशंसमानआयुःप्रमोषीः॥ ११ ॥ तदिन्नक्तंतद्दिवामह्यमाहुस्तदयंकेतोहृदआविचष्टे॥ शुनःशेपोयमह्वद्गृभीतःसोअस्मा
न्राजावरुणोमुमोक्तु॥ १२ ॥ शुनःशेपोह्यह्वद्गृभीतस्त्रिष्वादित्यंद्रुपदेषुबद्धः॥ अवैनंराजावरुणःससृज्याद्विद्वाँअदब्धोविमोक्तु

Nepal Sanskrit University, Balmeeki Campus, Kath...

याशान् ।।१३।। अवतेहेलोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः ।। क्षयंनस्समसुरप्रचेताराजन्नेनांसिशिश्रथः कृतानि ।।१४।। उदुत्तमंव
रुणपाशमस्मदवाधमंविमध्यमंश्रथाय ।। अथावयमादित्यव्रतेतवानागसोअदितयेस्याम ।।१५।। ।। इतिकस्यनूनमितिसूक्तम्
अथपावमानम् ।। ॐ पावमानइत्यस्यसप्तदशर्चस्यानुवाकस्यसोमऋषिःलिंगोक्ताः पावमान्योदेवतागायत्र्यनुष्टुप्त्रिष्टुभश्छन्दांसिअभि
षेकेविनियोगः ।। ॐ पावमानःसुवर्जनःपवित्रेणविचर्षणिः ।। यःपोतासःपुनातुमा ।।१।। पुनन्तुमादेवजनाःपुनन्तुमनवोधिया ।। पुन
न्तुविश्वआयवः ।।२।। जातवेदःपवित्रवत्पवित्रेणपुनीहिमा ।। शुक्रेणदेवदीद्यदग्नेक्रत्वाक्रतूँरनु ।।३।। यत्तेपवित्रमर्चिष्यग्नेवित
तमंतरा ।। ब्रह्मतेनपुनीमहे ।।४।। उभाभ्यांदेवसवितःपवित्रेणसवेनच ।। इन्द्रब्रह्मपुनीमहे ।।५।। वैश्वदेवीपुनतीदेव्यागाद्य
स्यैवह्वीस्तनुवोवीतपृष्ठाः ।। तयामदन्तःसधमाद्येषुवयंस्यामपतयोरयीणाम् ।।६।। वैश्वानरोरश्मिभिर्मापुनातुवातःप्राणेनेषि
रोमयोभूः ।। द्यावापृथिवीपयसापयोभिर्ऋतावरीयज्ञियेमापुनीताम् ।।७।। बृहद्भिःसवितस्तृभिर्वर्षिष्ठैर्देवजनाभिः ।। अ
ग्नेदक्षैःपुनीहिमा ।।८।। येनदेवाअपुनतनेनदिव्येनब्रह्मणाइदंब्रह्मपुनीमहे ।।९।। यःपावमानीरध्येतिऋषिभिःसंभृतंरसम् ।
सर्वंसपूतमश्नातिस्वदितंमातरिश्वना ।।१०।। पावमानीर्योअध्येतिऋषिभिःसंभृतंरसम् ।। तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधू
दकम् ।।११।। पावमानीःस्वस्त्ययनीःसुदुघाहिपयस्वतीः ।। ऋषिभिःसंभृतोरसोब्राह्मणेष्वमृतंहितम् ।।१२।। पावमानीर्दिशन्तुन
इमंलोकमथोअमुम् ।। कामान्समर्धयन्तुनोदेवीर्देवैःसमाभृताः ।।१३।। पावमानीःस्वस्त्ययनीःसुदुघाहिघृतश्चुतः ।। ऋषिभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्न ॥
॥ ५७ ॥

संभृतोरसोब्राह्मणैरमृतंहितम् ॥१४॥ येनदेवाःपवित्रेणात्मानंपुनतेसदा। तेनसहस्रधारेणपावमान्यःपुनंतुमा॥१५॥ प्राजापत्यं
पवित्रंशतोद्यामाहिरण्मयम्। तेनब्रह्मविदोवयंपूतंब्रह्मपुनीमहे॥ १६॥ इन्द्रःसुनीतीसहमांपुनातुसोमःस्वस्त्यावरुणःसमीच्या
यमोराजाप्रमृणाभिःपुनातुजातवेदामोर्जयन्त्यापुनातु॥ १७॥ ततःस्वसारस्वतैरन्यैरपिमंत्रैरभिषिक्तःश्रोताब्राह्मणाशिषोगृहीत्वाता
म्रपात्रंकलशजलंपिबेत्॥ अनेनस्वल्पकृतायपयस्विनींसवत्सांस्वर्णशृंगींरौप्यखुरांताम्रपृष्ठांकांस्यदोहनांसवस्त्रांगांदद्यात्॥ दान
पतिंसंचकुर्यात्॥ इतिहरिवंशश्रवणविधिःसमाप्तः॥ ॥ अथरामायणश्रवणविधिः॥ ॥ श्रीमद्भल॥१॥ वाल्मीकिगिरि॥२॥
वेदवेद्ये॥३॥ रामंरामानुजं॥४॥ कूजंतं॥५॥ वाल्मीकेर्मुनि॥६॥ यःपिबन्॥७॥ अंजनानन्दनं॥८॥ उल्लंघ्यसिंधोः॥९॥ आमिषीकृ
तमार्तंडंगोष्पदीकृतवारिधिम्॥ तृणीकृतदशग्रीवमांजनेयंनमाम्यहम्॥१०॥ आंजनेयमतिपाटलाननंकांचनाद्रिकम
नीयविग्रहम्॥ पारिजाततरुमूलवासिनंभावयामिपवमाननन्दनम्॥११॥ यत्रयत्र॥ १२॥ शृण्वन्रामायणंभक्त्यायःपादंप
दमेववा॥ सयातिब्रह्मणःस्थानंब्रह्मणासहपूज्यते॥१३॥ यःकर्णांजलिसंपुटैरहरहःसम्यक्पिबत्यादराद्वाल्मीकेर्वदनारविंद
गलितंरामायणाख्यंमधु॥ जन्मव्याधिजराविपत्तिमरणैरत्यंतसोपद्रवंसंसारंसविहायगच्छतिपुमान्विष्णोःपदंशाश्वतम्॥१४
वाल्मीकिगिरिसं॥ १५॥ श्लोकसारसमाकीर्णंसर्गकल्लोलसंकुलं॥ कांडग्राहमहामीनंवन्देरामायणार्णवम्॥१६॥ तदुपगतस
माससन्धियोगंसममधुरोपनतार्थवाक्यबद्धम्॥ रघुवरचरितंमुनिप्रणीतंदशशिरसश्चवधंनिशामयध्वम्॥ ॐ मनोजव॥१७॥

57
॥ राम ॥
॥ ५७ ॥

CC-0. In Public Domain. Digitization by eGangotri

पूर्वं हनुमते आसनं दत्वा गन्धादिभिः संपूज्य एतान् श्लोकान् पठेत् ॥ रामायणपारायणं च प्रातराह्निकभगवत्पूजानंतरं भुक्त्वा वा रा
त्रौ वा कर्तव्यम् ॥ एतच्छ्लोकपाठनंतरं समाप्ते महामंत्रं दद्याद्वा रंजयेत् ॥ आदावन्तेपि ॥ एतान् दश विधिपूर्वकं रामायणपारायणे क्रि
यमाणे बालकांडे सीताराम विवाहप्रसंगे ॥ इयं सीता मम सुता सहधर्मचरी तव ॥ प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ·
इमं श्लोकं त्रिः पठित्वा सीतादेवीमावाह्य षोडशोपचारैः संपूज्य ततोवसिष्टस्य समाप्तिः ॥ अरण्यकांडे खरवधानंतरं दृष्ट्वा शत्रुनिहंतारं म
हर्षीणां सुखावहं ॥ बभूव हृष्टा वैदेही भर्त्तारं परिषस्वजे ॥ एतं पठित्वा दंपत्योः पूजनं ततोऽवशिष्टस्य समाप्तिः ॥ ताभ्यां दंपतिभ्यां भोजनं
दत्वा स्वयं भुंजीत ॥ सुन्दरकांडे मंगलाभिमुखी तस्य सा तदासीन्महाकपेः ॥ उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ॥ इति श्लोकं पठि
त्वाऽग्निं संपूज्य सर्गः समापनीयः ॥ आहिताग्नये ऽन्नं देयम् ॥ लंकां समस्तां संदीप्य लांगूलाग्निं महाबलः ॥ निर्वापयामास तदा समु
द्रे हरिपुंगवः श्लोकोऽनंतरं बालब्रह्मचारिणे अभ्यंजनमुष्णोदकस्नानं च दत्वा षोडशोपचारैस्तं संपूज्य सर्गसमाप्य तस्मै अन्नं देयम्
ततस्तु शिंशपामूले जानकीं पर्यवस्थिताम् ॥ अभिवाद्याब्रवीद्दिष्ट्या पश्यामि त्वामिहाक्षताम् ॥ अत्र सीताहनुमतोः पूजा ॥ युद्धकां
डे ततो मुहूर्त्ताद्गरुडमित्यारभ्य तमागतमभिप्रेत्य नागास्ते विप्रदुद्रुवुः ॥ यैस्तु तौ पुरुषौ बद्धौ शरभूतैर्महाबलैः ॥ ततः सुपर्णः का
कुत्स्थौ स्पृष्ट्वा प्रत्यभिनंद्य च ॥ विममर्श च पाणिभ्यां मुखे चन्द्रसमप्रभे ॥ वैनतेयेन संस्पृष्टास्तयोः संरुरुहुर्व्रणाः ॥ इत्यंशं पठित्वा पि
ष्टमयं मत्स्यं कृत्वा गरुडाय निवेद्य आघ्राय प्रक्षिपेत् ॥ ततो गरुडं संपूज्य रामलक्ष्मणौ पूजयेत् ॥ हरीन्विशल्यान् सहलक्ष्मणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रा॥
॥५८॥

त्वकारणं रामः परमात्मेत्वाग्रे॥ इति पठित्वा नीलवर्णाया सवत्साया धेनोः क्षीरं लक्ष्मणाय निवेद्य पत्न्या साकं पिबेत्॥ नमस्कृत्वाथ रामाय
मारुतिर्भीमविक्रमः॥ इमं तं पठित्वा षोडशवार्षिकब्रह्मचारिणं प्रपूज्य सर्गं समाप्य सक्षौद्रमन्नं दद्यात्॥ रुधिरक्लिन्नगात्रस्तु ल
क्ष्मणः शुभलक्षणः॥ बभूव हृष्टस्तं हत्वा शत्रुजेतारमाहवे॥ इमं श्लोकं पठित्वा पूर्ववल्लक्ष्मणं पूजयेत्॥ स तं शिरस्युपाघ्राय परि
ष्वज्य राघवः॥ लज्जमानं बलात्स्नेहादंकमारोप्य वीर्यवान्॥ इति पठित्वा रामलक्ष्मणयोः पूजा कर्त्तव्या॥ अनंतरं हनुमतो यत्र
पूजनमिति केचित्॥ सशल्यः समवघ्राय लक्ष्मणः परवीरहा॥ विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात्॥ इति त्रिः पठित्वा ल
क्ष्मणस्य पूज्यस्ततो दीन्यवृबीजं मन्त्रयारभ्य दिक्पालान्वीरयक्षणामि मरणात्पुनरागमनमित्यंतं पठित्वा श्रीरामलक्ष्मणयोः पूजां कृ
त्वा सर्गं समापयेत्॥ रणोभिरामं विधिना पूजयन्निव्यत्र रामपूजा॥ भक्तिस्वमाल्याभरणां तथा रूपां मनस्विनीम्॥ ददौ रामाय वै
देहीमंके कृत्वा विभावसुरिति त्रिः पठित्वा सर्गं समाप्य दद्यं यमो रम्भं जनं दत्वा उक्षोदकेन संस्थाप्य पूजा दक्षिणापूर्वमन्नं दद्यात्॥ ततस्तु
प्रयतो हृष्टो वशिष्ठो ब्राह्मणैः सह॥ रामं रत्नमये पीठे सह सीतं न्यवेशयत्॥ इमं त्रिः पठित्वा यावच्छक्ति सविलवं सीतारामपूजां कृत्वा
ऽवशिष्टं सर्गं समाप्य दंपती संपूज्य हनुमदुद्देशेन एकं ब्रह्मचारिणं लक्ष्मणोद्देशेन चापरं पूजयेत् पर्याय पिबंपायसं च समर्पयेन्नि
त्रीति शुद्धिद्वयरकसं भुंजायान्नं दद्याद् ब्राह्मणान्भोजयित्वा कृतकृत्यो भवेत्॥ एवं षडेव कांडानभ्यस्य गृहस्थः श्रीरामश्रीणेन य
थोक्तफलभाग्भवति यथोक्तफलभाग्भवति॥ ॥ इति श्रीरामायणश्रवणविधिः॥ ॥ अथ शिलाचारभागमिद्राचारप्रयोगः॥

58
॥ राम ॥
॥ ५८ ॥

तत्रादौ ज्योतिःशास्त्रोक्तसन्मुहूर्त्ते दिवसे शुभे विवाहोक्तमासादौ परस्परानुकूलरविगुरुचन्द्रशुद्धियुते मरस्पराभिलाषविशिष्टयोर्मैत्री
कार्या ॥ तत्र वक्ष्यमाणविधमङ्गलानि गीतवाद्यादीनि यथासम्भवं कृत्वा पूर्वदिग्विदीयं प्रज्वाल्य कलशस्थापनं गणेशपूजनं च कुर्यात् स्व
कुलाचारनिपुणाशाखाध्यायिनं विद्वांसमाचार्यं हवृणुयात् ॥ तत्र संकल्पः ॐ तत्सद्विष्णुरित्यादि अमुकगोत्रोत्पन्नयोरमुकराशि वि
शिष्टयोरावयोर्जन्मलग्नराशितो शुभस्थानस्थितानां दशान्तर्दशाशुभफलदानां ग्रहाणामादित्यादिग्रहाणां दोषोपशमनार्थं शुभफल
प्राप्त्यर्थं पूर्वजन्मोपार्जितदुरितसूचितसकलविघ्नोपशमनार्थं मनोभिलषितेष्टसिद्ध्यर्थमद्यारभ्य यावज्जीवनावधिपर्यन्तमुत्त
रोत्तरपरस्पराभ्युदयकामो मैत्रीकरणकर्मणि कृताकृतावेक्षणरूपाचार्यकर्मकर्तुममुकगोत्रममुकशाखाध्यायिनममुकश
र्माणं ब्राह्मणमेभिर्गन्धादिभिस्त्वामहं वृणे। वृतोऽस्मीति प्रतिवचनम्। यथाविहितं कर्म कुरु करवाणीति प्रतिवचनम् ॥ ततः प्रा
र्थनम्। यथा सर्वामृतभुजाचार्योऽसि बृहस्पतिः तथा त्वमावयोर्ब्रह्मन्नस्तु गुरुर्भव कर्मणि ॥ इति सम्प्रार्थ्य ततो मातृब्राह्मणान्सम्पूज
येत् ॥ ततोऽञ्चलबन्धनम् ॥ ॥मन्त्रः॥ यथा शचीनिर्बद्धा विष्णोरामलक्ष्मणयोर्यथा ॥ तथैव चावयोरस्तां प्रीतिः स्यादनपायिनी ॥
ग्रंथिनां बलबन्धेन लक्ष्मीश्चायुःप्रवर्द्धनी ॥ ॥ ततः कलशे पूजितदेवप्रार्थनम् ॥ रूपं देहि जयं देहि यशो देहि प्रविस्तरम् ॥ राज्यं च
विपुलं देहि सर्वान्कामांश्च केशव ॥ १ ॥ वरुणं देव देवेश माधारं सर्वदे हि नाम् ॥ त्वां पूजयावः कलशे सुप्रीतो भव कर्मणि ॥ २ ॥ याव
ज्जीवं सुखं देहि मित्रकर्मणि सुप्रभ ॥ आवयोरचलां प्रीतिं सर्वदा देह्यपाम्पते ॥ ततो दूर्वावरणम् ॥ सम्मूलाश्च त्रयोदश संख्याका दूर्वाः स

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ५९ ॥

मानीयसप्तसप्तदूर्वाः साक्षतागृहीत्वा भौमत्र्यंपठेत्ताम् ॥ आयुर्वृद्धिकरीदूर्वावरणेनैर्मित्रवर्द्धिनी ॥ आयुरारोग्यमैश्वर्य
श्रीमद्भागवते भगवता कर्मकाण्डस्य ग्रन्थनोत्थानतन्त्रानन्तपारत्वात् संक्षिप्तं कथयिष्यामीति प्रतिज्ञाय वैदिकस्तान्त्रिको मिश्र इति
मे त्रिविधो मखः ॥ त्रयाणामीप्सितेनैव विधिना मां समर्चयेदित्यनेन क्रियायोगस्य त्रैविध्यमुक्तम् ॥ तस्मादत्र श्रौतस्मार्तविधिनियाद
नप्रकरणे तान्त्रिकविषयस्यापि प्राप्तावसरत्वात् तान्त्रिकविषयकमभिधीयते प्रकरणम् ॥ ॥ तत्रादौ ॥ दीक्षितस्यैव सर्वकर्मस्वधि
कारात्पूर्वं दीक्षाप्रकरणमुच्यते ॥ तथा चैवागमे ॥ अथोत्तरेवभुभेभेच चन्द्रभुक्तौ विशेषतः ॥ कृष्णेनारावलं वैवर्णादिनं देहिकोत्तमैः ॥
प्रातःकालो धर्मदः स्यात्संगवो राज्यदः स्मृतः ॥ मध्याह्ने सर्वसिद्धिः स्यात्सायाह्ने मध्यमो भवेत् ॥ रजनीमंत्रदाने तु निषिद्धा देशिकोत्तमैः ॥ का
लवर्जनकर्तव्या ग्रहणे चन्द्रसूर्ययोः ॥ पुण्यपक्षे त्रेकुरुक्षेत्रे देवीपीठचतुष्टये ॥ तथा रत्नसागरे ॥ सतीर्थं च विष्णुग्रसे तत्तु दामन पर्वणि
मंत्रदीक्षां प्रकुर्वीत मासर्क्षादीन्न शोधयेत् ॥ अत्र सूर्यसोमग्रहणयोर्दीक्षायां समानकालतोक्ता तथापि ग्रहणावशं सकाति वचना
नि सूर्यग्रहणापराणिवर्जयानि ॥ सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत् ॥ सूर्यग्रहणकालेन समो नान्यः कदाचन ॥ अत्र यद्य
क्तं सर्वमनन्तं फलदं स्मृतम् ॥ तथा सतिथिरत्नादिशोधनं सूर्यपर्वणि ॥ दद्यात्तीर्थ्यं च गृह्णीयात्तस्मिन्काले गुरोर्वरः ॥ सिद्धि
र्भवति यत्नस्य विनाभ्यासेन पार्वति ॥ इति चिन्तामणिकालिकोक्तवचोः सूर्यग्रहणस्यैव विधायकवचनदर्शनात् ॥ चन्द्रग्रहे
वयाधीक्षाया दीक्षावतवारिणाम् ॥ जनकस्य तु या दीक्षा दारिद्र्यं सप्तजन्मसु ॥ इति योगिनीतन्त्रे ॥ चन्द्रग्रहणे दीक्षानिषिद्धत्व

59
॥ राम ॥
॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनदर्शनात् ॥ उक्तरजनीमन्त्रदाननिषेधदर्शनाच्चेति ॥ सूर्योपरागकालेषु परागसाधारणतया नामन्त्रसंस्कारइति ज्ञेयम् ॥ किन्तु च
न्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ॥ मन्त्रमात्रप्रकथनमुपदेशः सउच्यते ॥ इति कालिकोक्तवचनान्मन्त्रान्तरेषु विधिवद्दीक्षितानां
कौतुकार्थमन्यमन्त्रग्रहणेच्छा चेद्भवति तदा निजगुरोरेवसकाशात्तन्मन्त्रग्रहणकालोपुपदेशोनिरूपितोमन्त्रग्रहणेन दोषावहः ॥
इतिदीक्षाकाल ॥ ॥अथदीक्षाप्रयोग ॥ ॥दीक्षोपदेशदिनात्पूर्वेतृतीयदिनेक्षौरे वर्ज्जनादिकृत्वा हविष्यादिनेकभक्तं विधाय ॥ द्वि
तीयदिनेस्नानादिकं विधाय ॥ ॐ तत्सदद्येत्यादिदेशकालौ स्मृत्वा ॥ अमुकगोत्रो ऽमुकदेवशर्म्माहं छरीराधिकरणकज्ञानाज्ञानयापत्र
क्षयकामः सहस्रगायत्रीजपं गोदानं वा करिष्ये इति गुरवे गां दक्षिणां वा दत्वा ॥ यथाशक्त्युपवासं हविष्याशनं वा कुर्यात् ॥ ततउपदेश
दिने कृतनित्यक्रियः शिष्यो दीक्षोपयोगिसामग्रीमादाय पुण्यक्षेत्रादौ गत्वा । गुर्वाज्ञया तीर्थस्नानादि विधाय प्रक्षालपाणिपादमा
चम्य ॥ ॐ अद्यकर्त्तव्यामुकदेवताया अमुकमन्त्रदीक्षाकर्म्मणि पुण्याहं भवन्तो ब्रुवन्त्वित्यादि पुण्याहं वाचयित्वा ॥ स्वस्तिवाचनं वि
धाय ॥ ॐ तत्सदित्यादि धर्मार्थकाममोक्षकामोमुकदेवताया अमुकमन्त्रदीक्षार्थममुकगोत्रममुकशर्माणं गुरुत्वेन अहं वृणे
इति संकल्प्य ॥ ॐ साधु भवानास्तामिति वदेत् ॥ साधु हमासे इति गुरुर्वदेत् ॥ ॐ अर्चयिष्ये भवन्तमिति शिष्येणोक्ते ॥ गन्धपुष्पा
लङ्करणवस्त्रादिभिर्गुरुमभ्यर्च्य ॥ गुरोर्दक्षिणजानु स्पृष्ट्वा ॥ ॐ तत्सदित्यादि ॥ अमुकगोत्रोमुकशर्मामुकदेवताया अमुकमंत्रदी
क्षाकर्मण्यमुकशर्माणं गुरुं कर्मकरणाय भवन्तं वृणे । वृतोस्मीति प्रतिवचनम् ॥ ॐ यथाविहितं कर्म कुर्विति उक्ते ॥ ॐ यथाज्ञानंक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रवाणीनि गुरुर्वदेत्॥ ततः शिष्यः साञ्जलिर्गुरुमुपतिष्ठेत्॥ ततो गुरुरासनम्॥ सामान्यार्घं विधाय॥ देयमंत्रयन्त्रमुक्तक्रमेण सर्वतोभद्रा
दिमण्डलस्थकुम्भादौ देवपूजां विधाय साष्टसहस्रं स्नानं वा जप्त्वा॥ जपं समर्प्य॥ शिष्यमानीय वौषडिति मंत्रेण शिष्यमन्त्रे वाससापिधा
य॥ शिष्याञ्जलिं पुष्पैः पूरयित्वा गुरुः स्वयं मूलमंत्रमुच्चारयन् यन्त्रादौ देवतायां नैवेद्य वारं पुष्पाञ्जलिं दापयेत्॥ ततो नेत्रबन्धं दूरी
कृत्य॥ कुशासनोपविष्टं शिष्यं देहे देयमंत्रकलां न्यासं कारयित्वा॥ पुनः पञ्चोपचारैर्देवतां संपूज्य॥ शंखस्थजलेन मूलमंत्रं
पठित्वाऽष्टवारं शिष्यमभिषिंच्य॥ ततः शिष्यशिरसि हस्तं दत्वा॥ मूलमष्टोत्तरं शतं जप्त्वा॥ अमुकदेवताया अमुकमंत्रं ते ददामि इ
ति शिष्यहस्ते जलं दद्यात्॥ ददस्व मे इति शिष्यो वदेत्॥ मन्त्रोयमावयोस्तुल्यफलदो भवत्विति गुरुर्वदेत्॥ ततो देहि मे ददामि ते इ
ति उभावपि पठेताम्॥ ततस्त्र्यादियुक्तं मन्त्रं॥ पश्चिममुखस्य शिष्यस्य दक्षिणकर्णे प्राङ्मुखो गुरुस्त्रिः श्रावयेत्॥ वामकर्णे द्वि
रिति॥ शिष्यस्तद्देवाष्टवारान्ध्रुवं मंत्रं जपेत्॥ ततो गुरुः स्वशक्तिरक्षार्थं स्वमंत्रं दत्तमंत्रं वाष्टाधिकं सहस्रं शतं वा जपेत्॥ ततः
शिष्यश्चावमस्य देवतां संपूज्य सञ्जपं समर्प्य स्तुत्वा॥ गुरुपादयमेयनितनस्तिष्ठेत्॥ ततो गुरुः ॐ तिष्ठवत्स मुक्तोसि सम्यगाचारवा
न्॥ भव कीर्तिश्रीकान्तिपुत्रायुर्बलारोग्यं सदास्तु मे॥ इत्युक्त्वा शिष्यमुत्थापयेत्॥ ततः शिष्यो यथाशक्ति सुवर्णादिकमादाय ॐ
अद्यास्मादि अमुकगोत्रोमुकशर्मामुकदेवताया अमुकमंत्रस्य दीक्षाकर्मणः प्रतिष्ठार्थं दक्षिणामिमां सुवर्णमग्निदेवतममुकगो
त्रायामुकशर्मणे गुरवे तुभ्यमहं संप्रददे इति दक्षिणां दत्वा॥ अन्यदपि गोभूम्यन्नादि दत्वा॥ दीक्षासामर्थ्यं गुरवे दद्यात्॥ गुरुशि

60

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्यरूपवासो दीक्षादिने निषिद्ध इति ॥ इति दीक्षा ॥ अथ मन्त्राणां दश संस्काराः ॥ यथाऽवर्णादिपात्रे कनकादिलेखन्या मातृकायन्त्रं कु
ङ्कुमादिना विलिख्य तस्मात् क्रमेण स्वेष्टमन्त्रगतमेकैकं स्वरं व्यञ्जनं चैकत्रोद्धृत्य यथापूर्वं संयोज्याऽन्यत्र मन्त्रं लिखेदिति जननं संस्का
रः प्रथमः ॥ १ ॥ मन्त्राक्षराणि प्रणवपुटितानि कृत्वा प्रत्येकं शतं जपेदिति जीवनम् ॥ २ ॥ एककृतानि मन्त्राक्षराणि विलिख्य मि
निवायुबीजेन मध्यमानामिकाङ्गुष्ठाग्रस्थितचन्दनेनाम्भसा प्रत्येकं शतं धा दशधा वा ताडयेदिति ताडनम् ॥ ३ ॥ मन्त्रं विलिख्य
मन्त्रवर्णसमसङ्ख्यककरवीरपुष्पैः सकृदिमिति वह्निबीजेन हन्यादिति बोधनम् ॥ ४ ॥ अथ कृतानि मन्त्राक्षराणि विलिख्य
मन्त्रवर्णसमसङ्ख्याश्वत्थदलजलेन मन्त्राक्षराणि प्रत्येकं शतं धाष्टधा वाऽमुकमन्त्रस्यामुकवर्मणाभिषिञ्चामि नम इत्यभि
षिञ्चेदित्यभिषेकः ॥ ५ ॥ सुषुम्णामूलमध्याद्युत्थितं मूलं संचिन्त्य ॐ ह्रौं इति ज्योतिर्मन्त्रे पूर्ववच्छतं धा दशधा वाऽमुकमन्त्रस्य सहज
मागन्तुकं मायोत्थमिति मलत्रयं निर्दहामीति विमलीकरणम् ॥ ६ ॥ मन्त्रवर्णान् पृथक्कृतान् विलिख्य तन्मन्त्रेण शतं कुअभिमं
त्रितेन स्वर्णोदकेन कुशोदकेन पुष्पोदकेन वा प्रत्येकं शतं धा सप्तधा वा तान् मूलेन प्रोक्षयेदिति आप्यायनम् ॥ ७ ॥ देयमन्त्रं विलि
ख्य तत्र जलधारापातेन तन्मनुद्र्यादेयमन्त्रमुच्चार्यामुकमन्त्रं तर्पयामि स्वाहेति शतं धा तर्पयेदिति तर्पणम् ॥ तर्पणद्रव्यं श्री
विष्णौ कर्पूरकुङ्कुमजलं ॥ शिवे घृतदुग्धे साके मधु ॥ ८ ॥ ॐ ह्रीं श्रीं मूलम् ॥ श्रीं ह्रीं ॐ इत्यष्टोत्तरशतं जपेदिति दीपनम् ॥ ९ ॥ एव
नमस्संस्कारान् कृत्वाऽष्टोत्तरशतं जप्त्वा गोपयेदिति गोपनम् ॥ १० ॥ एवञ्जननजीवनताडनबोधनाभिषेकविमलीकरणाप्यायन

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ ६१ ॥

तर्पणादीपनगोपनाख्यदशसंस्कारसंस्कृतो मन्त्रः सिद्धिदो भवति ॥ ॥ इति दीक्षाप्रयोगः ॥ ॥ अथैवं विधिना दीक्षितस्य पुरश्चर
णविधिरुच्यते ॥ तन्त्रयोगिनीहृदये ॥ गुरोराज्ञां समादाय प्रभुत्वात्करणेन च ॥ ततः कुर्यात्पुरश्चर्यां मन्त्रसंसिद्धिकामयाः ॥ १ ॥ जी
वहीनो यथा देही सर्वकर्मसु न क्षमः ॥ पुरश्चरणहीनोपि तथा मन्त्रः प्रकीर्तितः ॥ २ ॥ तस्मादादौ स्वयं कुर्याद्गुरुं वा कारयेद्बुधः ॥ गुरोरभा
वे विप्रं वा सर्वशास्त्रहिते रतम् ॥ ३ ॥ स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितम् ॥ स्त्रियं वा सद्गुणोपेतां सपुत्रां वा नियोजयेत् ॥
४ ॥ गौतमीये ॥ चैत्रमासमथवा कुर्यात्कुम्भर्क्षे गुरुवासनात् ॥ पादत्रयं शुक्लपक्षे च माधवे मासि तत्तिथौ ॥ आरभेदमलायां वा पुरश्चर
णसिद्धये ॥ वैशम्पायनसंहितायाम् ॥ चन्द्रतारानुकूले च शुक्लपक्षे शुभे हनि ॥ प्रारम्भं कारयेच्चैव सुनेत्रे विलोमेन च ॥ आदौ पुरश्च
र्यया कर्तुं स्थाननिर्णय उच्यते ॥ कुलार्णवे पुण्यक्षेत्रे नदीतीरे गुहायां पर्वतमस्तके ॥ तीर्थप्रदेशे सिन्धूनां संगमः पावनमूवनम् ॥
उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः ॥ तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम् ॥ अश्वत्थामलकीमूलं गोशाला जलमध्यतः ॥ देव
तायतनं कूलं समुद्रस्य निजं गृहं तथा ॥ गृहे शतगुणं विद्यात् गोष्ठे लक्षगुणं भवेत् ॥ कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ ॥ म्ले
च्छदुष्टमृगव्याघ्रशङ्कातङ्कविवर्जिते ॥ एकान्ते पावने निन्दारहिते भक्तसंयुते ॥ स्वदेशे धार्मिके देशे सुभिक्षे निरुपद्रवे ॥ रम्ये भक्त
जनस्थाने निवसेत्तापसप्रिये ॥ गुरूणां सन्निधाने च चित्तैकाग्र्यस्थले तथा ॥ एषामन्यतमस्थानमाश्रित्य जपमारभेत् ॥ यच्चयामे
जयेन्मंत्री तत्र कुर्म्मं विचिन्तयेत् ॥ गौतमीये ॥ पर्वते सिन्धुतीरे वा पुण्यारण्ये नदीतटे ॥ यदि कुर्यात्पुरश्चर्यां तत्र कुर्मं न चिन्तयेत्

61
॥ राम ॥
॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इति॥ ॥अथकूर्मचक्रोद्धारः॥ ॥चतुरस्रांभुवंभित्वाकोष्ठानांनवकंलिखेत्
पूर्वकोष्ठादिविलिखेत्स्वरवर्गाननुक्रमात्॥१॥ लक्षमीशेमध्यकोष्ठेस्वरानृषु
ग्मान्क्रमाल्लिखेत्॥ दिक्षुपूर्वादितोयत्रक्षेत्राद्यक्षरसंस्थितिः॥२॥ दीयंतत्रम
मास्थायक्रुतंकर्मशुभप्रदम्॥ तत्स्थानंतुमुखंप्रोक्तंहस्तावुभयतस्थितौ॥३॥
कोष्ठेकुक्षिरुभेयादेयद्भेषंपुच्छमीरितम्॥ कर्मस्थानेनविभजेन्मध्येस्थम
पिभागतः॥४॥ मुखस्थोत्तमनेसिद्धिंकरस्थःसमः॥ वायजीवनः॥ उदासी
नकुक्षिसंस्थःपादस्थोदुःखमाप्नुयात्॥ पुच्छस्थःपीडनेमंत्रीवध्वनोच्चाटना
दिभिः॥ कूर्मचक्रमिदंप्रोक्तंमंत्राणांसिद्धिदायकं॥६॥ कूर्मचक्रमविज्ञाययः
कुर्याज्जपयज्ञकम्॥ नसयज्ञफलंनास्तिसर्वानर्थायकल्पते॥७॥ इतिकूर्मचक्रो
द्धारः॥ ॥अथपुरश्चरणेभक्ष्यादिनियमः॥ ॥अंगस्तसंहितायां॥ दधिक्षीरं
घृतंगव्यंमैक्षवंगुडवर्जितम्॥ तिलाश्चैवसितामुद्गाःकंडकंमूलवर्जितम्॥
नारिकेलफलंचैवकदलीलवलीतथा॥ आम्रमामलकंचैवयवनसंचहरीतकी



CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ६२ ॥

स्वकालेरहविष्याश्नस्वासमन्यनेबुधैः ॥ भुञ्जानोवा हविष्यान्नं शाकं यावकमेववा ॥ पयोमू
लफलंवापियत्र यत्रोपलभ्यते ॥ यन्तु योगिनीतंत्रे ॥ चिंचीचनालिकाशाकंकलायंचचणकं
तथा ॥ कदम्बनालिकेलञ्च त्रनेकुष्माण्डकं त्यजेत् ॥ ॥ इति व्रतनामविषयम् ॥ अथ
वर्ज्यानि ॥ वर्जनीयं मधुक्षीरं लवणं तैलमेव च ॥ ताम्बूलं कांस्यपात्रं च दिवाभोजनमेव च
क्षारं च लवणं मांसं भृंजनभोजनम् ॥ माषाढकीमसूरांश्च कोद्रवं चणकं तथा ॥ कोटिलं
क्षौरमभ्यंगं तन्निवेदितभोजनम् ॥ असंकल्पितकर्म च वर्जयेत् ईनादिकं ॥ स्नायाच्च यः
च गव्येन केवलामलकेन वा ॥ मन्त्रं जप्त्वान्यपानीयैः स्नानवमनभोजनम् ॥ कुर्याद्यथो
क्तविधिना त्रिसंध्यं देवतार्चनम् ॥ अपवित्रकरो नग्नः शिरसि प्रावृतोपि वा ॥ प्रलपन्प्रज
पेद्यावत्तावन्निष्फलमुच्यते ॥ कुलार्णवेपि ॥ यस्यान्नपानपुष्टाङ्गः कुरुते धर्मसंचयम्
अन्नदातुः फलस्यार्द्धं कर्तुरर्धं न संशयः ॥ तस्मात्सर्वप्रयत्नेन परान्नं वर्जयेत्सुधीः ॥
पुरश्चरणकाले तु सर्वकर्मसु शास्त्रवित् ॥ जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात्
मनोदग्धं परस्त्रीभिः कथंसिद्धिर्वरानने ॥ परान्नं भिक्षेतरविषयम् ॥ भिक्षायां तस्य

62
॥ राम ॥
॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वबोत्पादकत्वात् ॥ तथा च ॥ वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम् ॥ सत्कुलस्थानजातानामभीक्ष्णशीलीयजन्मनाम् ॥ सहकृत्वरि
नेशदेवप्रणवं समुदीरयेत् ॥ प्रोक्ते पार्श्वे नरे पार्श्वे प्राणायामं सहस्रवेत् ॥ बहुप्रलापी आचमन्य प्राणानितनोजयेत् ॥ भुक्तेप्येवं त
थास्पृश्यस्यानानां स्पर्शनेपि च ॥ एवमादांश्च नियमानुच्चरण्याक्रन्वरेत् ॥ विण्मूत्रोत्सर्गशंकादियुक्तः कर्म करोति यः ॥ जपार्च्चना
दिकं सर्वमपवित्रं भवेत्प्रिये ॥ मलिनाम्बरकेशादिमुखदौर्गंध्यसंयुतः ॥ योजयेत्तं दहत्याशु देवता गुप्तिसंस्थिता ॥ आलस्यं जृंभणं
निद्रां क्षुतं निष्ठीवनं भयम् ॥ नीचांगस्पर्शनं कोपं जपकाले विवर्जयेत् ॥ एवमुक्तविधानेन विलंबं त्वरितं विना ॥ उक्तसंख्यं जपं कु
र्यात्पुरश्चरणसिद्धये ॥ देवतागुरुमंत्राणामैक्यं संभावयन्धिया ॥ जपेदेकमनाः प्रातःकालमध्यंदिनावधि ॥ यत्नं संख्यया समार
ब्धं तत्कर्तव्यमहर्निशम् ॥ यदि न्यूनाधिकं कुर्याद्व्रतभ्रष्टो भवेन्नरः ॥ कुलार्णवेपि ॥ न्यूनातिरिक्तकर्माणि न फलंति कदाचन ॥ यथा
विधिकृतान्येव तत्कर्माणि फलंति हि ॥ भूशय्या ब्रह्मचारित्वं मौनं चर्यार्यसेविना ॥ नित्यं त्रिषवणं स्नानं क्षुद्रकर्म विवर्जनम् ॥ नि
त्यपूजा नित्यदानं देवतास्तुतिकीर्तनम् ॥ नैमित्तिकार्चनं चैव विश्वासो गुरुदेवयोः ॥ जपनिष्ठा द्वादशैते धर्माः स्युर्मन्त्रसिद्धिदाः ॥
स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् ॥ असत्यभाषणं ब्रह्मनिंदनं परिवर्जयेत् ॥ सत्येनापि न भाषेत जपहोमार्च्च(
नादिषु ॥ अन्यथानुष्ठितं सर्वं भवत्येव निरर्थकम् ॥ ॥ योगिनीहृदये ॥ शयीत कुशशय्यायां शुचिवस्त्रधरः सदा ॥ प्रत्येहं क्षा
लयेच्छय्यामेकाकी निर्भयः स्वपेत् ॥ असत्यभाषणं वा वक्रकुटिलां परिवर्जयेत् ॥ वर्जयेत्स्त्रीनवाद्यादिश्रवणं नित्यदर्शनम् ॥

CC-0. In Public Domain. Digitization by eGangotri

अभ्यंगं गंधतैले पंच पुष्पधारणमेव च ॥ त्यजेदुष्णोदकस्नानमन्यदेवत्रपूजनम् ॥ नन्दैव ॥ नैकवासा जपेन्मंत्रं वहुवाताकुलोपि वा
पतितानामन्त्यजानां दर्शने भाषणेऽङ्कने ॥ क्षुतेधोवायुगमने जृंभणे जपमुत्सृजेत् ॥ तथा नस्य यन्त्राद्रोप्राणायाम षडंगकं ॥ कृ
त्वा सम्यग्जपेच्छेषं जपं त्वा सूर्यादिदर्शनम् ॥ आदिशत्वादग्निविप्रा सत्यां च ॥ नन्दावर्ते ॥ मनसं हृदयं श्रोत्रं चं मौनं मंत्रार्थचिंतनम् ॥
अव्यग्रमनिनिर्वेदं जपसंपनिहेतवः ॥ उष्णीषी कंचुकी नग्नो मुक्तकेशो गलावृतः ॥ अपवित्रकरोऽशुद्धः प्रलपं न जपेत्क्वचित् ॥
अनासनः शयानो वा गच्छन्भुञ्जान एव वा ॥ रथ्यायामशिवस्थाने न जपेन्निमिरालये ॥ उपानद्गूढपादो वा यानशय्यासनस्तथा
प्रसार्य न जपेत्पादावुत्कटासन एव वा ॥ मार्जारं कुक्कुटं क्रौंचं श्वानं सूद्रं कपिं जलम् ॥ दृष्ट्वा च न जपेत्तस्मात्स्पृष्ट्वा स्नानं विधीयते
सर्वत्र जपयेत्यनियमः ॥ मानसे तु न ॥ नथा च ॥ अशुचिर्वापि गच्छन्निष्ठं स्वयन्नपि ॥ मैत्रेकशरणो विद्वान्मनसैवं समाचरेत् ॥ नदो
षो मानसे जापे सर्वदेशेपि सर्वदा ॥ जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ॥ सर्वेषामेव यज्ञानां जायते सौ महाफलः ॥ जपेन दे
वताः नित्यं स्तूयमानाः प्रसीदति ॥ प्रसन्ना विपुलान्कामान्दद्युर्मुक्तिं च शाश्वतीं ॥ यक्षरक्षःपिशाचाश्च यहाश्च सर्वे च भीषणाः ॥ जा
पिनं नोपसर्पन्ति भयभीतास्समन्ततः पापमनारदायपोः ॥ यावंतः कर्मयज्ञाश्च प्रदिष्टानि तपांसि च ॥ सर्वे ते जपयज्ञस्य कलां ना
र्हन्ति षोडशीम् ॥ माहात्म्यं वाचिकस्यैतत् जपयज्ञस्य कीर्तितम् ॥ तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥ मानसः सिद्धिकामानां
पुष्टिकामैरुपांशुकः ॥ वाचिको मारणे चैव अशस्तो जपई रितः ॥ ॥ गोतमीये ॥ ॥ शक्त्या त्रिषवणस्नानमन्यथापि सकृच्च वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिसंध्यं प्रजपेन्मंत्रं पूजनं तत्समं भवेत् ॥ संध्यात्रये पूजां कृत्वा जपमष्टोत्तरशतमित्यर्थः ॥ एकदा वा भवेत्पूजा न जपेत्पूजनं विना ॥ ज
पांतो वा भवेत्पूजा पूजां नैवा जपेत्ततः ॥ प्रातःकालं समारभ्य जपेन्मध्यंदिनावधि ॥ मध्यंदिनावधीतिन नियमपरम् ॥ किंत्वधिक
कालत्वव्यवच्छेदपरम् ॥ अन्यथा तन्मम यज्जपनियममेकदाविच्छिन्नं जाते न समाप्तिं दिवसे प्रतिनियतदिवसीयजपसंख्याया अ
पूर्णत्वे अधिकत्वे न्यूनत्वे न अधिकत्वे वा नियमभंगः स्यात् ॥ मनसश्च हृत्पविषयान्मंत्रार्थगतमानसः ॥ न द्रुतं न विलंबं च जपेन्मौ
क्तिकपंक्तिवत् ॥ जपं स्याद्दक्षिणे हस्ते निर्माणसोपांशुवाचिके ॥ धीया दक्षरश्रेणिं वा घर्षरौ स्वरपदात्मिकां ॥ उच्चरेदर्थमुद्दिश्य मानस
स्स जपः स्मृतः ॥ जिह्वोष्ठौ चालयेत्किंचिद्देवतागतमानसः ॥ किंचिच्छ्रवणयोग्यस्यादुपांशुस्स जपः स्मृतः ॥ मंत्रमुच्चारयेद्वाचा वाचिक
स्स जपः स्मृतः ॥ ॥विष्णुधर्मोत्तरे॥ उच्चैर्जपाद्विशिष्टस्यादुपांशुर्दशभिर्गुणैः ॥ जिह्वाजपश्शतगुणस्सहस्रो मानसः स्मृतः ॥ ॥अन्यं
तरे ॥ उच्चैर्जपोधमः प्रोक्त उपांशुर्मध्यमः स्मृतः ॥ उत्तमो मानसो देवि त्रिविधः कथितो जपः ॥ अतिहृस्वो व्याधिहेतुरतिदीर्घो वसुक्षय
यः ॥ अक्षराक्षरसंयुक्तो जपेन्मौक्तिकहारवत् ॥ मनसा यः स्मरेत्स्तोत्रं वचसा वा मनुं जपेत् ॥ उभयं निष्फलं यातिः भिन्नभाण्डोदकं
यथा ॥ ॥गौतमीये॥ पशुभावे स्थिता मंत्राः केवला वर्णरूपिणः ॥ सौषुम्णाध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवंति ते ॥ मंत्राक्षराणि चिच्छक्तौ
प्रोतानि परिभावयेत् ॥ तामेव परमव्योम्नि परमामृतसंहिते ॥ दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्विनेति ॥ ॥कुलार्णवेपि
मनोन्यत्र शिवोन्यत्र शक्तिरन्यत्र मारुतः ॥ न सिध्यति वरारोहे कल्पकोटिशतैरपि ॥ जातसूतकमादौ स्यादंते च मृतसूतकं ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

॥रत्ना॥ सूतकद्वयसंयुक्तोयोमंत्रस्तन्नसिध्यति॥गुरोःसद्गृहीत्वामंत्रंयावज्जपेद्द्विया॥सूतकद्वयनिर्मुक्तोमंत्रस्ससर्वसिद्धिदः॥तथैव
॥६४॥ ॥ ॥ब्रह्मबीजंमनोर्देवाबाद्यंतेयत्रमेश्वरी॥सप्तवारंजपेन्मंत्रंसूतकद्वयमुक्तये॥मंत्रार्थमंत्रचैतन्यंयोनिमुद्रांनवेत्तियः॥श
तकोटिजपेनापिनतस्यसिद्धिर्नजायते॥लुप्तबीजाश्चयेमंत्रानदास्यंतिफलंप्रिये॥मंत्राश्चैतन्यसहितास्सर्वसिद्धिकराःस्मृताः॥
चैतन्यसहितामंत्राःशोक्ताश्चकेवलं——॥फलंनैवप्रयच्छंतिलक्षकोटिजपैरपि॥मंत्रोच्चारेकृतेयादृक्स्वरूपंप्रथमंभवेत्॥शतेस
हस्रेलक्षेवाकोटिजापेनतत्फलम्॥हृदयेग्रंथिभेदश्चसर्वावयववर्द्धनम्॥आनन्दाश्रूणिपुलकोदेहावेशःकुलेश्वरी॥गद्गदोक्
तिश्चसहसाजायतेनात्रसंशयः॥सकृदुच्चरितेप्येवंमंत्रेचैतन्यसंयुते॥दृश्यंतेप्रत्ययायत्रपारंपर्यंतदुच्यते॥मासमात्रंजपेन्मं
त्रंभूतलिप्यानुसंपुटम्॥क्रमोत्क्रमात्मकहस्तंवतस्यसिद्धोभवेन्मनुः॥ ॥नवभूतलिपि॥ ॥पंचह्रस्वासंधिवर्णाव्योमराग्निजलंधराः
अंत्यमाद्यंद्वितीयंचचतुर्थंमध्यमंक्रमात्॥पंचवर्णाभरणाःस्युर्वान्तस्थेतेन्दुभिन्नकाः॥एषाभूतलिपिर्ज्ञेयाद्विचत्वारिंशदक्षरैः॥
॥ गोतमीये ॥एवंजपंपुराकृत्वातेजोरूपंसमर्पयेत्॥देवस्यदक्षिणेहस्तेकृत्वापुष्पार्घ्यवारिभिः॥सफलंतद्विभाव्यैवप्राण 64
यामंसमाचरेत्॥जपस्यादौजपान्तेचत्रितयंत्रितयंचरेत्॥शक्तिविषयेवामहस्ते॥ ॥तथाच॥एवंजपंपुराकृत्वागंधाक्षत ॥राम॥
कुशोदकैः॥जपंसमर्पयेद्देव्यावामहस्तेविचक्षणः॥जपान्तेप्रत्यहंमंत्रीहोमयेत्तद्दशांशतः॥तर्पणंचाभिषेकंचतद्दशांशंततोमु ॥६४॥
ने॥प्रत्यहंभोजयेद्विप्रान्न्यूनाधिकप्रशान्तये॥अथवासवपूर्वंचहोमादिकमथाचरेत्॥यस्यवाञ्जपःप्रोक्तस्तद्दशांशमनुक्रमा

त् ॥ तत्तद्वीजयांते च होमं कुर्याद्दिने दिने ॥ तथा होमाद्यशक्तौ सतत्कुमारीये ॥ यद्यदंगं भवेद्भंगं तत्तत्संख्या द्विगुणो जपः ॥ होमाभावे
जपः कार्यो होमसंख्याचतुर्गुणः ॥ विप्राणां क्षत्रियाणां च रससंख्यागुणः स्मृतः ॥ वैश्यानां वसुसंख्याकमेवा स्त्रीणामयं विधिः ॥ यं व
र्णमाश्रितः शूद्रस्स च तस्य विधिं चरेत् ॥ शूद्रस्य विप्रभक्तस्य तत्फलस्य दशो जपः ॥ तन्त्राद्यशक्तस्य तु योगिनीहृदये ॥ ॥ होमकर्मस्व
शक्तानां विप्राणां द्विगुणो जपः ॥ इतरेषां तु वर्णानां त्रिगुणादि समन्वितः ॥ एतेन स्त्रीशूद्राणामपि होमाधिकारः ॥ तथा च शूद्राणांज्य
स्त्वमिति कुण्डप्रकरणेऽग्रारदायां स्त्रीणां होमाधिकारस्तत्र लाजैस्त्रिमधुरोपेतैर्होमः कन्यां प्रयच्छति ॥ अनेन विधिना कन्या वरमाप्नो
ति वांछितम् ॥ इति वचनेभ्यस्तस्य ब्राह्मणद्वारा ॥ ॐकारोच्चारणाद्धोमाच्छालग्रामशिलार्चनात् ॥ ब्राह्मणीगमनाच्चैव शूद्रश्चाण्डा
लतां व्रजेत् ॥ ॥ इति सारशान्तिवेषा ॥ ॥ तथा स्त्रीणामपि सर्ववैदिककर्मसु शूद्रतुल्यत्वप्रतिपादनात् ॥ स्त्रीशूद्रकर्तृसंसर्गेर्विप्र
यानसमी मन्त्रीति भगवद्वचनात् ॥ ॥ अथ नारायणाकल्पे ॥ अष्टाक्षरो महामन्त्रः सप्तार्णास्तु स्त्रीशूद्रयोः ॥ प्रणवादिश्चैव मन्त्रो
नस्त्रीशूद्रप्रसस्यते ॥ इति सर्वत्र स्त्रीणां शूद्रवच्च व्यवहारात् ॥ सर्वेषां वा द्विगुणो जपः ॥ ॥ तथा च वाशिष्ठे ॥ यद्यदंगं विहीयेत
तत्संख्या द्विगुणो जपः ॥ कर्तव्यश्चांगसिद्ध्यर्थं तदृशाक्तेन भक्तितः ॥ न चेदंगं विहीयेत न सिद्धिमवाप्नुयात् ॥ तथागस्त्यसंहि
तायाम् ॥ ॥ यदि होमे न शक्तस्स्यात्पूजायां तर्पणेऽपि वा ॥ तावत्संख्याजपेनैव ब्राह्मणाराधनेऽपि वा ॥ भवेदंगद्वयेनैव पुरश्चर
णमार्जनैः ॥ ॥ ततश्च ॥ गुरवे दक्षिणां दद्यादन्नाजनाच्छादनादिभिः ॥ गुरुसंतोषमात्रेण मन्त्रसिद्धिर्भवेद्ध्रुवम् ॥ सम्यक्प्रसिद्धैक

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ६५ ॥

मंत्रस्यपंचांगोपासनेनच ॥ सर्वमंत्राश्चसिध्यंतित्वत्प्रसादात्कुलेश्वरी ॥ गुरुमूलमिदंसर्वमित्याहुस्तंत्रवेदिनम् ॥ एकग्रामेस्थितो(
नित्यंगत्वावंदनंवैगुरुं ॥ गुरुदेवपरंब्रह्मतस्मादादेनमर्चयेत् ॥ मिष्टान्नंवहुसत्कार्यभुंजीनवटुभिस्सह ॥ एवंसद्गमनुर्मंत्रीसा
धयेसकलेप्सितान् ॥ ॥अथवान्यप्रकारेणपुरश्चरणमुच्यते ॥ ग्रहणेर्कस्यचेन्दोर्वाशुचिःपूर्वमुपोषितः ॥ नद्यांसमुद्रगामिन्यां
नाभिमात्रोदकेस्थितः ॥ स्पर्शादिमुक्तिपर्यंतंजपेन्मंत्रमनन्यधीः ॥ नद्यभावेतुनत्वेव ॥ यद्वापुरपोदकेस्नात्वाशुचिःपूर्वमुपोषितः ॥
ग्रहणादिविमोक्षान्तंजपेन्मंत्रंसमाहितः ॥ उपवासासंभवे ॥ ॥अथवान्यप्रकारेणपुरश्चरणकोविधिः ॥ चन्द्रसूर्योपरागेच(
स्नात्वाप्रयतमानसः ॥ स्पर्शादिमोक्षपर्यंतंजपेन्मंत्रंसमाहितः ॥ दृष्ट्वास्नात्वानुग्रहंकल्योविमोक्षान्तंचरेजपम् ॥ जपाद्दशांशतोहो
मस्तथाहोमान्तर्पणम् ॥ एवंकृत्वातुमंत्रस्यजायतेसिद्धिरुत्तमा ॥ ॥अथगोपालमंत्राणांतर्पणंहोमसंख्यया ॥ ॥वर्णानां
मिहसर्वेषामित्यागमविदोविदुः ॥ इतिवचनात् ॥ गोपालमंत्राणांतुहोमतुल्यंतर्पणम् ॥ सनत्कुमारेपि ॥ ॥तावद्यज्ञादिकं
कुर्यात्तुहुताशेच्छुचिःप्रमान् ॥ इतिजपन्मन्त्रसिद्धिर्भवत्येवनसंशयः ॥ अग्रादेस्तुरोधेनयद्विजापंसजेन्नरः ॥ सभवेद्देवनाशो
हीपितृत्वस्सन्नतयत्ववधः ॥ इतिसनत्कुमारोक्त्याजपस्यावश्यकत्वं ॥ वस्तुतस्तुश्रारब्धपुरश्चरणाविषयमिदम् ॥ स्वारब्धपुरश्चरणे
यदिग्रहणंतदाश्रद्धानुरोधेनजपन्याः ॥ ॥योगिनीहृदये ॥ कलोक्तविधिनामंत्रीहोमंकुर्यात्समाहितः ॥ अथवातद्दशांशे
नहोमादींश्चसमाचरेत् ॥ तथा ॥ अनंतरंदशांशेनक्रमेणादिकंचरेत् ॥ तदनेनहर्नीपूजांकुर्यात्ब्राह्मणभोजनम् ॥ ततोमंत्र

65

॥ रात ॥
॥ ६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रसिद्धर्थैर्गुरुं संपूज्य तोषयेत् ॥ एवं च मंत्रसिद्धिस्याद्देवताश्च प्रसीदन्ति ॥ यद्यपि पुरश्चरणं तूच्यते ॥ तथापि ग्रहणपुरश्चरणं य
दं जपमात्रपरम् ॥ सूर्योदयं समारभ्य यावत्सूर्योदयावधि ॥ इत्यादौ तथादर्शनात् ॥ तत्र होमादेरभावात् ॥ तर्हि कथं ग्रहणपुरश्च
रणे होमादिवचनादेव जायते ॥ न च पुरश्चरणस्य पंचांगत्वात् ॥ सर्वत्र तदेव स्यादिति वाच्यम् ॥ ग्रहणेन द्विधान ममर्थकं स्यात्
किंच ग्रहणे होमादिनियमात् ॥ नान्यत्र ग्रहणे होमादिपुरश्चरणे होमादिविधानं न्यूनकृतिभूतपुरश्चरणे तु तत्त्वनावोधनाय
अतएव पंचांगभूतपुरश्चरणे कृतगुरुत्वं तं प्रयोगे प्यधिकारः ॥ इति प्रकरणार्थः ॥ तदकरणे तु नः केवलं जपमात्रपुरश्चरणेनाधि
कार इति सर्वसंमतिः ॥ ॥ अथ पुरश्चरणप्रयोगः ॥ ॥ तत्र तावद्भूमेः परिग्रहं कृत्वा पुरश्चरणाशकत्तृनीयदिवसे क्षौरादिकं वि
धाय। वेदिकायाश्चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रं चतुरस्रं वा आहारादिविहारार्थं परिकल्प्य तत्र कर्मचक्रात्तु रूपं मण्डपं विधा
य एकभक्तं कुर्यात् ॥ ततो द्वितीयदिने स्नानादिकं विधाय शुद्धः सन् न्यग्रोधोदुम्बरप्लक्षाणामन्यतमस्य वितस्तिमात्रान्दशकील
कान् ॐ अस्त्राय फडिति मंत्रेणाष्टोत्तरशतेनाभिमंत्रितान्दशदिक्षु ॥ ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यन्तरिक्षगाः ॥ विघ्नभूताश्च ये
त्रास्ते मम मंत्रस्य सिद्धिषु ॥ मयैतत्कीलितं क्षेत्रं परित्यज्य विहृरन्तः ॥ अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥ इत्यनेन निखन्यात्ते
षु ॐ सुदर्शनाय अस्त्राय फडिति मंत्रेणास्त्रं संपूज्य पूर्वादिक्रमेण इन्द्रादिलोकपालान्पूजयेत् ॥ ॐ भूर्भुवः स्वरिंद्रलोकपाल
इहागच्छ्यावाह्य पंचोपचारैः पूजयेत् ॥ एवमग्न्यादीन् ॥ तथाच ॥ पुराणशत्रादिकं गत्वा कुर्याद्भूमिपरिग्रहं ॥ तथा चामुकमंत्र

॥ रत्ना ॥ सपुरश्चरणसिद्धये ॥ मयेयं गृह्यते भूमिमंत्रोपसिद्धतामिमिनि ॥ कामेन् कोशमिनं स्थानं नयाचे स्वेच्छयामना ॥ नगराद्दवपि कोशं
॥ ८६ ॥ कोशयुग्ममथापि वा ॥ आहारादिविहारार्थं नावनीं भूमिमाक्रमेत् ॥ क्षीरवृक्षोद्भवान्कीलान् अस्त्रमंत्राभिमंत्रितान् ॥ निखनेद्दश
दिग्भागे तेष्वस्त्रं चैव पूजयेत् ॥ लोकपालान्प्रनलेषु गंधाद्यैः पूजयेत्सुधीरिति ॥ ततो मध्यस्थाने क्षेत्रपालं वास्तोशं च वस्त्रं पूज्य सर्व
विघ्नविनाशार्थं गणपतिं पूजयेत् ॥ ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्मा मन्कर्तव्यामुकमंत्रपुरश्चरणाकर्मणि विघ्नविनाशार्थं
गणेशपूजामहं करिष्ये ॥ इति संकल्प्य वेदिमध्ये पंचोपचारैर्गणेशं पूजयेत् ॥ तदुक्तं ॥ क्षेत्रपालादिकं तत्र पूजयेद्विधिवत्ततः ॥ क्षे
त्रेशं वास्तुनाथं च विघ्नराजं समर्चयेत् ॥ दिक्पतिभ्यो बलिं दद्यात्ततः क्षेत्रं समाविशेत् ॥ ततो पूजितदेवताभ्यो माषभक्तादिबलिं
दद्यात् ॥ ततः येऽत्र तिष्ठंति कर्मणोऽस्य स्थाननिवासिनः ॥ मातरो भूतरूपाश्च गणाधिपतयश्च ये ॥ विघ्नभूताश्च ये चान्ये दिग्वि
दिक्षु समाश्रिताः ॥ सर्वे ते प्रीतमनसः प्रतिगृह्णन्तु इमं बलिं ॥ इत्यनेनाष्टदिक्षु भूतेभ्यो बलिं दद्यात् ॥ ततो गायत्रीं जपेत् ॥ तथा
प्रातः स्नात्वा च गायत्र्याः सहस्रं प्रयतो जपेत् ॥ ज्ञाताज्ञातस्य पापस्य क्षयार्थे प्रथमं ततः ॥ इति विद्याधराचार्यः ॥ यतः ॥ प्रातः स्नात्वा 66
च गायत्र्या अयुतं प्रयतो जपेत् ॥ तत् ॥ पुनरप्यनया पद्धंकया ॐ अद्येत्यादि ॥ अमुकगोत्रोऽमुकदेवशर्माऽज्ञाताज्ञातपापक्षयकामो ॥ राम ॥
ष्टोत्तरशतसहस्रसावित्रीजपमहं करिष्ये ॥ ॥ इति संकल्प्य ॥ तत उपवासं हविष्यं वा कुर्यात् ॥ परदिने ऽ[illegible]स्नानादिकं कृत्वा ॥ ८६ ॥
स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् ॥ अद्येत्यादि अमुकगोत्रोऽमुकशर्माऽमुकदेवतायाऽमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्षयपू

र्वकतन्मंत्रसिद्धिकामोयारम्भयावत्कालेनसिद्धिर्भवतितावत्कालममुकमंत्रस्येयत्संख्यजपनदशांशहोमनदशांशतर्प्पणनदशांशब्रा
ह्मणभोजनरूपपुरश्चरणमहंकरिष्येइतिसंकल्प॥अनन्तरंद्विधारणायामादिकंकृत्वास्वस्वशुभावद्वास्वस्वयथानुक्रमेणदेवतां
संपूज्यदीपेप्रज्वलितेदेवतांहृदयेकृत्वाप्रातःकालमारभ्यमध्यंदिनंयावज्जपंकुर्यात्॥तथाचस्वतंत्रतंत्रे॥नित्यंनैमित्तिकंकाम्यं
सापेक्षंपूर्वपूर्वतः॥अन्यथावैव्यर्थंस्यात्कुर्यात्तावत्परस्परम्॥ततोहोमसतर्पणंतुतीर्थैश्चन्द्रमिश्रितैः॥जलेदेवंसमावाह्यपा
द्याद्यैरुपचारकैः॥संपूज्यविधिवद्भक्त्यापरिवारसमन्वितम्॥एकैकमञ्जलिंतोयंपरिवारान्प्रतर्पयेत्॥ततोहोमदशांशेनतर्प
येत्परदेवताम्॥तर्पणवाक्यंतुस्नानप्रकरणेबोद्धव्यं॥अभिषेकवाक्यंतुमूलमुच्चार्यतदंतेदेवंनाभिषम्॥द्वितीयांतमुच्चार्याभि
षिञ्चाम्यमेनतु॥अभिषिंचेत्स्वमूर्द्धानंततोयैःकुंभास्थमुद्रया॥शक्तिविषये॥मूलान्तेनामउच्चार्यषिंचयामिनमःपदम्॥इतिनीलतं
त्रे॥मूलान्तेनामउच्चार्यषिञ्चामिचनमःपदम्॥ ॥ततोदक्षिणा॥अद्यकृतेनदमुकदेवतायाअमुकमंत्रपुरश्चरणकर्मणःसांगता
सिद्ध्यर्थंदक्षिणामिदंकांचनंवह्निदैवतंयथानामगोत्रायगुरवेतुभ्यमहंसंप्रददे॥ततोच्छिद्रावधारणंकुर्यात्॥ ॥अथपुरश्च
रणसंकल्पः॥अद्येत्यादिअमुकगोत्रोमुकशर्माहंकृष्णसेनिशाकरेदिवाकरेवामुकदेवतायाअमुकमंत्रसिद्धिकामोग्रासादिमु
क्तिपर्यंतंकृतेनग्रहणकालीनवत्संख्याजपनदशांशहोमनदशांशतर्पणनदशांशाभिषेकनदशांशब्राह्मणभोजनमहंक
रिष्ये॥ ॥इतिसंकल्पहोमादिककुर्यात्॥दक्षिणादिकंपूर्ववत्॥ ॥इतिश्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिवि

॥ रला ॥
॥ ६७ ॥

विधविरदावलिविराजमानमानोन्नतश्रीमन्महाराजाधिराजनेपालदेशानगरवरकान्तिपुरविराजमानश्रीपगीर्वाणयुद्धविक्र
क्रमसाहदेववर्मणां सज्जनमालाभिधायां दीक्षादिप्रतिपादकं तन्त्ररत्नम्॥ ॥अथकुण्डमण्डपाद्युपयोगितन्त्रप्रकरणम्॥ ॥
कृतनित्यक्रियो मंत्री मौनी भूत्वालंकृतो यागमण्डपं गत्वा ॐ वस्य द्वारदेशे सामान्यार्घं विधाय तज्जलेनास्त्रमंत्रेण द्वारं प्रोक्ष्य द्वारे परि
विघ्नाय नमः महालक्ष्म्यै नमः सरस्वत्यै नमः इति संपूज्य द्वारदक्षिणभागे विघ्नाय नमः॥ वामे क्षेत्रपालाय नमः॥ पुनर्दक्षे गंगायै
नमः॥ पुनर्वामे यमुनायै नमः॥ देहल्यामस्त्राय फडिति प्रति द्वारं पूजयेत्॥ शिवोहमिति निर्दिव्य दृष्ट्या विलोक्य दिव्यान् विघ्नानुत्सारये
त्॥ अस्त्रमंत्रेण जलेनांतरीक्षमानु त्रिः पार्ष्णिघातैर्भौमान् देहं संकुच्य वाममार्गशाखां स्पृशन् दक्षपादपुरःसरं यागमंडपं प्रविशेत्
नैर्ऋत्यदिग्विभागे वास्तोष्पतिं ब्रह्माणं समर्चयेत्॥ पंचगव्यार्घजलेन मण्डपं प्रोक्ष्य मंडपं संस्कुर्यात्॥ मूलेन वीक्षणं अस्त्रेण प्रोक्षणम्
तेनैव ताडनं कवचेनाभ्युक्षणम् मुष्टिनाक्षेचनंमेवाभ्युक्षणम्॥ चंदनागुरुकर्पूरैर्मण्डपं धूपयेत्॥ लाजचंदनसर्षपभस्मदूर्वा
कुशाक्षता॥ एतैर्विकिरं अस्त्रमंत्रेण मंत्रितान् सप्तवारंतान्विकिरेत्॥ दर्भकूर्चिकनाअस्त्रेणाज्ञप्रेनतान्मार्जयेत्॥ ततः पुण्याहं वा
चयित्वा ब्राह्मणान्परितोष्य॥ ततो वेदिकायां सर्वतोभद्रमण्डलं लिखित्वा॥ कोमलासने उपविश्य मौनी भूयाग्निनैर्ऋत्ये संपूजाद्र
व्याणि दक्षिणे स्थापयेत्॥ सुवासितजलपूर्णं घटं वामे करप्रक्षालनाय पृष्ठभागे पात्रं स्थापयेत्॥ घृतदीपांश्चतुर्दिक्षु वामरक्षव
दर्पणान्तलवृन्तानि च॥ कृताञ्जलिस्सन् वामे गुरुं दक्षिणे गणेशं प्रणम्य भक्तिं विदध्यात्॥ मूलाधारात्कुण्डलिनीमुत्थाप्य हृ

67
॥ राम ॥
॥ ६७ ॥

दंतुजसंज्ञं जीवं शृंहीत्वा ब्रह्मरंध्रेविचिंत्य हंस इति मंत्रेणजीवं ब्रह्मणि संयोज्य पादादिजानुपर्यंतं चतुरस्रं पीनवर्णं सवज्रं लंबीजयुतं सगम
नपादेन्द्रियं सगंधघ्राणेन्द्रिययुतं ॥ ब्रह्मादेवतानिवृत्तिकलासमानवायुः एतैर्युतं भूमण्डलं ध्यायेत् ॥ जान्वादिनाभिपर्यंतं अर्धचंद्रा
कारं पद्मद्वयांकितं वंबीजयुक्तं श्वेतांभसा दानहस्तेन्द्रियं विष्णुदेवताकं रसेनेन्द्रियं प्रतिष्ठाकलोदानवायुभ्यां युतं जलमण्डलं ध्याये
त् ॥ नाभेर्हृदयपर्यंतं त्रिकोणं स्वस्तिकरंबीजयुक्तं सविसर्गपायुइन्द्रियं सरूपचक्षुरिन्द्रियं शिवोदेवताव्यानवायुविद्याकलाएतै
र्युतं वह्निमण्डलं ध्यायेत् ॥ हृदयाद्भ्रूपर्यंतं धूम्रवर्णं वृत्तं षड्बिंदुलांछितं यंबीजसानंदोपस्थेन्द्रियं सस्पर्शत्वगिन्द्रियं ईशानदेवता
शांतिकला अपानवाकरेतैर्युतं वायुमण्डलं स्मरेत् ॥ भ्रूमध्याद्ब्रह्मरंध्रपर्यंतं स्वच्छं मनोहरं हंबीजं हं तं सवक्तव्यवागिन्द्रियं सशब्द
श्रोत्रेन्द्रियं शांत्यतीतकला सदाशिवदेवता एतैर्युतं गगनमण्डलं ध्यायेत् ॥ पृथ्वीं जले प्रविलापयामि जलं वह्नौ वह्निं वायौ वायुमाकाशे (
गगनमहंकारे अहंकारं महत्तत्त्वे महत्तत्त्वं प्रकृतौ प्रकृतिमात्मनि एवं प्रविलाप्य दक्षकुक्षौ कृष्णवर्णं अंगुष्ठप्रमाणं रक्तश्मश्रुचर्मधरं
ऊर्ध्वं मधोमुखं ब्रह्महत्याशिरस्कं सुवर्णस्तेयबाहुं सुरापानहृदयं गुरुतल्पकटीयुतं पापसंयोगिपदद्वंद्वं उपपातकरोमानं पापपुरु
षं ध्यात्वा यंबीजं स्मृत्वा वायुं संपूर्य स्वशरीरसहितं पापपुरुषं संशोषयामि इति बीजं जपन् कुंभकेन शरीरं निर्दहेत् ॥ पुनर्वंसुं बीजेन
पापभस्म वह्निर्निःक्षास्य वमित्यमृतबीजेन तं भस्माप्लाव्य लमिति बीजेन कनकाण्डवत्पिंडं विरच्य हमिति गगनबीजेन समस्तशरीरं उ
त्पन्नं विभाव्य परमात्मनि लीनानि तत्त्वानि परमात्मनः पुनरुत्पादयेत् ॥ सोहमिति हृदयेनात्मजः प्रकृतिं कल्पयामि प्रकृतेर्महत्तत्त्वं (

CC-0. In Public Domain. Digitization by eGangotri

महत्तत्वादहंकारं अहंकारादाकाशं गगनाद्वायुं वायोर्वह्निं वह्नेर्जलं जलाद्भुवं प्रकल्प्य परसंसर्गाज्जीवं गृहीत्वा हृदयांबुजे संस्थाप्य कृताञ्जलि
मिस्वाहा इदमग्नये न मम ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥ ततोग्नेः
पश्चात्पूर्वाग्रा दर्भानास्तीर्य ॐ विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो देवेभ्यो न मम ॥ ॐ सर्वेभ्यो भूतेभ्यो नमः इदं सर्वेभ्यो भूतेभ्यो न मम ॥
ॐ भूतानां पतये नमः इदं भूतानां पतये न मम ॥ इति प्राक्संस्थमुदक्संस्थं वा बलित्रयं कृत्वा तस्य दक्षिणतो दक्षिणाग्रदर्भोपरि ॥
ॐ पितृभ्यः स्वधा नमः इदं पितृभ्यः स्वधा नमः इति बलिं पात्रावशिष्टान्नस्य पिण्डं कृत्वापसव्येन पितृतीर्थेन दद्यात् ॥ ततः सव्यं कृत्वा जलं
स्पृष्ट्वा हृदयमालभ्य दक्षिणकर्णौ स्पृष्ट्वा विष्णुं स्मरेत् ॥ ततः पात्रं प्रक्षाल्य निर्णेजनजलं बलीनां वायव्यदिशि उत्सृजेत् ॥ ॐ यक्ष्मैतत्ते नि-
र्णेजनं ॥ इदं यक्ष्मणे न मम ॥ इति निषेचनम् ॥ हुतशेषमन्नमादाय अंगणे वायसेभ्यो बलिं दद्यात् ॥ तद्यथा ॥ ऐन्द्रवारुणवायव्या याम्या वै
नैरृतास्तथा ॥ वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम् ॥ वायसेभ्यो नमः इदं वायसेभ्यो नमः ॥ ॐ श्वानौ द्वौ श्यामशवलौ वैवस्वतकुलो-
द्भवौ ॥ ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ ॥ श्वभ्यां नमः इदं श्वभ्यां न मम ॥ ॐ देवा मनुष्याः पशवो वयांसि सिद्धाश्च यक्षोरगदै-
त्यसंघा ॥ प्रेताः पिशाचास्तरवः खगाश्च ये चान्नमिच्छन्ति मया प्रदत्तम् ॥ ॐ देवादिभ्यो नमः इदं देवादिभ्यो नमः ॥ ॐ पिपीलिकाः कीटपतङ्ग-
काद्या बुभुक्षिताः कर्मनिबन्धबद्धा ॥ तृप्त्यर्थमन्नं हि मया प्रदत्तं तेषामिदं ते मुदिता भवन्तु ॥ ॐ पिपीलिकादिभ्यो नमः इदं पिपीलिका-
दिभ्यो नमः ॥ येषां न माता न पिता न बन्धुर्न चान्नसिद्धिर्न तथान्नमस्ति ॥ तत्तृप्तयेन्नं भुवि दत्तमेतेषां तु तृप्तिं मुदिता भवन्तु ॥ भूतानि सर्वाणि त-
थान्नमेतदहं च विष्णुर्न यतोन्यदस्ति ॥ तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषां ॥ चतुर्दशो भूतगणो य एष तत्र स्थिता ये खिल-

CC-0. In Public Domain. Digitization by eGangotri

भून्तमसंघाः॥ तदर्थमन्नं हि मया विसृष्टं तेषामिदं तेन सुदिता भवंतु॥ पादौ प्रक्षाल्याचम्य॥ गोदोहनमात्रं प्रतीक्ष्य अतिथिं गंधमाल्यादिभिरभ्य
र्च्य॥ अन्नं परिवेष्य निवीभूत्वा ॐ हंतकारमनुष्यायेति संकल्प्य तमाशयेत्॥ अतिथ्यभावे षोडशग्रासपरिमितं चतुर्ग्रासपरिमितं वा अन्नं पा
त्रे कृत्वा निवीती भूत्वोदङ्मुख उपविश्य ॐ हंतकारमनुष्यायेति संकल्प्य कस्मैचिद्ब्राह्मणाय दद्यात्॥ मनुष्ययज्ञसिद्धये एकत्वपात्रे गोग्रासं गृ
हीत्वा॥ सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः॥ प्रतिगृह्णन्त्विमं ग्रासं गावस्त्रैलोक्यमातरः॥ ॐ गोभ्यो नम इदं गोभ्यो न मम॥ इति सं
कल्प्य गोग्रासं दद्यात्॥ ॥इति श्रीपगीर्वाणयुद्धविक्रमसाहदेववर्म्मणां सद्धर्म्ममालाभिधायां नित्यनैमित्तिकवैश्वदेवविधिः॥ ॥अथ
नित्यश्राद्धम्॥ तत्स्वरूपं भविष्ये॥ अहन्यहः क्रियते यत्तु तन्नित्यमिति कीर्त्यते॥ विश्वेदेवविहीनं तदशक्तावुदकेन तु॥ नित्यश्राद्धमदैवं स्या
दर्घ्यपिण्डविवर्जितमिति लघुहारीतः॥ नित्यं तावत्प्रवक्ष्यामि अर्घ्यावाहनवर्जितमिति मात्स्ये॥ ॥अथ प्रयोगः॥ सव्येनाचम्य॥ ॐ अद्येत्या
दि नित्यश्राद्धमहं करिष्ये इति संकल्प्य॥ गायत्रीं देवताभ्य इति त्रिर्जपित्वा॥ अपवित्रः पवित्रो वेत्यादि पुण्डरीकाक्षस्मरणेन श्राद्धद्रव्याणि
सिक्त्वा॥ कृतापसव्यो दक्षिणाभिमुखः पतितवामजानुः पितृतीर्थेन जलतिलसमेतं द्विगुणकुशत्रयेण॥ ॐ अद्यामुकगोत्रपितरमुक
शर्मंस्त्रिदमासनं ते स्वधेति पित्रे दद्यात्॥ एवमेव पितामह प्रपितामह मातामह प्रमातामह वृद्धप्रमातामहेभ्य आसनं दद्यात्॥ ततोपह
ताइत्यादिना तिलान्विकीर्य यत्तु न इति जपेत्॥ ततो गंधादिभिरभ्यर्च्य॥ ॐ अद्यामुकगोत्रपितरमुकशर्मन्नेतानि गंधपुष्पधूपदीपवस्त्रा
णि ते स्वधेति पित्रादिभ्यो यथासंभवं गंधादि दद्यात्॥ अथान्नं परिविष्य मधुवाता मधुवाता इति पठित्वा॥ पात्रमालभ्य पृथिवी त इति जपित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदंविष्णुरित्यादिनांगृहमवगाह्यपद्मनाइतितिलान्वकीर्य॥ अमुकगोत्रायास्मत्पित्रेऽमुकशर्मणेइदमन्नंसर्वंजलंसतिलंसजलंतृप्त्यंस्व
धेतिपयःप्रत्येकमुत्सृजेत्॥ ततोयथाशक्तिपविशाणिमधुवाताइत्यन्त्रहीत्यादिजपित्वा॥ तदन्नंब्राह्मणायप्रतिपादयेत्॥ ब्राह्मणोपवेश
नपक्षेस्वागतंप्रश्नायथिकमिति॥ ततःसर्वेनदक्षिणांदद्यात्॥ ॐतत्सदद्येत्यादिःअमुकगोत्राणांमस्मत्पितृपितामहप्रपितामहानाममु
कामुकाःमुकशर्मणांतथामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांकृतैतन्नित्यश्राद्धप्रतिष्ठार्थं
मिमांदक्षिणाममुकगोत्रायामुकशर्मणेब्राह्मणायसंप्रददे॥ इतिसंकल्प्यदक्षिणांदत्वा॥ हस्तौपादौप्रक्षाल्याचम्य॥ ॐप्रमादात्कृतिप
ठित्वा॥ कायेनवाचेतिचपठित्वा॥ कर्मैतन्नारायणायार्पयेदिति॥ ॥इतिश्री५महाराजाधिराजगीर्वाणयुद्धविक्रमसाहदेवकृतनमद्र
त्नमालायांनित्यश्राद्धविधिरत्नम्॥ ॥अथमनुष्ययज्ञः॥ सघृतंसर्वंजनेयासवत्रुष्ठयमन्त्रंसत्रुकृत्यकण्ठेसूत्रंकृत्वाउत्तराभिमुखः
सव्येनलेकुशंगृहीत्वा॥ ॐसनकादिमनुष्येभ्योहन्तेनमइत्युक्त्वामनुष्यतीर्थेनसजलंनान्नमुत्सृजेदिति॥ ॥इतिमनुष्ययज्ञः॥ ॥अथ
नित्यदानविधिः॥ ॐदेयद्रव्यायनमइतिदेयद्रव्यंगंधपुष्पाक्षतादिनात्रिःसंपूज्य॥ ब्राह्मणमप्यावेब्राह्मणामप्येवंसंपूज्य॥ ॐअद्यमासपु
ण्याश्रीमत्परमेश्वरप्रीतयेइदंद्रव्यंविष्णुदैवतममुकगोत्रायामुकवेदाध्यायिनेमुकशर्मणेब्राह्मणायदातुमहंसंप्रददे॥ ब्राह्मणाभावेजले
समुत्सृजेइतिसंकल्प्यदद्यात्॥ ॐशिवाआपःसन्तु॥ ॐसौमनस्यमस्तु॥ अक्षतंचारिष्टमस्तु॥ दीर्घमायुरस्तु॥ शांतिरस्तु॥ पुष्टिरस्तु॥ यद्य
च्छ्रेयस्तदस्तु॥ यत्पापंतत्प्रतिहतमस्तु॥ इतिपठित्वा॥ ॐहिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः॥ अनन्तपुण्यफलदमतःशांतिंप्रयच्छमे॥

॥ रुद्र ॥ इति मंत्रं पठित्वा पात्रस्थं फलं वा विसर्जयेत् ॥ ॥ इति नित्यदानविधिः ॥ ॥ इति श्रीमन्महाराजाधिराजश्रीपञ्च गीर्वाणयुद्धविक्रमसाहदे
॥१०३॥ वकृतायां मन्त्रमालाभिधायां मनुष्ययज्ञरत्नम् ॥ समाप्ताचलपतादिपंचमरणपता: ॥ ॥ अथ शतरुद्रियमन्त्रविभागः स्वाहाकारसहितं
उच्यते ॥ ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः ॥ बाहुभ्यामुत ते नमः स्वाहा ॥ १ ॥ या ते रुद्र शिवा तनूरघोरापापकाशिनी ॥ तया नस्तन्वा शन्तम
या गिरिशन्ताभिचाकशीहि स्वाहा ॥ २ ॥ यामिषुं गिरिशन्त हस्ते विभर्ष्यस्तवे ॥ शिवां गिरित्र तां कुरु माहिंसीः पुरुषं जगत् स्वाहा ॥ ३ ॥ शिवेन वचसा
त्वा गिरिशाच्छा वदामसि ॥ यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् स्वाहा ॥ ४ ॥ ॐ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ॥ अहींश्च
सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परासुव स्वाहा ॥ ५ ॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ॥ ये चैनं रुद्रा अभितो दिक्षु श्रिताः
सहस्रशोऽवैषां हेड ईमहे स्वाहा ॥ ६ ॥ ॐ असौ योऽवसर्पति नीलग्रीवो विलोहितः ॥ उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडया
ति नः स्वाहा ॥ ७ ॥ ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥ अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः स्वाहा ॥ ८ ॥ ॐ प्रमुञ्च धन्वनस्त्व
मुभयोरार्त्न्योर्ज्याम् ॥ याश्च ते हस्त इषवः परा ता भगवो वप स्वाहा ॥ ९ ॥ ॐ विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ उत ॥ अनेशन्नस्य 103
या इषव आभुरस्य निषङ्गधिः स्वाहा ॥ १० ॥ ॐ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज स्वाहा ॥ ११ ॥ रुद्र ॥
ॐ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ॥ अथो य इषुधिस्तवारे अस्मन्निधेहि तम् स्वाहा ॥ १२ ॥ ॐ अवतत्य धनुष्ट्वं सहस्राक्ष शत ॥१०३॥
तेषुधे ॥ निशीर्य शल्यानां मुखा शिवो नः सुमना भव स्वाहा ॥ १३ ॥ ॐ नमस्त आयुधायानातताय धृष्णवे ॥ उभाभ्यामुत ते नमो बाहुभ्यां तव ध

CC-0. In Public Domain. Digitization by eGangotri

त्वने स्वाहा ॥१४॥ ॐ मानो महान्तमुत मानो ऽअर्भकम्मान ऽउक्षन्तमुत मान ऽउक्षितम् ॥ मानो वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्वो
रुद्र रीरिषः स्वाहा ॥१५॥ ॐ मानस्तोके तनये मान ऽआयुषि मानो गोषु मानो ऽअश्वेषु रीरिषः ॥ मानो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः स
दमित्त्वा हवामहे स्वाहा ॥१६॥ ॐ नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमः स्वाहा ॥१७॥ ॐ नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये
नमः स्वाहा ॥१८॥ ॐ नमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमः स्वाहा ॥१९॥ ॐ नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः स्वा
हा ॥२०॥ ॐ नमो बभ्लुशाय व्याधिने ऽन्नानाम्पतये नमः स्वाहा ॥२१॥ ॐ नमो भवस्य हेत्यै जगताम्पतये नमः स्वाहा ॥२२॥ ॐ नमो रुद्राया
ततायिने क्षेत्राणाम्पतये नमः स्वाहा ॥२३॥ ॐ नमः सूतायाहन्त्यै वनानाम्पतये नमः स्वाहा ॥२४॥ ॐ नमो रोहिताय स्थपतये वृक्षाणाम्प
तये नमः स्वाहा ॥२५॥ ॐ नमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमः स्वाहा ॥२६॥ ॐ नमो मन्त्रिणे वाणिजाय कक्षाणाम्पतये नमः स्वा
हा ॥२७॥ ॐ नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमः स्वाहा ॥२८॥ ॐ नमः कृत्स्नायतया धावते सत्वनाम्पतये नमः स्वाहा ॥२९॥
ॐ नमः सहमानाय निव्याधिन ऽआव्याधिनीनाम्पतये नमः स्वाहा ॥३०॥ ॐ नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमः स्वाहा ॥३१॥ ॐ न
मो निचेरवे परिचरायारण्यानाम्पतये नमः स्वाहा ॥३२॥ ॐ नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमः स्वाहा ॥३३॥ ॐ नमो निषङ्गिण ऽ
इषुधिमते तस्कराणाम्पतये नमः स्वाहा ॥३४॥ ॐ नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णताम्पतये नमः स्वाहा ॥३५॥ ॐ नमो ऽसिमद्भ्यो नक्तं
चरद्भ्यो विकृन्तानाम्पतये नमः स्वाहा ॥३६॥ ॐ नमऽउष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमः स्वाहा ॥३७॥ ॐ नमऽइषुमद्भ्यो धन्वायि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यश्चवोनमः स्वाहा ॥ ३८ ॥ ॐ नम आतन्वानेभ्यः प्रतिदधानेभ्यश्चवोनमः स्वाहा ॥ ३९ ॥ ॐ नम आयच्छद्भ्यो ऽस्यद्भ्यश्चवोनमः स्वाहा ॥ ४० ॥ ॐ
नमो विसृजद्भ्यो विध्यद्भ्यश्चवोनमः स्वाहा ॥ ४१ ॥ ॐ नमः स्वपद्भ्यो जाग्रद्भ्यश्चवोनमः स्वाहा ॥ ४२ ॥ ॐ नमः शयानेभ्य आसीनेभ्यश्चवोन-
मः स्वाहा ॥ ४३ ॥ ॐ नमः स्तिष्ठद्भ्यो धावद्भ्यश्चवोनमः स्वाहा ॥ ४४ ॥ ॐ नमः सभाभ्यः सभापतिभ्यश्चवोनमः स्वाहा ॥ ४५ ॥ ॐ नमो ऽश्वेभ्यो ऽश्व-
पतिभ्यश्चवोनमः स्वाहा ॥ ४६ ॥ ॐ नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्चवोनमः स्वाहा ॥ ४७ ॥ ॐ नम उगणाभ्यस्तृंहतीभ्यश्चवोनमः स्वा-
हा ॥ ४८ ॥ ॐ नमो गणेभ्यो गणपतिभ्यश्चवोनमः स्वाहा ॥ ४९ ॥ ॐ नमो व्रातेभ्यो व्रातपतिभ्यश्चवोनमः स्वाहा ॥ ५० ॥ ॐ नमो गृत्सेभ्यो गृत्स-
पतिभ्यश्चवोनमः स्वाहा ॥ ५१ ॥ ॐ नमो विरूपेभ्यो विरूपेभ्यश्चवोनमः स्वाहा ॥ ५२ ॥ ॐ नमः सेनाभ्यः सेनानिभ्यश्चवोनमः स्वाहा ॥ ५३ ॥ ॐ न-
मो रथिभ्यो ऽरथेभ्यश्चवोनमः स्वाहा ॥ ५४ ॥ ॐ नमः क्षत्तृभ्यः संग्रहीतृभ्यश्चवोनमः स्वाहा ॥ ५४ ॥ ॐ नमः क्षत्तृभ्यः संग्रहीतृभ्यश्चवोनमः स्वाहा
५५ ॥ ॐ नमो महद्भ्यो ऽर्भकेभ्यश्चवोनमः स्वाहा ॥ ५६ ॥ ॐ नमस्तक्षभ्यो रथकारेभ्योश्चवोनमः स्वाहा ॥ ५७ ॥ ॐ नमः कुलालेभ्यः कर्मारेभ्य-
श्चवोनमः स्वाहा ॥ ५८ ॥ ॐ नमो निषादेभ्यः पुञ्जिष्टेभ्यश्चवोनमः स्वाहा ॥ ५९ ॥ ॐ नमः श्वनिभ्यो मृगयुभ्यश्चवोनमः स्वाहा ॥ ६० ॥ ॐ नमः
श्वभ्यः श्वपतिभ्यश्चवोनमः स्वाहा ॥ ६१ ॥ ॐ नमो भवाय रुद्राय च स्वाहा ॥ ६२ ॥ ॐ नमः शर्वाय च पशुपतये च स्वाहा ॥ ६३ ॥ ॐ नमो नीलग्री-
वाय च शितिकण्ठाय च स्वाहा ॥ ६४ ॥ ॐ नमः कपर्दिने च व्युप्तकेशाय च स्वाहा ॥ ६५ ॥ ॐ नमः सहस्राक्षाय च शतधन्वने च स्वाहा ॥ ६६ ॥
ॐ नमो गिरिशयाय च शिपिविष्टाय च स्वाहा ॥ ६७ ॥ ॐ नमो मीढुष्टमाय चेषुमते च स्वाहा ॥ ६८ ॥ ॐ नमो ह्रस्वाय च वामनाय च स्वाहा ॥ ६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ॐ नमो वृहते च वर्षीयसे च स्वाहा ॥७०॥ ॐ नमो वृद्धाय च सवृधे च स्वाहा ॥७१॥ ॐ नमो ऽग्र्याय च प्रथमाय च स्वाहा ॥७२॥ ॐ नमः आ-
शवे चाजिराय च स्वाहा ॥७३॥ ॐ नमः शीघ्र्याय च शीभ्याय च स्वाहा ॥७४॥ ॐ नमः ऊर्म्याय चावस्वन्याय च स्वाहा ॥७५॥ ॐ नमो नादेयाय
च द्वीप्याय स्वाहा ॥७६॥ ॐ नमो ज्येष्ठाय च कनिष्ठाय च स्वाहा ॥७७॥ नमः पूर्वजाय चापरजाय च स्वाहा ॥७८॥ ॐ नमो मध्यमाय चापगल्-
भाय च स्वाहा ॥७९॥ ॐ नमो जघन्याय च बुध्न्याय च स्वाहा ॥८०॥ ॐ नमः सोभ्याय च प्रतिसर्याय च स्वाहा ॥८१॥ ॐ नमो याम्याय च
क्षेम्याय च स्वाहा ॥८२॥ ॐ नमः श्लोक्याय चावसान्याय नमः स्वाहा ॥८३॥ ॐ नमः उर्वर्याय च खल्याय च स्वाहा ॥८४॥ ॐ नमो वन्या-
य च कक्ष्याय च स्वाहा ॥८५॥ ॐ नमः श्रवाय च प्रतिश्रवाय च स्वाहा ॥८६॥ ॐ नम आशुषेणाय चाशुरथाय च स्वाहा ॥८७॥ ॐ नमः
शूराय चावभेदिने च स्वाहा ॥८८॥ ॐ नमो बिल्मिने च कवचिने च स्वाहा ॥८९॥ ॐ नमो वर्म्मिणे च वरूथिने च स्वाहा ॥९०॥ ॐ न-
मः श्रुताय च श्रुतसेनाय च स्वाहा ॥९१॥ ॐ नमो दुन्दुभ्याय चाहनन्याय च स्वाहा ॥९२॥ ॐ नमो धृष्णवे च प्रमृशाय च स्वाहा ॥९३॥
ॐ नमो निषङ्गिणे चेषुधिमते च स्वाहा ॥९४॥ ॐ नमस्तीक्ष्णेषवे चायुधिने च स्वाहा ॥९५॥ ॐ नमः स्वायुधाय च सुधन्वने च स्वाहा ॥
९६॥ ॐ नमः स्रुत्याय च पथ्याय च स्वाहा ॥९७॥ ॐ नमः काट्याय च नीप्याय च स्वाहा ॥९८॥ ॐ नमः कुल्याय च सरस्याय च स्वाहा ॥
९९॥ ॐ नमो नादेयाय च वैशन्ताय च स्वाहा ॥१००॥ ॐ नमः कूप्याय चावट्याय च स्वाहा ॥१०१॥ ॐ नमो वीध्र्याय चातप्याय च स्वाहा ॥१०२
ॐ नमो योग्याय च प्रमाय च स्वाहा ॥१०३॥ ॐ नमो वर्ष्याय च वर्ष्याय च स्वाहा ॥१०४॥ ॐ नमो वात्याय च रेष्म्याय च स्वाहा ॥१०५॥ ॐ नमो वा-

CC-0. In Public Domain. Digitization by eGangotri

स्तव्याय च वास्तुपाय च स्वाहा ॥१०६॥ ॐ नमः सोमाय च रुद्राय च स्वाहा ॥१०७॥ ॐ नमस्ताम्राय चारुणाय च स्वाहा ॥१०८॥ ॐ नमः
शंगाय च पशुपतये च स्वाहा ॥१०९॥ ॐ नम उग्राय च भीमाय च स्वाहा ॥११०॥ ॐ नमो ऽग्रेवधाय च दूरेवधाय च स्वाहा ॥१११॥ ॐ नमो
हन्त्रे च हनीयसे च स्वाहा ॥११२॥ ॐ नमो वृक्षेभ्यो हरिकेशेभ्यः स्वाहा ॥११३॥ ॐ नमस्ताराय स्वाहा ॥११४॥ ॐ नमः शम्भवाय च मयोभ
वाय च स्वाहा ॥११५॥ ॐ नमः शंकराय च मयस्कराय च स्वाहा ॥११६॥ ॐ नमः शिवाय च शिवतराय च स्वाहा ॥११७॥ ॐ नमः पार्याय
चावार्याय च स्वाहा ॥११८॥ ॐ नमः प्रतरणाय चोत्तरणाय स्वाहा ॥११९॥ ॐ नमस्तीर्थ्याय च कूल्याय च स्वाहा ॥१२०॥ ॐ नमः शष्प्याय च
फेन्याय च स्वाहा ॥१२१॥ ॐ नमः सिकत्याय च प्रवाह्याय च स्वाहा ॥१२२॥ ॐ नमः किंशिलाय च क्षयणाय च स्वाहा ॥१२३॥ ॐ नमः कप
र्दिने च पुलस्तये च स्वाहा ॥१२४॥ ॐ नम इरिण्याय च प्रपथ्याय च स्वाहा ॥१२५॥ ॐ नमो व्रज्याय च गोष्ठ्याय च स्वाहा ॥१२६॥ ॐ नमस्तल्पाय
च गेह्याय च स्वाहा ॥१२७॥ ॐ नमो हृदय्याय च निवेष्प्याय च स्वाहा ॥१२८॥ ॐ नमः काट्याय च गह्वरेष्ठाय च स्वाहा ॥१२९॥ ॐ नमः शुष्क्याय च
हरित्याय च स्वाहा ॥१३०॥ ॐ नमः पांसव्याय च रजस्याय च स्वाहा ॥१३१॥ ॐ नमो लोप्याय चोलप्याय च स्वाहा ॥१३२॥ ॐ नमः ऊर्व्याय
च सूर्म्याय च स्वाहा ॥१३३॥ ॐ नमः पर्णाय च पर्णशदाय च स्वाहा ॥१३४॥ ॐ नम उद्गुरमाणाय चाभिघ्नते च स्वाहा ॥१३५॥ ॐ नम आखि
दते च प्रखिदते स्वाहा ॥१३६॥ ॐ नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः स्वाहा ॥१३७॥ ॐ नमो वः किरिकेभ्यो देवानां हृदयेभ्यो नमः स्वाहा
१३८ ॐ नमो विचिन्वत्केभ्यो देवानां हृदयेभ्यो नमः स्वाहा ॥१३९॥ ॐ विक्षिणत्केभ्यो देवानां हृदयेभ्यो नमः स्वाहा ॥१४०॥ ॐ नम आनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हतेभ्यो देवानाꣳ हृदयेभ्यो नमः स्वाहा ॥१४१॥ ॐ द्रापे अन्धसस्पते दरिद्र नीललोहित आसां प्रजानामेषां पशूनां मा भेर्मा रो मो च नः किं
चनाममत् स्वाहा ॥१४२॥ ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ॥ यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मि
न्ननातुरम् स्वाहा ॥१४३॥ ॐ या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ॥ शिवा रुतस्य भेषजी तया नो मृड जीवसे स्वाहा ॥१४४॥ ॐ प
रि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ॥ अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड स्वाहा ॥१४५॥ ॐ मीढुष्टम
शिवतम शिवो नः सुमना भव ॥ परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि स्वाहा ॥१४६॥ ॐ विकिरिद्र विलो
हित नमस्ते अस्तु भगवः यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्निवपन्तु ताः स्वाहा ॥१४७॥ ॐ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः तासामीशा
नो भगवः पराचीना मुखा कृधि स्वाहा ॥१४८॥ ॐ असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा
॥१४९॥ ॐ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥१५१॥ ॐ नीलग्रीवाः शितिकण्ठाः शर्वा अधः
क्षमाचराः ॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥१५२॥ ॐ वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ॥ तेषाꣳ सहस्रयोज
नेऽव धन्वानि तन्मसि स्वाहा ॥१५३॥ ॐ ये भूतानामधिपतयो विशिखासः कपर्दिनः ॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥१५४
ॐ ये पथां पथिरक्षय ऐलबृदा आयुर्युधः तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥१५५॥ ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता नि
षङ्गिणः ॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥१५६॥ ॐ येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ॥ तेषाꣳ सहस्रयोजनेऽव धन्वा

॥ रुद्र ॥
॥ १०६ ॥

नितन्नसि स्वाहा ॥ १५७ ॥ ॐ यऽएतावन्तश्च भूयांꣳसश्च दिशो रुद्रा वितस्थिरे ॥ तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥ १५८ ॥ ॐ नमो
स्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ॥ तेभ्यो नमो अस्तु ते नो वन्तु ते नो मृडयन्तु ते यं
द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः स्वाहा ॥ १५९ ॥ ॐ नमो स्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः ॥ तेभ्यो दश प्राचीर्दश दक्षिणा दश
प्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्यो नमो अस्तु ते नो वन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः स्वाहा ॥ १६० ॥ ॐ नमो स्तु रुद्रे-
भ्यो ये पृथिव्यां येषामन्नमिषवः ॥ तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ॥ तेभ्यो नमो अस्तु ते नो वन्तु ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः स्वाहा ॥ १६१ ॥ ॥ इति शान्तिरुद्रियहोममन्त्रविभागः ॥ ॥ अथ रुद्रपुरश्चरणविधिर्हेमाद्रौ ॥ कृच्छ्रमादौ
स्वयं चीत्वा पिराकं च तथा पुनः ॥ स्नात्वा देवं समभ्यर्च्य उषित्वा सप्त शर्वरीः ॥ उपेतुं द्विविधानेन तदन्ते प्राशयेद्घृतम् ॥ अपरेऽहनि संज्ञाते समा-
प्येवं व्रतं पुनः ॥ भास्कराभिमुखो भूत्वा नदीते नान जपेद्रुद्रम् ॥ भूपश्चात्त्रिपञ्चरुद्रं सम्यग्जपविधिवत्ततः ॥ घृताक्तैर्बिल्वपत्रैश्च रुद्रहोमं प्रकु-
ल्पयेत् ॥ एवं सम्यग्व्रतेनैव तं कृते सौजाय ते द्विज ॥ ॥ साक्षात्कुद्रा महाते जास्ततः कामांकुसाधयेत् ॥ रुद्रविनियोगस्त्रिविधः जपो होमोऽ-
भिषेकश्चेति ॥ पंचाङ्गरुद्राणां जपहोमार्चनेविधिर्व्याख्यास्याम ॥ इति बौधायनसूत्रात् ॥ ॥ अत्र जपपक्षे दशांशहोमस्थाने त्वा दशांशा-
दिहोमविशिष्टो जपो विधेयः ॥ होमपक्षे तद्दशांशं तर्पणादिः ॥ अभिषेकपक्षे ब्राह्मणभोजनमिति ॥ ॥ अथ बौधायनप्रोक्तमहारुद्रपं-
चाङ्गषडङ्गन्यासविधिरत्नम् ॥ तत्र हि पंचाङ्गरुद्राणां षडङ्गरुद्रशब्दस्य वा पमर्थोक्तयः ॥ पञ्चप्रकारोक्तन्यासोपनिषत्संपञ्चाङ्गः ॥ एवं षड

106
॥ रुद्रः ॥
॥ १०६ ॥

ङ्गो पित्तत्र्यंबाङ्गन्यासे शिखायस्त्वां नमं कविं शदङ्गन्यासः प्रथमः ॥ मूर्द्धादि पादान्ताङ्गन्यासो द्वितीयः ॥ पादादि मूर्द्धत्रिपञ्चाङ्गन्यासस्तृतीयः ॥
गुह्यादिमस्तकान्तं पंचांगन्यासश्चतुर्थः ॥ हृदयाय स्वाहेति पञ्चाङ्गन्यासः पंचमः एवं हि पञ्चाङ्गः ॥ ब्रह्मनानादि सर्वांग पर्यन्तं षोडशाङ्गन्यासः अप
रः ॥ अयमेव षष्ठो न्यासः पूर्वोक्तन्यासस्सहितः षडङ्गन्यासः ॥ इति ॥ ॥ अथ बौधायनसूत्राणि ॥ अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकजप
होमविधिं व्याख्यास्यामो या ते रुद्रेति शिखायाम् अस्मिन्महत्यर्णव इति शिरसि ॥ २ ॥ सहस्राणीति ललाटे ॥ ३ ॥ हꣳसः शुचिषदिति भ्रुवोर्मध्ये ॥ ४ ॥
त्र्यम्बकं यजामह इति नेत्रयोः ॥ ५ ॥ नमः स्रुत्यायेति कर्णयोः ॥ ६ ॥ मानस्तोक इति नासिकायां ॥ ७ ॥ अवतत्येति मुखे ॥ ८ ॥ नीलग्रीवेति कण्ठे ॥ ९ ॥
नमस्त आयुधायेति बाह्वोः ॥ १० ॥ या ते हेतिरित्युपबाह्वोः ॥ ११ ॥ ये तीर्थानीति हस्तयोः ॥ १२ ॥ सद्योजातमिति पंचानुवाकान्पंचस्वङ्गुलीषु ॥ १३ ॥
सद्योजातमङ्गुष्ठयोः वामदेवाय तर्जनीभ्यां नमः ॥ अघोरेभ्यो मध्यमाभ्याम् ॥ तत्पुरुषायानामिकाभ्याम् ॥ ईशानः कनिष्ठाभ्यां नमः ॥ नमो वः कि
रिकेभ्य इति हृदये ॥ १४ ॥ नमो गणेभ्य इति पृष्ठे ॥ १५ ॥ नमो हिरण्यबाहव इति पार्श्वयोः ॥ १६ ॥ हिरण्यगर्भ इति नाभौ ॥ १७ ॥ मीढुष्टमेति कट्या
म् ॥ १८ ॥ ये भूतानामधिपतय इति गुह्ये ॥ १९ ॥ सशिरा जातवेदा ॥ इत्यपाने ॥ २० ॥ मा नो महान्तमित्यूर्वोः ॥ २१ ॥ एष त इति जान्वोः ॥ २२ ॥ ये प
था मिति पादयोः ॥ २३ ॥ अध्यवोचदिति कवचम् ॥ २४ ॥ नमो बिल्मिन इत्युपकवचम् ॥ २५ ॥ नमोस्तु नीलग्रीवायेति त्रिनेत्रम् ॥ २६ ॥ प्रमुञ्च धन्व
नस्त्वम् ॥ २७ ॥ य एतावन्तश्चेति दिग्बन्धनम् ॥ २८ ॥ ॐ नमो भगवते रुद्रायेति नमस्कारन्यासेन ॥ ॥ ॐकारं मूर्द्ध्नि विन्यस्य नकारं नासिकाग्र
तः ॥ मोकारं तु ललाटे वै मकारं मुखमध्यमः ॥ णकारं कण्ठदेशे तु वकारं हृदि विन्यसेत् ॥ तेकारं दक्षिणे हस्ते रुकारं वामतो न्यसेत् ॥ द्राकारं ना

CC-0. In Public Domain. Digitization by eGangotri

भिदेशेनुयकारं पादयोर्न्यसेत् ॥ लघं च पादयोर्न्यसेद्वामन्यस्योरुमध्यतः ॥ अघोरं हृदि विन्यस्य मुखेतत्पुरुषं न्यसेत् ॥ ईशानं मूर्ध्नि विन्यस्य हं
सो नाम सदाशिवः ॥ हंसहंसेति यो ब्रूयाद्धंसो नाम सदाशिवः ॥ इति ॥ ॥ ईशानं मूर्ध्नि विन्यस्येत्यस्यायमर्थः ॥ ईशानं मूर्ध्नि विन्यस्य हंसेति ब्रूयात् ॥
एवं कृते सति हंसे नाम हंस इति प्रसिद्धः सदाशिवो भवेत् ॥ अमुमर्थमेवानुवदति हंसहंसेति यो ब्रूयाद्धंसो नाम सदाशिव इति ॥ ॥
एवं न्यासविधिं कृत्वा ततः संपुटमाचरेत् ॥ त्रातारमिन्द्रम् ॥ १ ॥ त्वन्नो अग्ने ॥ २ ॥ त्रुगतःपंचा ॥ ३ ॥ मन्त्रुनन्तं ॥ ४ ॥ नत्वायामाम् ॥ ५ ॥ नोनि
ऋडि ॥ ६ ॥ वंपट्॰ सोम ॥ ७ ॥ तमीशान ॥ ८ ॥ मस्मेरुद्रा ॥ ९ ॥ स्योना पृथिवी येनत्रमस्तु एभिन्द्रादीन्दिक्षु विन्यस्यैवमेवात्मनिरैडीकरणं कृत्वा
त्वगस्थिगतैः पापैः प्रमुच्यते ॥ सर्वभूतेभ्यपराजितो भवति ॥ यक्षगंधर्वभूतप्रेतपिशाचब्रह्मराक्षसयमदूतशाकिनीडाकिनीसर्पश्वापद
तस्कराद्युपद्रवाः ॥ सर्वे ज्वलंतं पश्यंति तं रक्षन्ति ॥ ततो मनोज्यूतिरित्युचेअबोधग्निर्जठरानलेमूर्द्धानं हृदये मर्माणि नेत्रमुखेजातवेदसे शि
रसि ॥ इति चतुर्थन्यासेनाभिमंत्र्य आत्मरक्षा कर्त्तव्या ॥ शिवसंकल्पेन हृदयं पंचरूपसूक्तेन शिरउत्तरनारायणेन शिखा अप्रतिरथेन कवचं
निभ्राड्जिनेत्रंशतरुद्रियेणास्त्रम् ॥ पश्चाङ्गसकलन्यपेदध्याङ्गप्रणामाथात्मानं रुद्ररूपं ध्यायेत् ॥ ॥ शुद्धस्फटिकसंकाशं त्रिनेत्रं पं
चवक्त्रकम् ॥ गंगाधरं दशभुजं सर्वाभरणभूषितम् ॥ नीलग्रीवं शशांकाङ्कं नागयज्ञोपवीतिनम् ॥ व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्र
दम् ॥ कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम् ॥ ज्वलंतं पिंगलजटाशिखामुद्योतकारिणम् ॥ अमृतेनाप्लुतं हृष्टमुमादेहार्द्धधा
रिणम् ॥ दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ॥ नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्यय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम्॥ एवं ध्यात्वा द्विजः सम्यक् ततो यजनमाचरेत्॥ इति पञ्चाङ्गरुद्रन्यासविधिः॥ ॥अथ रुद्रा
भिषेकविधिः॥ अभिषेके पूर्वोक्तन्यासा अपि सम्प्रज्ञीयन्ते॥ रुद्रं॥ अथातो रुद्रस्नानार्चनविधिं व्याख्यास्यामः॥ आदित एव तीर्थे स्नात्वोदेत्य शु
चिः प्रयतो ब्रह्मचारी शुक्लवासा ऽऽसनस्य दक्षिणाग्रमध्ये देशो ऽनुस्वं स्थित्वा ऽऽत्मनि देवतां स्थापयेत्॥ प्रजननेब्रह्मा तिष्ठतु॥ पादयोर्विष्णुस्तिष्ठतु रु
द्रपाणे हरस्तिष्ठतु॥ बाह्वोरिन्द्र जठरे ऽग्निर्हृदये शिव॥ कण्ठे वसवस्त्रिवक्त्रे सरस्वती॥ नासिकयोर्वायुर्नयनयोः॥ सूर्याचन्द्रमसौ तिष्ठताम्
कर्णयोरश्विनौ तिष्ठेताम्॥ ललाटे रुद्रास्तिष्ठन्तु॥ मूर्ध्न्यादित्यास्तिष्ठन्तु॥ पृष्ठे पिनाकी तिष्ठतु॥ पुरतः शूली तिष्ठतु पार्श्वयोः शिवशंकरौ तिष्ठे
ताम्॥ सर्वतो वायुस्तिष्ठतु॥ ततो बहिः सर्वतो ऽग्निर्ज्वालामालापरिवृतस्तिष्ठतु॥ सर्वेष्वङ्गेषु सर्वे देवतास्तिष्ठन्तु मां रक्षन्तु॥ अग्निर्मे वाचि श्रितः
इति यथालिङ्गमभिसंस्पृश्याप्येनं गन्धपुष्पाक्षतधूपदीपैरन्नाद्यैः प्रसादाराधयेत्॥ आराधितो मनुष्यैस्त्वं सिद्धैर्देवैः सुरादिभिः॥ आवाहयामि
भक्त्या त्वां मां गृहाण महेश्वरं॥ त्र्यम्बकमित्यर्थेन माराधयेत्॥ ॐ भूर्भुवः स्व॥ त्र्यम्बकं यजामहे तत्सवितुर्वरेण्यं सुगन्धिं पुष्टिवर्द्धनं भर्गो देव
स्य धीमहि उर्वारुकमिव बन्धनान् धियो यो नः प्रचोदयात् मृत्योर्मुक्षीय मामृतात्॥ ॐ नमो भगवते रुद्राय॥ इति मूलमन्त्रेणाराधयेत्॥ अग्नि
र्मे वाचि श्रित इत्यादेरयमर्थः॥ अग्निर्म इत्यादिभिर्वक्ष्यमाणमन्त्रैर्यथालिङ्गमङ्गानि संस्पृशेदिति॥ तत्र मन्त्राः॥ अग्निर्मे वाचि श्रितः वाग्घृदये हृ
दयम्मयि अहममृते अमृतम्ब्रह्मणि इति वाचं स्पृशेत्॥ १॥ वायुर्मे प्राणे श्रितः॥ प्राणो हृदये हृदयम्मयि अहममृते अमृतं ब्रह्मणि॥ इति प्राण
स्थानं हृदयं स्पृशेत्॥ २॥ सूर्यो मे चक्षुषि श्रितः चक्षुर्हृदये हृदयम्मयि अहममृते अमृतं ब्रह्मणि॥ इति चक्षुषि॥ ३॥ चन्द्रमा मे मनसि श्रितः मनो

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

॥ रुद्र ॥
॥ १०८ ॥

हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणि ॥ इति मनःस्थानं वक्षः स्पृशेत् ॥ ४ ॥ दिशो मे श्रोत्रे श्रिताः श्रोत्रं हृदये हृदयं मयि अहममृते अमृतं ब्र
ह्मणि ॥ इति श्रोत्रे ॥ ५ ॥ आपो मे रेतसि श्रिताः रेतो हृदये हृदयम्मयि अहममृते अमृतं ब्रह्मणि ॥ इति गुह्यस्थानं ॥ ६ ॥ पृथिवी मे शरीरे श्रिता शरीरं
हृदये हृदयम्मयि अहममृते अमृतं ब्रह्मणि ॥ इति शरीरम् ॥ ७ ॥ ॐ षधीवनस्पतयो मे लोमसु श्रिताः ॥ लोमानि हृदये हृदयम्मयि अहममृते
अमृतं ब्रह्मणि ॥ इति रोमकूपान् ॥ ८ ॥ इन्द्रो मे बले श्रितः बलं हृदये हृदयम्मयि अहममृते अमृतं ब्रह्मणि ॥ इति सर्वाङ्गम् ॥ ९ ॥ पर्जन्यो मे मूर्द्ध्नि श्रि
तः मूर्द्धा हृदये हृदयम्मयि अहममृते अमृतं ब्रह्मणि ॥ इति मस्तकम् ॥ १० ॥ ईशानो मे मन्यौ श्रितः मन्यु हृदये हृदयम्मयि अहममृते अमृतं ब्रह्म
णि ॥ इति क्रोधादिस्थानं हृदयम् ॥ ११ ॥ आत्मा म आत्मनि श्रित आत्मा हृदये हृदयम्मयि अहममृते अमृतं ब्रह्मणि ॥ इति चित्तस्थानं वक्षः ॥
१२ ॥ पुनर्म आत्मा पुनरायुरागात्पुनः प्राणः पुनराकूतमागात् ॥ वैश्वानरो रश्मिभिर्वावृधानः अन्तस्तिष्ठत्वमृतस्य गोपाः ॥ १ ॥ इति सर्वशरी
रं स्पृशेत् ॥ १३ ॥ एवमङ्गानि संस्पृश्याथैनं गन्धादिभिरात्मानं प्रसाराधयेत् ॥ रुद्ररूपमिवात्मानं स्वशरीरे पूजयेदितरार्थं ॥ अत्र हि आवाह
नादि षोडशोपचारैः षोडशवारं मूलमन्त्रैः ॥ आत्मपूजायां नैवेद्यमपि मानसं परिकल्पयेत् ॥ एवमात्मपूजानन्तरं शिवपूजाप्रकारमाह ॥
ॐ आत्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः सहकेतुमद्भिः ॥ वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोमावाहयामि ॥ इत्यावा
हनसंस्थाप्य ॥ ॐ सद्योजातं प्रपद्यामीत्यावाहनं ददामि ॥ १ ॥ ॐ सद्योजाताय वै नमो नम इत्यासनं ददामि ॥ २ ॥ भवे भवे नातिभवे भवस्व मा
मिति पाद्यं ददामि ॥ ३ ॥ भवोद्भवाय नम इत्यलिङ्गाभिश्च स्नानं ददामि ॥ ४ ॥ अलिङ्गा आपो हि ष्ठेत्याद्या ॥ अथाङ्गिरसर्पयन्ति ॐ भवं देवं तर्पया

108
॥ रामः ॥
॥ १०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मि ॥ १ ॥ शर्वंदेवंतर्पयामि ॥ २ ॥ ईशानदेवंतर्पयामि ॥ ३ ॥ पशुपतिदेवंतर्पयामि ॥ ४ ॥ रुद्रदेवंतर्पयामि ॥ ५ ॥ उग्रदेवंतर्पयामि ॥ ६ ॥ भीमं
देवंतर्पयामि ॥ ७ ॥ महान्तंदेवंतर्पयामि ॥ ८ ॥ वामदेवायनमइतिस्नानम् ॥ ज्येष्ठायनमइत्याचमनीयंददाति ॥ श्रेष्ठायनमइतिमधुप
र्कम् ॥ कालायनमइतिगंधम् ॥ कलविकरणायनमइतिपुष्पंददाति ॥ सर्वभूतदमनायनमइतिधूपंददाति ॥ मनोन्मनायनमइति
दीपम् ॥ भवोद्भवायनमइतिनैवेद्यंददाति ॥ अथाष्टभिर्मंत्रैःपुष्पाणिददाति ॥ ॐ भवायदेवायनमः ॥ १ ॥ शर्वायदेवायदेवा॰
यनमः ॥ २ ॥ ॐ ईशानायदेवायनमः ॥ ३ ॥ नमपशुपतयेदेवायनमः ॥ ४ ॥ रुद्रायदेवायनम ॥ ५ ॥ नमउग्रायदेवाय ॥ ६ ॥ नमोभीमा
यदेवाय ॥ ७ ॥ ॐ महतेदेवायनमः ॥ ८ ॥ इतिअथास्याऽघोरतनूरघोरेभ्यस्तूपतिष्ठते ॥ अस्यार्थः ॥ पूर्वोक्तपूजानंतरमस्यरुद्रस्या
घोरतनूरघोरादिशरीराणिउपतिष्ठतेअघोरेभ्य ॥ १ ॥ नमस्तुरूपाय ॥ २ ॥ ईशान ॥ ३ ॥ इतिमंत्रैःस्तूयात् ॥ अथास्याघोरतनूरघोरे
भ्यस्तुपतिष्ठतइत्युक्तंतदनंतरंकृत्यमाह ॥ अथैनस्यहिरण्येनमूर्द्धिकलशेनसंततधारांनिषिंचेत्मधुनासर्पिषापयसा
चेक्षुरसेननालिकेलरसेनवाम्ररसेनवानदलाभउदकेनवानमस्तेरुद्रमन्यवइत्येकादशानामनुवाकानामेकमेकंजपेत्सर्वेस् ॥ इति
रुद्राभिषेकविधिः ॥ एवंयातेरुद्रेतिशिखेमादिर्यःएतावंनश्वेतिदिग्वधानःप्रथम ॥ अथापरोन्यासः ॥ तत्रच ॥ ॐ नमोभगवतेरु
द्रायेतिनमस्कारंन्यसेदितिश्रूयते ॥ अस्यायमेकार्थ ॥ नमस्कारंनमस्कारमंत्रंपूर्वोक्तंपठित्वानमस्कारंकुर्यादिति ॥ अथान्योर्थ
नमस्कारंन्यसेत्पूर्वोक्तमेवमंत्रंवक्ष्यमाणप्रकारेणनमोनंन्यसेदिति ॥ तद्यथा ॥ ॐ मूर्द्ध्नेनमइतिमूर्द्ध्नि ॥ १ ॥ ननासिकायैनमइ

॥रत्ना॥
॥१०९॥

तिनासिकायाम् ॥२॥ मों ललाटाय नमः इति ललाटे ॥३॥ भं मुखाय नमः इति मुखे ॥४॥ गं कण्ठाय नमः इति कण्ठे ॥५॥ वं हृदयाय नमः ॥ इति
हृदये ॥६॥ तें दक्षिणहस्ताय नमः दक्षहस्ते ॥७॥ रुं वामहस्ताय नमः इति वामहस्ते ॥८॥ द्रां नाभिदेशाय नमः इति नाभौ ॥९॥ यं पदाभ्यां न
मः इति पादयो ॥१०॥ अथापरप्रकारः ॥ ॐ नमो भगवते रुद्राय इति दशभिरक्षरैः क्रमेण मूर्धादिपादान्तप्रदेशान् स्पृशेदिति ॥ अ
त्र वा यं क्रमः ॥ पूर्वोक्तदिग्बन्धसहितं मासं कृत्वा ॥ ॐ नमो भगवते रुद्राय मन्त्रार्थप्रणाम्य ॥ ततश्च ॐ मूर्ध्ने नमः इत्यादि· पक्षे ॐ इत्या
दिन्यासं वा कुर्यादिति ॥ ॥इति द्वितीयो न्यासः ॥ अथातो न्यासः ॥ सद्योजातमिति पादयो ॥१॥ वामदेवायेत्यूरुमध्ये ॥२॥ अघोरेभ्य
इति हृदये ॥३॥ तत्पुरुषायेति मुखे ॥४॥ ईशान इति मूर्ध्नि ॥५॥ इति तृतीयो न्यासः ॥ ॥ ततः सम्पुटीकरणम् ॥ तत्र क्रमेण न्यासादिदि
ग्बन्धपर्यन्तं मन्त्रैर्मुद्रितां जलिप्रदर्शनम् ॥ ॐ त्रातारमिन्द्रं ॥१॥ त्वन्नो अग्ने ॥२॥ मृगनःपथामभयं कृणोतु यस्मिन्नक्षत्रे यम एति
राजा ॥ यस्मिन्नेनमभ्यषिञ्चन्त देवाः तदस्य चित्रं हविषा यजाम ॥३॥ अमुत्वं तम यजमानम ॥४॥ तत्त्वायामि ॥५॥ जातो निमुङ्क्ति ॥६॥ ध
यर्ष· सोम ॥७॥ तमीशानम् ॥८॥ असमे रुद्रा ॥९॥ स्योना पृथिवि ॥१०॥ इति सम्पुटीकरणम् ॥ ॥ ततश्चतुर्थन्यासो गुह्यादिमन्त्र
णाख्यः ॥ ॐ मनोज्योतिरिति गुह्ये ॥१॥ अबोध्यग्निरिमिदरे ॥२॥ मूर्धानं दिव इति हृदये ॥३॥ मर्माणि त इति मुखे ॥४॥ ॐ जातवेदसे
सुनवाम सोममरातीयतो निदहाति वेदः ॥ सनः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निरिति शिरसि ॥ कविरुःजातवेदाय
दितापावकोसि वैश्वानरो यदिवा वैद्युतोसि ॥ शंप्रजाभ्यो यजमानाय लोकम् ऊर्जं सुप्रिंददद्भ्याहृत्स्व इति शिरो मन्त्रमाहुः ॥ इति चतुर्थो

109
॥रामः॥
॥१०९॥

न्यासः॥ अथ शिवसंकल्पादिः पञ्चमः॥ यज्जाग्रत इति पठित्वा हृदयाय नमः॥ १॥ सहस्रशीर्षेति शिरः॥ २॥ अद्भ्य इति शिखायाम्॥ ३॥ आशु
शिशान इत्येन कवचम्॥ ४॥ सौरेणा नेत्रत्रयम्॥ ५॥ रौद्रेणास्त्रं॥ ६॥ अयं च पञ्चमः शिवसंकल्पादिन्यासः एवं पञ्चाङ्गन्यासं विधाय हिरण्यग
र्भः सामा हि ६ यस्समेय आत्मदा येन द्यौ॥ यं क्रन्दसी इत्याद्यैरष्टभिर्ऋग्भिरष्टांगप्रणामेन॥ इत्यष्टांगप्रणाम॥ एवं न्यासविधिं कृत्वा ततो रु
द्रजपमारभेदिति सूत्रेयं जनं जप पूजा होमं चारभेदिति महार्णवे॥ ॥ इति बौधायनसूत्रानुसारी पञ्चाङ्गन्यासः॥ ॥ पञ्चाङ्गरुद्रा
णामितस्य पक्रमा बौधायनमते पञ्चैव न्यासाः॥ शातातपेन तु षडपि न्यासाः उक्ताः षडंगैकादशी रुद्रः इत्युक्तेः सर्वप्रजननादि सर्वापर्यन्तं
षोडशांगेषु कर्तव्यः॥ बौधायनेनाभिषेकप्रकरणे न उक्ते रिति महार्णवे॥ हेमाद्रौ तु कौशिकेन सकल्पजपहोमोपक्रम्य न्यासषडङ्ग
कारो न रोगाः क्व॥ न्यासं भवादिभिः कुर्यान्नमोन्तैः प्रणवान्वितैः॥ भवं च पादयोर्न्यस्य शर्वं न्यस्योरुमध्यतः॥ ईशानं गुह्यदेशे तु नाभौ पशुपतिं
न्यसेत्॥ रुद्रं च हृदये न्यस्य उग्रं चैव तु विन्यसेत्॥ भीमं ललाटदेशे च महान्तं शीर्षि विन्यसेत्॥ तथैवाम्यानुवाकस्य मन्त्रैर्द्वादशभिः शुचिः
न्यासं कृत्वा तु लोम्येन वर्जयित्वाभिचारकं॥ आद्यं तु पादयोर्न्यस्य द्वितीयं जानुदेशतः॥ ऊर्वोस्तृतीयं विन्यस्य चतुर्थं गुह्यदेशतः॥ पञ्चमं वा दे
शे तु षष्ठं तु हृदये न्यसेत्॥ सप्तमं कण्ठदेशे तु मुखे चाष्टममुत्तमं॥ नवमं नासिकायां तु दशमं नेत्रयोर्द्वयोः॥ एकादशं ललाटे तु द्वादशं शीर्
र्षि विन्यसेत्॥ त्रयोदशं तु कवचं कृत्वास्त्रे तु पद्भनतः॥ इति अत्र रुद्रयंत्रे वेष्टुपरिवस्त्रे शिष्टाः कुर्वन्ती ति तदुच्यते॥ स्कान्दे॥ प्रणम्य जग
न्नामीशमुमादेहार्धधारिणाम्॥ यन्त्रोद्धारमहं वक्ष्ये रुद्रकल्पानुसारतः॥ १॥ मध्ये वृत्तं समालिख्य तन्मध्ये च दशाक्षरम्॥ वहिरष्टदलं पद्मं त

॥ रत्न ॥
॥ ११० ॥

नः षोडशपत्रकम् ॥ २ ॥ चतुर्विंशतिपत्राब्जं द्वात्रिंशत्पत्रकं तथा ॥ चत्वारिंशत्पत्रकं तु वृत्तं स्यात्समप्रभम् ॥ ३ ॥ पंचपत्रात्मकं वृत्तं चतुरस्रं
चभूपुरम् ॥ सत्वं रजस्तमश्चेति त्रितयं गुणाः परितो वृतम् ॥ ४ ॥ चतुर्थं द्वारदेशेषु वह्निर्नागसमावृतम् ॥ रुद्रपीठमिति ख्यातं देवतास्तत्र विन्य
सेत् ॥ ५ ॥ चत्वारिंशच्छतं चैकं देवतानां समुदाहृतम् ॥ कर्णिकामध्यदेशे तु रुद्रं पंचास्यमालिखेत् ॥ ६ ॥ नमो भगवते रुद्रायेति तारादिकं न्यसे
त् ॥ सोयं दशाक्षरो मंत्रः सर्वकामार्थसिद्धिदः ॥ ७ ॥ प्रणवादिनमोन्तानि पंचास्यानि ततः परम् ॥ सद्योजातं वामदेवमघोरं तदनंतरम् ॥ ८ ॥
ततस्तत्पुरुषं प्रोक्तमीशानं पंचमं क्रमात् ॥ प्रधानमिदमाख्यातं प्रथमावरणं ततः ॥ ९ ॥ दलेष्वष्टसु तं ध्यायादीन्पूर्वादिक्रमतो न्यसेत् ॥ पू
र्व्वपूजकयोर्मध्ये प्राचीस्थाप्यं च लेखने ॥ १० ॥ आदौ नन्दिमहाकालौ गणेशवृषभौ क्रमात् ॥ अनंतं भृंगिरीटिं च स्कंदोमाचंडसंज्ञकान् ॥
११ ॥ षोडशारे ततः पद्मे द्वितीयावरणे यजेत् ॥ अनंतं च तथा सूक्ष्मं शिवं चैकपदं तथा ॥ १२ ॥ एकरुद्रं त्रिमूर्तिं च श्रीकंठं वामदेवकम् ॥
ज्येष्ठं श्रेष्ठं तथा रुद्रं कालं कलविकरणां ॥ १३ ॥ बलं बलविकरणं बलप्रमथनं तथा ॥ तृतीयावरणे पद्मे चतुर्विंशद्दले तथा ॥ १४ ॥ अणिमा
महिमा चैव लघिमा गरिमा तथा ॥ प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥ १५ ॥ ततः परं क्रमेणैव न्यसेद्ब्राह्म्यादिदेवताः ॥ ब्राह्मी माहे
श्वरी चैव कौमारी वैष्णवी तथा ॥ १६ ॥ वाराही चैन्द्री चामुण्डा चर्चिका चेति ना क्रमात् ॥ ततोऽष्टस्वसिताङ्गादीन्भैरवान्विन्यसेत्सुतः ॥ १७
असितांगो रुरुश्चंडः क्रोधश्चोन्मत्तभैरवः ॥ कालभीषणसंहारभैरवाश्चाष्टकीर्तिताः ॥ द्वात्रिंशत्पत्रके पूर्वं भवाष्टकमुदाहृतम् ॥ ततोन
न्तो वासुकिश्चैव तक्षकश्च कुलीरकः ॥ कर्कोटकः शंखपालः कम्बलोऽश्वतरस्तथा ॥ ततोऽष्टसु न्यसेद्दैवं पृथ्वीं हेहयमर्जुनम् ॥ शाकुन्तलेयं भर

110
॥ रत्न ॥
॥ ११० ॥

तं नलेरामसिति क्रमात्॥ ततः कुलाचलानष्टौ दलेष्वष्टसु विन्यसेत्॥ हिमवान्निषधो विन्ध्यो माल्यवान् पारियात्रकः॥ मलयो हेमकूटश्च
गन्धमादनसंज्ञकः॥ चत्वार्यावरणान्येवं पंचमावरणोन्ततः॥ चत्वारिंशद्दलेपद्मे पंचमावरणोन्यसेत्॥ इन्द्राद्यष्टौ लोकपालानष्टसु कः
मशोन्यसेत्॥ इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा॥ वायुं कुवेरमीशानं दलेष्वष्टसु विन्यसेत्॥ इंद्रादिलोकपालानामष्टौ शस्त्रीस्ततो न्य
सेत्॥ वज्रं शक्तिं दण्डखड्गौ पाशांकुशगदा अपि॥ त्रिशूलं लोकपालानामायुधानि क्रमाल्लिखेत्॥ ततोष्टौ वाहनान्येषामष्टसु क्रमतो लिखे
त्॥ ऐरावतं तथा मेषं महिषं श्वेनसंज्ञितं॥ मकरं च मृगं चैव नरं च वृषभं तथा॥ ऐरावताद्यो प्यष्टौ दिग्गजास्तदनंतरम्॥ ऐरावतः पुण्ड
रीको वामनः कुमुदांजनः॥ पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः॥ भूगृहात्पुनर्लेख्याः पंचपद्मान्मकाद्बहिः॥ इंद्रविन्यस्य पूर्वस्यामाग्ने
य्यामग्निमेव च॥ दक्षिणस्यां यमं चैव नैर्ऋत्यां निर्ऋतिं तथा॥ प्रतीच्यां वरुणं वायुं वायव्यां विन्यसेन्नमः॥ कुवेरं चैव कौवेर्य्यामैशान्यामीशं
मालिखेत्॥ विरूपाक्षं तु विन्यसेदाग्नेय्यामग्नियोगतः॥ नैर्ऋत्यां निर्ऋतेर्योगे विश्वरूपं च विन्यसेत्॥ वायव्यां वायुयोगे च लिखेत्पुष्पदन्तिं
तथा॥ ईशान्यामूर्द्धलिंगं च न्यसेदीशानयोगतः॥ प्राग्यादिक्रमतो लेख्याः शेषाद्या भूगृहाद्बहिः॥ विप्रवर्णाश्वेतरूपं सहस्रफणिमण्डि
तम्॥ शेषं विन्यस्य पूर्वस्यां पूजयेच्च विधानतः॥ कर्कोटकं शूद्रवर्णाश्वेतं त्रिशत्फणायुतम्॥ ईशान्यां दिशि विन्यस्य पूजयेद्विधिवत्ततः॥
रुद्रपीठमिदं सर्वं रुद्रकल्पेषु विश्रुतम्॥ शंभुना स्वयमाख्यातं भक्तानुग्रहकाम्यया॥ कुंकुमागरुकर्पूरैर्भूर्जपत्रे थवा पटे॥ लिखितं पू
जितं स्यात्सर्वकामार्थसिद्धिदम्॥ मंत्रत्रयं मया प्रोक्तं आनादेवनेति च॥ पूजनीयं प्रयत्नेन नैनेदं देवतामयम्॥ नाग्निचौरभयं तन

CC-0. In Public Domain. Digitization by eGangotri

त्रनचराजभयंक्वचित्॥ यत्रैदंलिखितंयंत्रं पूज्यतेविधितःसदा॥ ॥अथरुद्रप्रयोगः॥ देशकालौसंकीर्त्यअमुकफलप्राप्त्यर्थंश्रीप
रमेश्वरप्रीत्यर्थंस्वयंब्राह्मणद्वारावाअमुकरुद्रजपंकरिष्येइतिसंकल्प्यतदंगत्वेनगणपतिपूजनपुण्याहवाचनमातृपूजनंनां
दीश्राद्धवार्पवृत्वस्थण्डिलेवरणानिकृत्वदेवालयादौजपंसमाप्यभद्रंकर्णेभिरितिमंत्रपंचविंशत्तस्यामुकरुद्रजपस्यदशांशेनप्रति
मंत्रपक्षेनैकपक्षस्तुनरेशतनपक्षेणवातिलद्रव्येणहोमंकरिष्यइतिसंकल्प्यगणेशंपूज्यसर्षपविकिरणादिमंत्रप्रतिष्ठान्तेग्रहमख
वन्हवाग्निप्रतिष्ठाप्यग्रहवेद्यांग्रहान्प्रतिष्ठाप्यरुद्रवेदिस्थवस्त्रेलिखितरुद्रपीठदेवतास्थापयेत्॥ ॥ॐनमोभगवतिरुद्रायेति
मध्ये॥ नत्रैवरिस्मुसद्योजातःस्कन्दःउमाचईश्वरः॥ इतिप्रथमावरणम्॥ ॥अनन्तः॥१॥सूक्ष्मः॥२॥शिवः॥३॥एकपात्॥४॥एक
रुद्रः॥५॥त्रिमूर्त्तिः॥६॥श्रीकण्ठः॥७॥वामदेवः॥८॥ज्येष्ठः॥९॥रुद्रःकालः॥१०॥करविकरणः॥बलः॥१०॥बलविकरणःबलप्रमथनः॥
१६॥इतिद्वितीयावरणे॥अणिमा॥१॥महिमा॥२॥लघिमा॥३॥गरिमा॥४॥प्राप्तिः॥५॥प्राकाम्यम्॥६॥ईशिता॥७॥वशिता॥८॥ब्रा
ह्मी॥९॥माहेश्वरी॥१०॥कौमारी॥११॥वैष्णवी॥१२॥वाराही॥१३॥ऐन्द्री॥१४॥चामुण्डा॥१५॥चंडि॥१६॥असितांगभैरवः॥१७॥रुरुभैर
वः॥१८॥चण्डभैरवः॥१९॥क्रोधभैरवः॥२०॥उन्मत्तभैरवः॥२१॥कालभैरवः॥२२॥भीषणभैरवः॥२३॥संहारभैरवः॥२४॥ ॥इतितृ
तीयावरणम्॥ ॥भवः॥१॥शर्वः॥२॥ईशानः॥३॥पशुपतिः॥४॥रुद्रः॥५॥उग्रः॥६॥भीमः॥७॥महान्॥८॥अनन्तः॥९॥वासुकिः॥१०॥
तक्षकः॥११॥कुलीरः॥१२॥कर्कोटकः॥१३॥शंखपालः॥१४॥कम्बलः॥१५॥अश्वतरः॥१६॥वैमः॥१७॥पृथुः॥१८॥हैहयः॥१९॥अर्जुनः॥२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाकुन्तलेपः ॥ २१ ॥ भरतः ॥ २२ ॥ नल ॥ २३ ॥ रामः ॥ २४ ॥ हिमवान् ॥ २५ ॥ निषधः ॥ २६ ॥ विन्ध्यः ॥ २७ ॥ माल्यवान् ॥ २८ ॥ पारियात्रकः ॥ २९
मलयः ॥ ३० ॥ हेमकूटः ॥ ३१ ॥ गन्धमादनः ॥ ३२ ॥ इति चतुर्थावरणम् ॥ ॥ इन्द्रः ॥ १ ॥ अग्निः ॥ २ ॥ यमः ॥ ३ ॥ निर्ऋतिः ॥ ४ ॥ वरुणः ॥
५ ॥ वायुः ॥ ६ ॥ कुवेरः ॥ ७ ॥ ईशानः ॥ ८ ॥ शची ॥ ९ ॥ स्वाहा ॥ १० ॥ वाराही ॥ ११ ॥ खड्गिनी ॥ १२ ॥ वारुणी ॥ १३ ॥ वायवी ॥ १४ ॥ कौवेरी ॥ १५ ॥
ईशानी ॥ १६ ॥ वज्रम् ॥ १७ ॥ शक्तिः ॥ १८ ॥ दण्डः ॥ १९ ॥ खड्गः ॥ २० ॥ पाशः ॥ २१ ॥ अंकुशः ॥ २२ ॥ गदा ॥ २३ ॥ त्रिशूलम् ॥ २४ ॥ ऐरावतः ॥ २५ ॥ मे
षः ॥ २६ ॥ महिषः ॥ २७ ॥ प्रेतः ॥ २८ ॥ मकरः ॥ २९ ॥ हरिणः ॥ ३० ॥ नरः ॥ ३१ ॥ वृषः ॥ ३२ ॥ ऐरावतः ॥ ३३ ॥ पुण्डरीकः ॥ ३४ ॥ वामनः ॥ ३५ ॥ कुमुदः ॥
३६ ॥ अञ्जनः ॥ ३७ ॥ पुष्पदंतः ॥ ३८ ॥ सार्वभौमः ॥ ३९ ॥ सुप्रतीकः ॥ ४० ॥ इति पंचमावरणम् ॥ पूर्वे इन्द्रः ॥ आग्नेय्यामग्निः विरूपाक्षश्च ॥ याम्
यायमः ॥ नैरृत्ये निर्ऋतिर्विरूपश्च ॥ पश्चाद्वरुणः ॥ वायव्यां वायुः ॥ पशुपतिश्च ॥ उत्तरे कुवेरः ॥ ईशान्यामीशानः ॥ ऊर्द्धे लिङ्गं च ॥ पुनः पूर्वादि
शेषः ॥ तक्षकः ॥ अनन्तः ॥ वासुकिः ॥ संखपालः महापद्मः कम्बलः कर्कोटकः ॥ इति रुद्रयंत्रपूजा ॥ ततः ईशान्यां कुम्भे वरुणं संपूज्य रुद्रजप
र्थं ब्राह्मणं वृणुयात् ॥ ततो ग्रहमखवत् कुण्डादिहोमं कृत्वा ॥ घृताक्ततिलैरुद्रहोमं कृत्वा ॥ रुद्रपीठे देवता न्यस्य एकैकामाहुतिं हुत्वा ॥ दिक्पाले
भ्यो रुद्रादिक्षेत्रपालाय च ग्रहमखवद्बलिं दत्वा नवांगहोमं समाप्य पूर्णाहुतिं हुत्वा ब्राह्मणो पूर्णपात्रं दत्वा ॥ पवित्रविमोदकादिकर्मशे
षं समाप्य ॥ आचार्यादिभ्यो दक्षिणां दत्वा ॥ आचार्यस्त्विग्भी रुद्रकलशोदकेनाभिषिक्तो ग्रहाणां रुद्रस्य चोत्तरां पूजां विधाय ॥ ॐ देवा
गातुविद इति पठन् यजनं गच्छेन्निवाग्निप्रणीतान्देवान्विसृज्य ॥ महाउपोपकरणमाचार्याय दत्वा ब्राह्मणान्भोजयित्वा ॥ यस्य स्मृत्येति प्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

दादिति च न पित्वा कर्मसंपूर्णतां वाचयित्वा ॐकारेण वा वेमादि पठित्वा ॥ एतन्महारुद्रजपहोमार्चनादिकर्म श्रीमत्परमेश्वरार्पणमिति
समर्पयेत् ॥ सुहृद्गुनोमुञ्जीनेति ॥ ॥ श्रीमन्महाराजाधिराजगीर्वाणयुद्धविक्रमसाहदेव श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा
रत्नावती हृतानन्दपातालकरुद्रस्यपद्धतिः कृतसंतुष्ट्यर्थं महारुद्रपद्धतिप्रयोगरत्नम् ॥ ॥ अथ संध्योपासनप्रयोगः ॥ आसने उप
विश्य ॥ ॐ अच्युताय नमः ॥ १ ॥ ॐ अनंताय नमः ॥ २ ॥ ॐ गोविन्दाय नमः ॥ ३ ॥ इति मंत्रैराचम्य ॥ वामेन कुशान्दक्षिणेन पाणिना पवित्रं कु
शत्रयं च धृत्वा सप्रणवगायत्र्या शिखां बध्वा रेशास्मिसुरव आचम्य ऋतमित्यभिमंत्र्य पुनराचामेत् ॥ ततो वारिणात्मानं वेष्टयित्वा स
प्रणवगायत्र्या रक्षां कुर्यात् ॥ ततः ॐकारस्य ब्रह्मा ऋषिर्गायत्री छंदोऽग्निर्देवता शुक्लो वर्णः सर्वकर्मारंभे विनियोगः ॥ सप्तव्याहृतीनां प्रजा
पतिऋषिर्गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदांस्यग्निवाय्वादित्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवता अनादिष्टप्रायश्चित्ते प्राणा
यामे विनियोगः ॥ गायत्र्या विश्वामित्र ऋषिस्त्रिपदा गायत्री छंदः सविता देवताग्निर्मुखमुपनयने प्राणायामे विनियोगः ॥ शिरसः प्रजापति
ऋषिस्त्रिपदा गायत्री छन्दो ब्रह्माग्निवायुसूर्या देवताः प्राणायामे विनियोगः ॥ इत्यृष्यादिकं स्मृत्वा बद्धासनः सम्मीलितनयनो मौनी प्रा
णायामत्रयं कुर्यात् ॥ अत्र वायोरोदानकाले पूरकनामा प्राणायामः ॥ तत्र श्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत् ॥ धारणकाले कुंभकः त
त्र कमलासनं रक्तवर्णं चतुर्भुजं चतुर्वक्त्रं ब्रह्माणं हृदि ध्यायेत् ॥ त्यागकाले रेचकः ॥ तत्र श्वेतवर्णं ललाटदेशे शिवं ध्यायेत् ॥ त्रिष्वप्येतेषु प्रत्ये
कं त्रिमंत्राभ्यासः ॥ प्रत्येकमोंकारादिसप्तव्याहृतयः ॥ ॐकारादिगायत्री ॥ ॐकारादयमध्यस्य शिरश्चेति मंत्रः ॥ तस्य स्वरूपम् ॥ ॐ भूः ॥ ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुवः॥ ॐ स्वः॥ ॐ महः॥ ॐ जनः॥ ॐ तपः॥ ॐ सत्यम्॥ ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्॥ ॐ आपो ज्योती रसो
मृतं ब्रह्म भूर्भुवः स्वरोम्॥ ततः सूर्यश्चेति ब्रह्मा ऋषिः प्रकृतिश्छन्दः सूर्यो देवता अपामुपस्पर्शने विनियोगः॥ ॐ सूर्यश्च मा मन्युश्च मन्युपत
यश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्॥ यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु॥ यत्किञ्चिद्दुरितं म
यि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा॥ इति प्रातराचामेत्॥ आपः पुनन्त्विति विष्णुऋषिरनुष्टुप्छन्द आपो देवता अपामु
पस्पर्शने विनियोगः॥ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्॥ पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम्॥ यदुच्छिष्टमभोज्यं च यद्वा दु
श्चरितं मम॥ सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं ॐ स्वाहा॥ इति मध्याह्ने आचामेत्॥ अग्निश्च मेति रुद्र ऋषिः प्रकृतिश्छन्दोऽग्निर्देवता अ
पामुपस्पर्शने विनियोगः॥ ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्॥ यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां
पद्भ्यामुदरेण शिश्ना हस्तदवलुम्पतु॥ यत्किञ्चिद्दुरितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा॥ इत्यनेन सायमाचामेत्
ततआपो हि ष्ठेत्यादित्र्यृचस्य सप्तभिः पदैः शिरसि॥ अष्टमेन भूमौ नवमेनापि शिरसि कुशत्रयेण जलं क्षिपेत्॥ इदमेव मार्जनम्॥ आ
पो हि ष्ठेत्यादित्र्यृचस्य सिन्धुद्वीप ऋषिर्गायत्री छन्द आपो देवता मार्जने विनियोगः॥ ॐ आपो हि ष्ठा मयोभुवः॥ ॐ ता न ऊर्जे दधातन॥ ॐ
महे रणाय चक्षसे॥ ॐ यो वः शिवतमो रसः॥ ॐ तस्य भाजयतेह नः॥ ॐ उशतीरिव मातरः॥ ॐ तस्मा अरङ्गमाम वः॥ ॐ यस्य क्षया
य जिन्वथ॥ ॐ आपो जनयथा च नः॥ ततः करेण जलमादाय वारत्रयं द्रुपदादिति मन्त्रेण जलं शिरसि क्षिपेत्॥ द्रुपदादिवमित्रि कोकिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥
॥११२॥

लोराजपुत्रऋषिरनुष्टुप्छंदः॥ आपोदेवता सौत्रामण्यवभृथे विनियोगः॥ द्रुपदादिवमुमुचानः स्विन्नः स्नातो मलादिव॥ पूतम्पवित्रेणेवाज्यमापः
शुन्धन्तु मैनसः॥ ततः करसंपुटजलेन नासाग्रसंयोज्य॥ आयम्यासुरनायम्यासुर्वा त्रिः सकृद्वाघमर्षणं जपेत्॥ अघमर्षणसूक्तस्याघमर्षणऋषि
रनुष्टुप्छंदो भाववृत्तं दैवतमश्वमेधावभृथे विनियोगः॥ ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ततो रात्र्यजायत ततः॥ समुद्रोऽर्णवः समु
द्रादर्णवादधि संवत्सरोऽजायत अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥ सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं चान्त
रिक्षमथो स्वः॥ ततः अन्तश्चरसीति पामित्र ऋषिरनुष्टुप्छंदः आपो देवता अपामुपस्पर्शने विनियोगः॥ अन्तश्चरसि भूतेषु गुहायां विश्व
तोमुखः॥ त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम्॥ इत्यनेनाचामेत्॥ ततोऽर्घ्याय॥ ॐ भूर्भुवः स्वरिति गायत्र्या च॥ पुष्पमिश्रं जलांजलिं
सूर्याभिमुखं क्षिपेत्॥ ततो भूस्पृष्टगुल्फतलभागो वा भूमिलग्नैकचरणो वा भूमिलग्नाङ्घ्रिचरणो वा प्रातः सायं च कृतांजलिर्मध्याह्ने ऊर्ध्व
बाहुः सूर्यमुपतिष्ठेदेभिर्मन्त्रैः॥ ॐ उद्वयन्तमित्यस्य हिरण्यस्तूप ऋषिर्गायत्री छंदः सूर्यो देवता सूर्योपस्थाने विनियोगः॥ ॐ उद्वयन्तम
सस्परि स्वः पश्यंत उत्तरम्॥ देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥ ॐ उदुत्यमिति प्रस्कण्व ऋषिर्गायत्री छंदः सूर्यो देवता सूर्योपस्थाने ११३
विनियोगः॥ ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः॥ दृशे विश्वाय सूर्यम्॥ चित्रमित्यस्य कौत्स ऋषिस्त्रिष्टुप्छंदः सूर्यो देवता अग्निषोमोप ॥रामः॥
स्थाने विनियोगः॥ ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥ ॥११२॥
तच्चक्षुरित्यस्य अरातीन पुरउष्णिक्छंदो दध्यङ्ङाथर्वण ऋषिर्गायत्री छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः॥ ॐ तच्चक्षुर्देवहितं पुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्नाकुक्षसुब्रह्मन्॥ पश्येमशरदःशतंजीवेमशरदःशतं भूयश्चपामशरदःशतंप्रब्रवामशरदः॥ शतमदीनाःस्यामशरदःशतंभूयश्चश
रदःशतात्॥ ॐ हृदयायनमः॥ ॐ भूः शिरसेस्वाहा॥ ॐ भुवः शिखायैवषट्॥ ॐ स्वःकवचायहुम्॥ ॐ भूर्भुवःनेत्राभ्यांवषट्॥ ॐ भूर्भुवः
स्वःअस्त्रायफट्॥ इत्यङ्गानिविन्यस्यपूर्वोक्तमुद्रादिकंकृत्वापूर्वोक्तरूपांगायत्रीं ध्यात्वा॥ तेजोसीतिदेवाऋषयोगायत्रीछन्दःशुक्रंदे
वतंगायत्र्यावाहनेविनियोगः॥ ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसिइत्यावाह्य॥ ॐ गा
यत्र्यस्येकपदीद्विपदीत्रिपदीचतुष्पद्यपदसिनहिपद्यसे॥ नमस्तेतुरीयायदर्शितायपदायपरोरजसेसावदोमाप्रापदित्युपस्थायश
नैः॥ प्राङ्मुखोमध्याह्नेसूर्याभिमुखस्तिष्ठन्सायंपश्चिमाभिमुखउपविष्ट॥ उक्तजपविधिनागायत्रीञ्जपेत्॥ जप्यस्वरूपम्॥ ॐ भूर्भुवः
स्वःतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनःप्रचोदयात्॥ ॐ ततःप्रदक्षिणीकृत्यप्रणिपत्यविसर्जयेत्॥ तत्रमन्त्रः॥ ॐ भगव
तिसंध्येक्षमस्वस्वस्थानंगच्छेति॥ इत्याचारादर्शानुसारीसंध्योपासनप्रयोगः॥ अथगायत्र्यर्थं॥ महीधरकृतेवेददीपाख्येभाष्ये॥ ॐ त
त्सवितुः॥ विश्वामित्रऋषिःसावित्रीगायत्रीजपेविनियुक्ता॥ तदितिषष्ठ्यर्थे॥ तस्यदेवस्यद्योतनात्मकस्यसवितुःप्रेरकस्यान्तर्यामिणो
विज्ञानानन्दस्वभावस्यहिरण्यगर्भोपाध्यवच्छिन्नस्यवाआदित्यान्तरपुरुषस्यवाब्रह्मणोवरेण्यंवरणीयंसर्वैःप्रार्थनीयंभर्गःसर्वपापा
नांसर्वसंसारस्यभर्जनसमर्थंतेज॥ सत्यज्ञानानन्दादिवेदान्तप्रतिपाद्यंवयंधीमहि॥ ध्यायामःछान्दसंसंप्रसारणम्॥ यद्वामण्डलपुरु
षारश्मयइतित्रयंभर्गशब्दवाच्यम्॥ भर्गोवीर्यंवा॥ वरुणाद्वाअभिषिषिचानाद्भर्गोपचक्रामवीर्यंवैभर्गइतिश्रुतेः॥ तस्यकस्यःयःसवि

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ११४ ॥

तानोस्माकं धियो बुद्धीः कर्माणि वा प्रचोदयात् ॥ प्रकर्षेण चोदयति प्रेरयति ॥ सत्कर्मानुष्ठानाय ॥ पदार्था वाक्यभेदेन योजना ॥ सवितुर्देवस्य तत्त्व
रेण्यं भर्गो ध्यायाम ॥ यश्च नो बुद्धीः प्रेरयति तं वयं ध्यायामः सत्वसविता एव ॥ लिङ्गव्यत्ययेन वा योजना ॥ सवितुर्देवस्य तद्भर्गो धीमहि ॥ यो यद्भर्गो
नो बुद्धीः प्रेरयतीति ॥ १ ॥ इति गायत्र्यर्थः ॥ अथ प्रपञ्चसारोक्तः श्लोकरूपो गायत्र्यर्थः ॥ तद्धि नीयैकवचनमनेनाखिलवस्तुन ॥ सृष्ट्यादिकार
णं तेजो रूपमादित्यमण्डले ॥ १ ॥ अभिध्येयं सदानंदं परब्रह्माभिधीयते ॥ यतस्तत्सवितुरित्युक्तं पञ्चैकवचनात्मकम् ॥ २ ॥ धात्रोरिह विनिष्प
न्नं प्राणिप्रसववाचकात् ॥ सर्वासां प्राणिजातीनामित्रि प्रसवितुः सदा ॥ ३ ॥ वरेण्यं वरणीयं त्वात्सेवनीयतयाथ तथा ॥ भजनीयतयास
र्वैः प्रार्थनीयतयास्मृतम् ॥ ४ ॥ पूर्वस्याष्टाक्षरस्यैवं व्याहृतिर्भूरितीरिता ॥ पापस्य भञ्जनाद्भर्गो भक्तस्निग्धतया तथा ॥ ५ ॥ देवस्य ह्युद्यिदा
नादिगुणयुक्तस्येति सदा ॥ श्रमन्तेन प्रकाशेन दीप्यमानत्वतो तथा ॥ ६ ॥ ध्यै चिन्तायामतो धातोर्निष्पन्नं धीमहीत्यतः ॥ निगमाद्येन दिव्ये
न विधारूपेण चक्षुषा ॥ ७ ॥ दृश्यो हिरण्मयो देव आदित्ये नित्यसंस्थितः ॥ हीनतारहितं तेजो यस्य स्यात्स हिरण्मयः ॥ ८ ॥ यः सूक्ष्मः सो
हमित्येवं चिन्तयामः सदैव हि ॥ द्वितीयाष्टाक्षरस्यैवं व्याहृतिर्भुवरीरिता ॥ ९ ॥ धियो बुद्धिर्मनो यस्य छान्दसत्वात्पदेरितः ॥ कृतस्थलिङ्गव्य
यासमस्त्वात्सुप्तिङः पदग्रहात् ॥ १० ॥ यत्तत्तेजो निरुपमं सर्वदेवमयात्मकम् ॥ भजतां पापनाशस्य हेतुभूतमिहोच्यते ॥ ११ ॥ न इति प्रोक्त
आदेशः षष्ठ्यास्तौ पुष्यदस्मदोः ॥ तस्मादस्माकमित्यर्थः प्रार्थनायां प्रचोदयात् ॥ १२ ॥ तृतीयाष्टाक्षरस्यापि व्याहृतिः स्वरितीरिताः ॥
एवं दशपदा मन्त्रस्त्र्यष्टाक्षराः स्मृताः ॥ १३ ॥ षडक्षराश्च चत्वारः स्याच्चतुर्विंशदक्षराः ॥ इत्थंभूतं पदं तस्य देवस्य सवितुर्विभोः ॥ १४ ॥

114
॥ रामः ॥
॥ ११४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वरेण्यंभजतांपापविनाशनकरंपरम्॥भर्गोस्वामिरभिध्यानंधियस्तत्त्वःप्रचोदयात्॥१५॥इतिश्लोकरूपगायत्र्यर्थः॥शारदाति
लकेअथोवक्ष्यामिगायत्रीन्तत्त्वरूपांत्रयीमयीम्॥ययाप्रकाश्यतेब्रह्मसच्चिदानन्दलक्षणम्॥१॥प्रणवोव्याहृतयसप्रमु
खास्तस्यादिकाः॥चतुर्विंशत्यक्षरात्मागायत्रीशिरसान्विता॥२॥सर्ववेदोद्धृतःसारोमंत्रोयंसमुदाहृत॥ब्रह्मादेव्यादिगायत्री
परमात्मासमीरिता॥३॥अच्छाद्याःप्रणवस्यैतेऋषिभिःपरिकीर्त्तिता॥जमदग्निर्भरद्वाजभृगुगौतमकाश्यपा॥४॥विश्वामित्रवसि
ष्ठाख्यौव्याहृतीनांमृषीन्विदुः॥गायत्र्युष्णिगथानुष्टुब्बृहतीपंक्तयःक्रमः॥५॥त्रिष्टुब्जगत्यौछन्दांसिकथितानिमनीषिभिः॥अग्नावि
रनिलःसूर्योवाक्पतिर्वरुणोवृषा॥६॥विश्वेदेवाःक्रमादासांदेवताःपरिकीर्त्तिताः॥गायत्र्यामुनिराख्यातोविश्वामित्रोमहामुनिः
७॥गायत्रीछन्दइत्युक्तंदेवतासवितास्मृतः॥शिरसोस्यमुनिर्ब्रह्माच्छन्दोदेव्यादिकास्मृता॥८॥गायत्रीपरमात्मास्याद्देवताकथिता
बुधैः॥व्याहृतीःसप्तभूराद्याहृत्पुरोवासोरुयुग्मके॥९॥जठरेसप्तमेत्र्चतोगायत्र्यर्णान्तनौन्यसेत्॥पत्स्थिपुध्वजेनाभौहृत्कण्ठभुज
संधिषु॥१०॥आस्यनासाकपोलाक्षिकर्णभ्रूमस्तकेपुनः॥पाश्चात्योत्तरयाम्यप्राग्र्ऊर्द्ध्ववक्त्रेषुसाधकः॥११॥पदानिदशविन्यसेद्दश
स्थानेषुमंत्रवित्॥शिरोभ्रूमध्यदृग्वक्त्रकण्ठहृन्नाभिगुह्यके॥१२॥जानुनोःपादयोर्युग्मेतच्छिरःशिरसिन्यसेत्॥हृदयंब्रह्मणोप्रो
क्तंविष्णवेशिरईरितम्॥१३॥शिखारुद्रायकवचमीश्वरायसमीरितम्॥नेत्रंसदाशिवायोक्तमस्त्रंसर्वात्मनेस्मृतम्॥१४॥षड्
न्यासमेवमुक्त्वानिपथास्थानप्रविन्यसेत्॥ध्यानम्॥मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्ताविंदुनिबद्धरत्नमुकुटांतत्वा

CC-0. In Public Domain. Digitization by eGangotri

स्मवर्णाम्बिकान् ॥ सावित्रीं वरदाभयांकुशकश्यापाशं कपालं गुणं शंखं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥ १५ ॥ प्राणायामा
न्प्रकृत्वा गायत्रीं संध्ययोर्जपेत् ॥ सप्तव्याहृतिसंयुक्तां गायत्रीं शिरसा सह ॥ १६ ॥ त्रिरुच्चरन्धियाप्राणायामारयेद्यतमानसः
प्राणायामो यमाख्यातः समस्तदुरितापहः ॥ १७ ॥ व्याहृतित्रयसंयुक्तां गायत्रीं दीक्षितो जपेत् ॥ तत्त्वलक्षविधानेन भिक्षाशी वि-
जितेन्द्रियः ॥ १८ ॥ क्षीरोदनं तिलान्दूर्वां क्षीरद्रुमसमिद्वरान् ॥ पृथक्सहस्रत्रितयं जुहुयान्मंत्रसिद्धये ॥ १९ ॥ विधाय मण्डलं विद्वान्त्रि-
कोणोज्ज्वलकर्णिकम् ॥ सौरं पीठं यजेत्तत्र दीप्तादिनवशक्तिभिः ॥ २० ॥ मूलमंत्रेण क्लृप्तायां मूर्तौ देवीं प्रपूजयेत् ॥ कोणेषु त्रिषु सम्पू-
ज्या ब्राह्म्याद्याः शक्तयो वहिः ॥ २१ ॥ आदित्याद्यास्ततः पूज्या उषादिसहिताः क्रमात् ॥ ततः षडङ्गान्यभ्यर्च्य केशरेषु यथाविधि ॥ २२ ॥ प्रल्हा-
दिनीं प्रभां पश्चान्नित्यां विश्वंभरां पुनः ॥ विलासिनीप्रभावत्यौ जयां शान्तिं यजेत्पुनः ॥ २३ ॥ कान्तिं दुर्गां सरस्वत्यौ विश्वरूपां ततः परम् ॥ विशा-
लासंज्ञितामीशां व्यापिनीं विमलां यजेत् ॥ २४ ॥ तमोपहारिणीं सूक्ष्मां विश्वयोनिं जयावहाम् ॥ पद्मालयां परां शोभां पद्मरूपां ततोर्चयेत् ॥ २५
ब्राह्म्याद्याः सारुणा बाह्ये पूजयेत्प्रोक्तलक्षणाः ॥ ततोर्चयेद्ग्रहान्वाह्ये शक्रादीनायुधैः सह ॥ २६ ॥ इत्थमावरणैर्देवीं दशभिः परिपूजयेत् ॥ ध
र्मार्थकाममोक्षाणां भोक्ता स्याद्द्विजसत्तमः ॥ २७ ॥ तत्त्वसंख्यासहस्राणि मंत्रविज्जुहुयात्तिलैः ॥ सर्वपापविनिर्मुक्तो दीर्घमायुः स विन्दति ॥ २८ ॥
आयुषे साज्यहविषा केवलेनाथ सर्पिषा ॥ दूर्वात्रिकैस्तिलैर्मंत्री जुहुयात्त्रिसहस्रकम् ॥ अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयादयुतं ततः ॥ महालक्ष्मी
र्भवेत्तस्य षण्मासान्नात्र संशयः ॥ ३० ॥ ब्रह्मश्रियेप्रजुहुयात्सप्रसूनैर्ब्रह्मवृक्षजैः ॥ बहुना किमिहोक्तेन यथावत्साधुसाधिता ॥ ३१ ॥ द्विजन्मनामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पंवियासिद्धकामउधामता ॥ २२ ॥ इति ॥ अथप्रयोगः ॥ शिवार्चनचंद्रिकायाम् ॥ प्रातः कृत्यादियोगपीठन्यासांते शिरसि ब्रह्मणे ऋषये न
मः ॥ मुखे गायत्री छंदसे ॥ हृदये श्री परमात्मने देवतायै ॥ पुनः शिरसि जमदग्नि भरद्वाज भृगु गौतम काश्यप विश्वामित्र वसिष्ठेभ्य ऋषि
भ्यो ॥ मुखे गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीभ्यो ॥ हृदये अग्निवायुसूर्यगुरुवरुणेन्द्रविश्वेदेवेभ्यो ॥ शिरसि ब्रह्मणे ऋषये ॥ मु
खे दैवीगायत्री छन्दसे ॥ हृदये श्री परमात्मदेवतायै ॥ इति विन्यस्य महाव्याहृतिभिः प्राणायामत्रयं कृत्वा शिरसि विश्वामित्राय ऋषये नमः
मुखे गायत्री छंदसे ॥ हृदये सावित्री देवतायै ॥ इति विन्यस्य ॥ ॐ ब्रह्मणे हृदयाय नमः ॥ ॐ विष्णवे शिरसे स्वाहा ॥ ॐ रुद्राय शिखायै वषट् ॥
ॐ ईश्वराय कवचाय हुं ॥ ॐ सदाशिवाय नेत्राय वौषट् ॥ ॐ सर्वात्मने अस्त्राय फट् ॥ इति षडंगं विधाय ॥ हृदि ॐ भूर्नमः ॥ मुखे ॐ भुवः ॥ दक्षि
णांशे ॐ स्वः ॥ वामांशे ॐ महः ॥ दक्षपार्श्वे ॐ जनः ॥ वामे ॐ तपः ॥ जठरे ॐ सत्यं पादांगुलिमूलयोः ॥ ॐ तत्नमः ॥ गुल्फयोः सन्नमः ॥ जानुनोः वि
ऊरुमूलयोः ॥ तुं ॥ लिङ्गे वम् ॥ नाभौ रें ॥ हृदि णिं ॥ कण्ठे यम् ॥ करांगुलिमूलयोः भं ॥ मणिबंधयोः ॥ र्गो ॥ कूर्परे दे ॥ भुजयोः वम् ॥ मुखे स्यम् ॥ ना
सिकयोः धीम् ॥ कपोलयोः मम् ॥ नेत्रयोः ॥ हिं ॥ कर्णयोः धिं भ्रुवोः यों ॥ व्रूशपांयो ॥ व्रूश्रधनं ॥ वामकर्णे प्र ॥ दक्षकर्णे चों ॥ मुखे दं ॥ शिरसि यां ॥
२५ ॥ अथ पदन्यासः ॥ शिरसि तत् भ्रूमध्ये सवितुः नेत्रयोः वरेण्यम् ॥ मुखे गर्भ ॥ कण्ठे देवस्य ॥ नाभौ धियः ॥ गुह्ये यः ॥ जानुनोः नः ॥ पादयोः प्रचोद
यात् ॥ इति पदन्यासः ॥ पुनः शिरसि ॥ ॐ आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरों नमः ॥ इति विन्यस्य ध्यानाद्यात्मपूजांते पूर्वोक्तसौरपीठमभ्यर्च्य
तत्र मूर्तिं गायत्र्या परिकल्प्य तस्यां देवीमावाह्य पूर्वाद्युपचारैः ॥ संपूज्याग्निकोणस्थाग्रकोणादिप्रादक्षिण्येन कोणत्रये ॥ ॐ ब्राह्म्यै नमः ॥ ॐ

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥ माहेश्वर्यै ॥ ॐ वैष्णव्यै ॥ इति संपूज्य कर्णिकायामेव त्रिकोणाद्बहिर्देव्य आदिचतुर्दिक्षु ॥ ॐ आदित्याय नमः ॥ ॐ रवये ॥ ॐ भानवे ॥ ॐ भास्कराय ॥
॥ ११६ ॥ ततोऽस्मादिचतुःकोणेषु ॥ ॐ उषायै नमः ॥ ॐ प्रज्ञायै ॥ ॐ संध्यायै ॥ इति संपूज्य अष्टदलेषु प्राग्वदष्टानि संपूज्य अष्टदलकेसरेषु ॥ ॐ प्रल्हादिन्यै नमः
सर्वप्रभायै ॥ नित्यायै ॥ विश्वम्भरायै ॥ विशालिन्यै ॥ प्रभावत्यै ॥ जयायै ॥ शान्त्यै ॥ इति संपूज्य ॥ दलाग्रेषु कान्त्यै नमः ॥ दुर्गायै ॥ सरस्वत्यै ॥ विश्वरूपायै
विशालायै ॥ ईशायै ॥ व्यापिन्यै ॥ विमलायै नमः ॥ इति संपूज्य ॥ दलमध्येषु ब्राह्म्याद्या दलाग्रेषु सोमाद्यष्टग्रहान्सौरप्रकरणोक्तांश्च संपूज्य ॥ चतुरस्रवी
थ्ये प्राग्वदिन्द्रादीन्वज्रादींश्च संपूज्य ॥ धूपदीपादिसर्वं कृत्वा पूजां समापयेत् ॥ ॥ इति गायत्रीपूजाप्रयोगः ॥ अथ गायत्रीमुद्रालक्षणम् ॥
प्रयोगपारिजाते ॥ संमुखं संपुटं चैव विततं विस्तृतं तथा ॥ द्विमुखं त्रिमुखं चैव चतुः पंचमुखं तथा ॥ १ ॥ षण्मुखाधोमुखं चैव व्यापकाञ्जलिकं तथा ॥
शकटं यमपाशं च ग्रथितं सम्मुखोन्मुखम् ॥ २ ॥ प्रलम्बं मुष्टिकं चैव मीनः कूर्मवराहकौ ॥ सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा ॥ ३ ॥ एता मुद्रा
श्चतुर्विंशा गायत्र्यां सुप्रतिष्ठिताः ॥ ब्राह्मणो यो न जानाति तस्य संध्या हि निष्फला ॥ ४ ॥ इति ॥ अथ व्याख्या ॥ संहतानुत्तानौ वक्राङ्गुलिकौ करौ स
मुखम् ॥ १ ॥ अन्योन्यसंहतौ पद्ममुकुलाभौ संपुटम् ॥ २ ॥ संहतावुत्तानौ प्रसारिताङ्गुलिकौ हस्तौ विततम् ॥ ३ ॥ अन्योन्यसंहतौ मुक्ताङ्गुलिद्वय 116
कौ विस्तृतम् ॥ ४ ॥ मिथः सम्मुखासक्तयोः पाण्योः कनिष्ठाद्वययोगे बद्धे शेषाङ्गुलीनां चेत्स्यादङ्गुष्ठद्वयमारभ्यानामिकान्तं यावद्द्विमुखं ५ त्रिमुखं ॥ रामः ॥
६ चतुर्मुखं ७ पंचमुखं ८ क्रमशः ॥ पूर्ववत्कनिष्ठाद्वययोगमश्लेषेण तदङ्गुलीनां संयोगान्निर्मुक्तमुच्यमानाग्रकौ करौ षण्मुखम् ॥ ९ ॥ ईषद्वक्रावुञ्जौ सं ॥ ११६ ॥
मुक्तौ हस्तावधोमुखम् ॥ १० ॥ उत्तानौ संमुक्तौ कुञ्चितौ करौ व्यापकाञ्जलिकम् ॥ ११ ॥ बद्धाग्रकाङ्गुष्ठावधोमुखौ बद्धमुष्टिकौ शकटम् ॥ १२ ॥ बद्धमुष्टिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योरुपर्यधोभावेनावस्थितयोरुत्तानांकुञ्चितानामानर्जनीदक्षिणानर्जन्यासु अवक्रयासु क्तायमपाशमुद्रा ॥ १३ ॥ उत्तानानिसंश्लिष्टानिअङ्गुलिदला
निपयोः ॥ करयोस्तावन्योन्यसंमुखाघटितौवक्राङ्गुष्ठकौकरौग्रथितम् ॥ १४ ॥ संवक्त्रोर्ध्वाङ्गुलिर्वामः संवक्त्राङ्गुलिनाऽधोमुखेनदक्षिणेनसंयुक्तः सं
मुखोन्मुखम् ॥ १५ ॥ उत्तानेऊर्ध्वतर्जनीकौटीपयोस्तौकरौप्रलंबं ॥ १६ ॥ उत्तानावन्योन्यसंयुक्तौमुष्टीमुष्टिकम् ॥ १७ ॥ संयुक्तेअनामिकाकनिष्ठेययो॰
स्तावन्योन्यसंमुखीभूतावूर्ध्वसंयुक्तानिवक्राण्यशेषाङ्गुलिदलानिययोस्तौकरौमीनः ॥ १८ ॥ अधोमुखोवामोऽधोमुखेनदक्षिणेनपृष्ठदेशेसं॰
माक्रान्तःकूर्मः ॥ १९ ॥ दक्षिणपाणिःकक्षाश्रयेसतिऊर्ध्वमधोवामभुजोवराहः ॥ २० ॥ कराग्रोच्छ्रितौविस्तृताङ्गुलिकौकरौसिंहाक्रान्तम् ॥ २१ ॥ कराग्रो
च्छ्रितौविस्तृतनवक्राङ्गुलिकौकरौमहाक्रान्तं ॥ २२ ॥ किंचिदूर्ध्वपाणिःपाणयोर्वातर्जनीदक्षिणोगृहीतामुद्गरः ॥ २३ ॥ अधोमुखेदक्षिणाकरोमूर्ध्निस्थि
तःपल्लवमुद्रा ॥ २४ ॥ इतिगायत्रीमुद्रालक्षणम् ॥ ॥ अथगायत्र्याःपदानिमन्त्र ॥ सवितु ॥ वरेण्यम् ॥ भर्गःदेवस्य ॥ धीमहि ॥ धियः ॥ यः
नः ॥ प्रचोदयादिःतिप्रचोदयात् ॥ ॥ इतिदशपदानि ॥ अथसंध्योपासनशब्दार्थः ॥ आचारादर्शे ॥ संध्येतिप्राणायामादिकर्मनामतः ॥ तदुपा
सनंसेवनमनुष्ठानमितियावत् ॥ आचारान्सेवनइत्यादौदर्शनात् ॥ अतएवसंध्याकृतासन्ध्योपासितेतितुल्यवत्प्रयोगाः ॥ अथ ब्रह्मणोपा
सितासंध्याविष्णुनाशंकरेणच ॥ कस्तांनोपासयेद्देवींसिद्धिकामोद्विजोत्तमइतियोगियाज्ञवल्क्येनदेवीत्वेनप्रतिपादनात्संध्यारूपापादेवता
याःप्राणुक्तप्राणायामादिनोपासनामनुष्ठानेसंध्योपासनमित्यर्थः ॥ ॥ अथसंध्याकालपरिमाणम् ॥ तत्रयोगियाज्ञवल्क्यः ॥ ह्रासवृद्धीहि
सततंदिवसानांयथाक्रमम् ॥ संध्यामुहूर्तमात्रातुह्रासेवृद्धौचसास्मृतेति ॥ सर्वर्तुषुप्रातःसंध्यासायंसंध्याचद्वयमेवमवतीति ॥ तथा ॥ संध्यौसं॰

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्ना ॥
॥११८॥

ध्यामुपासीत नात्मगोनो कृतेरवौ ॥ संध्याविति पूर्वविधानात् ॥ नास्तगाइति संधिरूपमुहूर्त्तोहूर्ध्वनिषेधानुवादकम् ॥ सतिसम्भवे सादित्या
मारभेतैवेपरं वा ॥ उपक्रमकालमाह संवर्त्तः ॥ प्रातः संध्यां सनक्षत्रामुपासीत यथाविधि ॥ सादित्यां पश्चिमां संध्यामर्द्धास्तमितभास्क-
राम् ॥ आदित्यपदमस्तमयात्प्राक् पूर्णबिंबपरम् ॥ समाप्तिकालमाह याज्ञवल्क्यः ॥ आसीनः सावित्रीं प्रत्यगातारकोदयात् ॥ संध्यां प्राक् प्रात-
रेवं हि तिष्ठेदादित्यदर्शनात् ॥ प्रत्यक् पश्चिमाभिमुखी यथा प्राक् पूर्वाभिमुख ॥ आसीनेति स्थायं जप आसीनत्वार्थम् ॥ तिष्ठेति प्रातर्जप ऊर्ध्व-
त्वार्थम् ॥ मध्याह्नसंध्याजपे पूर्ध्वतैव ॥ तिष्ठेदुदयात्पूर्वं मध्यमामपि शक्तितः ॥ इति छन्दोगपरिशिष्टात् ॥ मनुः ॥ ऋषयो दीर्घसंध्यत्वाद्दीर्घमा-
युरवाप्नुयुः ॥ प्रज्ञां यशश्च कीर्त्तिं च ब्रह्मवर्चसमेव च ॥ दीर्घसंध्यत्वं प्रातरुदयावधि जपेन सायं च नक्षत्रावधि जपेन ॥ एतच्च गुणफलमिति
वाक्यान्तरेपि स्पष्टं नक्षत्रयोरेवावधित्वफलाकथनम् ॥ एकमूलत्वानुरोधात् ॥ अथवा सूर्यनक्षत्रयोः प्राक्कालेपि नियतत्वाङ्गतया बोध्यते ॥ न
तु तत्कालस्य सावित्रीजपेनाभिव्याप्तिरित्यत्रापि तात्पर्यम् ॥ उभयपक्षेपि कामनाविरहे विहितदशादिसंख्याकर ॥ कामिनस्तु दीर्घसंध्यत्वं च
वर्णजपेन कालव्याप्त्यैव तात्पर्यम् ॥ अत्र च जपदीर्घत्वेन दीर्घसंध्यत्वाभिधानात् ॥ जपेन संध्याकर्मसमाप्तिरिति मन्तव्यम् ॥ उभे संध्ये जपत्रयमु-
पासी यथाविधिरित्यादिनानावाक्येषु सावित्रीजपस्य संध्यान्तर्गमः स्फुटः ॥ एवमेव जपे प्रत्यवायश्रवणात्तदभिप्रायं फलश्रुतेस्तु सावित्रीजपः	॥रत्नः॥ ॥११८॥
पृथगपीति ॥ ॥ इति संध्याकालनिर्णयः ॥ ॥ संध्योपासनेतिविधिर्मोक्षः ॥ अतऊर्ध्वं प्रवक्ष्यामि संध्योपासनकं विधिम् ॥ अनर्हः कर्मणां
विप्रः संध्याहीनो यतः स्मृतः ॥ इत्यादिना संध्योत्तरकर्मणि कृतसंध्यस्याधिकार इत्युक्तम् ॥ अथवा त्वरितसंध्या साग्निः पतितस्यैव द्विजातिकः

मोनधिकारः॥ नोपतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम्॥ स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः॥ इति स्मरणान्न विष्णुपुराणे॥ सर्वकाल-
मुपस्थाने संध्ययोः पार्थिवेष्यते॥ अन्यत्र सूतकाशौचविभ्रमातुरभीतितः॥ विभ्रमश्चित्तविक्षेपः यद्यप्यत्र संध्यानोक्ता॥ तथापि॥ एतत्संध्यात्रयं प्रो-
क्तं ब्राह्मण्यं यदधिष्ठितम्॥ यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते इति छंदोगपरिशिष्टान्॥ संध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा सदेति योगिया-
ज्ञवल्क्यवचनात्त्रयाणामपि बोद्धव्या॥ एतेन संध्यात्रये नित्याधिकारः प्रदर्शितः॥ अत्र पापक्षयकामाधिकारोपि॥ यदाह याज्ञवल्क्यः॥ दिवा वा यद्
दिवा रात्रौ यदज्ञानात्कृतं तु भवेत्॥ त्रिकालसंध्याकरणात्सर्वं तत्र प्रणश्यतीति॥ मनुः॥ पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति॥ पश्चिमां तु
समासीनो मलं हन्ति दिवाकृतमिति॥ इति संध्याकालनिर्णयः॥ ॥अथ संध्योपासनदेशः॥ तत्र याज्ञवल्क्यः॥ गृहे त्वेकगुणं जप्यं नद्यां तु
द्विगुणं स्मृतं॥ गवां गोष्ठे शतगुणमग्न्यगारे शताधिकम्॥ सिद्धक्षेत्रेषु तीर्थेषु देवतायाश्च सन्निधौ॥ सहस्रं शतकोटीनामनन्तं शिवसन्निधौ
शंखलिखितौ॥ सर्वत्रैव बहिः संध्यामुपासीत॥ सर्वत्रैव ब्रह्मचारी॥ बहिर्ग्रामात्॥ मनुः॥ नैनं ग्रामेभिनिम्लोचेत्सूर्यो नाभ्युदियात्क्वचिदिति॥ एतं
ब्रह्मचारिणाम्॥ अभिनिम्लोचेदस्तं यायान्न गुणमाह शातातपः॥ अनृतं मद्यगंधं च दिवा मैथुनमेव च॥ पुनाति वृषलस्यान्नं बहिः संध्या उ-
पासिता॥ गृहेषु प्राकृती संध्या गोष्ठे दशगुणा स्मृता॥ नदीषु शतसाहस्री अनंता शिवसन्निधौ॥ प्राकृती एकगुणाभ्यासः॥ बहिः संध्या दशगु-
णा गोष्ठप्रस्रवणादिषु॥ सवाजतीर्थे शतगुणा सहस्रा जाह्नवीजले॥ स्कांदे॥ गृहे गोष्ठे नदीतीरे संध्या दशगुणोत्तरे॥ ॥इति संध्योपास-
नदेशनिर्णयः॥ ॥अथ कुशनिर्णयः॥ स्कांदे॥ कुशहीना यथा संध्या तिलहीनं तु तर्पणम्॥ हविर्हीनो यथा होमः शिवहीना तथा क्रिया

॥ रत्ना ॥ लघुहारीतः ॥ अपहोमे तथा दाने स्वाध्याये पितृतर्पणे ॥ अङ्गुन्यं नुकरं कुर्यात्सुवर्णरजतैः कुशैः ॥ विनोदर्भाः पथि दर्भा ये दर्भा यज्ञभूमिषु ॥
॥ ११८ ॥ स्तरणासनपिण्डेषु षट् कुशान् परिवर्जयेत् ॥ पिण्डार्थं ये स्तृता दर्भा यैः कृतं पितृतर्पणम् ॥ मूत्रोच्छिष्टे धृता ये च तेषां त्यागो विधीयते ॥
नीवीमध्ये च ये दर्भा ब्रह्मसूत्रे च ये धृताः ॥ पवित्रांस्तान् विजानीयाद्यथा कायस्तथा कुशाः ॥ गृह्यपरिशिष्टे ॥ अमेध्यलिप्ता ये दर्भास्तेषां त्यागो
विधीयते ॥ तथा ॥ दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः ॥ अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥ यातयामं चिरकृतमनेन कार्याक्ष
मम् ॥ गतसारमिति भाष्योक्तेः ॥ मरीचिः ॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः ॥ अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः ॥ [illegible]प्र
तिदिनाः शक्ताविति पारिजाते ॥ कुशोत्पाटनविधिः ॥ शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः ॥ ॐकारेणानुमन्त्रेण सकृदेव कुशान् स्पृ
शेत् ॥ दर्भोत्पाटनमन्त्रः ॥ विरिञ्चिना सहोत्पन्न परमेष्ठिनिसर्गज ॥ नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव ॥ कुशमूले स्थितो ब्रह्मा कुश
मध्ये जनार्दनः ॥ कुशाग्रे शंकरो देवः कुशानुत्पाटयाम्यहम् ॥ १ ॥ छन्दोगपरिशिष्टे सव्यपाणौ कुशान् कृत्वा कुर्यादाचमनक्रियाम् ॥ सव्य
सोपग्रहः कार्यो दक्षिणः सपवित्रकः ॥ सोपग्रह इति कुशान्तरेणेति पूर्वोक्तकुशत्रयसमीपे अग्निमकर्मोपयुक्ताः कुशा धर्तव्या इत्युक्तम् ॥ 118
नत्र कुशसंख्याकांक्षितत्वात् ॥ उपग्रहस्तत इत्युपग्रह इति पुस्मृति संभवा ॥ पवित्रम् ॥ अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ॥ प्रादेशमात्रं वि ॥ रामः ॥
ज्ञेयं पवित्रं यत्र कुत्रचित् ॥ अनेनैव लक्षितम् ॥ कृत्वाः प्रचरणीयास्तु कुशादीर्घास्तु बर्हिषः ॥ दर्भाः पवित्रमित्युक्तमतः संध्यादिकर्मणि ॥ ॥ ११८ ॥
॥ अमलार्थं ॥ यतः प्रचरणादौ कृत्वादिविधिस्ततः सन्ध्यादौ विशेषविध्यभावात् ॥ दर्भमेवाङ्गं तत्तु पवित्रलक्षणमेतत् ॥ पूर्वलक्षणावा

धात् अनड्यन्न्यायात्स्यभेदापत्ते॥ अत्रचाचमनाभ्यागेवपवित्रधारणम्॥ आचम्यप्रयतोनित्यंपवित्रेणद्विजोत्तमः॥ नोविषमुभवेत्सत्र
प्रकृशेषंतुवर्जयेत्॥ इतिलघुहारीतदर्शनादग्निमजयोपयुक्तकुशत्रयधारणमपिदक्षकरेपवित्रधारणावसरस्वकुर्वन्ति॥ अविरु
द्धंचैतत्॥ लघुहारीतदर्भहीनाजुयासंध्यायच्चदानंविनोदकम्॥ असंख्यातंतुयज्जप्तंतत्सर्वंनिष्फलंभवेत्॥ इतिदर्भनिर्णयः॥ ॥
अथजपविधिः॥ ॥तत्रशंखः॥ कृत्वाहव्यामासीनः कुशोत्तरायावाकुशपवित्रपाणिरुदङ्मुखः सूर्याभिमुखोवाअक्षमालामादाय
देवतांध्यायन्जपंकुर्यात्॥ सुवर्णमणिमुक्ताफलस्फटिकपद्माक्षेन्द्राक्षरुद्राक्षपुत्रजीवकानामन्यतमामक्षमालांकुर्यात्॥ कुशग्रंथि
कृतांवाहस्तोपयामैर्वागणयेत्॥ देवतांयन्त्रितिदेवताध्यानस्यजपांगतयाभिधानात्॥ यत्रतदेवताविशेषविधिस्तत्रापिमंत्रप्रकाशपा
देवताध्येयाहस्तोपयामोः कुलीनमतम्॥ याज्ञवल्क्यः॥ निष्ठश्रेष्ठीक्ष्यमाणोर्कंजपंकुर्यात्समाहितः॥ अन्यथाप्राङ्मुखः कुर्यात्त्वक्ष्यमाण
क्रमेणतु॥ प्राक्कूलेषुकुशेष्वेवआसीनश्चासनेशुभे॥ नातिमुच्छ्रितेनातिनीचेदर्भपाणिः सुसंयतः॥ स्फटिकेन्द्राक्षरुद्राक्षपुत्रंजीवसमुद्भ
वैः॥ अक्षमालाहिकर्तव्याउत्तमायुत्तरोत्तरा॥ प्राक्कूलेषुप्रागेषु॥ जप्यमाहमनुः॥ वेदमेवजपेन्नित्यंयथाकालमतन्द्रितः तंह्यस्याहुःपरं
धर्ममुपधर्मोन्यउच्यते॥ वेदमेवेत्यावश्यकाभिप्रायंफलाधिकार्थंवा॥ परमोधर्मइत्युपसंहारात्॥ अतोनयोराशिकादिमंत्रजपेविनि
षेधः॥ ॥याज्ञवल्क्यः॥ यज्ञानांतपसांचैवशुभानांचैवकर्मणाम्॥ वेदस्त्वद्विजातीनांनिःश्रेयसकरः परः॥ विष्णुः स्नातश्चपवित्राणि
यथाशक्तिजपेद्विशेषतः॥ सावित्रीपुरुषसूक्तंवानैताभ्यामधिकमस्ति॥ शंखः॥ नाघमर्षणात्परमन्तर्जलेनव्याहृतिभ्यः॥ परहोमे

नमोविद्यापरंतपः॥ मनुयमशंखवसिष्ठहारीतः॥ योगीयाज्ञवल्क्यः॥ जप्येनैवतुसंसिध्येद्ब्राह्मणोनात्रसंशयः॥ कुर्यादन्यन्नवाकुर्या
न्मैत्रोब्राह्मणउच्यते॥ अङ्गिराः॥ प्रणवाद्यास्तथावेदाःप्रणवेपर्यवस्थिताः॥ वाङ्मयंप्रणवःसर्वमभ्यसेत्प्रणवंततः॥ ॥
इतिश्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलीविराजमानमानोन्नतनेपालदेशनगरवरकान्तिपुररा॰
जधानीविराजमानमहाराजाधिराजश्री५गीर्वाणयुद्धविक्रमसाहदेवविरचितायांरत्नमालाभिधायांसंध्योपासनप्रकाशर
त्नम्॥ ॥गीर्वाणयुद्धादिमविक्रमेणराजाधिराजेनकृताशुभेयम्॥ रत्नावलीतत्रचयानमेतत्संध्याविधानाख्यमनर्घ्यर
त्नम्॥ ॥अथविभूतिधारणविधिः॥ तत्रभस्मग्रहणमन्त्रः॥ अग्निरित्यादिभस्मानुमन्त्रणमन्त्रस्यपिप्पलादऋषिर्गायत्री
रुद्रोदेवताभस्मानुमन्त्रणेविनियोगः॥ ॐ अग्निरितिभस्मवायुरितिभस्मजलमितिभस्मस्थलमितिभस्मव्योमेतिभस्मसर्वंह
वाइदंभस्ममनएतानिचक्षूंषिभस्मानीतितस्माद्व्रतमेतत्पाशुपतंयद्भस्मनाङ्गानिसंस्पृशेत॥ इतिमन्त्रेणादाय॥ त्र्यवकमित्यभि॰
न्त्र्य॥ ॐ तत्पुरुषायनमइतिभाले॥ १॥ ॐ अघोरायनमइतिदक्षांसे॥ २ ॥ॐ सद्योजातायनमइतिवामांसे॥ ३ ॥ॐ वामदेवायन
मइतिजठरे॥ ४ ॥ॐ ईशानायनमइतिवक्षसि॥ ५ ॥यद्वातत्पुरुषादिनामस्थलेतत्पुरुषायविद्महेअघोरेभ्यःसद्योजातंप्रप
द्यामिवामदेवायनमः॥ ईशानःसर्वविद्यानामितिपंचऋग्भिरेवपुंड्रकाणिविधेयानि॥ इतिनौकायाम्॥ तथाहपुलस्त्यः॥ अग्नि
रित्यादिभिर्मन्त्रैःशुद्धभस्माभिमन्त्रितम्॥ शिवमन्त्रेणवाधार्यंमन्त्रेणाष्टाक्षरेणवा॥ गायत्र्यावापिविप्रर्षेमन्त्रेणप्रणवेनवा॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नत्फलमाप्नुस्एव ॥ करोति शिवमंत्रेण परित्रिपुण्ड्रं द्विजोत्तमः ॥ अक्षः भूलधरः सौम्यः शिवलोके महीयते ॥ अष्टाक्षरेण मंत्रेण यः क
रोति त्रिपुण्ड्रकम् ॥ विष्णोः पदमवाप्नोति नान्यथा श्रुतिचोदितम् ॥ धारणाद्ध विशेषमाह शौनकः ॥ ललाटे हृदये कण्ठे बाह्वोः पृष्ठे तथा
गले ॥ त्रिपुण्ड्रं भस्मना कुर्याद् दिष्टमंत्रेण मानवः ॥ रुद्राक्षमालाम् ॥ मध्यमानामिकांगुष्ठैरनुलोमविलोमतः ॥ अनिस्त्वल्समनाष्टष्यम
तीर्दीर्घान्नमक्षयम् ॥ नेत्रयुग्मप्रमाणेन त्रिपुण्ड्रं धारयेद्द्विजः ॥ स्मृतिसंग्रहे ॥ धार्यं भस्म त्रिपुण्ड्रं तु गृहीणाजलसंयुतम् ॥ सर्वका
लं भवेत्स्त्रीणां पत्नीनां जलवर्जितम् ॥ वानप्रस्थस्य सन्न्यासीनां दीक्षाहीनेन नरेण तथा ॥ मध्याह्नात्प्राग्जलैर्युक्तं परतो जलवर्जितम् ॥
मध्यांगुलित्रयेणापि स्वदक्षिणकरस्य च ॥ त्रिपुण्ड्रं धारयेद्विद्वान् सर्वकल्मषनाशनम् ॥ न तद्दानं न तज्ज्ञानं न तद्दानं जपो नमः
त्रिपुण्ड्रेन विना येन विशेषेण यदनुष्ठितम् ॥ कात्यायनः ॥ श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने ॥ धृतत्रिपुण्ड्रः पूतात्मा मृत्युं जय
ति मानवः ॥ सितेन भस्मना कुर्यात् त्रिसंध्यं च त्रिपुण्ड्रकम् ॥ सर्वपापविनिर्मुक्तः शिवेन सह मोदते इति ॥ विशेषस्तु बृहज्जाबालो
पनिषदि द्रष्टव्यः ॥ ॥ इति विभूतिधारणविधिः ॥ ॥ अथ तिलकविधिः ॥ मदनपारिजाते ब्रह्माण्डपुराणे ॥ ललाटे केश
वं विद्यान्नारायणमथोदरे ॥ माधवं हृदयन्यस्य गोविंदं कण्ठकूपके ॥ १ ॥ विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनम् ॥ त्रिविक्रमं क
र्णदेशे वामकुक्षौ तु वामनम् ॥ २ ॥ श्रीधरं च हृषीकेशं वामयो बाहुकर्णयोः ॥ पद्मनाभं पृष्ठदेशे ककुद् दामोदरं न्यसेत् ॥ वासुदेवं स्म
रेन्मूर्ध्नि तिलकं कारयेत्क्रमात् ॥ ॥ इति तिलकविधिः ॥ अथ भोजनविधिः ॥ तत्र बौधायनः ॥ सुप्रक्षालितपादोप आचम्य भुवौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥ संवृतेनान्नमुपसंगृह्य कामक्रोधलोभमोहानपहाय सर्वाभिरंगुलिभिः शब्दमकुर्वन्प्राश्नीयात् ॥ ब्रह्मपुराणे ॥ आसनस्थस्तु योदर्यां पंक्ति
॥ १२० ॥ मध्येउपस्पृशेत् ॥ स सर्वेषां तु यत्पापं तदश्नाति नराधम ॥ तस्माद्धि रूपस्पृश्य आचान्तः प्रविशेगृहम् ॥ तथा ॥ पात्रेष्वर्थान्नरूपेषु उ
त्रभृत्यानुजैः सह ॥ भूम्यां पात्रं प्रतिष्ठाप्य मौनेनान्नं तु भक्षयेत् ॥ पवित्रपाणिः पूर्वं च लभेत्तत्राघमर्षणम् ॥ अघमर्षणजप्य पुराण
मितिसामानाधिकरण्यं लभेत् ॥ जपेदित्यर्केनान्वितेनाघमर्षणमुक्तमेव ॥ विष्णुपुराणे ॥ विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः ॥
विदङ्मुखः आग्नेयी नैरृती वायव्यैशान्यभिमुखः ॥ हारीतः ॥ नोदङ्मुखो नाधिशयनाशने अश्नीयात् ॥ अधि उपरि शयने शय्यायाम् ॥
आसनपीठादावन्नं कृत्वेति शेषः ॥ वामनपुराणे ॥ भुंजीत नैवेह च दक्षिणाभिमुखः ॥ न च प्रतीचीमभिभोजनीयं ॥ एते उदग्दक्षिणा
प्रत्यङ्मुखनिषेधानिः ॥ कामस्य· तथा च मनुः ॥ आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ॥ श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्
मुखः ॥ श्रियमृतेत्यभिमुखः यत्रापि कामयमानस्येति शेषः ॥ अनन्तमंयत्तद्वा दक्षिणाभिमुखभोजनं प्रमीतमातृविषयम् ॥ तथा चापस्त
वः दक्षिणामुखो न भुंजीत ॥ आयुष्यं त्वेवमुखभोजनं मातृरिमृपादिशेति ॥ यमः ॥ प्राङ्मुखोऽन्नानि भुंजीत पंचार्द्रो वाग्यतः शुचि ॥ आर्द्रया
दृष्टुं भुंजानः शतं वर्षाणि जीवति ॥ पंचार्द्रः पादद्वये करद्वये मुखे च प्रक्षालनादार्द्रो पाद्यं फलार्थम् ॥ शंखः ॥ चतुःकोणां द्विजात्र्यस्य त्रिकोणं ॥ रामः ॥
क्षत्रियस्य तु ॥ १ ॥ मण्डला तु निवेशस्य शूद्रस्याभ्युक्षणं स्मृतम् ॥ ब्रह्मपुराणे ॥ चतुरस्रं त्रिकोणं च मण्डलं चार्द्धचन्द्रकम् ॥ कर्त्तव्यमा ॥ १२० ॥
नुपूर्व्येण ब्राह्मणादिषु मण्डलम् ॥ ब्रह्मरुद्रेन्द्रचन्द्रार्कवसवो मण्डलानि तान् ॥ निवेदितं नरैरन्नं यस्माद्धरन्ति नान्यथा ॥ एवं च तु लादी

120

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्नं भोजनकाले वह्निरेव च। मरुद्वलार्थवादमात्रमिति चेन्न। तस्यापि सालंबनत्वात्। असत्यार्थेन स्तुतिरिति चेन्न। असंभवे हि तथा
स्यात्। न चैवं वाक्यभेदः स्तुतिवाक्यादाविव विकल्पनत्वात्। विष्णुपुराणे। प्रशस्तरत्नपाणिस्तु भुंजीत प्रयतो गृही। प्रशस्तरत्नं गारुडा
दि। मनुः। पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्। दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वदा। ब्रह्मपुराणे। वामेन पाणिना पात्रं
गृहीत्वा भुवि संस्थितम्। तेजोराशिं निजं पश्यंस्तत्प्राणमेदमृतं चरन्। विष्णुपुराणे। अपोशाने च गृह्णीयात्सर्वतीर्थमयं च तत्।
अमृतोपस्तरणमसि विस्नोरन्नयपस्य तत्। आसीनस्तेन तरे स्वाहाकारं कुर्वीत हस्तेन लंघयेन्नान्नमोदकेन कदाचन। तथा। प्राणोपस्तत्र पंच
स्युः स्वाहाः प्रणवसंयुताः। पंचान्नमीश्च जुहुयात्स्वल्पपाग्निनिमेषिति। प्राणव्यानापानसमानोदानाः। अत्रैव क्रमोक्ताः स्वाहाप्रणवसंयुताः। ॐ
प्राणाय स्वाहा। ॐ व्यानाय स्वाहा। ॐ अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। इत्येवरूपाः। प्रलयाग्निनिमेषिति ध्येयत्वार्थम
। विष्णुपुराणे। पंचग्रासान्महामौनं प्राणाद्याप्यायनाय तत्। महामौनमिति सर्वथाध्वनिनिवृत्तिरभिमता। विष्णुपुराणस्मृत्याद्युक्ता।
प्राणापानसमानानामुदानव्यानयोस्तथा इति क्रमोंतरेणोक्ता। एताश्चाहुतयो नंदंते न मेया। प्राणाय स्वाहेत्येकयाहुत्या सर्वा प्राणाग्नी
नामग्निसमस्तानि गिरेदिति नाभिधानात्। अंगुष्ठानामिकामात्रग्रासानेन ता आहुतय इति हारीतव्याख्यानात्। सर्वांगुलिभिरश्नीयादिति
सामान्यविधेस्तु पंचग्रासप्यितथैव। अंगुष्ठनाचग्रासानां गिलनं सामर्थ्याल्लभ्यते। विष्णुपुराणे। प्रजाव्योब्रल्लवार्रसान्मख्यात्त्रेवर्ण्ने
वसः। प्राणाग्निहोत्रविधिशोदनात्मात्मतृप्तिमान्। भोजनविधंते नरंवौशयनः। सस्यवमेवाहुत्सायंप्रातर्जुहुयाद्विर्वासायेजुहुयादिति।

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥ प्राणाहुत्यभिप्रायम् ॥ गृहस्थो ब्रह्मचारी वा योनश्नन्नपश्चरेत् ॥ प्राणाग्निहोत्रलोपेन अवकीर्णो भवेत्तु सः ॥ अन्यत्र प्रायश्चित्तात् ॥ प्रायश्चित्ते
॥ १२१ ॥ नदेवविधानम् ॥ प्राणाग्निहोत्रमंत्रास्तु निरुद्धे भोजने जपेत् ॥ त्रेताग्निहोत्रमंत्रान्वै द्रव्यालाभे यथा जपेत् ॥ गृहस्थो वाहिताग्निः ॥ अनश्नन्ब्रह्मचारी
च आहिताग्निश्च ते त्रयः ॥ अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतामित्यापस्तंबवचनात् ॥ प्राणाग्निहोत्रं प्राणाहुतिः ॥ त्रेता गार्हपत्याहवनीयदक्षि
णाग्निरूपमग्नित्रयम् ॥ द्रव्यालाभे ग्निहोत्रविहितद्रव्यालाभे ॥ मनुः सायंप्रातर्मनुष्याणामशनं देवनिर्मितम् ॥ नांतरा भोजनं कुर्यादग्निहोत्र
समो विधिः ॥ अंतराभोजननिषेधो मूलफलरस्येतर ॥ तथा चापस्तंबः ॥ दिवा च न भुंजीतान्यत्र मूलफलेभ्य इति ॥ चकारः पुनः रर्थे ॥ रुद्रोगपरिशि
ष्टे ॥ अपि निर्दिष्टस्नानमुक्तं विप्राणामग्निवासिनां नियमम् ॥ अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामांतः ॥ अहनीति सति संभवे पंचमभाग
परम् ॥ रक्षदर्शनात् ॥ तमस्विन्यां रात्रौ ॥ सार्द्धप्रहरयामांतः ॥ अर्द्धप्रहरसहितप्रथमप्रहरे ॥ एवं च मन्वादावपि सायंप्रातश्चेदनदतुसारा
द्यारेयम् ॥ अत्रहारीत ॥ न कार्ष्णायसेन मृन्मात्रे न भिन्नेनावकीर्णे ॥ कस्तायसे लोहपात्रे ॥ भिन्ने स्फुटिते ॥ अवकीर्णे भूभ्रमोजनादिनाउप
विद्धे ॥ मनुः ॥ न भिन्नभांडे भुंजीत न भावप्रतिदूषिते ॥ पैठीनसिः ॥ न भिन्नभांडे भुंजीत नाश्मरजतसुवर्णशंखशुक्तिफलास्फटिकानां भि- १२१
न्नानामपि न दोषः ॥ ॥ अत्र विशेषमाह ॥ आसंदीस्थितेपात्रे न भुंजीत ॥ आसंदी वेत्रादिनिर्मितमुच्चासनम् ॥ ॥ अत्र विष्णुः ॥ न भुवि ॥ रत्नाः ॥
पाणौ लवणम् ॥ वसिष्ठः ॥ भार्यया सह नाश्नीयादवीर्यवदपत्यं भवतीति वाजसनेयिके विज्ञायते ॥ ब्रह्मपुराणे ॥ ब्राह्मण्या भार्यया सार्द्धं ॥ १२१ ॥
क्वचिद्भुंजीत वाध्वनि ॥ असवर्णास्त्रिया सार्द्धं भुक्त्वा पततितत्क्षणात् ॥ ब्राह्मणीपदं सवर्णोपलक्षणार्थम् ॥ आपस्तंबः नना वि भुंजीत न ग्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सादेहन्नम्भमौनुभुंजीतः॥ प्रासादेदारुवस्त्रेनलहयाकुः॥ कृतनम्भमौनुमृदादिप्रक्षेपसंपादितनम्भमौनुनाविप्रासादेच॥ हारीतः॥ नक्रुद्धोनान्य
मनानाभिभाषमाणोश्रीयात्रशिभृत्रिभुस्तायवाप्रदायप्रेक्ष्यमाणोम्भः यमः॥ अश्नातिमन्यजनस्यमध्येमिष्टान्नसेकोरसगृध्नुवुद्धिःयी
नैः कटाक्षैः रभिवीक्ष्यमाणोव्यंकंविषंहालहलंसुभुंक्ते केवलः॥ एकवस्त्रोनभुंजीतकपाटमपिधायच॥ कपाटमपिधायस्यद्वारमाहृत्य· न
था॥ स्वग्रामेग्राममतोवापिसन्निकृष्टेमवेसति॥ नभुंजीतासनंधीमान्नधर्म्मज्ञोकारणात्॥ गौतमः॥ नभक्षान्नुत्संगेभक्षयेत्॥ नवारात्रौप्रे
क्षाहृतम्॥ दासायाहृतेउग्धादिः॥ शंखः॥ नातिप्रक्षोऽग्रासनेगच्छेत्॥ नातिप्रगेनातिसायंनसायंप्रातराशितः॥ अतिप्रगेसूर्योदयसन्नि
धौअतिसायमहानिशायाम्॥ नसायमित्यादिप्रातर्भोजनेनैवनक्तः सायंपुनर्भोजनेनकुर्यादित्यर्थः॥ बृहस्पतिः॥ नस्पृशेद्वामहस्तेनभुंजा
नोन्नंकदाचन॥ नपादेनशिरोवस्त्रेनपदाभाजनंस्पृशेत्॥ वस्त्रेनाप्यधौतेन॥ ॥ याज्ञवल्क्यः॥ नभार्यादर्शनेश्नीयान्नैकवासानचस्थितः॥
भार्यादर्शनेभार्ययादृश्यमानः भार्यापश्यन्तीतिकेचित्॥ ॥ ब्रह्मपुराणे॥ अप्येकपङ्क्त्यांनाश्नीयात्संयुतः स्वजनैरपि॥ कोहिजानातिकिंक
स्यप्रच्छन्नंपातकंमहत्॥ भस्मस्तंभजलद्वारमार्गैः पंक्तिश्चभेदयेत्॥ कौहिनाज्ञीत्याद्दिप्तापातकसंदेहेएकपङ्क्त्यांनभोक्तव्यमित्युक्तम्॥ निर्दोष
त्वेनुनिश्चितेभोक्तव्यमेव॥ भस्मस्तंभादिनापंक्तिभेदाभिधानेनपातकिनापिसहभोजनेएकपङ्क्त्यांदोषोनास्तीत्युक्तम्॥ ॥ महाभारते॥
पानीयंपायसंसर्पिर्मधुभुक्तंमधुन्यपिनिरस्यशेषमेतेषांनप्रदेयंतुकस्यचित्॥ निरस्यमत्का॥ नेनयदिदेवाद्भुषमनुतिष्ठनेतदानदेयमि
त्यर्थः॥ निरस्यमितिपाठेतुशेषंनधार्यमित्यर्थः॥ ॥ तथाब्रह्मपुराणे॥ तिलकल्कदधिक्षीरजलक्षौद्रघृतानिच॥ नत्यजेदर्द्धजग्धानिश

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥ ष्ठवाथकदाचन॥ अर्द्धजग्धानि अर्द्धभुक्तानि॥ विष्णुः॥ नगोब्राह्मणोपरोगेग्रीयात्॥ यदा कृतं मन्यन्ते विश्वदेवमपि पर्वणि च यदा पर्वकृतं म
॥१२२॥ न्यते॥ उपरोगे मैत्रपीडायां तथा॥ न नग्नो नोत्कटः न च भिन्नासनगतः उत्कटो ऽकृतासनगतः॥ तथा॥ न काशे॥ आकाशो बहिर्हिंदोलादिस्थितिर्हः
लाघुधर्मिवधः॥ तथा॥ बहूनां प्रेक्षमाणानां नैकस्मिन्बहवस्तथा॥ भूमालयेव हि गृहे देवागारे कथंचन॥ तथा च॥ शयानश्चोत्थपादस्तु॥ कु
त्वा चैवावसक्थिकाम्॥ तथा॥ पिबेन्नाञ्जलिना तोयम्॥ तथा न भावदुष्टमश्नीयात्॥ भावदुष्टं दुष्टं यत्र मनःप्रसादो न भवेत्॥ तथा॥ नैकोमिष्टं
नोद्धृतस्नेहं न दिवा धाना न रात्रौ तिलसंबद्धं न दधिसक्तून् न कोविदारवटपिप्पलशणशाकम्॥ दधिसक्तूनिम्बत्वापि रात्रौ चिसमन्वयः॥ यमः॥ ख
ण्डास्फुटितेन भुञ्जीत न च वोन्नानः कदाचन॥ ब्रह्मपुराणे॥ वस्त्रपाणितले भुञ्जे यच्च फूत्कारसंयुतम्॥ प्रसृताङ्गुलिभिर्यश्च तत्सर्वं गोमांसवद्भवेत्
नाजीर्णे भोजनं कुर्यात्स्वाद्वन्नानि बुभुक्षितः॥ हस्त्यश्वरथयानोष्ट्रप्रासादस्थो न भक्षयेत्॥ न शालान्तं न रगतो देवालयगतोपि वा॥ शयनस्थो
न भुञ्जीत न पाणिस्थं न चासने॥ न सन्ध्ययो न मध्याह्ने नार्द्धरात्रे कदाचन॥ नार्द्रवासा नार्द्रसिरा न चायज्ञोपवीतवान्॥ न प्रसारितपाणिस्तु पाद
रोपितपाणिमान्॥ नावसक्थिकसंस्थश्च न पर्यङ्कस्थितः॥ न वेष्टितशिराश्चापि नोत्सङ्गकृतभाजनः॥ नैकवस्त्रो दुष्टमध्ये सोपानत्कः सपा
दुकः॥ न चर्मोपरिसंस्थश्च चर्मवेष्टितपार्श्ववान्॥ अन्नस्य जन्मकात्रुकं दुःपङ्क्तिं च न कुत्सयेत्॥ ग्रासशेषं च नाश्नीयात्पीतशेषं पिबेन्न तु॥ शाक ॥यमः॥
मूलफलेक्ष्वादीन्दन्तच्छेदैर्न भक्षयेत्॥ संचये नान्नमन्त्रेण विक्षिप्तं पात्रसंस्थितम्॥ बहूनां भुञ्जतां मध्ये न चाश्नीयात्त्वरान्वितः॥ वृथा न विकिरे ॥१२२॥
दन्नं नोच्छिष्टः कुत्रचिद्व्रजेत्॥ न स्पृशेत्स्वाशिरो विप्रः सोच्छिष्टेनैव पाणिना॥ प्रसृताङ्गुलिभिर्विरलाङ्गुलिभिः॥ यानेऽडुपान्तहस्त्यादिषु वक्तिरिक्तं से

122

२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लादि अर्द्धरात्रे रात्रे रात्रावं नैव ॥ सार्द्धैकैकप्रहरं विहाय मध्यरात्रे सैव महानिशा ॥ भोजने वर्मवेष्टितपार्श्वेवान् ॥ संनाहादिवेष्टितमात्रः ॥ जन्म
निदिनदेशाद्युयन्ति ॥ कान्तुष्यमलिनत्वमः उपक्षिप्तऽपाकम् ॥ दन्तच्छेदं दन्तैश्छिन्नाच्छिन्ना ॥ मुखशविशेन्नु दन्तव्यापारेण ऽहमसंचयेमादिविस्त्
नमोदनादिअपूपादिना नराशीकुर्यात् ॥ ॥ मार्कण्डेयपुराणे ॥ उपघातादन्ने दोषत्वात्त्वन्नस्योदीरयेद्बुधः ॥ उपघातो शौचम् ॥ अंगिराः ॥ उ
पवीनं यदा त्वन्नभोजने समुपस्थितम् ॥ आपितरसमुच्छिष्टमनद्याच्चैव भक्षयेत् ॥ उपनीतमन्यस्मै इति शेषः ॥ शंखलिखितौ ॥ न शिष्ट
त्वादेत्त्रहस्तन्नजल्पन्न विलोकयन् ॥ इतस्ततइति शेषः ॥ देवलः ॥ न भुंजीतापयतो नित्यं एकहस्तो भोजनद्वयम् ॥ पवित्रमयहस्यं च सर्पिराज
रयायहम् ॥ विष्णुः नोच्छिष्टोघृतमाद्यान्न च कुनारकानिरीक्षयेत् ॥ न मूर्द्धनं स्पृशेत् नब्रह्मसंकीर्त्तयेत् ॥ न निःशेषमुक्तादन्यत्र मधुदधि
सर्पिः पयः ॥ शक्तुपलनितौदनेभ्यः बौधायनः सर्वभक्षापूपकंदमूलमांसानि दन्तैर्नावभियते ॥ भक्षत्वे नैवग्रासं मानवपूपादीनां दोषाधि
क्यबोधनार्थं ॥ लघुहारीतः पृथक्पानं पुनर्दानं मांसेन पयसा निशि ॥ दन्तच्छेदनमुष्णं च सप्तमं शक्तुभक्षणं वर्जयेत् ॥ आपस्तंबः ॥ सोत्तराच्छाद
नश्चैव यज्ञोपवीती भुंजीत कृत्स्नग्रासं ग्रसेत् सांगुष्ठं न मुखशब्दं कुर्यान्न पाणिं संवधुनुयात् ॥ एवं चात्र गृहीतकृत्स्नग्रासनविधानात्ग्रास
शेषं न चाश्नीयादिति पात्रस्य शेषपरम् ॥ न पिंड ॥ शेषं पात्र्यामुत्सृजेदिति च बौधायनोक्तं ग्रासेनुगृहीतस्य दैवाच्छेषस्थितौ ॥ ॥ विष्णुपु
राणे ॥ अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम् ॥ लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः ॥ प्राग्द्रवं पुरुषोश्नन्वे मध्ये च कठिनाशनः ॥ पुनरं
ते द्रवाशी च बलारोग्यं न मुंचति ॥ ब्र० कुर्यान्नक्षीरांतमाहारं न च पश्चात्पिबेद्दधि ॥ जठरं पूरयेदर्द्धं भक्षैर्भागं जलेन वा ॥ वायोः संचरणार्थाय

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥
॥१२३॥

चतुर्थमवशेषयेत् ॥ अश्विअश्विकं दधीनितु पाठो लोकविरुद्धः ॥ शातातप ॥ विद्यमाने न हस्तेन ब्राह्मणो ज्ञानदुर्बलः ॥ तोयं पिबेन्न वक्त्रेण
श्वासौ जायेत नान्यथा ॥ उद्धृत्य वामहस्तेन तोयं यः पिबति द्विजः ॥ सुरापानेन तत्तुल्यं मनुराह प्रजापतिः ॥ हस्तं प्रक्षाल्य गंडूषं यः पिबेदविच
क्षणः ॥ स दैवं चापि पित्र्यं चैव आत्मानं चैव घातयेत् ॥ भुंजानेषु विप्रेषु यस्तु पात्रं परित्यजेत् ॥ भोजने विघ्नकर्त्ता च ब्रह्महेति सगीयते ॥ पात्रमा
गो देशान्तरगमनं ॥ नन्वेतद्वलाद्भोजनकाले पात्रधारणापेक्ष ॥ अथवा नापज्जहीनापज्जहीन चेत्स्यायस्तेन पात्रधारणयोर्विकल्पविधाना
यदा पात्रधारणापूर्वकभोजनमारब्धं न दैवं बोध्यं ॥ वृद्धशातातपः ॥ दधिक्षीरघृतैर्भुक्त्वा प्रभूतैर्व्यंजनैस्तथा ॥ उष्णोदकेर्धामपूर्णैः करौ
स्मश्रुणि शोधयेत्ः ॥ भुक्त्वा चामेषथोक्तेन विधानेन समाहितः ॥ सर्वस्य जगतः प्रभुः श्रीरामानुविश्वभुक ॥ स्तुहितं सत्त्शोधयेन्मुखहस्तौ
चमृद्भिर्घर्षणकैरपि ॥ आचमनमुखशोधनयोरर्थादित्याठक्रमबाध ॥ बौधायनेनानि सुहिनो मनापिधानमसिद्धमुपरिष्ठादेयः ॥ पी
त्वा चान्तपुनराचम्य दक्षिणपादांगुष्ठे पाणिनिःस्रावयेत् ॥ अंगुष्ठमात्रः पुरुषोंगुष्ठं च समाहितः ॥ सर्वस्य जगतः प्रभुः श्रीरामानुविश्वभु
क् ॥ स्तुहितमत्ततः ॥ हस्तद्वयेनावनेजनं ब्रह्मपुराणान्मनांतरम् ॥ मांसतिलमधुसंपृक्तं प्राश्यपाणिमंभिसमृशेत् ॥ ॥ ब्रह्मपुराणे ॥
संमार्य चाह्नजान्त्वगोदानफलं लभेत् ॥ भुक्त्वा चैव समानिष्टेन तन्नचाप्याईरणपाणिना ॥ आचान्तेप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् ॥ उ
द्धृतेप्यशुचिस्तावद्यावन्नोन्मृज्यते मही ॥ दक्ष ॥ भुक्त्वा च सुखमास्याय तदन्नं परिणामयेत् ॥ षष्ठसप्तमकौ नयेत् ॥ अष्टमे लोकपात्रा च च
हिः संध्यापुनस्ततः ॥ याज्ञवल्क्यो ॥ उपास्य पश्चिमां संध्यां हुत्वाग्नीस्तानुपास्य च ॥ भृत्यैः परिवृतो भुक्त्वा नातितृप्तोथ संविशेत् ॥ दक्षः ॥

123
॥रामः॥
॥१२३॥

२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् ॥ यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते ॥ एवङ्कुर्वं प्रकृत्य ब्रह्मपुराणे ॥ यदह्ना कुरुते पापं तद्ध्या
नं निशि मुच्यते ॥ यावं मध्ये हमाराश्च शिप्रमाराश्चिता दिवि ॥ तावं ते वसुवर्षाणि जीवन्त्यधिकानि तु ॥ अभ्यधिका निशनात् ॥ ॥अ
थ शयनविधि ॥ ॥विष्णुपुराणे ॥ कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही ॥ गच्छेस्फुटिकांशय्यामपि दारुमयीं नृप ॥ नाविशालां
न वाभग्नां नासमां मलिनां न च ॥ न च जंतुमयीं शय्या-मधितिष्ठेदनास्तृताम् ॥ प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप ॥ सदैव स्वपतः
पुंसो विपरीतन्तु रोगदम् ॥ ॥नंदिपुराणे ॥ नमो नंदीश्वरायेति प्रोच्चाय: स्वपते नर ॥ तस्य कृष्णादयो राजिभ्यो न भविष्यति वै भयम् ॥
अत्र हारीतः ॥ नाश्मपीठोपधानो न तिर्यग्दक्षिणकशिराः ॥ न नग्नो नार्द्रवासा नैवोच्छिष्टो न प्रगे ॥ प्रगे प्रातः शयीत हस्तिशेषः ॥ अत्र
शंखलिखितौ ॥ न वीथीशीर्णयाना मवर्णोपशोविनायामनभुक्ष्यन्नभ्न् तपक्षग्रहणयतने नश्मशानवल्मीकमहावृक्षच्छायासु नपर्व
णिारम्भसोस्सवेदा ॥ पर्वाश्चैवत्रितिपसंचदक्षपोः संधि ॥ उशनाः ॥ न तैलाभ्यक्तशिराः स्वपेन्न पीठे न सि ॥ वीक्षितः कृत्स्नसारवर्मणि स्वप्यात् ॥
विष्णुः ॥ नार्द्रपादः सुप्यात् ॥ नोत्तराशिराः ॥ न नग्नो नानुवंशं नाकाशे शयने पंचदशकुर्वने नगजभग्नकृते नाग्निप्लुष्टे न घटसिक्तुमजे
न श्मशानशून्यालयदेवतायतनेषु ॥ न चपलमध्ये ॥ हे नारिमध्ये ॥ नेधान्यगोगुरुहुताशनसुराणामुपरि नोच्छिष्टो न दिवा स्वपेत् ॥ न संध्या
यां न भस्मनि न बाधुषौ ॥ नार्द्रेणापर्वतमस्तके ॥ अनुवंशं गृहमूर्द्धन्यकाशे दैर्घ्योपगमनं ॥ इति शयनविधि ॥ ॥अथ दारोपगमः ॥
आपस्तंबः सदा निशायां दारान्प्रत्यलंकुर्वीत ॥ ॥विष्णुपुराणे ॥ स्नानः स्रग्गंधधृक् हृष्टो नाध्मातः क्षुधितोऽपि वा ॥ सकामः सानुरागश्च

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥
॥१२५॥

व्यवायं पुरुषो व्रजेत् ॥ व्यवायो मैथुनम् ॥ बृहस्पतिः ऋतुकालाभिगमनं कुर्यात्सर्वपर्वाणि वर्जयेत् ॥ स्त्रियाः शुक्रेऽधिके स्त्री स्यात्पुमान्पुंसोऽधिके भ
वेत् ॥ तस्माच्छुक्रसंवृद्ध्यर्थं वृष्यस्निग्धं च भोजयेत् ॥ लघ्वाहारां स्त्रियां कुर्यादेवं संजनयेत्सुतम् ॥ ऋतुकालाभिगमनं पुंसां कार्यं प्रयत्नतः ॥ सदै
व वा पर्ववर्जं स्त्रीणामभिरक्षितं हि तत् ॥ स्त्रीणामाभिशापं हि नादैति स्त्रियाः सकामत्वेन रक्षणार्थमनृतावपीऽतिशेषः ॥ ऋतुस्नातां तु यो भा
र्यां संनिधौ नोपगच्छति ॥ स गच्छेन्नरके घोरे ब्रह्महेति न थोच्यते ॥ यमः ॥ ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति ॥ घोरायां ब्रह्महत्या
यां पच्यते नात्र संशयः ॥ भार्यामृतुमुखे यस्तु संनिधौ नोपगच्छति ॥ पितरस्तस्य तन्मासं तस्मिन्रजसि शेरते ॥ देवलः ॥ यः स्वदारानृतुस्ना
तां स्वस्थः सन्नोपसर्पति ॥ भ्रूणहत्यामवाप्नोति गर्भं प्राप्य विनाश्य सः ॥ व्यस्थो रोगार्दितो हितः ॥ बौधायनः ॥ त्रीणि वर्षाण्यृतुमतीं यो
भार्यां नोपगच्छति ॥ स तुल्यं ब्रह्महत्याया दोषमृच्छत्यसंशयः ॥ अनौ नो पैति यो भार्यामनृतौ यश्च गच्छति ॥ एतदकामविषयम् ॥ सदैवे
ति बृहस्पतिविधानात् ॥ मनुः मनुः नोपगच्छेत्प्रमत्तोऽपि स्त्रियमार्तवदर्शने ॥ समानशयने चैव न शयीत तया सह ॥ रजसाभिप्लुतां ना
रीं नरस्यां ह्युपगच्छतः ॥ प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रवर्द्धते ॥ तां विवर्जयतस्तस्य रजसा समभिप्लुताम् ॥ प्रज्ञा लक्ष्मीर्यशश्चक्षुरायुश्चै
व प्रवर्द्धते ॥ इति नास्त्यृतिसंवादात् ऋतुकालाभिगमने उभयनियमः ॥ अनौ गच्छेद्देव ऋतावेव गच्छेदिति च ॥ सदैवेति ॥ अनृतावपी
त्यर्थः ॥ पर्ववर्जमिति निषिद्धकालोपलक्षणम् ॥ स्त्रीणामभिमतं हितमिति हेतुनिर्देशः स्त्रियाः ॥ सकामत्वे रक्षार्थमनृतावपि
गमनं नो वेदना वेवेति व्यवस्थितविकल्पः ॥ ॥ याज्ञवल्क्यः ॥ सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ॥ तथा ॥ योऽस्त्राणां तु नि

124
॥रामः॥
॥१२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शाः स्त्रीणां॥ ॥नवमनुः॥ नासामाद्याश्चतस्रश्च निंदितैकादशी च या॥ त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः॥ युग्मासु पु
त्रा जायन्ते अयुग्मासु तु नः स्त्रियः॥ आपस्तंबः॥ स्त्रीवाससैव संनिपातः स्यात् यावत्संनिपातं चन यैव सह शय्या॥ ततो नानाना
उदकोपस्पर्शनमपि वा लेपान् प्रक्षाल्याचम्य॥ प्रोक्षणमंगानां स्त्रीवासः स्त्रीसंभोगार्थं वासः॥ सन्निपातोऽभिगमः॥ नानाभिन्नाशये
मर्थः॥ उदकोपस्पर्शनं स्नानं॥ अपराह्नमादेः॥ पक्षान्तरमनन्तरो॥ तथा च वृद्धशातातपः॥ ऋतौ तु गर्भशंकित्वात् स्नानं मैथुनिनमः॥
अनृतौ तु सदा कार्यं शौचं मूत्रपुरीषवदिति॥ गौतमः॥ न मिथुनीभूय शौचं प्रति विलम्बेत॥ शौचमत्र लेपप्रक्षालनाचमनमात्रम्
अनुगमनेन च स्नानपूर्वोक्तकर्माधिकारापादकम्॥ ननु चाण्डालादिस्पर्शवदनुगमनेनाप्यायस्नानमापद्यते॥ तत्र स्नानेनापनीयते॥
येन रात्रावपि स्नानस्यानम्॥ अतः स्नानं प्राप्तमरे वैनिवृत्तं॥ वृद्धशातातपः॥ तावेतावशुची स्यातां यावद्वै शयनं गतौ॥ शयनादुत्थि
तौ नारी शुचिः स्यादशुचिः पुमान्॥ शुचिस्नानप्रोक्षणेन विनापि॥ तत्र लेपप्रक्षालनाचमननिवृत्तिरिति स्मातुः॥ ॥विष्णुपुराणे
न स्नातां तु स्त्रियं गच्छेन्नातुरां न रजस्वलाम्॥ नानिष्टां न प्रकुपितां न प्रशस्तां न गर्भिणीम्॥ नादक्षिणां नान्यकामां नाकामां नान्य
योषितम्॥ क्षुत्क्षामामतिभुक्तां वा स्वयं चैभिर्गुणैर्युतः॥ नाम्मयोनौ न वयोनौ नैवानोपयुक्तौषधिस्तुवा॥ देवद्विजगुरूणां च व्यवायी
नाश्रमे भवेत्॥ चैत्यचत्वरतीर्थेषु नैव च चतुष्पथे॥ नैव श्मशानोपवने सलिलेषु महीपते॥ प्रोक्तपर्वस्वशेषेषु नैव भूपाल संध्य
योः॥ गच्छेद्व्यवायं मतिमान्न मूत्रोच्चारपीडितः॥ पर्वस्तुः चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा॥ पर्वाण्येतानि राजेन्द्र रविसं

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥
॥१२५॥

क्रांतिरेषव॥इतिज्योतिर्केषु॥वामनपुराणे॥उर्ध्वंचयोषांनसमाचरेत्॥तथा॥दुर्गासुयोषित्परिवर्जनीया॥तथा॥योषित्स्वप्यात्स्तन
रहन्तिकासु॥याज्ञवल्क्यः॥मघामूलंचवर्जयेत्॥वसिष्ठ॥नमलिनवाससासहसंवसेत्॥नरजस्वलया॥अत्रनायोग्ययासवासौत्रमे
थुनम्॥अयोग्याऽप्राप्तयौवनाविष्णुः॥नश्राद्धंदत्वा॥नभुक्त्वा॥नामंत्रितःश्राद्धे॥नव्रतीनदी॥क्षितौनदेवायतनश्मशानभूम्यालयेषु
नवृक्षमूलेनदिवानसंध्ययोःनमलिनाम्॥नाभ्यक्ताम्॥नरोगार्त्ताम् नरोगार्त्तः॥नहीनांगीम्॥नाधिकांगीम्॥तथैववयोधिकाम्॥
नोपेयाऊर्मिणीनारीदीर्घमायुर्जिजीविषुः॥वसिष्ठः॥अपिवा॥काठकेषुवचनेविज्ञायते॥अद्यश्वोवाविजनिष्यमाणापतिभिःस
हशयीरन्निति स्त्रीणामिंद्रदत्तोवर इति॥ ॥इतिसाधारणागमः॥ ॥अथश्रावणेपौर्णमास्यांभविष्योत्तरोक्तोरक्षाबंधनवि
धिः॥ ॥युधिष्ठिरउवाच॥सर्वरोगप्रशमनंसर्वाशुभविनाशनम्॥सकृत्कृतेनाब्दमेकंयेनरक्षाकृताभवेत्॥ ॥कृष्णउवाच
शृणुपाण्डवशार्दूलइतिहासंपुरातनं॥इन्द्राण्यायत्कृतंपूर्वंशक्रस्यजयवृद्धये॥देवासुरमभूद्युद्धंपुराद्वादशवार्षिकम्॥ततोसंव
दतोरेवंशचीघाहस्तुरेश्वरम्॥अद्यश्वनदिनेदेवप्रातःसर्वंभविष्यति॥अहंरक्षाविधास्यामियेनाजेयोभविष्यसि॥इत्युक्त्वापौ
र्णमास्यांसायौलोमीकृतमंगला॥बबंधदक्षिणेपाणौरक्षायोदलिकामतः॥बद्धरक्षस्ततःशक्रःकृतस्वस्त्ययनोद्विजैः॥उज्जघान
नवानीकंक्षणाद्बलइवप्रजाः॥शक्रश्चविजयीभूत्वापुनरेवजगत्त्रयी॥एषप्रभावोरक्षायाःकथितस्तेयुधिष्ठिरः॥जयदःसुखदश्चै
वपुत्रारोग्यधनप्रदः॥ ॥युधिष्ठिरउवाच॥क्रियतेकेनविधिनारक्षाबंधःसुरोत्तम॥कस्मिंस्तिथौकदादेवएतन्मेवक्तुमर्हसि॥यथा

125
॥राम॥
॥१२५॥

२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाहिभगवन्विचित्राणिप्रभाषसे॥तथातथानमेतृप्तिःबह्वर्थाःश्रृण्वतःकथां॥ ॥कृष्णउवाच॥संप्राप्तेश्रावणस्यान्तेपौ
र्णमास्यांदिनोदये॥स्नानंकुर्वीतमतिमान्श्रुतिस्मृतिविधानतः॥ततोदेवान्पितॄंश्चैवतर्पयेत्परमांभसा॥उपाकर्मादिकंप्रो
क्तंऋषीणांचैवतर्पणं॥कुर्वीतब्राह्मणैःसार्द्धंवेदानुद्दिश्यशक्तितः॥शूद्राणांमंत्ररहितंस्नानंदानंचशस्यते॥ततोपराह्ण
समयेकुर्यात्पोट्टलिकांशुभाम्॥कार्पासेनत्वाक्षतैस्तद्द्विसिद्धार्थैर्हेमचर्चिताम्॥वस्त्रैर्विचित्रैःकौशेयैर्विचित्रैर्मलवर्जितैः॥विचित्र
तंतुग्रथितांस्थापयेद्भाजनोपरि॥कार्यागृहस्यकक्षायांगोमयरचितैःशुभैः॥कृतकुण्डलिकैर्दूर्वावर्णैःसहितैर्भित्तौडरितोपश्याम
नाम॥उपलिप्तेगृहेमध्येदत्तचतुष्कंन्यसेत्कुंभः॥पीठेनरोपविशेद्राजामात्यैर्युतश्चसुमुहूर्त्ते॥वेश्याजनेनसहितोमंगलसहितैः
समुद्धूतैश्चिहूं॥रक्षाबंधःकार्यःप्रशांतिदःसर्वविघ्नानाम्॥ततःपुरोधानृपतेरक्षांबध्नीतमंत्रेण॥ ॥येनबद्धोबलीराजादा
नवेन्द्रोमहाबलः॥तेनत्वामभिबध्नामिरक्षेमाचलमाचल॥ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चान्यैश्चमामकैः॥कर्त्तव्योरक्षिकाबंधो
द्विजान्संपूज्यभक्तितः॥अनेनविधिनायस्तुरक्षिकाबंधमाचरेत्॥ससर्वदोषरहितःसुखीसंवत्सरंभवेत्॥ ॥यःश्रावणेवि
मलमासिविधानविज्ञोरक्षाविधानमिदमाचरतेमनुष्यः॥आस्तेसुखेनपरमेणसवर्षमेकंपुत्रपौत्रसहितःससुहृज्जनःस्या
त्॥अथचरक्षाबंधोभद्रायांनकर्त्तव्यः॥भद्रायांद्वेनकर्त्तव्येश्रावणीफाल्गुनीतथा॥श्रावणीनृपतिंहंतिग्रामान्दहतिफाल्गुनी
तिवचनात्॥ ॥इतिरक्षाबंधनविधिः॥अथात्रैवप्रसंगादुपाकर्मकालनिर्णयः॥तत्रबह्वृचानामुपाकर्मकालमहाश्वलाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥रत्न॥ ॥१२६॥

नः॥ अथातोऽध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पञ्चम्यां हस्तेन वेति। यजुर्वेदविषये पारस्करः॥ अथातोऽध्यायोपाक
र्म श्रवणेन श्रावण्यां पौर्णमास्यां पञ्चमी हस्तेन वेति॥ बौधायनः॥ श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्याधीयीतेति॥ एव
मन्यान्यपि यजुर्वेदिकानां गृह्यसूत्राण्युदाहार्याणि॥ ॥छन्दोगविषये गार्ग्यः॥ सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः॥ छन्दोगमिलि
ताः कुर्युरुत्सर्गं सर्वच्छन्दसाम्॥ शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकमिति॥ मनुः॥ श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि॥ युक्त
श्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमानिति॥ अर्धेन न्यूनः पञ्चमो येषां तेऽर्धपञ्चमाः॥ शाकपार्थिवादित्वादुत्तरपदलोपः सार्धांश्चतुरो
मासानित्यर्थः॥ ॥पारस्करः॥ अथापानामुपाकर्म श्रावण्यां श्रवणेन च॥ हस्तेनौषधीभावे वा पञ्चम्यां श्रावण्यामिति॥ अधी
यन्त इत्यध्याया वेदास्तेषां संस्कारकमुपाकर्म। तच्च श्रावण्यां श्रावणस्य पौर्णमास्यां श्रवणनक्षत्रयुक्तदिनान्तरे वा हस्तेन युक्तायां पञ्च
म्यां वा कार्यमित्यर्थः॥ अपरेण हस्तेन युक्ते दिनान्तरे पञ्चम्यां वेति व्याचक्षते॥ ओषधीनां प्रादुर्भावे श्रावणेनेति सर्वत्र संबध्यते॥ औ
षधीनामंकुरोदय इति यावत्॥ ॥[illegible]॥ भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्णे एव तु॥ ब्राह्मणान्भोजयेत्तत्र पितॄनुद्दिश्य
देवताइति॥ अत्र चैवं व्यवस्था बह्वृचैरोषधिप्रादुर्भावे सति शुक्लप्रतिपदादिश्रावणमासस्य श्रवणनक्षत्रे दैविककर्मत्वात्॥ पूर्वाह्णे
उपाकर्म कर्तव्यम्॥ यजुर्वेदिभिस्तु॥ श्रावण्यां पूर्वाह्णे कर्तव्यं॥ छन्दोगैस्तु सिंहस्थे सूर्ये हस्ते नक्षत्रे अपराह्णे कर्तव्यम्॥ एतच्च ग्रह
संक्रान्तिदुष्टेषु न कर्तव्यं॥ किंतु श्रावणशुक्लपञ्चम्यां हस्तयुक्तायां केवलपञ्चम्यां वा हस्तयुक्ते श्रवणशुक्लतिथ्यन्तरे वा॥ आषाढ्यां वा

126
॥रामः॥
॥१२६॥

CC-0. In Public Domain. Digitization by eGangotri

यदा वा स्वस्वगृह्योक्तानुकल्पकाले कर्त्तव्यम् ॥ ॥अनन्यवस्तुन्यन्तरे ॥ उपाकर्म प्रकुर्वीत क्रमात्सामर्ग्यजुर्विदः ॥ ग्रहसंक्रान्त्युदुष्टेषु
हस्तश्रवणपर्वसु ॥ ॥तथा ॥ संक्रान्तौ ग्रहणे चैव सूतके मृतके तथा ॥ गणास्नाने न कुर्वीत नारदो स्यवेवा यथा ॥ अथ चेद्दोषसंयु
क्ते पर्वणि स्यादुपाक्रिया ॥ ॥उः स्वशाखा मयग्रस्ता राहुणा तस्मिन् द्विजा नयः ॥ तथा ॥ यदि स्यात् श्रावणं पर्वग्रहसंक्रान्तिदूषितम् ॥ स्या
दुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु ॥ ॥स्मृतिमहार्णवे ॥ संक्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते ॥ तस्मात्तु हस्तयुक्तायां पञ्चम्यां
वा तदिष्यते इति ॥ ॥तथा तत्रैव ॥ संक्रान्तिर्ग्रहणं चापि पौर्णमास्यां यदा भवेत् ॥ उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिरिरिति ॥ बह्वृच
गृह्यकारिकायां ॥ अध्यायानामुपाकर्म श्रावण्यां श्रवणेन तु ॥ तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते इति ॥ श्रावण्यामिति सामीप्ये स
प्तमी ॥ तेन श्रावणी सन्निहितश्रवणे इत्ययमर्थो लभ्यते ॥ ॥बौधायनः ॥ श्रावण्यां पौर्णमास्यां आषाढ्यां चोपाकृत्य छन्दांस्यधीयते
ति ॥ ॥यानि तु ॥ त्रयोदशादिनो वर्ज्यं दिनानां नवकं ध्रुवम् ॥ मांगल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययो ॥ तथा ॥ दारद्रशादिनं नीयान्तो वेधइंड
गृहे स्मृतः ॥ एकादश्यादिकं शौरेश्चतुर्थ्यन्तः प्रकीर्तितः ॥ खराउग्रहे तथोप्रोक्तमुभयत्र दिनत्रयम् ॥ इत्येवमादीनि पौर्णमासी व्यतिरिक्तकर्म
विषयाणि ॥ नित्ये नैमित्तिके जप्यहोमयज्ञक्रियासु च ॥ उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते इति वचनात् ॥ तेन पर्वणि ग्रहणसत्वेपि त
त्पूर्वोत्तरदिनेषु हस्तश्रवणयोगे तत्रोपाकर्म न त्याज्यम् ॥ पश्चादाव्यर्द्धरात्रान्तं न रयग्रहणसंक्रान्तियोगे तत्रोपाकर्म न त्याज्यं ॥ तथा च गा
र्ग्यः ॥ अर्द्धरात्रादधस्तात्तु संक्रान्तिर्ग्रहणं तथा ॥ उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् ॥ तथा ॥ यद्यर्द्धरात्रादर्वाक् ग्रहः संक्रम एव च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्ना ॥
॥ १२७ ॥

नोपाकर्म न राकुर्याच्छ्रवणांश्रवणेऽपि वेति ॥ यदा त्वन्त्ये गुरुशुक्रास्तगोणकाले वौषधिप्रादुर्भावाभावः ॥ उभयत्रापि ग्रहसंक्रान्तियोगाद्वानि
मित्रान्तरेणाकेन विहन्ति पतिर्वा भवति ॥ तदा भाद्रपदमासे श्रावणपौर्णमासी हस्तभुक्तपञ्चम्यादौ स्वस्वगृह्योक्तकाले उपाकर्म कर्त्तव्यम्
अत एव शौनकेनोपाकर्मणोऽवर्षत्तुसंबंधेन तु श्रावणमात्रसंबंध ॥ न त्वार्षिकमित्यावक्षत इति वर्षोद्भवं वार्षिकम् ॥ बह्वृचगृह्यकारि
कायाम् ॥ अवृत्तौ ओषधयस्तस्मिन्मासे तु न भवन्ति चेत् ॥ तदा भाद्रपदे मासि श्रवणेन तदिष्यत इति ॥ मनुः ॥ श्रावण्यां प्रौष्ठपद्यां वाप्यु
पाकृत्य यथाविधीति ॥ गोभिलः प्रौष्ठपदी हस्तेनोपाकरणमिति ॥ प्रौष्ठपदापायनिशेषः ॥ एतानि हस्तश्रवणपर्वाणि चेन्न द्वयेपि क
र्मकालव्याप्तावव्याप्तौ सौदयिकानि ग्राह्याणि ॥ अत एव परिशिष्टे ॥ धनिष्ठापतिपयुक्तं ना ऋक्षसमन्वितम् ॥ श्रावणं कर्म कुर्वीरन् ऋक्
यजुःसामपाठका इति ॥ ॥ कालः ॥ श्रवणेन तु यत्कर्म उत्तराषाढसंयुतम् ॥ संवत्सरकृतोध्यायस्तत्क्षणादेव नश्यति ॥ धनिष्ठासंयुतं
कुर्याच्छ्रावणं कर्म यद्भवेत् ॥ तत्कर्म सफलं विद्यादुपाकरणसंज्ञितम् ॥ ॥ निगमः ॥ ग्रहणं गुरुसंक्रान्तिः शिष्यघातिनी ॥ तथा हं
सुत्तराषाढउपाकर्मणि चैव ॥ धनिष्ठामिश्रितेनैकार्यमुपाकरणसंज्ञितं ॥ ॥ कालिकापुराणे ॥ चतुर्दश्यां समुत्पन्नावसुरौ मधुकैट
भौ ॥ वेदान्नीत्वा कुर्वन्तः पद्मयोने सौजन्यजहृतुः श्रुती ॥ हत्वा तौ वसुरौ देवः पातालतलवासिनौ ॥ आहृत्य ताः श्रुतीः सम्यक् ददौ लोकगुरुः स्वयम् ॥
अभूत्तच्छ्रवणर्क्षं तु तत्प्रायपर्वणि सपिके पुनः ॥ अतो भक्त्याच्युते तस्मिन्नोपाकरणमिष्यते ॥ आसुरं वर्जयेत्कालं वेदाहरण — कर्मणि ॥ ॥
भविष्योत्तरे ॥ संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये ॥ स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः ॥ ततो देवान्पितॄंश्चैव तर्पयेत्परमं

127
॥ रत्न: ॥
॥ १२७ ॥

सा॥ उपाकर्मादि चैवोक्तं ॥ ऋषीणां चैव तर्पणमिति ॥ केचित्तु ॥ पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः ॥ बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्ति
वर्जिते इति ॥ बह्वृचगृह्यपरिशिष्टकारिकायां पाठात्तैत्तिरीयकपरस्य श्रवणेनौदयिकपर्वग्राहकवाक्यानि तैत्तिरीयकमात्रविषयत्वेनोपसं
हृत्य तैत्तिरीयकास्त्वौदयिके पर्वण्युपाकर्म कुर्युः श्रावण्यां यजुर्वेदिन ॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ॥ पूर्वविद्धा तु कर्त्तव्येति प्रागुदा
हृतवचनात् पूर्वविद्धायां कुर्युरित्याहुः ॥ तदेतत्सुन्दरं विशेषविधिविषये हि सामान्यविधिरुपसंह्रियते ॥ आग्नेयं चतुर्धा करोतीति विशेष-
विधिविषये पुरोडाशं चतुर्धा करोतीति सामान्यविधिवत् ॥ न च पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः इत्येतद्वाक्यं विधायकं किं तर्ह्यनुवाद-
कं ॥ तथाहि ॥ बह्वृचगृह्यपरिशिष्टकारो बह्वृचसंबन्ध्येव कर्मादिकं विधातुं प्रवृत्तो न च तैत्तिरीयकादिसंबन्धी ॥ तथा च बह्वृचाः श्रावणे कुर्युरित्य-
नेन बह्वृचकर्तृके उपाकर्मणि श्रवणान्वितकालो विहितो कालिकापुराणादौ प्राशस्त्यपूर्वकं ॥ यजुर्वेद्यादिविशेषमनुपादाय सामान्येनावि-
हितं यदौदयिकं पर्व तत्स्वचः कर्मानुष्ठानयोग्यौदयिकपर्ववेलामेव प्राशस्त्यबुद्ध्या श्रवणपरित्यागेन माग्राहीत्येतदर्थं धनिष्ठाप्रतिपद्युक्तामि-
त्यादिवाक्यं प्राप्तमौदयिकपर्वणो यजुर्वेदिसंबन्धं पर्वण्यौदयिके कुर्युः ॥ श्रावण्यां तैत्तिरीका इति वाक्यं प्रतिपादयन्नित्येतदनुवादकं ॥ अ-
नुवादस्य च प्राप्त्यधीनत्वादौदयिककर्मप्राप्तेश्च यजुर्वेदिपात्रसाधारणम् ॥ तदनुवादवाक्यगतं तैत्तिरीयपदं यजुर्वेदिमात्रमुपलक्षयति
अनुवादकं अनुवादे च लक्षणा न दोषः ॥ तैत्तिरीयाः शाखा वा प्रणामनुवादो वा ॥ तस्मात्पूर्वोदाहृतकालिकापुराणादिवाक्यनिचयादिनद
यिपिकर्मकालव्याप्तावव्याप्तौ वा सर्वैरपि यजुर्वेदिभिरौदयिके कर्मण्युपाकर्म कर्त्तव्यम् ॥ श्रावणी दुर्गनवमीति वाक्यं तु पविद्धारोपणादि

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ १२८ ॥

विषयमिति सिद्धम् ॥ औदयिकं पंचघटात्मकं तत्ते परिमितं ग्राह्यं ॥ अत एव निगमे श्रावण्यां प्रोष्ठपद्यां वा प्रतिपत्सु तन्तेकौ ॥ विद्यास्वाछंदसां
नत्रोपाकर्मोत्सर्जनं भवेत् ॥ अत्रोत्सर्जनग्रहणेनोपाकर्मदिन उत्सर्जनस्याप्यनुष्ठानमित्य उकल्पपक्षः सूचितः ॥ ॥ इत्युपाकर्मकालनि
र्णयः ॥ ॥ अथोत्सर्जनकालनिर्णयः ॥ तत्र याज्ञवल्क्यः ॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा ॥ जलांछंदसां कुर्यादुत्सर्गं विधिं
वद्बहिरिति ॥ पौषस्य रोहिण्यां पौषस्यैवाष्टकायां कृष्णाष्टम्यां वा जलसन्निधौ ग्रामाद्बहिर्वेदानामुत्सर्जनं कुर्यादित्यर्थः ॥ मनुः ॥ पुष्ये छंद
सां कुर्याद्बहिरुत्सर्जनं द्विजः ॥ माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनीति ॥ पुष्ये पुष्यमासे ॥ बौधायनः ॥ श्रावण्यां पौर्णमास्यामाषाढ्यां वो
पाकृत्य पौष्यां माघ्यां वोत्सर्जनं ॥ ॥ पारस्करः ॥ पौषस्य रोहिण्यां मध्यमायां वाष्टकायामध्यायानुत्सृजेरन्निति ॥ मध्यमायामष्टकायां
शुक्लप्रतिपदादिपौषकृष्णाष्टम्यामित्यर्थः ॥ वृद्धचरणकारिकायाम् ॥ अथवा योत्सर्जनं माघ्यां पौर्णमास्यां विधीयत इति ॥ एतेषां पक्षा
णां गृह्यानुसारेण व्यवस्था ॥ छंदोगानां तूत्सर्जनकालमाह गार्ग्यः ॥ सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः ॥ छंदोगामिलिताः कुर्युरुत्स
र्गं छंदसामिति ॥ यदा तु सिंहस्थसूर्ये यो हस्तः ततः पूर्वं पुष्यः कर्कटस्थे भवेत् ॥ तदा कर्कटस्थे प्यर्के पुष्ये उत्सर्जनं कृत्वा सिंहस्थे उपाकर्म कु 128
र्यात् ॥ ॥ तदुक्तं छंदोगगृह्यपरिशिष्टे ॥ मासे प्रोष्ठपदे हस्तात्पुष्यः पूर्वो भवेद्यदा ॥ तदा तु श्रावणे कुर्यादुत्सर्गं छंदसां द्विज इति ॥ अत्र प्रो ॥ रत्नाः ॥
ष्ठपदश्रावणशब्दौ मीनादिसौरमासातिशापेण छंदोगानामुत्सर्जनोपाकर्मणोः ॥ सौरमास एव विधानात् ॥ अथवा सर्वैरपि स्वस्वोपाकर्म ॥ १२८ ॥
दिन एवोत्सर्जनोपाकर्मणी कर्तव्ये ॥ अत एव सादित्यस्ये पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवेति ॥ पुष्ये पौषमास इत्यर्थः ॥ एतेवोत्सर्गोपा

२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मणि प्रत्यब्दं वेदस्याप्यायनार्थं कर्त्तव्ये ॥ ॥ तथा च कात्यायनः ॥ प्रत्यब्दं यदुपाकर्म्म सोत्सर्गं विधिवद्द्विजैः ॥ क्रियते छन्दसां तेन पुनराप्याय
नं भवेत् ॥ अयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः ॥ क्रीडमानैरपि सदा तत्तेषां सिद्धिकारकमिति ॥ अनयोरंगत्वेन ऋषिपूजादिकं कर्त्त
व्यमित्याह ॥ कार्ष्णाजिनिः ॥ उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च ॥ ऋषीन् दर्भमयान् कृत्वा पूजयेत्तर्पयेत्ततः इति ॥ बौधायनोपि ॥ गौत
मादीन्, बौत्सप्रकृत्वा दर्भमयान्पुनः ॥ पूजयित्वा विधानेन तर्पयेद्दवमुद्धरन्निति ॥ ॥ इति श्रीगिरिराजचक्रचूडामणिनरनारा
यणेत्यादिविविधविरुदावलिविराजमानमानोन्नतनेपालदेशनगरवरकान्तिपुरविराजमानमहाराजाधिराजश्रीपगीर्वाणयुद्धवि
क्रमसाहदेवविरचितसङ्ग्रन्थमालाभिधायां सुपाकर्मोत्सर्जनसमयनिर्णयरत्नप्रकरणम् ॥ ॥ अथोपाकर्मपद्धतिः ॥ तत्रादौ नि
त्यस्नानम् ॥ ॐ अद्येत्यादि प्रयोगं कृत्वा ॥ अथातो निमन्त्राणां नयादौ मृत्कुशमयकुशानि तथा मनसस्नाहत्योदकान्तं गत्वा शुचौ देशे स्थाप्य
प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखो यज्ञोपवीत्याचम्य ॥ उरुं हीति तोयमामन्त्र्य ॥ उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वे
तवाउ ॥ अपदे पादाप्रतिधातवेकरुतामवक्ता हृदयाविधश्चित् ॥ नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥ आवर्त्तयेदघेनेशनमिति ॥ ये
ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः ॥ सुमित्रिया न इत्यपोञ्ज
लिनादाय ॥ सुमित्रिया न आप ओषधयः सन्तु ॥ दुर्मित्रिया इति द्वेष्यं प्रतिनिषिञ्चेत् ॥ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः ॥
कतिं वस्पूरुज्जं येव रणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकम् ॥ आलभेदंगानि मृदेदं विष्णुरिति ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे प

॥ रत्ना ॥
॥ १२९ ॥

दम् ॥ समस्तमसपापं सुरे ॥ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ॥ मृत्तिके हर मे पापं यन्मया पूर्वसंचितं ॥ उद्धृतासि वराहेण कृष्णेन शत
बाहुना ॥ मयाहृतेन पापेन सर्वपापैः प्रमुच्यते ॥ सर्वेषामपि तीर्थानां निमज्जेदापो ऽ अस्मान्निस्तारत्वा आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो
घृतप्वः पुनन्तु ॥ विश्वं हि रिप्रं प्रवहन्ति देवीः ॥ उदिदाभ्यः शुचिरा पूत एमि ॥ दीक्षातपसोस्तनूरसि तान्त्वा शिवा
शग्मा परिदधे भद्रं वर्णं पुष्यन् ॥ निमज्योन्मज्याचम्य ॥ गोमयेन विलिंपेत्स्नानस्नोकहनि ॥ यच्च रोगं च शोकं च तन्मे दहति गोमयं ॥ गो
मयेन तु यः स्नायात्स्नातः संवत्सरं भवेत् ॥ अयमग्रं चरन्तीनामोषधीनां रसं वने ॥ तासामृषभपत्नीनां पवित्रं कायशोधनं ॥ मानस्तोके तनये
मान आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ॥ मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ ननो मिषिं चेदिमं मे वरु
णेति च तत्त्वामिः ॥ इमं मे वरुण श्रुधी हवमद्या च मृडय ॥ त्वामवस्युरा चके ॥ १ ॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः
अहेडमानो वरुणेह बोध्युरुशंस मा न ऽ आयुः प्रमोषीः ॥ २ ॥ त्वन्नो ऽ अग्ने वरुणस्य विद्वान्देवस्य हेडो ऽ अवयासिसीष्ठाः ॥ यजिष्ठो वह्
नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥ ३ ॥ स त्वन्नो ऽ अग्नेऽवमो भवोती नेदिष्ठो ऽ अस्या उषसो व्युष्टौ ॥ अवयक्ष्व नो
वरुणं रराणो वीहि मृडीकं सुहवो न ऽ एधि ॥ माप ऽ उदुत्तमं मुंचत्ववमथ्यंमं चैनत् ॥ मापो मौषधीर्हिंसीर्धाम्नो धाम्नो राजंस्त
तो वरुण नो मुंच ॥ यदाहुरघ्न्या ऽ इति वरुणेति शपामहे ततो वरुण नो मुंच ॥ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय
॥ अथा वयमादित्य व्रते तवानागसो ऽ अदितये स्याम ॥ १४ ॥ संचन्तु मा शपथ्यादथो वरुणादुत ॥ अथो यमस्य पड्वीशात्सर्वस्माद्देव

129
॥ एम: ॥
॥ १२९ ॥

CC-0. In Public Domain. Digitization by eGangotri

किल्विषात् ॥ १५ ॥ अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः ॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतम्पुरुराव्णो देवरिषस्पाहि ॥ १६
निमज्जोन्मज्यावभृथेः पावयेदापोहिष्ठेतिमृग्भिः ॥ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ १७ ॥ योवःशिवतमो
रसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १८ ॥ तस्मा अरङ्गमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ १९ ॥ इदमापोहवि
ष्मतीर्देवीरायइतिस्नात्वा आपोदेवाउपस्पृशदिवशन्नोदेवीरपां रसमपोदेवी ॥ इदमापःप्रवहतावद्यञ्चमलञ्चयत् ॥ यच्चाभिदुद्रोहा
नृतंयच्चशेपेअभीरुणम् ॥ आपोमातस्मादेनसः पवमानश्चमुञ्चतु ॥ २० ॥ हविष्मतीरिमा आपोहविष्मांआविवासति ॥ ह
विष्मान्देवो अध्वरोहविष्मांअस्तुसूर्यः ॥ २१ ॥ देवीरापो अपान्नपाद्योवऊर्मिर्हविष्यइन्द्रियावान्मदिन्तमः ॥ तन्देवेभ्योदेव दत्तशु
क्रपेभ्योयेषांभागस्थस्वाहा ॥ २२ ॥ कार्षिरसिसमुद्रस्यत्वाक्षित्याउन्नयामि ॥ समापोअद्भिरग्मतसमोषधीभिरोषधीः ॥ २३ ॥ अपोदे
वामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः ॥ याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ २४ ॥ द्रुपदादिवमुमुचानः ॥
स्विन्नःस्नातोमलादिवः ॥ पूतम्पवित्रेणेवाज्यमापःशुन्धन्तुमैनसः ॥ २५ ॥ शन्नोदेवीरभिष्टयआपोभवन्तुपीतये ॥ शंयोरभिस्रवन्तुनः ॥ २६
अपांरसमुद्वयसंसूर्येसन्तंसमाहितम् ॥ अपांरसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्ये
षतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ २७ ॥ अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजाभ्यः ॥ तासामास्थानादुज्जिहतामोषधयःसुपिप्पलाः
॥ २८ ॥ पुनन्तुमेजिनवभिः ॥ पुनन्तुमापितरःसोम्यासःपुनन्तुमापितामहाःपुनन्तुप्रपितामहाः ॥ पवित्रेणशतायुषा ॥ पुनन्तुमापितामहाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥रत्ना॥
॥१२०॥

पुनन्तुप्रपितामहाः॥पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै॥२९॥अग्नःआयूंषिपवसआसुवोर्जमिषञ्चनः॥आरेबाधस्वदुच्छुनाम्॥३०
पुनन्तुमादेवजनाःपुनन्तुमनसाधियः॥पुनन्तुविश्वाभूतानिजातवेदःपुनीहिमा॥३१॥पवित्रेणपुनीहिमाशुक्रेणदेवदीद्यत्॥अग्नेक्र॰
त्वाक्रतूँरनु॥३२॥यत्तेपवित्रमर्चिष्यग्नेविततमन्तरा॥ब्रह्मतेनपुनातुमा॥३३॥पवमानःसोऽअद्यनःपवित्रेणविचर्षणिः॥यःपोतास
पुनातुमा॥३४॥उभाभ्यांदेवसवितःपवित्रेणसवेनच॥मांपुनीहिविश्वतः॥३५॥वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमाबह्व्यस्तन्वोवीतपृ
ष्ठाः॥तयामदन्तःसधमादेषुवयंस्यामपतयोरयीणाम्॥३६॥येसमानाःसमनसःपितरोयमराज्ये॥तेषांलोकःस्वधानमोयज्ञोदेवेषुक॰
कल्पताम्॥३७॥चित्तन्तिमेमनोङ्कारेणाव्याहृतिभिर्गायत्र्यासावित्र्यावत्तेच॥ॐभूःतत्सवितुर्वरेण्यम्॥चित्पतिर्मापुनात्वच्छिद्रेणपवित्रेण
सूर्यस्यरश्मिभिः॥तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम्॥ॐभुवःभर्गोदेवस्यधीमहि॥वाक्पतिर्मापुनात्वच्छिद्रेणपवि
त्रेणसूर्यस्यरश्मिभिः॥तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम्॥ॐस्वःधियोयोनःप्रचोदयात्॥देवोमासवितापुनात्व॰
च्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः॥तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम्॥ॐस्वःधियोयोनःप्रचोदयात्॥देवोमासवि॰
तापुनात्वच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः॥तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम्॥ॐभूर्भुवःस्वःतत्सवितुर्वरेण्यंभर्गो
देवस्यधीमहि॥धियोयोनःप्रचोदयात्॥चित्पतिर्मापुनातुवाक्पतिर्मापुनातुदेवोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः॥
तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम्॥ॐभूःपुनातु॥ॐभुवःपुनातु॥ॐस्वःपुनातु॥ॐमहःपुनातु॥ॐजनःपुनातु॥ॐ

130
॥राम॥
॥१२०॥

नपः पुनातु ॥ ॐ सत्यं पुनातु ॥ ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥ सर्वं पुनातु ॥ इमम्मे समुद्रौ विंस्तो
र्वास्मरणाम् ॥ उत्तीर्य धौते वाससी परिधाय मृदो रुक्करौ प्रक्षाल्य ॥ त्रिराचम्य सान्नं पुष्पाण्यञ्जलिमिश्राण्यूर्द्ध्वं प्रक्षिप्योर्ध्ववाहुः सूर्यमुदीक्षन्नुद्वय
मुत्तमं विचिन्त्य नचक्षुरि ॥ उद्वयन्तमसस्परि स्वः पश्यन्त उत्तरम् ॥ देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ उदुत्यं जातवेदसन्देवं वहन्ति केत
वः ॥ दृशे विश्वाय सूर्यं स्वाहा ॥ चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा
जगतस्तस्थुषश्च ॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम श
रदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥ गायत्र्यावं यथाशक्ति ॥ विभ्राडिमन्त्रवाकः विभ्राड् बृहत्पिवतु सोम्यं मधा
युर्दधद्यज्ञपतावविह्रुतम् ॥ वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ॥ उदु त्यं जातवेदसन्देवं वहन्ति केतवः
दृशे विश्वाय सूर्यम् ॥ येनापावक चक्षसा भुरण्यन्तं जनाँ अनु ॥ त्वं वरुण पश्यसि ॥ दैव्यावध्वर्यू आगतं रथेन सूर्यत्वचा ॥ म
ध्वा यज्ञं समञ्जाथे ॥ तम्प्रत्नथायं वेनश्चित्रन्देवानाम् ॥ तम्प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् ॥ प्रतीचीनं वृज
नन्दोहसे धुनिमाशुं जयन्तमनु यासु वर्द्धसे ॥ अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ॥ इममपां सङ्गमे सूर्यस्य शि
शुन्न विप्रा मतिभी रिहन्ति ॥ चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा द्यावापृथिवी अन्तरीक्षं सूर्य आत्मा
जगतस्तस्थुषश्च ॥ आ न इडाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ॥ अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मन

CC-0. In Public Domain. Digitization by eGangotri

नीषा ॥ यदद्य कच्च वृत्रहन्नुदगा ऽअभि सूर्य्य सर्वं तदिन्द्र ते वशे ॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य्य ॥ विश्वमाभासि रोचनम् ॥ तत्सूर्यस्य
देवत्वं तन्महित्वं मध्या कर्त्तोर्विततं सञ्जभार ॥ यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ तन्मित्रस्य वरुणस्याभिचक्षे
सूर्यो रूपं कृणुते द्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥ बण्महाँ २ असि सूर्य्य बडादित्य महाँ २ असि
महस्ते सतो महिमा पनस्यतेद्धा देव महाँ २ असि ॥ बट्सूर्य्य श्रवसा महाँ २ असि सत्रा देव महाँ २ असि ॥ मह्ना देवानामसुर्य्यः पुरोहितो वि
भु ज्योतिरदाभ्यम् ॥ श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ॥ वसूनि जाते जनमान ओजसा प्रति भागन्न दीधिमः ॥ अद्या देवा उदिता
सूर्यस्य निरंहसः पिपृता निरवद्यात् ॥ तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी ऽउत द्यौः ॥ आ कृष्णेन रजसा वर्त्तमा
नो निवेशयन्नमृतं मर्त्यञ्च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ॥ पुरुषसूक्तम् ॥ सहस्रशीर्षा पुरुषः सह
स्राक्षः सहस्रपात् ॥ स भूमिं सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्वस्येशानो य
दन्नेनातिरोहति ॥ २ ॥ एतावानस्य महिमातो ज्यायाँश्च पूरुषः ॥ पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥ त्रिपादूर्ध्व उदैत्पु
रुषः पादोऽस्येहाभवत्पुनः ॥ ततो विष्वङ् व्यक्रामत्साशनानशने ऽअभि ॥ ४ ॥ ततो विराडजायत विराजो ऽअधि पूरुषः सजातो ऽअत्य
रिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥ तस्मा
द्यज्ञात्सर्वहुत ऽऋचः सामानि जज्ञिरे ॥ छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वा अजायन्त ये के चोभया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दतः ॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ॥ तेन देवा अयजन्त साध्या ऋषय
श्च ये ॥ ९ ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥ मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥ १० ॥ ब्राह्मणोऽस्य मुखमा
सीद्बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ ११ ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ॥ श्रो
त्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत ॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा
लोकाँ२ अकल्पयन् ॥ १३ ॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ॥ वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥ सप्तास्या
सन्परिधयस्त्रिः सप्त समिधः कृताः ॥ देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि ध
र्माणि प्रथमान्यासन् ॥ ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः
समवर्त्तताग्रे ॥ तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः प
रस्तात् ॥ तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १८ ॥ प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥ यो देवेभ्य आतपति यो देवानां पुरोहितः ॥ पूर्वो यो देवेभ्यो जा
तो नमो रुचाय ब्राह्मये ॥ २० ॥ रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् ॥ यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ २१ ॥ श्री
श्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ २२

॥रत्ना॥
॥१३२॥

शिवशङ्कल्पः॥ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति॥ दूरङ्गमं ज्योतिषां ज्योतिरेकन्तन्मे मनः शिवशङ्कल्पमस्तु॥१॥
येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः॥ यदपूर्वं यक्षमन्तः प्रजानान्तन्मे मनः शिवशङ्कल्पमस्तु॥२॥ य
त्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु॥ यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवशङ्कल्पमस्तु॥४॥ य
स्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः॥ यस्मिंश्चित्तं सर्वमोतं प्रजानान्तन्मे मनः शिवशङ्कल्पम
स्तु॥५॥ सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव॥ हृत्प्रतिष्ठं यदजिरं जविष्ठन्तन्मे मनः शिवशङ्कल्पम
स्तु॥६॥ अथ मण्डलब्राह्मणोऽपि इति॥ यदेतन्मण्डलन्तपति तन्महदुक्थन्ता ऋचः॥ स ऋचां लोकोऽथ यदेतदर्चिर्दीप्यते तन्महाव्रतं
तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डले पुरुषः सोऽग्निस्तानि यजूंषि स यजुषां लोकः॥१॥ सैषा त्रय्येव विद्या
तपति तद्धैतदप्यविद्वांस आहुस्त्रयी वा एषा विद्या तपतीति वाग्घैव तत्पश्यन्ती वदति॥२॥ स एष एव मृत्युर्य एष ए
तस्मिन्मण्डले पुरुषोऽथैतदमृतं यदेतदर्चिर्दीप्यते तस्मान्मृत्युर्न म्रियतेऽमृते ह्यन्तस्तस्मादु न दृश्यतेऽमृते ह्यन्तः॥३॥ तदेष श्लोको भ
वत्यन्तरं मृत्योरमृतमित्यवरं ह्येतन्मृत्योरमृतं मृत्यावमृतमाहितमित्येतस्मिन्हि पुरुष एतन्मण्डलं प्रतिष्ठितन्तपति मृत्युर्वि
वस्वन्तं वस्त इत्यसौ वा आदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेव वस्ते सर्वतो ह्येनेन परिवृतो मृत्योरात्मा विवस्वतीत्यात्मा ह्यस्य तस्मि
न्मण्डल एतस्य पुरुषस्यात्मैतत्तदेष श्लोको भवति॥४॥ तयोर्वा एतयोरुभयोरेतस्य चार्चिष एतस्य च पुरुषस्यैतन्मण्डल ऽ

132
॥रामः॥
॥१३२॥

३१

CC-0. In Public Domain. Digitization by eGangotri

प्रतिष्ठानस्मान्महदुक्थम्परस्मैवशᳫँसेत्सतेदेतान्यतिष्ठाञ्छिनदाः इत्येनाᳫँ ह स प्रतिष्ठाञ्छिनत्ति यो महदुक्थम्परस्मै शᳫँसति सन्नित॰
स्मादुक्थशसम्भूयिष्ठम्परिचक्षते प्रतिष्ठाछिद्धो हि भवतीत्यधिदैवतम्॥५॥अथाधियज्ञं॥ यदेतन्मण्डलन्तपत्ययᳫँ स रुक्मोऽथ
यदेतदर्चिर्दीप्यत इदन्तत्पुष्करपर्णमापो ह्येताः आपः पुष्करपर्णमथ य एष एतस्मिन्मण्डले पुरुषोऽयमेव स योऽयᳫँ हिरण्म
यः पुरुषस्तदेतदेवैतत्त्रयᳫँ स रुक्मे ह्योपधत्ते यत्तस्यैवामुᳫँ स्थामूर्द्धमुत्क्रामति तदेतमप्येति य एष तपति तस्मादग्निचित्ता
ह्रियेन परिहन्तुममूत्र ह्येष तत्स्म भवतीत्येवाधियज्ञम्॥६॥अथाध्यात्मं यदेतन्मण्डलन्तपति यश्चैष रुक्मः इदन्तच्छुक्लमक्षन्नथ
यदेतदर्चिर्दीप्यते यच्चैतत्पुष्करपर्णमिदन्तत्कृष्णमक्षन्नथ य एष एतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोऽयमेव स यो
ऽयन्दक्षिणेऽक्षन्पुरुषः॥७॥स एष एव लोकम्पृणा नामैष सर्वो रभिसंपद्यते तस्यैतन्मिथुनं योऽयᳫँ सव्येऽक्षन्पुरुषोऽर्द्धमु हैतदात्म
नो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै तद्यदेतद्द्वे भवतो द्वयᳫँ हि मिथुनं प्रजननन्तस्माद्द्वे लोकम्पृणे उप
धीयेते तस्मादु द्वाभ्यान्द्वाभ्यां चितिम्प्रणयन्ति॥८॥स एष एवेन्द्रो योऽयन्दक्षिणेऽक्षन्पुरुषोऽथेयमिन्द्राणी ताभ्यान्देवाः एतान्विधृति
मकुर्वन्नासिकान्तस्माज्जायाया अन्तेनाश्नीयाद्वीर्यवान्हास्माज्जायते वीर्यवन्तमु ह सा जनयति यस्या अन्ते नाश्नाति॥९॥तदेतद्देव
व्रतᳫँ राजन्यबन्धवो मनुष्याणाम्मध्ये तयाऽस्मौपायन्ति तस्मादु तेषु वीर्यवाञ्जायतेऽपि नवा काकावयसाᳫँ साक्षिपद्यपेनञ्जयति॥१०॥
तौ हृदयस्याकाशम्प्रत्यवेत्य मिथुनीभवतस्तौ यदा मिथुनस्यान्तङ्गच्छतोऽथ हैतत्पुरुषः स्वपिति तद्यथा हैवेदम्मानुषस्य मिथुनस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥रत्ना॥
॥१३३॥

नञ्जत्वा समिद्ध इव भवत्येव ह वैतदसमिद्ध इव ॥ इद्ध इव भवति दैवं ह्येतन्मिथुनं परमो ह्येष आनन्दः ॥ ११ ॥ तस्मादेवं वित्स्वप्या
ल्लोक्यं ह ॥ एतेन ह्येवंविद्देवतेन मिथुनेन प्रियेण धाम्ना समर्धयति तस्मादु ह स्वपन्तं धुरेव न बोधयेन्नेदेतां देवतां मिथुनीभवन्तीं हिनसा
नीति तस्मादु हैतत्सुप्तस्य श्लेष्मणमिव मुखं भवत्येते ह्येवन्देवते रेतः सिञ्चतस्तस्मादु रेतसः इदं ह सर्वं सम्भवति यदिदं कि
ञ्च ॥ १२ ॥ स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तस्य हैतस्य हृदये पादावतिहितौ तौ हैतदा
छिद्योत्क्रामति स यदोत्क्रामत्यथ हैतत्पुरुषो म्रियते तस्मादु हैतं प्रेतमाहुराच्छिद्यस्येति ॥ १३ ॥ एष उ एव प्राण एष हीमाः सर्वाः प्रजाः
प्रणयति तस्यैते प्राणाः स्वाः स यदा स्वपित्यथैनमेते प्राणा अपियन्ति तस्मात्स्वाप्ययः स्वाप्ययो ह वै तं स्वप्न इत्याचक्षते परोक्ष
म्परोक्षकामा हि देवाः ॥ १४ ॥ स एतैः सुप्तो न कस्यचन वेद न मनसा संकल्पयति न वाचान्नस्य रसं विजानाति न प्राणेन गन्धं विजानाति
न चक्षुषा पश्यति न श्रोत्रेण शृणोत्येतं ह्येते तदापीता भवन्ति स एष एकः सन्प्रजासु बहुधा व्याविष्टस्तस्मादेकः सन्तो लोकम्पृ
णाः सर्वमग्निमनु विभवन्त्यथ यदेक एव तस्मादेका ॥ १५ ॥ तदाहुरेको मृत्युर्बहवा३ इत्येकश्च बहवश्चेति ह ब्रूयाद्यदहासावमुत्र तेनै ॥रामः॥
कोऽथ यदिह प्रजासु बहुधा व्याविष्टस्तेनो बहवः ॥ १६ ॥ तदाहुरन्तिके मृत्युर्दूरा३ इत्यन्तिके च दूरे चेति ह ब्रूयाद्यदहायमिहाध्यात्मं तेना ॥१३३॥
न्तिकेऽथ यदसावमुत्र तेनो दूरे ॥ १७ ॥ तदेष श्लोको भवत्यन्तरे भाम्यपश्चिनोरसनां संक्षरेमृतः इति यदेतन्मण्डलं तपति तदन्नम
थ य एष एतस्मिन्मण्डले पुरुषः सोऽत्ता स एतस्मिन्नन्ने पाश्चिनो भातीत्यधिदेवतम् ॥ १८ ॥ अथाध्यात्मम् इदमेव शरीरमन्नमथ

133

CC-0. In Public Domain. Digitization by eGangotri

योयंदक्षिणेक्षन्पुरुषः सोन्नासऽएतंतस्मिन्नन्ने पक्षिणोमानि ॥१९॥ तमेतमग्निरित्यध्वर्यवऽउपासते यजुरित्येषहीदꣳ सर्वंयुनक्ति सामेतिछ
न्दोगाएतस्मिन्हीदꣳ सर्वꣳ समानमुक्थमिति बह्वृचाएषहीदꣳ सर्वमुत्थापयति यातुरितियातुविदएतेनहीदꣳ सर्वंयतं विषमिति
सर्पाः सर्पइतिसर्पविदऊर्गितिदेवारयिरिति ॥ मनुष्यामायेत्यसुराः स्वधेतिपितरोदेवजनइतिदेवजनविदोरूपमितिगन्धर्वागन्ध
इत्यप्सरसस्तंयथायथोपासतेतदेवभवतितद्धैनान्भूत्वावतितस्मादेनमेवंवित्सर्वैरेवैतैरूपैरुपासीतसर्वꣳ हैनतद्भवतिसर्वꣳ हैनमे
तद्भूत्वावति ॥२०॥ सएषत्रीष्टकोग्निर्ऋगेकायजुरेकासामैकातद्यामत्रर्चोपदधातितत्कर्मस्येवतस्याआयतनमथयांयजुषापुरु
षएवतस्याआयतनमथयाꣳसाम्नापुष्करपर्णमेवतस्याआयतनमेवत्रीष्टकः ॥२१॥ तेवाएतेउभेएषचरुक्मएतच्चपुष्करपर्णमे
तम्पुरुषमपीतउभेह्यक्तामेयजरयीतएवमेवेष्टकः ॥२२॥ सएषएवमृत्युर्यएषएतस्मिन्मण्डलेपुरुषोयश्चायंदक्षिणेक्षन्पुरुषः
सएषएवविदआत्माभवतिसयदैवंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवतिसोमृतोभवतिमृत्युर्ह्यस्यात्माभवति ॥२३॥
इतिमण्डलब्राह्मणम् ॥ नेववाऽइदमग्रेसदासीन्नेवसदासीत ॥ स्वयम्भूरसिश्रेष्ठोरश्मिर्वर्चोदाऽअसिवर्चोमेदेहिसूर्यस्यावृतमन्वा
वर्ते ॥१॥ सउदीक्षतेस्वयम्भूरसिश्रेष्ठोरश्मिरित्येषवैश्रेष्ठोरश्मिर्यत्सूर्यस्तस्मादाहस्वयम्भूरसिश्रेष्ठोरश्मिरितिवर्चोदाऽअसिवर्चो
मेदेहीतित्येवाहवीमीतितस्माहयाज्ञवल्क्यस्तद्वैब्रह्मसरोतेह्यव्ययद्ब्रह्मवर्चसीस्यादितिमनोहस्माहैषोदितेयऽएषवावमसमादा
सतिगोदाम्मेदेहीत्येवंयंकामंकामयतेसोस्मैकामः समृध्यते ॥२॥ अथावर्ततेसूर्यस्यावृतमन्वावर्तइतितदेतांगतिमेतांस्तुति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्ना ॥
॥ १२४ ॥

शङ्खेनैतस्मैवाहृतमवावर्ज्जै ॥ ३ ॥ प्रदक्षिणीकृत्यनमस्कृत्योपविशेद्दर्भेषुदर्भपाणिःस्वाध्यायंचयथाशक्त्यादावारभ्येदम् ॥ इषेत्वोर्ज्जेत्वा
वायवस्थदेवोवःसविताप्रार्प्पयतुश्रेष्ठतमायकर्म्मणे ॥ आप्यायध्वमघ्न्याइन्द्रायभागम्प्रजावतीरनमीवा ॥ अयक्ष्मामावस्तेनईश
तमाघशꣳसोध्रुवा ॥ अस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥ ४ ॥ हिरण्मयेनपात्रेणसत्यस्यापिहितम्मुखम् ॥ योसावादित्ये
पुरुषःसोसावहम् ॥ ५ ॥ ॐ खम्ब्रह्म ॥ उपवीतीप्राङ्मुखःकुशपाणिर्द्देवतीर्थवर्जितासकुशोदकेन ॥ विश्वेदेवाइतिमंत्रद्वयेनपिहितावाहयेत
यंपेन ॥ विश्वेदेवासआगतशृणुतामइमꣳहवम् ॥ एदंबर्हिर्निषीदत ॥ उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यः ॥ एषतेयोनिर्विश्वेभ्य
स्त्वादेवेभ्यः ॥ विश्वेदेवाःशृणुतेमꣳहवम्मेयेअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वम् ॥ ॐ
ब्रह्मातृप्यताम् ॥ ॐ विष्णुस्तृप्यताम् ॥ ॐ रुद्रस्तृप्यताम् ॥ ॐ प्रजापतिस्तृप्यताम् ॥ ॐ देवास्तृप्यताम् ॥ ॐ छंदांसितृप्यन्ताम् ॥ ॐ वेदास्तृप्य
न्ताम् ॥ ॐ पुराणाचार्यास्तृप्यन्ताम् ॥ ॐ गंधर्वास्तृप्यन्ताम् ॥ ॐ इतराचार्यास्तृप्यन्ताम् ॥ ॐ संवत्सरःसावयवस्तृप्यताम् ॥ ॐ देव्यस्तृप्यन्ताम् ॥
ॐ अप्सरसस्तृप्यंताम् ॥ ॐ देवानुगास्तृप्यन्ताम् ॥ ॐ नागास्तृप्यन्ताम् ॥ ॐ सागरास्तृप्यंताम् ॥ ॐ पर्वतास्तृप्यन्ताम् ॥ ॐ सरितस्तृप्यन्ताम् ॥ ॐ
मनुष्यास्तृप्यन्ताम् ॥ ॐ यक्षास्तृप्यन्ताम् ॥ ॐ रक्षांसितृप्यन्ताम् ॥ ॐ पिशाचास्तृप्यन्ताम् ॥ ॐ सुपर्णास्तृप्यन्ताम् ॥ ॐ भूतानितृप्यन्ताम् ॥ ॐ पशवस्तृप्यन्ताम् ॥ ॐ वनस्पतयस्तृप्यन्ताम् ॥ ॐ ओषधयस्तृप्यन्ताम् ॥ ॐ भूतग्रामस्तृप्यताम् ॥ ॐ भूतग्रामश्चतुर्विधस्तृ
प्यताम् ॥ ततोनिवीतीकायतीर्थवर्जितासकुशोदकेनमनुष्यांस्तर्प्पयेत् ॥ ॐ सनकस्तृप्यंताम् ॥ ॐ सनन्दनस्तृप्यंताम् ॥ ॐ सनातनस्तृप्यंता
म् २ ॥ ॐ कपिलस्तृप्यंताम् २ ॥ ॐ आसुरिस्तृप्यन्ताम् २ ॥ ॐ वोढुस्तृप्यंताम् २ ॥ ॐ पञ्चशिखस्तृप्यन्ताम् २ ॥ ततोपसव्यंदक्षिणाभिमुखःपाति

134
॥ रामः ॥
॥ १२४ ॥

33

CC-0. In Public Domain. Digitization by eGangotri

नवामनानुमोदिकक्रशनिलांजलित्रयेणापितृतीर्थेनउशंतस्त्वा॥आयंतुनइतिमंत्रद्वयेदिव्यपितॄनावाह्यतर्पयेत्॥ॐ कव्यवाडनलस्तृप्यतामि
दंतिलोदकंतस्मैस्वधा॥ॐ सोमस्तृप्यताम्॥ॐ यमस्तृप्यताम्॥ॐ अर्यमास्तृप्यताम्॥ॐ अग्निष्वात्तास्तृप्यंतामिदंतिलोदकंतेभ्यस्वधा॥ॐ सो
मपास्तृप्यंतामिदंतिलोदकंतेभ्यःस्वधा॥ॐ वर्हिषदस्तृप्यताम्॥ॐ यमायनमः॥ॐ धर्मराजायनमः॥ॐ मृत्यवेनम॥ॐ अंतकायनमः॥
ॐ वैवस्वतायनमः॥ॐ कालायनमः॥ॐ सर्वभूतक्षयायनमः॥ॐ औदुम्बरायनमः॥ॐ दध्नायनमः॥ॐ नीलायनमः॥ॐ परमेष्ठिनेनमः
ॐ वृकोदरायनमः॥ॐ चित्रायनमः॥ॐ चित्रगुप्तायनमः॥इत्येकैकस्यतिलैर्मिश्रांस्त्रीस्त्रीन्दद्याज्जलांजलीन्॥३॥यावन्तीवहूतंयापेतनक्ष
णादेवनश्यति॥जीवन्पितृकोप्येतान्॥उशन्तस्त्वेतिआवाहनम्॥उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि॥उशन्नुशतआवहपितॄन्
हविषेअत्तवे॥आयन्तुनइतिमंत्रद्वयेनआवाहनम्॥१॥उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः॥असुंयईयुरवृकाः
ऋतज्ञास्तेनोवन्तुपितरोहवेषु॥१॥अङ्गिरसोनःपितरोनवग्वाअथर्वाणोभृगवःसोम्यासः॥तेषांवयꣳसुमतौयज्ञियानामपिभद्रेसौ
मनसेस्याम॥२॥आयन्तुनःपितरःसोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः॥अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान्॥३॥ऊर्जंवह
न्तीरमृतंघृतंपयःकीलालंपरिस्रुतम्॥स्वधास्थतर्पयतमेपितॄन्॥४॥पितृभ्यःस्वधायिभ्यःस्वधानमःपितामहेभ्यःस्वधायिभ्यःस्वधान
मः॥प्रपितामहेभ्यःस्वधायिभ्यःस्वधानमः॥अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरःपितरःशुन्धध्वम्॥५॥येचेहपितरोयेचनेहयां
श्चविद्मयांउचनप्रविद्म॥त्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञꣳसुकृतंजुषस्व॥६॥मधुवाताऋतायतेमधुक्षरन्तिसिन्धवः॥माध्वीर्नः

CC-0. In Public Domain. Digitization by eGangotri

सन्त्वोषधीः ॥ ७ ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः ॥ मधु द्यौरस्तु नः पिता ॥ ८ ॥ मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः ॥ माध्वीर्गावो भव
न्तु नः ॥ ९ ॥ अमुकगोत्र पितः ॥ अमुकशर्मन् सपत्नीक वसुरुद्रादित्यस्वरूप तृप्यध्वꣳ स्वधा एवं पितामहप्रपितामह्योः ॥ त्रिर्नमो व इत्यमुक्ता
मातामहानाञ्चैवम् ॥ गुरुशिष्यऋत्विक्ज्ञातिबान्धवान् ॥ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्व
धायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वास आधत्त
॥ १ ॥ आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ॥ यथेह पुरुषोऽसत् ॥ २ ॥ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ॥ स्वधास्थ तर्पयत मे
पितॄन् ॥ अमुकगोत्राः मातामहप्रमातामहवृद्धप्रमातामहास्तृप्यध्वꣳ स्वधा ॥ पितृव्यभ्रातृगुरुश्वसुरज्ञातिबान्धवा अतर्पिता रेलब्धुधिरस्मिव
न्ति पितृवंशे मृता ये च भ्लोका ॥ ३ ॥ वासो निष्पीड्य च अप्रवालभावे मृता वाला श्लोकः ॥ १ ॥ असव्यम् ॥ आचमनम् ॥ ब्राह्मणा वैष्णव रौद्र सावित्र
मैत्रवारुणैर्मल्लिङ्गैरर्घ्यं येन् ॥ ब्रह्मयज्ञानन्तरमप्युरस्ताद्विशीमन ॥ सुरुचो वेनः आवः ॥ स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च
विवः ॥ १ ॥ ब्रह्मणे नमः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पाꣳसुरे ॥ विष्णवे नमः ॥ नमस्ते रुद्र मन्यव उतो त इषवे नमः बा
हुभ्यामुत ते नमः ॥ २ ॥ रुद्राय नमः ॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥ सवित्रे नमः ॥ मित्रस्य चर्षणीधृतो वो देव
स्य सानसि ॥ द्युम्नं चित्रश्रवस्तमम् ॥ मित्राय नमः ॥ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य
ऋतसदनमासीद ॥ ६ ॥ वरुणाय नमः ॥ सूर्यार्घं दत्वा अꣳ हꣳसः इत्यादिमुपस्थाय ॥ अदृश्रमस्य केतवो वि रश्मयो जनाꣳ अनु भ्राज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तोऽग्नये यथा ॥ उपयामगृहीतोसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय ॥ सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोहम्मनु
ष्येषु भूयासम् ॥१॥ हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृ
हत् ॥२॥ प्रदक्षिणीकृत्य दिशश्च देवताश्च नमस्कृत्योपविशेत् ॥ प्राच्यै दिशे नमः ॥ इन्द्राय नमः ॥ आग्नेय्यै दिशे नमः ॥ अग्नये नमः ॥ दक्षिणायै दि
शे नमः ॥ यमाय नमः ॥ नैरृत्यै नमः ॥ रक्षसे नमः ॥ प्रतीच्यै दिशे नमः ॥ वरुणाय नमः ॥ वायव्यै दिशे नमः ॥ मृगाधिपतये नमः ॥ उदीच्यै दिशे नमः
कुवेराय नमः ॥ ईशान्यै दिशे नमः ॥ ईशानाय नमः ॥ ऊर्द्ध्वायै दिशे नमः ॥ ब्रह्मणे नमः ॥ अधो दिशायै नमः ॥ अनन्ताय नमः ॥ ब्रह्माग्निपृथिव्योष
धिवाग्वाचस्पतिविष्णुमहद्भ्योऽद्भ्योपाम्पतये वरुणाय नमः इति सर्वत्र ॥ ब्रह्मणे नमः ॥ अग्नये नमः ॥ पृथिव्यै नमः ॥ ओषधीभ्यो नमः ॥ वाग्भ्यो नमः ॥
वाचस्पतिभ्यो नमः ॥ विष्णवे नमः ॥ महद्भ्यो नमः ॥ अपाम्पतये नमः ॥ वरुणाय नमः ॥ संवर्चसेति मुखं विमृशेत् ॥ संवर्चसेति मुखं विमृशेत् ॥ संव
र्च्चसा पयसा सन्तनूभिरगन्महि मनसा सं शिवेन ॥ त्वष्टा सुदत्रो विदधातु रायोनु मार्ष्टु तन्वो यद्विलिष्टम् ॥१॥ देवा गातुविद इति विसर्जयेत्
त् ॥ देवा गातुविदो गातुं वित्वा गातुमित ॥ मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः ॥१॥ इति स्नानसन्ध्योक्तस्नानतर्पणसंपूर्णम् ॥ अथ न्यासः
सहस्रशीर्षेति सप्तऋषये ति वामकरे ॥ पुरुष एवेति समन्त्र ऋषय इति दक्षिणकरे ॥ एतावानस्येति सप्त ॥ वामपादे त्रिपादूर्द्ध्व इति सप्त द
क्षिणपादे ॥ ततो विराडिति सप्त वामजानुनि ॥ तस्माद्यज्ञात्सर्वहुतः संभृतमिति सप्त ॥ दक्षिणजानुनी तस्माद्यज्ञात्सर्वहुतः संभृतमिति ॥
दक्षिणजानुनी ॥ तस्माद्यज्ञात्सर्वहुत ऋच इति सप्त ॥ वामकट्यां तस्मादश्वा इति सप्त दक्षिणकट्यां ॥ तं यज्ञं सप्त नाभौ ॥ यत्पुरुषं सप्त हृदि

॥ रत्ना ॥
॥ १३६ ॥

ब्राह्मणोस्य सन्न कंठे ॥ चन्द्रमास्तन्न वामबाहौ ॥ नाभ्या आसीत् सन्न दक्षिणबाहौ ॥ यत्पुरुषेण सन्न मुखे ॥ सप्तास्यासन् सन्न वामनेत्रे ॥
यज्ञेन यज्ञम् सन्न दक्षिणनेत्रे ॥ अग्नः सम्मनः सन्न ललाटे वेदाहं सन्न शिरसि ॥ प्रजापतिश्च शिखायां ॥ यो देवेभ्य सन्न कवचे ॥ रुचं ब्राह्म
न् सन्न नेत्रत्रयाय वौषट् ॥ श्रीश्च ते सन्न अस्त्राय फट् ॥ इति देहन्यासः ॥ अथ पूजनं सहस्र आवाहनम् ॥ पुरुष एव सन्न आसनम् ॥ ए
तावानस्य सन्न पाद्यम् ॥ त्रिपादूर्ध्व सन्न अर्घ्यं ॥ ततो विराट् सन्न आचमनम् ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सन्न वस्त्रं ॥ तस्मादश्वा सन्न यज्ञोप
वीतम् ॥ तं यज्ञं सन्न गंधं सन्न ऋषयश्च इति अक्षता ॥ यत्पुरुषं सन्न पुष्पं ॥ ब्राह्मणोस्य सन्न धूपं ॥ चन्द्रमा सन्न दीपं ॥ नाभ्यां सन्न नैवेद्यं ॥ ततो वि
राट् सन्न आचमनीयं ॥ यत्पुरुषेण सन्न ताम्बूल दक्षिणा च ॥ सप्तास्यासन् सन्न प्रदक्षिणा ॥ यज्ञेन यज्ञम् सन्न नमस्कार ॥ ॥ अद्येत्या
दिप्रयोगं कृत्वा ॥ कश्यपादि सन्न र्षीणां अरुंधतिसहितानां सप्तवराणां स्थापनपूजनादिमंत्र ब्राह्मणायोरपानपापफलप्राप्त्यर्थं या॰
नपामनि तृप्तिकामः श्रावण्युत्सर्वकर्मांगभूतं सन्न र्षीणां तर्पणमहं करिष्ये ॥ अथायोत्सर्गकर्मांगभूत विस्वादिऋषिमंत्रयोरेकतंत्रे
णषोडशांगमासकर्माहं करिष्ये· इति संकल्प्य ॥ आवाहनासनपाद्यस्नानाचमनीयगंधपुष्पधूपदीपनैवेद्यफलमुखवासतांबूलयज्ञो
पवित्रादिभिर्यथाशक्ति पूजनं कुर्यात् ॥ अथाप्याचमनीयं कृत्वा पश्चात्तर्पणमाचरेत् ॥ ॐ देवास्तृप्यन्ताम् ॥ ॐ छन्दांसि तृप्यन्ताम् ॥ ॐ वेदा॰
स्तृप्यन्ताम् ॥ ॐ ऋषयस्तृप्यन्ताम् ॥ ॐ सनातनस्तृप्यन्तां ॥ ॐ पुराणाचार्यास्तृप्यन्ताम् ॥ ॐ गंधर्वास्तृप्यन्ताम् ॥ ॐ इतराचार्यास्तृप्यन्ताम् ॥
अर्द्धमासास्तृप्यन्ताम् ॥ ॐ मासास्तृप्यन्ताम् ॥ ॐ ऋतुस्तृप्यन्ताम् ॥ ॐ वत्सरस्तृप्यन्ताम् ॥ ॐ अवयवस्तृप्यन्ताम् ॥ अपसव्यम् ॥ स्वान्पितॄ॰

136
॥ रामः ॥
॥ १३६ ॥

२७५

स्तर्पयेदथ ॥ तथाचार्यादीनां तर्पणां सव्यम् ॥ अयम्पुरस्थपञ्चभिः ॥ अयम्पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वास
न्ती गायत्र्यै गायत्रं गायत्रादुपांशुरुपांशोस्त्रिवृत्त्रिवृतो रथंतरं वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः
१ ॥ अयन्दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारं स्वारादन्तर्यामो न्तर्यामात्पञ्च
दशः पञ्चदशाद्बृहद्भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥ २ ॥ अयम्पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यच
सं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्या ऋक्सममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निरृषिः प्रजापतिगृहीतया त्वया च
क्षुर्गृह्णामि प्रजाभ्यः ॥ ३ ॥ इदमुत्तरात्स्वस्तस्य श्रोत्रं सौवं शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभ ऐडमैडान्मन्थी मन्थिन एकविंश एकविंशाद्वै
राजं विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥ ४ ॥ इयमुपरि मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः पङ्क्तिर्हैम
न्ती पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात्त्रिणवत्रयस्त्रिंशौ त्रिणवत्रयस्त्रिंशाभ्यां शाक्वररैवते विश्वकर्म ऋषिः प्रजापतिगृ
हीतया त्वया वाचं गृह्णामि प्रजाभ्यो लोकन्ता इन्द्रम् ॥ ५ ॥ मन्त्रोक्ता ऋषयस्त्वप्यनु ॥ मन्त्रैर्द्वाभ्यान्त्र मूर्द्धेति ॥ मूर्द्धा वयः प्रजापतिश्छंदः
क्षत्रं वयो मयन्दं छन्दो विष्टम्भो वयोधिपतिश्छंदो विश्वकर्म वयः परमेष्ठी छन्दो वस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो
वयस्तन्द्रं छन्दो व्याघ्रो वयो नाधृष्टं छन्दः सिंहो वयश्छदिश्छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा वयः ककुप्छन्द ऋषभो वयः सतोबृह
ती छंदो नड्वान्वयः ॥ १ ॥ अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छंदः पञ्चाविर्वयो गा

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥
॥१३७॥

यत्रीछंदस्त्रिवत्सोवयउस्निकछन्दस्तुर्यवाड्वयोनुष्टुप्छन्दोलोकन्ता॰इन्द्रम्॥२॥मन्त्रोक्ताछन्दांसिऋषयस्तृप्यन्तु॥माछन्दस्त्रितसेवव
माछन्दः प्रमाछन्दः प्रतिमाछन्दो अस्त्रीवयश्छंदः पङ्क्तिछंदउस्निकछन्दो बृहतीछंदोनुष्टुप्छन्दो विराट्छंदो गायत्रीछन्दस्त्रिष्टुप्छन्दो जग-
तीछंदः॥१॥पृथिवीछन्दोन्तरिक्षञ्छंदो द्यौश्छन्दः समाश्छंदो नक्षत्राणिछन्दो वाक्छंदो मनश्छंदः कृषिश्छंदो हिरण्यञ्छंदो गौश्छन्दो
जाछन्दो श्वश्छंदः॥२॥अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता दित्या देवता मरुतो देवता विश्वेदेवता
बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता॥३॥मन्त्रोक्ताछंदांसि देवास्तृप्यन्ताम्॥एवंषोडशाभिर्मंत्रैः॥एवश्छन्दो वरिवश्छन्दः शम्भू
श्छंदः परिभूश्छन्द आच्छच्छंदो मनश्छंदः सिंधुश्छंदः समुद्रश्छंदः शरीरञ्छन्दः ककुप्छंदस्त्रिककुप्छंदः काव्यञ्छंदो अङ्कुपञ्छंदोक्ष
रपंक्तिश्छंदः पदपङ्क्तिछंदो विष्टारपङ्क्तिश्छंदः क्षुरोभ्रजश्छन्द आच्छच्छन्दः प्रच्छच्छन्दः॥१॥आच्छच्छन्दः प्रच्छच्छंदः संयच्छन्दो वियच्छं-
दो बृहच्छंदो रथन्तरञ्छंदो निकायश्छंदो विवधश्छंदो गिरश्छन्दो भ्रजश्छंदः संस्तुप्छंदो नुष्टुप्छन्द एवश्छन्दो वरिवश्छंदो वयश्छन्दो
वयस्कृश्छंदो विष्पर्धाश्छन्दो विशालश्छंदश्छदिश्छंदो दूरोहणञ्छन्दस्तन्द्रश्छन्दो अङ्काङ्कञ्छन्दः॥२॥रश्मिनासत्यायसत्यंजिन्व
प्रेतिनाधर्मणाधर्मञ्जिन्वान्वित्यादिवादिवञ्जिन्वसन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्वप्रतिधिनापृथिव्यापृथिवीञ्जिन्वविष्टम्भेनवृष्ट्या
वृष्टिञ्जिन्वप्रवयाह्नाहर्जिन्वानुयारात्र्यारात्रीञ्जिन्वोशिजावसुभ्योवसूञ्जिन्वप्रकेतेनादित्येभ्य आदित्याञ्जिन्वतन्तुनारायः॥३॥
तन्तुनारायस्पोषेणारायस्पोषञ्जिन्वसं॰॥सर्पेणाश्रुतायश्रुतञ्जिन्वैडेनौषधीभिरोषधीर्जिन्वोत्तमेनतनूभिस्तनूर्जिन्ववयोध-

137
॥रामः॥
॥१३७॥

३५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

साधीतेन्नधीनग्निनाभिजिनातेजसातेजोजिन्व ॥५॥ प्रतिपदसिप्रतिपदेत्वानुपदस्यनुपदेत्वासम्पदसिसम्पदेत्वातेजोसितेजसेत्वा
त्रिवृदसित्रिवृतेत्वाप्रवृदसिप्रवृतेत्वाविवृदसिविवृतेत्वासवृदसिसवृतेत्वाक्रमोस्याक्रमायत्वासंक्रमोसिसंक्रमायत्वोत्क्रमोस्युत्क्रा
मायत्वोत्क्रान्तिरस्युत्क्रान्त्यैत्वाधिपतिनोर्ज्जोर्ज्जञ्जिन्व ॥६॥ रज्ञ्यसिप्राचीदिग्वसवस्तेदेवाअधिपतयोग्निर्हेतीनाम्प्रतिधर्त्तात्रिवृत्त्वास्तो
मः पृथिव्याꣳश्रयत्वाज्यमुक्थमव्यथायैस्तभ्नातुरथन्तरꣳसामप्रतिष्ठित्या अन्तरिक्षऋषयस्त्वाप्रथमजादेवेषुदिवोमात्रयाव
रिम्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु ॥७॥ विराडसिदक्षिणादि
ग्रुद्रास्तेदेवा अधिपतयइन्द्रोहेतीनाम्प्रतिधर्त्तापञ्चदशस्त्वास्तोमः पृथिव्याꣳश्रयतुप्रउगमुक्थमव्यथायैस्तभ्नातुबृहत्सामप्रतिष्ठि
त्या अन्तरिक्षऋषयस्त्वाप्रथमजादेवेषुदिवोमात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्व
र्गेलोकेयजमानञ्चसादयन्तु ॥८॥ सम्राडसिप्रतीचीदिगादित्यास्तेदेवाअधिपतयोवरुणोहेतीनाम्प्रतिधर्त्तासप्तदशस्त्वास्तोमः पृ
थिव्याꣳश्रयतुमरुत्वतीयमुक्थमव्यथायैस्तभ्नातुवैरूपꣳसामप्रतिष्ठित्या अन्तरिक्षऋषयस्त्वाप्रथमजादेवेषुदिवोमात्रयावरि
म्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु ॥९॥ स्वराडस्युदीचीदिङ्म
रुतस्तेदेवाअधिपतयः सोमोहेतीनाम्प्रतिधर्त्तैकविꣳशस्त्वास्तोमः पृथिव्याꣳश्रयतुनिष्केवल्यमुक्थमव्यथायैस्तभ्नातुवैराजꣳसाम
प्रतिष्ठित्या अं ॥१०॥ अधिपत्न्यसिबृहतीदिग्विश्वेतेदेवा अधिपतयोबृहस्पतिर्हेतीनाम्प्रतिधर्त्तात्रिणवत्रयस्त्रिꣳशौत्वास्तोमौपृथि

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ १३८ ॥

यांॐ श्रयतान्वैश्वदेवाग्निमारुतेउक्थे अव्यथायै स्तभ्नीताॐ शाक्वररैवते सामनी प्रतिष्ठित्या अं ॥ ११ ॥ अयं पुरो हरिकेशः
सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ ॥ पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ दंक्ष्णवः पशवो हेतिः
पौरुषेयो वधः ॥ १२ ॥ अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ ॥ मेनका च सहजन्या चाप्सरसौ या
तुधाना हेती रक्षांॐसि प्रहेतिः ॥ १३ ॥ अयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ ॥ प्रम्लोचन्ती चानुम्लोच
न्ती चाप्सरसौ व्याघ्रा हेतिः सर्पाः प्रहेतिः ॥ १४ ॥ अयमुत्तरात्संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ विश्वाची च घृ
ताची चाप्सरसावापो हेतिर्वातः प्रहेतिस्तेभ्यो नमोऽस्तु ते नो वन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १५ ॥
अयमुपर्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ ॥ उर्वशी च पूर्वचित्तिश्चाप्सरसाववस्फूर्जन्हेतिर्विद्युत्प्रहेतिः
स्तेभ्यो नमः अस्तु ते नो वन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ ॥ १६ ॥ मंत्रोक्ता देवा छंदांॐसि देवा ऋ
षयः अप्सरसस्तृप्यन्तु ॥ सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ॥ सप्तापः स्वपतो लो
कमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥ १ ॥ मन्त्रोक्ता ऋषयस्तृप्यन्तु ॥ चतुर्भिस्तर्पयेद्वंशैः अथर्व॰ शसमानमासाग्नी
विष्णो मा रक्ष कायनिमा रक्ष कायनिम्मा रक्ष मा रक्ष ॥ कोन्मा कोन्मो माहि स्थेर्मा हि स्थिर्वामकक्षायणो वामकक्षायणो वा
त्स्या वात्स्य — शाण्डिल्या शाण्डिल्याः कृक्षेः कुश्रिर्यत्तर्वचसो राजस्तम्बायनाय दत्तवचा राजस्तम्बायन कुशान्काव षेयानुरः कावषे

138
॥ रामः ॥
॥ १३८ ॥

२७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ १ ॥ वंशोऽक्तान्तवयस्तत्पन्नु ॥ अथ वंशः ७ तदिदं वयं शौर्पणाय्या
च्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पाराशर्यः सांकृत्याच्च भारद्वाजाच्च भारद्वाज औदवाहेश्च शाण्डि॰
ल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाद्गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः
शौनकादात्रेयाच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चा
ग्निवेश्याच्च ॥ २ ॥ अग्निवेश्यः सैतवात्सैतवः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौत
माच्च गौतमो भारद्वाजाद्भारद्वाजो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्याय॰
णात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चा
सुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयात् ॥ ३ ॥ आत्रेयो माण्टेर्माण्टिर्गौतमाद्गौ
तमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गा
लवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्था ॥ सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभू
तेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो
मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रजित्तेर्विप्रजित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्स॰

॥ रत्ना ॥
॥ १३९ ॥

नातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥ ४ ॥ वंशो काण्वशाखायामपरपन्तु ॥ अथ वंशस्तदिदं व
यं शौर्प्पणाय्याच्छौर्प्पणाय्यो गौतमाद्गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पाराशर्यः शाङ्कृत्याच्च भारद्वाजाच्च भार
द्वाज औदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणा
यनाच्च रौहिणायनः शौनकाच्च जैवन्तायनाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्याभ्यां कौ
ण्डिन्यावौर्णवाभेभ्य और्णवाभाः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ॥ ५ ॥ आग्निवेश्यः सैतवात्सैतवः पाराश
र्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वलाकाकौ
शिकाद्वलाकाकौशिकः काषायणात् सौकरायणात्सौकरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिः सायकायनात्सायकाय
नः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जा
तूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भार
द्वाज आत्रेयात् ॥ ६ ॥ आत्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः
काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौ
भरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ

139
॥ रत्न॰ ॥
॥ १३९ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्वि
प्रजित्तेर्विप्रजित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे
नमः ॥ ७ ॥ वंशो [illegible] ॥ अथ वंशः तदिदं वयम्भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः
पाराशरीपुत्रात्पाराशरीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराशरीकौण्डिनीपुत्रात्पाराशरीकौण्डिनीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो गा
र्गीपुत्राद्गार्गीपुत्रो बाडेयीपुत्राद्बाडेयीपुत्रो मौषिकीपुत्रान्मौषिकीपुत्रो हारिकर्णीपुत्राद्धारिकर्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपु
त्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौनकीपुत्रः ॥ ८ ॥ काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबालाक्यामाठरीपुत्रः कौत्सीपुत्रात्
कौत्सीपुत्रो बौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रो वार्षगणीपुत्राद्वार्षगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्र आत्रे
यीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो वात्सीपुत्राद्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वा
र्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः साङ्कृतीपुत्रात्साङ्कृतीपुत्रः ॥ ९ ॥ आलम्बीपु
त्रादालम्बीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डू
कीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रो भालुकी
पुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात्साञ्जीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ॥ १० ॥ प्राश्नीपुत्रादा

CC-0. In Public Domain. Digitization by eGangotri

॥ रुद्रा ॥
॥ १४० ॥

सुरीवासिनः प्राश्नीपुत्रः आसुरायणादासुरायणः आसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्यः उद्दालकादुद्दालकोऽरुणादरुणः उपवेशेरुप
वेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो बाध्योगाज्जिह्वावान्बाध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः क
श्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूं
षि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥ १ ॥ वंशोक्ता ऋषयस्तृप्यन्तु ॥ इमावेव गोतमभरद्वाजौ अयमेव गोतमोऽयं भरद्वाजः इमावेव
विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्ति
र्ह वै नामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद ॥ १ ॥ ब्राह्मणोक्ता ऋषयस्तृप्यन्तु ॥ सावित्रिं स्वापाठयेत्किंचिद्ध्यास्त्वनुः ऋ
ष्टोऽनुरूः स्वयम् ॥ विरतः स्वपठेत्युक्ते प्रणवं योजयेत्कविः ॥ सावित्री त्रिः समस्ता यो अध्यायांश्च प्रपाठकान् ॥ यजनस्थानान्यनुस्मृत्य ऋषयस्तृ
प्यताम्मिति ॥ ॐ इषे त्वा ॥ कृष्णोऽसि ॥ समिधाग्निम् ॥ एदम् ॥ अग्ने त्वम् ॥ देवस्य त्वा ॥ वाचस्पतये ॥ उपयामगृहीतोऽसि ॥ देवसवितः ॥ अपो
देवाः ॥ युञ्जानः प्रथमम् ॥ दृशानो रुक्मः ॥ पयि गृह्णामि ॥ ऋवक्षि निर्ऋत्य वयोनिः ॥ अग्ने जातान् ॥ नमस्ते ॥ अश्मन्नूर्जम् ॥ वाजश्च ॥ स्वाद्वीं त्वा ॥ क्ष
त्रस्य योनिः ॥ इमम्मे ॥ तेजोऽसि ॥ हिरण्यगर्भः सम् ॥ अश्वस्तूपरः ॥ शादन्द्भिः ॥ अग्निश्च ॥ समास्त्वा ॥ होता यक्षत् ॥ समिद्धोऽ अञ्जन् ॥ देवसवितः
सहस्रशीर्षा पुरुषः ॥ तदेव ॥ अस्मा जरासः ॥ यज्जाग्रतः ॥ अपेतः ॥ स्वब्भावम् ॥ देवसूत्वा ॥ देवस्त्वा ॥ स्वाहा प्राणेभ्यः ॥ ईशावास्यम् ॥ अध्यायो
क्ता ऋषयस्तृप्यन्तु ॥ इषे त्वा ॥ परिते ॥ अग्ने नय ॥ उपयामगृहीतोऽसि ॥ ध्रुवशर्मासि ॥ सोमस्य त्विषिः ॥ परस्याः अधि ॥ अग्नाव ॥ राज्ञसि ॥ नमो हिरण्य

140
॥ यमः ॥
॥ १४० ॥

३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वा हवे ॥ इडेमम् ॥ इमौ ते ॥ अत्राप्यरिष्टुतः ॥ अश्विना तेजसा ॥ पृथिव्यै स्वाहा ॥ प्रजापतये च ॥ ते ऽ अस्य ॥ तन्नूनपात्सथः ॥ अयमिह ॥ अनून:
स्यपत्रे ॥ शेषमन्वसप्तभिः ॥ ऋरिस्य येन पाचेरा ॥ शतं समाप्रम् ॥ शतो ऋा ऋ षयस्वप्यन्तु ॥ ब्रतस्तुयेष्यन् ॥ सवैकपालान्येवान्यतर उपद
धाति ॥ सवै स्रुवः समार्ष्टि ॥ हि हूमा वाह ॥ सवै प्रवरा याश्रावयति ॥ स्तनवो ह वै देवेषु यज्ञे भागमीषिरे ॥ सवै पर्णा शाखया वत्सानपाकरो
ति ॥ मनवे ह वै प्रातः ॥ सयत्राहः ॥ १ ॥ सयथाइन्तश्चेतश्च सम्भरति ॥ उद्धमा हवनीयम्प्रणीं जुति स्तुहोति ॥ सूर्यो ह वा अग्निहोत्रम् ॥ अथ हते
ग्निहोत्रं उपतिष्ठ वे ॥ प्रजापतिर्ह वा इदमग्र एकः ऽ एवास पितन्महाहविषा ह वै देवा ह्ममज्ञपुः ॥ २ ॥ देवयजनञ्जोषयन्ते ॥ दक्षिणेना हव
नीयम्प्राचीनग्रीवे कृष्णाजिने उपस्तृणाति ॥ सप्तपदामनुनिष्क्रामति ॥ शिरो वै यज्ञस्यातिथ्यवाकृष्णायणीयो दयनीयो ॥ तयय एवपूर्वार्धोवै
र्थिष्य स्थूणाराजो भवति ॥ उदरमेवास्य सदः ॥ अग्निमाद्धते ॥ नयद्वैनन्स्वहृतो होतारो हो नृषदन उपविशति ॥ प्रजापतिर्वै प्रजाः ससृजानो रिरिचा
न इवामन्यत ॥ ३ ॥ प्राणो ह वा अस्योपांशुः ॥ चक्षुषी ह वा ऽ अस्य शुक्रामन्थिनौ ॥ भक्षयित्वा सस्तुयस्तताः स्वइस्कोन्तिष्ठति ॥ मनो ह वा अस्य स
विता ॥ आदित्येन च रूपेणोदयनीयेन प्रचरन्ति ॥ प्रजापतिर्वा एषयद्दशुः ॥ देवाश्च वा असुराश्च ॥ अथ स्रुवञ्चाज्यविलापनीं चादाय ॥ अरण्योर
ग्नी समारोह्य ॥ केशवस्य पुरुषस्य ॥ आग्नेयोष्टाकपालः पुरोडाशो भवति ॥ ५ ॥ असद्वा इदमग्र आसीत् ॥ प्रजापतिरग्निरूपाण्यपश्यत् ॥ हि
रीयमेतद्वै देवा अब्रुवन् ॥ अथैनमतः खनत्येव ॥ पर्णकषायनिष्पक्वा एता आपो भवन्ति ॥ मृयां सिहवीं सिभवन्ति ॥ रुक्मस्यान्तिमु च वि
भर्ति ॥ वज्रो वा एषो नाग्निर्विभ्रद्दिस्याद्रुः ॥ ६ ॥ गार्हपत्यञ्चेष्यन्स्लाशाशाखया व्युहति ॥ अथातोनैसनीं हरन्ति ॥ चितो गार्हपत्यो भवति ॥ आत्मन्व

॥ रत्ना ॥
॥ १४१ ॥

त्रिंशत्स्तोमेनेवैष्यन् ॥ कूर्ममुपदधाति · प्राणभृत उपदधाति ॥ ७ ॥ द्वितीयां चितिमुपदधाति ॥ तृतीयां चितिमुपदधाति ॥ चतुर्थीं चितिमुप
दधाति ॥ पञ्चमीं चितिमुपदधाति ॥ नाकसद उपदधाति ॥ अनवा उपदधाति ॥ ८ ॥ अथातः शतरुद्रियं जुहोति ॥ उपवसथीयेऽहन् प्रातरुदित
आदित्ये ॥ अथातो वैश्वानरं जुहोति ॥ अथातो राष्ट्रभृतो जुहोति ॥ अथातः पयोव्रतताये ॥ ९ ॥ अग्नीरेषपुरस्ताद्वीयते ॥ प्रजापतिः स्वर्गं लोक
मजिगांसत ॥ प्राणो गायत्री ॥ प्रजापतिं विस्रंसनम् ॥ तस्य वा एतस्याग्नेः ॥ अथ हैते रूपे ॥ १० ॥ संवत्सरो वै यज्ञः प्रजापतिः ॥ त्रिर्ह वै पुरुषो जा
यते ॥ वाग्वा एतस्याग्निहोत्रस्याग्निहोत्री ॥ उद्दालको हारुणिः ॥ उर्वशी हाप्सराः ॥ भृगुर्ह वै वारुणिः ॥ पशुबन्धेन यजते ॥ न यथा ह वै ॥ ११ ॥ अथ
यैष यज्ञो योऽयं पवते ॥ समुद्रं वा एते प्रवरन्ति ॥ यद्वा लोके दीर्घसत्रं ह वा एत उपयन्ति ॥ तदाहुर्य एषदीर्घसत्री ॥ सोमो वै राजा यज्ञः प्रजापतिः ॥
विश्वरूपं वै त्वाष्ट्रमिन्द्रोऽहन् ॥ इन्द्रस्य वै यत्र ॥ एतस्माद्वै यज्ञात्पुरुषो जायते ॥ १२ ॥ ब्रह्मौदनं पचन्ति ॥ प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत ॥ प्रजा
पते रक्षस्वयत् ॥ उत्तमस्प्रजापतिरकामयत ॥ अथ प्रातर्गोतमस्य ॥ पुरुषो ह नारायणोऽकामयत ॥ ब्रह्म वै स्वयम्भु तपोऽतप्यत ॥ अथास्मै लोक
स्याराङ्कुर्वन्ति ॥ १३ ॥ देवा ह वै सत्रन्निषेदुः अथातो रौहिणौ जुहोति ॥ स वैतृतीयेऽहन् दृष्यात् ॥ दयाह प्राजापत्याः ॥ प्रजापत्याः ह्न वालाकिर्हानू
चानो गार्ग्य आस ॥ जनको ह वैदेहः जनको ह वैदेहः ॥ याज्ञवल्क्यो जगाम ॥ पूर्णमदः पूर्णमिदम् ॥ श्वेतकेतुर्ह वा आरुणेयः ॥ प्राश्नीपुत्राद
रिवासितः ॥ १४ ॥ अथाधार्यसमास्रः ॥ अथायोनिकान्नप्रपत्न्यमनु ॥ अथ प्रपाठकान ॥ व्रतमुपैष्यन्वर्ष्यविहितो ह वा अग्नेश्विरास ॥ नेवा आर्द्रःस्रुः
समुद्रो नतरसायारसाया रयिष्यन् ॥ यज्ञेन वै देवाः ॥ यज्ञेन वै देवा दिवमुपोदक्रामन् ॥ स वै ऋचौ व्यूहति ॥ १ ॥ स यद्वाइतश्चेतश्च सञ्चरति ॥ वरुणो है

141
॥ रामः ॥
॥ १४१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नग्राज्य कामम आदधे ॥ यत्र वै प्रजापतिः प्रजाः ससृजे ॥ प्रजापतिर्ह वा एतेनाग्रेयज्ञेनेजे ॥ महाहविषा ह वै देवा वृत्रं जघ्नुः ॥ २ ॥ देवयजनं जोषयन्ते
वा वेयच्छन्ति ॥ नीडे कृष्णाजिनमास्तृणाति ॥ तं यस्य पृथ्वी धावर्षिष्ठ स्थूणाराजो भवति ॥ विजामानो हैवा स्वधिस्याः याशङ्कुत्वा प्रतिमुञ्चन्ति ॥ सोनु
पयजन्ति ॥ ३ ॥ प्राणो ह वा अस्योपांशुः ॥ आत्मा ह वा अस्याग्रयणः ॥ ग्लानिर्वा एतद्यज्ञस्य ॥ स वा अवभृथमाप वैति ॥ न यद्वै तद्द्वादशाहेनुबू
च्छदस्या यजते ॥ ४ ॥ देवाश्च वा असुराश्च ॥ बार्हस्पत्येन वरुण्या प्रचरन्ति ॥ स वा अभयः सम्भरन्ति ॥ मैत्रावरुण्या पयस्यया प्रचरन्ति ॥ ५ ॥
भसद्वा इदमग्र आसीत् ॥ प्रजापतयश्चकार भालभन्ते प्रदीप्ताः एते अग्नयो भवन्ति ॥ तस्याः एतस्याः अषाढामुपवा करोति ॥ रुक्मं प्रतिमु
ञ्च विभर्ति ॥ ६ ॥ गार्हपत्यं चेष्यन् पलाशशाखया मूहन्ति ॥ अथ दर्भस्तम्बमुपदधाति ॥ आत्मन्नग्निं गृह्णीतेव ष्यन् ॥ कूर्ममुपदधाति ॥
७ ॥ प्राणभृत उपदधाति ॥ अथ द्विभ्वजोतिषमुपदधाति ॥ अथातोन्वाहनम् ॥ गार्हपत्यमुपदधाति ॥ ८ ॥ अथातः शतरुद्रियं जुहोति ॥
प्रस्थेसाग्निं महरिष्यन् ॥ अथैतान् यज्ञक्रतून् जुहोति ॥ अथ प्रातः प्रातरनुवाकमुपाकरिष्यन् ॥ ९ ॥ अग्निरेष पुरस्ताच्चीयते ॥ अथातश्चयन
स्यैव सम्वत्सरो वै प्रजापतिरग्निः ॥ नेव वा इदमग्रे सदासीत् ॥ १० ॥ सम्वत्सरो वै यज्ञः प्रजापतिः ॥ अपि ह वा एतर्हि ॥ प्रजापतिर्वै प्रजा ॥ सृजमा
नो तप्यत ॥ अथातः स्वाध्यायप्रशंसा ॥ ११ ॥ अयमेव यज्ञो योयम्पवते ॥ पुरुषो ह नारायणः प्रजापतिरुवाच ॥ सोमो वै राजा यज्ञः प्रजापतिः
प्रजापतिर्यज्ञमसृजत ॥ १२ ॥ ब्रह्मौदनं पचति ॥ निष्क्रं प्रपन्नं बु ॥ प्रसुष्याम्भ दक्षिणेन वेदिम् ॥ पुरुषो नारायणो कामयत ॥ १३ ॥ देवा ह वै स
त्रं निषेदुः ॥ स यद्वैतान् होताभ्या ह वा याह प्रजापतयाः ॥ दृप्तबालाकिर्हानूचानो गार्ग्य आस ॥ अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ ॥ जनको ह वै वै

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥
॥१४२॥

हंयाज्ञवल्क्योजगाम॥ भूमिरन्तरिक्षंद्यौरितिषाष्ठीपुत्रायास्तुरिवासिनः॥१४॥ प्रपाठकसमाप्तः॥ प्रपाठकोनाम्नषपरस्तप्यनु॥ शनस्याना
मनुस्मृम॥ ब्रतमुपैष्यन्॥ तमग्रेदेवमिमहि॥ अथाञ्जलिन्नामास्यविद्याम्याम्॥ हृहस्त्रौवायविस्येति॥ वसून्तांराज्ञौस्याम॥ अग्निर्वैदेवाना
मद्यानमाम्॥ तद्यथापोनौरेनःसिञ्चेत॥ तान्मैप्राश्नन्तोवअथवेदस्पत्नीमिवस्त्रंस्पयति॥१॥ अयमैयज्ञोयोयम्यवते॥ अथयदस्तमे
ति॥ रेवतीरमध्वमिति॥ सवाआग्नेयोष्टाकपालःपुरोडाशोभवति॥ तद्येसोमेनेजानाः॥ अथोत्तरेणशालांपरिश्रयन्ति॥२॥ अथोल्लिखति
त्वायावस्तुःपिङ्गाक्षीसासोमक्रयणीस्यात्॥ प्रथमन्तेदेवाः॥ इन्द्रघोषःप्रोक्षणीरध्वर्युरादत्ते॥ साहकद्रुरुणा॥ तद्यएतडच्छित्तादेवाहवैय
सन्तन्वानाः॥ अथपार्श्वेनावासिनावापयोति॥ सञ्जुहोतिभृगाणांत्वाग्निः समिधाहवम्मइति॥३॥ ह्रयं हवाउपांशुः॥ तस्यासावेधक्रुवआ
युः॥ यज्ञयावापृथिव्यं शस्यते॥ सआज्यस्योपस्तीर्यंद्विरवरोषयति॥ इन्द्रोहवैयापष्ठि॥ तासान्वादशगर्भा॥ द्वितीयानयोहस्यपुरावाजपे
येनयजन्ते॥ अथदिशोनुवीक्षमाणोजपति॥ सवैदीक्षते॥ अथैतेनमभिषेकम्॥ षडेवोत्तरेवरवः॥ अथोआहुः प्रजापतिरेव॥ आमावास्या
यादीक्षते॥ अभ्रस्यस्यपरेजुहोति॥ अथैनामुपयति॥ तमुपरिनाभिविमर्ष्टि॥ अयोषाक्लिवपति॥ द्वितीयाचनस्त्रःसीतायजुषाकृ
षति॥ तम्याप्समस्त्वंयन्तम्॥ अपाकुम्भस्त्रीदेति॥ तस्यमनोवैभ्वकर्मणामिति॥ तद्यैषामध्यमास्वयमातृणा॥ एकादशभिस्तुवनेति॥ विराडेषा
तावाएताः॥ दशेष्टकाउपदधाति॥ अथस्वयमातृणामुपदधाति॥ अथोत्तरार्द्धेनप्राक्॥ सयःसवैश्वानरःइमेसलोका॥ यास्तेऽग्नेसूर्येरु
चः॥ नामकृत्वाथैनमुपतिष्ठते॥ यावाऽइयम्वेदिःसमविवस्य॥ अयमेवाकाशोन्तूर्योयमन्तरात्मन्वाकाशः॥ सोयमात्मत्रिधाविहितःएव॥

142
॥राम॥
॥१४२॥

४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथर्वऽङ्गिरोः ॥ अथ यामेतामाहुतिं जुहोति ॥ अथ यदेतु वाक्यामनूच्य ॥ ब्रह्मचार्यसीत्याह ॥ स्वयम्भुवम्बेन यजते स्मीनेवैसत्वनर्नवान्कुरु
ते ॥ १ ॥ दक्षोतिहोवाच ॥ अथ यत्रस्कन्नऽस्यात् ॥ अथ यदि द्रष्टुतः सर्वआश्विनाभवन्ति ॥ १२ ॥ प्रजापतिर्यत्तमसृजत ॥ किम्वावपनमाह
दिति ॥ अथ योस्यानिष्कः प्रतिमुक्तो भवति ॥ एतेन ह स्मोतो देवापः शौनकः ॥ वनस्यः सीतायजुषा कृषन्ति ॥ १३ ॥ अथोत्तरतः सिकताऽउपकी
र्णा भवन्ति ॥ अथ रौहिणौ जुहोति ॥ ते देवाऽब्रुवन्नेतावद्वाऽइदं सर्वं यदन्नम् ॥ तानि यदा रक्तानि ॥ यो मौनिष्ठन् ॥ कतमआत्मेति ॥ अ
थ हैनमन्तुष्ट्याऽऽदुः ॥ अथ यामिद्धे कर्मन्दधीतेति ॥ सप्तसहस्रषट्शतं शेषवज्र्विऽशति ॥ प्राश्नीपुत्रादासुरिवासिनः ॥ १४ ॥ शतसमाप्तः
सङ्ख्या ॥ ७९ ॥ शतोक्ता अथयमस्तप्यन्तु ॥ कण्डिकाश्वतथान्तिमाः ॥ अथ ब्रह्मविसृजते ॥ स यस्मिन्हतीवसुं लोकमेसथनियाभ्या भो गृहान्कि
गृह्णाते थगृह्यतिः ॥ स ब्रह्मरणमाहुयतिताद्वाएतास्तानि दश भवन्ति ता एता अक्रुयोमध्यमेवन्ठतीयाचितिः सहोवाचाथर्वऽशस्तस्मा
ड हैनडवाचसवाररषआत्मैवयन्सौत्रामणीमर्यादया एवलोष्टमाहत्यप्राश्नीपुत्रादासुरिवासिनः ॥ १ ॥ वेदोक्ता आन्तिमाकण्डिकोक्ताःस्तृ पा
न्तु ॥ अन्तिमाफक्किकाद्यूयात् ॥ एवं तं विसृजेत परमाक्रनिरुद्धतीति तस्मात्सोत्नचमसात्तस्मिन्नुप हवमिष्टा समिधोभ्यादधतितु दशवा
त्रयोदशवा दक्षिणाभवन्ति या वानग्निर्यावत्यस्य मात्रा तावन्न भवति तस्मात्समानसमग्न्यतात स्मादिमप्राणाऽउपरिष्टाद्दशाध्वत्वाः संवरे
नैवर्त्विजोतोकाश्यतिब्रह्मणोब्रह्मस्वयम्भुब्रह्मणे नमः ॥ कौशितीरेवेमा अप्येतर्हि प्रजायते तस्मादिमावामानममितोवाकृतस्माऽहैतज्जी
नजीवाश्वयीतस्थ्वनसन्दृश्यन्ते वाजसनेयेन याज्ञवल्क्येनाख्यायते ॥ २ ॥ वेदोक्त अन्तिमफक्किकोक्ता अथयमस्तप्यन्तु ॥ अग्निमीळेपुरोहितम्

॥रत्ना॥
॥१४३॥

इषेत्वेत्यग्न आयाहि॥ शन्नोदेवी रभिष्टये॥ सहनोस्त्विति मन्त्रेच यथ्थाउपाकर्वीतिच॥ सहनोस्तु सहनोवतु सहनइदंवीर्यवदस्तु ब्रह्म॥ इन्द्रस्त्वहे
दयेनयथानविद्विषामहे इति त्रिरावर्त्याधीयीरं होमन्नखानामनिकृन्तनमेके प्रागुत्सर्गात्॥ उपाकर्वीप्रवायोस्यधर्म्मः परापतन्त्॥ परिस
मानि धर्म्मिणो विसख्यानि विसृजामहे इति त्रिरावर्त्य ८ सहोप्यविप्रतिष्ठेरन्॥ ऋषिश्राद्धन्ततः कुर्यात्सुराणां हव्यवाचयेत्ततः॥ अथऋषिश्राद्धं
॥प्राणानायम्य॥ देशकालौ संकीर्त्य उत्सर्गाङ्गभूत ऋषिश्राद्धमहं करिष्ये॥ ऋषिश्राद्धोपहारः प्रवयोभवन्त्विति सम्प्रोक्ष्य॥ देशकालपात्रद्रव्य
शुद्धिरस्त्विदमस्तु॥ गोतमादिसप्तर्षिणामिदमासनं यथाभागं वः स्वाहा॥ गोतमादयः सप्तऋषयो यथादत्तं गंधाद्यर्चनं यथाभागं वः स्वाहा॥ गो
तमादिसप्तर्षिभ्य इदमन्नं सोपस्करं अक्षय्यतृप्तिहेतोर्वः स्वाहा॥ शिवा आपः सन्तु॥ सौमनस्यमस्तु॥ अक्षतञ्चारिष्टमस्तु॥ अघोराऋषयः स
न्तु॥ ॥ऋषिश्राद्धसाङ्गतासिद्ध्यर्थं हिरण्यनिष्क्रयीभूतां दक्षिणां सम्प्रददे॥ ॐ अद्य गोतमादिकृतसमस्तोत्सर्गाङ्गभूत ऋषिश्राद्धं परिपूर्णमस्
तु॥ इति॥ ततः उत्सर्गकर्म्मणो॥ न्यूनातिरेककर्मणो॥ न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो नानानामशर्म्मभ्यो यथाभागं विभज्य दक्षिणां
सम्प्रददे॥ सहनोस्त्विति पठेत्॥ उपाकर्वीत्यस्य प्रजापति ऋषिरग्निर्देवता जपे विनियोगः॥ उपाकर्वी॥ उत्तिष्ठब्रह्मणस्पते देवयन्तस्त्वेम
हे॥ उपप्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा॥ १ ॥ उत्तिष्ठेति घोरकण्व ऋषिर्बृहती छन्दो ब्रह्मणस्पतिर्देवता सप्तऋषिविसर्जने॥
उत्तिष्ठ इति विसृज्य॥ सप्तकृत्वोन्ति सप्तर्षीञ्जलाशये प्लावयेत्॥ ॥इति उत्सर्गपद्धतिः॥ ॥इति श्रीगीर्वाणयुद्धविक्रमसाहदेव
विरचितायां सज्जनमानाभिधायां उपाकर्मोत्सर्गनिर्णयपद्धतिरत्नम्॥ ॥माघशुक्लपंचमी श्रीपंचमी॥ नउकंहे साज्ञोवाराहे॥ माघ

143
॥राम॥
॥१४३॥

४२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शुक्लचतुर्थ्यां तु वरमाराध्य चश्रियम् ॥ पंचम्यां कुंदकुसुमैः पूजां कुर्यान्मसद्वये ॥ इयं माधवमते पूर्वा हेमाद्रिमते परा ॥ अत्र कुम्भविधिः ॥ तत्रा
दौ यजमानः कृतनित्यक्रियः उपलिप्ते वितानादिशोभिते गृहांगणादौ पंचवर्णाल्य· मण्डपस्य ईशानदिग्भागे कलशमेकं स्थापयेत् ॥ तत्प्रकार
श्च ॥ भूरसीति भूसंस्करणम् ॥ धान्यमसीति धान्यसंस्थाप्य ॥ आजिघ्र कलशमिति अव्रणं कलशं स्थापयेत् ॥ ॐ याऽॐषधीः पूर्वाजाता इति
मंत्रेण हरिद्राद्वय २ कुष्ट ३ मांसी ४ मुरा ५ शैलेय ६ चंदन ७ वचा ८ कर्चूर ९ मुस्ता १० ख्याः सर्वौषधीः क्षिपेत् ॥ ॐ ॐषधयः समिति
यवान् ॥ ॐ काण्डात्काण्डादिति दूर्वाः ॥ ॐ अश्वत्थे व इति मंत्रेण अश्वत्थो १ उम्बर २ प्लक्ष ३ चूत ४ न्यग्रोधा ५ ख्यपंचपल्लवान् ॥ ॐ स्योना पृ
थिवीति गजस्थानाश्वस्थानवल्मीकसङ्गमह्रदगोष्ठराजद्वारसमाहृताः सप्तमृदः ॥ फलिनीरिति फलानि परिवाजपतिः कविरिति सुव
र्णरजतमुक्तालाजावर्त्तप्रवालसञ्ज्ञानि पञ्चरत्नानि ॥ अभावे पञ्चरत्नानां हेम सर्वत्र योजयेदिति वचनात् हिरण्यगर्भ इति हिरण्यं वा ॥
ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः ॥ तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति वस्त्रयुग्मेन रक्त
वस्त्रेण वा वेष्टयेत् ॥ ॐ पूर्णा दर्वीति धान्यपूर्णपात्रं वा कलशोपरिन्यसेत् ॥ तदुपरि ॥ ॐ तत्त्वायामीति वरुणमावाहयेत् आसनपाद्याच
मनीयस्नानयज्ञोपवीतचंदनाक्षतपुष्पधूपदीपनैवेद्यदक्षिणादीनि वरुणाय नम इति पूजयित्वा वरुणः साङ्गः सपरिवारः प्रीयता॰
मिति प्रार्थयित्वा ॥ कलशाभिमन्त्रणम् ॥ पूर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ कलशस्य मु
खे विष्णुः कण्ठे रुद्रः समाश्रितः ॥ मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ॥ ऋग्वेदोऽथ य

॥ रत्न ॥
॥ १४४ ॥

जुर्वेदः समावेदोप्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ ततः कलशप्रार्थना ॥ देवदानवसंवादे मथ्यमाने महोदधौ ॥ उ
त्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठि
ताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ॥ आदित्या वसवो रुद्राः विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेपि यतः कामफल
प्रदा ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ इति कलशं प्रार्थयित्वा ॥ ततः अद्येत्यादि वस
न्तपञ्चम्यां करिष्यमाण रतिकाम पूजा निर्विघ्नपरिसमाप्त्यर्थं गणपत्यादि देवतापूजनमहं करिष्ये ॥ इति सङ्कल्प्य ॥ कलश स्कं
धप्रदेशे ॥ ॐ गणानां त्वेति गणपतिम् ॥ अम्बे अम्बिके इति दुर्गाम् ॥ वायो ये ते इति वायुम् ॥ उक्षा असि स्याकाशं ॥ अश्विना भैषज्ये
नेत्यश्विनीकुमारौ ॥ एवं पञ्चलोकपालान्सम्पूज्य ॥ आकृष्णेनेत्यादि नवग्रहमन्त्रैः सूर्यादि नवग्रहांश्च पूजयित्वा ॥ सातुनयं विसृज्य
कलशस्याग्रभागे श्वेतवस्त्र विलिखिताष्टदले पीठिकोपरि क्रमेणेन्द्रादि दिक्पालान्स्वस्वमन्त्रैः पूजयेत् ॥ तन्मन्त्राश्च क्रमेण पूर्वादि
ष्टदले पूर्वकोणे ॥ त्रातारमिन्द्रमिति पूर्वे इन्द्रम् ॥ अग्निं दूतमित्याग्नेये ॥ यमाय त्वेति दक्षिणे ॥ असुन्वन्तमयजमानमिति नैरृत्ये
तत्त्वायामीति इति वारुणे ॥ वायो ये ते इति वायव्ये ॥ सोमो धेनुमित्युत्तरे ॥ वयं सोमेति ईशान्याम् ॥ एतान्पञ्चोपचारेण पूज
यित्वा ॥ ततोष्टदलेमध्ये रतिकामौ पूजयेत् ॥ ॐ ह्रीं रतिकामौ इहागच्छतमिह तिष्ठतमिति स्थापयित्वा ॥ आसनम् ॥ पाद्यम् ॥
अर्घ्यम् ॥ आचमनीयम् ॥ स्नानम् ॥ पञ्चामृतमन्त्रैः पञ्चामृतस्नानम् ॥ शुद्धोदकस्नानम् ॥ गङ्गाजलस्नानम् ॥ वस्त्रम् ॥ यज्ञोपवीतम्

144

॥ रत्न ॥
॥ १४४ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनराचमनीयम् ॥ चन्दनम् ॥ अक्षता ॥ पुष्पाणि ॥ धूप ॥ दीपः ॥ नानाविधफलपक्वान्नादिनैवेद्यम् ॥ पुनराचमनीयम् ॥ ताम्बूलम्
पूगीफलम् ॥ नारिकेलफलम् ॥ नानाविधसुगन्धितैलागुरुकर्पूरश्रीखण्डउपट्वासपलाशपुष्परक्तकरवीरादिनि ॥ चामरादर्शादी
नि ॐ ह्रीं रतिकामाभ्यां नमः ॥ दक्षिणां पुष्पाञ्जलिं ॐ ह्रीं रतिकामाभ्यां नमः ॥ इति पूजयित्वा ॥ साष्टाङ्गं प्रणम्य तौ सानुनयं विसृ
ज्य ॥ ब्राह्मणान् पूजयित्वा ॥ स्वयं पूजां निर्वर्त्य ॥ ब्राह्मणमुखात् हस्तादिरागं भक्षयान् ॥ ततो ब्राह्मणाशीर्वादश्लोकादीन् श्रु
त्वा ॥ रतिकामौ विसृज्य ॥ कलशोदकेनाम्रपल्लवेन ब्राह्मणैरभिषिक्तो यजमानो भूयसीं दक्षिणां दद्यात् ॥ तत्र वाक्यम् ॥ ॐ अद्येमा
दिदेशकालौ संकीर्त्य ॥ इन्द्रादिदिक्पालावरणसहितरतिकामपूजासाङ्गतासिद्ध्यर्थं दक्षिणां यद्द्रव्यं तद्दैवतं नानानामगोत्रेभ्यो
नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे ॥ इति दक्षिणां दद्यात् ॥ इति वसन्तपञ्चमि ॥ ॥ इति श्री गिरीराजचक्रचू
डामणिनरनारायणेत्यादिविविधविरुदावलिविराजमानमानोन्नतनेपालदेशनगरवराधीश्वरश्री ५ मन्महाराजाधिराजगी
र्वाणयुद्धसाहदेवविरचितनापावसन्तपञ्चमीकृत्यविधिरत्नम् ॥ ॥ अथ मत्स्यपुराणाद्यनुसारेण शिवलिङ्गादिमूर्तिप्रतिष्ठा
प्रयोग उच्यते ॥ ॥ तत्र कृतनित्यक्रियो यजमानः शुक्लाम्बरधरः प्राङ्मुख उदङ्मुखो वोपविश्य प्राणानायम्य शुक्लाम्बरधरं विष्णु
मित्यादि पठित्वा ॥ इष्टदेवतां कुलदेवतां च प्रणम्य ॥ स्वस्ति नो मिमीतामित्यादि स्वस्तिवाचनं विधाय ॥ कुशानिलयवजलपाणिः प्र
तिज्ञासङ्कल्पं कुर्यात् ॥ महासङ्कल्पोक्तदेशकालादिकं स्मृत्वा ॥ अमुकगोत्रोमुकप्रवरोमुकराशिरमुकनक्षत्रोमुकपत्नोमुकदेवशर्माहं

CC-0. In Public Domain. Digitization by eGangotri

॥रत्न॥
॥१४५॥

लिङ्गवेदीगतपरमाणुसमसङ्ख्ययुगसहस्रावधिशिवलोकनिवासपूर्वकशिवसायुज्यसिद्ध्यर्थमिमादिशिवलिङ्गे ॥ विष्ण्वादि
देवेषु तु ॥ एतस्यैतिमाऽवस्थितिदिनसमसङ्ख्यवर्षयुगसहस्रावच्छिन्नविष्णुलोकमहितत्वसम्पन्नतोरूपप्रतिष्ठाकरणजन्यफलस
मविलक्षणापरशङ्करब्रह्मादिप्रतिष्ठाजन्यफलसमफलार्यमादिपितृवासवादिप्रीतिप्रयागीयमाघस्नानकार्त्तिकमासीयपुष्कर
स्नानप्रेतपक्षीयगयापिण्डदानरविग्रहकालिककुरुक्षेत्रस्नानरामवैशाखमासीयद्वारकास्नानशिवरात्रिकालिकविश्वेश्वरादिदि
वदर्शनगङ्गायमुनागोदावरसरस्वतीकावेरीचन्द्रभागारेवागङ्गासागरादितीर्थस्नानदानजन्यफलसमफलकपिलाकोटिदानवाद
शीव्रताश्वमेधादियज्ञवर्षसुवर्णभारदानवक्रुचान्द्रायणपराकजन्यफलसमफलसर्वपापक्षयपूर्वकमातृपितृसहितैकविंशतिपु
रुषमुक्तिकामः श्रीपरमेश्वरप्रीतये विष्णुमूर्त्तिप्रतिष्ठामहं ऽहैः षडहैर्वा त्र्यहैः सद्यो वा करिष्ये ॥ तत्कर्मप्रतिबन्धकदुरितोपशमनाय स
द्यो ह्यसिद्ध्यर्थं तत्पूर्वकर्माङ्गत्वेन गणेशपूजनं पुण्याहवाचनं मातृपूजां वसोर्धारां नान्दीश्राद्धं चाहं करिष्ये ॥ इति प्रतिज्ञासङ्कल्पं कृत्वा 145
गणेशपूजां मातृपूजां नान्दीश्राद्धं च विधाय अधिवासनं कुर्यात् ॥ तत्र सङ्कल्पः ॥ अमुकदेवशर्माहं श्रीपरमेश्वरप्रीतये ऽमुकदेवप्र ॥राम॥
तिष्ठाञ्चः करिष्ये तदङ्गत्वेनाधिवासनाख्यकर्माद्य करिष्ये ॥ इति सङ्कल्प्य ॥ हेमकुण्डलकेयूरकटककराङ्गाभरणाङ्गुलीयकवस्त्रयुगल ॥१४५॥
गन्धपुष्पाक्षतफलैर्गुरुं वृणुयात् ॥ तत्र वाक्यम् ॥ अमुकदेवशर्माहममुकदेवप्रतिष्ठायामेभिः कुण्डलादिभिर्गुरुत्वेन त्वामहं वृणे ॥ वृतोऽस्मीति त्वं
मे गुरुर्भवेति वृत्वा ॥ भवानीति तेनोक्ते ॥ सदस्यांश्च वृत्वा गुरुं प्रार्थयेत् ॥ त्वं मे गुरुः पिता माता त्वं प्रभुस्त्वं परात्परः ॥ त्वत्प्रसादाद्धि विप्रर्षे सर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मेस्मान्मनोगतम्॥ आपद्विमोक्षणार्थाय कुरुष्व त्वमतन्द्रितः॥ शान्तिभिः सर्वतः पुण्यैः संख्यातैः सुसमाहितैः॥ आचार्येणाद्य संयु
क्तः कुरु कर्म यथोदितम्॥ इति गुरुवरणम्॥ अथाचार्यं वृणुयात्॥ ॐ अद्येत्यादि॥ भ्वः करिष्यमाणाऽमुकदेवप्रतिष्ठाकर्मणि तद
ङ्गीभूताय कर्त्तव्याधिवासनकर्मणि चाचार्यकर्तुममुकगोत्रनामशर्माणं त्वामहं वृणे॥ इत्याचार्यं वृत्वा॥ ब्राह्मणां वृणुयात्॥ कर्त्तव्या
ऽमुकदेवप्रतिष्ठाहोमकर्मणि कृताकृतावेक्षणारूपब्रह्मकर्तुममुकशर्माणं ब्राह्मणं ब्रह्मत्वेनाहं वृणे॥ इति ब्रह्माणं॥ वृत्वा तथैव हो
तारं वृणुयात्॥ तद्वाक्यम्॥ अमुकदेवप्रतिष्ठाकर्मणि यथाविहिते नाहवनीयद्रव्येण कर्त्तव्यप्रजान्यादिगणपतिप्रभृतिपार्व
तिश्रीपर्यन्तग्रहाधिपमधिपनिवास्तु होमकर्मकर्तुं होतृत्वेन त्वामहं वृणे॥ इति होतृवरणम्॥ एवमेव शान्तिजो जापकांश्च वृ
त्वा॥ प्रार्थयेत्॥ यथा शक्रस्य वागीश आचार्य्यः सर्वकर्मसु॥ तथा मया त्वमाचार्यो वृतोऽस्मिन्यज्ञकर्मणि॥ त्वत्प्रसादाच्च पूर्णं स्यात्स
मग्रं फलमाप्नुयात्॥ संसारभयभीतेन अपंपत्तः सुभक्तितः॥ प्रारब्धस्त्वत्प्रसादेन निर्विघ्नो मे भवेदिह॥ शान्तिभिः सर्वतः पुण्यैः सं
ख्यातैः सुसमाहितैः॥ संयुक्तस्त्वं समाचार्य कुरु कर्म यथोदितम्॥ मन्त्रमूर्त्तिर्भवांस्त्राथ संसारच्छेदकारकः॥ देवपूजा यथा होमात्कुरुध्व
मंगानि च तः॥ प्रतिष्ठादिविधावस्मिन्कुरु कर्म यथोदितमिति प्रार्थयित्वा॥ ततः कुण्डपुरागादिक्रमेणाऽऽग्वेदिनौ द्वौ॥ यजुर्वेदिनौ
द्वौ॥ सामवेदिनौ द्वौ॥ चाथर्ववेदिनौ च प्रत्येकममुकं कुण्डहोतृत्वेन त्वामहं वृणे इति वृत्वा प्रार्थयेत्॥ भगवन्सर्वधर्मज्ञ धर्मधर्म
भृतां वर॥ वितते मम यज्ञेऽस्मिन्नृत्विक्त्वं भव वृतेति संप्रार्थ्य॥ एवं द्वात्रिंशत्षोडशाष्टौ चत्वारो वा शान्तिनः प्रत्येकं वृत्वा॥ अष्टौ च॰

CC-0. In Public Domain. Digitization by eGangotri

तुरोवा द्वारपालान् ॥ तावत्तस्ववजापकानपि हुत्वा ऋग्वेदः पद्मपत्राक्ष इति कुराउ मराउ पत्र करणप्रोक्तमंत्रैः प्रार्थयेत ॥ यदानुस्वल्पे
प्यकाग्निवत्कार्यविन्नशाद्या हृतेन ऋषिरिति मात्सोकेरे काग्निमात्रम् ॥ तदाचार्यं हुत्वा यथावत्तु संरक्षोत्रस्थेति त्रसाराणां हृणुं पायायान् ॥ स्व
वमेव होत्रादीन् हुत्वा प्रार्थयेत् ॥ अस्य याग स्थानिष्यस्मै भवत्वोम्यर्थिता मया सुप्रसन्नैः प्रकर्तव्यमेतत्कर्म यथोदितम् ॥ अस्मिन् कर्म
णि ये येतुः हुता गुरुस्तु स्वामया ॥ सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितमिति प्रार्थना ॥ एवं वः अष्टौ होतारः ॥ अष्टौ द्वारपालास्तावन्
तो नापकाः गुरुश्चेति पञ्चविंशतिः ॥ अष्टौ होतारश्चत्वारो द्वारपालाश्चत्वारो जापकाः गुरुश्चेति सप्तदश ॥ होतृद्वारपाल जापकाः स्व
सेकं च त्वारोगरुणाः सह योदशवा ॥ अन्यश क्तो गुरुरेवैकः ॥ तदा वेदान्तरीय कर्मा भावो वो ध्यः ॥ इति ब्राह्मणावरणम् ॥ अथा
र्गो देवयजन भूमौ सर्षपाक्षतान् विकिरेत् ॥ तत्र मन्त्राः ॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं
तत्र गच्छतु ॥ अपक्रामन्तु ये भूताः पिशाचाः सर्वतो दिशं ॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभेत् ॥ २ ॥ भूतप्रेत पिशाचाद्याः अपक्रा
मन्तु राक्षसाः ॥ स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमि भुवं त्विमाम् ॥ ३ ॥ इति विकीर्य ॥ तत आपोहिष्ठेत्यादिमाकुशोदकेन रक्षोहणामि
त्यादिना पञ्चगव्येन च भूमिसंप्रोक्ष्य ॥ देवा आयान्तु यातुधाना अपयान्तु विष्णो देवयजनं रक्ष ॥ इति भूमौ प्रादेशं कुर्यात् ॥ ततो यज
मानः शिवलिङ्गं स्थापितमासन्निधौ गत्वा ॥ पञ्चगव्य हिरण्य दूर्वा भृङ्ग पलाशपर्णैर्देवमभिषिञ्चेत् ॥ तत्र मंत्राः ॥ आपोहिष्ठेति त्र्यृचः
पवमानानुवाकश्च ॥ यथा ॥ ॐ पवमानः सुवर्जनः पवित्रेण विचर्षणिः ॥ यः पोता स पुनातु मा ॥ १ ॥ पुनन्तु मा देवजनाः पुनन्तु मनवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धियः॥ पुनन्तु विश्व आयवः॥२॥ जातवेदः पवित्रवत्पवित्रेण पुनीहि मा॥ शुक्रेण देव दीद्यदग्ने क्रत्वा क्रतूंरनु॥३॥ यत्ते पवित्रमर्चि
ष्यग्ने विततमन्तरा॥ ब्रह्म तेन पुनीमहे॥४॥ उभाभ्यां देव सवितः पवित्रेण सवेन च॥ इदं ब्रह्म पुनीमहे॥५॥ वैश्वदेवी पुनती देव्यागा
द्यस्यै बह्वीस्तन्वो वीतपृष्ठाः॥ तया मदन्तः सधमाद्येषु वयं स्याम पतयो रयीणाम्॥६॥ वैश्वानरो रश्मिभिर्मा पुनातु वातः प्राणेनेषि
रो मयोभूः॥ द्यावापृथिवी पयसा पयोभिरृतावरी यज्ञिये मा पुनीताम्॥७॥ बृहद्भिः सवितस्त्रिभिर्वर्षिष्ठैर्देवजन्मभिः॥ अग्ने दक्षैः पुनी
हि मा॥८॥ येन देवा अपुनत तेन दिव्येन ब्रह्मणेदं ब्रह्म पुनीमहे॥९॥ यः पावमानीरध्येत्यृषिभिः सम्भृतं रसम्॥ सर्वं स पूतमश्नाति स्वदि
तं मातरिश्वना॥१०॥ पावमानीर्यो अध्येत्यृषिभिः सम्भृतं रसम्॥ तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम्॥११॥ पावमानीः स्वस्त्ययनीः सुदुघा
हि पयस्वतीः॥ ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतं हितम्॥१२॥ पावमानीर्दिशन्तु न इमं लोकमथो अमुम्॥ कामान्त्समर्धयन्तु नो देवीर्देवैः
समाहृताः॥१३॥ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः॥ ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतं हितम्॥१४॥ येन देवाः पवित्रेणात्मानं पु
नते सदा॥ तेन सहस्रधारेण पावमान्यः पुनन्तु मा॥१५॥ प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयम्॥ तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे॥१६
इन्द्रः सुनीती सह मा पुनातु सोमः स्वस्त्या वरुणः समीच्या॥ यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मोर्जयन्त्या पुनातु॥ १७॥ ॥
इति पावमानानुवाकः॥ ततो व्याहृतिभिर्नमस्ते रुद्रेति मन्त्रेण च फलपवहूर्वाः समर्प्य॥ ॐ रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि
शर्म॥ कृशानो अग्निः समिधा समिद्धः॥ स नो दिवा स रिषस्पातु नक्तमिति रक्षोहणं वलगहनमिति मन्त्रेण च॥ प्रतिसरं बध्वा॥ वासमसाछायं जले

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ १४७ ॥

धिवासयेत् ॥ ॐ भवतेहेडो वरुणनमोभिरवयज्ञेभिरीमहे हविर्भिः ॥ क्षयन्नस्मभ्यमसुरप्रचेताराजन्नेनांसि शिश्रथः कृतानि ॥ १ ॥ उदुत्तमं वरुणपाशमस्मद॰
स्याम ॥ २ ॥ इति मन्त्राभ्याम् ॥ ॥ इति जलाधिवासनम् ॥ ॥ ततो देवम् ॥ प्रणाम्य ॥ ॐ स्वागतं देवदेवेश विश्वरूप नमोस्तु ते ॥ शुद्धेपि त्वदधि॰
ष्ठाने शुद्धिं कुर्मः सहस्व नाम् ॥ इति सम्प्रार्थ्य ॥ ॐ उत्तिष्ठब्रह्मणस्पते देवयन्त इति सञ्जनिगावार्ष्येदुत्थाप्य ॥ अग्निः सप्तिमिति सूक्तमग्निपदही
नं पठित्वा ॥ नस्तहिनस्तुनः पठेत् ॥ अग्निः सप्तिमिति सूक्तं यथा ॥ ॐ अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठाम् ॥ अग्निरोदसी विचरत्स॰
मञ्जन्नग्निर्नारीं वीरकुक्षिम् ॥ १ ॥ अग्नेरप्नसः समिदस्तु भद्राग्निर्मही रोदसी आ विवेश ॥ अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि ॥
२ ॥ अग्निर्हत्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथम् ॥ अग्निरत्रिं घर्मउरुष्यदन्तरग्निर्नृमेधं प्रजयासृजत्सम् ॥ ३ ॥ अग्निर्दाद्द्रविणं वीरपे
शा अग्निरृषिं यः सहस्रा सनोति ॥ अग्निर्दिवि हव्यमाततानाग्नेर्धामानि विभृता पुरुत्रा ॥ ४ ॥ अग्निमुक्थैरृषयो विह्वयन्तेऽग्निं नरो यामनि बा॰
धितासः ॥ अग्निं वयो अन्तरिक्षे पतन्तोऽग्निः सहस्रा परियाति गोनाम् ॥ ५ ॥ अग्निं विश ईलते मानुषीर्या अग्निं मनुषो नहुषो विजाताः ॥ अग्निर्गा॰
न्धर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता ॥ ६ ॥ अग्नये ब्रह्म ऋभवस्ततक्षुरग्निं महामवोचामा सुवृक्तिम् ॥ अग्ने प्राव जरितारं यविष्ठाग्ने म॰
हि द्रविणमा यजस्व ॥ ७ ॥ इत्यग्निः सप्तिमिति सूक्तं पठन् अष्टाविंशतिधा जलेन संस्नाप्य ॥ मृदा जलेन च प्रक्षाल्य ॥ यपः पृथिव्यामावो राज्ञा नमि॰
निपञ्चगव्येन ॥ आप्यायस्व दधिक्राव्णः तेजोसि मधुवाता आयङ्गौरिति पञ्चामृतैः संस्नाप्य ॥ नमस्त इत्येभिः शुद्धोदकेन संस्नाप्य ॥ घृतेनाभ्य॰
ज्य ॥ उद्वर्तनेनोद्वर्त्य ॥ उष्णोदकेन प्रक्षाल्य ॥ चन्दनेनानुलिप्य ॥ सपल्लवैश्चतुर्भिः कुम्भैः आपो हिष्ठा १ यो वः २ तस्मा अरम ३ आकलशेषु ४ इति मं

147
॥ रत्नः ॥
॥ १४७ ॥

४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैः प्रत्येकम् ॥ समुद्रज्येष्ठासलिलस्य मध्यात्स्नानानायमिस्मादिव्यनुर्भिः आकलशे क्षिप्ति वद्गुग्गपत्सं स्नाप्य ॥ औडुम्बरादि पीठे लिङ्गादिपीठमुपवे
श्य ॥ परितो दिक्षु स जलकुम्भान्संस्थाप्य तिषु तत्तन्मन्त्रेण गन्धपुष्पदूर्वादिसाधारणाद्व्याणि क्षिप्त्वा ॥ आद्ये सप्तमृदः द्वितीये पञ्चकर्पसं शमी
विकङ्कतास्यमन्तकन्ववतस पल्लवांश्च ॥ तृतीयादिषु समस्तधान्यपञ्चरत्नफलपुष्पाणि कुशदूर्वागोरोचना सर्वौषधीश्च क्षिप्त्वा क्रमेण तज्जलेन देवम
भिषिञ्चेत् ॥ तत्र मन्त्राः ॥ आपो हि ष्ठेति त्र्यृचः ॥ हिरण्यवर्णा इति चतस्रः ॥ पवमानानुवाकः ॥ एतैर्मन्त्रैरभिषिच्य ॥ ततएकस्मिन्कलशे शमीपलाशवट
खदिरबिल्वाश्वत्थविकङ्कतपनसाम्रशिरीषोदुम्बराणां पल्लवान्कषायांश्च क्षिप्त्वा ॥ अश्वत्थे व इति मन्त्रेणाभिषिच्य ॥ हिरण्यवर्णा इति पञ्चरत्नोद
केन संस्नाप्य ॥ सहस्र १००० शत १०० कलशैः पञ्चामृतैश्च स्नानं कारयेत् ॥ ततो वाससी दत्वा ॥ उपवीतादिदक्षीयाजं कृत्वा ॥ हिरण्यगर्भः सम १ यः आ
त्मदा २ यः प्राणतः ३ यस्येमे ४ येन द्यौ ५ यङ्क्रन्दसी ६ आपो ह यत् ७ यश्चिदापः ८ इति मन्त्रैरष्टभिः पिष्टदीपैर्नीराजनं विधाय ॥ सुवर्णशलाकया
गन्धेन ॥ ॐ नमो भगवते रुद्राय हिरण्यरेतसे परायपरमात्मने विश्वरूपाय योमाप्रियाय नमः ॥ इति दक्षिणाक्ष्णो देवस्य नेत्रे अञ्जयेत् ॥ ततआ
दर्शप्रदर्श ॥ भक्ष्यादिप्रदर्शयेत् ॥ ततः प्रसृचमादौ ब्रह्मणावंवदन् रुद्रसूक्तेन स्तुत्वा ॥ विष्णोः ऋषभसूक्तेन ॥ गणेशे गणेशसूक्तेन ॥ शक्तिविषये
जातवेदसे इत्यादिदुर्गासूक्तेन ॥ सूर्ये उदुत्यमित्यादिमन्त्रैः सर्वविषये नमस्त इत्यादिरुद्रसूक्तेनेति केचित् ॥ ततो वंशपात्रस्थपञ्चवर्णौदनेन देव
स्य नीराजनं कृत्वा रुद्राय चतुष्पथादौ दद्यात् ॥ तत्र मन्त्रः ॥ ॐ नमो भगवते रुद्राय सर्वभूताधिपतये दीप्तशूलधराय उमादयिताय विश्वाधिपतये
रुद्राय वै नमो नमः ॥ शिवमगर्हितं कर्मास्तु स्वाहा अश्वत्थमूलपर्णाभ्यो नमः इति ॥ ततः सर्वतोभद्रमण्डलं लिङ्गतोभद्रमण्डलं वा विरच्य ॥ मण्डले दे

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ १४८ ॥

हरेत् । तडागमध्ये उ पांकुं च निधाय स्वस्ति वाचयेत् ॥ सौवर्णादीनि रौप्याणि विप्रेभ्यः प्रतिपादयेत् ॥ इति ॥ अथ भविष्योत्त

रत्न
१६५

रशौनकपरिशिष्टाद्यनुसारेण वापीकूपोत्सर्गप्रयोगः ॥ कर्त्ता दिगयनादौ पूर्वेद्युरुपवासं कृत्वा ॥ परेद्युः अद्येत्यादिदेशका
लौ स्मृत्वा ० मम रुद्रालयगमना ऽनेककल्पव्यापि स्वर्गवासपरार्द्धद्वयव्यापि महस्तपः प्रभृति लोकाऽऽनाभोगपूर्वकविष्णु
पदप्राप्त्यर्थं ॥ शौनकमतेन धनवंशशांतिपुष्ट्यायुष्यधर्मवृद्धिमहापातकनाशार्थं कूपोत्सर्गं करिष्ये ॥ इति संकल्प्य ॥ गणे
शपूजा स्वस्तिवाचन मातृपूजन नान्दीमुख श्राद्धानि कृत्वा ऽऽचार्यं वृणुयात् ॥ तुलादानवन्मण्डपप्रतिष्ठां वा कुर्यात् ॥ यद्व
त्र संस्थितं निमित्तं शर्षपान्विकीर्यापोहिष्ठेति ऋचा वेनशुचीवद्रितिवत वसंप्रोक्ष्य ऽ सूर्यदिक्कुदिक्पालानां संपूज्याग्निं प्रतिष्ठाप्येशा
न्यां वेद्यां सूर्यादिनवग्रहानीश्वराद्यधिदेवान् अग्न्यादिप्रत्यधिदेवान् विनायकादिपंचदेवताः संस्थाप्य ॥ वरुणं दिक्षु अष्टदले
षु पद्मेषु ॥ महावेदिर्न्याये उत्तरः कुंभान् संस्थाप्य ॥ तेषु गोरोचनापंचरत्नाष्टमृत्सर्वौषध्यादिनिक्षिप्य तेषु तीर्थान्यावाह्य
तेषु ॥ इदं विष्णुरिति ॥ नमस्ते विश्वरूपाय नमो विष्णो अपांपते ॥ सान्निध्यं कुरु देवेश समुद्रादिह संत्यवेति वविष्णुमावाह्य ॥ वा
पुन्मर्गं त्वन्यस्मिन् कुंभे वरुणस्य समुद्राद्दूर्मिरिति वरुणं समुद्रानपि संपूज्य ॥ वेद्यां लोकपालान् रुद्रं तु सारांगा विष्णु वा वाह्य ॥
गणानां त्वेति गणेशम् ॥ गंधद्वारामिति कमलान् ॥ ॐ जातवेदसे इत्यग्निकाम् ॥ ॐ न आयजेनेति भूतानि ॥ ॐ विश्वकर्मन्ह
विषेति विश्वकर्माणं वाह्य ॥ सौवर्णं कूर्मं राजतमत्स्यताम्रमयमंडूकताम्रमयकुलीरलोहशिशुमारान् नेकतीर्थवारि एव
रत्नयुतां ताम्रपात्रीं मिमस्मे वरुणेति मंत्रेण मंडलमध्ये संस्थाप्य ॥ शौनकमतेन कुंभे सौवर्णमत्स्यादीन् संस्थाप्य संपूज्य व

164
राम
१६४

CC-0. In Public Domain. Digitization by eGangotri

लिंदत्वा ॥ त्रैलोक्ये यानि भूतानि त्यादिजलाशयोत्सर्गोक्तदेवानां पूजां कृत्वा वलिं दत्वा ॥ ततः पूर्वे पदत्रयं हित्वा ३ वटं खात्वा त
त्राक्षतान् दर्भाश्च निक्षिप्य यज्ञियक्षीरवृक्षभवं यजमानमात्रं वा ३ हस्ता ३ स्थि सुक्ष्मि वर्त्तुलं यूपं प्रोक्ष्या ३ वटे निखाय हरिद्रा तैला
भ्यक्तमभिषिंच्य सर्षपगोलोचनागरुगुग्गुलुदूर्वानिवपत्राणां पोटलिकां वध्वा ॥ ॐ युवा सुवासा इति वाससाछाद्य ॥ तत्र लोक
पालान्सं पूज्य ध्रुवासीति ध्रुवसूक्तं पठेत् ॥ ततो यवमयं वरुं ज्ञात्वा निर्वपादिना कृत्वा ३ ३ ज्यभागान्ते ग्रहादिहोमं कृत्वा ॥ व्य
स्तसमस्तव्याहृतिभिश्च तत्त्वः समुद्रज्येष्ठेति प्रत्यृचं वा ज्याहुतीर्हुत्वा उत्तमाभिस्तत्वायामीति पंचभिस्त्वन्नो अग्न इति द्वाभ्या
मिमम्मेवरुणेति चैकादशमंत्राणां तवाहुत्यो ३ उदुम्बरसमिदाज्यवरुणामुत्येकमष्टोत्तरशतं हुत्वा शौनकमतेतुः पयोद
ध्याज्यैरापो हिष्ठेति तवभिरापो अस्मानिति पंचभिः समुद्राद्भूर्मिरिति च्यवेनाज्यं हुत्वा ॥ प्रमुवआप इति नवर्चेन प्रत्यृचं वं वरुः
ण्मायसं वहुत्वा ॥ वयो यत्वध्वभिरिति सूक्तेन लाजान् हुत्वा ॥ तहि तेक्षत्रमिति द्वात्रिंशदृच्येन हुत्वा ॥ प्रसम्राजे इति वरुं प्रत्यृचं
वंजुहुयात् ॥ एवं चतुर्दिक्षु होमः ॥ तडागेप्येवम् ॥ एवं वरुणाय हुत्वा ॥ होमकाले नदिम्नमित्यादि वारुणाजपं च कारयि
त्वा ॥ स्विष्टकृदादि प्रायश्चित्तहोमान्ते दिक्पालादिभ्यो वलिदानं कृत्वा ॥ ॐ मूर्द्धानन्दिव इति पूर्णाहुतिं हुत्वा ॥ पूर्णापात्रं दत्वा
पवित्रमिमोकान्ते स्वर्णाश्रृंगांच्य लंकृतां गां सपुज्य ॥ यजमानः सकुटुम्बः पुच्छेन्वारब्धः ॐ इरावती धेनुमतीत्यस्य वसिष्ट
ऋषिस्त्रिष्टुप्छंदो गौर्देवता गोंभ्रामणे विनियोगः ॥ इत्यनेन मंत्रेण कूपस्योपरि भ्रामयेत् ॥ इदं सलिलं पवित्रं कुरुष्व शुद्धाः पू

Nepal Sanskrit University, Balmeeki Campus

रत्न पूता अमृताः सन्तु नित्यं ॥ मां तारयन्ती कुरुतीर्थाभिषेकं लोकाश्च शोकं नरने तीर्यते चेत्यनुमंत्र्य ॥ ॐ समुद्रादूर्म्मिः ॥ ॐ यवामी
१६५ रोचने इति मंत्रौ पठित्वा ॥ ईशान्यां गोपुच्छेन वापीकूपोदकेन ब्रह्मादिदेवानां मरीच्याद्यृषीणां कव्यवाडनलादिदिव्यपि
तॄणां च तर्पणं कृत्वा ॥ पूर्वोक्तपौराणमंत्रैश्च तर्पणं कृत्वा ॥ आपो अस्मान्स्तपवासाङ्गगवतीनीशान्यामुत्थाप्य ॥ यदिहि
कुर्यात्त्रिकृत्वावतीत्यनुमंत्र्य ॥ दधिदूर्वागंधैः सपुष्पैः ॥ वसूनां रुद्राणामसि त्वमिति जलाशयप्रयोगोक्तैः पंचभिः संप्रार्थ्य ॥
तां गामाचार्याय दद्यात् ॥ ततः स्विष्टकृता सूत्रेणावामसाव कूपं वेष्टयेत् ॥ ततो विचित्रपताकाष्टकयुतं कृत्वा ताम्रपात्रीमादा
य ॥ शौनकमतेन तु जलकुंभमादाय ॥ ॐ मित्रं शान्त्वऽभिभूतानां धनदो धनकांक्षिणाम् ॥ वैद्यो रोगाभिभूतानां शरणः शर
णार्थिनाम् ॥ इति पुनर्मामैन्द्रियमिति ॰ आपो हिष्ठेति त्र्यचेन च ॥ अगाधे जले तां ताम्रपात्रीं मुद्रीं कृत्वा न दस्तूनि जले क्षि
प्त्वा पात्रीमादध्यात् ॥ ततः कर्त्ता देशकालौ स्मृत्वा ॥ सर्वपापक्षयपूर्वकेत्यादि पूर्वोक्तफलमुक्त्वा अमुं कूपादिजलाशयं वरु
णादेवतं स्नानपानावगाहनाद्यर्थं सर्वभूतेभ्यो ह्युत्सृजे न मम इत्युक्त्वा पठेत् ॥ ॐ सर्वभूतेभ्य उत्सृष्टं मयैतज्जलमूर्जितम् ॥ 165
रमन्तु सर्वभूतानि स्नानपानावगाहनैः ॥ सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलम् ॥ रमन्तु सर्वभूतानि स्नानपानावगाहनैः ॥ सोपा रत्न
नाम्पतितः खातात् जले चैव निमज्जनात् ॥ मरणे वास्थिभङ्गे वा कर्त्ता दोषैर्न लिप्यते ॥ ततः कुरुक्षेत्रं गयां गङ्गां इत्याद्यैस्तीर्था १६५
न्यावाह्य जलमातः सम्मृज्य आपो हिष्ठेति सूक्तेन दुग्धेन जलाशयं त्रिः प्रदक्षिणीकृत्य शेषं विप्राय प्रतिपादयेत् ॥ इदं कृताकृत

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ ततआचार्यादीन्संपूज्य दक्षिणां समर्प्य दत्वा ग्रहादीनामुत्तराङ्गपूजां कृत्वा विसर्जयेत् ततः शतं तदर्धं विंशतिर्वा ब्राह्मणा
न्भोजयित्वा ॥ कायेन वाचेति कर्मेश्वरार्पणं कृत्वा ॥ सुहृद्युतो भुञ्जीतेति ॥ ॥ इति श्रीमहाराजाधिराजगीर्वाणयुद्धविक्र
मसाहदेवकृतनप्रयोगरत्नमालायां वापीकूपोत्सर्गविधिरन्तम् ॥ ॥ अथ श्राद्धप्रकरणम् ॥ तत्र पार्वणश्राद्धविधिः ॥ तत्र
प्रथमम्ब्राह्मणानान्निमन्त्रणम् ॥ गोमयोपलिप्तेप्राङ्गणादौ यज्ञोपवीत्यपूर्वाभिमुखो भूत्वा सव्यनावम्य विश्वेदेवब्राह्मणं प्र
थमं निमन्त्रयेत् ॥ ताम्बूलादिकं विप्रहस्ते दत्वा स्वदक्षिणजान्वपानयित्वा अधोमुखेन स्वदक्षिणकरेण सताम्बूलादिकमुत्ता
नं विप्रहस्तं गृहीत्वा स्ववामहस्तेन विप्रदक्षिणजानु स्पृष्ट्वा ॥ ॐ अद्येत्यादि अमुकगोत्राणामस्मत्पितृपितामहप्रपितामह
हानाममुकामुकामुकशर्मणां श्राद्धसंबंधिनां विश्वेषां देवानां पुरूरवार्द्रवोनाम्नामवश्यकर्त्तव्यमहालयापरपक्षान्तर्गतपा
र्वणश्राद्धे अनेन ताम्बूलतुलसीदलगन्धपुष्पाक्षतेन त्वम्मया निमन्त्रितः ॥ ॐ निमन्त्रितोस्मीति प्रतिवचनम् ॥ पुनस्तत्सर्वं
पूर्ववद्विधाय ॥ ॐ अद्येत्यादि अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां श्राद्धसं
बंधिनां विश्वेषां देवानां पुरूरवोमाद्रवसनाम्नामवश्यकर्त्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलतुलसीद
लगंधपुष्पाक्षतेन त्वम्मया निमन्त्रितः ॥ ॐ निमन्त्रितोस्मीति प्रतिवचनम् ॥ ततोऽपसव्यं कृत्वा ताम्बूलादिकं विप्रहस्ते दत्वा
दक्षिणाभिमुखो भूत्वा पितृब्राह्मणस्य वामजानु स्पृष्ट्वा स्ववामजान्वपानयित्वा अधोमुखेन दक्षिणकरेण ताम्बूलादिसहितमु

Nepal Sanskrit University, Balmeeki Campus

राम
१६६

न्नानं विप्रकरं गृहीत्वा निमंत्रयेत् ॥ ॐ अद्येत्यादि० अमुकगोत्राणाममस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्म
णां वसुरुद्रादित्यस्वरूपाणां मद्यकर्त्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे ऽनेनानेन तुलसीदलगंधपुष्पाक्षतै
नत्वं मयानिमंत्रितः ॥ ॐ निमंत्रितोऽस्मीति प्रतिवचनम् ॥ एवमन्यथैव कृत्वा ॥ ॐ अद्येत्यादि० अमुकगोत्राणाममस्मन्मा
तामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणाममद्यकर्त्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे ऽनेनानेन तु
लसीदलगंधपुष्पाक्षतैनत्वं मयानिमंत्रितः ॥ ॐ निमंत्रितोस्मीति प्रतिवचनम् ॥ ॐ अक्रोधनैः शौचपरैः सततं ब्र
ह्मवादिभिः भवितव्यम्भवद्भिश्च मया च श्राद्धकारिणा ॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ॥ भवितव्यम्भवद्भिर्नो
यतनेन श्राद्धकर्मणि ॥ ॐ भवितव्यमिति प्रतिवचनम् ॥ ततः सव्येन विश्वदेवब्राह्मणायोश्वरणां प्रक्षालयेत् ॥ ॐ
नमोस्त्वनंताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ इति ॥ पाद्यपात्रं वामहस्ते कृत्वा ॥ श
न्नो देवीरिति मंत्रं पठित्वा ॥ ॐ अद्यामुकगोत्राणाममस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां श्राद्धसंबंधि
नो विश्वेदेवाः पुरूरवार्द्रवनामानो ऽद्यकर्त्तव्यमहालयापरपक्षांतर्गतपार्वणश्राद्धे एष पादार्घो वः स्वाहा ॥ ॐ अद्यामुक
गोत्राणाममस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां श्राद्धसंबंधिनो विश्वेदेवाः पुरूरवार्द्रव

166
राम
१६६

CC-0. In Public Domain. Digitization by eGangotri

नामानोद्य कर्त्तव्य महालयापरपक्षांतर्गतपार्वणश्राद्धे एष पादार्घो वः स्वाहा ॥ ततो ऽपसव्येन पितृब्राह्मणाचरणप्रक्षालनम्
ॐ नमोस्त्वनन्तायेत्यादि ॥ यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठपुष्करे ॥ तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ॥ इति पठित्वा ॥ श
न्नोदेवीरिति मंत्राते ॥ ॐ अद्यामुकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्य
स्वरूपा अद्य कर्त्तव्य महालयापरपक्षांतर्गतपार्वणश्राद्धे एष पादार्घस्ते धाविभज्यमुख्यमर्पं स्वधा ॥ ॐ अद्यामुकगोत्रा अस्मन्मा
तामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा अद्य कर्त्तव्य महालयापरप
क्षांतर्गतपार्वणश्राद्धे एष पादार्घस्ते धाविभज्यमुख्यमर्पं स्वधा ॥ ततः सव्येनाचम्य गृहं प्रवेशयेत् ॥ सव्येनैव ॥ ॐ आगतास्थ
म् ॥ ॐ सुस्वागतावयम् ॥ ॐ इदं मासनमास्यताम् ॥ ॐ आस्य इति प्रतिवचनम् ॥ ॐ भूर्भुवः स्वरिति मंत्रेण विश्वेदेवब्राह्मणौ
पूर्वाभिमुखावुपवेशयेत् ॥ ततोऽपसव्येन ॥ ॐ आगतास्थयम् ॥ ॐ सुस्वागतावयम् ॥ ॐ इदमासनमास्यताम् ॥ ॐ आस्य इति
प्रतिवचनम् ॥ ॐ भूर्भुवः स्वरिति मंत्रेण पितृब्राह्मणावुदङ्मुखावुपवेशयेत् ॥ सर्वत्र प्रश्ने पंक्तिमूर्द्धन्यं पृच्छेत् ॥ प्रश्ने
षु पंक्तिमूर्द्धन्यं पृच्छति सर्वान्वेति परिपृष्टाः ततः सर्वान्वा पृच्छेत् ॥ ततः सव्येन ॰ ॐ कर्मपात्रमहं करिष्ये ॥ ॐ कुरुष्वेत्यनुज्ञा
तः सन् ॥ ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ १ ॥ यदि दिवा यदि नक्तमे
ना ७ सि चकृमा वयम् ॥ वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ २ ॥ यदि जाग्रद्यदि स्वप्न एना ७ सि चकृमा वयम् ॥ सू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न १६७ यो मातस्मादेतत्सोविष्वाम्बुवत्वः ॐ हंसः ॥ २ ॥ ततः पवित्रे स्थ इति पवित्रम् ॥ गंधद्वारामिति वन्दनम् ॥ श्रीश्च त इति पुष्प
म् ॥ यवोसीति यवान् ॥ इति मंत्रत्रयेणादेव कर्मपात्रं कर्त्तव्यम् ॥ अपसव्यं कृत्वापि तु ब्राह्मणानां स्वधा ऽनेनैव मंत्रत्रयेणापि
तु कर्मपात्रं कर्त्तव्यम् ॥ सव्येन कुशत्रयेण सहितं कर्मपात्रोदकमादाय ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ य
ः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ पुण्डरीकाक्ष पातु ॥ इत्यनेन श्राद्धदेशद्रव्याण्यात्मानं च सिंचयेत् ॥ ॐ मद्येत्या
दि · अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकामुकशर्मणां तथा ० अमुकगोत्राणाम् अस्मन्मातामह
प्रमातामहवृद्धप्रमातामहानाम् अमुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां वैश्वदेवपूर्वकाणां मया
कर्त्तव्य महालयापरपक्षान्तर्गतपार्वणश्राद्धमेभिर्द्रव्यैरहं करिष्ये ॥ इति प्रतिज्ञां कुर्यात् ॥ ततः ॥ ॐ देवताभ्यः पितृभ्य
श्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः पठित्वा ॥ ॐ सप्तव्याधा दशार्णेषु मृगाः का
लंजरे गिरौ ॥ चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥ तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ॥ प्रस्थिता दूरमध्वानं 167
यूयं किमवसीदथ ॥ ॐ श्राद्धारंभे गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ॥ ताभ्यां चैव नमस्कारं ततः श्राद्धं समारभेत् ॥ ॐ ग राम
यायै नमः ॥ ॐ गदाधराय नमः ॥ इति पठेत् ॥ ततो ऽपसव्येन दिग्बंधनं कुर्यात् ॥ तिलसहितमोदकमादाय · तिलान्पूर्वादि १६७
क्रमेण वक्ष्यमाणमंत्रैर्विकिरेत् ॥ ॐ मग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ॥ अपहता असुरा रक्षांसि वेदिषदः ॐ

CC-0. In Public Domain. Digitization by eGangotri

नथावर्हिषदः पान्तुयाम्यां येपि नरः स्थिताः॥ अपहताअसुरारक्षाꣳसिवेदिषदः॥ ॐ प्रतीचीमाज्यपास्तथा॥ अपहताअसु
रारक्षाꣳसिवेदिषदः॥ ॐ उदिचीमपिसोमपाः॥ अपहताअसुरारक्षाꣳसिवेदिषदः ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुर
दोषतः॥ सर्वतश्चाधिपस्तेषांयमोरक्षांकरोतुमे॥ इतिनीवीवंधनम्॥ नांदीमुखे॥ शुभिरस्तुभिरितिनीवीमंत्रः॥ ततः कु
शांस्तिलांश्चादायदक्षिणतः क्षिपेत्॥ तत्रमंत्रः॥ प्रयांतुहरतः सर्वे दैतेया दानवास्तथा॥ सर्वविघ्नोपशांत्यर्थंक्षिपामिव
कुशांस्तिलान्॥ इतिदिग्बंधः॥ ततः सव्येनविष्णुस्मरणम्॥ अथासनम्॥ कुशादिकमादाय॥ ॐ अद्यामुकगोत्राणाम
स्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणांश्राद्धसंबंधिनांविश्वेषांदेवानांपुरूरवार्द्रवनाम्नामिदंकौश
रूपमासनं वः स्वाहा॥ पुनः कुशादिकमादाय॥ ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम
मुकामुकामुकशर्मणांश्राद्धसंबंधिनांविश्वेषांदेवानांपुरूरवार्द्रवनाम्नामिदंकौशरूपमासनं वः स्वाहा॥ इतिविश्वेभ्यो
देवेभ्यः कुशरूपमासनन्दद्यात्॥ ततोऽपसव्येनमोटकादिकमादाय॥ ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपिता
महानाममुकामुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणामिदम्मोटकरूपमासनंत्रेधाविभज्ययुष्मभ्यंस्वधा॥
पुनर्मोटकमादाय ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणांसपत्नी
कानांवसुरुद्रादित्यस्वरूपाणामिदम्मोटकरूपमासनंत्रेधाविभज्ययुष्मभ्यंस्वधा॥ इतिपितृब्राह्मणासनम्॥ ततः स

Nepal Sanskrit University, Balmeeki Campus

रत्न १६८

सव्येनांजलिं बध्वा विश्वान्देवानावाहयेत् ॥ ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्म
णां तथामुकगोत्राणामस्मन्मातामहप्रमातामह‍वृद्धप्रमातामहानाममुकामुकामुकशर्मणां श्राद्धसंबंधिनो विश्वान्दे
वान् पुरूरवोर्द्रवसंज्ञकान् आवाहयिष्ये ॥ ॐ आवाहयेति प्रतिवचनम् ॥ ॐ विश्वेदेवास आगत शृणुता म इमं हवम् ॥ ए
दं बर्हिर्निषीदत ॥ यवोसि यवयास्मद्द्वेषो यवयारातीरिति मंत्रेण श्राद्धदेशे यवान्विकीर्य ॥ ॐ विश्वेदेवाः शृणुतेमं
हवं मे ये अन्तरिक्षे य उपद्यविष्ठ ॥ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वमिति पठित्वा ॐ आगच्छंतु महा
भागा विश्वेदेवा महाबलाः ॥ ये यत्र विहिताः श्राद्धे सावधाना भवंतु मे ॥ इति च पठेत् ॥ ततोऽपसव्येनांजलिं बध्वा पितॄनावा
हयेत् ॥ ॐ अद्यामुकगोत्रानस्मत्पितृपितामहप्रपितामहानमुकामुकामुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपान् ॥ त
थाऽमुकगोत्रानस्मन्मातामहप्रमातामहवृद्धप्रमातामहानमुकामुकामुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपान्पि
तॄनावाहयिष्ये ॥ ॐ आवाहयेति प्रतिवचनम् ॥ ॐ उशंतस्त्वा निधीमह्युशंतः समिधीमहि ॥ उशन्नुशत आवह पितॄन्हह
विषे अत्तवे ॥ इति मंत्रेणावाह्य ॥ ॐ अपहता असुरा रक्षांसि वेदिषद इति मंत्रेण श्राद्धदेशे तिलान्विकीर्य ॥ ॐ आयंतु
नः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञे स्वधया मदंतोधिब्रुवंतु तेवन्त्वस्मान् ॥ इति मंत्रं पठेत् ॥ त
तः सव्येन वैश्वदेवब्राह्मणान्पृच्छेत् ॐ हस्तार्घपात्रे महं करिष्ये ॥ कुरुष्वेत्यनुज्ञातः सन् ॥ पत्रद्वयमयेकृत्वा ॥ ॐ पवित्रेस्थो वै

168 रत्न १६८

स्मवोऽस्मविजुर्वः प्रसवः उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः इति मंत्रेण पूर्वाग्रे पवित्रे धारयेत् पुटकद्वये ॥ ॐ सन्नोदे
वीरभिष्टय आपो भवंतु पीतये ॥ शंयोरभिस्रवंतु नः । इति मंत्रेण पुटकद्वये जलं क्षिपेत् । यवोऽसि यवयास्मद्वेषो यवयारा
तीरिति मंत्रेण यवान् विकीर्य ॥ ॐ श्रीश्चत इति मंत्रेण पुष्पाणि क्षिपेत् । गंधद्वारामिति गंधम् ॥ तुलसीदलं क्षिपेत् ॥ ॐ ह
स्तार्घपात्रसम्पन्नमिति विश्वेदेवब्राह्मणं पृच्छेत् ॥ ॐ सुसम्पन्नमिति तेनोक्ते ॥ ॐ हस्तार्घपात्रमुत्थापयामि ॥ ॐ हस्तार्घपात्र
मुत्थापयामि ॥ ॐ उत्थापयेत्येति प्रति वचनानंतरम् ० हस्तार्घपात्रमुत्थापयामि वामहस्ते कृत्वा ० पुष्पसहितेन पवित्रेण गृ
हीत्वा ॥ ॐ नमो नारायणायेति मंत्रेण विप्रकरे पुष्पसहितं पवित्रं पूर्वाग्रं धृत्वा ॥ दक्षिणाकरेण वामकरस्थं पुटकमुखं
पिधाय ॥ ॐ यादिव्या आपः पयसा संबभूवुर्या आंतरीक्षा उत पार्थिवीर्या । हिरण्यवर्णा यज्ञियास्तानआपः शिवाः सं
स्योनाः सुहवा भवंतु ॥ इति मंत्रेणार्घस्थजलमभिमंत्र्य ॥ ततः कुशादिकमादाय । ॐ अद्यामुकगोत्राणां मम्मत्पितृपितामह
प्रपितामहानाममुकामुकामुकशर्मणां श्राद्धसंबंधिनो विश्वेदेवाः पुरूरवार्द्रवनामानः एष हस्तार्घो वः स्वाहा ॥ इ वैश्वदेवब्राह्म
णकरे अर्घं दद्यात् ॥ अर्घप्रत्यर्घमस्तु ॥ तदर्घपात्रं भूमौ धृत्वा ॥ अपरार्घपात्रं वामहस्ते कृत्वा सर्वं पूर्ववदन्यविश्वेदेवब्राह्मणक
रे विधाय ॥ ~~अस्यादीनामत्र~~ ॥ ॐ अद्यामुकगोत्राणां मम्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां श्राद्ध
संबंधिनो विश्वेदेवाः पुरूरवार्द्रवनामानः एष हस्तार्घो वः स्वाहा ॥ इति विश्वेदेवब्राह्मणकरे अर्घं दद्यात् ॥ अर्घप्रत्यर्घमस्तु ॥ अ

रत्न र्घपात्रद्वयस्थजलेन तच्चक्षुरिति मंत्रेण चक्षुःस्पर्शः ॥ तदनंतरं पवित्रसहिते अर्घपात्रे स्वल्पविश्वदेवदक्षिणपार्श्वे ॥ ॐ विश्वे
१६९ भ्यो देवेभ्यः स्थानमसीति वाक्येन देवार्घपात्रे उत्ताने रूपवस्थापयेत् ॥ ततोऽपसव्येन हस्तार्घपात्राण्यहं करिष्ये ॥ इति पितृब्राह्म
णं पृच्छेत् ॥ ॐ कुरुष्वेत्यनुज्ञातः स नृपिच्चादिमातामहाद्यर्थं स्वाग्रे एकैकं पृथक्कं संस्थाप्य तेषु पृथक्कैकं पवित्रेस्य इति पवित्राणि धा
रयेत् ॥ ॐ शन्नो देवीरिति जलम् ॥ तिलोसीति तिलान् ॥ गंधद्वारामिति गंधम् ॥ श्रीश्च त इति पुष्पम् ॥ क्षिपेत् ॥ ततः ह
स्तार्घपात्राणि संपन्नानि इति पितृब्राह्मणं पृच्छेत् ॥ ॐ हस्तार्घपात्राणि सुसम्पन्नानि इत्युक्ते ॥ ॐ हस्तार्घपात्रमुत्थापया
मि ॥ ॐ उत्थापयस्वेति प्रतिवचनानन्तरं प्रथमं पित्रर्घपात्रं वामहस्ते कृत्वा ॥ ॐ नमो नारायणाय इति मंत्रेण विप्रकरेण
ष्यसहितं पवित्रमन्तराग्रे धृत्वा वामकरस्थहस्तार्घपात्रं मुखं दक्षिणकरेण विधाय ॥ ॐ या दिव्या इति मंत्रेणार्घपात्रस्थज
लमभिमंत्र्य मोटकादिकमादाय ॥ ॐ अद्यामुकगोत्र अस्मत्पितर अमुकशर्मन् सपत्नीक वसुस्वरूप एष हस्तार्घस्ते स्वधा ॥ इति
ब्राह्मणकरेऽर्घं कुर्यात् ॥ अर्घप्रत्यर्घमस्तु ॥ एवं क्रमेण पितामहादिभ्यो दद्यात् ॥ ततः प्रपितामहार्घपात्रस्थजलादिकं 169
पितामहार्घपात्रे कृत्वा तत्सर्वं पित्रर्घपात्रे कृत्वा ० ॥ पित्रर्घपात्रमुत्तानं पितामहपात्रोपरि धृत्वा तदुभयं पात्रमुत्तानं प्र राम
पितामहार्घपात्रोपरि धृत्वा ॥ एवं क्रमेण मातामहार्घपात्राणि कर्त्तव्यानि ॥ सव्यं कृत्वा ॥ तत्रस्थजलेन ॥ ॐ तच्चक्षुरिति चक्षु १६९
स्पर्शः ॥ ततोऽपसव्येन ॥ एकत्र कृतं पित्रर्घपात्रं गृहीत्वा पितृद्विजस्यासनवामभागे ॥ ॐ पितृभ्यः स्थानमसीति न्युब्जं कुर्या

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न॥ नतु परिकुशत्रयं दद्यात्॥ एवमेकचक्रं मातामहार्घपात्रं गृहीत्वा मातामहद्विजस्यासनवामभागे॥ ॐ मातामहेभ्यः स्थान
मसीति मन्त्रं कृत्वा न तु परिकुशत्रयं दद्यात्॥ ततः सव्येन॥ ॐ अर्चयिष्ये इति विश्वेदेवब्राह्मणौ पृच्छेत्॥ ॐ अर्चयेत्युक्ते॥ गंधपुष्पा
क्षतताम्बूलयज्ञोपवीतवस्त्रादिभिः समभ्यर्च्य धूपदीपौ च कारयेत्॥ कुशादिकमादाय॥ ॐ अद्यामुकगोत्राणामस्मत्पितृपितामह
हप्रपितामहानाममुकामुकामुकशर्मणां श्राद्धसंबंधिनो विश्वेदेवाः पुरुरवार्द्रवनामा एतान्यर्चनानि अत्र गंधपुष्पधूपदीप
क्षतताम्बूलयज्ञोपवीतवासांसि वः स्वाहा॥ इत्युत्सृजेत्॥ पुनः कुशादिकमादाय॥ ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमा
तामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां श्राद्धसंबंधिनो विश्वेदेवाः पुरुरवार्द्रवनामान एतानि अर्चनानि गंधपुष्पा
क्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतवासांसि वः स्वाहा० इत्युत्सृजेत्॥ ततो ऽपसव्येन॥ ॐ अर्चयिष्ये इति पितृब्राह्मणौ पृ
च्छेत्॥ ॐ अर्चयेत्युक्ते गंधपुष्पाक्षतैरभ्यर्च्य धूपदीपौ च कारयेत्॥ मोटकादिकमादाय॥ ॐ अद्यामुकगोत्रा अस्मत्पितृपिता
महप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा एतान्यर्चनानि गंधपुष्पाक्षतधूपदीपनैवेद्यतां
बूलयज्ञोपवीतवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा॥ पुनर्मोटकमादाय॥ ॐ अद्यामुकगोत्रा अस्मन्मातामहप्रमातामहवृ
द्धप्रमातामहा अमुकामुकामुकशर्माणः॥ सपत्नीका वसुरुद्रादित्यस्वरूपा एतान्यर्चनानि गंधपुष्पाक्षतधूपदीपनैवेद्यतांबू
लयज्ञोपवीतवासांसि त्रेधा विभज्य युष्मभ्यं स्वधा॥ सव्येन विश्वेदेवब्राह्मणयोर्हस्ते० ॐ अर्चनविधेः सर्वपरिपूर्णमस्तु इति ज

CC-0. In Public Domain. Digitization by eGangotri

रत्न लं दद्यात् ॥ अस्तु परिपूर्णामिति प्रतिवचनम् ॥ अपसव्येन पितृब्राह्मणहस्तयोः ॐ अर्च्चनविधेः सर्व्वः परिपूर्णोमस्त्विति जलं द
१७० द्यात् ॥ ॐ अस्त्विति प्रतिवचनम् ॥ सव्येन विश्वेदेवब्राह्मणयोर्भोजनस्थाने आसनसहितं चतुष्कोणमंडलं विधाय ॥ अपस
व्येन पितृब्राह्मणयोर्भोजनस्थाने चतुर्दिक्षु आसनसहितं वर्तुलकोणमंडलं विधाय ॥ ब्राह्मणानां चतुष्कोणं क्षत्रियाणां त्रिको
णकम् ॥ वर्त्तुलं वैश्यजातीनां भूद्रस्य प्रोक्षणं स्मृतम् ॥ अपसव्येनाग्नौकरणम् ॥ पिंडपितृयज्ञवदित्यतिदेशाद्दक्षिणामुखो
पसव्यादिप्राप्त्युखउपवीतिपातितदक्षिणजानुः घटकादौ सघृतमन्नं कृत्वा ॥ ॐ अग्नौकरणमहं करिष्ये इति पितृब्राह्मणान्पृ
च्छेत् ॥ ॐ कुरुष्वेत्यनुज्ञातः सन्पितृब्राह्मणकरे जलपात्रे वा आहुतिद्वयं जुहुयात् ॥ ॐ अग्नये कव्यवाहनाय स्वाहा ॥ इदमग्न
ये कव्यवाहनाय १ ॐ सोमाय पितृमते स्वाहा ॥ इदं सोमाय पितृमते । हुतशेषमन्नं ॥ अपसव्येनैव पितृब्राह्मणपात्रे परि
क्षिपेत् ॥ ततोऽपसव्येन तिलघृतमधुजलयुतमन्नं मोदकादिसहितमादाय दक्षिणाभिमुखो भूत्वा ॥ ॐ इदमन्नं सजलमेत
द्भ्यः स्वामिपितृभ्यो नमः इत्युत्सृजेत् ॥ ~~अथान्नसंकल्प~~ ॥ ततः सव्येन विश्वेषां देवानाम् ॥ देवान् ध्यायन् सोपस्करं यवजलयुतमन्न
मुपनीय मधुनाभिघार्य ऋजुहस्ताभ्यां मन्नपात्रमालभ्य ॥ ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि J.70
स्वाहा ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पांशुरे स्वाहा ॥ इति पठित्वा विप्रस्य दक्षिणकरं गृहीत्वा ॥ ॐ राम
इदमन्नमित्यन्ने ॥ ॐ इमा आप इति जले ॥ ॐ इदमाज्यमिति घृते ॥ ॐ इदं हविरिति व्यंजने ॥ ॐ एतान्युपकरणानि ॥ इति क्रमेणान्न १७०

७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जलघृतेन भुवि प्रकरं निवेश्य ॥ ॐ यवोसीति यवानन्ने परिविकीर्य ॥ कुशयवजलान्यादाय ॥ वामहस्तांगुल्यंगुष्ठैः क्रमेणान्नमपश्च
स्पृष्ट्वा ॥ ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुककशर्मणां श्राद्धसंबधिभ्यो देवेभ्यः पुरूरवोमा
द्रवनामभ्य इदमन्नं सजलं सोपकरणं परिविष्टं परिवेष्यमाणामक्षय्यतृप्तिहेतोर्वः स्वाहा ॥ इति ब्राह्मणकरे कुशादिकमुत्सृ
जेत् ॥ पुनः सर्वं पूर्ववद्विधाय ॥ कुशादिकमादाय ॥ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममु
कामुकामुककशर्मणां श्राद्धसंबधिभ्यो विश्वेदेवेभ्यः पुरूरवार्द्रवनामभ्य इदमन्नं सजलं सोपस्करं परिविष्टं परिवेष्यमाणाम
क्षय्यतृप्तिहेतोर्वः स्वाहा ॥ इति ब्राह्मणकरे उत्सृजेत् ॥ इति विश्वेदेवान्नसंकल्पः ॥ ततोऽपसव्येन ॥ सोपस्करं तिलजलयु
तमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यां मन्नपात्रमालभ्य पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणा
स्य मुखे अमृते अमृतं जुहोमि ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पांसुरे इति पठित्वा विप्रस्य दक्षि
णांगुष्ठं गृहीत्वा ॥ ॐ इदमन्नं ॥ ॐ इमा आपः ॐ इदमाज्यम् ॥ ॐ इदं हविः ॥ एतान्युपकरणानि इति क्रमेणान्नजलघृतेन भुवि
प्रदक्षिणांगुष्ठं निवेश्य ॥ ॐ अपहता असुरा रक्षांसि वेदिषद इति पठित्वा अन्नोपरि तिलान् विकीर्य ॥ मोटकादिकमादाय
वामहस्तांगुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा ॥ ॐ अद्यामुकगोत्रायास्मत्पित्रेऽमुककशर्मणे सपत्नीकाय वसुस्वरूपाय इदमन्नं
सजलं सोपस्करं परिविष्टं परिवेष्यमाणमक्षय्यतृप्तिहेतोस्ते स्वधा ॥ इति पितृब्राह्मणकरे मोटकादिकमुत्सृजेत् ॥ एवं पिता

रत्न
१८१

पितामहादिवृद्धप्रमातामहान्तेभ्यः पंचभ्योदद्यात् ॥ ततः सव्येन विश्वेदेवब्राह्मणहस्तयोर्जलन्दद्यात् ॥ ॐ भवतो प्राशयन्ता
ति ॥ अपसव्येन पितृब्राह्मणाकरेषु भवन्तः प्राशयन्त्विति ॥ अपोशानं दद्यात् ॥ कर्त्ता सव्येन कुशोपरि विश्वव्याहृतिकां गा
यत्रीं सकृत्त्रिर्वा जपित्वा मधुव्वाता इति त्र्यृचं पठित्वा ॥ ॐ मधु ३ ॐ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वमच्छि
द्रमस्तु ॥ नमस्त्र्यम्बविरूपाक्ष नमस्तेनेकचक्षुषे ॥ नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठेत् ॥ ॐ यथासुखं ज
षध्वमिति वचनानन्तरं ते ब्राह्मणा मौनिनो भूत्वा भुञ्जीरन् ॥ संज्ञया च भक्ष्यं प्रार्थयेयुः ॥ ततः सव्याहृतिकां गायत्रीं मधुवा
ता इति त्र्यृचं च पठित्वा ॥ पितृसूक्तं च पठेत् ॥ तद्यथा अग्नये कव्यवाहनाय ६ ॥ कृणुष्वपाजः ६ ॥ सुरावन्तम् ॥ सहस्रशीर्षा २२
आशुः शिशानः १० ॥ नमस्ते ऽध्यायः ६६ ॥ तदेव १६ इति पितृसूक्तम् ॥ ततो ब्राह्मणानां यत्र यत्रेच्छोपलभ्यते तत्तत्
यच्छन् मन्दमन्दं भोजयेत् ॥ ततः पितामहान्नपात्रसन्निधौ आस्तृतकुशान्त्रयायां भूमौ विकरासनं दद्यात् ॥ अपसव्ये
न मोदकादिकमादाय ॥ ॐ संस्कृतप्रमीतानां त्यागिनीनां कुलयोषिताम् ॥ उच्छिष्टभागधेयानां दर्भेषु विकरासनम् ॥ इ
ति मन्त्रेण मोदकरूपमासनमास्तृतकुशोपर्युत्सृजेत् ॥ सतिलमधुघृतमन्नमादाय जलेनाप्लाव्य मोदकादिकमादाय ॥ ॐ 171 राम
अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ इति मन्त्रेणास्तृतकुशोपरि तदन्नं विकि १८१
रेत् ॥ ततः कुशान्परित्यज्य हस्तौ पादौ प्रक्षाल्य ॥ सव्येन द्विराचम्य गायत्रीं जपित्वा ॥ ॐ मधुव्वाता इति त्र्यृचं पठेत् ॥ ततो ब्राह्म

गांस्तप्रोज्ञात्वा ॥ सव्येनैव जलगंडूषमिदं त इति विश्वेदेवब्राह्मणाभ्यां प्रत्येकं प्रत्यपोशानं दत्त्वा ऽञ्जलिं बध्वा विश्वेदेवब्राह्मणयोः
प्रतिप्रश्नः ॥ ॐ तृप्ताःस्थ ॐ तृप्ताःस्म इति प्रतिवचनम् ॥ ॐ शेषमन्नं किं क्रियतामिति पृष्टे ॰ ॐ इष्टैः ॰ सह भुज्यतामिति प्रतिव
चनम् ॥ अपसव्येन पितृब्राह्मणान् पृच्छेत् ॥ ॐ तृप्ताःस्थ ॥ ॐ तृप्ताःस्म इति प्रतिवचनम् ॥ ॐ पिंडदानं महं करिष्ये इत्यभय
नुपृच्छेत ॥ ॐ कुरुष्वेति प्रतिवचनम् ॥ ततः पिंडदानार्थं हस्तमितां चतुरंगुलोच्छ्रितां सेकतादिकां दक्षिणाप्लवां पिंडिकां
निर्माय ॥ तदुपरि ॰ येरूपाणीति मंत्रेणांगारं भ्रामयित्वा दक्षिणस्यां क्षिपेत् ॥ ततो वेदिकामध्ये वामेन पाणिना दर्भपिंजुली
गृहीत्वा ॰ दक्षिहस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिः ॥ ॐ अपहता असुरा रक्षांसि वेदिषद इति दक्षिणाग्रां रेखां कृत्वा द
र्भपिंजुलीमन्यस्यां क्षिपेत् ॥ ततः शन्नोदेवीरिति जलेन पिंडिकासेचनम् ॥ तदनु छिन्नमूलकुशान् दक्षिणाग्रान् पिंडिकायामा
स्तीर्य ॥ सव्येन देवताभ्य इति त्रिः पठेत् ॥ अपसव्यं विधाय एकं पुटकं वामहस्ते कृत्वा मोटकादिकमादाय १ ॐ अद्यामुकगोत्रा
ऽत्पितरमुकशर्मन् पिंडस्थाने ऽत्रावनेनिक्ष्व ते स्वधा इति छिन्नमूलकुशोपरि अवनेजनं दद्यात् ॥ एवं पितामहप्रपितामह
मातामहप्रमातामहवृद्धप्रमातामहेभ्यः पंचभ्यो दद्यात् ॥ ततः पिंडं निर्माय मोटकादीनि पिंडं चादाय ॥ वामहस्तेन पुटकादि
स्थजलमादाय ॥ ॐ अद्यामुकगोत्रा ऽस्मत्पितरमुकशर्मन् वसुस्वरूप एष पिंडो ऽमृतस्वरूपो ऽक्षय्यतृप्तिहेतोस्ते स्वधा ॥ इत्यव
नेजनोपरि पिंडं दद्यात् ॥ एवं पितामहमातामहादिपंचभ्यो ऽवनेजनोपरि पिंडं दद्यात् ॥ तत आस्तरणकुशमूलेन ॰ ॥ ॐ लेप

२ पठेत्· आसमिन्यममातरमूर्जो त्पित्रादीन् ध्यायन्॰ अपसव्यं कृत्वा दक्षिणावर्त्तेन दक्षिणाभिमुखो भूत्वा

रत्न भागभजस्त्वप्यंतु ॥ इतिकारं प्रोक्ष्य ॥ सव्यं कृत्वा द्विराचम्य हरिं स्मरेत् ॥ ततः सव्येनैव पुष्पादिकमादाय॰ पित्रादीनुद्दिश्य ॥ ॐ अत्र
१७२ पितरो मादयध्वं यथाभागमावृषायध्वम् ॥ इति उत्तराभिमुखो भूत्वा ॥ ॐ अमीमदन्त पितरो यथाभागमावृषायिषत इति प
ठित्वा पुष्पादिकानि पिंडेषु निःक्षिपेत् ॥ ततो वनेजनपात्रं वामहस्ते कृत्वा ॥ मोटकादिकमादाय· ॐ अद्यामुकगोत्रास्मत्पित
रमुकशर्मन् इदं पिंडं प्रत्यवनेजनं ते स्वधा ॥ एवं प्रतिपिंडं प्रत्यवनेजनं दद्यात् ॥ ततो नीवीविस्रस्य ॥ सव्यं कृत्वा द्विराचम्य
हरिं स्मरेत् ॥ अपसव्यं कृत्वा वामेन पाणिना धृतसूत्रं दक्षिणेनादाय ॥ ॐ नमो वः पितर इत्यादि वास इत्यं पठित्वा प्रत्येकं पिं
डोपरि सूत्रं दद्यात् ॥ ततः क्रमेण पिंडान् गंधादिभिः संपूज्य धूपदीपौ च कारयेत्॰ ॥ मोटकादिकमादाय ॥ ॐ अद्यामुकगोत्रा
अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा एतानि पिंडार्चनानि अत्र सूत्र
गंधपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि त्रेधा विभज्य युष्मभ्यं स्वधा ॥ इति पित्रादिभ्यो गंधादिकमुत्सृजेत् ॥ पुनर्मोटकादिक
मादाय ॥ ॐ अद्यामुकगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्म्माणः सपत्नीका वसुरुद्रादि
त्यस्वरूपा एतानि पिंडार्चनान्यत्र सूत्रगंधपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानि त्रेधा विभज्य युष्मभ्यं स्वधा ॥ इति मातामहादि
भ्यो गंधादिकमुत्सृजेत् ॥ ततः सव्येन विश्वेदेवब्राह्मणाकरयोः ॥ ॐ शिवा आपः सन्तु इति जलम् ॥ ॐ सौमनस्यमस्त्विति पुष्पम्
अक्षतं चारिष्टमस्त्विति यवाक्षतान् ॥ प्रत्येकं दद्यात् ॥ अपसव्येन पितृब्राह्मणाकरयोः ॥ ॐ शिवा आपः संत्विति जलम् ॥ ॐ सौ

172
रत्न
१७२

२

मनस्समस्त्विति पुष्पम् ॥ ॐ अक्षतं चारिष्टमस्त्विति मंगलानि ॥ प्रत्येकं दद्यात् ॥ ततः सव्येनाञ्जलिमध्यापूर्वाभिमुखो भूत्वा वक्ष्यमाः

णा मंत्रान् पठेत् ॥ ॐ अपाम्मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ॥ ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥ लक्ष्मीर्वसति पुष्पे

षु लक्ष्मीर्वसति पुष्करे ॥ लक्ष्मीर्वसति सदा गोष्ठे सौमनस्यं ददातु मे ॥ अक्षतं चास्तु मे पुण्यं शांतिः पुष्टिर्धृतिस्तथा ॥ यद्यच्छ्रेयस्करं

लोके तत्तदस्तु सदा मम ॥ ततः कर्मपात्रोदकं गृहीत्वा प्रतिमंत्रं स्वशिरस्यभिषिंचेत् ॥ ॐ अस्मत्कुले दीर्घमायुरस्तु ॥ ॐ शांतिर

स्तु ॥ ॐ पुष्टिरस्तु ॥ ॐ वृद्धिरस्तु ॥ ॐ यच्छ्रेयस्तदस्तु ॥ ॐ यत्पापं तत्प्रतिहतमस्तु इति भूमौ ॥ ॐ द्विपदे चतुष्पदे शांतिर्भवतु ॥ ततो

ऽपसव्येन पिंडशेषान्नं पिंडसमीपे विकिरेत् ॥ वामहस्ते पुटकादिस्थजलं कृत्वा मोटकादिकमादाय ॥ ॐ अद्यामुकगोत्रस्या

ऽस्मत्पितुरमुकशर्मणोऽत्र पार्वणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु ॥ इति पिंडेऽक्षय्योदकं दद्यात् ॥ एवं पितामहादि

मातामहादिभ्यो दद्यात् ॥ सव्येन कृतांजलिः दक्षिणादिशमवलोकयन् ॥ ॐ अघोरा मातामहाः सन्तु ॥ इति सर्वपिंडोपरि पू

र्वाग्रां जलधारां दद्यात् ॥ ततः प्राङ्मुखो भूत्वाऽञ्जलिं बध्वाऽऽशिषः प्रार्थयेत् ॥ ॐ गोत्रन्नो वर्द्धताम् ॥ ॐ वर्द्धतामिति प्रतिवच

नम् ॥ ॐ दातारो नोऽभिवर्द्धताम् ॥ ॐ वर्द्धन्तामिति प्रतिवचनम् ॥ ॐ वेदाः सन्ततिरेव च ॥ ॐ सन्त्विति प्रतिवचनम् ॥ ॐ श्रद्धा च

नो मा व्यगमत् ॥ ॐ मागादिति वचनं ॥ ॐ बहुदेयं च नोऽस्तु ॥ ॐ अस्तु ॥ ॐ अन्नं च नो बहु भवेत् ॥ ॐ भवतु ॥ ॐ अतिथींश्च लभेम

हि ॥ ॐ लभ्यम् ॥ ॐ याचितारश्च नः सन्तु ॥ ॐ सन्तु ॥ ॐ मा याचिष्म कंचन ॥ ॐ मा याचेथा इति प्रतिवचनम् ॥ ॐ एताः सत्या आ

रत्न
१७३

शिषः सन्तु ॥ इति ॥ ततः श्राद्धकर्त्ता ब्राह्मणहस्तेन तिलकं कुर्यात् ॥ ॐ यं कामं कामयते सोऽस्मै कामः समृध्यतामिति मंत्रेण ॥ ततोऽ
पसव्येन सपवित्रकुशान् मूत्रपात्राद् गृहीत्वा पिंडोपरि निक्षिप्य ॥ ॐ स्वधां वाचयिष्ये ॥ ॐ वाच्यतामिति प्रतिवचनम् ॥ रिक्तांज
लिना ॥ ॐ अद्यामुकगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्य
स्तथाऽमुकगोत्रेभ्योऽस्मन्मातामहप्रमातामहेभ्योऽमुकामुकामुकशर्मभ्यः ॥ सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः स्वधोच्य
ताम् ॥ ॐ अस्तु स्वधेति प्रतिवचनम् ॥ ततः पयसादिसहितं पुटकं वामहस्ते कृत्वा ॥ ॐ ऊर्जं वहन्तीरिति मंत्रेण सपवित्रकुशो
परि दक्षिणाग्रां पयोधारां दद्यात् ॥ ततः ॐ पिंडाः सम्पन्ना इति ब्राह्मणान् पृच्छेत् ॥ ॐ सुसम्पन्ना इति प्रतिवचनम् ॥ ॐ पिंडानुत्थाप
यामि ॥ ॐ उत्थापयस्वेत्यनुज्ञातः सन्नुत्तरतो भूमिष्ठपिंडमाघ्राय उत्थापयेत् ॥ पिंडाधारकुशानुल्मुकं च वह्नौ प्रक्षिपेत् सव्येन ॥ पिंडि
कायां भस्मना चक्रं विलिख्य ॥ ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥ ॐ शंखचक्राभ्यां नमः ॥ इति यवैः शंखचक्रं पूजां विधाय ॥ अ
पसव्यं कृत्वा ॥ ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते वै ऋणत्रयात् ॥ इति मंत्रेण पिंडान् पिंडि
कोपरि निधाय पूजयेदेभिर्मंत्रैः ॥ सव्येन ॥ ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ॥ वर्षाभ्यश्च शरत्संज्ञक ऋतवे च नमो न
मः ॥ हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ॥ मासः संवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥ इति संपूज्य ॥ सव्येन विश्वेदेवार्घपा
त्रं संचाल्य ॥ अपसव्येन पित्रर्घपात्राण्युत्तानीकृ ॥ सव्येन दक्षिणां दद्यात् ॥ कुशादिवसहितं दक्षिणाद्रव्यमादाय ॥ ॐ अद्यामु

173
राम
१७३

कगोत्राणां मस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां श्राद्धसंबधिनां विश्वेषां देवानां पुरूरवोमाद्रवनाम्नां
कृते नमहालयापरपक्षान्तर्गतपार्वणवैश्वदेविकश्राद्धप्रतिष्ठार्थं दक्षिणा हिरण्यमग्निदैवतममुकगोत्रायामुकशर्म
णे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति ब्राह्मणकरे उत्सृजेत् ॥ पुनर्दक्षिणासहितं कुशादिकमादाय ॥ ॐ अद्यामुकगो
त्राणां मस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां श्राद्धसंबधिनां विश्वेषां देवानां पुरूर
वोमाद्रवनाम्नामयं कृते नमहालयापरपक्षान्तर्गतपार्वणश्राद्धसंबधिवैश्वदेविकश्राद्धप्रतिष्ठार्थं दक्षिणामुव
र्णमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय संप्रददे ॥ इति ब्राह्मणकरे उत्सृजेत् ॥ पुनः सव्येनैव कुशति
लजलदक्षिणाद्रव्यमादाय ॥ ॐ अद्येत्यादि० अमुकगोत्राणां मस्मत्पितृपितामहप्रपितामहानाममुकाऽमुकामुकश
र्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां कृते नमहालयापरपक्षान्तर्गतपार्वणश्राद्धपिण्डदानप्रतिष्ठार्थं रौप्य
चन्द्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति ब्राह्मणकरे उत्सृजेत् ॥ पुनः कुशतिलजल
दक्षिणाद्रव्यमादाय ॥ ॐ अद्यामुकगोत्राणां मस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां
सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां कृते नमहालयापरपक्षान्तर्गतपार्वणश्राद्धपिण्डदानप्रतिष्ठार्थं दक्षिणा
रौप्यं चन्द्रदैवतं ममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे ॥ इति पितृब्राह्मणकरे उत्सृजेत् ॥ पुन

CC-0. In Public Domain. Digitization by eGangotri

रत्न
१८४

कुशादिकमादाय ॥ ॐ अद्यामुकगोत्राणाममस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरु-
द्रादित्यस्वरूपाणां तथामुकगोत्राणाममस्मन्मातामहप्रमातामह वृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां
वसुरुद्रादित्यस्वरूपाणां तथामुकगोत्राणाममस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सप-
त्नीकानां वसुरुद्रादित्यस्वरूपाणां कृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धपिंडदानप्रतिष्ठार्थमिदं न्यूनातिरेकप-
रिहरणार्थयः यद्देयं मन्नपानादिकं तन्न दैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो न्यजातिभ्यो दातुमहमुत्सृजे ॥ ॥ इति
दक्षिणादानम् ॥ ततः सव्येनैव ॥ ॐ वाजेवाजे इति पितृविसर्जनम् ॥ ततः ॐ उरुरवो माड्वनामानो विश्वदेवाः प्रीयन्ता-
म् ॥ ॥ इति विश्वेदेवविसर्जनम् ॥ ॥ ततो देवताभ्य इति त्रिः पठेत् ॥ अपसव्येन दीपाच्छादनं विधाय ॥ हस्तौ पादौ प्रक्षा-
ल्याचम्य इति पठेत् ॥ अस्य पार्वणश्राद्धविधेर्यत्कृतं तत्तत्सुकृतमस्तु ॥ यन्न कृतं तच्छिद्रम्भोः प्रसादाद्ब्राह्मणवचनात्सर्वप-
रिपूर्णमस्तु ॥ अस्तु परिपूर्णम् ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति
श्रुतिः ॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ प्रयच्छन्ति तथा राज्यं पितरः श्राद्धतर्पिताः ॥ ॐ यस्य स्मृत्या च ना-
मोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युताय नम इति त्रिवारं पठित्वा कायेन
वाचेति पठेत् ॥ ॥ इति सर्वश्राद्धप्रकृतिभूतपार्वणश्राद्धम् ॥ ॥ अथैतन्तमानमाभ्युदयिकश्राद्धप्रयोगः ॥ ॥ तत्र

174
रत्न
१८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्ता प्रातः स्नान आचांत· प्राङ्मुख उदङ्मुखो वा ॥ दीपं प्रज्वाल्य ॥ यद्देवा देवहेडनमित्यादि कण्डिकात्रयेण कर्मपात्रं कृत्वा
कुशत्रयसहितं जलमादाय० ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यंतरः शुचि
रिति श्राद्धद्रव्यमात्मानं प्रोक्ष्य० ॐ पुण्डरीकाक्षः पुनात्विति मन्त्रात्कुशत्रयसहितं यव जलमादाय० ॥ ॐ अद्येत्यादि देशका
लादीन् स्मृत्वा अमुकगोत्राणां मम मातृपितामही प्रपितामहीनाम् अमुकामुकामुकदेवीनां नांदीमुखीनां तथा अमुकगो
त्राणां मम पितृपितामहप्रपितामहानाम् अमुकामुकामुकशर्मणां नांदीमुखानां तथा अमुकगोत्राणां मम मातामह प्रमा
तामह वृद्धप्रमातामहानाम् अमुकामुकामुकशर्मणां नांदीमुखानां वसुसत्यसंज्ञक विश्वदेवपूर्वकाणां अमुककर्मांगतया
भ्युदयिकश्राद्धमेभिर्द्रव्यैरहं करिष्ये० इति संकल्प्य सकृत्त्रिर्वा गायत्रीं जप्त्वा० ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव
च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिर्जपेत ॥ ततो दिग्बंधनं कुर्यात ॥ कुशयवानादाय० ॐ अग्निष्वा
त्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ॥ अपहता असुरा रक्षांसि वेदिषदः १ ॥ तथा: ॐ बर्हिषदः पांतु याम्यां ये पि
तरः स्थिता अपहता ॥२॥ ॐ प्रतीचीमाज्यपास्तद्वत्० अपहताः ०३ ॥ उदीचीमपि सोमपाः अपहताः ०४ ॥ ॐ रक्षोभूत
पिशाचेभ्यो स्तथैवासुरदोषतः ॥ सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे इति मंत्रेण पूर्वादिदिक्षु यवान्विकीर्य ॐ त्वमग्ने
द्युभिरिति मंत्रेण नीवीबंधनं कुर्यात ॥ अथासनम् ॥ अद्याभ्युदयिकश्राद्धे अमुकगोत्राणां मम मातृपितामही प्रपिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
१७५

महीनाममुकामुकामुकदेवीनांनांदीमुखीनांश्राद्धसंबधिनीवसुसत्यसंज्ञकानांविश्वेषांदेवानामिदमासनंवोनमः॥ ॐम
द्याभ्युदयिकश्राद्धेमुकगोत्राणाममस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणांनांदीमुखानांश्राद्धसंबधिनां
वसुसत्यसंज्ञकानांविश्वेषांदेवानामिदमासनंवोनमः॥ अद्याभ्युदयिकश्राद्धेमुकगोत्राणाममस्मन्मातामहप्रमातामह
वृद्धप्रमातामहानाममुकामुकामुकशर्मणांनांदीमुखानांश्राद्धसंबधिनांविश्वेषांदेवानांवसुसत्यसंज्ञकानामिदमा
सनंवोनमः॥३॥ अद्यामुकगोत्रायाअस्मन्मातुरमुकदेव्यानांदीमुख्याआभ्युदयिकश्राद्धे इदमासनंतेनमः॥ एव
मेवपितामहीप्रपितामहीभ्यांदद्यात्॥ अद्याभ्युदयिकश्राद्धेमुकगोत्रस्यास्मत्पितुरमुकशर्मणोनांदीमुखस्येदमा
सनंतेनमः॥ एवमेवपितामहप्रपितामहाभ्यांदद्यात्॥ ॐअद्याभ्युदयिकश्राद्धेमुकगोत्रस्यास्मन्मातामहस्यामुकश
र्मणोनांदीमुखस्येमादसनंतेनमः॥ एवमेवप्रमातामहप्रपितामहाभ्यांदद्यात्॥ ॐअद्याभ्युदयिकश्राद्धेमुकगोत्र
स्यास्मन्मातामहस्यामुकशर्मणोनांदीमुखस्येमादसनंतेनमः॥ एवमेवप्रमातामहवृद्धप्रमातामहाभ्यांदद्यात्॥ अथा 175
वाहनम्॥ ॐअद्याभ्युदयिकश्राद्धेमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनांनांदी राम
मुखीनांश्राद्धसम्बधिनोवसुसत्यसंज्ञकान्विश्वान्देवानावाहयिष्ये॰ ॐअद्याभ्युदयिकश्राद्धेमुकगोत्राणामस्मत्पि १७५
तृपितामहप्रपितामहानाममुकामुकामुकशर्मणांनांदीमुखानांश्राद्धसंबधिनोवसुसत्यसंज्ञकान्विश्वान्देवानावाहयि

१०

११

ष्ये ० ॐ मयाभ्युदयिकश्राद्धेऽमुकगोत्राणां मस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्मणां नांदीमुखानां
श्राद्धसंबंधिनो वसुसत्यसंज्ञकान्विश्वान्देवानावाहयिष्ये ० इत्युक्त्वा विश्वेदेवास आगत शृणुता म इमं ह० हवम् ० एदं ब
र्हिर्निषीदतेति मंत्रेणावाह्य ० ॐ यवोसीति मंत्रेण श्राद्धदेशे यवान्विकीर्य ॐ विश्वेदेवाः शृणुतेमं ह० हवं मे ये अंतरि
क्षे य उप द्यवि ष्ठ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषी मादयध्वमिति मंत्रं पठित्वा आगच्छंतु महाभागा विश्वेदेवा
महाबलाः ॥ ये यत्र विहिताः श्राद्धे सावधाना भवंतु ते इति पठेत् ० ॥ ॐ मयाभ्युदयिकश्राद्धेऽमुकगोत्रा अस्मन्मातृपितामही
प्रपितामह्योऽमुकामुकामुकदेवीनां नांदीमुखीरावाहयिष्ये ० ॐ मयाभ्युदयिकश्राद्धेऽमुकगोत्रानस्मत्पितृपितामहप्रपिता
महानमुकामुकामुकशर्मणो नांदीमुखानावाहयिष्ये ० ॐ मयाभ्युदयिकश्राद्धेऽमुकगोत्रानस्मन्मातामहप्रमातामहवृद्धप्र
मातामहानमुकामुकामुकशर्मणो नांदीमुखानावाहयिष्ये ० इत्युक्त्वा ० ॐ उशंतस्त्वेति मंत्रेण पितॄनावाह्य ॐ यवोसीति
श्राद्धदेशे यवान्विकीर्य ० आयंतु न इति मंत्रं पठेत् ॥ अथ हस्तार्घ ॥ ततो हस्तार्घार्थं पुटकान्यासाद्य तेषु प्रत्येकं पवित्रे स्थइ
ति पवित्रं ० शन्नोदेवीरिति जलं ० यवोसीति यवान् ० गंधद्वारामिति गंधं श्रीश्चेति पुष्पं दत्वा ० हस्तार्घपात्रं वामहस्ते धृत्वा
सपुष्पं पवित्रं गृहीत्वा ॥ ॐ नमो नारायणायेति मंत्रेण पवित्रमंतराय मत्स्यपात्रोपरि धृत्वा दक्षिणकरे वामकरस्थपुटकमु
खं विधाय ० ॐ या दिव्या आपः पयसा संबभूवुर्या अंतरिक्षा उत पार्थिवीर्याः हिरण्यवर्णा यज्ञियास्ता न आपः शिवाशः ह०

CC-0. In Public Domain. Digitization by eGangotri

स्योनावाभवं त्विति मंत्रेणार्घपात्रस्थं जलमभिमंत्र्य कुशयवजलान्यादाय ० ॐ अद्यामुकगोत्राणामस्मत्पितामही
प्रपितामहीनाममुकामुकामुकदेवीनां नांदीमुखीनां श्राद्धसंबंधिनो वसुसत्यसंज्ञका विश्वेदेवा एष वोऽर्घो नमः ॥ पुनरस्
त्वर्घं पूर्ववद्विधाय पित्रादित्रिभ्यो मातामहादित्रिभ्यः श्चार्घं दद्यात् ० ॐ अद्यामुकगोत्रे अस्मन्मातरमुकदेवी नांदीमुखि एष ह
स्तार्घस्ते नमः ॥ एवं पितामही प्रपितामहीभ्यां दद्यात् ० ॐ अद्यामुकगोत्रा अस्मत्पितरमुकशर्मन् नांदीमुख एष हस्तार्घस्ते न
मः ॥ एवं पितामहप्रपितामहाभ्यां दद्यात् ० ॐ अद्यामुकगोत्रा अस्मन्मातामहामुकशर्मन् नांदीमुख एष हस्तार्घस्ते नमः ॥ एवं
मातामहप्रमातामहवृद्धप्रमातामहाभ्यां दद्यात् ० ॥ अथसंस्रवीकरणम् मातापितृपात्र दक्षिणादिशि मातृभ्यः स्थानमसि ० माता
महेभ्यः स्थानमसि ॥ ततो गंधपुष्पाक्षतयज्ञोपवीतताम्बूलवस्त्रादिभिः समभ्यर्च्य धूपदीपौ च कृत्वा यवकुशादीन्यादाय
० ॐ अद्याभ्युदयिकश्राद्धे अमुकगोत्राणामस्मन्मातृपितामही प्रपितामहीनाममुकामुकामुकदेवीनां नांदीमुखीनां श्राद्ध
संबंधिनो वसुसत्यसंज्ञका विश्वेदेवा एतान्यर्चनविधौ गंधपुष्पाक्षत धूपदीपताम्बूलयज्ञोपवीतवस्त्राणि वो नमः ॥ एवं
पित्रादित्रिभ्यो मातामहादित्रिभ्यश्च दद्यात् ॥ ॐ अद्याभ्युदयिकश्राद्धे अमुकगोत्रे अस्मन्मातरमुकदेवी नांदीमुखि एतान्यर्चनव
नविधौ गंधपुष्पाक्षत धूपदीपवस्त्रादि ते नमः ॥ एवं पितामही प्रपितामही पितृपितामह मातामहप्रमातामहवृद्धप्र
मातामहेभ्यो यथालिंगं कुर्यात् ॥ अथाग्नौकरणम् ० जलमाचम्य ० उदकोदीसमधनमन्त्रं कृत्वा उदकादिस्थजले ॐ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्नये कव्यवाहनाय स्वाहा इदं मग्नये कव्यवाहनाय ॐ सोमाय पितृमते स्वाहा ० इदं सोमाय पितृमते ० उत्तरेण मन्नं वैश्वदे
वपात्र वर्ज्जं सर्वपात्रेषु क्षिपेत् ॥ अथान्नसंकल्पः तत्रादौ भूस्वामि ने दद्यात् ॥ कुशाग्रादाय ० इदमन्नमेतद्भूस्वामिपितृभ्यो
नमः ॥ इत्युत्सृज्य तत्र प्रथमं विश्वेषां देवानां ॥ उत्तानाभ्यां पाणिभ्यां मात्रादि पात्रमालभ्य ॐ पृथिवी ते पात्रं द्यौरपिधानं
ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहेति पठित्वा ० ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पांसुरे स्वाहे
ति पठित्वा कृष्ण कव्यमिदं मदीयमिति मुक्त्वा ० इदमन्नमित्यन्ने इमा आप इति जले इदमाज्यमिति घृते इदं हविरिति पुनः ॥ र
न्ने दक्षिणाङ्गुष्ठमारोप्य ० ॐ यवोसीति तत्र यवान्वीकीर्य तलकुशादीन्यादाय ० ॐ अद्याभ्युदयिक श्राद्धे अमुकगोत्राणां मस्म
त्पितृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनां नांदीमुखीनां श्राद्धसंबंधिभ्यो वसुसत्यसंज्ञकेभ्यो विश्वेभ्यो देवे
भ्य इदं मन्नं सोपकरणं वो नमः ॥ एवं पात्रालंभनादिकं पूर्ववत्कृत्वा पित्रादित्रिभ्यो मातामहादित्रिभ्यो यथालिंगं दद्यात् ॥ ॐ
मद्याभ्युदयिक श्राद्धे अमुकगोत्रायै अस्मन्मात्रे अमुकदेव्यै नांदीमुख्यै इदमन्नं सोपकरणं ते नमः ॥ एवं पितामहि प्रपितामही
पितृपितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहेभ्यो यथालिंगं पृथक्पृथक् दद्यात् ॥ ततोन्नहीनं क्रियाहीनं विधि
हीनं च यद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु ० नमस्तुभ्यं विरूपाक्ष नमस्ते नेकचक्षुषे ॥ नमः पिनाकहस्ताय वज्रहस्ताय वै नमः
ततो गायत्रीं जपित्वा मधु ३ इति त्रिः पठेत् ॥ पुरुषसूक्तादिकं जपेत् ॥ अथ विकरदानम् ॥ ततः प्रागग्रकुशत्रयायां भू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

रत्न
१७७

स्यां कुशयवलान्यादाय। असंस्कृतप्रमीतानां त्यागिनां कुलयोषितां॥ उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्॥ इ
ति मंत्रेण कुशरूपमासनमास्तृतकुशत्रयोपरि उत्सृजेत्॥ ततः सयवघृतजलमन्नमादाय। अग्निदग्धाश्च ये जी
वा ये प्यदग्धाः कुले मम॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यांतु परां गतिमिति दत्वा सतृणकुशोपरि तदन्नं विकिरेत्॥ तत आ
चम्य हरिं स्मृत्वा पिंडदानं कुर्यात्॥ पिंडदानार्थं हस्तैकपरिमितं चतुरस्रं चतुरंगुलोच्छ्रितं सैकतं वेदीं कुर्यात्॥ तस्या उप
रि पूर्वाभिमुखरेखात्रयं कृत्वा ॐ अपहता असुरा रक्षांसि वेदिषद इति मंत्रेण रेखोपरि येरूपाणीति मंत्रेणोल्मुकभ्रम
णं कृत्वाग्निं पूर्वतो निनयेत्॥ ततः कुशादिकमादाय। ॐ अद्याभ्युदयिकश्राद्धे अमुकगोत्रेस्मन्मातरमुकदेवि नांदीमुखि इदं
पिंडासनावनेजनजलं ते नमः॥ एवं पितामह्या प्रपितामह्याश्च दद्यात्॥ अद्यामुकगोत्रास्मन्मातामहामुकशर्मन् नांदी
मुखेदं पिण्डावनेजनजलं तुभ्यं नमः॥ एवं प्रमातामहवृद्धप्रमातामहाभ्यां दद्यात्॥ ततो देवताभ्य इति त्रिर्जपेत्॥ ततः प्र
थमपिंडमादाय। ॐ अद्याभ्युदयिकश्राद्धे अमुकगोत्रे अस्मन्मातरमुकदेवी नांदीमुखि एष दधिबदराक्षतमिश्रः पिंडस्तुभ्यं न
मः॥ एवं द्वितीयादिपिंडमादाय पितामही प्रपितामही पितृपितामह प्रपितामह मातामह प्रमातामह वृद्धप्रमातामहे
भ्यो यथालिंगं पृथक् पृथक् पिंडं दद्यात्। दध्यादिपिंडमादाय। सायं निमंत्रिता ये च पितरश्चापरे तथा॥ दध्यादिपिंडदा
नेन तृप्तिं संतो भवंतु ते इति मंत्रेण करं प्रोक्ष्याचम्य। अत्र मातरो मादयध्वं अत्र पितरो मादयध्वं॥ अत्र मातामहा मादयध्वं

रत्न
१७७

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म्॥ यथाभागं मादयध्वम्॥ दक्षिणावर्त्तेनोदङ्मुखीभूय यथासंनियमः अमी मदंत पितरो यथाभागमावृषायिषतेति पठि
त्वा॥ ॐ अद्यामुकगोत्रेऽस्मन्मातरमुकदेवि नांदीमुखी इदं पिंडं प्रत्यवनेजनजलमवनेनिक्ष्व० एवं पितामह्यादिपित्रा
दिमातामहादिभ्यः पृथक् २ दद्यात्॥ ततो वीवीसं वस्त्रं दद्यात्॥ षडंजलिं बध्वा नमो वः पितर इति मंत्रेण वस्त्रदानम्॥
अथ पिंडार्चनम्॥ ॐ वसंताय नमस्तुभ्यं ग्रीष्माय च नमो नमः॥ वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः॥ हेमंताय नम
स्तुभ्यं नमस्ते शिशिराय च॥ मास संवत्सरेभ्यश्च दिवसेभ्यो नमो नमः॥ इति मंत्रैः संपूज्य कुशादीनादाय· ॐ मद्याभ्युदयि
कश्राद्धे अमुकगोत्रा अस्मन्मातृपितामही प्रपितामह्यो अमुका अमुका अमुकदेव्यो नांदीमुख्य एतानि पिंडार्चनविधौ गंधपुष्पाक्ष
तधूपदीपतांबूलद्रव्यसूत्रोपवीतनैवेद्यानि वो धाविभज्य युष्मभ्यं नमः॥ एवं पित्रादित्रिभ्यो मातामहादित्रिभ्यश्च यथालिं
गं पृथक् दद्यात्· ततः कुशद्वर्वादलं गृहीत्वा तज्जलेन भूमौ संप्रोक्षितमस्तु शिवा आपः सन्त्विति जलं· सौमनस्यमस्त्वि
ति पुष्पाणि· अक्षतं चारिष्टमस्त्विति तंडुलान् तत्पात्रोपरि निक्षिप्य· ॐ अयाम धेस्थिमा देवाः सर्वमस्तु प्रतिष्ठितम्॥ ब्रा
ह्मणास्य करे न्यस्ता शिवा आपो भवंतु मे॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे॥ लक्ष्मीर्वसति गोष्ठे च सौमनस्यं सदा
स्तु मे॥ अक्षतं चास्तु मे पुण्यं शांतिः पुष्टिस्तथास्तु मे॥ यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम इति प्रार्थयेत्॥ अथ मार्जनम्
ततो दक्षिणहस्तेन सकुशदुर्वादलं गृहीत्वा तज्जलेन० अस्माकं दीर्घमायुरस्तु शांतिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तद

रन
१६८

स्न: ॥ यन्मापं न न्य्रनितं मसुद्विपदेवतुष्यदेशांतिर्भवत्विति मंत्रेराशिरसि प्रोक्षणं कुर्यात् ॥ अथाक्षयोदकदानम् ॥ तत
स्तजलयवकुशत्रयमादाय० अद्यामुकगोत्राया अस्मन्मातुरमुकदेव्या नांदीमुख्या आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभि
:प्रीयताम् ॥ एवंपितामहीप्रपितामहीपितृपितामहप्रपितामहप्रमातामहवृद्धप्रमातामहेभ्यो यथालिंगं पृथक् २ दद्या
त् ॥ अथाशीः प्रार्थनम् ॥ ॐ महोराः पितरः सन्त्वित्युक्ताः ॐ गोत्रं नो वर्द्धताम् ॥ दातारो नोभिवर्द्धताम् ॥ वेदाः संततिरेव च
श्रद्धा च नो मा व्यगमत् ॥ बहुदेयं च नोस्तु अन्नं च नो बहु भवेत् ॥ अतिथींश्च लभेमहि ॥ याचितारश्च नः संतु ॥ मायाचिष्म
कंचन ॥ एताः सत्या आशिषः संतु ॥ इति ॥ ततः श्राद्धकर्ता ब्राह्मणहस्ते तिलकं कुर्यात् ॥ ॐ यं कामं कामयते सो अस्मै काम
स्समृध्यतामिति मंत्रेण । अथ स्वाहावाचनम् ॥ सपवित्रकुशान् गृहीत्वा ॐ अद्याभ्युदयिकश्राद्धे अमुकगोत्रायै अस्मन्मातुरमुक
देव्यै नांदीमुख्यै स्वाहा वाचयिष्ये वाच्यताम् ॥ एवं पितामह्यादिभ्यो यथालिंगं पृथक् २ वाचयेत् ॥ ततः पयसादिकमादाय ॐ
ऊर्जं वहन्तीरिति स्वधास्थ तर्पयत मे मातृः पितॄन्मातामहान् तृप्यन्तु ततः प्रणामे ॥ इशानविस्फुरत्कमलासन कार्त्तिकेय वह्नित्र
यार्करजनीशगणेश्वराणाम् ॥ क्रौंचामरेन्द्रकलशोद्भवकाश्यपानां पादं नमामि सततं पितृमुक्ति हेतोः ॥ ततः पिण्डाः स
मन्त्रा इत्युक्त्वा पिण्डाग्रे चालयेत्० ततः पिण्डान् तथा च पिण्डस्थाने शंखं चक्रं लिखेत् ॥ तदूर्ध्वं नैवेद्यं शंखायनमः ॥ चक्रा
यनमः ॥ शंखचक्राभ्यां नमः ॥ पिण्डधारयात्रस्थाप्याग्रायपितृभ्यः स्थानमसीति भूमौ निधाय पिण्डार्चनम् ॥ नमोस्त्वनंता

178
राम
१६८

यसहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥ इति ॥ ततो विश्वेदेवा
त्रसंचाल्यमात्रादिपात्रान्नानीकृत्य यथाशक्ति दक्षिणां दद्यात् ॥ ॐ शादि सहित दक्षिणाद्रव्यमादाय ॥ ॐ अद्याभ्युदयिकश्राद्धे
स्मन्मातृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनां नांदीमुखीनामाभ्युदयिकश्राद्धसंबंधिनावसुसत्यसंज्ञकानां
विश्वेषां देवानां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि हिरण्यादिनीवकूर्चादि दैवं
तानि यथानाम गोत्राय ब्राह्मणायाहं संप्रददे ॥ एवामेवापरित्रिकद्वयेपि - ततः ॐ मद्यामुकगोत्राया अस्मन्मातुरमुक
देव्या नांदीमुख्याः कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानीत्यादि पूर्ववत् ॥ एवं पितामहीभ्यां दद्यात् ॥ ॐ अद्यामुकगो
त्रस्यास्मत्पितुरमूकशर्मणो नांदीमुखस्य कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानित्यादि पूर्ववत् ० एवं पितामहप्रपि
तामहाभ्यां दद्यात् ॥ ॐ मद्यामुकगोत्रस्यास्मन्मातामहस्यामुकशर्मणो नांदीमुखस्य कृतैतदित्यादि पूर्ववत्तवहनीयम् ॥
अथ विसर्जनम् ॥ ॐ वसुसत्यसंज्ञका विश्वेदेवाः प्रीयंतामिति विश्वदेवविसर्जनं कृत्वा ॐ वाजे वाजे वत इत्यादि आमावाज
स्येत्यादि च मंत्रद्वयेन पितृविसर्जनं च कृत्वा दीपाच्छादनं विधाय हस्तौ पादौ प्रक्षाल्याचम्य देवताभ्य इति त्रिर्जपित्वा ॥ अस्यवि
धेः सर्वपरिपूर्णामस्तु ॥ यत्कृतं तन्नस्तु कृतं मस्तु यन्न कृतं तच्छिद्रमः (संपूर्णं स्यादिति श्रुतिः) प्रसादाद् ब्राह्मणानां च नाच्च सर्वं परि
पूर्णमस्तु ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः । इति मंत्रैः प्रार्थनां विधाय

CC-0. In Public Domain. Digitization by eGangotri

रत्न
१८९

एतत्सर्वं श्राद्धवस्तु विष्णवे प्रतिपादये ॥ इति प्रतिपत्तिं कुर्यात् ॥ आयुः प्रजां धनम् ॥ ॥ इत्याभ्युदयिकश्राद्धप्रयोगः ॥
अथ सङ्कल्पपार्वणविधिना दर्शश्राद्धप्रयोगः ॥ सपिण्डकश्राद्धाः शक्त्या वा हेमाद्रौ सर्वत ॥ समर्थं यस्तु शक्नोति कर्तुं नै
वेह पार्वणाम् ॥ अपि सङ्कल्पविधिना काले तत्तस्य विधीयते ॥ पात्रे भोज्यस्य चान्नस्य त्यागः सङ्कल्प उच्यते ॥ आवाहनं
स्वधाशब्दपिण्डाग्नौ करणं तथा ॥ विकिरं पिण्डदानं च सांकल्पे षड्विवर्जयेत् ॥ सांकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणा
पात्रस्य हस्तार्घस्य पूरणामित्यर्थः ॥ गोमयोपलिप्ते प्राङ्गणे दीपं प्रज्वाल्याचम्य सव्येन ताम्बूलादिकं विप्रकरे दत्वा पूर्वाभि
मुखो भूत्वा वैश्वदेविकब्राह्मणस्य दक्षिणजानुस्व वामहस्तेन तस्य स्वदक्षिणजानु पातयित्वा अधोमुखेन स्वदक्षिणक
रेण सताम्बूलादिकमुत्तानं विप्रदक्षिणकरं गृहीत्वा निमन्त्रयेत् ॥ ॐ अद्यामुकगोत्राणां श्राद्धसंबन्धिनां विश्वेषां दे
वानां पुरूरवोमाद्रवोनाम्नां सङ्कल्पपार्वणविधिनाद्य कर्तव्यदर्शश्राद्धे समभिवन्दन ताम्बूलपूगीफलतुलसीदलपु
ष्पाक्षतैस्त्वं मया निमन्त्रितः ॥ ॐ निमन्त्रितोस्मीति प्रतिवचनम् ॥ ततः पूर्ववद्विधाय ॥ ॐ अद्यामुकगोत्राणामस्म 179
न्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसंबन्धि राम
नां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्नां सङ्कल्पपार्वणविधिनाद्य कर्तव्यदर्शश्राद्धे समभिवन्दन ताम्बूलपूगीफलपु १८९
ष्पाक्षतैस्त्वं मया निमन्त्रितः ॥ ॐ निमन्त्रितोस्मीति प्रतिवचनम् ॥ ततोपसव्यं कृत्वा ॥ ताम्बूलादिकं विप्रकरे दत्वाद

७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्षिणाभिमुखो भूत्वा पितृब्राह्मणस्य दक्षिणजानु स्ववामहस्तेन स्पृष्ट्वा स्ववामजानुपातयित्वा ऽधोमुखेन स्वदक्षिणकरेण
ताम्बूलादिसहितमुत्तानं विप्रदक्षिणाकरं दक्षिणकरे गृहीत्वा निमंत्रयेत् ॥ ॐ अद्येत्याद्यमुकगोत्राणां मम्मस्मत्पितृपितामह
प्रपितामहानाममुकाऽमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां सं कल्पपार्वणश्राद्धे त्वमभि गंधाक्षतताम्बू
लपूगीफलतुलसीदलैस्त्वमयानिमंत्रितः ॥ ॐ निमंत्रितोस्मीति प्रतिवचनम् ॥ ॐ अद्येत्याद्यमुकगोत्राणां मम्मस्मन्माता
महप्रमातामहवृद्धप्रमातामातानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां सकल्पपार्वणश्रा
द्धे त्वमभि गंधनपुष्पाक्षतताम्बूलतुलसीदलपूगीफलताम्बूलदलैस्त्वमस्मयानिमंत्रितः ॥ ॐ निमंत्रितोस्मीति प्रतिव
चनम् ॥ ॐ अक्रोधनैः शौचपरैः सततब्रह्मवादिभिः ॥ भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥ सर्वपापविनिर्मुक्त
ः कामक्रोधविवर्जितैः ॥ भवितव्यं भवद्भिर्नौ यतनैः श्राद्धकर्मणि ॥ ॐ भवितव्यमिति प्रतिवचनम् ॥ ततः सव्येन विश्वदे
वब्राह्मणाय योश्वरणां प्रक्षालयेत् ॥ स्कंधटकादिकमग्रे कृत्वा ॥ शन्नो देवीरित्यादिना जलमभिमंत्र्य ॥ ॐ नमोस्त्वनन्ताये
त्यादि ॥ पाद्यपात्रं हस्ते कृत्वा ॥ ॐ अद्यामुकगोत्राणां मम्मस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नी
कानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बधिनो विश्वेदेवाः पुरूरवार्द्रवनामानः कर्त्तव्य सकल्पदर्शश्राद्धे एष पाद्यस्तार्घो
वः स्वाहा ॥ ॐ अद्यामुकगोत्राणां मम्मस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां

वसुरुद्रादित्यस्वरूपाणांश्राद्धसंबन्धिनोविश्वेदेवाःपुरूरवोमाद्रवोनामानस्तेषपाद्यार्घोवःस्वाहेतिजलंददद्युत्सृजेत् ॥ ततो
ऽपसव्येनपितृब्राह्मणानांचरणप्रक्षालनम् ॥ शन्नोदेवीरितिजलादिनापाद्यपात्रंविधाय ॥ ॐनमोस्त्वनन्तायेत्यादि यस्म
लेकपिलादाने॰ ॐअद्यामुकगोत्राअस्मत्पितृपितामहप्रपितामहाअमुकामुकामुकशर्माणःसपत्नीकावसुरुद्रादित्य
स्वरूपाःसङ्कल्पदर्शश्राद्धेएषपाद्यार्घस्वधाविभजन्त्युष्मभ्यंस्वधा ॥ ॐअद्यामुकगोत्राअस्मन्मातामहप्रमातामहवृद्धप्र
मातामहाअमुकामुकामुकशर्माणःसपत्नीकावसुरुद्रादित्यस्वरूपाःसंकल्पपार्वणश्राद्धेएषपाद्यार्घस्वधाविभजन्त्युष्मभ्यं
स्वधा ॥ ततःसव्येनावस्थगृहंप्रविशेत् ॥ ॐआगतास्थयूयम् ॥ ॐसुस्वागतावयम् ॥ ॐइदमासनमास्यताम् ॥ ॐआस्येइति
प्रतिवचनम् ॥ ॐभूर्भुवःस्वरितिमंत्रेणवैश्वदेविकब्राह्मणौपूर्वाभिमुखावुपवेशयेत् ॥ ततोऽपसव्येनॐआगतास्थयू
यम् ॥ ॐसुस्वागतावयमिदमासनमास्यतामास्येइतिप्रतिवचनम् ॥ ॐभूर्भुवःस्वरितिपितृब्राह्मणावुदङ्मुखावुपवे
शयेत् ॥ ततःसव्येनकर्मपात्रमहंकरिष्ये ॥ कुरुष्वेत्यनुज्ञातः ॥ येदेवाइत्यादिमंत्रत्रयेणदेवकर्मपात्रंकुर्यात् ॥ अपस
व्येनपितृब्राह्मणांस्पृष्ट्वाऽनेनैवमंत्रत्रयेणापितृकर्मपात्रंकर्त्तव्यम् ॥ सव्येनकुशत्रयसहितंकर्मपात्रोदकमादाय ॐ
मपवित्रःपवि० ॥ पुण्डरीकाक्षःपुनात्वित्युक्त्वाश्राद्धदेशेद्रव्याणामात्मानंचसिञ्चेत् ॥ ततःकुशादिकमादाय ॥ ॐअद्येत्याद्य
मुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांवैश्वदेव

पूर्वकाणां तथाऽमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रा
दित्यस्वरूपाणां पुरूरवार्द्रवनामविश्वेदेवपूर्वकाणां मघाकर्त्तव्यसकलदर्शश्राद्धे मेभिर्द्वयैरहं करिष्ये ॥ इति प्रतिज्ञां कृत्वा
ॐ देवताभ्य इति त्रिः पठेत् ॥ ॐ सप्तव्याधा दशार्णेषु० ॐ आद्यारम्भेगयां० इति पठित्वा ॥ अपसव्येन दिग्बन्धनं कुर्यात् ॥ ति
लसहितमोटकमादाय ॥ तिलानां पूर्वादिक्रमेणावक्ष्यमाणमन्त्रैर्विकिरेत् ॥ ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दि
शम् ॥ अपहता असुरा रक्षांसि वेदिषदः ॥ तथा बर्हिषदः पान्तु याम्यां ये पितरस्तथा ॥ अपहता असुरा रक्षांसि वेदि
षदः ॥ ॐ प्रतीचीमाज्यपास्तद्वदपहता असुरा रक्षांसि वेदिषदः ॥ अमुदीचीमपि सोमपा अपहता असुरा रक्षांसि वे
दिषदः ॥ ॐ रक्षोभूतपिशाचे० तु मे ॥ इति नीवधनम् ॥ ततः कुशतिलांश्चादाय ॥ ॐ प्रयान्तु हे० तिलान् ॥ इति दिग्बन्धः ॥ ततः
सव्येन विष्टरणम् ॥ अथासनम् ॥ कुशादिकमादाय ॥ ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुका
मुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरूरवोमाद्रवोनामानमिदं कौशरू
पमासनं वः स्वाहा ॥ ॐ मद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नी
कानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्ना मघादर्शश्राद्धे इदं कौशरूपमास
नं वः स्वाहा ॥ ततोऽपसव्येन मोटकादिकमादाय ॥ ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुका

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Exhibition

रत्न
१८१

मुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामिदमोदकरूपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा॥ ततः सव्येन ॐ अर्चयि
ष्ये इति वैश्वदेविकः ब्राह्मणो पृष्ठेन॥ ॐ अर्चयेत्युक्ते॥ गंधपुष्पाक्षतवस्त्रादिभिः समभ्यर्च्य धूपदीपौ च कारयेत्॥ कुशादि
कमादाय॥ ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादि
त्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोनामानः एतान्यर्चनानि गंधपुष्पाक्षतताम्बूलपुंगीफलय
ज्ञोपवीतवासांसि वः स्वाहा॥ ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुक
शर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोनामानः एतान्यर्चनान्यत्र गंधपु
ष्पाक्षतताम्बूलपुंगीफलयज्ञोपवीतवासांसि वः स्वाहा॥ ततोऽपसव्येनार्चयिष्ये इति पितृब्राह्मणान्प्रैषः॥ अर्चयेत्युक्ते
गंधादिभिरभ्यर्च्य धूपदीपौ च कारयेत्॥ मोटकादिकमादाय॥ ॐ अद्यामुकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमु
कामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा एतान्यर्चनान्यत्र गंधपुष्पाक्षतताम्बूलपुंगीफलयज्ञोपवीतवासां १८१
सि त्रेधा विभज्य युष्मभ्यं स्वधा॥ तथाऽमुकगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकशर्माणः राम
सपत्नीका वसुरुद्रादित्यस्वरूपा एतानि विप्रार्चनान्यत्र गंधपुष्पाक्षतताम्बूलपुंगीफलयज्ञोपवीतवासांसि त्रेधा वि १८१
भज्य युष्मभ्यं स्वधा॥ सव्येन विश्वेदेवब्राह्मणयोरर्चनविधेः सर्वपरिपूर्णमस्त्विति जलं दद्यात्॥ अपसव्येन पितृब्राह्म

CC-0. In Public Domain. Digitization by eGangotri

णायोः॥ सव्याऽपसव्याभ्यां विश्वेदेवपितृब्राह्मणानामासनसहितेवज्रकोणं मंडलं विधाय॥ अपसव्येनतिलघृतम
धुजलयुतमन्नमोदकादिसहितमादाय दक्षिणाभिमुखो भूत्वा॰ ॐ मिदमन्नं सजलपेनह्रस्वाभिपितृभ्यो नमइत्यन्नमन्त्रजे
त॥ अथान्नसङ्कल्पः॥ सव्येनप्रथमं विश्वान्देवान्ध्यायन्सोपस्करं यवजलयुतमन्नमुपनीयमधुनाऽभिघार्यञ्ज
नुहस्ताभ्यामन्नपात्रमालभ्य॥ ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा॥ इदं विष्णुर्विच
क्रमे त्रेधा निदधे पदम्॥ समूढमस्य पांसुरे ॐ विष्णो हव्यं रक्ष॥ इति पठित्वा विप्रस्य दक्षिणकरं गृहीत्वा॥ ॐ इदमन्न
मित्यन्ने॥ इमा आप इति जले॥ इदमाज्यमिति जले॥ इदं हविरिति पुनरन्ने॥ एतान्युपकरणानीति क्रमेणान्नजलघृते
षु विप्रकरं निवेश्य॥ ॐ यवोऽसि सोमदेवत्य इति मंत्रेणान्नोपरि यवान्विकीर्य॥ कुशयवजलान्यादाय॥ ॐ अद्यामुक
गोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्ब
धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवोमाद्रवोनामभ्य इदमन्नं सजलं सोपकरणमक्षय्यतृप्तिहेतोर्वः स्वाहेति ब्राह्मणकरे स
मर्पयेत्॥ ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां
वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बधिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवोमाद्रवोनामभ्य इदमन्नं सजलं सोपकरणमक्षय
तृप्तिहेतोर्वः स्वाहा॥ ततोऽपसव्येन॥ सोपस्करं तिलजलयुतमन्नमुपनीय मधुनाभिघार्याऽधोमुखाभ्यां हस्ताभ्यां पा

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न
१८२

निभ्यां मन्त्रपात्रमालभ्य ॐ पृथिवीतेया० इदंविष्णुर्विच० ॥ विलोकयच्छ० रक्ष ॥ इतिपठित्वाविप्रस्यदक्षिणाकरंगृहीत्वा ॐ
इदमन्नमित्यन्ते ॥ ॐ इदमापइतिजले ॥ इदमाज्यम् ॥ इदंहविरित्यन्नमुपकरणानि ॥ ॐ अपहताइति मंत्रेणान्नोपरितिला
न्विकीर्य ॥ मोटकतिलजलान्यादाय ॥ वामहस्ताङ्गुल्यङ्गुष्ठैः क्रमेणान्नमपश्यस्पृष्ट्वा ॥ ॐ अद्येत्यामुककगोत्रेभ्योस्मत्पि
तृपितामहप्रपितामहेभ्योऽमुकाऽमुकाऽमुकशर्मभ्यः सपत्नीकेभ्योवसुरुद्रादित्यस्वरूपेभ्यइदंमन्नंसजलंसोपस्कर
णापरिविष्टंपरिवेष्यमाणाममक्षयतृप्तिहेतोस्वधाविभज्यपुष्पम्भ्यंस्वधा ॥ ॐ अद्यामुकगोत्रायोऽस्मन्मातामहप्र
मातामहवृद्धप्रमातामहेभ्योऽमुकाऽमुकाऽमुकशर्मभ्यः सपत्नीकेभ्योवसुरुद्रादित्यस्वरूपेभ्यइदमन्नंसजलंसोपकर
णामक्षयतृप्तिहेतोस्वेधाविभज्यपुष्पम्भ्यस्वधा ॥ ततःसव्येनविश्वदेवब्राह्मणाकरयोरोमन्त्रकरयोरोमन्त्रसंकल्पसि
द्धिरस्त्वितिजलन्दद्यात् ॥ अपसव्येनपितृब्राह्मणाकरेषुजलंदद्यात् ॥ ततःकार्त्तासव्येनमधुवातेतितृचंवम्पठेत्
ॐ मधु३ ॐ अन्नहिनंक्रिया० नमस्कम्भ्योविरूपा० इतिपठेत् ॥ ततः सव्याहृतिकांगायत्रींमधुवातेतित्र्यृचंवंचपठि
त्वापितृसूक्तंपठेत् ॥ कृणुष्वपाजः ॥ ६ ॥ सुरावन्तम् ॥ ४५ ॥ सहस्रशीर्षा २२ ॥ आशुःशिशानः ॥ १७ ॥ नमस्ते ॥ ६६ ॥ 182 राम
तदेव ॥ १६ ॥ अग्नयेकव्यवाहनाय ६ ॥ ~~इतिपितृसूक्तम्~~ ॥ अपसव्येननीविविस्रंस्य ॥ सव्येनविश्वदेवब्राह्मणाहस्ते १८२
ॐ जलगंडूषमिदन्तेइत्ययेशानंदद्यात् ॥ एवंमेवाऽपसव्येनपितृब्राह्मणाकरेः ॥ सव्येनविश्वदेवब्राह्मणाकरयोः ॥ ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शिवा आपः सन्तु इति जलम् ॥ सौमनस्यमस्तु अक्षतं चारिष्टमस्तु इति जलं पुष्पं तण्डुलान् दत्वा ॥ अपसव्येन पितृब्राह्मणकरे
ॐ शिवा आपः सन्तु इति जलम् ॥ सौमनस्यमस्त्विति पुष्पम् ॥ ॐ अक्षतं चारिष्टमस्त्विति तण्डुलान् दत्वा ॥ ततः सव्येन पूर्वा
भिमुखो भूत्वा ॥ ॐ अपां मध्ये स्थिता इत्यादि मन्त्रत्रयं पठेत् ॥ ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्
ॐ अस्मत्कुले दीर्घमायुरस्तु ॥ ॐ शान्तिरस्तु ॥ ॐ पुष्टिरस्तु ॥ ॐ तुष्टिरस्तु ॥ ॐ यच्छ्रेयस्तदस्तु ॥ ॐ यत्पापं तत्प्रतिहतमस्त्विति भू
मौ ॥ ॐ द्विपदे चतुष्पदे सर्वत्र शान्तिर्भवतु ॥ सव्येनैवाञ्जलिं बध्वाऽऽशिषः प्रार्थयेत् ॥ ॐ गोत्रन्नो वर्द्धताम् ॥ ॐ वर्द्धतामि
मिति प्रतिवचनम् ॥ ॐ दातारो नोभिवर्द्धन्ताम् ॥ ॐ वर्द्धन्ताम् ॥ ॐ वेदाः सन्ततिरेव च ॥ ॐ सन्तु ॥ ॐ श्रद्धा च नो मा गमत्
ॐ बहुदेयं च नोऽस्तु ॥ ॐ अस्तु ॥ ॐ अन्नं च नो बहु भवेत् ॥ ॐ भवतु ॥ ॐ अतिथींश्च लभेमहि ॥ ॐ लभध्वम् ॥ ॐ याचितारश्च
नः सन्तु ॥ ॐ सन्तु ॥ ॐ मा याचिष्म कञ्चन ॥ ॐ मा याचेथाः ॥ एताः सत्या आशिषः सन्तु ॥ ततः श्राद्धकर्त्ता ब्राह्मणहस्ते तिल
कं कुर्य्यायत्काममिति मन्त्रेण ॥ ततः सव्येनैव दक्षिणाद्रव्यमादाय ॥ ॐ तत्सदद्यामुकगोत्राणामस्मत्पितृपितामहप्रपिता
महानाममुकामुकामुकशर्म्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पुरूरवोमाद्रवोनामविश्वेदेवपूर्वकाणां सक
ल्पयार्वणश्राद्धप्रतिष्ठार्थं रजतादिद्रव्यादिदैवतं यथानामशर्म्मणे ब्राह्मणाय दातुमहं सम्प्रददे ॥ इति ॥ पुनर्मातामह
पक्षेप्येवम् ॥ पुनः पितृदक्षिणासहितं कुशादिकमादाय ॥ ॐ अद्याद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाम्

CC-0. In Public Domain. Digitization by eGangotri

रत्न
१८३

मुकामुका॰मुकशर्मणोसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांकृतैतत्संकल्पदर्शश्राद्धप्रतिष्ठार्थंद्रव्यंयथानामदैवतंनाना
शर्मभ्योब्राह्मणेभ्योयथाभागंविभज्यदक्षिणात्वेनअहंसंप्रददे॥ततनर्मानामहपक्षेऽपि॥ततनर्दक्षिणाद्रव्यादिकमादाय ॐ
अद्यामुकगोत्राणांमस्मत्पितृपितामहप्रपितामहानांममुकामुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणां
तथाअमुकगोत्राणाममस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणांसपत्नीकानांवसुरुद्रा
दित्यस्वरूपाणांसंकल्पपार्वणविधिकृतदर्शश्राद्धप्रतिष्ठासिद्ध्यर्थंन्यूनातिरिक्तपरिपूर्णार्थंयद्दृश्यमन्नंवानदैवतम
मुकब्राह्मणेभ्यो॰संप्रददेइतिसमुत्सृजेदेवेति॥ततःसव्येनैवमुहूर्त्तोमाइवोनामानोविश्वेदेवाःप्रीयन्तामितिदेवेवाच
यित्वाअपसव्येनः॥ॐवाजेवाजइतिपितृविसर्जनम्॥ततःसव्येनदेवताभ्यइतित्रिःपठेत्॥अथसव्येनदीयमानाकृपस
व्येनहस्तौपादौप्रक्षाल्याचम्येतिपठेत्॥अस्यसंकल्पविधिकृतदर्शश्राद्धविधेयन्नकृतमस्मयन्नकृतन्नाक्षिण्योःप्रसादाब्राह्म
णएववचनात्सर्वम्परिपूर्णमस्तु॥ॐअस्तुपरिपूर्णमितिब्राह्मणाब्रूयुः॥ॐप्रमादात्कुर्वःआयुःप्रजां:ध०॥ॐकायेनवाचेति
नारायणायसमर्पयेत्॥ॐयस्यास्मृत्याचनामोक्त्यांतपोयज्ञक्रियादिषु॥न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतम्॥ॐ
अच्युतायनमः॥२॥पूर्णोदर्शश्राद्धमिति॥ ॥इतिसंकल्पपार्वणश्राद्धप्रयोगः॥॥अथपार्वणोगौरिको॥हृद्धिश्राद्धवि
धिः॥तत्रमातामहादिवर्जंपितृपितामहप्रपितामहानांत्रयपिराज्ञः॥एकेविश्वेदेवाः॥अथप्रयोगःगोमयोपलिप्तेप्राङ्

183
राम
१८३

१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽरणादौ॰ दीपं प्रज्वाल्य॰ सव्येन तां तूलादिकं विप्रहस्ते दत्वा पूर्वाभिमुखो भूत्वा विश्वेदेविकब्राह्मणस्य वामहस्तेन दक्षिणजानुं स्पृ
ष्ट्वा॰ स्वदक्षिणजानुं पातयित्वा अधोमुखेन स्वदक्षिणहस्तेन सतां तूलादिकं उत्तानं विप्रकरं गृहीत्वा इति मंत्रयेत् ॥ ॐ अद्येह इत्यादि
अमुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसंबंधि
नां विश्वेषां देवानां पुरुरवोमाद्रवसंज्ञकानां अद्य कर्त्तव्यपार्वणैकोद्दिष्ट श्राद्धे गन्धाभिश्चंदन पुष्पाक्षत पूंगफल यज्ञोपवीत वासो
भिस्त्वं मया निमंत्रितः ॥ ॐ निमंत्रितोस्मीति प्रतिवचनं ॥ ततो उपसव्यं कृत्वा ताम्बूलादिकं विप्रहस्ते दत्वा दक्षिणाभिमुखो
भूत्वा वामहस्तेन पितृब्राह्मणस्य वामजानुं स्पृष्ट्वा स्ववामजानुं पातयित्वा अधोमुखेन स्वदक्षिणकरेण सतां तूलादिकं वि
प्रकरं गृहीत्वा निमंत्रयेत् ॥ ॐ अद्येह इत्यादि अमुकगोत्राणां अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्मणां सप
त्नीकानां वसुरुद्रादित्यस्वरूपाणां अद्य कर्त्तव्य पार्वणैकोद्दिष्ट श्राद्धे॰ गन्धाभिश्चन्दन पुष्पाक्षत पूगीफल यज्ञोपवीत वासोभि
स्त्वं मया निमंत्रितः ॐ निमंत्रितोस्मीति प्रतिवचनं ॥ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ॥ भवितव्यं भवद्भिश्च मया च
श्राद्धकारिणा ॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ॥ भवितव्यं भवद्भिन्नोद्यतने श्राद्धकर्मणि ॥ ॐ भवितव्यमिति
प्रतिवचनम् ॥ ततः सव्येन विश्वेदेवब्राह्मणचरणौ प्रक्षालयेत् ॥ नमोस्त्वनन्तायेत्यादिना ॥ ततः पाद्यपात्रं वामकरे कृत्वा
शन्नोदेवीरिति मंत्रं पठित्वा॰ ॐ अद्येहामुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां स॰

Nepal Sanskrit University

रत्न
१८४

व० श्राद्धसंबंधिनो विश्वेदेवाः पुरूरवोमाद्रवसनामानस्तेषां पादार्घं वः स्वाहा ॥ ततोऽपसव्येन पितृब्राह्मणस्य चरणौ प्र
क्षालयेत् ॥ नमोस्त्वनन्तायेत्यादिना० यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे ॥ तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौ
चने ॥ इति च पठित्वा० शन्नो देवीरिति मंत्रान्ते ॥ ॐ अद्येहामुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकामुकामु
कशर्माणः स० व० अद्यकर्त्तव्यसांवत्सरीकपार्वणश्राद्धे० एषपादार्घस्त्रेधाविभज्यपृथक्पृथक् स्वधा ॥ ततः सव्येनाचम्य गृहं
विशेत् ॥ ॐ आगताश्रयम् ॥ ॐ सुस्वागतावयम् ॥ इदमासनमास्यतां ॥ ॐ आस्ये इति प्रतिवचनम् ॥ ॐ भूर्भुवः स्वरिति
मंत्रेण विश्वेदेवब्राह्मणां पूर्वाभिमुखं उपवेशयेत् ॥ ततोऽपसव्येन ॥ ॐ आगताश्रयम् ॥ ॐ सुस्वागतावयं० ॥ इदमासन
मास्यतां ॐ आस्ये इति प्रतिवचनम् ॥ ॐ भूर्भुवः स्वः इति मंत्रेण पितृब्राह्मणान् उदङ्मुखं उपवेशयेत् ॥ ततः सव्येन ॐ क
र्मपात्रमहं करिष्ये इति पृच्छेत् ॐ कुरुष्वेत्यनुज्ञातः सन् ॥ ॐ यद्देवा देवहेडनमिति कण्डिकात्रयेण दैवकर्मपात्रं कुर्यात्
अपसव्यं कृत्वा पितृब्राह्मणानां पुरस्तात्तेनैव मंत्रेण पितृकर्मपात्रं कर्त्तव्यम् ॥ सव्येन कुशत्रयसहितं कर्मपात्रोदकमादा
य ॥ ॐ अपवित्रेत्यादि ॥ ॐ पुण्डरीकाक्षः पुनातु इत्युक्त्वा श्राद्धदेशे द्रव्याण्यात्मानं च सिंचेत् ॥ ॐ अद्येत्यादि अमुकगोत्रा
णां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां स० व० पुरूरवोमाद्रवोनाम्नां विश्वेदेवपूर्वकाणां
अद्यकर्त्तव्यपार्वणैकोद्दिष्टश्राद्धमेभिर्द्रव्यैरहं करिष्ये० इति प्रतिज्ञां कृत्वा ॥ ततः ॐ देवताभ्य इति त्रिः पठित्वा ॥ ॐ स

184
राम
१८४

२८

CC-0. In Public Domain. Digitization by eGangotri

सप्तव्याधा दशार्णेषु मृगाः कालंजरे गिरौ ॥ इति श्लोकद्वयं ॥ श्राद्धारंभे इत्येकश्लोकम् ॥ ईशान विष्णु कमलासन कार्तिकेय व
ह्नित्रयार्क रजनीश गणेश्वराणां ॥ क्रौंचामरेन्द्र कलशोद्भव काश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥ इति च पठेत्
ततोऽपसव्येन दक्षिणं धनं कुर्यात् तिलसहितमोदकमादाय तिलान् पूर्वादिक्रमेण वक्ष्यमाणमन्त्रैर्विकिरेत् ॥ ॐ अग्निष्वा
त्ताः पितृपितॄणाः प्राचीं रक्षन्तु मे दिशम् ॥ अपहता असुरा रक्षांसि वेदिषदः ॥ ॐ बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः
अपहता असुरा रक्षांसि वेदिषदः ॥ ॐ प्रतीचीमाज्यपास्तद्वत् ॥ अपहता असुरा रक्षांसि वेदिषदः ॥ ॐ उदीचीमपि
सोमपा अपहता असुरा रक्षांसि वेदिषदः ॥ उग्रमोदकं तीव्रां वध्नीयात् ॥ ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः
ॐ सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥ प्रयान्तु हरतः सर्वे देवेभ्या दानवस्तथा ॥ सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कु
शान् तिलान् ॥ द्वारदेशे विकिरेत् ॥ ततः सव्येन विष्णुस्मरणं ॥ अथासनम् कुशमादाय ॥ ॐ अद्यामुकगोत्राणां अस्मत्पि
तृपितामहप्रपितामहप्रपितामहानां अमुकामुकामुकशर्मणां स॰ व॰ श्राद्धसंबंधिनां विश्वेषां देवानां पुरूरवो माद्रव
सनाम्नां अद्य कर्त्तव्य पार्वणोद्दिष्टश्राद्धे इदं कौशमासनं वः स्वाहा ॥ ततोऽपसव्यं कृत्वा मोदकमादाय॰ ॐ अद्यामुक
गोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां स॰ व॰ अद्य॰ पार्वणोद्दिष्टश्राद्धे॰ इदम्मोद
करूपमासनं त्रेधा विभज्य पुष्पम्भम्भं स्वधाः ॥ ततः सव्येनाञ्जलिं वध्वा विश्वान् देवानावाहयेत् ॥ ॐ अद्येहामुकगोत्राणां

Nepal Sanskrit University, Balmiki Campus, Kathmandu

रत्न
१८५

अस्मत्पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां· स·व·श्राद्धसंबंधिनो विश्वेदेवाः पुरुरवोमाद्रवसनाम्नः अद्यः पार्व
णैकोद्दिष्टश्राद्धे आवाहयिष्ये· ॐ आवाहयेति प्रतिवचनानन्तरं॥ ॐ विश्वेदेवासआगतेति मंत्रेणावाह्य· ॐ यवोसीति यवान्वि
कीर्य ॐ विश्वेदेवाः शृणुतेति मंत्रं पठित्वा ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः॥ ये यत्र विहिताः श्राद्धे सावधाना भवन्तु
मे॥ इति पठेत्॥ ततोऽपसव्येनाञ्जलिंबध्वा पितॄनावाहयेत्॥ ॐ अद्येहामुकगोत्रानस्मत्पितृपितामहप्रपितामहान् अमुका
मुकामुककशर्मणः सपत्नीकान्वसुरुद्रादित्यस्वरूपान्॰ अद्य॰ सांवत्सरीकपार्वणश्राद्धे आवाहयिष्ये॰ ॐ आवाहयेति प्रति
वचनानन्तरं॥ ॐ उशन्तस्त्वेति मंत्रेणावाह्य॥ ॐ अपहता इति मंत्रेण तिलान्विकीर्य ॐ आयन्तु न इति मंत्रं पठेत्॥ ततः
सव्येन विश्वेदेवब्राह्मणं पृच्छेत्॥ ॐ हस्तार्घपात्रमहं करिष्ये ॐ कुरुष्वेत्यनुज्ञातः सन्॥ एककमेकमग्रे कृत्वा ॐ पवित्रे
स्थ इति मंत्रेण पूर्वाग्रं पवित्रं स्थापयेत्॥ शन्नो देवीरिति जलं यवोसीति यवान् श्रीश्च तेइति पुष्पाणि क्षिपेत्॥ गंधद्वारा
मिति गंधं क्षिपेत्॰ हस्तार्घपात्रं संपन्नं॰ सुसंपन्नमित्युक्ते॰ हस्तार्घपात्रमुत्थापयामि॰ उत्थापयस्वेति प्रत्युक्ते॰ हस्ता
र्घपात्रं वामहस्ते कृत्वा॰ पुष्पसहितपवित्रं गृहीत्वा· ॐ नमो नारायणायेति मंत्रेणाविप्रकरे पुष्पसहितं पूर्वाग्रं पवित्रं ध
त्वा॰ दक्षिणाकरेण एककमुत्तानमपिधाय॰ ॐ यादिव्या इति मंत्रेणार्घपात्रस्थं जलमभिमंत्र्य॰ कुशयवजलान्यादाय॰
ॐ अद्येहामुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां॰ अमुकामुककशर्मणां॰ स॰व॰ श्राद्धसंबंधिनो विश्वेदेवाः पु

185
राम
१८५

रुरवो मद्रवसनामा न अग्य: पार्वणो कोद्दिष्ट श्राद्धे० एष हस्तार्घो वः स्वाहेति० ब्राह्मणाकरेऽर्घं दद्यात्॥ अर्घप्रमर्घमस्तु०
तदर्घपात्रं भूमौ धृत्वा॥ अर्घपात्रस्थजलेन नन्वक्षुरिति चक्षुः स्पर्श। ततो दक्षिणायां पार्श्वे विश्वेभ्यो देवेभ्यः स्थानमसीति उ
त्तानं स्थापयेत्॥ ततो उपसव्येन हस्तार्घपात्राणाहं करिष्ये· इति ब्राह्मणां पृच्छेत्० ॐ कुरुष्वेत्युक्ते० स्वाग्रेष्वेकैकत्रय मास्ता
घ्रतेषु पवित्रेस्थ इति मंत्रेणोत्तराग्राणि पवित्राणि धारयेत्० शन्नोदेवीरिति जलं० तिलोसीति तिलान्॥ गंधद्वारामि
ति गंधं श्रीश्चते इति पुष्पाणि० प्रत्येकं क्षिपेत्० ततः ॐ हस्तार्घपात्राणि संपन्नानि॥ ॐ सुसम्पन्नानीति प्रत्युक्ते० ॐ हस्तार्घ
पात्राण्युत्स्थापयामि० ॐ उत्स्थापयस्वेति प्रत्युक्ते प्रथमं पित्रर्घपात्रं वामहस्ते कृत्वा· ॐ नमो नारायणायेति विप्रकरे
उत्तराग्रं पवित्रं धृत्वा० दक्षिणाकरेण हस्तार्घमुरवं विधाय· ॐ यादिव्येति तज्जलमभिमंत्र्य० जलतिलमोदकमादाय०
ॐ अद्येहामुकगोत्रास्मत्पितः अमुकशर्मन्नसव· अग्य० सां० एष हस्तार्घस्ते स्वधेति ब्राह्मणाकरेऽर्घं दद्यात्॥ अर्घप्रमर्घ
मस्तु· एवमुमाभ्याम्० ततः प्रपितामहार्घपात्रस्थजलादिकं· पितामहार्घपात्रे कृत्वा तदुभयं पित्रर्घपात्रे कृत्वा· पुन
पित्रर्घपात्रं· पितामहार्घपात्रे धृत्वा· तदुभयं प्रपितामहार्घपात्रोपरि धृत्वा॥ सव्यं कृत्वा तत्रस्थजलेन· ॐ नन्वक्षुरिति
चक्षुस्पर्शः॥ ततो उपसव्येन· पितृद्विजस्यासनवामभागे: ॐ पितृभ्यः स्थानमसीति न्युब्जं कुर्यात्० तदुपरि कुशत्रयं दद्या
त्॥ ततः सव्येन· ॐ अर्चयिष्ये· इति विश्वेदेवाब्राह्मणां पृच्छेत्० ॐ अर्चयेत्युक्ते॥ यज्ञोपवीतं गंधपुष्पाक्षतताम्बूलव(

लि
१८६

स्वोपायनइत्यादिभिः समभ्यर्च्य ब्राह्मणाय तिलकं दत्वा· धूपदीपौ च कारयेत्· कुशादिकमादाय ॐ अद्येहामुकगोत्राणां
अस्मत्पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां· स· व· श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवसनामान
एतान्यर्चनानि: अत्र गंधपुष्पाक्षतधूपदीपतांबूलयज्ञोपवीतउपायनवासांसि वः स्वाहा॥ इत्युत्सृजेत्॥ ततोऽप
सव्येन अर्चयिष्ये इति० पितृब्राह्मणं पृच्छेत्॥ अर्च्चयेत्युक्ते सति· गंधादिभिरभ्यर्च्य मोटकादिमादाय॥ ॐ अद्येहामुक
गोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकामुकशर्मणः सपत्नीकाः वसुरुद्रादित्यस्वरूपा· एतान्यर्चनानि
अत्र गंधपुष्पाक्षतधूपदीपतांबूलयज्ञोपवीतोपायनवासांसि त्रेधाविभज्य युष्मभ्यं स्वधेति उत्सृजेत्॥ सव्येन वि
श्वेदेवब्राह्मणहस्ते अर्घ्यनविधेः सर्वं परिपूर्णमस्तु इति जलं दद्यात्॥ अस्त्वित्युक्ते सति· सव्येनैव विश्वेदेवब्राह्मणभो
जनस्थाने चतुर्दिक्षु आसनसहितं चतुष्कोणं मण्डलं विधाय०॥ अपसव्येन पितृब्राह्मणभोजनस्थाने चतुर्दिक्षु आ
सनसहितं चतुष्कोणं मण्डलं कुर्यात्॥ अथ सव्येनाग्नौकरणम्॥ प्राङ्मुखउप· वीतिपातितदक्षिणजानुः पुटकाद्ये
सघृतमन्नं कृत्वा· ॐ अग्नौकरणमहं करिष्ये॥ इति पितृब्राह्मणं पृच्छेत्० ॐ कुरुष्वेत्यनुज्ञातः सन्· पितृब्राह्मणकरे जलपा
त्रे वा जुहुयात्॥ ॐ अग्नये कव्यवाहनाय स्वाहा० इदमग्नये कव्यवाहनाय ॐ सोमाय पितृमते स्वाहा॥ इदं· सोमाय पितृ
मते· इति आहुतिद्वयं जुहुयात्० हुतशेषमन्नं विश्वेदेवब्राह्मणपात्रोपरि० क्षिपेत्० अपसव्येनः पितृब्राह्मणपात्रे

186
राम
१८६

२२

CC-0. In Public Domain. Digitization by eGangotri

क्षिपेत्॥ अथ भूस्वामि॥ तिलघृतमधुजलयुतमन्नं मोदकादिसहितमादाय· दक्षिणाभिमुखो भूत्वा इदमन्नं सजलं
सघृतं भूस्वामिपितृभ्यो नमः इत्युत्सृजेत्॥ अथान्नसंकल्प॥ ततः सर्वं कृत्वा विश्वान्देवान्ध्यायन्सोपस्करं यवजलयुतं
अन्नमुपनीय मधुनाभिघार्य· ऋजुहस्ताभ्यामन्नपात्रमालभ्य· ॐ पृथिवी ते पात्रं द्यौर पिधानं ब्राह्मणस्य मुखे ३ अमृ
ते अमृतं जुहोमि स्वाहा॥ ॐ इदं विष्णुरित्यादि समूढे इत्यन्तं पठित्वा॥ विप्रदक्षिणाङ्गुष्ठं निवेश्य· ॐ इदमन्नं· ॐ इमा आप·
ॐ इदमाज्यम्· ॐ इदं हविरिति अन्ने· एतान्युपकरणानीति क्रमेणान्नजलघृते भुवि प्रकरन्निवेश्य। ॐ यवोसीति मंत्रे
ण यवान् अन्नोपरि विकीर्य· कुशयवजलान्यादाय वामहस्ताङ्गुल्याङ्गुष्ठैः क्रमेणान्नं अपश्च स्पृष्ट्वा। ॐ अद्येहामुकगो
त्राणां अस्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां स० व० श्राद्धसंबन्धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवो मा
द्रवसनामभ्यः इदमन्नं सजलं सोपस्करं परिविष्टं परिवेष्यमाणं चाक्षय्यं तत्प्रिहे नो र्वः स्वाहेति ब्राह्मणकरे कुशादिकमु
त्सृजेत्॥ ततोपसव्येन सोपस्करं तिलजलयुतमन्नमुपनीय अधोमुखाभ्यां अन्नपात्रमालभ्य। ॐ पृथिवी ते इत्यादि· जुहो
मि इत्यन्तं पठित्वा· ॐ इदं विष्णुरित्यादि समूढे इत्यन्तं पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा ॐ इदमन्नम्। ॐ इमा आपः ॐ दमाज्यं
ॐ इदं हविरिति पुनरन्ने· एतान्युपकरणानीति क्रमेणान्नजलघृते भुवि प्रदक्षिणाङ्गुष्ठं निवेश्य॥ अपहता असुरा रक्षांसि
सि वेदिषद इति पठित्वा ३ न्नोपरि तिलान्विकीर्य मोदकादीन्यादाय· वामहस्ताङ्गुलिभिः क्रमेणान्नमपश्च स्पृष्ट्वा· ॐ अद्येहा

Nepal Sanskrit University, Balmiki Campus, Kathmandu

रत्न

मुकगोत्रेभ्यो ऽस्मत्पितृपितामहप्रपितामहेभ्यो ऽमुका ऽमुका ऽमुकशर्मभ्यः स० व० इदमन्नं सजलं सोपस्करं परिविष्टं परिवेष्यमा
णं चाक्षयतृप्तिहेतोः स्वधा विभज्य युष्मभ्यं स्वधेति ब्राह्मणाकरे मोदकादिकमुत्सृजेत्॥ ततः सव्येन विश्वेदेवब्राह्मणाकरयोः
ॐ भवान्प्राश्नयतां इत्यपोशानं दद्यात्॥ अपसव्येन पितृब्राह्मणाकरेषु ॐ भवन्तः प्राश्नयन्तु इत्यपोशनं दत्वा· सव्येन श्रा
द्धकर्त्ता कुशोपरिविशन् ॐ मधुवातेति त्र्यृचं पठेत्॥ ॐ मधु० ३ ॐ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्॥ तत्सर्वमच्छि
द्रमस्तु॥ ॐ नमस्त्वस्तु विरूपाक्ष नमस्ते स्फकचक्षुषे॥ नमः पिनाकहस्ताय वज्रहस्ताय वै नमः॥ इति पठेत्॥ जुषध्वमिति
वचनानन्तरं॥ ततः सव्याहृतिकां गायत्रीं मधुवातेति त्र्यृचं च पठित्वा· पितृसूक्तं च पठेत्॥ तद्देवः अग्नये कव्यवाहनाये
ति षट्कृणुध्व याज इति पंच· सुरावन्तमित्यादि पितृहविषे अन्नवेश्यन्तं· सहस्रशीर्षेति षोडश· नमस्ते इति समस्त इ
ति पितृसूक्तं पठेत्॥ ततो ब्राह्मणानां यत्र यत्रेच्छोपलभ्यते तत्तत्प्रयच्छन् मन्दं मन्दं भोजयेत्॥ ततः पितामहान्नपात्रस
न्निधौ आस्तृतदक्षिणाग्रकुशत्रयायां भूमौ अपसव्येन मोदकादिकमादाय विकरासनं दद्यात्॥ असंस्कृतप्रमीतानां त्या
गिनां कुलयोषितां॥ उच्छिष्टभागधेयानां दर्भेषु विकरासनं॥ इति आस्तृतकुशोपरि मोदकमुत्सृजेत्॥ सतिलघृतमन्न 187 रत्न
मादाय जलेनाऽऽप्लाव्य मोदकादिकमादाय· अग्निदग्धाश्च ये जीवा इत्यास्तृतकुशोपरि अन्नं विकिरेत्॥ ततः कुशान्परि १८७
त्यज्य हस्तौ पादौ प्रक्षाल्य· सव्येन द्विराचम्य· गायत्रीं जपित्वा मधुवाता इति त्र्यृचां पाठः॥ ततो ब्राह्मणान्तृप्तान् ज्ञात्वा सव्ये

न॥ ॐ जलगराद्रूषमिदन्नेइति विश्वेदेवब्राह्मणायप्रत्येयोशानन्दद्यात्॥ अपसव्येन ॐ जलगरपद्रूषं इदन्नेइति ब्राह्मणायप्र
त्यपोशानन्दद्यात्॥ सव्येनाञ्जलिंवध्वा विश्वेदेवब्राह्मणां प्रतिप्रश्नः ॐ तृप्ताः स्थ ॐ तृप्ताःस्मः इतिप्रतिवचनम्॥ ॐ शेषमन्नं
किंक्रियतामितुभयत्र प्रश्नः ॐ इष्टैः सह भुज्यतामिति प्रतिवचनं॥ ॐ पिण्डदानमहं करिष्ये इति उभयत्र पृच्छेत्॥ ॐ कु
रुष्वेति प्रतिवचनं॥ ततः पिंडदानार्थं हस्तमितां चतुरंगुलोच्छ्रितां सैकतादिकीं दक्षिणाप्लवां पिंडिकां निर्माय तदुपरि ॐ
येरूपाणि इति अंगारं भ्रामयित्वा दक्षिणस्यां दिशि क्षिपेत्॥ ततः पिंडिकामध्ये वामेन पाणिना दर्भपिञ्जुलिं गृहीत्वा दक्षिण
हस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिना अपहता इत्यादि षड्दइत्यन्तेन मंत्रेण दक्षिणाग्रां रेखां कृत्वा दर्भपिञ्जुलिं उत्तर
स्यां क्षिपेत्॥ ततो जलेन पिंडिकामेवनं॥ तदनुच्छिन्नमूलकुशान् पिंडिकायां दद्यात्॥ ततः सव्येन देवताभ्य इति त्रिः पठेत्
अपसव्यं कृत्वा एकं पुटकं वामहस्ते कृत्वा॥ मोटकादिकमादाय ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूप अत्र
श्राद्धे पिंडस्थाने अनावने विश्वते स्वधेति छिन्नमूलकुशोपरि अवनेजनं दद्यात्॥ एवं पितामहप्रपितामहाभ्यां दद्यात्॥ त
तः पिंडान्निर्माय प्रथमपिंडं वाद्यायवामहस्तेन पुटकादिस्थजलमादाय॥ ॐ अद्येहामुकगोत्रास्मत्पितर अमुकशर्मन् वसुस्व
रूप एष पिंडो ऽमत स्वरूपो ऽक्षय तृप्तिहेतोस्ते स्वधेति॥ अवनेजनोपरि पिण्डं दद्यात्॥ एवं पितामहप्रपितामहाभ्यां दद्या
त्॥ ततः आस्तृतकुशमूले न ॐ लेपभागभुजस्तृप्यन्तु इति करं प्रोक्ष्य सव्यं कृत्वा हिरावमहरिं स्मरेत्॥ ततः सव्येन वउष्मा

CC-0. In Public Domain. Digitization by eGangotri

दीन्यादाय· पित्राद्युद्दिश्य ॥ ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति उत्तराभिमुखो भूत्वा पठेत् ॥ श्वासं नियम्य आस्व
रमूर्तीन्पित्रादीन्ध्यायन् अपसव्यं कृत्वा दक्षिणावर्त्तेन दक्षिणाभिमुखो भूत्वा ॥ ॐ अ - मदन्त पितरो यथाभागमावृषायिषत इ
ति मंत्रेण पुष्पादिकं पिंडे प्रक्षिपेत् ॥ ततोऽवनेजनपात्रं वामहस्ते कृत्वा मोटकादिकमादाय· ॐ अद्येहामुकगोत्रास्मत्पितरमु
कशर्मन् वसुस्वरूप इदं पिण्डप्रत्यवनेजनं ते स्वधेति पिंडोपरि प्रत्यवनेजनं दद्यात् ॥ एवं पिंडद्वयेपि॰ ततो नीवीं विस्रस्य सव्यं कृ
त्वा वस्य हरिं स्मरेत्- अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय॰ ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय न
मो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृ
हान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वास· इति मंत्रेण प्रत्येकं पिंडोपरि सूत्रं दद्यात् ॥ ततः क्रमेणापिडनाधा
दिभिः संपूज्य धूपदीपौ च कारयेत् ॥ मोटकादिकमादाय ॥ ॐ अद्येहामुकगोत्रास्मत्पितृपितामहा अमुका अमुकामुकशर्माणः
स·व· एतानि पिंडार्चनानि अन्नसूत्रगन्धाक्षतपुष्पधूपदीपैक्षवादिनैवेद्यादिनित्रेधाविभज्य युष्मभ्यं स्वधा· ततः सव्येन वि
श्वेदेवब्राह्मणकरयोः ॥ ॐ शिवा आपः सन्तु इति जलं· ॐ सौमनस्यमस्तु इति पुष्पं· ॐ अक्षतं चारिष्टमस्तु इति· यवान्· प्रत्येकं दद्यात्
अपसव्येन पितृब्राह्मणकरयोः प्रत्येकं दद्यात् ॥ ततः सव्येनाञ्जलिं बध्वा पूर्वाभिमुखो भूत्वा इति पठेत् ॥ ॐ अपां मध्ये स्थिता दे
वाः सर्वमप्सु प्रतिष्ठितं ॥ ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ॥ लक्ष्मीर्वसतिस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दागोष्ठे सोमनस्यन्ददातु मे॥ अक्षतं चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा॥ यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम॥ ततः कर्मपात्रो
दकं कुशैर्गृहीत्वा शिरस्यभिषिंचेत् अस्मत्कुले दीर्घमायुरस्तु॥ ॐ शान्तिरस्तु ॐ पुष्टिरस्तु ॐ यच्छ्रेयस्तदस्तु ॐ यत्पापं तत्प्रतिह
तमस्तु भूमौ द्विपदे चतुष्पदेभ्यः शान्तिर्भवतु ततोपसव्येन पिंडशेषान्नं पिंडसमीपे विकिरेत्॥ वामहस्ते पुटकादिस्थजलं कृत्वा
मोटकमादाय ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणः स॰ व॰ अत्र श्राद्धे दत्तैतदन्नपानामक्षय्यमवस्तु स्वधा इति पिंडे अ
क्षय्योदकं दद्यात्॥ एवं मातामहादिभ्यामपि ततः सव्येन दक्षिणादिशमवलोकयन् ॐ अघोराः पितरः सन्तु इति सर्वपिण्डोपरि
पूर्वाग्राञ्जलधारां दद्यात्॥ ततः सव्येनैव प्राङ्मुखोञ्जलिं बध्वा आशिषः प्रार्थयेत् ॐ गोत्रन्नो वर्द्धतां ॐ व॰ ॐ दातारो नोऽभिव
र्द्धन्तां ॐ वर्द्धन्तां प्र॰ ॐ वेदाः सन्ततिरेव च॰ ॐ सन्त्विति ॐ श्रद्धा च नो माव्यगमत् ॐ मा गादि ॐ बहुदेयं च नोस्तु ॐ अस्त्विति ॐ
अन्नं च नो बहु भवेत्॥ ॐ भवत्विति ॐ अतिथींश्च लभेमहि ॐ लभध्वमिति ॐ याचितारश्च नः सन्तु ॐ सन्त्विति ॐ मा याचिष्म
कं चन ॐ मा याचेथा इति ॐ एताः सत्याशिषः सन्तु ॐ सन्त्विति प्रतिवचनम्॥ ततः श्राद्धकर्त्ता ब्राह्मणहस्ते तिलकं कारयेत्
ॐ यं कामं कामयते सोस्मै कामः समृध्यतामिति मंत्रेण॥ ततोपसव्येन सपवित्रान्कुशान्पुत्रपात्रान्पिंडोपरि क्षिपेत्॥ ॐ स्वधां
वाचयिष्ये इति पृच्छेत् ॐ वाच्यतामिति प्रतिवचनानन्तरं रिक्ताञ्जलिना ॐ अद्येहामुकगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहे
भ्योऽमुकामुकामुकशर्मभ्यः स॰ व॰ स्वधोच्यतां ॐ अस्तु स्वधा इति प्रतिवचनानन्तरं॥ पयसादिसहितं पुटकं वामहस्ते कृत्वा॥ ॐ उ

CC-0. In Public Domain. Digitization by eGangotri

रत्न
१८९

र्जे वहन्तीरिति मन्त्रेण सपवित्रकुशोपरि दक्षिणाग्रां सपयोधारां दद्यात्· ततः पिण्डाः संपन्ना इति ब्राह्मणान् पृच्छेत् ॥ ॐ सुसंपन्ना
इति प्रतिवचनं· ॐ पितॄनुत्थापयामि· उत्थापयस्वेमतज्ञानः सन्तनश्रीभूय पिण्डानाघ्रायोत्थापयेत् ॥ पिण्डाधारकुशाग्रमु
कं च वह्नौ क्षिपेत्· सव्येन पिण्डिकायां शंखं चक्रं च विलिखेत् ॥ ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥ इति मन्त्रैः शंखचक्रपूजां विधा
याप सव्यं कृत्वा· ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणात्रयात् इति पिण्डिकोपरि पिण्डं
निधाय ॥ पूजयेदेभिर्मन्त्रैः सव्येन ॥ ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ॥ वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः ॥ हेमं
ताय नमस्तुभ्यं नमस्ते शिशिराय च ॥ मास संवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥ ततः सव्येन विश्वेदेवार्घपात्रं संचाल्य· अपस
व्येन पितृअर्घपात्राण्युत्तानीकृत्य दक्षिणां दद्यात् ॥ तत्र सव्येन कुशयवदक्षिणाद्रव्याण्यादाय· ॐ अद्येहामुकगोत्राणामस्मत्पितृ
पितामहप्रपितामहानाममुकामुकामुकशर्मणां स· व· कृतैतत्पार्वणीकोद्दिष्टश्राद्धसंबन्धि वैश्वदेविकश्राद्धप्रतिष्ठासिद्ध्यर्थं द
क्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति ब्राह्मणाकरे उ 189
त्सृजेत् ॥ पुनर्दक्षिणाद्रव्याण्यादाय· ॐ अद्येहामुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां· स· रत्न
व· कृतैतत्पार्वणीकैकपार्वणश्राद्धप्रतिष्ठासिद्ध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं द्रव्यं अमुकगोत्रायामुकशर्मक १८९
शर्मणे ब्राह्मणाय दक्षिणात्वेनाहं संप्रददे इति ब्राह्मणाकरे उत्सृजेत् ॥ पुनर्जलसहितमोदकमादाय ॥ ॐ अद्येहामुकगोत्राणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मत्पितृपितामहप्रपितामहानां मम अमुकामुकामुकशर्म्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां कृतैतत्सांवत्सरीकपार्वणश्राद्ध
न्यूनातिरेकपरिपूर्णार्थं यद्देयमन्नपानादिकं तत्त्वयं यथानामदैवतं नाना नामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभ
ज्य दत्तं महत्तं मम त्यजे इदमुत्सृजेत् ॥ अपसव्येन वाजे वाजे इति पित्रादीन् विसर्जयेत् ॥ सव्येन ॐ पुरूरवो माद्रवसनामा नानो विश्वे
देवाः प्रीयन्तामिति विश्वेदेवविसर्जनं ॥ ततो देवताभ्य इति त्रिः पठेत् ॥ अपसव्येन दीपाच्छादनं विधाय सव्येन हस्तौ पादौ प्रक्षा
ल्याचम्य इति पठेत् ॥ यत्कृतेन त्वत्कृतं नमस्तु इति पठेत् ॥ प्रमादात्कुर्वतामिति ॥ आयुः प्रजामिति च पठित्वा कायेन वाचेति प
ठन् पुष्पपवित्रादि सर्वमवशिष्टं च समर्पयेत् ॥ एतत्कृतं श्रीगयागदाधरप्रसादात् सर्वं परिपूर्णमस्तु ॥ ॥ इति पार्वणोको
द्दिष्टश्राद्धविधिः शुभमस्तु ॥ ॥ अथ तीर्थश्राद्धम् ॥ तीर्थसमीपं गत्वा ॥ तीर्थं साष्टांगं प्रणाम्य पुष्पाक्षतफलादि हस्ते गृहीत्वा
भागीरथ्यादि तीर्थं प्रार्थयेत् ॥ विष्णोः पादप्रसूतासि इत्यादि पठित्वा अमुकतीर्थाय नमः इति पुष्पाद्यंजलिं तीर्थे क्षिपेत् ॥ त
तः साष्टांगं प्रणाम्य प्रणावेन तीर्थे क्षिपेत् ॥ अद्येत्यादि अमुकगोत्रादिरहं श्रुतिस्मृत्युक्तफलावाप्तये अत्र तीर्थे सचैलस्नानं
महं करिष्ये इति संकल्प सचैलं स्नात्वा बहिरागत्य पुनः क्षौरनिमित्तकस्नानं कृत्वा अद्येह गंगायां पतिष्यथावच्छेदनीयलो
मसंख्यवर्षसहस्रावच्छिन्नं स्वर्गलोकप्राप्तिकामोस्मिंस्तीर्थे वपनमहं करिष्ये इति संकल्प आत्मनः शुद्धिकामो वापि नृणां त
प्रिहेतवे वपनं कारयिष्यामि तीरे हं तव जाह्नवि ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ केशानाश्रित्य तिष्ठन्ति तस्मात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न
१९०

केशानृवपाम्यहं॥ इतिपठित्वाउदङ्मुखः प्राङ्मुखोवोपविश्यप्रथमतोदक्षिणकर्ममारभ्यवामकर्णपर्यंतंउदकसंस्थंके
शपनंशिखान्तश्मोपस्थवर्ज्यंश्मश्रुतोमनखानांववपनंकारयित्वाउनःस्नायात् ततोदेशकालादिसंकीर्त्यअमुकगोत्राके
र्ममजन्मजन्मादिनमारभ्याद्ययावत्ज्ञाताज्ञातकामाकामसकृदसकृदमकृत्कृतकायिकवाचिकमानसिकसांसर्गिकास्पृ
श्यकाशभोज्यभोज्यनायेयमानजनितसकलपातकमहापातकातिपातकोपपातकसंकरीकरणमलिनीकरणपा
त्रीकरणजातिभ्रंशकरप्रकीर्णप्रभृतिपापानांनिराशेनशरीरशुद्ध्यर्थंगंगादितीर्थेस्नानमहंकरिष्ये इतिसंकल्पप्रायश्चि
त्तस्नानंकृत्वाजलादुत्तीर्यधौतेशुभ्रेवासलीभूत्वाचम्यसंध्यांकृत्वायथाशक्तिदानंदत्वापितृतर्पणंविधायतीर्थमारयेरभे
तआचम्यश्रीविष्णुंस्मृत्वास्ववामभागेगंधादिभिश्चतुःकोणमंडलंविलिख्यमध्येशंखंचक्रादिलिखित्वागंधादिक्षिप्त्वाआ
सनेयात्रंतत्रपवित्रेस्थमंत्रेणपवित्रंशन्नोदेवीरितिजलं॥ यवोसीतियवान्तिलोसीतितिलान्गंधपुष्पादिनृक्षीनिक्षिप्य
कर्मपात्रंसंपन्नमस्तुअस्तुसंपन्नं॥ तेनजलेनात्मानंसामग्रींप्रोक्ष्यप्राणानायम्यपुण्डरीकाक्षायनमइतिविष्णुंपित्वादेवता
भ्यइतिविसर्जयेत्अपसव्येनसप्रव्याधेनिपठित्वामनसास्वपितृन्ध्यात्वातीर्थेश्राद्धंसमाचरेत्॥ ॥ततःप्रतिज्ञासंकल्पं
कुर्यात्॥ अद्येत्यायुक्त्वाअमुकगोत्रपित्रादित्रयाणामुकशर्मणांसपत्नीकानामुकगोत्रमातामहादित्रयामुकशर्मसपत्नीका
नांवसुरुद्रादित्यस्वरूपाणांअक्षयतृप्तयेभूरिलोचनसंज्ञकविश्वेदेवपूर्वकपार्वणविधिनामुकतीर्थनिमित्तिकंश्राद्धंकरि

190
रत्न
१९०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्येइत्तिसंकल्प्यादिग्वंधननीवीवंधनेकृत्वासव्येनपित्रादित्रयमातामहादित्रयश्राद्धसंवंधिभूरिलोचनसंज्ञविश्वेदेवानामि
दमासनमस्तुः ॐभूर्भुवः स्वः इदमासनमास्यतां ॥ ततोपसव्येनअमुकगोत्राणांपितृपितामहप्रपितामहानांअमुकामुका० स
प० वसु० मिदमासनंमस्तुप्रणवव्याहृत्याइदमासनमास्यतां ॥ अमुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानां
अमुकामुका० सप० वसु० मिदमासनमस्तुप्रणवादिनाइदमासनमास्यतां ॥ सव्येनविश्वेभ्योदेवेभ्योनमइतिगंधपुष्पा
क्षतधूपदीपवासोभिः संपूज्यपित्रादित्रयमातामहादित्रयश्राद्धसंवंधिनोधूरिलोचनविश्वेदेवाअर्चनविधौइमानिग
धादीनियथाविभागंवोनमःस्वाहा ॥ अर्चनविधिः परिपूर्णोस्तु ॥ अस्तु ॥ ततोपसव्येनपितृभ्योनमः मातामहेभ्योनमः
इतिगंधादिभिः संपूज्यकुशादिकमादायपितृपितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाः
अर्चनविधौइमानिगंधादीनियथाविभागंवःस्वाहा ॥ अर्चनविधिः परिपूर्णोस्तुअस्तुपरिपूर्णो ॥ सव्येनसोपकरणामन्न
संप्रोक्ष्यपित्रादित्रयमातामहादित्रयश्राद्धसंवंधिनोधूरिलोचनविश्वेभ्योदेवेभ्यइदमन्नंअमृतस्वरूपेणसंपद्यतांनमः
स्वाहा ॥ अपसव्येनसपत्नीकपित्रादित्रयमातामहादित्रयवसुरुद्रादित्यस्वरूपेभ्यइदमन्नंअमृतस्वरूपेणयथाविभा
गंसंपद्यतांस्वधासन्तूक्त्वाक्षय्योदत्वागायत्रीजपः मधु ३ जपः ततस्तिलगुडयवपिष्टादिद्रव्यैपिण्डान्विधायवेदिलेप
नरेखाकरणोल्मुकधारणानिकृत्वाआसनंदद्यात् अमुकगोत्रपितरमुकशर्मन्सपत्नीकंवरुणस्वरूपविपिण्डासनेअ

CC-0. In Public Domain. Digitization by eGangotri

रात्र
१८१

वनेन्विश्वपितामहप्रजापतिस्वरूपः प्रपितामहअग्निस्वरूप० मातामहादित्रयवसुरुद्राप्रजापतिअग्निस्वरूपइत्यादिअ
वनेनिक्ष्यइत्यंतंपूर्ववत् ॥ आब्रह्मणोयेइतिमंत्रायांपातपितृगणावनेविश्वसव्येनश्रीविष्णुंस्मृत्वाततोयसव्येनवामजा
नुपातयित्वापिण्डंगृहीत्वाअमुकगोत्रपितरमुकशर्मन्सपत्नीकरुद्रास्वरूपस्यपिण्डोमयादत्तस्तेस्तुइयंभूर्गयाजलाइ
देतीर्थफल्गुसमंइदंजलंगंगाजलसमंपित्रेसपत्नीकायवरुद्रास्वरूपायएवंपितामहप्रपितामहमातामहप्रमाता
महवृद्धप्रमातामहेभ्यः पिण्डादेयाः पुनरेकंपिण्डंगृहीत्वाॐ आब्रह्मणोयेपितृवंशजातामातुस्तथावंशभवामदीया
कुलद्वयेयेममदासभृताभृत्यास्तथैवाश्रितसेवकाश्च ॥ मित्राणिसख्यः पशवश्चवृक्षाः स्पृष्टाश्चदृष्टाश्चकृतोपकारा
जन्मांतरेयेममसंगताश्चतेभ्यः स्वधापिण्डमिमंददामि ॥ इतिपूर्वदत्तासनेदत्वापुनरेकसामान्यपिण्डंगृहीत्वापितापि
तामहश्चैवतथैवप्रपितामहश्चैवतथैव। प्रपितामहः ॥ मातामहस्तत्पितावप्रमातामहकादयः ॥ तेषांपिण्डोमयादत्तो
ह्यक्षय्यमुपतिष्ठतां ॥ ततोलेपभागभुजइतिवलिंदत्वादर्भेणाकृप्रोक्षणो ॥ सव्येनावमपुष्पादिगृहीत्वाभ्यासंनियम्य 391
अत्रपितरोमादयध्वंयथाभागमावृषायध्वंइतिपठित्वापसव्येनदक्षिणामुखेनअमीमदंतपितरोयथाभागमावृषा राम
यिषतइतिपुष्पादिपिण्डेष्वर्पयेत् ॥ ततोमुकगोत्रपितरमुकशर्मन्सपत्नीकवरुद्रास्वरूपपिंडेएषतेवनेविश्वपि १८१
तामहप्रजापतिस्वरूपप्रपितामहाग्निस्वरूपमातामहवरुद्रास्वरूपप्रमातामहप्रजापतिस्वरूप० वृद्धप्रमातामह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्ताग्निस्वरूपइत्यादिपूर्ववत्· आव्रस्रणोयेइतिमंत्रोक्ताःपितरः प्रत्यवनेनिग्धंनीवीविस्वस्यनमोयइतिषडंजलीकरणंए
नद्धः पितरोवासइतिसूत्रदानंऊर्जदानंदेवनाइतिजपः॥ ॥पिण्डपूजनं॥ ॥अस्मत्कुलेदीर्घमायुरस्तुइत्यादिगोत्रंनो
वर्द्धतांततः सव्येनदक्षिणादानपित्रादित्रयमातामहादित्रयश्राद्धसंबंधिविश्वेदेविकश्राद्धप्रतिष्ठार्थपित्रादीनांत्रयाणां
मातामहादीनांत्रयाणांतत्प्रत्येकंतेनप्रीत्यर्थश्राद्धप्रतिष्ठार्थमिमांदक्षिणांब्राह्मणेभ्योददेविश्वेदेवाःप्रीयतांसव्यात्तृष्टानम
स्तुपिण्डोत्थानशंखवक्रपूजनमपसव्याधायछत्रानिआयुः प्रजांश्रीनारायणार्पणंपिंडविसर्जनमस्तु॥ ॥इतिसंक्षेपती
र्थश्राद्धं॥ ॥अथगयाश्राद्धपद्धतिः॥तत्रप्रथमदिनेफल्गुतीर्थस्नानं॥ ॥तत्रसंकल्पः॥ ॐअद्यत्यादिदेशकालौस्मृत्वा
अश्वमेधसहस्रजन्यफलसमविलक्षणफलप्राप्तिकामःफल्गुतीर्थस्नानमहंकरिष्येइतिसंकल्प ॐफल्गुतीर्थेउरापजर(
लेकरोमिस्नानमार्द्रितः॥पितॄणांविष्णुलोकायभुक्तिमुक्तिप्रसिद्धये॥ ॥इतिमंत्रंपठित्वास्नायात्॥ ॥तर्पणं॥ ॐअ
द्यामुकगोत्रोस्मत्पितामुकशर्मातृप्यतामिदंसतिलोदकंतस्मैस्वधापितरंप्रीणयामि॥एवंपितामहादितर्पणोपिस्वधोच्चा
रणानंतरंममसुकंप्रीणयामीतिप्रयोज्यं॥ततोदेवार्चनादिकृत्वाश्राद्धंकुर्यात्॥अद्यतीर्थप्राप्तिनिमित्तकपार्वणश्राद्धम
हंकरिष्येइतिसंकल्प॥अथावाहनदिग्बंधरहितंस्वसूत्रानुसारिपार्वणश्राद्धंकुर्यात्॥ ॥तदसंभवेआसनपिण्डदानप्र
त्यवनेजनान्तदक्षिणासंकल्पमात्रात्मकंतीर्थप्राप्तिनिमित्तकंवाश्राद्धंकुर्यात्॥ ॥इतिफल्गुकृत्यं॥ अथप्रेतशिला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न १९२ यांकृतभूसंस्कारायांवांतउपविश्यकृतापसव्योदक्षिणामुखोभूत्वा ॥ ॐ कव्यवालोनलः सोमोयमश्चैवार्यमातथा ॥ अग्नि
ष्वात्तावर्हिषदः सोमपाः पितृदेवताः ॥ आगच्छन्तुमहाभागायुष्माभीरक्षितास्त्विह ॥ मदीयाः पितरोयेचकुलेजाताः स
नाभयः ॥ तेषांपिण्डप्रदानार्थमागतोस्मिगयामिमां ॥ तेसर्वेतृप्तिमायान्तुश्राद्धेनानेनशाश्वतीमितिपठित्वापितृन्ध्यात्वा
सव्यंकृत्वावम्पसंध्यावन्दनवत्पूरककुंभरेचकप्राणायामान्कृत्वा · पुण्डरीकाक्षस्मरणात् · श्राद्धीयद्रव्याणिकुशोदकेन
प्रोक्ष्य ॥ ॐ अद्यामुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकामुकशर्मणाममुकगोत्राणांमातृपितामहीप्रपि
तामहीनाममुकामुकामुकदेवीनाममुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणाममु
कगोत्राणांमातामहीप्रमातामहीवृद्धप्रमातामहीनाममुकामुकामुकदेवीनांप्रेतत्वमुक्तिकामः प्रेतशिलायांपार्वणश्रा
द्धमहंकरिष्ये · इतिसंकल्प्यषोडशदैवतंश्राद्धंपार्वणेतिकर्त्तव्यताकंकुर्यात् · हेमाद्रिमतेतुमातामह्यादिकवर्जंशेषंपूर्वव
त् · त्रयशर्मादिमतेतुप्रकृतमेवपार्वणम् ॥ एवंदक्षिणान्तंपार्वणं ॥ पार्वणंविधायतद्वेदिदक्षिणान्तउपविश्यकृताप 192 रत्न १९२
सव्योदक्षिणामुखः ॥ कुशत्रयंधृत्वा · कव्यवालोनलइसोमइतिमंत्रंपठित्वा · तेषुकुशेषुसकृत्तिलोदकाञ्जलिदानरूपमा
वाहनंकुर्यात् ॥ ततएतानिपाद्यादीनिॐ पित्रादिभ्योनमइत्यनेनवक्रमेणपञ्चोपचारेणपित्रादीन्संपूज्यः आब्रह्मस्तम्बपर्यन्तं
देवर्षिपितृमानवाः ॥ तृप्यन्तुपितरः सर्वेमातृमातामहादयः ॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनाम् ॥ आब्रह्मभुवनाल्लो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कादिदमस्तु तिलोदकमिति पूर्ववदञ्जलिदानरूपं मिलितपित्राद्यावाहनं कृत्वा ॐ अद्यामुकगोत्रपितरमुकशर्मन्नेष ते पिण्डः स्व
धेति तिलमधुघृतमिश्रं पायसादि पिण्डं पित्रादिभ्यो दद्यात्॥ ततस्तद्दक्षिणात उपविश्य समूलान्दक्षिणाग्रान्कुशानास्तीर्य ॐ क
व्यवाल इत्यादि शाश्वतीमित्यन्तं मन्त्रं पूर्ववत्पठित्वा सकृत्तिलोदकाञ्जलिदानरूपमावाहनं कृत्वा पूर्ववदभ्यर्च्य ॐ पिता पिता
महश्चैव तथैव प्रपितामहः॥ माता पितामही चैव तथैव प्रपितामही॥ मातामहस्तत्पिता च प्रमातामहकादयः॥ तेषां पिण्डो
मया दत्तो अक्षय्यमुपतिष्ठतामिति पौराणिकं मन्त्रमुच्चार्य तिलघृतदधिमधुजलयुतं मुष्टिमितं सक्तुकृतमेकं पिण्डं मिलि
तेभ्यो द्वादशभ्यो दद्यात्॥ ॥अथ षोडशी॥ तु नविंशतिदास्यमानपिण्डस्थानानि प्रत्येकं यथा दक्षिणां पञ्चगव्येनालिप्य तेषु पूर्व
वद्दक्षिणाग्रं कुशत्रयं धृत्वा ॐ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते॥ आवाहयिष्ये तान्सर्वान्दर्भपृष्ठे तिलोदकैः॥ १॥ ॐ
मातामहकुले ये च गतिर्येषां न विद्यते॥ आवाहयिष्ये तान्सर्वान्दर्भपृष्ठे तिलोदकैः॥ २॥ बन्धुवर्गकुले ये च गतिर्येषां न विद्य
ते॥ आवाहयिष्ये तान्सर्वान्दर्भपृष्ठे तिलोदकैः॥ २॥ इति मन्त्रैरावाह्य तद्दर्भेषु तानावाह्य गन्धादिभिरभ्यर्च्य यदि देवतापदेषो
उद्दिश्य क्रियते तदा देवतामन्त्रेणात्मपि पूजयित्वा॥ ॐ आब्रह्मस्तम्बपर्यन्तमित्यादिश्लोकाभ्यां पूर्ववदेकवारं तत्र तिलोदका
ञ्जलिं दत्वा मूलादि तत् पिण्डान्दद्यात् तत्क्रमः॥ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यह
म्॥ १॥ ॐ मातामहकुले ये च गतिर्येषां न विद्यते॥ तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ २॥ बन्धुवर्गकुले ये च गति

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येषां न विद्यते ॥ तेषां प्र० ॥ ३ ॥ अजातदन्ता ये केचिद्ये च गर्भे प्रपीडिताः ॥ तेषां प्र० ॥ ४ ॥ ॐ अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथा
परे ॥ विद्युच्चौरहता ये च तेभ्यः पिण्डं ददाम्यहम् ॥ ५ ॥ ॐ दावदाहे मृता ये च सिंहव्याघ्रहताश्च ये ॥ दंष्ट्रिभिः शृङ्गिभिर्वापि तेभ्यः पि-
ण्डं ददाम्यहम् ॥ ६ ॥ उद्बन्धनमृता ये च विषशस्त्रहताश्च ये ॥ आत्मोपघातिनो ये च तेभ्यः पि० ॥ ७ ॥ रौरवे चान्धतामिस्रे कालसूत्रे
च ये मृताः ॥ तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहं ॥ ८ ॥ अनेकयातनासंस्थाः प्रेतलोकं च ये गताः ॥ तेषामुद्धरणार्थाय इ०
९ ॥ अरण्ये वर्त्मनि र्वने क्षुधया तृष्णया हता ॥ भूतप्रेतपिशाचाश्च तेभ्यः पिण्डं ददाम्यहम् ॥ १० ॥ अनेकयातनासंस्था ये नीता यम-
किङ्करैः ॥ तेषां प्र० ॥ ११ ॥ ॐ नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥ तेषां० ॥ १२ ॥ पशुयोनिगता ये च पक्षिकीटसरीसृपाः ॥ अथवा
वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम् ॥ १३ ॥ ॐ जात्यन्तरसहस्रेषु भ्रमन्तः स्वेन कर्मणा ॥ मानुष्यं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहं
१४ ॥ ॐ दिव्यन्तरिक्षभूमिष्ठाः पितरो बान्धवादयः ॥ मृता असंस्कृता ये च तेभ्यः पिण्डं ददाम्यहम् ॥ १५ ॥ ॐ ये केचित्प्रेतरूपेण
वर्त्तन्ते पितरो मम ॥ ते सर्वे तृप्तिमायान्तु पिण्डेनानेन सर्वदा ॥ १६ ॥ येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः ॥ तेषां पिण्डो म-
या दत्तो अक्षय्यमुपतिष्ठताम् ॥ १७ ॥ ॐ पितृवंशे मृता ये च मातृवंशे च ये मृताः ॥ गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः
ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ॥ क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥ विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले म-
म ॥ तेषां पिण्डो मया दत्तो ह्यक्षय्यमुपतिष्ठताम् ॥ १८ ॥ ॐ आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा मदीयाः ॥ कुल-

CC-0. In Public Domain. Digitization by eGangotri

द्वयेये मम दास भूता भृत्यास्तथैवाश्रितसेवकाश्च ॥ मित्राणि सख्यः पशवश्च वृक्षा दृष्टादृष्टाश्च कृतोपकाराः ॥ जन्मान्तरे ये मम सं
गताश्च तेभ्यः स्वधापिण्डमहं ददामि ॥ १९ ॥ इति पठित्वा उपसव्येन कथितद्रव्येण कथितप्रमाणकान् नवविंशतिपिण्डान् दद्या
दिति ॥ श्रीषोडशपात्रे ॥ अस्मत्कुले मृता ये चेत्यावाहनमन्त्रादारभ्य जन्मान्तरे ये मम संगताश्च तेभ्य इत्येतत्पर्यन्तं सम्भवन्तीलि
ङ्गमूहनीयम् ॥ अथ तत्षोडशी वत्सर्वम् ॥ ततः सर्वेषु पिण्डेषु तिलजलपूर्णपात्रेण प्रदक्षिणावारत्रयं भूरिसेचनं कर्त्तव्यम्
तत्र मन्त्रः ॥ ॐ ये च वो ये चास्मान्त्वा सन्त्याश्च वो याश्च वो यास्त्वास्मानुत्वा संस्ते चावां ना नान्त्वावाहे तान्प्यन्तु भवन्तस्तृप्यत भवन्त
स्तृप्यन्तु गोत्रान्मुत्रान्नभिजर्पयन्तीरापो मधुमतीरिमाः स्वधापितृभ्यो अमृतं दुहाना आपो देवीरभयास्तर्पयन्तु तृप्यत तृप्यत तृ
प्यतेति ॥ ततः प्रणिपत्य ॥ ॐ पित्रादयः समधुमितितान्विसर्जेत् ॥ ततः सव्येनावम्य ॥ ॐ साक्षिणः सन्तु मे देवा ब्रह्मेशानाद
यस्तथा ॥ मयागयां समासाद्य पितॄणां निष्कृतिः कृता ॥ आगतोस्मि गयां देव पितृकार्ये गदाधर ॥ त्वमेव साक्षी भगवन्ननृणोह
मृणात्रयात् ॥ २ इति प्राङ्मुखः पठेत् ॥ एतावत्क्रियाकलापाशक्तौ प्रेतशिलायां पिंडदानमपि कर्त्तव्यम् ॥ तद्यथा ॥ पूर्ववत्सङ्
कल्प्य उपसव्यं कृत्वा कव्यवालो नलइत्यारभ्य अनृणोहमृणात्रयादित्यन्तं कारणं पूर्वलिखितं कुर्यादिति ॥ केचित्तु षट्पुरुषाणामे
व प्रेतत्वविमुक्तिकामनया पिण्डदानं कार्यमित्याहुः ॥ अत्र च वेदीद्वयकरणम् ॥ ततो रेखाकरणम् ॥ तदङ्गारभ्रामणाच्छिन्नमूला
स्तरणावनेजनश्वासधारणानीधीविसर्जनादीनि स्वसूत्रोक्तानि वाजसनेयिना कार्याणि ॥ १ ॥ एवमन्येनापि स्वसूत्रोक्तान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

स्क
१९४

उमारेशोवकार्य्यमित्याहुः॥ एतदनन्तरकरणानन्तरं च पर्ववादवत्तु पृथिव्यां प्रभासाद्रिसङ्गतायां महानद्यां रामतीर्थे नप्रसि
द्धे प्रभाससङ्गमे॥ ॐ अद्य साग्रजन्मान्तरशतउक्षतविलयकामोऽस्मिन्रामतीर्थे स्नानमहं करिष्ये॥ इति संकल्प्य स्नानतर्पणो
कृत्वा॥ तत्र स्नानीयप्रकृतसकलमंत्रपाठानन्तरं॥ ॐ जन्मान्तरशतेसाग्रयत्कृतंउक्षतंमया॥ तत्सर्वं विलयं यातु रामतीर्थाभि
षेचनात्॥ इति पौराणिकं मंत्रं पठित्वा मज्जेत्॥ ॐ अद्य विष्णुलोकगमनकामो रामतीर्थे श्राद्धपिंडदानं वाहं करिष्ये॥ इति सं
कल्प्य श्राद्धंपिंडदानं वा कुर्यात्॥ इदं यावर्णांपिंडदानं वस्वस्वसूत्रात्तु मारेशोव कर्त्तव्यं॥ गयोक्तफलकपितृकर्मत्वाभावादिति
ॐ अद्य पित्रादित्रिकप्रेतत्वविमुक्तिपूर्वकपितृत्वप्राप्तिकामो रामतीर्थे पितॄणां पिंडदानमहं करिष्ये॥ इति संकल्प्य प्रेत
शिलोक्तरीत्या पितृणाद्दशपिंडानर्यपिंडं षोडशीपिंडं दद्यात्॥ विष्णुलोकफलस्यास्य वो भयस्याप्य च करणासामर्थ्ये इतरदेव
कर्त्तव्यं॥ इदानीमिति ततः॥ राम राम महाबाहो वानानामभयंकरम्॥ त्वां नमस्ये हृदेवेशं मम नश्यतु पातकमिति पठित्वा
स्वर्गकामो रामं नमस्कुर्यात्॥ ततः॥ ॐ भासमानस्वकर्त्तकशिवगमनकामः प्रभासेशं नमस्कारमहं करिष्ये॥ इति संकल्प्य
प्रभासेशं नमस्कुर्यात्॥ ततो रामं प्रभासेशं नमस्कुर्यात्॥ ॐ आपत्सु मसि देवेश ज्योतिषां पतिरेव च॥ पापं नाशय मे देव म
नो वाक्काय कर्मजं॥ इति पौराणिकं मंत्रं पठित्वा॥ ॐ यमायेष बलिर्नम इति कुशत्रयजलेन देवरीत्या भक्तादिरूपं बलिं द
द्यात्॥ प्रभासपर्वतदिग्व्यवस्थितप्रेतशिलाजघनस्थे नगनाम्नि पर्वते॥ ॐ श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ॥ ताः

194
राम
१९४

र्थं पिंडं प्रदास्यामि स्थानामेतान् वहिंसकौ ॥ इति पठित्वा ॥ ॐ यमराजधर्मराजाभ्यामेष बलिर्नम इति तयोर्मन्त्रितयोरोदनाद्यन्नात
मबलिं दद्यात् ॥ इदं च बलिदानं नित्यमकरणे तु निरृष्टश्रवणात् ॥ अन्यत्तु सर्वकाम्यं स्वतन्त्रं चेति ॥ इति गयाकृत्ये प्रथमदिनकृ
त्यम् ॥ ततो द्वितीयदिने फल्गुतीर्थादौ स्नात्वा देवार्चनान्तं कर्म कृत्वा प्रेतपर्वते गत्वा तन्मूले संस्थाने नदीशानकोणस्थे ब्रह्मकुंडे स्वर्ग
कामनया स्नात्वा तर्पणं वा कृत्वा प्रेतपर्वतमारुह्य ततः पित्रावाहनादि साक्षिश्रावणपर्यन्तं प्रेतशिलावदेव कर्त्तव्यम्
अयं तु विशेषः ॥ अद्य पित्रादीनां प्रेतराक्षसनिरहितं ब्रह्मलोकावाप्तिकामः प्रेतपर्वते पार्वणश्राद्धमहं करिष्ये इति संकल्प्य
तच्च पार्वणं ब्रह्मवेद्यां क्रियत इति समाचारः ॥ ततः साक्षिश्रावणानन्तरम् ॥ ॐ अद्य पितृगतप्रेतत्वविमुक्तिस्वर्गतप्रेतत्वभा
वकामः प्रेतपर्वते तिलमिश्रसक्तुकनिःक्षेपमहं करिष्ये इति संकल्प्य तिलमिश्रसक्तुकान् प्रेतपर्वते दक्षिणामुखः प्रक्षिपेद
नेन मन्त्रेण ॥ ॐ ये केचित् प्रेतरूपेण वर्तन्ते पितरो मम ॥ ते सर्वे तृप्तिमायान्तु सक्तुभिस्तिलमिश्रितैरिति ॥ ॐ आब्रह्मस्तम्बपर्य
न्तं यत्किंचित् सचराचरम् ॥ मया दत्तेन तोयेन तृप्तिमायान्तु सर्वशः इति मन्त्रेण तिलतोयाञ्जलिं तत्र दद्यात् ॥ ततो यथाशक्ति ब्राह्म
णाय दक्षिणां सिद्धवद्द्यादिति प्रेतपर्वतविधिः इति द्वितीयदिनकृत्यम् ॥ अथ गयाप्राप्तेस्तृतीयदिने फल्गुतीर्थे स्नानादिदेवा
र्चनान्तं कर्म कृत्वा पवित्रग्रहपाणिराचम्य वारिणा शिरोऽभ्युक्ष्य उत्तरमानसं गत्वा ॥ ॐ अद्य पापक्षयकामः उत्तरमानसे स्नानमहं
करिष्ये इति संकल्प्य स्नानीयमन्त्रान् पठित्वा ॥ ॐ उत्तरमानसे स्नानं करोम्यात्मविशुद्धये ॥ सूर्यलोकादिसंसिद्धिसिद्धये पितृमुक्तये

CC-0. In Public Domain. Digitization by eGangotri

रत्न
१९५

इतिपठित्वामन्त्रनंकार्य्यं॥ततस्तर्पणं॥तत्रपित्राद्यंजलिमुक्त्वास्वधोदीरणांतेतरंप्रीणयामितिप्रयोज्य॥ततस्तर्पणशेषेदेवविधि
ना॥ॐआब्रह्मस्तम्बपर्य्यन्तंदेवर्षिपितृमानवाः॥तृप्यन्तुपितरःसर्वेमातृमातामहादयः॥इतिपठित्वाएकांजलिंदेयः॥ॐअद्यामु
कगोत्राणांपितृपितामहप्रपितामहानाममुकामुकामुकशर्मणाममुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकामु
कदेवीनाममुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणाममुकगोत्राणांमातामहीप्रमाताम
हीवृद्धप्रमातामहीनाममुकामुकामुकदेवीनाममुकगोत्राणांमन्येषांभ्रात्रादीनांवाशाश्वतब्रह्मप्राप्तिकामोःश्राद्धमहंकरि
ष्येइतिसंकल्प्य॥द्वादशदैवतंश्राद्धमाचरेत्॥मातामह्यादिवर्ज्जमिदमितिहेमाद्रिः॥गयायांसर्वत्रैवषट्पुरुषश्राद्धमिति
प्राच्याः॥तथाचततएवामन्यतमश्राद्धंकृत्वातद्दक्षिणादिक्षुपविश्यसमूलान्दक्षिणाग्रान्कुशानास्तीर्य॥ॐकव्यवालो
नमःसोमोयमश्चैवार्यमातथा॥अग्निष्वात्ताबर्हिषदःसोमपाःपितृदेवताः॥आगच्छन्तुमहाभागायुष्माभीरक्षितास्त्विह॥म
दीयाःपितरोयेचकुलेजाताःसनाभयः॥तेषांपिण्डप्रदानार्थमागतोऽस्मिगयामिमाम्॥तेसर्वेतृप्तिमायान्तुश्राद्धेनानेनशाश्व
तीमितिपठित्वासकृत्तिलोदकाञ्जलिरूपमावाहनंकृत्वा॥एतानिपाद्यादीनिइतिपित्रादिभ्योनमइतिपञ्चोपचारेणापित्रा
दीन्संपूज्य॥ॐआब्रह्मस्तम्बपर्यन्तंदेवर्षिपितृमानवाः॥तृप्यन्तुपितरःसर्वेमातृमातामहादयः॥अतीतकुलकोटीनांसप्त
द्वीपनिवासिनाम्॥आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकमितिपठित्वासकृत्तिलोदकाञ्जलिदानरूपमावाहनंकृत्वा॥ॐ

195
राम
१९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पितापितामहश्चैव तथैव प्रपितामहः॥ मातापितामही चैव तथैव प्रपीतामही॥ मातामहस्तत्पिता च प्रमातामहकादयः
तेषां पिण्डो मया दत्तो ह्यक्षय्यमुपतिष्ठताम्॥ इति पौराणिकं मंत्रमुच्चारयन् तिलघृतदधिमधुजलयुते मुष्टितमस्कृकृतमेकं
पिण्डं मिलितेभ्यो दद्यादिति॥ ततः॥ ॐ पितृसूर्यलोकनयनकामः उत्तरार्कस्य नतिमहं करिष्ये इति॥ पूजायामप्ययमेव संक
ल्प॥ ॐ नमो भानवे भर्त्रे सोम भौमज्ञरूपिणे॥ जीव भार्गव सौरेय राहुकेतु स्वरूपिणे॥ इति मंत्रेणार्चितिः पूजा च कार्य्या॥ ११
ततो मैनी दक्षिणामानसे गत्वा॥ तत्रोदीच्याम्॥ ॐ अद्य पितृमुक्तिकाम उदीचीतीर्थे स्नानमहं करिष्ये इति संकल्प पूर्ववत्स्ना
नतर्पणे कृत्वा॥ ततः पूर्ववद्देवद्वादशदैवतं नवदैवतं षड्दैवतं वा पार्वणं कृत्वा २ मध्यमं कनखलं गत्वा तत्रापि पितृविमुक्ति
कामनया स्नानतर्पणे कृत्वा॥ ॐ अद्य पितृविमुक्तिकामः कनखले स्नानमहं करिष्ये॥ इति संकल्प॥ तत्कामनयैव श्राद्धं कृत्वा
२॥ ततः ॐ अद्य पितृमुक्तिकामो दक्षिणामानसे स्नानमहं करिष्ये॥ इति संकल्प॥ स्नानीय सर्वमंत्रान्ते॥ ॐ दक्षिणे मानसे स्नानं
करोम्यात्मविशुद्धये॥ सूर्यलोकादि संसिद्धि सिद्धये पितृमुक्तये॥ ब्रह्महत्यादिपापौघः घातनाय विमुक्तये॥ दिवाकर करो
मीह स्नानं दक्षिणामानसे॥ इति पठित्वा मज्जनं॥ ततः पूर्ववत्तर्पणं कृत्वा॥ ॐ नमामि सूर्यं तृप्त्यर्थं पितृणां तारणाय च॥ पुत्रपौ
त्रधनैश्वर्य्य आयुरारोग्य वृद्धये॥ इति मंत्रेणार्कस्य दर्शनं पूजा च॥ तस्य तु कर्म मौनेनैव कर्त्तव्यं॥ अतः समीपे लोलार्कनामा
ततः ॐ कव्यवालोनलः सोमो यमश्चैवार्यमा तथा॥ अग्निष्वात्ता वर्हिषदः सोमपाः पितृदेवताः॥ आगच्छन्तु महाभागा युष्मा

रत्न
१९६

भीरक्षितास्त्विह ॥ मदीयाः पितरो ये च कुले जाताः सनाभयः ॥ तेषां पिंडप्रदानार्थमागतोस्मि गयामिमाम् ॥ इति दक्षिणामान
समेव पठित्वा ॥ गदाधरपूर्वदेशस्थमभिप्रशस्तं फल्गुतीर्थं गच्छेत् ॥ तत्र च ॐ अद्य दशलक्षाश्वमेधजन्यफलविलक्षणफल
प्राप्तिकामः फल्गुतीर्थे स्नानमहं करिष्ये इति संकल्प प्रकृतस्नानीयमंत्रान्ते ॥ ॐ फल्गुतीर्थे शुभे जले करोमि स्नानमादितः ॥ पितृ
णां विष्णुलोकाय भुक्तिमुक्तिप्रसिद्धये ॥ इति पठित्वा मज्जेत् ॥ ततः पूर्ववत्तर्पणं कृत्वा पितृमुक्तिकामनया गदाधरदेवतं श्राद्धं त
त्र कुर्यात् ॥ ततो मधुश्रवा दक्षिणादिग्व्यवस्थितं पितामहं ॥ ॐ नमः शिवाय देवाय ईशानपुरुषाय च ॥ अघोरवामदेवाय सद्योजा
ताय शम्भवे ॥ इति पठित्वा पितामहं प्रणामेन पूजयेत् ॥ ततः पुनः फल्गुतीर्थमागत्य ॥ ॐ अद्य पित्रादिसहितात्मवैष्णवपदन
यनकामः फल्गुतीर्थे स्नानगदाधरदर्शनमहं करिष्ये इति संकल्प ॥ तत्र सविधिस्नानकर्त्तव्यं ॥ गदाधरश्च प्रतिमारूपस्तदधि
करणीभूतं संगरुडप्रमुखादिरूपश्चेति ॥ तद्दर्शनानन्तरं ॥ ॐ नमो वासुदेवाय नमः संकर्षणाय च प्रद्युम्नायानिरुद्धाय श्रीधराय च
विष्णवे ॥ इति पठित्वा गदाधरं प्रणामेन पूजयेत् ॥ तत उत्तरमानसं गत्वा ॥ ॐ अद्य पितृब्रह्मलोकनयनकामः पञ्चतीर्थीस्नानमहं 196
करिष्ये इति संकल्प उत्तरमानसे १ उदीच्यां २ कनखले ३ दक्षिणमानसे ४ फल्गुतीर्थे ५ च यथाक्रमं सविधि प्रत्येकं स्नानतर्पणं कु रम
र्यात् ॥ ततो गदाधरसमीपं गत्वा दुग्धदधिघृतमधुखंडकात्मकेन पञ्चामृतेनाष्टोत्तरशतपलमितेन घटद्वयेन गदाधरं स्नापयि १९६
त्वा पुष्पवस्त्रालङ्कारैरर्चयेदिति ॥ एतेषां च कर्मणां मध्ये च रमं पञ्चामृतस्नानमेवावश्यकम् करणे निन्दार्थवादात् ॥ इतरा

णि तु काम्यानि स्वतन्त्राणि चेति यथाशक्ति कार्याणि ॥ इति पञ्चतीर्थीकृत्यम् ॥ ॥ अथ पञ्चतीर्थ्यां प्रथमदिनकृत्यम् ॥ स्नात्वा देवा
र्चनान्तकर्म कृत्वा ॥ कुशत्रयतिलजलान्यादाय ॥ ॐ अद्य पितृब्रह्मलोकनयनकामो धर्मारण्यगमनमहं करिष्ये इति संकल्प्य ॥ त
त्र गत्वा मतङ्गवाप्याम् ॥ ॐ अद्य सर्वपापक्षयकामो मतङ्गवाप्यां स्नानमहं करिष्ये इति संकल्प्य स्नानं तर्पणं कृत्वा ॥ ॐ अद्याक्षय
पितृतृप्तिकामो मतङ्गवाप्यां श्राद्धमहं करिष्ये ॥ इति संकल्प्य प्रकृतिपार्वणं कुर्यात् ततो मतङ्गवाप्या मेवोत्तरदिग्वस्थितं मत
ङ्गेशं नत्वा ॥ ॐ प्रमाणं देवताः सन्तु लोकपालाश्च साक्षिणः ॥ मयाऽऽगत्य मतङ्गेस्मिन् पितृणां निष्कृतिः कृता इति पठेत् ॥ ॐ अद्य
पितृतारणकामः कूपयूपयोर्मध्ये श्राद्धमहं करिष्ये इति संकल्प्य ॥ तत्र पार्वणं कुर्यात् ॥ कूपश्चायमेतद्वाप्या माग्नेयकोणोस्ते त्र
मध्ये रहुतरूपोस्ति तत्तीरे श्राद्धपिण्डदानं च ॥ पतितस्यापि ॥ किन्तु तत्र गर्भहत्त्युरुतल्पगन इत्येके निर्देशः कार्य्य ततो धर्मन्धर्मे
श्वरं महाबोधिं च यथाक्रमे स्वर्गकामो नमेत् ॥ अथ पञ्चतीर्थादिनोत्तरन्तीयदिनकृत्यम् ॥ फल्गुतीर्थे ॐ अद्याश्वमेधवङ्गस
हस्रजन्यफलविलक्षणफलप्राप्तिकामः फल्गुतीर्थे स्नानमहं करिष्ये इति संकल्प्य विधिवत्स्नात्वा देवार्चनान्तकर्म कृत्वा ब्र
ह्मसरो गत्वा ॥ ॐ अद्य पापक्षयकामो ब्रह्मसरसि स्नानमहं करिष्ये इति संकल्प्य प्रकृतमन्त्रान्पठित्वा ॥ स्नानं करोमि तीर्थेस्मिन्न्
णत्रयविमुक्तये ॥ श्राद्धाय पिण्डदानाय तर्पणायात्मशुद्धये ॥ इति पठित्वा स्नानं तर्पणं कृत्वा ॥ ॐ अद्य पितृब्रह्मलोकनयन
कामो ब्रह्मकूपयूपयोर्मध्ये श्राद्धमहं करिष्ये इति संकल्प्य ॥ द्वादशदैवतं नवदैवतं षड्दैवतं वा श्राद्धं कृत्वोत्तरमानसवदस्य

CC-0. In Public Domain. Digitization by eGangotri

वं.ल
१९८

यपिण्डं दत्वा ॥ ॐ अद्य पितृमोक्षकामो ब्रह्मकल्पितान्ब्रह्मसेवनमहं करिष्ये इति सङ्कल्प्य ॥ ॐ आब्रह्मब्रह्मसमुद्भूतं सर्वदेवमयन
रूपम् ॥ विष्णुरूपं प्रसिञ्चामि पितॄणां वैवमुक्तये ॥ इति पठित्वा कुशत्रयेणावरे ब्रह्मसरोजले ॥ नमो ब्रुवारसमीपस्थान्ब्रह्म
प्रकल्पितानाम्रान्सिञ्चेत् ॥ तत ॐ वाजपेययज्ञजन्यफलप्राप्तिकामो ब्रह्मयूपप्रदक्षिणामहङ्करिष्ये ॥ इति सङ्कल्प्य ब्र
ह्मयूपं प्रदक्षिणां कुर्यात् ॥ तत ॐ अद्य पितृब्रह्मपुरनयनकामो ब्रह्मनमस्कारमहं करिष्ये इति संकल्प्य ॥ ॐ नमो ब्रह्मणो
ऽजाय जगज्जन्मादिकारिणे ॥ भक्तानां व पितॄणां च तारकाय नमो नमः ॥ इति पठित्वा ब्रह्मसरो वायव्यकोणस्थं ब्रह्माणं प्र
मेत् ॥ तत ॐ यमराजधर्मराजौ निश्चलार्थं व्यवस्थितौ ॥ ताभ्यां बलिं प्रयच्छामि पितॄणां मुक्तिहेतवे ॥ इति पठित्वा ॥ ॐ यमा
य बलिर्नम इति ॥ अनेन कुशोदकेन देववद्यमबलिं दद्यात् ॥ ॐ वैवस्वतेकुलोद्भूतौ द्वौ श्यावशबलौ शुनौ ॥ ताभ्यां पिण्डं प्र
यच्छामि रक्षतां पथि सर्वदा ॥ इति पठित्वा ॥ ॐ श्वन एष बलिर्नम इति देववद्कुशोदकेन श्वबलिं दद्यात् ॥ ॐ ऐन्द्रवारुणवायव्या
याम्यां वै नैर्ऋतास्तथा ॥ वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितं इति पठित्वा ॥ ॐ काकेभ्य एष बलिर्नम इति कुशोदकेन दे
ववत्काकबलिं दद्यात् ॥ काकबल्यनन्तरन्तु स्नानं ॥ इति पञ्चतीर्थादिनोत्तरतृतीयदिनकृत्यं ॥ तत्र ॥ ॐ अद्य दशलक्षाश्वमेध
यज्ञजन्यफलविलक्षणफलप्राप्तिकामो फल्गुतीर्थे स्नानमहं करिष्ये इति सङ्कल्प्य प्रकृतस्नानमन्त्रान्ते ॥ फल्गुतीर्थे उराप जल
करोमि स्नानमादौ पितॄणां विष्णुलोकाय मुक्तिमुक्तिप्रसिद्धये ॥ इति मन्त्रं पठित्वा फल्गुतीर्थे मज्जेत् ॥ ततस्तर्पणाष्टकरीसे

197
राम
१९८

२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वकुर्य्यात् ॥ ततः पदेषु श्राद्धं ॥ तत्रादौ रुद्रपदसमीपङ्गत्वा ॥ ॐ अद्य पुनरावृत्तिकामो रुद्रपदस्पर्शनमहं करिष्ये इति सङ्कल्पस्पृ
ष्ट्वा ॥ श्राद्धीयद्रव्याणि सिंत्यक्त्वा ॥ ॐ अद्यात्मसहितकुशशतशिवपुरनयनकामो रुद्रपदे श्राद्धमहं करिष्ये ॥ इति सङ्कल्प्य द्वादशदे
वतं षड्दैवतं वा श्राद्धं कर्त्तव्यं ॥ विष्णुपदसमीपं गत्वा ॥ ॐ अद्य पापक्षयकामः विष्णुपददर्शनमहं करिष्ये इति सङ्कल्प्य विष्णुपदं दृ
ष्ट्वा ॥ ॐ अद्य पितृमोक्षकामो विष्णुपदे विष्णुपूजनमहं करिष्ये ॥ इति सङ्कल्प्य विष्णुप्रकाशकमन्त्रेण विष्णुं पञ्चोपचारैः पूजयेत्
ततः श्राद्धीयद्रव्याणि उगाउरीकाभस्मरणापूर्वकं कुशोदकेन प्रोक्ष्य ॥ ॐ अद्यात्मसहितकुलसहस्रोद्धरणपूर्वकविष्णुलोकं नय
नकामो विष्णुपदे सपिंडकश्राद्धमहं करिष्ये इति सङ्कल्प्य ॥ द्वादशदैवतं नवदैवतं षड्दैवतं वा सवैश्वदेवं पार्वणं कृत्वा ॥ तद्देयं
दक्षिणाउपविश्य पञ्चमपञ्चगाग्रयादिति प्राङ्मुखः पठेदिमन्तं प्रेतशिलास्थानीयं कर्म कुर्यात् ॥ ततः ॐ अद्यात्मकसहित
कुशलतनरकोद्धरणापूर्वकब्रह्मलोकनयनकामो ब्रह्मपदे श्राद्धमहं करिष्ये इति सङ्कल्प्य ॥ तत्र रुद्रपदवत् श्राद्धं कुर्यात् ॥ ३
ततः ॐ अद्य वाजपेयफलसमफलप्राप्तिकामो दक्षिणाग्नियदे इत्यादि ॥ ४ ॥ ॐ अद्य राजसूयफलसमफलप्राप्तिकामः गार्ह
पत्यपदे इत्यादि ॥ ५ ॥ ॐ ब्रह्माश्वमेधफलप्राप्तिकामः आहवनीयपदे इत्यादि ॥ ६ ॥ अद्य ज्योतिष्टोमफलप्राप्तिकामः सभ्यपदे इ
त्यादि ॥ ७ ॥ ॐ अद्य सोमलोकप्राप्तिकाम आवसथ्यपदे इत्यादि ॥ ८ ॥ ॐ तद्य पितृशक्रलोकनयनकाम इन्द्रपदे इत्यादि ॥ ९
ॐ अद्य पतितपितृसूर्यलोकपुरनयनकामः सूर्यपदे इत्यादि ॥ १० ॥ पितृअग्निनयनकामः कार्त्तिकेयपदे इत्यादि ॥ ॐ पितृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दान
१९८

स्लोकनयनकामो ऽगस्त्यपदे ॥ १२ ॥ ॐ अद्यपितृब्रह्मलोकनयनकामः क्रौञ्चपदे श्राद्धमित्यादि ॥ १३ ॥ ॐ अद्यपितृब्रह्मलोक
नयनकामो ऽगस्त्यपदे ७ कश्यपपदे ॥ १४ ॥ इत्यादि सङ्कल्प्य यथोपक्रमं श्राद्धं कुर्यात् ॥ अन्येषु गणेशपद ॥ १५ चन्द्रपद १६
मतङ्गपद १७ काणवपद १८ दधीचिपदेषु १९ पितृब्रह्मलोकनयनं फलम् ॥ गणेशश्वंडलोकादेरपि ब्रह्मलोकत्वोक्तेः ॥ अ
थ गयाशिरसि ॐ अद्यामुकगोत्रस्यामुकशर्म्मणः स्वर्गप्राप्तिकामो गयाशिरसि पिण्डदानमहं करिष्ये इति सङ्कल्प्य स्वसूत्रोक्त
रीत्यावनेजनादिपिण्डसमुत्थापनपर्यन्तं कर्म कुर्यात् ॥ ततस्तत्रैव मुण्डनः श्राद्धम् ॥ एवं स्त्रीपिण्डदाने जिह्वालोलमधुश्रवासुगत
पृष्ठदक्षिणमानसाम्यन्तरे गदाधरावारसादिष्व देशे वापि कर्त्तव्यम् ॥ अथ पञ्चतीर्थ्यन्तर पञ्चमदिनकृत्यम् ॥ तत्र कृत्वापि कृ
तदेवार्चनादिकर्म्म ॥ गदालोलं कृत्वा ॥ ॐ अद्ययापक्षयस्वर्गप्राप्तिकामो गदालोले स्नानमहं करिष्ये इति सङ्कल्प्य गदालो
ले स्नायात् ॥ तत्र पठनमन्त्रपाठनन्तरम् ॥ ॐ गदालोले महातीर्थे गदाप्रक्षालने वरे ॥ स्नानं करोमि शुद्ध्यर्थं मक्षयाय स्वराप्त
ये ॥ इति पठित्वा मज्जेत् ॥ ततस्तर्पणां कृत्वा ॥ ॐ अद्यपितृब्रह्मलोकनयनकामो गदालोले स्नानमहं करिष्यति सङ्कल्प्य श्राद्धं
कुर्यात् ॥ यदि पिण्डदानमात्रमपि क्रियते तदा ऽयमेव सङ्कल्प्य ॥ पिण्डदानं च स्वसूत्रोक्तरीत्या कर्त्तव्यम् ॥ ततो ऽक्षयवटं कृत्वा
तन्मूलसन्निहिते समावारा उत्तरदिग्भागे ॥ ॐ अद्यपितृणामक्षयतृप्तिकामो ऽक्षयवटे श्राद्धमहं करिष्ये ॥ इति सङ्कल्प्य तत्र
श्राद्धं कुर्यात् ॥ ततः ॐ अद्यपितॄन्ब्रह्मलोकनयनकामो ब्रह्मप्रकल्पितान्ब्राह्मणानहं भोजयिष्ये इति सङ्कल्प्य तान् भोजयेत्

198
दान
१९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदलाभे ब्राह्मणानन्नमपि ॥ तत्र च ॥ ॐ अद्य कोटिब्राह्मणभोजनजन्यफलसमफलप्राप्तिकामो ऽक्षयवटे एकब्राह्मणमहं भोजयिष्ये इति
सङ्कल्प्य तत्रैकब्राह्मणं भोजयेत् ॥ ॐ अद्य पितृब्रह्मलोकनयनकामो वटदर्शनमहं करिष्ये इति सङ्कल्प्य प्रतिमारूपम्वटेशम्पश्येत् ॥ अ
नेनैव क्रमेणातिं पूजां च कुर्यात् ॥ तत्र संकल्प्य वाक्ये दर्शनपदस्थाने नयपदप्रक्षेपः ततो ज ॥ ॐ एकार्णवे वटस्याग्रे यः शेते योगनिद्रया
बालरूपधरस्तस्मै नमस्ते योगशायिने ॥ इति मंत्रः ॥ ॐ संसारवृक्षशस्त्राया शेषपापक्षयाय च ॥ अक्षयब्रह्मदात्रे च नमो ऽक्षयवटाय
वै ॥ इति मंत्रेणाक्षयवटं नमस्कुर्यात् ॥ ततः ॐ अद्य पितृरुद्रलोकनयनकामः प्रपितामहनमस्कारमहं करिष्ये ॥ इति संकल्प्य ॐ क
लौ माहेश्वरा लोका येन तस्मात् गदाधरः ॥ लिंगरूपो भवस्त्वं च वंदे श्री प्रपितामहं ॥ इति मंत्रेण नमस्कुर्यात् ॥ पूर्वदिने कृतोपवासो
गयामध्यस्थगायत्रीतीर्थे समुखप्राग्देशे महानद्यां गायत्रीतीर्थे स्नात्वा संध्योपासनं कार्यं ॥ ततस्तद्देशस्य पादोदकस्वर्गाः फलम्
ॐ अद्य कुलशतसहस्राणां नयनकामो गायत्रीतीर्थे सपिंडकश्राद्धमहं करिष्ये इति संकल्प्य पूर्वोक्तप्रकारेण सपिंडकश्राद्धं कुर्यात् ॥ त
तः सावित्र्याः पुरतः स्नातुं यत्तन्नामके तीर्थे मध्याह्ने यथाविधि स्नात्वा ॥ ॐ अद्य मध्याह्ने कुलशतविष्णुलोकनयनवासः सावित्रीपुरतः
स्थितसमनुयत्नतीर्थे संध्योपासनमहं करिष्ये ॥ ततः सायाह्ने सरस्वत्यग्रतः प्राचीसरस्वत्यां यथाविधि स्नात्वा ॥ ॐ अद्य सायाह्ने कु
लसर्वजनानयनकामः सरस्वत्यग्रस्थितप्राचीसरस्वत्यां संध्योपासनमहं करिष्ये ॥ इति संकल्प्य ॥ ॐ अद्य बहुजन्मकृतसंध्या
लोपजनितदोषमुक्तिकामो गायत्रीसावित्रीसरस्वतीस्थानेषु क्रमेण संध्यात्रयवन्दनत्रयमहं करिष्ये इति संकल्प्य ॥ ॐ अद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न
१९९

कुलशतब्रह्मलोकनयनकामो विशालायां श्राद्धमहं करिष्ये इति संकल्प्य पूर्वोक्तरीत्या श्राद्धं कुर्यात् ॥ पिंडदानपक्षे पिंडमेवफ
लं ॥ एवं लेलिहाननरनाश्रमपदांकितकुंडपृष्ठगदाधरसमीपीकाशगंगागिरिकर्णप्रस्रवेषु श्राद्धपिंडं वा दद्यात् ॥ अद्येत्यादि सप्त
कुलोद्धरणकामो वैतरण्यां स्नानमहं करिष्ये इति संकल्प्य ॥ यथाविधिस्नात्वा ॥ ॐ या वैतरणी नाम नदी त्रैलोक्यविश्रुतासाव
तीर्णा महाभागा पितॄणां तारणाय वै ॥ इति मन्त्रेणातां संतरेत् ॥ ततो गोदानम् ॥ ॐ गवे नम इति गां त्रिः संपूज्य ॥ ॐ ब्राह्मणा
य नमः ॥ इति ब्राह्मणं त्रिः सम्पूज्य ॥ गां संप्रोक्ष्य कुशत्रय इति जलान्यादाय ॥ ॐ अद्येत्यादि सप्तकुलोद्धरणकाम इमां गां रुद्रदैव
तां ममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यं महं संप्रददे ॥ इति गां दद्यात् ॥ ततो ग्रहीतास्वस्तीति वदेत् ॥ ततो दाता ॥ ॐ अद्य
कृतैतत्गोदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यं महं संप्रददे ॥ इति ग्रही
ता हिरण्यं गां पुच्छे धृत्वा यथाशाखं पठेत् ॥ ततः ॐ अद्येत्यादि स्वर्गनयनकामो देवनद्यां पिंडदानमहं करिष्ये इति संकल्प्य स्व
सूत्रानुसारेणापि पिंडदानं कुर्यात् ॥ एवमेव गोप्रचारमानसे घृतकुल्यागदालोलामरकंठककोटितीर्थकल्पदशेषु संकल्प्य पि 199
ण्डन्दद्यात् ॥ ततः ॐ अद्यपितृतरणकामो मार्कण्डेयदर्शननमस्कारमहं करिष्ये इति संकल्प्य नमस्कुर्यात् ॥ एवमेव कोटीशन राम
स्कारेपि संकल्प्य पारापूर्वशिलां स्पृशेत् ॥ ॐ अद्याश्वमेधायुतफलकामः शिलाङ्कितायां स्नानमहं करिष्ये इति यथाविधिस्नायात् ॥ १९९
ततः ॐ अद्यकुलसहस्रसमुद्धरणपूर्वकविष्णुपदनयनकामः शिलासङ्कितायां घृतकुल्यायां पित्रादितर्पणमहं करिष्ये इ

३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्तिसंकल्प्यपित्रादीन्तर्पयेत्॥ एवमेवसपिण्डकश्राद्धंसंकल्प्यः॥ एवमन्यधकल्प्ययद्यपि उद्भिज्जस्वेदजजरायुजाण्डजानानामृथ्व
वायांमरणोविष्णुपुरगमनंफलम्॥ ततः ॐ पित्रादिब्रह्मलोकनयनकामोदशाश्वमेधिकेश्राद्धमहंकरिष्येइतिसंकल्प्य॥ एव
मेवहंसनमस्कारेसंकल्पः॥ ॐ अद्यब्रह्मलोकावाप्तिकामोमतङ्गस्यपदेश्राद्धमहंकरिष्येइतिसंकल्प्यश्राद्धंकुर्यात्॥ ॐमु
क्तिकामोमतङ्गकुण्डेतर्पणमहंकरिष्ये॥ एवमेवपिण्डदानेपिसंकल्पः॥ ॐ ॐ अद्यपितृस्वर्गनयनकामोरामेशनमस्का
रमहंकरिष्येइतिसंकल्प्यरामेशंनमस्कुर्यात्॥ एवमेकाङ्गारकेश्वरनमस्कारेपिसंकल्पः॥ ॐ अद्याश्वमेधफललाभकामो
गयाकूपेपिण्डदानमहंकरिष्येइतिसंकल्प्यपिण्डंदद्यात्॥ अत्रैव ॐ अद्यपितृगतस्वर्गकामोगयाकूपेश्राद्धमहंकरिष्येइ
तिसंकल्प्यपतितनारीनामपिपित्रादीनांश्राद्धंकुर्यात्॥ एवमेवपिण्डदानंवा॥ इतिजहरिहरस्मरणाकर्त्तव्यम्॥ ॐ अद्यपितॄ
नारणकामोगयारूपेभस्मनास्नानमहंकरिष्येइतिसंकल्प्यस्नायात्॥ ततोरामकुण्डेतर्पणंयथाविधिस्नात्वा॥ ॐ अद्यपितॄन्
ब्रह्मलोकनयनकामोरामकुण्डेतर्पणंश्राद्धमहंकरिष्येइतिसंकल्प्यकुर्यात्॥ ॐ अद्यत्रिःसप्तकुलस्योद्धरणकामःसुभमा
यांश्राद्धमहंकरिष्येइतिसंकल्प्यश्राद्धंकुर्यात्॥ ततोवसिष्ठतीर्थेयथाविधिस्नात्वा॥ ॐ अद्याश्वमेधफलप्राप्तिकामोवशिष्ठे
शनमस्कारमहंकरिष्येइतिसंकल्प्यनमस्कुर्यात्॥ ततः ॐ अद्यपितॄन्ब्रह्मलोकनयनकामोधेनुकारण्येपिण्डदानमहंकरिष्य
इतिसंकल्प्यपिण्डंदद्यात्॥ कामधेनुपदस्नानेकामधेनुंनमस्कारेवमेवफलम्॥ ततःकर्द्दमालेगनाभौयथाविधिस्नात्वा

रत्न
२००

ॐ अद्य पितृर्त्वंनयनकामः कर्दमाले गयानाम्नौ श्राद्धमहं करिष्ये इति संकल्प्य तत्र श्राद्धं कुर्यात् ॥ ॐ अद्य पित्रादिस्वर्गनयन
कामः फलवीशमहं पूजयिष्ये इति संकल्प्य फलवीशं पूजयेत् ॥ ॐ अद्य मुक्तिकामो गयागजमहं पूजयिष्ये इति संकल्प्य
गयागजं पूजयेत् ॥ गयादित्यगदाधर महानदीदेवनदीवीक्षणस्वलनन्दा पूजायामप्येतद्देवफलम् ॥ नागकूटगृध्रवटो
त्तरमानसमध्यगतगयाशिरः पूजायामप्येतद्देवफलम् ॥ ॐ अद्य पितृसप्तकुलनरकोद्धरणकामो गयायां वृषोत्सर्गम
हं करिष्ये ॥ इति संकल्प्य वृषमुत्सृजेत् ॥ अथ भरताश्रमे महानद्यां स्नात्वा रामेशं रामं सीतां च नत्वा ॥ ॐ राम राम महाबाहो
देवानामभयंकरम् ॥ त्वां नमस्येहं देवेश मम नश्यतु पातकमिति पठित्वा ॥ ॐ अद्य पित्रादिकुलशतसहितस्य विष्णुपद
प्राप्तिकामो रामेशसन्निधाने रामपदे श्राद्धमहं करिष्ये इति संकल्प्य श्राद्धं कुर्यात् ॥ ॐ अद्य पितृस्वर्गनयनकामो मतङ्गप
दे पिण्डदानमहं करिष्ये इति सङ्कल्प्य पिण्डं दद्यात् ॥ अथोद्यन्तपर्वते ॥ ॐ अद्य पितॄणां ब्रह्मलोकप्राप्तिकामः उद्यन्तपर्वते पि
ण्डदानमहं करिष्ये इति सङ्कल्प्य पिण्डान् दद्यात् ॥ उद्यन्तकुण्डे मध्याह्ने स्नात्वा ॥ ॐ अद्य कोटिजन्मावच्छिन्नविप्रत्वप्राप्तिकाम उ
द्यन्तकुण्डे मध्याह्ने संध्यावन्दनमहं करिष्ये इति सङ्कल्प्य संध्यामुपासीत ॥ अथागस्त्यपदे यथाविधि स्नात्वा ॥ ॐ अद्य दिवौ
कोगरापूज्यमानपितृसहितब्रह्मलोकनयनकामो ऽगस्त्यपदे पिण्डदानमहं करिष्ये इति सङ्कल्प्य पिण्डं दद्यात् ॥ अथ ब्रह्म
योनौ गत्वा ॥ ॐ अद्य योनिसङ्कटविमुक्तिपूर्वकं परं ब्रह्मगमनकामो ब्रह्मयोनिप्रवेशनिर्गमावहं करिष्ये इति सङ्कल्प्य प्रवेश

200
राम
२००

३६

न्निर्गमौ कुर्यात् ॥ अथो मघ ब्रह्मरूपकामो गयाकुमारं नमस्कारमहं करिष्ये इति सङ्कल्प्य गयाकुमारान्नमस्कुर्यात् ॥ अथ सोमकु
ण्डे ॥ ॐ अद्य पितॄणां सोमलोकनयनकामः सोमकुण्डे स्नानमहं करिष्ये इति सङ्कल्प्य स्नायात् ॥ तत्र तर्पणपिण्डदानयोरप्येतदे
व फलम् ॥ अथ काकशिलायां ॥ ॐ अद्य पितृमोक्षकामः काकशिलायां काकेभ्यो बलिदानमहं करिष्ये इति सङ्कल्प्य बलीन्दद्या
त् । अथ स्वर्गेश्वरनमस्कारः ॥ ॐ अद्य स्वर्गप्राप्तिपूर्वकब्रह्मप्राप्तिकामः स्वर्गेश्वरनमस्कारमहं करिष्ये इति सङ्कल्प्य स्वर्गे
श्वरं नमस्कुर्यात् ॥ ॐ अद्य स्ववैर्मल्यपितृस्वर्गनयनकामः आकाशगङ्गायां पित्रादिपिण्डदानमहं करिष्ये इति सङ्कल्प्य पि
ण्डं दद्यात् । ॐ अद्य स्वर्गकामो भस्मकूटपर्वते स्नानमहं करिष्ये इति स्नायात् ॥ ॐ अद्य स्वर्गकामः कपिलेशं नमस्कारमहं क
रिष्ये इति नमस्कुर्यात् ॥ तत्र पूजायामप्येतदेव फलम् ॥ ॐ अद्य स्वर्गकामो माहेश्वरीकुण्डे श्राद्धमहं करिष्ये इति श्राद्धं कुर्यात्
अथ रुक्मिणीकुण्डे श्राद्धं स्वर्गकामः करिष्ये इति श्राद्धं कुर्यात् ॥ अथ सर्वसौभाग्यकामो मङ्गलां देवीमहं पूजयिष्ये इति सङ्क
ल्प्य माहेश्वरीकुण्डस्थितां भगवतीं मङ्गलां पूजयेदिति सर्वमङ्गलम् ॥ ॥ इति श्रीमन्महाराजाधिराजगीर्वाणयुद्धवि
क्रमसाहदेवकृत नररत्नमालायां गयाविधिश्राद्धरत्नम् ॥ ॥ अथ नित्यश्राद्धम् ॥ तत्स्वरूपं भविष्ये ॥ अहरहः क्रियते य
त्तु तन्नित्यमिति कीर्त्यते ॥ विश्वदेवविहीनं तदशक्तावुदकेनापि तु ॥ नित्यश्राद्धमदैवं स्यादर्घपिण्डविवर्जितमिति लघु
हारीतः ॥ नित्यं तावत्प्रवक्ष्यामि अर्घावाहनवर्जितमिति मात्स्ये अथ प्रयोगः सव्येनावश्य ॥ ॐ अद्येत्यादि नित्यश्राद्धमहं करि

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२०१

ष्य इति संकल्प गायत्रीं देवताभ्य इति त्रिर्जपित्वा अपवित्रः पवित्रो वेत्यादि पुण्डरीकाक्षस्मरणो तश्राद्धद्रव्याणि सिक्त्वा कृताप
सव्यो दक्षिणाभिमुखः पातितवामजानुः पितृतीर्थेन जलतिलसमेतद्विगुणकुशाग्रयेण ॥ ॐ अद्यामुकगोत्रपितरमुक
शर्मन्निदमासनं ते स्वधेति पित्रे दद्यात् ॥ एवमेव पितामह प्रपितामह मातामह प्रमातामह वृद्धप्रमातामहेभ्य आसनं
दद्यात् ॥ ततो पहता इत्यादिना तिलान्प्रकीर्य यज्ञेन इति जपेत् ॥ ततो गन्धादिभिरभ्यर्च्य· ॐ अद्यामुकगोत्रपितर
मुकशर्मन्नेतानि गन्धपुष्पधूपवस्त्राणि ते स्वधेति पित्रादिभ्यो यथासम्भवं गन्धादि दद्यात् ॥ अथान्नं परिविष्य मधु दत्वा
मधुवाता इति पठित्वा ॥ पात्रमालभ्य पृथिवी त इति जपित्वा ॥ इदं विष्णुरित्यादिनाङ्गुष्ठमवगाह्यापहता इति तिलान्प्र
कीर्य ॥ ॐ अद्यामुकगोत्रायास्मत्पित्रेऽमुकशर्मण इदमन्नं सव्यञ्जनं सतिलं सजलं तुभ्यं स्वधेति षड्भ्यः प्रत्येकमुत्सृजेत् ॥ त
तो यथाशक्ति पवित्राणि मधुवाता इत्यन्नहीनमित्यादि जपित्वा ॥ तदन्नं ब्राह्मणाय प्रतिपादयेत् ॥ ब्राह्मणोपवेशनप
क्षे स्वागतप्रश्नाद्यधिकमिति ॥ ततः सव्येन ॥ दक्षिणां दद्यात् ॥ ॐ तत्सदद्येत्यादि· अमुकगोत्राणामस्मत्पितृपितामहप्र 201 राम २०१
पितामहानाममुकामुकामुकशर्मणां तथामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामु
कशर्मणां कृतैतन्नित्यश्राद्धप्रतिष्ठार्थं दक्षिणाममुकगोत्रायामुकशर्मणे ब्राह्मणाय संप्रददे इति दक्षिणां दत्त्वाऽवाम्यह
स्नोपादेऽप्रक्षालप्रमादादिति पठित्वा· कायेन वाचेति नारायणार्पणम् ॥ इति नित्यश्राद्धम् ॥ ॥ अथ प्रेतश्राद्धानि ॥ त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्स्वकर्मवशाद्गतप्राणं पित्रादिशवं दक्षिणाशिरसं कृत्वा पुत्रादिः कर्णमृज्जलाभ्यां प्रेतस्यादिकं प्रक्षाल्य स्नानं कारयेत् ॥ न
दामनसा स्मरणीयं मन्त्राः ॥ गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः ॥ कुरुक्षेत्रं च गङ्गां च यमुनां च सरिद्वराम् ॥ १ ॥
कौशिकीं चन्द्रभागां च सर्वपापप्रणाशिनीम् ॥ भद्रावकाशां शरयूं गण्डकीं तमसां तथा ॥ २ ॥ धेनं च वं च वराहं च तीर्थं पि
ण्डारकं तथा ॥ पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा ॥ २ ॥ एतानि मनसा ध्यात्वा तु स्नापयेत् मृतं सुतः ॥ इति वचना
त् ॥ ततो नवयज्ञोपवीतगोपीचन्दनं नववस्त्रयुग्मयुतं वस्त्रापिहितमुखं सुगंधद्रव्ययुतं शवं कृत्वा ॥ दाहदेशं नीत्वा ॥
मुखे १ नासिकाद्वय ३ नेत्रद्वय ५ श्रोत्रद्वय ७ सप्त हिरण्यशलाकाः क्षिप्त्वा घृताभ्यक्तसर्वांगं वस्त्रेणाच्छादितं शवमा
स्तृतकुशचितायामुत्तरशिरसमधोमुखं स्त्रियं चोत्तानमुखां स्थापयेत् ॥ ततः आचम्य कृतापसव्यो दक्षिणाभिमुखो दक्षि
णाहस्तेऽग्निं वामहस्ते सप्त समिधो गृहीत्वा ॥ कृत्वा सुदुष्करं कर्म जानता वाप्यजानता ॥ मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम्
धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ॥ दहेयं सर्वगात्राणि दिव्यान् लोकान्स गच्छतु ॥ इति पठित्वा शीघ्रं प्रदक्षिणीकृत्य शि
रोदेशेऽग्निं दद्यात् ॥ ~~अग्निदानमन्त्र~~ ॥ अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः ॥ असौ स्वर्गाय लोकाय स्वाहा ज्वलतु पाव
कः इति ॥ रोदितव्यं ततो गाढमेवं तस्य सुखं भवेत् ॥ अर्द्धदग्धे तथा देहे दद्यादाज्याहुतिं नमः ॥ स्त्रीदाहे त्वविकृतस्तस्य च दाहम
न्त्रः पठनीयः ॥ पुंस्त्वस्याविवक्षितत्वात् ॥ जीवपरत्वात् ॥ सव्यघृतं स्रुवेण गृहीत्वा दक्षिणामुखस्य लोमेकाहुतिं जुहुयात्

CC-0. In Public Domain. Digitization by eGangotri

ततः प्रदक्षिणामेकैकां समिधं तत्स्मीं चित्यासु परिक्षिपेत्॥ निःशेषस्तु न दग्धव्यः शेषं किञ्चित्त्यजेत्ततः॥ इति वचनाद्वशिष्टं
शरीरभागं क्रव्यादाय नम इति मन्त्रेण जले क्षिपेत्॥ अननी नद्विवर्षप्रेतं गंधमाल्यादिभिरलंकृतं निखनेयुः॥ तत्र यमगा
थागानम्॥ अहरहर्नीयमानो गामश्वं पुरुषं पशुम्। वैवस्वतो न तृप्येत सुरया इव दुर्मतिः॥ इति॥ अथोदकदानम्॥ अ
द्यामुकगोत्रामुकप्रेतैष सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम्॥ इति दाहविधि॥ ॥ अथ विनापिण्डादि
षट्पिण्डदानविधिः॥ सव्येनावस्य अपसव्यं कृत्वा प्रक्षालितवितायां कुशानास्तीर्य॥ अद्यामुकगोत्रामुकप्रेतैष मृतस्था
ने शवनाम पिण्डस्ते मया दीयते तवोपतिष्ठताम्॥ १॥ ॐ अद्यामुकगोत्रामुकप्रेत द्वारदेशे पान्थनामैष पिण्डस्ते मया दीय
ते तवोपतिष्ठताम्॥ २॥ ॐ अद्यामुकगोत्रामुकप्रेत चत्वरे खेचरनामैष पिण्डस्ते मया दीयते तवोपतिष्ठताम्॥ ३॥ अ
द्यामुकगोत्रामुकप्रेतैष भूतनामा विश्रामपिण्डस्ते मया दीयते तवोपतिष्ठताम्॥ ४॥ अद्यामुकगोत्रामुकप्रेत साधकना
मैष विनापिण्डस्ते मया दीयते तवोपतिष्ठताम्॥ ५॥ अद्यामुकगोत्रामुकप्रेतैष प्रेतनामा अस्थिपिण्डस्ते मया दीयते
तवोपतिष्ठताम्॥ ६॥ एते षट्पिण्डा अद्यामुकगोत्रामुकप्रेत पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठतामि
त्यवंनिज्य देयाः॥ ॥ इति विनापिण्डप्रयोगः॥ ॥ अथ दशदिनपिंडदानप्रयोग॥ जलाशयशमीपे शुचौ देशे श्मश्रु
भूमिं परिकल्प्य दीपं प्रज्वाल्य॥ कर्त्ता कुशहस्तः सोत्तरीयमावस्यः कृतापसव्यो दक्षिणाभिमुखः पातितवामजानुर्वेदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कायां दक्षिणाग्रान् कुशानास्तीर्य ॥ कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रामुकप्रेत पितृस्थाने इदमवनेजनं ते मया दीयते
तवोपतिष्ठताम् ॥ इत्यास्तृतकुशोपरि पितृतीर्थेनावनेजनं दद्यात् ॥ सहगमेनेतत् पित्र्यवनेजनपूर्वभागे ॥ अद्यामुकगोत्रे मा
तरमुकप्रेते पितृस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम् ॥ इति दद्यात् ॥ एवं स्त्रीप्रेतायां सर्ववाक्येषु स्त्रीलिङ्गोह
कार्यः ॥ ततः तिलघृतमधुयुक्तं पिंडं कुशतिलजलसहितमादाय ॥ अद्यामुकगोत्रामुकप्रेत एष शिरःपूरकः प्रथमपिण्ड
स्ते मया दीयते तवोपतिष्ठताम् ॥ इत्यवनेजनस्थाने प्रथमदिने पिण्डं दद्यात् ॥ १ ॥ द्वितीयदिने कर्णाक्षिनासिकापूरकः ॥ २ ॥
गलांसभुजवक्षःपूरकस्तृतीयदिनपिण्डः ॥ ३ ॥ नाभिलिङ्गगुदपूरकश्चतुर्थः ॥ ४ ॥ जानुजङ्घापादपूरकः पञ्चमः ॥ ५ ॥ सर्वम
र्मपूरकः षष्ठः ॥ ६ ॥ सर्वनाडीपूरकः सप्तमः ॥ ७ ॥ दन्तलोमादिपूरकोऽष्टमः ॥ ८ ॥ वीर्यपूरको नवमः ॥ ९ ॥ दशमदिने ॥ पू
र्णतानन्वप्रताक्षुद्विपर्ययहेतुको दशमः पिण्डस्ते मया दीयते तवोपतिष्ठतामिति वाक्यम् ॥ १० ॥ ततः अद्यामुकगोत्रामुकप्रे
ते इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठताम् ॥ इति पिंडोपरि प्रत्यवनेजनं दद्यात् ॥ ततः प्रेतमुद्दिश्य तूलीमेवोशीरचन्द
नोर्णासूत्रभृङ्गराजपत्रपूगीफलपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामिति सङ्कल्पयेत् ॥ अद्यामुक
गोत्रामुकप्रेतैष सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठतामिति प्रथमदिने ॥ एकम् ॥ एतौ सतिलतोयाञ्जली ते मया
दीयेते तवोपतिष्ठेतामिति द्वितीयदिने ॥ २ ॥ एते सतिलतोयाञ्जलयस्ते मया दीयन्ते तवोपतिष्ठन्तामिति वाक्यं तृतीयादि

रत्न
२०३

दिनेषु वर्द्धमानक्रमेण दद्यात् ॥ अद्यामुकगोत्र अमुकप्रेते इदं सतिलतोयपूर्णमृत्पात्रन्ते मयादीयते तवोपतिष्ठतामिति प्रथ
मदिने ॥ इमे सतिलतोयपूर्णमृत्पात्रे ते मयादीयते ते तवोपतिष्ठेतामिति द्वितीयदिने ॥ इमानि सतिलतोयपूर्णमृत्पात्रा
णि ते मयादीयन्ते तवोपतिष्ठन्तामिति तृतीयचतुर्थादिदिनेषु ॥ ततस्त्रिकाष्ठिकयोः मृत्पात्रद्वये नीरं क्षीरं वादाय ॥ अद्यामुक
गोत्रामुकप्रेते मे त्रिकाष्ठिकास्थितनीरक्षीरयुतमृत्पात्रे ते मयादीयेते तवोपतिष्ठेतामित्युक्त्वा ॥ श्मशानानलदग्धोसि परि
त्यक्तोसि बान्धवैः ॥ इदं नीरमिदं क्षीरमत्र स्नाहि इदं पिव ॥ इति पठेत् ॥ स्त्रीप्रेतायां तु ॥ श्मशानानलदग्धासि परित्यक्तासि बान्ध
वैः ॥ इदन्नीरमिदं क्षीरमत्र स्नाहि इदं पिवेति स्त्रीलिङ्गविशिष्टः पाठः पठनीयः ॥ ततः सतिलकुशीतलजलपूर्णघटं कृत्वा ॥ अ
द्यामुकगोत्रामुकप्रेतैष सतीलकुशीतलजलोपेतो घटस्ते मयादीयते तवोपतिष्ठताम् ॥ इत्युक्त्वा ॥ कुशीतलजलोपेतः सर्वो
पस्करसंयुतः ॥ एष घटो मया दत्तः प्रेताय उपतिष्ठतामिति पठेत् ॥ स्त्रीप्रेतायां प्रेतायै उपतिष्ठतामिति विशेष ॥ ततसव्येन
अनादिनिधनो देवः शंखचक्रगदाधरः ॥ अक्षयः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भवेदिति पठित्वा ॥ पलपरिमितलोहदक्षिणा
मादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य कृतैतच्छिरः पूरकप्रथमदिनपिण्डदानप्रतिष्ठार्थमिदं लोहं पलपरिमितं तन्निष्क्रयं द्रव्यं वा
दक्षिणात्वेन दातुमहं समुत्सृजेत् ॥ इत्युक्त्वा ॥ तत्सर्वं जले क्षिपेत् ॥ ततः स्नानं मार्ज्जनं वा ३ वार प्राप्र कुर्यादिति ॥ ॥ इत्यवयव
पिण्डप्राशप्रकारः ॥ ॥ अथ दशमे घटदानम् ॥ सर्वथापापयज्ञान्तर्थमध्यमविनाशनम् ॥ तस्मान्निधेयमाकाशे दशरात्रमय

203
राम
२०३

२९

स्नात्वा ॥ इति मात्स्या दशादिनपर्यन्तं पिप्पलादिवृक्षे जलपूर्णघटं कुनाथच्छिद्रं शिक्यधारयेत् ॥ तत्र वाक्यम् ॥ अपसव्येन कुशतिलजला
न्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य पापशान्त्यध्वश्रमविनाशनार्थमिदमाकाशाधिकरणकजलमद्यादिदशरात्रं यावन्मे म
यादीयते तवोपतिष्ठताम् ॥ इत्यनेन मन्त्रेण ॥ स्त्रीप्रेतनायां तु ॥ अद्यामुकगोत्राया मातुरमुकप्रेतायाः पापशान्त्यध्वश्रममित्यादि ॥
अथ दशाहदीपदानम् ॥ अन्धकारमहाघोरं रवितेजस्त्र न भासते ॥ तस्य सन्तरणार्थाय दीपं दद्याद्दशाहिकमिति वचनात्कर्तृश य
नस्थलसमीपे जलपूर्णघटोपरि तिलतैलेन वा दशाहपर्यन्तमहर्निशं दीपं प्रज्वालयेत् ॥ तत्र दक्षिणाभिमुखोऽपसव्यं कृ
त्वा ॥ कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य यममार्गदुर्गमहाघोरान्धतमःसन्तरणार्थं मयादिदशदिनं या
वद्घृतपर्यन्तदीपस्ते मया दीयते तवोपतिष्ठतामिति मन्त्रेण ॥ ॥ स्त्रीप्रेतनायां तु ॥ अद्यामुकगोत्राया मातुरमुकप्रेताया यम
दुर्गेत्यादि ॥ अन्धारोहणान्तु ॥ अनुगमनकर्तृसंख्याका वर्तिर्दद्यात् ॥ सवर्णाविषयमेतत् ॥ ॥ अथ सायंकाले त्रिकाष्ठिको
परिक्षिप्य पानीयदुग्धदानम् ॥ अपसव्येन कुशादिकमादाय अद्यामुकगोत्रामुकप्रेतैतद्दीपस्ते मया दीयते ॥ अद्यामुकगोत्र इदं
पानीयन्ते मया ॥ अद्यामुकगोत्र इदं दुग्धं ते मया ॥ अनेन पद्य ॥ इदं पिब ॥ इदं परिधेहि ॥ ॥ अथ कर्तृभोजनसमये काकब
लिः ॥ काकोसि यमदूतोसि गृहाण बलिमुत्तमम् ॥ यमद्वारे पथे प्रेतं नन्वप्यायितुमर्हसि ॥ यमाय धर्मराजाय मृत्यवे चान्त
काय च ॥ दक्षिणां दिशमाश्रित्य प्रेतानान्नबलिमाहर ॥ ॥ इति काकबलिः ॥ ॥ अनेनैव प्रकारेण दशपिण्डा देया ॥ शिरस्त्वाद्ये

रत्न
२०४

नपिण्डेन प्रेतस्याङ्क्रियन्ते सदा ॥ द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः ॥ गलांशभुजवंक्षांसि तृतीयेन तथाक्रमात् ॥ चतुर्थेन
तु पिण्डेन नाभिलिंगगुदानि च ॥ जानुजंघे तथा पादौ पंचमेन विधीयते ॥ सर्वमर्माणि षष्ठेन सप्तमेन तु नाड्यः ॥ दंतलोमाद्य
ष्टमेन वीर्यं तु नवमेन तु ॥ दशमेन च पूर्णत्वं तृप्तता क्षुद्विपर्ययः ॥ अन्वारोहणे तु ॥ यावतीनामन्वारोहणं तावंतः प्रयोगाः क
र्त्तव्याः ॥ विहितकाले प्यकृत चूडाकरणस्य · विहितकाले प्यकृतोपनयनस्य कुशास्तरणं विना भूमावेव पिण्डं दद्यात् ॥ येषां
तावाप्यसंस्कारास्तेभ्यो भूमौ प्रदीयत इति ब्रह्मपुराणवचनात् ॥ आदन्तजननात्सद्य आचूडान्नैशिकी स्मृता ॥ त्रिरात्रमाव्रतो दे
शाद्दशरात्रमतः परम् ॥ इति स्मृते ॥ ॥ अथ पाथेयश्राद्धम् ॥ प्रथमदिने अवयवपिंडदानानंतरं स्नानादि विधाय पाथेय
श्राद्धं कुर्यात् ॥ स्मृत्यर्थसारे तु ॥ अस्थिसंचयनानन्तरं पाथेयमिति ॥ तच्चासिद्धान्नेन आमेन वा कुर्यात् ॥ सर्वत्रान्नश्राद्धे शक्त्या
आमं दद्यात् गुणामष्टगुणां पंचगुणां चतुर्गुणां द्विगुणां वा कुर्यात् ॥ आमपक्षे यवचूर्णेन पिण्डो देयः ॥ दक्षिणादानवर्जं सर्वमप
सव्येन भवति ॥ तथा च जमदग्निः ॥ सर्वं कर्मापसव्येन दक्षिणादानवर्जितमिति ॥ ॥ अथ प्रयोगः ॥ ॥ कर्ता स्नानं विधाय श्रा
द्धभूमिं सर्षपैस्तिलैश्चावकीर्य रक्षादीपं संस्थाप्य श्राद्धदेयानि वस्त्वन्यासाद्य यावस्य पूर्वाभिमुख उपविश्य · अपवित्रः पवित्रो वे
त्यादि पठित्वा पुण्डरीकाक्षः पुनात्विति श्राद्धीयद्रव्याणि कुशजलेन सिंचेत् ॥ ततः कुशतिलजलान्यादाय ॥ अद्येत्यादि देशकालौ
स्मृत्वा अमुकगोत्रस्यामुकप्रेतस्य मर्त्यलोकात्प्रेतलोकगमनार्थं पाथेयश्राद्धमेकोद्दिष्टविधिनाहं करिष्ये इति संकल्पं कुर्या

204

राम
२०४

त् ॥ ततो देवताभ्य इत्यादि त्रिः पठेत् ॥ ततोपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः कुशादीन्यादाय ॥ अद्यामुकगोत्र
स्यामुकप्रेतस्येदमासनं ते मयादीयते तवोपतिष्ठतामिति कुशरूपमासनं दद्यात् ॥ ततः ७८ केप्रादेशमात्रं कुशद्वयात्मकं
पवित्रं पवित्रेस्थ इति मंत्रेण दक्षिणाग्रं धृत्वा ॥ शन्नो देवीरिति तत्र जलं दद्यात् ॥ तिलोसीति तिलान् दत्वा ॥ गंधद्वारामिति गंध
श्चाश्वनेश्रतिपुष्पं वक्षि येत् ॥ ततस्तदर्घपात्रं वामहस्ते कृत्वा पवित्रं सपुष्पमन्यपात्रोपरि धृत्वा नमो नारायणायेति मंत्रेणाउ
त्तराग्रं धृत्वा · यादिव्या आप इत्यादिनार्घपात्रस्थं जलमभिमंत्र्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतैष हस्तार्घस्ते मयादी
यते तवोपतिष्ठतामिति पवित्रोपरि अर्घजलं दद्यादुत्सृजेत् ॥ ततः पवित्रसहितमर्घपात्रमासनवामपार्श्वे प्रेतायस्थानमसी
तिउत्तानमेवस्थापयेत् ॥ ततोभ्यर्च्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतैतानि गंधपुष्पाक्षतधूपदीपस्रग्फलवासां
सि ते मयादीयन्ते तवोपतिष्ठतामिति गंधादिकमुत्सृजेत् ॥ ततश्चतुःकोणां मंडलं विधाय ॥ आर्द्रीयान्नाग्रभागं घृततिलज
लयुतमादाय ॥ इदमन्नमेतद्भूस्वामिपितृभ्यो नमः इत्युत्सृजेत् ॥ ततो व्यंजनघृतमधुजलयुतमन्नमुपनीय यावाल्लभनाव
गाहनं विना ॥ पृथिवीतेपात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते जुहोमि स्वाहा ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं ॥ समूढ
मस्य पांसुरे इति पठित्वा ॥ अपहता असुरा रक्षांसि वेदिषद इति तिलान्नोपरि क्षिप्त्वा कुशादिकमादाय ॥ अद्यामुकगो
त्रायामुकप्रेतायेदमन्नं सोपकरणं ते मयादीयते तवोपतिष्ठतामित्युत्सृजेत् ॥ ततो मधुवाता इत्यादिकं त्र्यं मधु मधु इति ॥ अ

CC-0. In Public Domain. Digitization by eGangotri

त्रहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु ॥ नमस्तुभ्यं विरूपाक्ष नमस्तेनेकचक्षुषे ॥ नमः पिनाकहस्ताय
वज्रहस्ताय वै नमः ॥ इति श्लोकं च पठित्वा ॥ ततोन्नपात्रसमीपे पिंडदानार्थं मृन्मयिकां विधाय तत्र रेखोल्मुकभ्रामणं विनाछि
न्नमूलकुशानास्तीर्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतपाथेयश्राद्धपिण्डस्थाने इदमवनेजनं ते मया दीयते तवो
पतिष्ठतामिति कुशोपरि अवनेजनं दद्यात् ॥ ततो घृतमधुतिलयुक्तेनान्नेन पिण्डं निर्माय जलतिलकुशसहितं पिण्डमा
दाय ॥ अद्यामुकगोत्रामुकप्रेतैष पिण्डस्ते मया दीयते तवोपतिष्ठतामित्यवनेजनस्थाने वामावारत्वप्रदक्षिणाहस्तेन पिंडं
दद्यात् ॥ तत आस्तरणकुशमूलेन करं प्रोक्ष्य पिण्डशेषान्नं पिण्डसमीपे विकीर्य ॥ सव्यं कृत्वाचम्यापसव्यं कृत्वा तूष्णीं प्रेतं भास्व
रमूर्त्तिं ध्यायेत् ॥ ततः कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतेदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेज
नं पिण्डोपरि दद्यात् ॥ ततो नीवीं विस्रंस्य सव्यं कृत्वाचम्यापसव्यं कृत्वा वामहस्तेन सूत्रमादाय कराभ्यां गृहीत्वा प्रेतैतत्ते वास इ
ति सूत्रं पिण्डोपरि धृत्वा गंधपुष्पादिना पिण्डं संपूज्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेत पाथेयश्राद्धपिण्डे एतानि सूत्र
गंधपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयते तवोपतिष्ठतामिति गंधादिकमुत्सृजेत् ॥ ततः शिवा आपः सन्त्विति जलं ॥ सौ
मनस्यमस्त्विति पुष्पं ॥ अक्षतं चारिष्टमस्तु ॥ इति तण्डुलान् ॥ अन्नपात्रोपरि क्षिपेत् ॥ ततः कुशादीन्यादाय ॥ अद्यामुकगोत्रामु
मुकप्रेतस्य पाथेयश्राद्धदत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दत्वा ॥ सव्यं कृत्वा दक्षिणां दिशं पश्यन् ॥ अघोरः प्रेतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तु इति पूर्वाग्रां जलधारां पिंडोपरि दद्यात् । ततोपसव्यं कृत्वा सपवित्रकुशानामीर्यण्टकम्भ्य जलादिना इदमूर्ज्जेन मया दीयते
न वोपतिष्ठतामिति सपवित्रकुशोपरि दक्षिणाग्रां धारां दद्यात् ॥ ततः पिंडमाघ्राय प्रोत्थापयेत् ॥ छिन्नमूलकुशानग्नौ क्षिपेत् । अ
र्घपात्रं संचाल्य सव्येन कुशादिसहितं दक्षिणाद्रव्यमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य पाथेयश्राद्धप्रतिष्ठार्थमिदं रजतं च
न्द्रदैवतं तन्निष्क्रयं द्रव्यं वा यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजेत ॥ इति दक्षिणां दद्यात् ॥ अपसव्यं कृत्वा दी
पमाच्छाद्य सव्यं कृत्वा हस्तौ पादौ प्रक्षाल्याचम्य ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति
श्रुतिः ॥ इति पठित्वा विष्णुं स्मरेत् ॥ आघ्राय वस्तूनि ब्राह्मणाय प्रतिपादयेत् ॥ जले वा क्षिपेत् ॥ स्त्रिया अपि सर्वं पुरुषैकोद्दिष्ट
वद्भवति ॥ परन्तु ॥ प्रतिज्ञासनाद्यर्घ्योदकदक्षिणादानवाक्येषु ॥ अद्यामुकगोत्राया मातुरमुकप्रेताया इति विशेषः । अन्नसंक
ल्प ॥ अमुकगोत्रायै मात्रे अमुकप्रेतायै इति ॥ अन्यत्र सर्वत्रामुकगोत्रे मातरमुकप्रेते इति विशेषकुश ॥ ॥ इति पाथेयश्राद्ध
म् ॥ अथाशौचे नियमाः ॥ दिवादाहे दृष्टे नक्षत्रे रात्रिदाहे उदिते सूर्ये वहिर्भयादौ ब्राह्मणाननुमत्या वागपि बालपुरः स
रा वृद्धजघन्याः क्रमेण गृहं गत्वा द्वारदेशे निम्बपत्राणि विदश्य पूर्ववत् कृत्वाचम्य पाषाणाग्निगोमयाक्षततिलोदकदूर्वावृषभस
र्षपान् यथालाभं स्पृष्ट्वा देहल्यामग्निं वरं दत्वा गृहं प्रविशेयुः ॥ शववाहकानां शवस्पर्शिनां च निंबपत्रभक्षणोपाषाणा
ग्न्यादिस्पर्शनं च कृत्वा कृतमिति स्मृत्यर्थसारे ॥ एकाहं वाशौचं ॥ तत्र हविष्यमेकाहं ॥ तदन्नभक्षणे तु हविष्यमेव दशाहं । शावात्

रत्न
२०६

गमनकर्न्नृणांविशेषः कारिकायामुक्तः ॥ अनुगमेच्छया प्रोक्तं ज्ञातिमज्ञातिमेव वा ॥ स्नात्वा सचेलं संस्पृश्य यो घृतं प्राश्य विशुध्यति
घृताभावे तु गायत्र्या दशकृत्वः पिवेदपः इति ॥ तस्मिन्दिने गेहे पाको न विधेयः ॥ क्रीतं लब्धं स्वयं वा भोज्यः ॥ गोत्रजानां तस्मिन्दिने
तद्गृहस्य च भोजनं ॥ आमिषं लवणं माहिषी पयो मिष्टं पूपपायसादिना श्रुः ॥ हविष्यान्नमेव भुंजीरन् ॥ खेलनं हर्षोच्चासनोत्कृष्ट
वस्त्रादिधारणं स्त्रीसंगं खट्वाशयनाभ्यंगस्पर्शादीनि वर्जयेत् ॥ रात्रौ यत्नगणाम्लं न भूमौ शय्या पारायः शरीरं ॥ पितृमात्राचार्यमर
णेऽहमेकाहं वा उपवासः ॥ तथा देवमानीये कारिकायां च ॥ लवणं क्षारमाषान्नाउपूपमांसानि पायसं ॥ वर्जयेत्सहतान्नेषु
बालवृद्धातुरैर्विना ॥ उपवासो गुरौ प्रेते पत्न्याः पुत्रस्य वा भवेत् ॥ मरीचिः ॥ प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ॥ ज्ञातिभिः
सह भोक्तव्यमेतत्प्रेतेषु दुर्लभं ॥ भोजनं वदि चैव ॥ ॥ विष्णुपुराणे ॥ शय्याशनोपभोगश्च सपिंडानामपीष्यते ॥ अस्थिसंचयनाद
र्ध्वं संयोगस्तु न योषिता ॥ मार्कण्डेयपुराणे ॥ तैलाभ्यंगो बांधवानामंगसंवाहनं च यत् ॥ तेन चाप्यायते जंतुर्यच्चाश्नंति स्वबांध
वाः ॥ प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ॥ वस्त्रत्यागं बहिः स्नानं कृत्वा दद्यात्तिलोदकमिति ॥ तद्दंतिमदिनपरम् ॥ अंत्यादि
नेतु मदनरत्ने ब्राह्मे च ॥ यस्य यस्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः ॥ स तत्र गृहशुद्धिं च वस्त्रशुद्धिं करोत्यपि ॥ पारणं चक्रीते
न लब्धेन वान्नेन ॥ पत्न्याश्चैवं ॥ बालवृद्धातुराणां नैते नियमाः ॥ अथ हविष्यान्नानि पृथ्वीचंद्रोदये भविष्ये ॥ कंदसैन्धवसामुद्रे
गव्ये च दधिसर्पिषी ॥ पयोऽनुद्धृतसारं च पनसाम्रौ हरीतकी ॥ पिप्पली रकं चैव नागरंगं च यत्नितिणी ॥ कदलीवलीधात्रीफलान्य

206
रत्न
२०६

८२

गुडमैक्षवं ॥ अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ॥ स्नेहाभ्यंगो बांधवानामंगसंवाहनं च यत् ॥ तेन चाप्याययेज्जंतुर्यत्राश्नंति
स्वबांधवाः ॥ इति मार्कंडेयपुराणवचनाद्दधिकारिवर्जमन्यत्र गोत्रजैस्तृतीयपंचमसप्तमनवमदिनेषु बहिःस्नानं वस्त्रक्षाल
नं सहभोजनं तैलाभ्यंगसंवाहनं तेनाप्यायनार्थं कर्त्तव्यं ॥ अस्थिसंचयनानंतरं सपिंडानां शय्याशनादौ न दोषोधिकारिवर्जं दश
दिनपर्यंतं भोजनस्यान विपर्ययो न कर्त्तव्यः ॥ मृण्मयपात्रे यत्रान्नं वल्कलं वा भोजनं कुर्यात् ॥ आक्रंदश्चाश्रुपातश्च मृतस्यातुपका
रकः ॥ एवं विदित्वा मतिमान् कश्मलं परिवर्जयेत् ॥ श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यवशो यतः ॥ ततो न रोदितव्यं हि क्रिया कार्या
स्वशक्तितः ॥ इति वचनाद्रोदनादि न विधेयम् ॥ ॥ अथास्थिसंचयनविधिः ॥ ॥ तत्र प्रथमे द्वितीये तृतीये सप्तमे नवमे थवा ॥ अस्थि
संचयनं कार्यं निजैः स्वगोत्रजैर्मतैः ॥ ब्रह्मपुराणे ॥ कुर्यात्तृतीये विप्रस्य चतुर्थे क्षत्रियस्य तु ॥ पंचमे वैश्यजातेस्तु शूद्रस्य दशमे ह
नि ॥ अस्थ्नां प्रसंचयः प्रेते क्रियते देशगौरवात् ॥ द्वितीये त्वस्थिसंचयमित्यपि क्वचित् ॥ विष्णुः ॥ चतुर्थे दिवसे स्थिसंचयनं कुर्यात्ते
षां गंगाम्भसि प्रक्षेप इति ॥ व्यवस्था च स्वसूत्रानुसारेण देशाचारानुसारेण वा वेदितव्या ॥ तथा ॥ अहाशौचे द्वितीये ह्नि कर्त्तव्यस्त्वस्थि
संचये ॥ सद्यः शौचे तत्क्षणात्तु कर्त्तव्यमिति निश्चय ॥ कर्त्तव्यं तु नरैः श्राद्धं देशकालाविशेषतः ॥ श्राद्धं अस्थिसंचयश्राद्धं ॥ तत्र
अस्थिसंचयनात्पूर्वं संचयनानंतरं वामिश्रान्नेन आमान्नेन वा कुर्यात् ॥ आमश्राद्धे यच्चूर्णान पिंडाः कर्त्तव्याः ॥ ॥ अथास्थिसं
यनश्राद्धप्रयोगः ॥ ॥ कर्त्ता स्नानं विधाय श्राद्धभूमिं सर्षपैस्तिलैश्चावकीर्य रक्षादीपं संस्थाप्य श्राद्धदेयानि वस्तून्यासाद्य

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

चम्य पूर्वाभिमुख उपविश्य अपवित्रः पवित्रो वेत्यादि पठित्वा पुण्डरीकाक्षः पुनात्विति श्राद्धीयद्रव्याणि कुशजलेन सिंचेत् ॥
ततः कुशतिलजलन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्यास्थिसंचयननिमित्तिकमेकोद्दिष्टश्राद्धमहं करिष्ये ॥ इति संक
ल्पं कुर्यात् ॥ ततो देवताभ्य इत्यादित्रिः पठेत् ॥ ततोपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः कुशादीन्यादाय ॥ अद्या
मुकगोत्रस्यामुकप्रेतस्येदमासनं ते मयादीयते तवोपतिष्ठतामिति कुशरूपमासनं दद्यात् ॥ ततः पुटके प्रादेशमात्रं कु
शपत्रद्वयात्मकं पवित्रं पवित्रेस्थ इति मंत्रेण दक्षिणाग्रं धृत्वा शन्नो देवीरिति जलं दद्यात् ॥ तिलोसि तिलान् ॥ गंधद्वारामि
ति गंधं ॥ श्रीश्च ते इति पुष्पं वक्षिपेत् ॥ ततस्तदर्घपात्रं वामहस्ते कृत्वा पवित्रसपुष्पमन्यपात्रोपरि धृत्वा नमो नारायणाये
ति मंत्रेणोत्तराग्रं धृत्वा याद्दिव्या आप इत्यादिनार्घपात्रस्थं जलमभिमंत्र्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेते ममह
स्तार्घस्ते मयादीयते तवोपतिष्ठतामिति पवित्रोपरि अर्घजलं दद्युत्सृजेत् ॥ ततः पवित्रसहितमर्घपात्रमासनवामपा
र्श्वे प्रेतायस्थानमसीति उत्तानमेव स्थापयेत् ॥ ततोभ्यर्च्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेते नानि गंधपुष्पधूपदी
प पूगीफल वासांसि ते मयादीयन्ते तवोपतिष्ठतां ॥ इति गंधादिकमुत्सृजेत् ॥ ततश्चतुष्कोणं मंडलं विधाय ॥ श्राद्धीयान्ना
ग्रभागं घृततिलजलयुतमन्नमादाय ॥ इदमन्नमेतद्भूस्वामिपितृभ्यो नम इत्युत्सृजेत् ॥ ततो व्यंजनघृतमधुजलयुतमन्न
मुपनीय पात्रालंभनावगाहं विना पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणास्य मुखे अमृतं जुहोमि स्वाहा ॥ इदं विष्णुर्विचक्रमे त्रेधा

207

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निधेयदं ॥ समूढमस्यपां सुरेइति पठित्वा ॥ अपहता असुरा रक्षांसि वेदिषद इति तिलान्नोपरि क्षिप्त्वा कुशादीन्यादाय ॥
अद्यामुकगोत्रायामुकप्रेतायेदमन्नं सोपस्करं तेन मया दीयते तवोपतिष्ठतामिति सृजेत् ॥ ततो मधुवाता इत्यादि त्र्यृचं मधु मधु
मधु इति ॥ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु ॥ नमस्तेस्तु विरूपाक्ष नमस्ते नेकचक्षुषे ॥ नमः पि
नाकहस्ताय वज्रहस्ताय वै नमः ॥ इति श्लोकं पठेत् ॥ ततोन्नपात्रसमीपे पिंडदानार्थं मृन्मयीं वेदिकां विधाय तत्र रेखोल्मुकभ्रामणं
विना छिन्नमूलकुशानास्तीर्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतास्थिसंचयनप्राप्तपिंडस्थाने इदमवनेजनं तेन मया दी
यते तवोपतिष्ठतामिति कुशोपरि अवनेजनं दद्यात् ॥ ततः पुनर्मधुतिलयुक्तेनान्नेन पिंडं निर्माय जलतिलकुशसहितं पिंड
मादाय ॥ अद्यामुकगोत्रामुकप्रेतैष पिंडस्ते मया दीयते तवोपतिष्ठतामित्यवनेजनस्थाने वामावारब्धदक्षिणहस्तेन पिंडं दद्यात्
ततः आस्तरणकुशमूले करं प्रोक्ष्य ॥ पिंडशेषान्नं पिंडसमीपे विकीर्य ॥ सव्यं कृत्वा चम्यापसव्यं कृत्वा तूष्णीं प्रेतं भास्वरमूर्त्तिं ध्यायेत्
ततः कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतेदं प्रत्यवनेजनं तेन मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं पिंडोपरि दद्यात्
ततो नीविं विस्रस्य सव्यं कृत्वाचम्यापसव्यं कृत्वा वामहस्तेन सूत्रमादाय कराभ्यां गृहीत्वा प्रेतैतत्ते वास इति सूत्रं पिंडोपरि धृत्वा गं
धपुष्पादिना पिंडं संपूज्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतास्थिसंचयनपिंडोश्राद्धस्पतानि गंधपुष्पधूपदीपनैवेद्या
दीयं तेन तवोपतिष्ठतामिति गंधादिकमुत्सृजेत् ॥ ततः शिवा आपः संत्विति जलं ॥ सौमनस्यमस्त्विति पुष्पं ॥ अक्षतं चारिष्टमस्त्वि

CC-0. In Public Domain. Digitization by eGangotri

तिलतण्डुलान्नपात्रोपरि क्षिपेत् ॥ ततः कुशादीनादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्यास्थिसंचयनश्राद्धे दत्तैतदन्नपानादिकमुप
तिष्ठतामित्यक्षय्योदकं दत्वा ॥ सव्यं कृत्वा दक्षिणां दिशं पश्यन् अघोरः प्रेतोऽस्त्विति पूर्वाग्रां जलधारां पिण्डोपरि दद्यात् ॥ ततो पसव्यं
कृत्वा सपवित्रान् कुशानास्तीर्य पुटकस्थजलादिना इदमूर्जं मया दीयते तवोपतिष्ठतामिति सपवित्रकुशोपरि दक्षिणाग्रां धा
रां दद्यात् ॥ ततः पिण्डमाघ्रायोत्थापयेत् ॥ छिन्नमूलकुशानग्नौ दहेत् ॥ अर्घपात्रं संचाल्य ॥ सव्येन कुशादिसहितं दक्षिणाद्रव्य
मादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्यास्थिसंचयनश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं तन्निष्क्रयं द्रव्यं वा यथानामगोत्राय
ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ॥ अपसव्यं कृत्वा दीपमाच्छाद्य ॥ सव्यं कृत्वा हस्तौ पादौ प्रक्षाल्याचम्य ॥ प्रमा
दात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ इति पठित्वा विष्णुं स्मरेत् ॥ श्राद्धीयवस्तूनि ब्रा
ह्मणाय प्रतिपादयेत् ॥ जले वा क्षिपेत् ॥ स्त्रिया अपि सर्वं पूर्ववदेकोद्दिष्टवद्भवेत् ॥ परंतु ॥ प्रतिज्ञासनाक्षय्योदकदक्षिणादान
वाक्येषु ॥ अमुकगोत्राया मातुरमुकप्रेताया इति ॥ अन्नसंकल्पे ॥ अमुकगोत्रायै मात्रे अमुकप्रेतायै इति ॥ अन्यत्र सर्वत्र अ
मुकगोत्रे मातरमुकप्रेते इति विशेषकृद्यः ॥ ॥ इत्यस्थिसंचयनश्राद्धविधिः ॥ ॥ अथास्थिसंचयनप्रयोगः ॥ तत्र कर्ता
ज्ञातिबन्धुमिलितः स्नात्वा शुक्लवस्त्रं परिधाय दाहदेशं गत्वाचम्य कुशतिलजलान्यादाय ॥ अद्येत्याद्युच्चार्यामुकगोत्रस्यामुकप्रेत
स्य प्रेतत्वनिवृत्त्यर्थमस्थिसंचयनं करिष्ये ॥ स्त्रियास्तु ॥ अद्यामुकगोत्राया मातुरमुकप्रेतायाः प्रेतत्वनिवृत्त्यर्थमस्थिसंचय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नं करिष्ये ॥ इति संकल्पं कुर्यात् ॥ अस्थ्नां वश्व करशूद्रादिस्पर्शे पंचगव्येन शालग्राम जलस्युदकेन प्रोक्षणां कुर्यात् ॥ ततः फलमूलान्ना
दिना चत्वारि पुटयात्राणि पूरयित्वा चितायाः उत्तरद्वारसमीपे उपविश्य ॥ नमः क्रव्यादमुखेभ्यो देवेभ्य इति सर्वदः ॥ येऽस्मिन् श्म
शानदेवाः सुभगं वंत सनातनाः ॥ तेऽस्मत्सकाशाद् गृह्णंतु वलिमष्टांगमक्षयम् ॥ प्रेतस्यास्य शुभान् लोकान् प्रयच्छंतु वशाश्वतान्
अस्माकमायुरारोग्यं सुखं च ददतां वहमिति पठित्वा ॥ एष वलिः शंकरादिदेवेभ्यो नमः इत्येकं वलिं दत्वा · एवं प्रदक्षिणाक्रमेण
पर वलिं च ये त्रिषु द्वारेषु दत्वा तान् वलीन् क्षीरेण प्रपुष्प्य शंकरादिदेवताः स्वीयं स्वीयं स्थानं गच्छंतु इति तद्देवता विसृज्य वाग्यत
श्चितास्थ्ना नास्थीनि क्षीरेण प्रपुष्प्य पलाशशाखाभ्यामुद्धृत्याज्येन गंधवारिणा वा प्रपुष्प्य दक्षिणांगुष्ठकनिष्ठाभ्यां प्रथमं शिरोस्थीनि
ततो न्यान्यपि गृहीत्वा पलाशपुटके निःक्षिप्य नूतनवस्त्रेण संवेष्ट्य मृन्मये नूतनभाण्डे साच्छादने निदध्यात् ॥ तद्भाण्डं मरण्ये वृक्ष
मूले वा शुचिदेशे पंके शैवाल युते नगर्त्ते निभृतं धारयेत् ॥ चिताभस्मादि तोये क्षिपेत् ॥ वल्पन्नमन्येभ्यो दद्यात् ॥ अंभसि वा क्षिपेत्
शिरसो वक्षसः पाणिभ्यां पार्श्वाभ्यां चैव पादयोः ॥ पंचगव्येन संस्नाप्य क्षौमवस्त्रेण वेष्ट्य च ॥ प्रक्षिप्य मृण्मये भाण्डे नवे साच्छादने
शुभे ॥ अरण्ये वृक्षमूले वा शुद्धे संस्थापयेत्तापि ॥ ततः स्नात्वा गोमयां तु भिः स्थितां भूमिं शुद्धिं विधाय तत्रोदकपूर्णां कुंभं स्थापयि
त्वा पसव्यं कृत्वा दक्षिणामुखः ॥ अद्यामुकगोत्राय अमुकप्रेताय पानार्थमिदं कुंभोदकमुपतिष्ठतामिति कुंभं सकुशतिलजलं क्षि
पेत् ॥ स्त्रियास्तु ॥ अद्यामुकगोत्रायै मात्रे अमुकप्रेतायै पानार्थमिदं कुंभोदकमुपतिष्ठतामिति सम्यगेन ॥ ततः स्नायात् ॥ ॥ अथ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंगायामस्थिक्षेपरमविधिः॥ ॥कश्चित्सुतपौत्रसहोदरादिर्गंगातीरमस्थीनि नीत्वा स्नात्वा गंधवारिणाभ्युक्ष्य हिरण्यमध्वाज्य
तिलैः संयोज्य मृन्मिराडपुटे निधाय दक्षिणां दिशं पश्यन् नमोस्तु धर्मायेति वदन् जलं प्रविश्य प्रेतगतस्वर्गकामो दक्षिणाभिमुख
सव्येन समेप्रीतइत्युक्त्वा गंगांभसि निक्षिपेत्॥ ततः स्नात्वा सूर्यं पश्येत्॥ आचम्य॥ अथ प्रकृतेन तदस्थिप्रक्षेपकर्मप्रतिष्ठार्थं मि
दं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे इति दक्षिणां दद्यात्॥ एवं कृते प्रेतपुरस्थितस्य स्वर्गे गतिः
स्यात् महेंद्रतुल्या॥ ब्रह्मपुराणे॥ यावदस्थि मनुष्यस्य गंगातोयेषु मज्जति॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ गंगा
तोयेषु यस्यास्थि प्लवते शुभकर्मणः॥ न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कथंचन॥ गौडः दशाहाभ्यंतरे यस्य गंगातोयेस्थि मज्ज
ति॥ गंगायां मरणे यादृक्तादृक्फलमवाप्नुयात्॥ ब्रह्मपुराणे॥ मातुः कुलं पितृकुलं वर्जयित्वा नराधमः॥ अस्थीन्यन्यकुलो
त्थानि नीत्वा चांद्रायणं चरेत्॥ ॥अर्धविंशतियादिनकृत्यम्॥ ॥पूर्वदिनकृत्यं देशं गत्वा स्नानादिदक्षिणादानांतं प्रथमदि
नवद्द्वितीयादिदिनेष्वपि कुर्यात्॥ तत्राद्येत्युक्त्वा कर्णाक्षिनासिकापूरकोपूरकोद्वितीय॥ पिण्डस्ते मया दीयते तेनवोपतिष्ठ
तां॥ एतौ सतिलतोयांजली ते मया दीयते तेनवोपतिष्ठेतामिति द्वौ सतिलतोयांजली पिण्डोपरि दद्यात्॥ तृतीयदिने॥ अद्येत्या
द्युक्त्वा गलांसभुजवक्षः पूरकस्तृतीयः पिंडस्ते मया दीयते तेनवोपतिष्ठतां॥ एते सतिलतोयांजलयस्ते मया दीयंते तेनवोपति
ष्ठंतामिति त्रीन् तिलतोयांजलीन् पिण्डोपरि दद्यात्॥ इति विशेषः॥ चतुर्थदिने॥ नाभिलिंगगुदपूरकश्चतुर्थः पिण्डः॥ चत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रस्तिलतोयांजलयः ॥ चत्वारितिलतोयपात्राणि ॥ तिलतोयांजलीनां तिलतोयपात्राणां चन्तीयदिन वच्चतुर्थदिनादौ वा कांकुर्यात्
पंचमदिने ॥ जानुजंघापादपूरकः पंचमः पिण्डः ॥ पंचतिलतोयांजलयः ॥ पंचतिलतोयपात्राणि ॥ षष्ठदिने ॥ सर्वमर्म्मपूरकः षष्ठ
पिण्डः ॥ षट्तिलतोयांजलयः ॥ षट्तिलतोयपात्राणि ॥ सप्तमदिने ॥ सर्वनाडीपूरकः सप्तमपिण्डः ॥ सप्ततिलतोयांजलयः
सप्ततिलतोयपात्राणि ॥ अष्टमदिने ॥ दंतलोमादिपूरकोष्टमः पिण्डः ॥ अष्टौतिलतोयांजलयः ॥ नवमदिने ॥ वीर्यपूरको
नवमः पिण्डः ॥ नवतिलतोयपात्राणि ॥ नवमे वाससां त्यागः स्नुक्त्वा तस्मिन्दिने वाससां प्रक्षालनाय दानम् ॥ कर्त्तुर्दशम
दिने वा ॥ दशमदिने ॥ पूर्णतानृप्तताक्षुद्विपर्ययहेतुको दशमः पिण्डः ॥ दशतिलतोयांजलयः ॥ दशतिलतोयपात्राणि ॥ ए
वंपंचपंचाशत्तिलतोयांजलयस्तावंतितिलतोयपात्राणि भवंति ॥ तथा च ब्रह्मपुराणे ॥ येनस्युः पंचपंचाशत्तोयस्यांज
लयः क्रमात् ॥ तावंति तोयपात्राणि संयुक्तानि तिलैः सह ॥ तथा च ॥ शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा ॥ द्वितीयेन
तु कर्णाक्षिनासिकास्तु समासतः ॥ गलांसभुजवक्षांसि तृतीयेन तथा क्रमात् ॥ चतुर्थेन तु पिण्डेन नाभिलिंगगुदानि च ॥ जानु
जंघे तथा पादौ पंचमेन विधीयते ॥ सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः ॥ दन्तलोमाद्यष्टमेन वीर्यस्तु नवमेन च ॥ दश
मेन च पूर्णत्वं तृप्तताक्षुद्विपर्ययः ॥ क्षत्रियवैश्यशूद्राणां संपूर्णाशौचेन वसुदिनेषु नवसुदिनेषु नवपिण्डान्दत्वा ॥ अशौ
चांतदिने ॥ द्वादशपंचदशत्रिंशत्तमदिनेषु दशमपिण्डदानम् ॥ आशौचानेहा नवर्णानां दशमपिण्डमन्त्येदिने इति ब्रह्मपुराणाच

CC-0. In Public Domain. Digitization by eGangotri

वचनात् ॥ तथा ॥ प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः ॥ द्वितीये चतुरो दद्यादस्थिसंचयनं तथा ॥ त्रीन् दद्यात्तृतीये ह्नि वस्त्रादि
क्षालनं ततः ॥ इति कात्यायनवचनात् ॥ अहाशौचे ब्राह्मणादिभिः सर्वैः ॥ प्रथमदिवसे त्रीन् पिण्डान् ॥ षट् तिलतोयांजलीन्
षट् तिलतोयपात्राणि ॥ द्वितीयदिने चतुरः पिण्डान् ॥ द्वाविंशति तिलतोयांजलीन् ॥ द्वाविंशति तिलतोयपात्राणि ॥ तृतीयदि
ने त्रीन् पिण्डान् ॥ सप्तविंशति तिलतोयांजलीन् ॥ तावन्ति तिलतोयपात्राणि ॥ पूर्ववद्दत्वाऽऽशौचान्तदिनकर्म समापयेत् ॥ स
द्यःशौचे त्वेकाहेनैव दशपिण्डा दातव्याः ॥ पंचपंचाशत् तिलतोयांजलयो देयाः ॥ तावन्ति तिलतोयपात्राणि दातव्यानि ॥ तत्राशौ
चान्तदिनपूर्वदिने ब्राह्मणादीनां वाससां प्रक्षालनाय दानं ॥ अशौचान्तदिने प्रक्षालितवस्त्राणि शुद्धं कारयेत् ॥ मृन्मयपाकभा
ण्डानां त्यागः ॥ मृण्मयभाण्डगृहोदरवीथिभित्तिप्रांगणालेपनम् ॥ पूर्वदिनकृत्यदेशं गत्वा स्नात्वा दशपिण्डदानादिदक्षिणा
दानान्तं पूर्ववत्सर्वं विधाय स्नायात् ॥ ततः पुत्राणां यथावारमन्येषामपि ज्येष्ठक्रमेण कनीयसां सपिण्डानां नखलोमानि वापयित्वा ति
लतैलेन गात्रं सर्षपकल्केन शिरश्चोन्मज्य स्नात्वा ॥ प्रेतस्पृष्टवासांसि आश्रितेभ्यो दत्वा आचम्य वासोयुगमहतं नवं पुरातनं वा शु
क्लमच्छिन्नं परिधाय ॥ गोहिरण्यगोलोचनादधिदूर्वागौरमृत्तिकादेर्यथालाभं स्पर्शं कृत्वा ॥ ब्राह्मणो जलं ॥ क्षत्रियो वाहनायुधं ॥ वै
श्यः प्रतोदं प्रग्रहौ ॥ शूद्रो यष्टिं संस्पृशेत् ब्राह्मणान् स्वस्ति वाचयित्वा गृहं संस्कृत्य अश्मकर्माणः स्पृष्टान्युन्मज्य तिलकल्कगौरसर्ष
पैः शिरः स्नात्वा अहतवाससः शुक्लवाससो वा गोहिरण्यादीनालभ्य प्रविशेरन् ॥ स्वस्त्ययनादि धर्मांस्थान् प्रवर्तयति ॥ स्पृष्टानि प्रे

210

रत्न
२१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नस्पृष्टानिवासांसि ॥ आदिशब्दाज्जलस्य ॥ तथाचमनुविप्रः शुध्यत्यपः स्पृष्ट्वाक्षत्रियोवाहनायुधं ॥ वैश्यः प्रतोदरश्मीन्वायष्टिंशूद्रः
कृतक्रियः ॥ शुध्येद्विप्रोदशाहेनद्वादशाहेनभूमिपः ॥ वैश्यःपञ्चदशाहेनशूद्रोमासेनशुध्यति ॥ अंगिराः ॥ सर्वेषामेववर्णानांसू
तकेमृतकेतथा ॥ दशाहाच्छुद्धिरेतेषामितिशातातपोब्रवीत्देवलः ॥ अशुच्यंदशरात्रंतुसर्वेषामपरेविदुः ॥ निधनेप्रसवे
चैवपश्यन्तांकर्मणाःस्वयम् ॥ अत्यन्तोत्कृष्टस्यकर्महानौपीडाचनोविप्रवर्यायरेभूडेदशरात्रमितिहारलतायाम् ॥ दक्षः ॥ स
द्यःशौचंतथैकाहस्त्र्यहश्चतुरहस्तथा ॥ षड्दशद्वादशाहश्चपक्षोमासस्तथैवच ॥ मरणान्ततथाचान्येदशपक्षास्तुसूतके ॥ मि
ताक्षरायांस्मृत्यन्तरे ॥ चतुर्थेदशरात्रंस्यात्षण्निशाः पुंसिपञ्चमे ॥ षष्ठेचतुरहाच्छुद्धिःसप्तमेत्वहरेवतु ॥ अस्मिन्दिनेब्राह्मणानांपं
चगव्यप्राशनं ॥ तत्रैव ॥ सुवर्णादिपात्रेपद्मादिपात्रेवारक्तायागोमूत्रंत्रिपलंगायत्र्याप्रणवेनवाआदाय ॥ ततोगृहीत्वाईषिरमि
तंश्वेतायागोमयंगंधद्वारेत्यादाय ॥ ततःकपिलायाःपयःसप्तपलमाप्यायस्वेत्यादाय ॥ ततोनीलायाःसप्तपलमेवदधिक्रा
व्णइत्यादाय ॥ ततःकृष्णायाघृतमेकपलंघृतमिमितिक्षेइत्यादाय ॥ ततस्त्वेकपलंकुशोदकमापोहिष्ठेत्यादाय ॥ प्रणवेनालोड्य
प्रणवेनैवयज्ञियकाष्ठेननिर्मथ्यप्रणवेनाभिमंत्र्यप्रणवेनपिबेत् ॥ तथाचस्मृतिः ॥ सावित्र्यादायगोमूत्रंगंधद्वारेतिगोमय
म् ॥ आप्यायस्वेतिचक्षीरंदधिक्राव्णोतिवैदधि ॥ तेजोसीतिघृतंतद्वद्देवस्यत्वेतिचोदकम् ॥ कुशाग्निमंत्रंजपेद्विद्वान्यश्चगव्यंभ
वेत्तत ॥ प्रणवेनसमालोड्यकुशैःसप्तावरैस्तथा ॥ प्रणवेनैवनिर्मन्थ्यप्रणवेनपिवेदिदमिति ॥ ॥ इतिदशाहकृत्यम्

CC-0. In Public Domain. Digitization by eGangotri

अथैकादशाहेतिकर्त्तव्या ॥ ॥अथ प्रातर्नदीं जलाशयानंतरं वा गत्वा पात्रब्राह्मणस्य श्मश्रुकर्म नखच्छेदनं च कारयित्वा ताम्रपात्रे
णास्नानोपकरणानि तैलोद्वर्त्तनं च दत्त्वा ॥ स्वयं च स्नात्वाश्वेतवस्त्रे परिधाय जलाशयसमीपे गृहे वा शुद्धभूमिं परिकल्प्य तां संशोध्य
गौरमृत्तिकया शुद्धगोमयेनोपलिप्य पंचगव्येनाभ्युक्ष्य तिलैः सर्षपैश्च विकिरेत् ॥ आस्तृतपाकस्थाने तिलान्विकीर्य तत्र सपि
ण्डद्वारा नूतनमृण्मयभाण्डे स्नात्रपात्राद्युपस्कारैर्वा पाकं कारयित्वा तमारभ्योदङ्मुखाय ब्राह्मणाय शय्यां दद्यात् ॥ पाद्मे ॥ मृतकाले
द्वितीयेह्नि शय्यां दद्यात्सुलक्षणाम् ॥ कांचनं पुरुषं तद्वत्फलवस्त्रसमन्वितम् ॥ संपूज्य द्विजदांपत्यं नानाभरणभूषितम् ॥
उपवेश्य तु शय्यायां मधुपर्कं ततो ददेत् ॥ तत्र क्रमः ॥ कर्त्ता आचांतः पूर्वाभिमुखः सवस्त्रेन सोपकरणशय्यायै नमः ॥ ब्राह्मणा
य नमः इति देयब्राह्मणौ त्रिः संपूज्य वारिणा शय्यामभिषिंच्य कुशतिलजलान्यादाय ॥ अद्याशौचांतद्वितीयेह्नि अमुकगोत्रस्यामु
कप्रेतस्य स्वर्गप्राप्तिकाम इमां सोपकरणशय्यां विष्णुदेवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ यस्मादशू
न्यं शयनं केशवस्य शिवस्य च ॥ शय्या अशून्याप्यस्यास्तु तस्मा जन्मनि जन्मनि ॥ इमन्त्रा दद्यात् ॥ स्वस्तीति प्रतिवचनं ॥ कुशतिलसहि 211
तं दक्षिणाद्रव्यमादाय ॥ अद्य कृतैतत्सोपकरणशय्यादानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणा राम
य दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॥ ततः प्रतिगृहीता स्वस्तीत्युक्त्वा शय्यां स्पृशेत् ॥ ॥अथ कांचनपुरुषदानं ॥ त २११
तः आचम्य फलवस्त्रसमन्वितकांचनपुरुषाय नमः ॥ ब्राह्मणाय नमः इति देयब्राह्मणौ त्रिः संपूज्य वारिणा देयमभ्युक्ष्य कुशादीन्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दाय॥अद्याशौचांतद्वितीयेह्निअमुकगोत्रस्यामुकप्रेतस्यस्वर्गप्राप्तिकामइमंफलवस्त्रसमन्वितंकाचनउरुषंविष्णुदैवतंममुक
गोत्रायामुकशर्मणोब्राह्मणायतुभ्यमहंसंप्रददेस्वस्तीतिप्रतिवचनं॥ततोदक्षिणाद्रव्यादिकमादाय॥अद्यकृतैतत्फलवस्त्रस
मन्वितकांचनउरुषदानप्रतिष्ठार्थमिदंहिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणोब्राह्मणायतुभ्यमहंसंप्रददे॥इतिदक्षि
णांदद्यात्॥प्रतिगृह्यतास्वस्तीत्युक्त्वाकांचनउरुषंस्पृशेत्॥ ॥अथद्विजदंपतीपूजनम्॥तत्राऽऽचम्यकुशतिलजलान्यादा
य॥अद्याशौचांतद्वितीयेह्निअमुकगोत्रस्यामुकप्रेतस्यस्वर्गप्राप्तिकामोद्विजदंपतीअहंपूजयिष्ये॥इतिसंकल्प्यद्विजदंपती
पूजयेत्॥तत्रक्रमः॥एषोर्घोद्विजदंपतीभ्यांनमः॥इदमनुलेपनंद्विजदंपतीभ्यांनमः॥एतेअक्षताद्विजदंपतीभ्यांनमः॥इदं
पुष्पंद्विजदंपतीभ्यांनमः॥एवंधूपदीपनैवेद्यपूगीफलसिंदूरविभूषणवासांसिद्विजदंपतीभ्यांनमः॥इतिदद्यात्॥एतच्च
द्विजदंपतीपूजनंप्रधानत्वाद्वृषोत्सर्गकरणेपिकर्त्तव्यम्॥शय्यादानवदिति॥तत्रवाक्यं॥कुशतिलसहितद्विजदंपतीआदा
य॥अद्याशौचांतद्वितीयेह्निअमुकगोत्रस्यामुकप्रेतस्यस्वर्गप्राप्तिकामइमौद्विजदंपतीविष्णुदैवतौअमुकगोत्रायामुकशर्मणो
ब्राह्मणायतुभ्यमहंसंप्रददे॥स्वस्तीतिप्रतिवचनम्॥ततोदक्षिणाद्रव्यमादाय॥अद्यकृतैतद्द्विजदंपतीदानप्रतिष्ठार्थमिदंहि
रण्यमग्निदैवतंयथानामगोत्रायब्राह्मणायस्मादि॥प्रतिगृह्यतास्वस्तीत्युक्त्वाद्विजदंपतीस्पृशेत् शय्यादानादिकमन्वारोहणे
पिकर्त्तव्यम्॥तत्रामुकगोत्रायामातुरमुकप्रेताया॥इतिवाक्यंकुर्यात्॥ ॥अथवृषोत्सर्गः॥ ॥एकादशेह्निप्रेतस्ययस्मतो

CC-0. In Public Domain. Digitization by eGangotri

त्सृज्यते वृष ॥ पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥ यमुद्दिश्योत्सृजेन्नीलं स तु लभेत परां गतिं ॥ वृषोत्सृष्टः पुनात्येव दशातीतान्दशा
परान् ॥ इति देविपुराणभविष्यादौ फलकथनेषु ॥ न करोति वृषोत्सर्गं सुतीर्थे वा जलांजलिम् ॥ न ददाति सुतो यस्तु पितुरुच्चारएवसः
एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् ॥ यजेत्तं वाश्वमेधेन नीलं वा वृषमुत्सृजेदिति मात्स्ये कौर्मे च ॥ सहगमने न पृथग्वृषो
त्सर्गः ॥ किंतु तत्स्थाने एका गौर्देया ॥ पतिपुत्रवत्या मरणे न वृषोत्सर्गः ॥ किंतु सवत्सगोदानम् ॥ तथा च ॥ पतिपुत्रवती नारी भर्
तुरग्रे मृता यदि ॥ वृषोत्सर्गं न कुर्वीत गां तु दद्यात्पयस्विनीमिति वचनात् ॥ एतयोरन्यस्त्रीणां तु वृषोत्सर्गः कर्त्तव्यः ॥ वृषोत्सर्गं
च कुर्वीतेति वचनादेकादशाहे मुख्यकाले मातृस्थापनशुद्धाभ्युदयिकश्राद्धरहितो वृषोत्सर्गः कर्त्तव्य ॥ ॥ अथ प्रयोगः ॥ वृ
षोत्सर्गसंमतिं प्राक्कल्प वरां देशं नीत्वा आचांतः पूर्वाभिमुख उपविश्य सव्येन कुशान् जलान्यादाय अद्याशौचांत द्वितीयेह्नि अमु
कगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिस्वर्गलोकगमनार्थं वत्सतरीसहितं वृषोत्सर्गमहं करिष्ये इति संकल्पं कुर्यात् ॥ ततउत्तरा
भिमुखं ब्राह्मणमुपवेश्य ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य कर्त्तव्यवृषोत्सर्गांगभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मक
र्त्तुं ममुकगोत्रममुकशर्माणामेभिः पूगीफलपुष्पचंदनवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति होतारं वृणुयात् ॥ वृतोस्मीति प्रति 212
वचनम् ॥ यथाविहितं कर्म कुरु इति यजमानस्तमुद्दिश्य वदेत् ॥ करवाणीति प्रतिवचनं ॥ होतृब्राह्मणाभावे स्वयमेव सर्वं कुर्या रत्न
त् ॥ क्षत्रियादिस्तु ब्राह्मणद्वारा कारयेत् ॥ ततो होता आचांतः प्राङ्मुख उपविश्य गोमयेनोपलिप्ते प्रागुदक्प्रवणे देशे शुद्धे हस्त २१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मात्रं चतुरस्रभूमिं परिसमुह्य कुशानैशान्यां क्षिप्त्वा गोमयोदकेनोपलिप्य मध्यप्रादेशमात्रमुत्तरोत्तरक्रमेणाङ्गुष्ठमूलेन त्रिरुलिख्यो
द्धेखनक्रमेणा दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां संगताभ्यामुद्धृत्यैशान्यां न तत्क्षिप्त्वा नैदेशं जलेनाभ्युक्ष्य तत्र दक्षिणहस्तस्य कांस्यपा
त्रेणानीतमग्निं स्थापयेत् ॥ अग्नेर्दक्षिणतः परिस्तरणभूमिमतिक्रम्य ब्रह्मासनमुपकल्प्य ॥ ततः प्रागग्रकुशैः स्तरणं विधाय
ब्राह्मणमग्नेर्वायव्यात् ॥ प्रदक्षिणमानीय कल्पितासने वहिर्हस्तमुपवेशयेत् ॥ ततोऽग्नेरुत्तरतः स्तरणभूमिमतिक्रम्य कुशपत्र
मास्तीर्य तत्र मृत्पात्रं वद्धमध्य सेतुधत्वा उदकं क्षीरं च ब्रह्मणो मुखमवलोक्य निदध्यात् ॥ ततः उपमूलसकृच्छिन्नवर्हिर्वाममुष्टिवत्
भगिन आग्नेयादीशानान्तं प्राच्यां ॥ ब्रह्मणोऽग्निपर्यन्तं दक्षिणस्यां ॥ नैरृत्याद्वायव्यान्तं पश्चिमायां ॥ अग्नितः प्रणीतापर्यन्तमुत्तरस्यां
स्तरणं कुर्यात् ॥ ततोऽग्नेरुत्तरतः प्रणीतापश्चिमे प्राक्संस्थमुदक्संस्थं वा उपयोक्ष्यमाणानामासादनं ॥ तद्यथा ॥ पवित्रच्छेदनार्थकु
शपत्रत्रयम् ॥ पवित्रार्थमनन्तर्गर्भिणां साग्रं कुशपत्रद्वयं ॥ प्रोक्षणपात्रार्थं मृत्पात्रं ॥ आज्यार्थं ताम्रस्थाली ॥ पायसचर्वार्थं मृत्तिका
स्थाली ॥ स्रुवसंमार्जनार्थं कुशत्रयं ॥ उपयमनार्थं वेणीरूपकुशत्रयं ॥ प्रादेशमितपलाशसमित्त्रयं ॥ स्रुवः ॥ आज्यं तण्डुला ॥ दुग्धं
स्रुवमासाद्य ॥ तदुत्तरतः सिद्धमेव पोल्लेपिष्टमयं चरुं ॥ ब्रह्मदक्षिणार्थं पूर्णपात्रम् ॥ होतृदक्षिणार्थं वस्त्रयुगसुवर्णकांस्याद्युप
कल्पयेत् ॥ ततः आसादितकुशपत्रद्वयमादाय पवित्रच्छेदनकुशैः प्रादेशमात्रं संमाय छित्त्वानानपास्य पवित्रे प्रणीतोदकं च प्रोक्षि
णीं निधाय उदगग्रपवित्रे ब्रह्मसहस्तयोरङ्गुष्ठानामिकाभ्यां मन्तयोरादाय नम्मध्येन प्रोक्षणमुदकं त्रिः क्षिप्त्वा पवित्रे प्रोक्षण्यां निधाय

रत्न
२१३

नत्वा चत्रं दक्षिणहस्तेनादाय वामे निधाय दक्षिणहस्तांगुष्ठानामिकाभ्यां तज्जलं किंचिदूर्ध्वमुत्क्षिप्य प्रणीताजलेन प्रोक्षणीरभिषिं
च्य तज्जलेन यथासादितं द्रव्यं प्रत्येकं सकृत्प्रोक्ष्य पवित्रशेषं जलसहितं पात्रं प्रणीताग्न्योरन्तरे निधाय ॥ आज्यस्थाल्यामाज्यं निरूप्य
चरुस्थाल्यां प्रोक्षण्युदकं प्रक्षिप्य ॥ एकत्र प्रदेशे रुद्रहोमार्थं पृथक् निक्षिप्य ॥ प्रणीतोदकेन त्रिः प्रक्षालितं तण्डुलान् चरुस्थाल्यां
निक्षिपेत् ॥ स्वयं चरुं ब्रह्मणा चाज्यं गृहीत्वा प्रदक्षिणीकृत्याग्निपूर्वेणानीत्वा दक्षिणत आज्यम् ॥ उत्तरतः पायसचरुं श्रपणा
र्थं युगपदग्नौ निधाय ज्वलत्तृणमादाय ३३ ज्यचर्वोरुपरि दक्षिणं भ्रामयित्वाग्नौ क्षिपेत् ॥ स्रुवस्य प्रागग्रस्याधोमुखस्याग्नौ प्र
तपनम् ॥ संमार्जनकुशैः संमार्जनम् ॥ आसन्नबर्हिषि स्रुवधरतः प्रागग्रस्थापनं विधाय पाके वृत्ते स्रुवमाज्यस्थाल्यामग्नेः प
श्चिमेनानीत्वा प्रणीतोत्तरतः प्रथमं निधाय चरुं तथैवोद्वास्याज्यपश्चिमे नीत्वाज्योत्तरतो निदध्यात् ॥ प्रोक्षणीतः पवित्रे समानी
याज्ये प्रोक्षणीवदुत्पवनम् ॥ पवित्रे प्रोक्षणीपात्रे निधाय ॥ आज्यमवेक्ष्य सत्यपद्रव्ये तन्निरस्य ॥ पुनः प्रोक्षण्युत्पवनं निधाय ॥ पा
यसचरोरुत्तरतः पूर्ववत्किंचिदपि स्थापयित्वा चरुं निधाय ॥ होमसमाप्तिपर्यन्तमुपग्रहार्थं कुशैर्वामहस्ते उपग्रहं विधाय प्रजापतिं चिंतय
न्तु तिष्ठन् प्रागग्रघृताक्तसमित्त्रयं प्रक्षिप्योपविश्य पवित्रे गृहीत्वा प्रोक्षणीजलेनाग्निं पर्युक्ष्य पवित्रे प्रणीतासु निधाय ॥ प्रोक्ष
णीपात्रं स्वस्थाने निदध्यात् ॥ अथ दक्षिणजान्वाच्य होतृस्थाने उपविष्टः प्राङ्मुखो नत्वा रव्वः स्रुवेण षडाज्याहुतीर्न कुर्यात्सो
ममन्त्राणां पृथगादिषु कृत्रविन ॥ अन्येषां वा वहूनां कार्यमात्रमनादिनेति परिशिष्टवचनात् ॥ ॐकाररहिताः षडाज्याहु

213
राम
२१३

४९

CC-0. In Public Domain. Digitization by eGangotri

नीर्दग्रान॥ नयथा॥ ब्रह्मणाः उ नचारब्धः ऋ वंगृहीत्वा दक्षिणाजानुं नमयित्वा संस्रवं विनैवाज्येनषडाहुतीर्जुहुयात्॥ स्वाहान्ते होमः
इदमग्नये इति त्यागः॥ इहरतिः स्वाहा॥ इदमग्नये॥ १॥ इहरमध्वं स्वाहा॥ इदमग्नये॥ २॥ महधृतिः स्वाहा॥ इदमग्नये॥ ३
इहस्वधृतिः स्वाहा॥ इदमग्नये॥ ४॥ उपसृजं धरुणं मात्रे धरुणो मातरं धयन् स्वाहा॥ इदमग्नये॥ ५॥ रायस्पोषमस्मासु दीध
रत्स्वाहा॥ इदमग्नये॥ ६॥ ततो ब्रह्मणान्वारब्धो जुहोति॥ अग्नेर्दक्षिणाभागे मनसा॥ ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये॥ १
अग्नेरुत्तरभागे॥ ॐ इन्द्राय स्वाहा॥ इदमिन्द्राय॥ २॥ ततउत्तरार्द्धे॥ ॐ अग्नये स्वाहा॥ इदमग्नये॥ ३॥ दक्षिणापूर्वार्द्धे॥ ॐ सोमा
य स्वाहा॥ इदं सोमाय॥ ४॥ इत्याघाराज्यभागौ संस्रवं कृत्वा समिद्धतमेऽग्नौ॥ संस्रवं विनैव पायसेन वा ऽहुतयो दातव्याः॥ तद्यथा
ॐ अग्नये स्वाहा॥ इदमग्नये॥ ॐ रुद्राय स्वाहा॥ इदं रुद्राय॥ ॐ शर्वाय स्वाहा॥ इदं शर्वाय॥ ॐ पशुपतये स्वाहा॥ इदं पशुपतये॥
ॐ उग्राय स्वाहा॥ इदमुग्राय॥ ॐ अशनये स्वाहा॥ इदमशनये॥ ॐ भवाय स्वाहा॥ इदं भवाय॥ ॐ महादेवाय स्वाहा॥ इदं महादेवा
य॥ ॐ ईशानाय स्वाहा॥ इदमीशानाय॥ इति कृत्वा पिष्टके न जुहुयात्॥ ॐ पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः॥ पूषा वाजं सनोतु
नः स्वाहा॥ इदं पूष्णे॥ ततः पायसपिष्टकाभ्यां॥ ॐ अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्विष्टकृते॥ तत आज्येनाग्नेर्मध्यभागे॥ ॐ भूः
स्वाहा॥ इदमग्नये॥ ॐ भुवः स्वाहा॥ इदं वायवे॥ ॐ स्वः स्वाहा॥ इदं सूर्याय॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसी
ष्ठाः॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषां ऽसि प्रमुमुग्ध्यस्मत्स्वाहा॥ इदमग्नीवरुणाभ्यां॥ ॐ स त्वन्नो अग्ने ऽवमो भवोतीनेदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२१४

ष्टो अस्या उषसो व्युष्टौ ॥ अवयवक्ष्वरणो वरुणा २० रराणो वीहि मृडीकं सुहवो न एधि स्वाहा ॥ इदमग्नये ॥ ॐ ये ते शतं वरुणं ये
सहस्रं यज्ञियाः ॥ पाशा वितता महान्तः ॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे
विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्य ॥ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ॥ अथा वयमादित्य व्रते
तवानागसो अदितये स्याम स्वाहा ॥ इदं वरुणाय ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ इति मनसा ॥ एवं हुत्वा संस्रवप्रा
शनमाचमनं च कृत्वा पवित्राभ्यां शिरः संमार्ज्य ॥ सुमित्रिया न आप ओषधयः सन्तु इति मंत्रेण ॥ ततो दुर्मित्रियास्तस्मै सन्तु योस्मान्
द्वेष्टि यं च वयं द्विष्म इति मंत्रेणेशान्यां प्रणीता विमोकः ॥ ततः फलपुष्पान्वितेन घृतेन ॥ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृ
त आजातमग्निं ॥ कवि सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा ॥ इदमग्नये ॥ इति यजमानसहितो होता पू
र्णाहुतिं कुर्यात् ॥ ततः स्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिधार्य ॥ ॐ देवा गातुविदो गातुं वित्त्वा गातुमित ॥ मनसस्पत इमं देव
यज्ञ २० स्वाहा वाते धाः स्वाहा ॥ इदमग्नये ॥ इति बर्हिर्होमं कुर्यात् ॥ ततो यजमानः कुशतिलजलान्यादाय ॥ अद्य कर्त्तव्यवृषोत्स 214
र्गाङ्गभूतकृतैतद्धोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्म राम
णे ब्राह्मणाय ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे इति ब्रह्मणे दक्षिणां दद्यात् ॥ स्वस्तीति प्रतिवचनं ॥ ततो वस्त्रयुगं सुवर्णकांस्यानि सुप २१४
नीयकुशादीन्यादाय ॥ अद्य कर्त्तव्यवृषोत्सर्गाङ्गभूतकृतैतद्धोमकर्मप्रतिष्ठार्थमेतानि वस्त्रयुगसुवर्णकांस्यानि बृहस्पति वह्निदैवद

CC-0. In Public Domain. Digitization by eGangotri

देवतानि अमुकगोत्रायामुकशर्मणे ब्राह्मणाय होत्रे दक्षिणां तुभ्यमहं संप्रददे इति ॥ होत्रे दक्षिणां दद्यात् ॥ स्वस्तीति प्रतिवचन
म् ॥ ततो द्विहायनमेकहायनं वा जीववत्सायाः पयस्विन्याः पुत्रं नीलादिवर्णं ॥ लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ॥ श्वेत
रः खुरः विषाणाभ्यां स नीलो वृष उच्यते ॥ नवहेमौ वयेन्नीलं कामयत् पुष्कलश्रियमिति कालिकापुराणवचनात् ॥ देवीपुराणो
वत्सो वत्सिकाभद्रा देवासंभवतोपि वा ॥ यत्तु पठंति ॥ वृषोत्सर्जनवेलायां वृषाभावात्कथं च न ॥ मृझिपिष्टैश्च दर्भैर्वा वृषं कृत्वा
विमोचयेत् ॥ इति लक्षणालक्षितं यथालाभं वा आनीय ॥ ततश्च तस्मो द्वेरुकां वा रुकवर्षाधिकां वत्सतरीमानीय ॥ अग्निसमी
४० पमुपिक्षितगोपालेन प्राग्ग्रीवं वृषभं संवेशयेत् ॥ ततो रुद्राध्यायं पठन् वृषसमीपं गत्वा ॥ मा नस्तोके तनये मा न आयुषि मा नो गो
षु मा नो अश्वेषु रीरिषः ॥ मा नो वीरान् रुद्र भामिनो वधीर्हविष्मंतः सदमित्त्वा हवामहे इति मंत्रेणाग्निमपाद दक्षिणपार्श्वे कुंकुमला
क्षारसचंदनादिना त्रिशूलं लिखेत् ॥ वृषोह्यसि भगवनाग्र मंतंत्वा हवामहे ॥ एवमानः सहस्रमिति मंत्रेण पश्चिमपादवामपार्श्वे च
क्रं लिखेद्वृषभस्य ॥ तथाच्छंदोगपरिशिष्टे ॥ ततो तेनैव गंधेन मानस्तोक इतीरयन् ॥ वृषस्य दक्षिणे पार्श्वे त्रिशूलांकं समालिखेत्
वृषो ह्यसीति सव्येन चक्रांकमपि दर्शयेत् ॥ तप्तेन यश्वादयसास्पष्टे तत्तेव कारयेत् ॥ इति ॥ अयसा लोहेन ॥ ततो लोहकारमाहूय
वृषभमंकयेति ब्रूयात् ॥ ततोग्निं संतप्तलोहेन ॥ ततो लोहकारयित्वा तमुत्साप्य वत्सतरीसहितं वृषभं वक्ष्यमाणमंत्रैस्नपयेत् ॥
तत्र मंत्राः ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विंद्रः ॥ या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शंस्योना भवंतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न २१५ यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति ॥ या अग्निं दधि(रे) यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जना
नां ॥ या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शंस्योना सुहवा भवंतु ॥ यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति ॥ या अ
ग्निं दधिरे सुवर्णास्तान आपः शंस्योना सुहवा भवंतु ॥ शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे ॥ घृतश्चुतः शु
चयो याः पावकास्तान आपश्शं स्योना सुहवा भवंतु ॥ शन्नो देवीरभिष्टय आपो भवंतु पीतये ॥ शंयोरभिस्रवंतु नः ॥ इति ॥ लोहपृ
ष्ठिकान्तरकनकपट्टिकाद्येन वस्त्रादिभिर्वत्सरीसहितं वृषभमलंकृत्य ॥ सावित्रीमघमर्षणं रुद्रजानुपुरुषसूक्तं यद्देवा देवहेड
नमित्यादि मंत्रद्वयं कूष्माण्डीश्च जपेत् ॥ ततो वृषभस्य दक्षिणे कर्णे ॥ पिता वत्सानां पतिरघ्न्यानामथो पिता महतां गर्गराणां ॥ वत्
सो जरायुः प्रतिधुक् पियूष आमिक्षा घृतं तद्वस्य रेतः ॥ वृषो हि भगवान् धर्मश्चतुःपादः प्रकीर्त्तितः ॥ वृणोमि तमहं भक्त्या स मा
रक्षतु सर्वतः ॥ इति मंत्रद्वयं पठित्वा वत्सतरीसहितं वृषं पूजयेत् ॥ एषोर्घो वत्सतरीसहितवृषभाय नमः ॥ इदमनुलेपनं वत्स
तरीसहितवृषभाय नमः ॥ एतानि पुष्पाणि वत्सतरीसहितवृषभाय नमः ॥ एतानि धूपदीपनैवेद्यानि वत्सतरीसहितवृषभाय
नमः ॥ ततः कुशतिलजलान्यादाय सव्येन ॥ अद्याशौचान्तद्वितीयेहि अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षयस्व रत्न २१५
र्गप्राप्तिकामो रुद्रदैवतमेनं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण मा नः साप्त जनुषा सुभगा रायस्पोषेण समिषा म
देम इत्युत्सृजेत् ॥ नीलवृषे नीलपदग्रहणं यः ॥ एतयैवोत्सृजेदग्निरिति पारस्करवचनात् ॥ अनयैव सर्वासामुत्सर्गः ॥ अगर्थस्तु

215

५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हे वत्सतर्यो वीर्युष्मान् एनं पतिं स्वामिनं युवानं तरुणं ददानि त्यजानि ॥ तेन वृषेण प्रियेण सह क्रीडंती: स्वलं त्वध्वरथ प्रमथ ॐ पूर्यं
हि हे वत्सतर्यो मा न: सोऽस्माकं न: नास्मत्तत्त्वविषया: किंतु मया त्यक्ता: ॥ वयं वृषभस्याभवतीनो वत्सागेन रायस्पोषेण धनस
मृद्ध्या ॥ सप्रजनुषा सप्रजन्मत्वा पके नवृषाअन्ने न वसमंदेम हृष्टा भवेम: सुभगा लोकस्य प्रिया इति ॥ ततस्त्वेशानीं दिशं वत्सत
रीसहितं वृषं वालयेत् ॥ वत्सतरीमध्यगतं वृषभमभिमंत्रयेत् ॥ तत्र मंत्रा: ॥ मयोभूरभिमावाहि स्वाहा ॥ मारुतोसि मरुतां गण:
शंभूर्मयोभूरभिवाहि स्वाहा ॥ वस्यूरसि तु वस्यान्श्छंभूर्मयोभूरभिमावाहि स्वाहा ॥ यास्ते अग्ने सूर्ये रुचो दिवमातन्वंति रश्मिभि: ॥ ता
भिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥ यावो देवा: सूर्ये रुचो गोष्वश्वेषु या रुच: ॥ इंद्राग्नी ताभि: सर्वाभी रुचं नो धत्त बृहस्पते
रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि ॥ रुचं विश्वेषु शूद्रेषु मयि धेहि रुचा रुचं ॥ तत्त्वा यामि ब्रह्मणा वंदमानस्तदाशास्ते
यजमानो हविर्भि: ॥ अहेडमानो वरुणेह बोध्युरुशंस मा न आयु: प्रमोषी: ॥ स्वर्णा घर्म: स्वाहा स्वर्णार्क: स्वाहा ॥ स्वर्णा शुक्र: स्वा
हा ॥ स्वर्णा ज्योति स्वाहा ॥ स्वर्णा: सूर्य: स्वाहा ॥ इति ॥ तत: कृतायस्यां दक्षिणाभिमुखो वामजानुपातयित्वा वृषभपुच्छे तिलकुश
जलान्यादाय ॥ ताम्रपात्रस्थजलेन मंत्रस्थं फलमुद्दिश्य पाणिना लिंचयेत् तर्पयेदभिमंत्रै: ॥ स्वधा पितृभ्यो मातृभ्यो बंधुभ्यश्चापि तृ
प्तये ॥ मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षजा: ॥ गुरुश्वशुरबंधूनां ये कुलेषु समुद्भवा: ॥ ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जि
ता: ॥ वृषोत्सर्गेण ते सर्वे लभंतां तृप्तिमुत्तमामिति ॥ ततो लोहकारमाहूय अभिमतं वेतनं तस्मै दद्यात् ॥ उत्सृष्टं ब्राह्मणानुश्राव

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२१६

येत्॥ यत्किंचिद्विजरागामयोन्नहूंतदन्येननेतव्यं नवाह्यं न तत्क्षीरं पातव्यं केनचित्क्वचित्॥ इति॥ ततो रुद्राग्रे वहुस
र्पिष्कं पायसं ब्राह्मणान्भोजयेत्॥ विष्णुः॥ होत्रे वस्त्रयुगं दद्यात्सुवर्णं कांस्यमेव च॥ अथ स्कान्दे स्वदत्तगवं वेतनं मनसेप्सि
तं॥ ॥उत्तमवराशो॥ न च वाह्यो न तत्क्षीरं पातव्यं केनचित्क्वचित्॥ अंकितं हृष्टपुत्तुल्लहुं यो वाहयति दुर्मतिः॥ कुलानि पातयेत्
त्तस्य नरके नात्र संशयः॥ ॥अथ कपिलादानम्॥ कपिलासमीपं गत्वा॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ इति मंत्रेण कपिलां प्रणम्य चंदनधूपदीपनैवेद्यादिभिः संपूज्य ब्राह्मणां च संपूज्य
कुशजलेन गामभ्युक्ष्य कुशादीन्यादाय॥ अद्याशौचान्तद्वितीयेहि अमुकगोत्रस्यामुकप्रेतस्य स्वर्गप्राप्तिकाम इमां कपिला
गां सवत्सां हेमशृंगीं रौप्यखुरां वस्त्रयुगच्छन्नां मुक्तालांगूलभूषितां रुद्रदेवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्य
महं संप्रददे॥ कपिले सर्वदेवानां पूजनीयासि रोहिणी॥ तीर्थदेवमयी यस्मादतः शांतिं प्रयच्छतु॥ इत्युक्त्वा दद्यात्॥ स्वस्ती
ति प्रतिवचनं॥ ततो दक्षिणां द्रव्यादिकमादाय॥ अद्यकृतैतत्सोपकरणसवत्सकपिलगवीदानप्रतिष्ठार्थमिदं हिरण्यं म 216
ग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे॥ इति दक्षिणां दद्यात्॥ ततः प्रतिग्रहीता॥ कोदा राम
त्कस्मा अदात्कामोदात्कामायादात्॥ कामो दाता कामः प्रतिगृहीता कामैतत्ते॥ इति कामस्तुतिं गोपुच्छग्रहणं कृत्वा कुर्यात्॥ त २१६
तः कृतापसव्यो दक्षिणामुखो वामजानु पातयित्वा गोपुच्छतिलकुशानादाय ताम्रपात्रस्थजलेन मंत्रस्थं पुच्छद्वयाञ्जलित्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येषां न पर्यये देभिर्मन्त्रैः ॥ स्वधा पितृभ्यो मातृभ्यो बंधुभ्यश्चापि तृप्तये ॥ मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षजाः ॥ गुरुश्वशुरबंधूनां ये कुले
षु समुद्भवाः ॥ ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः ॥ कपिलादानपुण्येन लभंतां तृप्तिमुत्तमामिति ॥ यथोक्तकपिलाभावे के
वलामपि दद्यात् ॥ तत्र पूजादि पूर्ववत् ॥ अद्याशौचांतद्वितीयेह्नि अमुकगोत्रस्यामुकप्रेतस्य स्वर्गप्राप्तिकामः ॥ इमां कपिलां
गां रुद्रदैवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ कपिले सर्वदेवानां पूजनीयासि रोहिणी ॥ तीर्थदे
वमयी यस्मादतः शांतिं प्रयच्छ मे ॥ इत्युदद्यात् ॥ स्वस्तीति प्रतिवचनम् ॥ ततो दक्षिणादिकमादाय ॥ अद्य कृतैतत्कपिलग
वीदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दद्यात् ॥
स्वस्तीति प्रतिवचनं ॥ गोपुच्छग्रहणं कामस्तुतिः पूर्ववत् ॥ ततः सचैलं स्नायात् ॥ ॥ अथैकादशाहे आद्यमासिकश्राद्ध
प्रयोगः ॥ ॥ ततः कर्त्ता स्नानं विधाय गोमयोपलिप्तायां भूम्यैनमः ॥ इति त्रिः पुष्पाक्षतपूजितायां भूमौ दर्भेषु तिष्ठन् यजमान
ः सवर्णानाहूतं ब्राह्मणां स्नातमाचांतं स्वागतमिति पृच्छेत् ॥ सुस्वागतमिति तेनोक्तेउभाउपविशत ॥ ततोपसव्यं कृत्वा जल
तिलपुतमर्घपात्रमादाय गंधपुष्पाभ्यामभ्यर्च्य कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेताद्यमासिकश्राद्धे एष पाद्यार्घस्ते
मया दीयते तवोपतिष्ठतामिति पाद्यार्घं दद्यात् ॥ ततः सव्येनावस्थाप्य ब्राह्मणामावस्याग्रे कृत्वा श्राद्धदेशमागत्योपवि
श्यान्याभिप्रायेणासितुमिति पृच्छेत ॥ पूर्वेणाचौनि मंत्रणासंभवे तस्मिन्नेवाह्निकश्राद्धवेलायां अविराचांतः अंत्र्यधिवासाभू

दश
२१८

यै नमः इति त्रिः पुष्पाक्षतपूजितायां भूमौ दर्भत्रितिष्ठत्य यजमानः सर्वं वर्णोनाहूत्त सा वां तद्ब्राह्मणं स्वागतमिति पृच्छेत्॥ सुस्वा
गतमिति तेनोक्ते उभावुपविशतः॥ ततः श्राद्धकर्त्ताऽपसव्येन पुष्पचंदनपूगीफलानि ब्राह्मणाय दत्वा ब्राह्मणाद्दक्षिणाजानु
स्पृष्ट्वा॥ अद्यामुकगोत्रस्यामुकप्रेतस्याद्यमासिकश्राद्धकरणाय भवन्तं ब्राह्मणमहमामंत्रये॥ आमंत्रितोस्मीति प्रतिवचनम्॥
अक्रोधनेन शौचपरेण सततं ब्रह्मवादिना॥ भवितव्यं भवता नो यतने श्राद्धकर्मणि॥ इति पात्रब्राह्मणं नियमान् श्रावये
त्॥ भवितव्यमिति तेनोक्तं॥ अर्घं संपाद्य वामहस्ते कृत्वा गंधपुष्पाभ्यामभ्यर्च्य कुशादिकमादाय॥ अद्यामुकगोत्रामुकप्रेता
द्यमासिकश्राद्धे एष पाद्यार्घ हस्ते मया दीयते तवोपतिष्ठतामिति पादार्घं दद्यात्॥ ततस्तिलतैलेन विप्रपादौ आजानु अभ्यं
जयेत्॥ ततः स्वयमाचम्य पात्रब्राह्मणमप्याचमय्याग्रे कृत्वा श्राद्धदेशमागत्योपविश्य पात्राभिप्रायेणासिद्धमिति पृच्छेत्॥ त
तो दक्षिणाग्रैककुशसहितनेपालकेवलाघात्मकमासनममुकस्यासनं स्पृशेत्॥ अत्रासने देवराजाभ्यनुज्ञातो विश्रम्यतां द्वि
जवर्यानुगृहान्॥ प्रसादयेत्वासनं शुक्लपुत ज्ञानाग्निपूतेन करेणा विप्र इति मंत्रं पठित्वा पात्रब्राह्मणं दक्षिणहस्ते धृत्वोद 217
ङ्मुखमुपवेशयेत्॥ ततः पात्रब्राह्मणस्य पादयोस्तले दक्षिणाग्रं कुशत्रयं दद्यात्॥ आसनसमीपे वर्त्तितलतैलेन घृतेन वाश्रा दश
ज्वलमाग्निपर्यन्तस्थापितं दीपं दद्यात्॥ तदृक्षावपात्रब्राह्मणेन कार्या॥ रक्षोघ्नान् गौरसर्षपान् तिलांश्च श्राद्धदेशे विकि २१८
रेत्॥ ॥ अथ जलपूर्णपात्रदानम्॥ ॥ सव्येनाचम्य जलपूर्णपात्राय नमः॥ ब्राह्मणाय नमः इति देयब्राह्मणौ त्रिः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपूज्य वारिणा देयमभ्युक्ष्य॥ कुशादिकमादाय॥ अद्याशौचान्तद्वितीयेह्नि अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्युत्तम
लोकप्राप्तिपूर्वकबहुरसोपस्थितिविषयदधिकरणकपूज्यत्वकाम इदं जलपूर्णं पात्रं प्रजापतिदैवतममुकगोत्रायामुक
शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ प्रतिगृह्य ब्राह्मणः स्वस्तीति प्रतिवचनम्॥ ततो दक्षिणां द्रव्यान्तरमादाय॥ अद्यकृतैतज्जल
पूर्णपात्रदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायेत्यादिको दादिति काम स्तुतिं पठेत्॥ ॥ अथ पाकदानम्
ततः आचम्य गन्धादिना देयब्राह्मणौञ्चि: संपूज्य वारिणा देयमभ्युक्ष्य कुशतिलजलान्यादाय॥ अद्याशौचान्तद्वितीयेह्नि अ
मुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिपूर्वकसौभाग्यावैधव्यसर्वगुणोपेतभव्यमित्रजनसुतगृहसदा
मत्रं वियोगसुखवाउत्तमरूपावाप्तिकाम इमं पाकं नानाभाराउनिर्मितं यथोपयन्तु ब्रह्मेमतां माधिदिष्ठितं विष्णुदैवतं यथाना
मगोत्रायेत्यादि॥ स्वस्तीति प्रतिवचनम्॥ आपाक ब्रह्मरूपोसि भाराउनामानि जं नवः॥ प्रदानात्ते प्रजातुष्टिः सर्वत्रास्तु ममाक्ष
या॥ भाराउरूपाणि यान्यत्र कल्पितानि यथाविधि॥ भूयासन्त्वानुरूपाणि उपतिष्ठन्तु तानि च॥ ततो दक्षिणां द्रव्यान्तरमादाय॥ अ
द्यकृतैतत्पाकदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं यथानामगोत्रायेत्यादिको दादिति काम स्तुतिः पूर्ववत्॥ ॥ अथ
काष्ठपादुकादानम्॥ ॥ ततः आचम्य गन्धादिना देयब्राह्मणौञ्चि: संपूज्य वारिणा देयमभिषिच्य कुशादिकमादाय॥ अद्याशौ
चान्तद्वितीयेह्नि अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिपूर्वकदिव्यध्वजपताकारथप्राप्तिकाम इमे काष्ठपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२१८

उकेवनस्पतिदेवतेयथानामगोत्रायेत्यादि॥ स्वस्तीतिप्रतिवचनं॥ करणकोच्छिष्टपाषाणागृध्रिकादिनिवारणे॥ पादुकेयंप्रद
स्यामिविप्रप्रीत्याप्रगृह्यतां॥ ततोदक्षिणांद्रव्याण्यादाय॥ अद्यकृतैतत्पादुकादानप्रतिष्ठार्थमिदंहिरण्यमग्निदैवतंयथाना
मगोत्रायत्यादि॥ कामस्तुतिंपूर्ववत्॥ ततः सर्वेनैवपूर्वाभिमुखः कुशोदकेन॥ अपवित्रः पवित्रोवासर्वावस्थांगतोपिवा
यस्मरेत्पुण्डरीकाक्षंसवाह्याभ्यंतरः शुचिरितिपठित्वापुण्डरीकाक्षः पुनात्वितिपुण्डरीकाक्षंस्मृत्वाश्राद्धीयद्रव्यमात्मानंचसि
ञ्चेत्॥ ततः कुशतिलजलान्यादाय॥ अद्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्युत्तमलोकप्राप्तिकामोद्यादियथाकालंषोड
शश्राद्धान्यहंकरिष्येइतिसंकल्पयेत्॥ तस्मिन्वर्षेमरणादिनमारभ्यद्वादशमासमध्येअधिकमासयातेषोडशपदस्थानेस
प्तदशपदंप्रयोज्यं॥ पुनः कुशतिलजलान्यादायअद्यामुकगोत्रस्यामुककप्रेतस्यप्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतुषोडशश्रा
द्धांतर्गताद्यमासिकश्राद्धमहंकरिष्येइतिसंकल्पयेत्॥ कुरुष्वेतिब्राह्मणप्रतिवचनं॥ ततोदेवताभ्यः पितृभ्यश्चमहायोगिभ्य
एवच॥ नमः स्वाहायैस्वधायैनित्यमेवनमोनमः॥ इतित्रिवारंजपेत्॥ ततोऽपसव्यंकृत्वादक्षिणाभिमुखः पातितवामजा 218
नुः॥ कुशादीन्यादाय॥ अद्यामुकगोत्रस्यामुकप्रेतस्याद्यमासिकश्राद्धेइदमासनंतेमयादीयतेतवोपतिष्ठतामितिकुशरूपा रत्न
सनंदक्षिणाग्रउत्सृजेत्॥ ॥अथक्षणदानम्॥ ततःसव्यंकृत्वाप्राङ्मुखउपविष्टः॥ छत्रायनमः॥ ब्राह्मणायनमः॥ इतिदे २१८
यब्राह्मणोक्तिः संपूज्यछत्रमभिषिंच्यकुशादिकमादाय॥ अद्यामुकगोत्रस्यामुकप्रेतस्ययमपथ्याधिकरणाकघोरातपवारणार्थं

CC-0. In Public Domain. Digitization by eGangotri

मिदंछत्रममुन्नानांगिरोदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे॥ सर्वेषामेवदानानांछत्रमातपवारणं
सुखदंमोक्षदंयस्मात्तस्माछांतिंप्रयच्छतु॥ इत्युक्त्वाविप्रहस्तेजलंदद्यात्॥ स्वस्तीतिप्रतिवचनं॥ ततःसकुशतिलजलदक्षि
णाद्रव्याण्यादाय॥ अद्यकृतैतच्छत्रदानप्रतिष्ठार्थमिदंहिरण्यमग्निदैवतंयथानामगोत्रायामुकशर्मणेब्राह्मणायतुभ्यम
हंसंप्रददे॥ इतिदक्षिणांदद्यात्॥ प्रतिग्रहीतास्वस्तीत्युक्त्वादण्डंधारयेत्॥ ॥अथउपानद्दानम्॥ ॥उपानद्भ्यांनमः॥
ब्राह्मणायनमइतिदेयब्राह्मणौत्रिःसंपूज्यउपानहावभिषिंच्यकुशादीन्यादाय॥ अद्यामुकगोत्रस्यामुकप्रेतस्यसन्नप्रवासु
कासिकेटकिनभूदुर्गसंनरणार्थमिमेउपानहावुन्नानांगिरौदैवतेअमुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे
उपानहौप्रदास्यामिकण्टकादिनिवारणे॥ सर्वस्थानेषुसुखदेअतःशांतिंप्रयच्छतं॥ इतिदद्यात्॥ स्वस्तीतिप्रतिवचनं॥ सद
क्षिणाकुशादीन्यादाय॥ अद्यकृतैतदुपानद्दानप्रतिष्ठार्थमिदंहिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्य
महंसंप्रददे॥ इतिदक्षिणांदद्यात्॥ प्रतिगृहीतास्वस्तीत्युक्त्वाउपानहावारोहेत्॥ ॥अथयष्टिदानं॥ गंधादीनादेयब्राह्मणौ
त्रिःसंपूज्यवारिणादेयमभिषिंच्य॥ कुशादिकमादाय॥ अद्यामुकगोत्रस्यामुकप्रेतस्यसर्वप्राणिभ्योनिर्भयत्वारोग्यावाप्तिका
मइमांयष्टिंवनस्पतिदैवताममुकगोत्रायेत्यादि॥ प्रददानियथावर्णायोदण्डब्रह्मवारिणो॥ समहापुरुषोलोकेब्रह्मवर्च
समश्नुते॥ ततःसदक्षिणाकुशादीन्यादाय॥ अद्यकृतैतद्यष्टिदानप्रतिष्ठार्थमिदंहिरण्यमग्निदैवतममुकगोत्रायेत्यादि॥ प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२१९

तिग्रहीता स्वस्तीत्युक्त्वा यष्टिं स्पृशेत्॥ ॥अथाश्वदानं॥ ॥अश्वब्राह्मणौः त्रिः संपूज्य वारिणाप्रेषमभिषिच्य कुशादीन्याद
य॥ अद्यामुकगोत्रस्यामुकप्रेतस्यातिविषमभूदुर्गसंतरणार्थं ममुमश्वं यमदैवतं सपत्याणममुकगोत्रायामुकशर्मणे ब्रा
ह्मणाय तुभ्यमहं संप्रददे॥ विष्णुस्त्वश्वरूपेण यस्मादमृतसंभव। चंद्रार्कवाहनं नित्यमतः शांतिं प्रयच्छ मे। इति दद्यात्॥ त
तः कुशादीनि दक्षिणां वादाय॥ अद्य कृतैतदश्वदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय
दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात्॥ प्रतिग्रहीता स्वस्तीत्युक्त्वा अश्वस्य दक्षिणकर्णं स्पृशेत्॥ ॥अथ शिविकाद
नं॥ देयब्राह्मणौ त्रिः संपूज्य देयं चाभ्युक्ष्य॥ कुशादीन्यादाय॥ अद्यामुकगोत्रस्यामुकप्रेतस्य उच्चावच्चविषमभूसंतरणार्थ
मिमां शिविकां सुत्रामां गिरिदेवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ देवदेव जगन्नाथ विश्वात्मन्
दत्तयानया॥ प्रभो शिविकया देव प्रीतो भव जनार्दनः॥ इति दद्यात्॥ ततः कुशादीनि दक्षिणां वादाय॥ अद्य कृतैतच्छिवि
कादानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ इति दक्षिणां दद्यात्
ततः प्रतिग्रहीता स्वस्तीत्युक्त्वा शिविकां स्पृशेत्॥ तथा च ब्रह्मपुराणे॥ उपविश्यासने भद्रे छत्रं तत्र प्रकल्पयेत्॥ आचार्या
य च तच्छत्रं ब्राह्मणाय प्रकल्पयेत्॥ पश्चादुपानहौ दद्यान्मार्गौ च शिविकां तथा॥ बृहस्पतिः॥ वस्त्रालंकारशय्यादि पितुर्य
द्वाहनादिकम्॥ गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत्॥ ॥अथ वस्त्रदानम्॥ ॥देयब्राह्मणौः त्रिः संपूज्य वारिणा देय

219
॥राम
२१९

मभ्युक्ष्य कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य वैराजलोकप्राप्तिपूर्वकदशवर्षकोट्यवच्छिन्नस्वर्गवासकाम इदं परिधा
नवस्त्रं बृहस्पतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति विप्रकरे दद्यात् ॥ शरणं सर्वलोकानां लज्जा
या रक्षणं परम् ॥ सुवेषधारि त्वं यस्माद्वासः शांतिं प्रयच्छ मे ॥ ततो दक्षिणाद्रव्यार्पणादायं ॥ अद्यकृतैतद्वस्त्रदानप्रतिष्ठार्थमिदं हि
रण्यमग्निदैवतममुकगोत्रायेत्यादि ॥ ॥ अथ दासीदासादिदानं ॥ ॥ देयब्राह्मणौ त्रिः संपूज्य कुशादिकमादाय ॥ अद्यामुकगो
त्रस्यामुकप्रेतस्य नरकादर्शनसकाननपृथ्वीदानफलदासदासिरोमसमसंख्यावच्छिन्नब्रह्मलोकवासकाम इमां दासीं इमं दासं
वासालंकारां तरुणीं तरुणं वा विष्णुदैवतममुकगोत्रायेत्यादि ॥ ॥ इयं दासी मया तुभ्यं श्रीवत्सप्रतिपादिता ॥ सदा कर्मकरी
भोग्या यथेष्टं भद्रमस्तु ते ॥ ततो दक्षिणाद्रव्यार्पणादाय ॥ अद्यकृतैतद्दासीदासदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रा
येत्यादि ॥ ॥ अथ हेमाभरणदानं ॥ ॥ देयब्राह्मणौ त्रिः संपूज्य कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य सार्वदिकवि
रकालावस्थितोन्नतरूपसौभाग्ययुतनभस्स्फीतसमग्रकुलाधिकरणाक्रमसर्वगुणान्वितविष्णुकुलजन्मकाम इमं हेमाभरणं रजताभ
रणं विष्णुदैवतममुकगोत्रायेत्यादि ॥ ततो दक्षिणाद्रव्यार्पणादाय ॥ अद्यकृतैतद्धेमाभरणदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैव
तममुकगोत्रायेत्यादि ॥ ॥ अथ कंकणदानं ॥ ॥ देयब्राह्मणौ संपूज्य ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रायामुकप्रेताया पर
वाधाप्रमोदकाम इदं कंकणं विष्णुदैवतममुकगोत्रायेत्यादि ॥ अद्यकृतैतत्कंकणदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतमित्या

CC-0. In Public Domain. Digitization by eGangotri

रत्न २२०

दि ॥ ॥ अथचामरदानं ॥ देयद्रव्यगोसंपूज्य कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य उःखाभावकाम इदं चामरवि
ष्णुदैवतममुकगोत्रायेत्यादि ॥ शशांककरसंकाशं हिमडिण्डीरपाण्डुरं ॥ प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥ ततः कृतेन चा
मरदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायेत्यादि ॥ ॥ ततआचम्यापसव्यं कृत्वा दक्षिणामुखः पातितवामजानु
अपहता असुरा रक्षांसि वेदिषद इति श्राद्धदेशे वामावर्त्तेन तिलान्विकिरेत् ॥ ततो हस्तार्घपात्रोपरि पवित्रे स्थो वैष्णव्यौ सवि
तुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ इति दक्षिणाग्रं पवित्रं धृत्वा ॥ शन्नो देवीरभिष्टय आपो भवन्तु पीतये
शंयोरभिस्रवन्तु न इति जलं दत्वा ॥ तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄंल्लोकान्प्रीणाहि नः स्वा
हेति तिलान्क्षिप्त्वा ॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इ
षाणेति पुष्पं क्षिपेत् ॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियमिति गंधं क्षिपेत् ह
स्तार्घपात्रं संपन्नमिति पात्रं ब्राह्मणांस्पृष्ट्वा सुसंपन्नमिति तेनोक्ते हस्तार्घपात्रं वामहस्ते कृत्वा ॥ नमो नारायणायेति पुष्पसहि
तं पवित्रं विप्रहस्ते उत्तराग्रं धृत्वा ॥ या दिव्या आपः पयसा संबभूवुर्या अंतरिक्षा उत पार्थिवीर्याः ॥ हिरण्यवर्णा यज्ञियास्तान आ
पः शिवाः सशं स्योनाः सुहवा भवंतु ॥ इत्यनेन हस्तार्घपात्रस्थं जलमभिमंत्र्य ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतार्घ
मासिकश्राद्धे एष हस्तार्घस्ते मया दीयते तत्वोपतिष्ठतामिति विप्रकरे पवित्रोपरि अर्घजलं दद्यात्सृजेत ॥ पात्रं ब्राह्मणवामपार्श्वे

220

रत्न २२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रेतायस्यानमसीमन्त्रानमेवहस्तार्घपात्रं स्थापयेत् ॥ ततु परिकुशानुदद्यात् ॥ तत्त्वदक्षिणापर्यन्तं नचालयेत् ॥ ततः पात्रब्राह्म
णांगंधपुष्पाक्षतादिभिः संपूज्य ॥ अद्यामुकगोत्रस्यामुकप्रेतस्यविप्रत्ववतवैदिवत्वसुधियत्वाकामइदंयज्ञोपवीतंविष्णुदैवतं
यथानामगोत्रायस्वादि ॥ दक्षिणाद्रव्यं पूर्ववत् ॥ अपसव्येनकुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतायमासिकश्राद्धेस्ता
निवेदनपुष्पाक्षतधूपदीपयज्ञोपवीतवासांसि तेमयादीयंते तवोपतिष्ठंतामित्युत्सृजेत् ॥ ततः प्रेतस्यगंधकुशयासनादि
गंधपुष्पैरभ्यर्च्यश्राद्धभोक्त्रे प्रतिपादयेत् ॥ ततः सव्यंकृत्वावम्यापसव्यंकृत्वा ॥ अर्चनविधेः सर्वैपरिपूर्णमस्तु इत्युक्ते अस्त्विति
प्रतिवचनम् ॥ ततोगौरमृत्तिकयानीवारचूर्णेनजलेनवाब्राह्मणं वेष्टयित्वाचतुरस्रं मण्डलं कुर्यात् ॥ परकीयभूमौश्राद्धक
रणेश्राद्धीयवस्तुषुकिंचिदुद्धृत्यतिलघृतजलयुक्तमन्नं इदमन्नमेतद्भूस्वामिपितृभ्योनमः ॥ इतिदद्यात् ॥ ततउक्तमन्नंताम्रपा
त्रेणाकराभ्यामादायमनाकस्थित्वाघृतयुतंप्रेतस्यमन्नं परिविष्यात् ॥ ततइदमन्नमुरंइमच्छामित्यादिव्यंजनगुणान्कीर्तयन्सर्वा
णिव्यंजनानिभूमिष्ठपात्रांतरेणपरिविस्यघृतं ॥ सतिलजलं चोपनीयअन्नमत्रनाभिधारयेत् ॥ ततः पात्रालंभनंअंगुष्ठावगाह
नेविनैव ॥ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वाहा ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्य
पांसुरे ॥ इतिपठित्वा ॥ अपहताअसुरारक्षांसिवेदिषदइत्यन्नोपरितिलान्विकीर्य ॥ अमृतरूपतयाअन्नंविचिंत्यकुशादीना
दाय ॥ अद्यामुकगोत्रायामुकप्रेतायाद्यमासिकश्राद्धेइदमन्नंसोपकरणं तेमयादीयते तवोपतिष्ठतामित्युत्सृजेत् ॥ ततोभवा

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२२१

नृप्राग्रायतउदकप्रत्ययोशानं दत्वा ॥ यथासुखं त्वमस्वेति ब्राह्मणान् ब्रूयात् ॥ ब्राह्मणाश्च वामेन यानि नान्नपात्रमन्यजन्तुं जीतमंज्ञया भस्मधा
र्थनं कुर्यात् ॥ श्राद्धकर्त्ता ॥ मधुव्वाता ऋतायते मधुक्षरन्ति सिन्धवः ॥ माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳ र
जः मधुद्यौरस्तु नः पिता ॥ २ ॥ मधुमान्नो वनस्पतिर्मधुमाँ २ अस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः ॥ ३ ॥ मधु मधु मधु ॥ अन्नहीनं
क्रियाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु नमस्तुभ्यं विरूपाक्ष नमस्ते नेकचक्षुषे ॥ नमः पिनाकहस्ताय वज्रहस्ताय
वै नमः ॥ इति पठेत् ॥ वीरागादिभिर्ब्राह्मणां हर्षयन् भुंजमानान् कीर्त्तयन् तस्य यत्र यच्चेष्टोपलभ्यते तत्तदुपनयन् मंदं मंदं भो
जयेत् ॥ अन्नविकिरनिषेधः ॥ ततो ब्राह्मणान् तृप्तान् ज्ञात्वा तस्मै जलगण्डूषमिदं तेइति प्रत्ययोशानं दद्यात् ॥ अत्र स्वदितं प्रश्नाभा
वः ॥ ततः पिण्डमहं करिष्ये ॥ इति पृच्छेत् ॥ कुरुष्वेति ब्राह्मणैरनुज्ञातेनउच्छिष्टसमीपे चतुरस्रं हस्तैकप्रमाणं दक्षिणाप्लवं चतुरस्रं उ
लोष्टितं पिण्डस्थानं निमीय ४ तेच्छुटकादिकं तिलगंधजलपुष्पयुतं वामहस्ते कृत्वा दक्षिणहस्तेन कुशादिकमादाय ४ १ तत्र
रेखाकरणं उल्मुकभ्रामणं च न भवति ॥ ततश्छिन्नमूलान् कुशान् दक्षिणाग्रान् तत्रास्तीर्य ४ २ अद्यामुकगोत्रामुकप्रेताय मासि
कश्राद्धपिण्डस्थाने इदमवनेजनं ते मयादीयते तवोपतिष्ठतामिति कुशोपरि अवनेजनं दद्यात् ॥ ततः श्राद्धशेषमन्नं तिलघृ
तमधुयुतमेकीकृत्य ॥ तेन कपित्थप्रमाणं पिण्डं निर्माय दक्षिणहस्तेनादाय ॥ अद्यामुकगोत्रामुकप्रेताय मासिकश्राद्धे एष पि
ण्डस्ते मयादीयते तवोपतिष्ठतामिति पिण्डोपरि प्रत्यवनेजनं दद्यात् ॥ ततो नीविं विस्रंस्य सव्यं कृत्वा अप्सव्यं कृत्वा वामेन

221
राम
२२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पाणिनाधृतं सूत्रं दक्षिणहस्तेन गृहीत्वा ॥ प्रेतैतत्ते वासः ॥ इति पिण्डोपरि धृत्वा ॥ गंधपुष्पादिभिः पिण्डं संपूज्य कुशादीन्यादाय ॥ अ
द्यामुकगोत्रामुकप्रेताद्यमासिकश्राद्धपिण्डोपरि एतानि सूत्रगंधपुष्पाक्षतधूपदीपनैवेद्यानि ते मयादीयन्ते तवोपतिष्ठंतामित्यु
त्सृजेत् ॥ पिण्डशेषान्नं पिण्डसमीपे विकिरेत् ॥ ततआचांतब्राह्मणस्य करे ॥ शिवा आपः संत्विति जलं ॥ सौमनस्यमस्त्विति
पुष्पं ॥ अक्षतं चारिष्टं चास्त्विति तण्डुलान् दद्यात् ॥ सन्त्विति अस्त्विति वा प्रतिवचनम् ॥ ततः पृष्ठकादिपात्रेणामुदकं परिकल्प्य
मेदिनीं शिरसाभिवंद्य इमं मंत्रं पठेत् ॥ नमो नमो मेदिनि लोकधात्रि उर्वी मही शैलधारिणि धरणी नमः ॥ धरणी कश्यपि जगत्प्र
तिष्ठे वसुधे नमोस्तु वैष्णवी लोकधात्रि ॥ नमोस्तु ते सर्वरसप्रतिष्ठे निवापनावीचि नमो नमोस्तु ते ॥ ततः कुशादीन्यादाय ॥ अ
द्यामुकगोत्रस्यामुकप्रेतस्याद्यमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं विप्रहस्ते दत्वा उपतिष्ठतामि
ति प्रतिवचनं गृहीत्वा ॥ सव्यं कृत्वा दक्षिणां दिशं पश्यन् ॥ अघोरः प्रेतोस्तु इति पूर्वाग्रां जलधारां पिण्डोपरि दद्यात् ॥ गोत्रन्नोव
र्धतामित्याशीः प्रार्थनं निषेध ॥ ततोपसव्यं कृत्वा सपवित्रकुशत्रयं पिण्डोपरि दक्षिणाग्रं धृत्वा ॥ नमो वाचयिष्ये इति पृच्छेत्
वाच्यतामित्यनुज्ञातः ॥ प्रेताय नमः स्वधोच्यतामिति वदेत् ॥ अस्त्विति नमउच्चमाने ॥ पृष्ठकादिस्थितजलादिना मंत्रपाठं विना ॥ इ
दमूर्जं ते मयादीयते तवोपतिष्ठतामिति दक्षिणाग्रां धारां सपवित्रकुशोपरि दद्यात् ॥ ततो नम्रीभूय पिण्डमाघ्रायोत्थापयेत् ॥ छि
न्नमूलकुशान्वह्नौ क्षिपेत् ॥ अर्घपात्रं संचाल्य ॥ सव्यं कृत्वा कुशादिसहितं दक्षिणाद्रव्यमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्याद्यमा

रत्न
२२२

सिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे॥ इति दक्षिणां दद्यात्
स्वस्तीति प्रतिवचनम्॥ अत्र प्रदक्षिणीकरणं अनुव्रजनं च न भवति॥ ततोपसव्येन स्वस्त्यस्तु इत्युक्त्वा ब्राह्मणमुत्थाप्य शय्या
यामुपवेशयेत्॥ ब्राह्मणचरणौ संवाह्य तन्नमस्कुर्यात्॥ ततोंजनं कंकतिकां च ब्राह्मणायार्पयेत्॥ स चांजनं कंकतिकां वा दत्वा यश
य्यायां मुहूर्तं विश्रामं कुर्यात्॥ ततः कर्त्ता सव्यं कृत्वा देवताभ्य इति त्रिर्जपित्वा॥ अपसव्यं कृत्वा श्राद्धीयदीपमाच्छाद्य हस्तौ पादौ
प्रक्षाल्य सव्येनाचमनं कुर्यात्॥ ततः श्राद्धसंपूर्णताकाम॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च॥ स्मरणादेव तद्विष्णोः संपू
र्णं स्यादिति श्रुतिरिति पठित्वा विष्णुस्मरणं कुर्यात्॥ ॥ इति षोडशश्राद्धमध्ये आद्यमासिकस्यैकादशेऽह्नि विधिना दाद्य
मासिकस्य सपात्रकप्रयोगः॥ ॥ अथ आद्याब्दिकश्राद्धम्॥ ॥ प्रथममासिकश्राद्धानंतरं स्नानादिकं विधाय आद्याब्दिक
श्राद्धं कुर्यात्॥ आद्याब्दिकस्यैकादशेऽह्न्येव विधानात्॥ तच्चामिश्रान्नेनैव विधेयं॥ अथवामान्नेन कुर्यात्॥ तत्र क्रमः॥ कृ
तस्नानः शुचिराचांतः पूर्वोपकल्पितं प्रज्वालितदीपं स्थापितगोरसर्षपतिलादिरक्षोघ्नं श्राद्धदेशमागत्य पूर्वाभिमुखस्तदुपविश्य पंचगव्ये
नाभ्युक्ष्य॥ कुशजलेन अपवित्रः अपवित्रो वा सर्वेत्यादि पठित्वा पुण्डरीकाक्षः पुनात्वित्युच्चार्य श्राद्धदेशं द्रव्याण्यात्मानं च सिंचेत्॥ अद्ये
त्यादि देशकालौ स्मृत्वा अमुकगोत्रस्यामुकप्रेतस्याद्याब्दिकश्राद्धमहं करिष्ये॥ इति संकल्पं कुर्यात्॥ ततो देवताभ्य इति त्रिः पठेत्॥ ततो
पसव्येन कुशादिकमादाय अद्यामुकगोत्रस्यामुकप्रेतस्याद्याब्दिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठतामिति कुशरूपमा

222
राम
२२२

CC-0. In Public Domain. Digitization by eGangotri

सनमुत्सृजेत्॥ ततअपहताअसुरारक्षांसिवेदिषदइतिवामावर्त्तेनतिलान्श्राद्धदेशेविकिरेत्॥ ततःपुटकोदेपवित्रेस्थइ
तिमंत्रेणदक्षिणाग्रंपवित्रंधृत्वा॥ शन्नोदेवीरितिमंत्रेणतत्रजलंक्षिपेत्॥ तिलोसीतिमंत्रेणतिलान्प्रक्षिप्य॥ गन्धद्वारामितिमं
त्रेणगंधं॥ श्रीश्चेतिमंत्रेणपुष्पंक्षिपेत्॥ ततस्तदर्घपात्रंवामहस्तेकृत्वापुष्पसहितंपवित्रं॥ नमोनारायणायेतिमंत्रेणान्न
पात्रोपरिउत्तराग्रंकृत्वा॥ यादिव्याइतिमंत्रेणार्घपात्रस्थंजलमभिमंत्र्यकुशादीन्यादाय॥ अद्यामुकगोत्रामुकप्रेतायाब्दिकश्रा
श्राद्धेएषहस्तार्घस्तेमयादीयतेतवोपतिष्ठतामितिपवित्रोपरिअर्घजलंदद्दउत्सृजेत्॥ ततःपवित्रादिसहितमर्घपात्रमा
सनवामपार्श्वेप्रेतायस्थानमसीत्युत्तानमेवस्थापयेत्॥ ततोगंधादिनासंपूज्यकुशादीन्यादाय॥ अद्यामुकगोत्रामुकप्रेतायाब्दि
कश्राद्धेएतानिगंधपुष्पाक्षतधूपदीपवासांसितेमयादीयतेतवोपतिष्ठतामितिगंधादिकमुत्सृजेत्॥ ततआसनस्यान्नपात्र
सहितस्यचतुर्दिक्षुचतुरस्रंमण्डलंकृत्वाश्राद्धीयान्नाग्रभागंघृततिलजलयुतंपुटकादौकृत्वा॥ इदमन्नमेतद्भूस्वामिपितृभ्योन
मइतिउत्सृजेत्॥ ततःपुरुषतृप्तिक्षममन्नंसोपकरणमुपनीयसतिलजलंचोपनीय॥ अन्नेमधुनाभिघार्यपात्रालंभनांगु
ष्ठावगाहनेविनापृथिवीतेनपात्रमित्यादिस्वाहान्तं॥ इदंविष्णुरित्यादिस्वाहान्तंमंत्रंपठित्वा॥ अपहताअसुरारक्षांसिवेदि
षदइतितिलानन्नोपरिविकीर्य॥ कुशादिकमादाय॥ अद्यामुकगोत्रायामुकप्रेतायाब्दिकश्राद्धेइदमन्नंसोपकरणंतेमया
दीयतेतवोपतिष्ठतामितित्यन्नमुत्सृजेत्॥ ततोमधुवातेतित्र्यचं॥ मधुमधुमध्विति चपठेत॥ अन्नहीनमित्यादिमंत्रं॥ नम(

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२२३

नुभ्यं विरूपाक्षेति श्लोकं च पठेत्॥ अत्र विकररेखाकरणोल्मुकभ्रामणं च न भवति सव्यं कृत्वा वम्यापसव्यं कृत्वा॥ पिण्डस्थानोपरि
छिन्नमूलकुशान्दक्षिणाग्रान्नास्तीर्य॥ तिलजलगंधयुतं पुटकं वा महस्ते कृत्वा कुशादिकमादाय॥ अद्यामुकगोत्रामुकप्रेताद्याद्वि
कश्राद्धपिण्डस्थाने इदमवनेजनं ते मयादीयते तवोपतिष्ठतामिमं मन्त्रमुच्चरन् जेत्॥ ततो मधुवाता इति त्र्यचं॥ मधुमधुमध्विति च प
ठेत्॥ अन्नहीनमित्यादि मंत्रं॥ नमस्तुभ्यं विरूपाक्षेति श्लोकं च पठेत्॥ अत्र विकररेखाकरणोल्मुकभ्रामणं च न भवति॥ सव्यं कृ
त्वा वम्यापसव्यं कृत्वा॥ पिंडस्थानोपरि छिन्नमूलकुशान्दक्षिणाग्रान्नास्तीर्य॥ तिलजलगंधयुतं पुटकं वा महस्ते कृत्वा कुशादिक
मादाय॥ अद्यामुकगोत्रामुकप्रेताद्याद्विकश्राद्धपिण्डस्थाने इदं मवनेजनं ते मयादीयते तवोपतिष्ठतामित्यवमेजनं छिन्न
मूलकुशोपरि दद्यात्॥ ततस्तिलघृतमधुयुक्तेनान्नेन कपित्थप्रमाणं पिण्डं कृत्वा कुशादिकमादाय॥ अद्यामुकगोत्रामुकप्रेता
द्याद्विकश्राद्धेऽस्य पिण्डस्ते मयादीयते तवोपतिष्ठतामित्यवनेजनस्थाने पिण्डं दद्यात्॥ ततो दर्भमूले नकरं प्रोक्ष्य॥ सव्यं कृत्वा
वम्य हरिं स्मृत्वापसव्यं कृत्वा मंत्रपाठं विना तूष्णीं भास्वरमूर्त्तिं प्रेतं विचिंतयेत्॥ ततो वनेजनपात्रं वा महस्ते कृत्वा कुशादिकं गृहीत्वा
अद्यामुकगोत्रामुकप्रेताद्याद्विकश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मयादीयते तवोपतिष्ठतामिति प्रत्यवनेजनं पिण्डोपरि दद्या
त्॥ ततो नीविं विस्रंस्य सव्यं कृत्वा वम्यापसव्यं कृत्वा॥ वामेनाथ पाणिना घृतं सूत्रं दक्षिणेनादाय उभाभ्यां हस्ताभ्यां पिण्डोपरि प्रे
तेनन्ने वास इति सूत्रं दत्वा॥ पिण्डमभ्यर्च्य कुशादीन्यादाय॥ अद्यामुकगोत्रामुकप्रेताद्याद्विकश्राद्धे पिण्डे एतानि सूत्रगन्धपुष्पा

223
राम
२२३

CC-0. In Public Domain. Digitization by eGangotri

क्षतधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामित्युत्सृजेत् ॥ ततः पिण्डशेषान्नं पिण्डसमीपे विकीर्य ॥ शिवा आपः सन्त्विति
जलं ॥ सौमनस्यमस्त्विति पुष्पं ॥ अक्षतं चारिष्टमस्त्विति तण्डुलान् ॥ अन्नपात्रोपरि क्षिपेत् ॥ कुशादीन्यादाय ॥ अद्यामुकगोत्रस्या-
मुकप्रेतस्याद्याद्धिकश्राद्धदत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्ष्योदकं दत्वा ॥ सव्यं कृत्वा ॥ अघोरः प्रेतोस्त्विति दक्षिणां दिशं
पश्यन् पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ॥ अत्राशीः प्रार्थनं न भवति ॥ ततः पिंडोपरि सपवित्रकुशान् धृत्वा पुटकास्थितजलादिना
मन्त्रपाठं विना ॥ इदमूर्जं ते मया दीयन्ते तवोपतिष्ठन्तामिति सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात् ॥ ततः पिण्डमाघ्रायो-
त्थापयेत् ॥ पिण्डाधारकुशान्वह्नौ क्षिपेत् ॥ अर्घपात्रसंचालसव्यं कृत्वा कुशादीन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्याद्याद्धि-
कश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे ॥ इति दक्षिणां दद्यात् ॥ ततो देवताभ्य इ-
ति त्रिः पठेत् ॥ ततोपसव्यं कृत्वा दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादे-
व तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ इति पठित्वा विष्णुस्मरणं कुर्यात् ॥ घ्राणीयवस्तु ब्राह्मणाय प्रतिपादयेत् ॥ सिद्धान्नं जले क्षि-
पेत् ॥ ॥ इत्याद्धिकश्राद्धप्रयोगः ॥ ॥ अथोदकुम्भदानं ॥ तत्र हारीतः ॥ मृतेपि तरिवै पुत्रः पिण्डमब्दं समापयेत् ॥ अन्नकुम्भं च
विप्राय मेतमुद्दिश्य धर्मवित् ॥ ॥ मत्स्यपुराणे ॥ यावदब्दं तु यो दद्यादुदकुम्भं विमत्सरः ॥ प्रेतायान्नसमायुक्तं सोश्वमेधफलं ल-
भेत् ॥ ॥ याज्ञवल्क्यः ॥ अर्वाक्सपिण्डीकरणं यस्य संवत्सराद्भवेत् ॥ तस्याप्यन्नं सोदकुम्भं दद्यात्संवत्सरं द्विजन्मने ॥ अंगिरा ॥ यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२२४

संवत्सराद‌र्वाक्सपिण्डीकरणं कृतं ॥ मासिकं चोदकुम्भं च देयं तस्यापि वत्सरं ॥ हेमाद्रौ स्मृतिसमुच्चये ॥ एकादशाहात्प्रभृति घ
टस्तोयान्नसंयुतः । दिने दिने प्रदातव्यो यावत्संवत्सरं सुतैः ॥ ॥ देवयाज्ञिकः ॥ अन्नं चैव स्वशक्त्यातु संख्यां कृत्वाब्दिका
वधिः ॥ दानं च ब्राह्मणे शस्तं धर्मदानेति कुर्यात्तु वा ॥ अपि श्राद्धशतैर्दत्तै रुदकुम्भं विना शुभं ॥ दरिद्रा दुःखिनस्तत्र प्रमंति
भवार्णवे ॥ तेनायं कृष्णपक्षदानं च प्रेतस्योदकुम्भकं ॥ ॥ अथ प्रयोगः ॥ ॥ एकादशेऽह्नि कृतनित्यक्रियाविधिर्वा नान्तः श्राद्धस्य खंड
पवित्रपाणिः सव्येन कुशतिलजलान्यादाय ॥ अद्यपितृगताहरहस्तोयस्थितिस्वर्गताश्वमेधयज्ञजन्यफलसमफलप्राप्तिका
मोग्रादि पितृमरणादिनाशौचावच्छिन्नदिनोत्तरं वत्सरं यावत्प्रत्यहं प्रतिमासं वा तद्दिने एव वा ॥ अमुकगोत्रायामुकप्रेताय सा
न्नोदकुम्भदानमहं करिष्य इति संकल्प्यापसव्यं कृत्वा कुशादीन्यादाय अद्यामुकगोत्रस्यामुकप्रेतस्येदमासनं मया दीयते त
वोपतिष्ठतामित्यादि समुत्सृज्य ॥ गंधपुष्पाक्षतादिना संपूज्य ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेत नानि गंधपुष्पाक्ष
तधूपदीपवासांसि ते मया दीयते तवोपतिष्ठतामिति समुत्सृज्य ॥ सोपस्करणमन्नं च जलपूर्णाकुम्भं चोपनीय कुशादीन्यादाय ॥ अद्यामुक
गोत्रायामुकप्रेताय अयं सान्नोदकुम्भस्ते मया दीयते तवोपतिष्ठतामिति समुत्सृजेत् ॥ वर्षाभ्यंतरे सपिण्डने कृते तु ॥ अद्यामुकगोत्रस्या
स्मत्पितुरमुकशर्मण इदं मासनं ते स्वधा ॥ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्नेतानि गंधपुष्पाक्षतधूपदीपवासांसि तुभ्यं स्वधा
अद्यामुकगोत्रायास्मत्पित्रेऽमुकशर्मणे अयं सान्नोदकुम्भस्तुभ्यं स्वधेति वाक्यं कुर्यात् ॥ ततः कुशादीन्यादाय ॥ अद्य कृतैतत्सान्नोद

224
रत्न
२२४

ॐ भदानप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहमुत्सृजे ॥ इति दक्षिणामुत्सृज्य दक्षिणां तदुभ
यं ब्राह्मणाय दद्यात् ॥ एवं वर्षपर्यन्तं प्रत्यहं सान्नोदकुम्भं दत्वा दक्षिणां दद्यात् ॥ अशक्तौ प्रतिमासं ॥ अत्यशक्तौ तद्दिने वा दद्या
त् ॥ तत्रतु ॥ अद्यपितृगणाहरहस्सान्नोदकुम्भोपस्थितिस्वर्गताश्वमेधयज्ञजन्यफलसमफलप्राप्तिकामोऽद्यैव सान्नोदकुम्भदा
नमहं करिष्ये ॥ इति सव्येन वाक्यं कृत्वा ॥ अपसव्येनासनादिवाक्यं पूर्ववद्विधाय ॥ अशौचान्तदिनोनावत्सरदिनसंख्यासान्नो
दकुम्भानुपनीय ॥ अद्यामुकगोत्रामुकप्रेताय मरणादिनावधिकाशौचावच्छिन्नदिनोनवत्सरं ॥ यावद्दिनसंख्या ३६० ॥ एतेसा
न्नोदकुम्भास्ते मया दीयन्ते नैवोपतिष्ठतामिति वाक्यं कुर्यात् ॥ दक्षिणावाक्यं पूर्ववत्कृत्वा सर्वं ब्राह्मणाय दद्यात् ॥ उक्तकुम्भोभा
वे देशाचारदर्वीवार्यमतरुच्छत्वान् ॥ तावत्संख्याकानि सदन्नकाष्ठयज्ञियवृक्षपुटपात्राण्युपनीयापसव्येन ॥ अद्यामुकगोत्रा
यामुकप्रेताय मरणादिनावधिकाशौचावच्छिन्नदिनोनवत्सरं यावद्दिनसंख्याकानि एतानि षष्ट्यधिकशतत्रय । ३६० । देनधा
वनसहितपुटपात्राणि ते मया दीयन्ते नैवोपतिष्ठतामित्युत्सृजेत् ॥ दक्षिणां च पूर्ववत् ॥ ॥ इत्युदकुम्भदानम् ॥ अथोनमासि
कादिपञ्चदशश्राद्धानि नेत्रेणोच्यन्ते ॥ तत्क्रमं ॥ श्राद्धदेशे श्राद्धीयवस्तून्यासाद्य दीपं प्रज्वाल्य कर्त्ता पूर्वाभिमुख उपविश्य कुशज
लेन ॥ अपवित्रः पवित्रो वा इत्यादि पठित्वा पुण्डरीकाक्षः पुनात्विति श्राद्धदेशं द्रव्याणि आत्मानं च सिंचेत् ॥ अद्यामुकगोत्रस्यामुकप्रे
तस्य प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतु षोडशश्राद्धान्तर्गतोनमासिकद्वितीयमासिकत्रैपक्षिकतृतीयमासिकचतुर्थमासिक

CC-0. In Public Domain. Digitization by eGangotri

पंचममासिकषष्ठमासिकोनषाण्मासिकसप्तमासिकाष्टममासिकनवमासिकदशमासिकैकादशमासिकद्वादशमासिकोना
ब्दिकश्राद्धानि तंत्रेणैकोद्दिष्टविधिना एकादशे द्वादशे वा अहं करिष्ये इति संकल्पं कुर्यात् ॥ अधिमासपाते षोडशपदस्थाने
सप्तदशपदं प्रयुज्य ॥ अधिकमासिकेति पदं प्रक्षिप्य वाक्यं कर्त्तव्यम् ॥ ततो देवताभ्य इति त्रिः पठेत् ॥ ततोपसव्येन कुश
तिलजलान्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्योनमासिक इदमासनं ते मया दीयते तवोपतिष्ठतामिति कुशासनेषु
सर्वपश्चिमभागे कुशरूपमासनमुत्सृज्य एवमेव तत्पूर्वपूर्वभागेषु कुशासनेषु क्रमेण तत्तत्पदप्रक्षेपेण वाक्यं कृत्वा कु
शरूपमासनमुत्सृज्य एवमेव तत्पूर्वपूर्वभागेषु कुशासनेषु क्रमेण तत्पदप्रक्षेपेण वाक्यं कृत्वा कुशरूपमासनानि दद्यात्
ततः अपहता असुरा रक्षांसि वेदिषद इति वामावर्त्तेन तिलान् श्राद्धदेशे विकिरेत् ॥ ततः क्रमेण पट्टकादीनि संस्थाप्य ॥ तत्र
पविष्टे स्थ इत्यादिमंत्रेण प्रत्येकं क्रमेण दक्षिणाग्राणि पवित्राणि धृत्वा ॥ जलतिलगंधपुष्पाणि स्वस्वमंत्रेण प्रत्येकं क्रमेण
क्षिपेत् ॥ तत ऊनमासिकार्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं नमो नारायणायेति मंत्रेणान्यपात्रोपरि उत्तराग्रं धृत्वा ॥
यद्दिव्या इति मंत्रेणार्घपात्रस्थं जलमभिमंत्र्य कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकश्राद्ध एष हस्तार्घस्ते मया
दीयते तवोपतिष्ठतामिति पवित्रोपरि अर्घजलं दद्यात् एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेण हस्तार्घमुत्सृजेत् ॥ ततः प
वित्रादिसहितान्यर्घपात्राणि क्रमेणासनवामपार्श्वे प्रेतायस्थानमसीति उत्तानान्येव स्थापयित्वा तदुपरि कुशान् दद्यात् ॥ ततो गंधा 225

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिनाक्रमेणाग्रतो कंसं शृज्य ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकद्वितीयमासिकत्रैपक्षिकतृतीयमासिकपञ्चममा
सिकषष्ठमासिकोनषाण्मासिकसप्तममासिकाष्टममासिकनवममासिकदशममासिकैकादशमासिकद्वादशमासिकान्नाब्दि
कश्राद्धेषुएतानिगंधपुष्पधूपदीपवासांसितेमयादीयन्तेतवोपतिष्ठंतामितिगंधादिकमुत्सृजेत् ॥ ततः क्रमेणाग्रतोकंआ
सनसहितानामन्नमात्राणांचतुर्दिक्षुचतुरस्राणिमंडलानिकृत्वाश्राद्धीयान्नाग्रभागंच ततिलजलयुतंघृतकादीकृत्वास्वक
चैव ॥ इदमामान्नमेतद्भूस्वामिपितृभ्योनमः इत्युत्सृजेत् ॥ ततः पुरुषत्रिंशक्षमंसोपस्करमन्नंतिलजलंचक्रेणाग्रत्येकमुपनी
यअन्नेमधुनाभिघार्यपात्रालंभनोगुष्टावगाहनंविना ॥ पृथिवीतेपात्रंद्यौरपिधानमित्यादिस्वाहान्ते ॥ इदंविष्णुरित्यादिमुरेरि
त्यंतंचमंत्रंपठित्वा ॥ अपहताअसुरारक्षांसिवेदिषदइतितिलानन्नोपरिविकीर्यकुशादिकमादाय ॥ अद्यामुकगोत्राया
मुकप्रेतायोनमासिकश्राद्धेइदमामान्नंसोपस्करंतेमयादीयतेतवोपतिष्ठतामित्यन्नमुत्सृजेत् एवमेवक्रमेणाग्रतोकंतत्तत्पद
प्रक्षेपेणान्नात्युत्सृजेत् ॥ ततोमधुवाताइतिऋचं ॥ मधुमक्षितिवेपठेत् ॥ अन्नहीनमितिमंत्रं ॥ नमस्तुभ्यंविरूपाक्षेतिचश्लो
कंपठेत् ॥ अत्रविकरदानं ॥ रेखाकरणं ॥ उल्मुकभ्रामणंचनभवति ॥ सव्यंकृत्वावामाउपसव्यंकृत्वा ॥ पश्चिमतः क्रमेणाग्रतो
कंपिण्डस्थानेपरिछिन्नमूलकुशान्दक्षिणाग्रान्नास्तीर्य ॥ तिलजलयुतंगंधपुष्टकादिवामहस्तेकृत्वा ॥ कुशादिकमादाय ॥ अद्या
मुकगोत्रामुकप्रेतोनमासिकश्राद्धेइदमवनेजनंतेमयादीयतेतवोपतिष्ठतामितिअवनेजनंसर्वपश्चिमास्मृतकुशोपरिदत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२२६

एवं क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेणाऽवनेजनानि दद्यात् ॥ ततस्तिलघृतमधुयुक्तेनान्नेन नालिकेरप्रमाणान् पिण्डान् कृत्वा ॥
कुशादिसहितं प्रथमपिण्डमादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठतामिति सव्यं
पश्चिमावनेजनस्थाने पिण्डं दत्वा ॥ एवमेव क्रमेण प्रत्येकं द्वितीयादिपिण्डान् दद्यात् ॥ ततो दर्भमूले करं प्रेक्ष्य सव्यं कृत्वा वम्यह
रिं स्मृत्वा अपसव्यं कृत्वा कुशादिकं गृहीत्वा ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोप
तिष्ठतामिति दत्वा एवमेव क्रमेण प्रत्येकं द्वितीयादिपिण्डेषु तत्तत्पदप्रक्षेपेण प्रत्यवनेजनं दद्यात् ॥ ततो नीवीं विस्रस्य सव्यं कृत्वा
आचम्यापसव्यं कृत्वा वामेन पाणिना घृतं सूत्रं दक्षिणेनादाय उभाभ्यां हस्ताभ्यां प्रथमपिण्डोपरि प्रेतैतत्ते वासः इति सूत्रं दत्वा
एवं द्वितीयादिपिण्डेष्वपि प्रत्येकं सूत्रं दद्यात् ॥ गन्धादिना क्रमेण पिण्डानभ्यर्च्य कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतोन
मासिक द्वितीयमासिक त्रैपक्षिक तृतीयमासिक पञ्चममासिक षष्ठमासिकोनषाण्मासिक सप्तममासिकाष्टममासिक नवम
मासिक दशममासिकैकादशमासिक द्वादशमासिकोनाब्दिकश्राद्धपिण्डेष्वेतानि सूत्रगन्धपुष्पधूपदीपनैवेद्यानि ते मया दी
यंते तव उपतिष्ठंतामिति समुत्सृजेत् ॥ ततस्तत्पिण्डशेषान्नं तत्तत्पिण्डसमीपे विकीर्य ॥ शिवा आपः सन्तु इति जलं सौमनस्यमस्तु
ति पुष्पं ॥ अक्षतं चारिष्टमस्त्विति तण्डुलान् क्रमेण प्रत्येकं अन्नपात्रोपरि क्षिपेत् ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रे
तस्योनमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दत्वा ॥ एवमेव क्रमेण तत्तत्पदप्रक्षेपेणाक्षय्योदकं दद्या

226
रत्न
२२६

२२

त् ॥ सव्यं कृत्वा अघोरः प्रेतोस्तु इति उच्चार्य दक्षिणादिशं पश्यन् सर्वेषु पिण्डेषु पूर्ववत् एकां जलधारां दद्यात् ॥ अत्राशीः प्रार्थनं
निषेधः ॥ ततः सर्वेषु पिण्डेषु क्रमेण समन्त्रकुशान् धृत्वा पुष्पादि जलादिना मंत्रपाठं विना ॥ इदमूर्ज्जं मया दीयते नवो यतिष्ठ
तामिति प्रथमपिण्डस्थसपवित्रकुशोपरि दक्षिणाग्रां धारां दद्यात् ॥ ततः पिण्डानाघ्रायोत्थापयेत् ॥ पिण्डाधारकुशान्वह्नौ क्षिपेत्
अर्घपात्राणि संचाल्य सव्यं कृत्वाचम्य दक्षिणाद्रव्यसहितं कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य कृतैतन्न्मासिकद्वि
तीयमासिकत्रैपक्षिकतृतीयमासिकचतुर्थमासिकपञ्चममासिकषष्ठमासिकोनषाण्मासिकसप्तममासिकनवममासिक
दशममासिकैकादशमासिकद्वादशमासिकोनाब्दिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्रेभ्यो ब्राह्मणेभ्यो द
क्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ॥ ततो देवताभ्यः पितृभ्यश्चेत्यादिभिः पठेत् ॥ ततोपसव्यं कृत्वा दीपाच्छादनं विधाय हस्
तौ पादौ प्रक्षाल्याचम्य श्राद्धसंपूर्णताकामः ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरि
ति पठित्वा विष्णुं स्मरेत् ॥ श्राद्धीयवस्तूनि ब्राह्मणेभ्यः प्रतिपादयेत् ॥ ॥ इति षोडशश्राद्धान्तर्गतोनमासिकादीनां पंचदशश्राद्धा
नां नेत्रेणायाश्च प्रयोगः ॥ ॥ अथ सपिण्डीकरणेतिकर्त्तव्यता ॥ ॥ तत्र मातृविषये संशयः ॥ मातुः सपिण्डीकरणं कथं कार्यं भवे
त्तु नैः ॥ पितामह्यादिभिः सार्द्धं सपिण्डीकरणं स्मृतं ॥ कारिकायां ॥ पितामह्यादिभिः सार्द्धं मातरं तु सपिण्डयेत् ॥ सहगमने यमः
पत्या चैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः ॥ हारीतोपि ॥ स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः ॥ एकत्वं सा गता यस्मात्पुर

रत्न
२२७

मेत्राहुनिवृत्तेः॥ शातातपः॥ मृतायास्तु गतानामर्थं सा तेन सह पिण्डनं॥ अर्हति स्वर्गवासं च यावदाभूतसंप्लवं॥ अत्रैकशब्दः पितामहादिनि
वृत्त्यर्थः॥ पतिपरं वर्गपरमिदं तु न तत्वं॥ यदाहु हेमाद्र्यादिमते द्वयोरेकपिण्डनस्य स्वर्गे वासः सह॥ यदा माधवपृथ्वीचन्द्रादिमते पृ
थक्पिण्डनं देकेन पत्न्यैव॥ वचनान्तरेकेनापि॥ अतो मातुः पिण्डसपिण्डीकृते नैव पतिपिण्डेन संयोज्यैकीकृतं पिण्डद्वयं तत्पि
त्रादिभिः संयोजयेत्॥ अत्यंपक्षस्य वक्ष्यामो वक्रसंमतं च॥ स्मृत्यर्थसारे तु॥ अन्वारोहणे नैकदिने मरणे स्त्रियाः पृथक् पिण्डे
नेनास्ति॥ भर्तुः कृते स्त्रिया अपि कृतं भवतीत्युक्तं तन्मतान्तरमस्तु॥ इदं ब्राह्म्यादिविवाहेषु ज्ञेयं॥ अपुत्रा पत्नीविषये पैठीनसि
अपुत्रायां मृतायां तु पतिः कुर्यात् सपिण्डनं॥ श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत्॥ यत्तु लघुहारीतः॥ पुत्रेणैव
तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः॥ पुरुषस्य च नत्वन्ये भ्रातृपुत्रादयोऽपि च॥ यच्च मार्कण्डेयपुराणे॥ सपिण्डीकरणं स्त्रीणां पु
त्राभावे न विद्यते इति॥ तत्पुत्रपत्न्यभावे ज्ञेयं॥ अत्र सपत्नीपुत्रो विज्ञेयः॥ बह्वीनामेकपत्नीनामेका चेत् पुत्रिणी भवेत्॥ सर्वा
स्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः॥ पुत्रिकापुत्रकर्तृसपिण्डने मनुः॥ मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः॥ द्वितीयं त
स्य तु तस्यास्तृतीयं तत्पितुः पितुः॥ पतिपुत्ररहितायाः स्त्रियाः सपिण्डनमेव निषिद्धं॥ किंतु षोडशश्राद्धान्येव भवंति॥ तथा च
मार्कण्डेयः॥ स्त्रीणामप्येवमेवैतदेकोद्दिष्टं विधीयते॥ सपिण्डीकरणं तासां पुत्राभावे न विद्यते॥ अत्र पुत्राभाव इत्युपलक्षणं॥ प
तिपुत्राभाव इति द्रष्टव्यं॥ पतिकर्तृकस्य सपिण्डनस्य विधानात्॥ एवं सपत्नीपुत्रेऽपि विद्यमाने स्त्रियाः सपिण्डनं भवति॥ बह्वीनामेक

227.
रत्न
२२७

पत्नीनामिति वचनात्॥ अपुत्रायाः सपत्न्याः पुत्रिणीत्वातिदेशात्॥ पितुः सपिण्डनं पितामहादिभिः सह कुर्यात्॥ पुत्रकमभृते तु सपि
ण्डीकरणं ब्रह्मपुराणे॥ मृतेपि न क्रियस्मार्थ विद्यते च पितामहः॥ तेन देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः॥ तेभ्यश्च पैतृकः पि
ण्डो नियोक्तव्यश्च पूर्ववत्॥ मातर्यग्रे मृतायां तु विद्यते च पितामही॥ प्रपितामही पूर्वं तु कार्यस्तत्राप्ययं विधिः॥ एवं च जीवन्नम
तिक्रम्य त्रिकपूरणं कर्त्तव्यं पुत्रकमात्रमृतानां वैनैव कुर्यात्सपिण्डनमिति च मातापितृव्यतिरिक्तविषयम्॥ अत एव स्कान्दे॥ पुत्र
मेण मृतानां न सपिण्डीकृतिरिष्यते॥ यदि माता यदि पिता भर्त्ता नैव विधिः स्मृतः॥ एष विधिः सपिण्डननिषेधरूपः॥ यति
विषये उशनाः॥ सपिण्डीकरणं तेषां न कर्त्तव्यं सुतादिभिः॥ त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते॥ शूद्रस्य तु विष्णुः॥ मंत्र
वर्ज्जं हि शूद्राणां द्वादशेहनि कीर्त्तितं॥ अमावास्याश्राद्धकारिशूद्रविषयमेतदित्यपरार्के कल्पतरौ॥ यत्तु कात्यायनः॥ सर्वे
षामेव वर्णानामाशौचान्ते सपिण्डनमिति तदेतदतिरिक्तविषयं॥ त्रैवर्णिकजातस्य शूद्रस्य तु शंखलिखितौ॥ नीयते तु
सपिण्डत्वं येषां शूद्रः कुलोद्भवः॥ सर्वे शूद्रत्वमायान्ति यदि स्वर्गजितोपि ते॥ सपिंडीकरणे ज्येष्ठपुत्रस्यैवाधिकारः॥ ॥ तथा च
वायुपुराणे॥ श्राद्धानि षोडशादत्वा न तु कुर्यात्सपिण्डनं॥ प्रोषितावसिते पुत्रः कालादपि चिरादपि॥ यदि षोडश श्राद्धानि
कनिष्ठभ्रात्रादिना कृतानि तदा ज्येष्ठः सपिण्डनमेव कुर्यादित्यपरार्के॥ इदं च सति ज्येष्ठे॥ तदभावे कनिष्ठेन॥ तदभावे भ्रात्रा
द्यधिकारिभिः पुरुषस्य सपिण्डनं कार्यं॥ भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा॥ सपिण्डीकरणं कुर्यात्पुत्रहीने मृते इति॥ इ

राम २२८

तिमनुवचनात् ॥ तथा ॥ ज्येष्ठेन वा कनिष्ठेन सपिण्डीकरणे कृते ॥ देशान्तरगतानां च पुत्राणां च कथं भवेत् ॥ कृत्वा तु वपनं कार्यं
दशाहान्ते तिलोदकं ॥ ततः सपिण्डीकरणं कुर्यादेकादशेऽहनि ॥ द्वादशाहे न कर्त्तव्यमिति शातातपोऽब्रवीत् ॥ स्मृत्यर्थसारे तु ब्रह्म
चारिणाम् अनपत्यानां च सपिण्डनं नास्ति ॥ तेषां सदैकोद्दिष्टमेव ॥ पुत्रकममृतानां वह्निनैः सापिण्ड्यं कार्यं न वा ॥ केचित्सर्वत्र
सपिण्डनमाहुः ॥ यतीनां प्रेतत्वं नास्ति ॥ अतस्तेषां नैकोद्दिष्टं न सपिण्डीकरणं ॥ किंत्वेकादशेऽह्नि पार्वणं कार्यं ॥ दशाहग्रहणा
पूर्वं मृते द्वादशाहादि सपिण्डनानन्तरं सर्वं कार्यमेवेति ॥ एकाहाशौचे द्वितीयेऽह्नि तृतीयेऽह्नि वा ॥ त्र्यहाशौचे पंचमेऽह्नि सपिण्डनं कार्यं
तत्र सपिण्डनमनेककालत्वेऽपि कलौ द्वादशाहे कार्यं ॥ आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ॥ अस्थिरत्वाच्छरीरस्य द्वा
दशाहः प्रशस्यते ॥ इति वचनात् ॥ गोभिलः ॥ द्वादशाहादिकाले तु मासादनन्तुष्ठितं ॥ सपिण्डीकरणं कुर्यात्कालेषूत्तरथाविधु
उत्तरभाविषु त्रिपक्षादिषु ॥ तेषु कालाभविष्यपुराणोक्ताः ॥ सपिण्डीकरणं कुर्याद्यजमानस्त्वमग्निमान् ॥ अनाहिताग्नेः प्रेतस्य
पूर्णेऽब्दे भरतर्षभ ॥ द्वादशेऽहनि षष्ठे वा त्रिपक्षे वा त्रिमासि वा ॥ एकादशे पि वा मासि मंगलं स्यादुपस्थितं ॥ षष्ठे मासीत्यन्वय
यदा मंगलवृद्ध्याद्युपस्थितं स्यात्तदा ॥ पूर्वमपि कालइत्यर्थः ॥ ॥ अथ सपिण्डीकरणप्रयोगः ॥ सपिण्डीकरणं चतुर्धा अपा
त्रकमेवाचरंतीति अपात्रकप्रयोगस्त्वलिख्यते ॥ ॥ तत्र मध्याह्ने कर्त्ता स्नातः शुचिराचान्तः पूर्वेद्युः कल्पितं स्थापितगोरसर्ष
पादिरक्षोघ्नं श्राद्धदेशं गत्वा पूर्वाभिमुख उपविश्य ॥ रक्षोघ्नदीपं प्रज्वाल्य सव्येन ॥ ॐ यद्देवा देवहेडनमिति कण्डिकात्रयेण कर्म

228
राम २२८

CC-0. In Public Domain. Digitization by eGangotri

पात्रं कृत्वा ॥ कुशत्रयसहितं कर्मपात्रोदकमादाय । ॐ अपवित्रः पवित्रो वेत्यादि पठित्वा ॥ ॐ पुण्डरीकाक्षः पुनात्विमन्त्रेणात्मादेशं द्र
व्याणात्मानं च सिंचेत् ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थं अमुकगोत्रैरस्मत्पितामहप्रपितामहवृ
द्धप्रपितामहैरमुकामुकामुकशर्मभिर्वसुरुद्रादित्यस्वरूपैः सहकालकामविश्वेदेवपूर्वकं मृताहाद्द्वादशाहे पार्वणैकोद्दिष्टवि
धिनाहं करिष्ये ॥ इति संकल्पं कुर्यात् ॥ मातुः सपिण्डीकरणे तु ॥ अद्यामुकगोत्राया मातुरमुकप्रेतायाः प्रेतत्वनिवृत्तिपितृलोक
प्राप्त्यर्थममुकगोत्राभिरस्मत्पितामहीप्रपितामहीवृद्धप्रपितामहीभिरमुकामुकामुकदेवीभिर्वसुरुद्रादित्यस्वरूपाभिः सहेत्या
दि पूर्ववत् ॥ भ्रात्रादीनां सपिण्डीकरणे ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थममुकगोत्रैः स्वपितृपि
तामहप्रपितामहैरमुकामुकामुकशर्मभिर्वसुरुद्रादित्यस्वरूपैः सहेत्यादि पूर्ववत् ॥ सहगमने तु ॥ अद्यामुकगोत्राया मातु
रमुकप्रेतायाः प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थममुकगोत्रेणास्वभर्त्रा सह सपिण्डीकरणं मृताहाद्द्वादशाहे हं करिष्ये ॥ इति
विशेषः ॥ ततो देवताभ्य इति त्रिः पठेत् ततो देवश्राद्धार्थोपकल्पितासनादिदेशमागत्य सव्येन उदङ्मुख उपविश्य कुशादीन्यादा
य ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहवसुरुद्रादित्य
स्वरूपश्राद्धसंबंधिनां कालकामविश्वेषां देवानामिदमासनं वो नमः ॥ इति पूर्वाग्रं कुशरूपमासनं यवजलप्रोक्षितमुत्सृजेत् ॥
ततः ॐ विश्वान्देवानावाहयिष्ये इत्युक्त्वा ॥ ॐ विश्वेदेवास इति मंत्रेणावाह्य ॥ ॐ यवोसि यवयास्मद्द्वेषो यवयारातीरिति मंत्रेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२२९

श्राद्धदेशो यवान् विकीर्य ॥ ॐ विश्वेदेवाः शृणुतेमं मित्यादि बर्हिषिमादाय धूमिस्यं तं मंत्रं पठित्वा ॥ ॐ आगच्छंतु महाभागा विश्वेदे
वा महाबलाः ॥ ये यत्र विहिताः श्राद्धे सावधाना भवंतु मे ॥ इति पठेत् ॥ ततः स्वमंत्रेण पवित्रं पुटकादौ पूर्वाग्रं धृत्वा जलयवगंध
पुष्पाणि स्वस्वमंत्रैः क्षिपेत् ॥ ततोर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं ॥ ॐ नमो नारायणायेति मंत्रेण अन्यपात्रे पूर्वाग्रं धृ
त्वा ॥ ॐ यादिव्या इत्यादिना अर्घपात्रस्थजलमभिमंत्र्य ॥ कुशयवजलान्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणा
निमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामहामुकामुकामुकशर्मवसुरुद्रादित्यस्वरूपश्राद्धसंबंधिनः काल
कामविश्वेदेवा एष वो हस्तार्घो नमः इति पवित्रोपरि अर्घजलं ददउत्सृजेत् ॥ ततः पवित्रसहितमर्घपात्रं आसनं दक्षिणपार्श्वे का
लकामविश्वेभ्यो देवेभ्यः स्थानमसीति देवार्घपात्रमुत्तानं स्थापयेत् ॥ ततो गंधादिना संपूज्य कुशादीन्यादाय ॥ ॐ अद्यामुकगोत्र
स्यामुकप्रेतस्य सपिण्डीकरणानिमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकामुकशर्मवसुरुद्रादित्यस्वरू
पश्राद्धसंबंधिनः कालकामविश्वेदेवा एतानि गंधपुष्पधूपदीपवासांसि वो नमः इति गंधादि कुशमुत्सृजेत् ॥ ततो पसव्येन तिल
युतजलयुतमन्नं मोदकादिसहितं आदाय दक्षिणाभिमुखः ॥ ॐ इदमन्नं सजलसेतन्दुःस्वामिपितृभ्यो नमः इति उत्सृजेत् ॥ ततः स
व्यं कृत्वा आसनसहितस्यान्नपात्रस्य चतुर्दिक्षु चतुःकोणमंडलं विधाय देवाध्यायनृसोपस्करस्य वजलयुतमन्नमुपनीय ॥ अन्नंम
धुमाभिघार्य स्त्रजु हस्ताभ्यामन्नपात्रमालभ्य ॥ ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ ॐ इदं वि

229
रत्न
२२९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्पुर्विचक्रमे त्रेधा निदधे पदं ॥ समूढमस्य पांशुरे ॥ इति पठित्वा ॥ ॐ इदं मन्त्रमित्यत्रे ॥ इमा आप इति जलं ॥ ॐ इदमास्यमि
नियते ॥ ॐ इदं हविरिति पुनरन्ने दक्षिणाकरांगुष्ठं निवेश्य ॥ ॐ यवोसि यवयास्मद्द्वेषो यवयारातीरिति मंत्रेण यवानन्नोपरि
प्रक्षिप्य ॥ कुशायवजलान्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकामुकामुकगोत्रपितामहप्रपिता
महवृद्धप्रपितामहानाममुकामुकामुकशर्मवसुरुद्रादित्यस्वरूपश्राद्धसंबंधिभ्यः ॥ कालकामविश्वेभ्यो देवेभ्य एतदन्नं सोपस्क
रणं नम इत्युत्सृजेत् ॥ एवं देवकार्यं निर्वर्त्य हस्तौ पादौ प्रक्षाल्याचम्य प्रेतश्राद्धदेशमागत्योपविश्य कृतापसव्यो दक्षिणामुखः
कुशादीन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठतामिति कुशरू
पमासनमुत्सृजेत् ॥ ततो मोटकादिकमादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणकनिमित्तश्राद्धे अमुकगोत्रस्य
पितामहस्यामुकशर्मणो वसुस्वरूपस्येदमासनं ते स्वधा ॥ इति स्थानत्रये कुशासनेषु सर्वपश्चिमस्थाने स्थिते आसने मोट
करूपमासनमुत्सृज्य पुनर्मोटकादिकमादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्य
प्रपितामहस्यामुकशर्मणो रुद्रस्वरूपस्येदमासनं ते स्वधा ॥ इति दत्तासनात्पूर्वं प्रपितामहाय मोटकरूपमासनमुत्सृज्य पु
नर्मोटकादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकवृप्रमासनमुत्सृजेत् ॥ ततः प्रेतवर्जं पितामहा
दीनुद्दिश्य श्राद्धे अमुकगोत्रस्य वृद्धप्रपितामहस्यामुकशर्मण आदित्यस्वरूपस्येदमासनं ते स्वधा इति सर्वं पूर्ववद्वृद्धप्रपितामहा

रत्न
२३०

यमोदकरूपमासनमुक्त्वा जेत् ततः प्रेतवर्जं पितामहादीनुद्दिश्य पितॄनावाहयिष्ये इत्युक्त्वा ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि
उशन्नुशत आवह पितॄन् हविषे अत्तवे इति पितामहादीनावाह्य ॥ ॐ अपहता असुरा रक्षांसि वेदिषद इति श्राद्धस्थाने तिलान्
विकीर्य ॥ ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मानिति मंत्रज
पेन ॥ ततो अर्घार्थं पूर्वभागे एकं पुटकमासाद्य तत्पश्चिमभागे दक्षिणासंस्थं पुटकत्रयमासाद्य तेषु चतुर्ष्वेषु ॐ पवित्रे स्थ इति
मंत्रेण प्रत्येकं दक्षिणाग्राणि पवित्राणि धृत्वा जलतिलगंधपुष्पाणि स्वस्वमंत्रैः प्रत्येकं तेषु क्षिपेत् ॥ ततः प्रेतार्घपात्रं वामहस्ते कृ
त्वा नमो नारायणायेति मंत्रेणान्यपात्रोपरि पवित्रं मुक्त्वा राग्रे धृत्वा ॥ यादिव्या आप इत्यादि मंत्रेणार्घ्यपात्रस्थं समभिमंत्र्य कुशादिक
मादाय अद्यामुकगोत्रामुकप्रेत समपिण्डीकरणश्राद्धे एष हस्तार्घस्ते मया दीयते नेन वो पतिष्ठतामिति पवित्रोपरि चतुर्थभागं जलं
ददत्युत्सृजेत् ॥ ततः ॐ अद्यामुकगोत्रामुकप्रेतार्घपात्रोदकं अमुकगोत्राणां पितामहप्रपितामहवृद्धप्रपितामहानाममुकामुका
मुकशर्मणामर्घपात्रोदकेन संयोजयिष्ये इत्युक्त्वा पितामहादिपात्रत्रये प्रेतार्घपात्रजलस्य भागत्रयं कृत्वा एकैकं भागं वक्ष्यमाण
मंत्रैः संयोजयेत् ॥ प्रेतार्घपात्रजलविभागेऽपि इति मन्त्रद्वयपाठः ॥ निरूप्य चतुरः पिण्डान् श्राद्धदः पितृनामतः ॥ ये समाना इति
द्वाभ्यां मार्घं तु विभजेत् त्रिधा ॥ एष एव विधिः प्रोक्तः अर्घ्यपात्रचतुष्टये ॥ इति वचनात् ॥ मिताक्षरायां स्मृत्यर्थसारे च प्रेतार्घपात्र
जलमादौ पितामहार्घपात्रे संयोज्यावशिष्टजले न प्रेतायार्घं दद्यादित्युक्तं ॥ तत्रक्रमः ॥ सव्यं कृत्वा वामाप्रसव्यं कृत्वा अन्यत्र

230
राम
२३०

कत्रयं मंत्रे धृत्वा प्रेतार्घपात्रं गृहीत्वा ॥ येसमानाः समनसः पितरोयमराज्ये ॥ तेषांलोकः स्वधानमोयज्ञोदेवेषुकल्पतां ॥ येसमा
नाः समनसोजीवाजीवेषुमामकाः ॥ तेषांॐश्रीर्मयीकल्पतामस्मिंल्लोकेशतंॐसमाः ॥ इतिमंत्रौपठित्वा ॥ प्रेतार्घपात्रस्थजलतृ
तीयभागंपुटकांतरेधृत्वा ॥ पुनरपिमंत्रद्वयंपठित्वाअपरतृतीयभागंपुटकांतरेधृत्वापुनरपिमंत्रद्वयेपठित्वाप्रेतार्घपात्राव
शिष्टतृतीयभागेजलंपुटकांतरेधृत्वा ॥ प्रथमपुटकेविभक्तजलतृतीयभागेप्रेतार्घपात्रेधृत्वा ॥ सपवित्रपुष्पसहितंप्रेतार्घ
पात्रमादाय ॥ ॐयेसमानाः समनसः पितरोयमराज्येः तेषांलोकः स्वधानमोयज्ञेदेवेषुकल्पतां ॥ येसमानाः समनसोजीवा
जीवेषुमामकाः ॥ तेषांॐश्रीर्मयीकल्पतामस्मिंल्लोकेशतंॐसमाः ॥ संसृजतुत्वापृथिवीवायुरग्निः प्रजापतिः संसृजत्वंवपू
र्वेभिस्तिस्मभिः पितृभिः सह ॥ संगच्छध्वंसंवदध्वंसंवोमनांसिजानतां ॥ देवाभागंयथापूर्वेसंजानानाउपासते ॥ समानोमंत्र
समितिः समानीसमानंमनः सहचित्तमेषां ॥ समानंमंत्रमभिमंत्रयेवः समानेनवोहविषाजुहोमि ॥ समानीवआकूतिः स
मानाहृदयानिवः ॥ समानमस्तुवोमनोयथावः सुसहासति ॥ मधुवातेतिञ्चवमपिपठंतिकेचित् ॥ इतिमंत्रान्पठित्वाप्रे
तार्घपात्रस्थतृतीयभागंजलंपितामहार्घपात्रजलेमेलयेत् ॥ एवमपरपुटकद्वयास्थितार्घपात्रजलतृतीयभागद्वयेक्रमेणा
प्रत्येकंमंत्रान्पठित्वाप्रपितामहार्घपात्रजलेवृद्धप्रपितामहार्घपात्रजलेक्रमेणामेलयेत् ॥ ततअमुकगोत्राअमुकप्रेतामुक
गोत्रैः स्वपितृपितामहप्रपितामहैरमुकामुकशर्मभिर्वसुरुद्रादित्यस्वरूपैः सहसायुज्यंगच्छत्वमुकापितामहार्घपात्रेवामह

रत्न
२३१

स्ते कृत्वा ॐ नमो नारायणायेति पवित्रमत्रपात्रोपरि धृत्वा ॥ ॐ या दिव्या आपः इत्यादिनार्घपात्रस्थजलमभिमंत्र्य मोटकादिक
मादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र पितामहामुकशर्मन् एष ते अर्घः स्वधेति
पवित्रोपरि अर्घजलं दद्यादुत्सृजेत् ॥ पवित्रं पुष्पसहितमर्घपात्रोपरि धृत्वा ॥ ॐ दिव्या आपः इत्यादिना अर्घपात्रस्थं जलम
भिमंत्र्य मोटकादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र प्रपितामहामुकशर्म
न् रुद्रस्वरूप एष ते अर्घः स्वधेति पूर्ववदुत्सृजेत् ॥ पवित्रसहितपुष्पमर्घपात्रमत्रैस्थापयेत् ॥ तृतीयार्घपात्रं वामहस्ते कृत्वा ॐ न
मो नारायणायेति पवित्रमत्रपात्रोपरि धृत्वा ॥ ॐ या दिव्या आपः इत्यादिना अर्घपात्रस्थजलमभिमंत्र्य मोटकादिकमादाय अ
द्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राः पितामहप्रपितामहवृद्धप्रपितामहाः अमुकामुकामुक
शर्माणो वसुरुद्रादित्यस्वरूपा एतानि गंधपुष्पाक्षतधूपदीपवासांसि युष्मभ्यं स्वधेति पितामहादिभ्यो गंधादिकमुत्सृजेत् ॥ त
तः प्रेतासनस्य चतुर्दिशं चतुष्कोणं मण्डलं विधाय ॥ अपरं पितामहादित्रिकोणमण्डलं कुर्यात् ॥ ततः सव्यं कृत्वा प्राङ्मुखः उप
वीती यावत् दक्षिणा जानु ॥ पुटकादौ सघृतमन्नं कृत्वा पुटकादिजले ॥ ॐ अग्नये कव्यवाहनाय स्वाहा ॥ इदमग्नये कव्यवाहनाय
ॐ सोमाय पितृमते स्वाहा ॥ इदं सोमाय पितृमते ॥ इत्याहुतिद्वयं तदन्नाग्रे जुहुयात् । अपसव्यं कृत्वा अवशिष्टमन्नं पितामहा
दिपात्रे किंचिद्दद्यात् ॥ ततः क्रमेण प्रत्येकं सोपकरणमन्नमुपनीय ॥ पृथक् पृथक् पुटकस्थितं सतिलजलं चोपनीयं प्रेतपा

राम
२३१

231

६७

CC-0. In Public Domain. Digitization by eGangotri

त्र्यस्थितान्येषु मधुदद्यात् ॥ ततः पात्रालंभनांगुष्ठावगाहनं विना ॥ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि
स्वाहा ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं ॥ समूढमस्य पांशुरे इति पठित्वा अपहता असुरा रक्षांसि वेदिषद इत्यन्नोपरि
प्रकिरति तिलान् प्रक्षिप्य कुशादीन्यादाय ॥ अद्यामुकगोत्रायामुकप्रेताय सपिण्डीकरणश्राद्धे इदमन्नं सोपकरणं ते मया दीयते नत
वोपतिष्ठतामिति प्रेतायान्नमुत्सृजेत् ॥ ततः पितामहान्नपात्रं व्यस्तहस्ताभ्यां न्युब्जाभ्यामालभ्य ॥ ॐ पृथिवी ते पात्रं इत्यादि जुहोमि
स्वाहेत्यन्तं ॥ इदं विष्णुरित्यादिक्रमेणान्नजलघृतान्येषु दक्षिणाग्रकुशनिवेश्य इदमेतु कुशनिवेशनं पाकश्राद्धे ॥ आपश्राद्धे तु भोजनसं
बधात्तत्र प्रयोजनानि वर्तते ॥ कुशस्थलेऽवघातनवत् ॥ न द्विप्रश्नोऽवगाहश्च जपप्रश्नो यथासुखम् ॥ आमश्राद्धे भवेन्नेतद्योज्ञानं च पं
चमे ॥ अवगाहो कुशनिवेशनं ॥ अत आमपक्षेस्मिन्नेते न भवन्ति ॐ अपहता असुरा रक्षांसि वेदिषद इत्यन्नोपरि प्रकिरति तिलान्
प्रक्षिप्य कुशान्दीन्यादाय ॥ अद्यामुकगोत्रायामुकप्रेताय सपिण्डीकरणश्राद्धे इदमन्नं सोपकरणं ते मया दीयते नतवोपतिष्ठ
तामिति प्रेतायान्नमुत्सृजेत् ॥ ततः पितामहान्नपात्रं वामहस्ताभ्यां न्युब्जाभ्यां हस्ताभ्यामालभ्य ॥ ॐ पृथिवी ते पात्रं इत्यादि जु
होमि स्वाहेत्यन्तं ॥ इदं विष्णुरित्यादिक्रमेणान्नजलघृतान्येषु दक्षिणाग्रकुशनिवेश्य ॥ इदं मे कुशनिवेशनं पाकश्राद्धे ॥ आमश्राद्धे
तु भोजनसंबन्धात्तत्र प्रयोजनानि वर्त्तते कुशस्थलेऽवघातनवत् ॥ न द्विप्रश्नोऽवगाहश्च जपप्रश्नो यथासुखं ॥ आमश्राद्धे भवेन्नेत
द्योज्ञाने च पंचमे ॥ अवगाहो कुशनिवेशनं ॥ अत आमपक्षेस्मिन्नेते न भवन्ति ॥ ॐ अपहता रक्षांसि वेदिषद इत्यन्नोपरि तिला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृप्तक्षिप्य मोटकादीन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय पितामहायामुकशर्म
णे वसुस्वरूपाय एतत्ते अन्नं सोपकरणं स्वधेति पितामहायान्नमुत्सृजेत् ॥ ततो वृद्धप्रपितामहान्नपात्रमालभ्य पूर्ववत् ॥ पृथिवी त
इत्यादिकं सर्वं कृत्वा मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय वृद्धप्र
पितामहायामुकशर्मणे आदित्यस्वरूपाय एतत्ते अन्नं स्वधा इति वृद्धप्रपितामहान्नमुत्सृजेत् ॥ ततो मधुवातेति त्र्यृचं ॐ मधु मधु
मधु इति च जपित्वा अन्नहीनमित्यादि च पठित्वा नमस्तुभ्यं विरूपाक्षेति श्लोकं पठेत् ॥ पितामहान्नपात्रसन्निधौ आस्तृतद
क्षिणाग्रकुशत्रयां भूमिं प्रोक्ष्य सतिलघृतमन्नमादाय जलेनाप्लाव्य मोटकं वादाय ॥ ॐ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले
मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिमित्यादि स्मृत कुशोपरि तदन्नं विकिरेत् ॥ ततः सव्यं कृत्वा आचामेत् ॥ हरिस्मृत्वा प
सव्यं कुर्यात् ॥ ततः पिण्डदानार्थमेकापितामहादिपिण्डदानार्थमपरां हमितां चतुरंगुलोच्छ्रितां सैकतीं वा दक्षिणाप्लवां पिण्डि
कां निर्माय प्रेतपिण्डिकायां रेखाकरणं स्रुक धामरां विन्ने वछिन्नमूलकुशानास्तीर्य ॥ अपरपिण्डिकामध्ये वामेन पाणिना दर्भ
पिञ्जलीं गृहीत्वा दक्षिणहस्ते कृत्वा तन्मूले नमस्यो यगृहीत दक्षिणपाणिनां ॥ ॐ अपहता असुरा रक्षांसि वेदिषद इति मंत्रेण
दक्षिणाग्रा रेखां प्रादेशप्रमाणां सकृदुल्लिखेत् दर्भपिञ्जलीमुत्तरस्यां क्षिपेत् ॥ ततो रेखोपरि ॥ ॐ ये रूपाणि प्रतिमुंचमाना असुराः
संतः स्वधया चरंति ॥ परापुरो निपुरो ये भरंत्यग्निष्टान् लोकात्प्रणुदात्यस्मादिति मंत्रेणामारं भ्रामयित्वा दक्षिणातः क्षिपेत् ॥ ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रेखायां छिन्नमूलकुशानास्तरण्यात् ॥ ततः सव्येनाचम्यापसव्यं कृत्वा पुटकद्वयं गंधपुष्पतिलान् कृत्वा एकं वामहस्ते कृत्वा कुशादि
कमादाय ॥ अद्यामुकगोत्रामुकप्रेतस्य सपिण्डीकरणाश्राद्धपिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठतामिति पूर्वपिण्डि
कायां छिन्नमूलकुशोपरि अवनेजनं दद्यात् ॥ ततो परं पुटकं वामहस्ते कृत्वा मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य
सपिण्डीकरणानिमित्तकश्राद्धपिंडस्थाने अमुकगोत्रपितामहामुकशर्मवसुस्वरूपायावनेनिक्ष्व ते स्वधेति द्वितीयपिण्डिका(
यामास्तृतकुशलमूलसन्निधाने पितामहाया वनेजनं दद्यात् ॥ पुनर्मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डी
करणानिमित्तकश्राद्धपिण्डस्थाने अमुकगोत्रपितामहामुकशर्मन् रुद्रस्वरूपायावनेनिक्ष्व ते स्वधेति आस्तृतकुशमध्ये प्रपिता
महायावनेजनं दद्यात् ॥ पुनर्मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणानिमित्तकश्राद्धपिण्डस्थाने अमु
कगोत्रवृद्धप्रपितामहामुकशर्मन्नादित्यस्वरूपायावनेनिक्ष्व ते स्वधेति आस्तृतकुशाग्रे वृद्धप्रपितामहाया वनेजनं दद्यात् ॥ ततः क
पित्थप्रमाणान् चतुरः पिण्डान्निर्माय ॥ प्रथमपिण्डं कुशतिलसहितमादाय ॥ अद्यामुकप्रेतस्य सपिण्डीकरणाश्राद्धे एष वः पिण्डस्ते म
यादीयते तवोपतिष्ठतामिति पूर्वपिण्डिकायां कुशोपरि प्रेतपिण्डं दद्यात् ॥ ततो मोटकादीनि पिण्डं चादाय अद्यामुकगोत्रस्यामुकप्रे
तस्य सपिण्डीकरणानिमित्तकश्राद्धे अमुकगोत्रपितामहामुकशर्मन् वसुस्वरूप एष ते पिण्डः स्वधेति पश्चिमपिण्डिकायां प्रथमा
वनेजनस्थाने पितामहाय पिण्डं दद्यात् ॥ पुनर्मोटकादीनि पिण्डं चादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणानिमि

CC-0. In Public Domain. Digitization by eGangotri

त्तकश्राद्धे अमुकगोत्र प्रपितामहामुकशर्मन् रुद्रस्वरूपैष ते पिण्डः स्वधेति द्वितीयावनेजनस्थाने प्रपितामहाय पिण्डं दद्यात्
पुनर्मोटकादीनि पिण्डं वादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र वृद्धप्रपितामहामु
कशर्मन् आदित्यस्वरूपैष ते पिण्डः स्वधेति तृतीयावनेजनस्थाने वृद्धप्रपितामहाय पिण्डं दद्यात् ॥ ततः पितामहादिपिण्डत्रयस्य रेखा
कुशमूले लेपभागभुजस्तृप्यन्त्विति करं प्रोक्ष्य सव्यं कृत्वाचम्य हरिं स्मरेत् ततोपसव्यं कृत्वा दक्षिणामुखो मन्त्रपाठं विना प्रेत भास्वरमूर्त्ति
विं नयेत् ॥ ततः पितामहादीनुद्दिश्य दक्षिणामुखः ॥ ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति पठित्वा उत्तराभिमुखो भूत्वा
श्वासं नियम्य भास्वरमूर्त्तिं पितामहादिकं ध्यायन् ॥ ॐ अमीमदन्त पितरो यथाभागमावृषायषत इति पठेत् ॥ ततः प्रेतावनेजनपा
त्रं वामहस्ते कृत्वा कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतसपिण्डीकरणश्राद्धपिण्डे इदं प्रत्यवनेजनं मया दीयते नेन वोपतिष्ठता
मिति प्रेताय प्रत्यवनेजनं दत्वा पितामहाद्यवनेजनपात्रं वामहस्ते कृत्वा मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य स
पिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकगोत्र पितामहामुकशर्मन् वसुस्वरूपे इदं प्रत्यवनेजनं ते स्वधेति प्रत्यवनेजनं दत्वा
अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकगोत्र प्रपितामहामुकशर्मन् रुद्रस्वरूपे इदं प्रत्यवने
जनं स्वधेति प्रपितामहाय प्रत्यवनेजनं दत्वा ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुक
गोत्र वृद्धप्रपितामहामुकशर्मन् आदित्यस्वरूपे इदं प्रत्यवनेजनं स्वधेति वृद्धप्रपितामहाय प्रत्यवनेजनं दद्यात् ॥ ततो नीवीं वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वंस्यसव्यं कृत्वा वाम अपसव्यं कृत्वा वामेन पाणिनां धृतं सूत्रं दक्षिणेनाधाय मंत्रपाठं विना ॥ प्रेतैतत्ते वास इत्युभाभ्यां हस्ताभ्यां पि
ण्डोपरि सूत्रं धारयेत् ॥ पूर्ववस्तुनः सूत्रमादाय ॥ ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो व
: पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मै
तद्वः पितरो वासः ॥ इति मंत्रं पठित्वा प्रत्येकं पिण्डोपरि सूत्रं धारयेत् ॥ ततः प्रत्येकं क्रमेण गंधादिभिः पिण्डान्संपूज्य कुशादिक
मादाय ॥ अद्यामुकगोत्रामुकप्रेतस्य सपिण्डीकरणश्राद्धपिण्डस्थानि सूत्रगंधपुष्पाक्षतधूपदीपैत्रवादिनैवेद्यानि ते मया
दीयंते तव वोपतिष्ठंतामिति प्रेताय गंधादिकमुत्सृजेत् ॥ मोदकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणा
निमित्तकश्राद्धपिण्डे अमुकगोत्राः पितामहप्रपितामहवृद्धप्रपितामहा अमुकामुकामुकशर्मणो वसुरुद्रादित्यस्वरूपाण्ये
तानि सूत्रगंधपुष्पाक्षतधूपदीपैत्रवादिनैवेद्यानि युष्मभ्यं स्वधेति पितामहादिभ्यो गंधादिकमुत्सृजेत् ॥ ततः पिण्डसमी
पे तत्तत्पिण्डोद्देशं तन्निकिरेत् ॥ तण्डुलान् ॥ विश्वेदेवाव पात्रोपरि क्षिपेत् ॥ ततोपसव्यं कृत्वा ॥ शिवा आपः संत्विति जलं
सौमनस्यमस्तु इति पुष्पं ॥ अक्षतं चारिष्टमस्तु इति तंडुलान् ॥ प्रेतान्नपात्रोपरि क्षिपेत् ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रस्या
मुकप्रेतस्य सपिण्डीकरणश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दत्वा सव्यं कृत्वा अघोरः प्रेतोस्तु इति दक्षि
णादिशं पश्यन् पिण्डोपरि धृत्वा मंत्रपाठं विना घटकादिकस्थलजलादिना ॥ इदमूर्जं ते मया दीयते तव वोपतिष्ठतामिति सपवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२३४

त्रकुशोपरि दक्षिणाग्रां धारां दद्यात् ॥ दक्षिणादानं विसर्जनान्ते सहैव भवति ॥ सुवर्णात्पदर्भैस्तु तस्मिन् पिण्डे तत्र त्रिधा ॥ कृ-
त्वा पितामहादिभ्यः पितृभ्यश्चैव मर्पयेत् ॥ इति ब्रह्मपुराणवचनात् ॥ सुवर्णात्पदर्भैः पिण्डविभागः कर्त्तव्य ॥ ततः पिण्डस्य
वादिकमपनीय ॥ अमुकगोत्रस्यामुकप्रेतस्य सपिण्डं पितादिपिण्डैः सह संयोजयिष्ये इत्युक्त्वा ॥ सुवर्णरजतकुशान् हस्तद्वयेना-
दाय ॥ ये समाना इति मंत्रद्वयं पठित्वा प्रेतपिण्डं त्रिधा विभजेत् ॥ प्रतिविभागं मंत्रद्वयं पठेत् ॥ ततः प्रथमपिण्डभागमादा-
य ॥ ये समानाः ॥ ये समानाः संसृजन्तु त्वा पृथिवी ॥ संगच्छध्वं समानो मंत्रः समानी व ॥ मधुवाता इति वदन् पितामहपिण्डे सं-
योज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ एवं द्वितीयपिण्डभागमादाय पूर्वोक्तान् पठित्वा अद्यामुकगोत्रामुकप्रेतामुकगोत्रेण
स्वपितामहेनामुकशर्मणा रुद्रस्वरूपेण सह संसृजस्वेति वदन् प्रपितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कु-
र्यात् ॥ एवमेव तृतीयपिण्डभागमादाय पूर्वोक्तसर्वमंत्रान् पठित्वा ॥ अमुकगोत्रामुकप्रेतामुकगोत्रेण स्वप्रपितामहेना- 234
मुकशर्मणादित्यस्वरूपेण सह संसृजस्वेति वदन् वृद्धप्रपितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ ततः पि-
ण्डमेलनानन्तरं सपवित्रगतः प्रेतः पितृभागमवाप्नुवान् ॥ भुभं भवतु शोपाणां जायंतां चिरजीविनः ॥ इति मंत्रं पठेत् ॥ ततः पि- रत्न
तृपूर्वकं पितामहादिपिण्डे गंधपुष्पाक्षतधूपदीपनैवेद्यादिभिः पिण्डत्रयमर्चयेत् ॥ मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्या- २३४
स्मत्पितुरमुकशर्मणः सपिण्डीकरणश्राद्धपिण्डे अमुकगोत्राः पितामहप्रपितामहवृद्धप्रपितामहा अमुकामुकामुकशर्माणो वसु-

६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रादित्यस्वरूपास्तानि गंधपुष्पाक्षतधूपदीपनैवेद्यानि वस्त्रधौतिगंधादिकमुत्सृजेत् ॥ केचित्तु प्रेतपिण्डावयवत्रयेणासं
योजितान् त्रीन् पिण्डानिदानीं तत्र मृतमारभ्य पुरुषत्रयाय पार्वणावत्ततः पितामहगोत्राद्युच्चार्य दद्यादित्याहुः ॥ ततः पिताम
हान्नपात्रे पुत्रक्रमेणाप्रत्येकं ॥ ॐ शिवा आपः सन्त्विति जलं दत्वा ॥ ॐ सौमनस्यमस्त्विति पुष्पं दत्वा ॥ ॐ अक्षतं चारिष्टमस्त्विति
तण्डुलान् दद्यात् ॥ ततः सर्वं कृत्वा कर्मपात्रोदकं कुशैः प्रतिमंत्रं स्वशिरः स्वभिषिंचेत ॥ ॐ अस्मत्कुले दीर्घमायुरस्तु ॥ ॐ शान्ति
रस्तु ॥ ॐ पुष्टिरस्तु ॥ ॐ तुष्टिरस्तु ॥ ॐ यद्यच्छ्रेयस्तत्तदस्तु ॥ ॐ यत्पापं तत्प्रतिहतमस्तु ॥ इति भूमौ ॥ ॐ द्विपदचतुष्पदेभ्यः शां
तिरस्तु ॥ ततोपसव्यं कृत्वा मोदकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपिण्डीकरणनिमित्तकश्राद्धे अमुक
गोत्रस्यास्मत्पितामहस्यामुकशर्मणो वसुस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्त्विति पितामहायाक्षय्योदकं दत्वा ॥ ॐ अद्या
मुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्यास्मत्प्रपितामहस्यामुकशर्मणो रुद्रस्वरूप
स्य दत्तैतदन्नपानादिकमक्षय्यमस्त्विति प्रपितामहायाक्षय्योदकं दत्वा ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपिण्डीक
रणनिमित्तकश्राद्धे अमुकगोत्रस्यास्मद्वृद्धप्रपितामहस्यामुकशर्मणः सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्यास्मद्वृद्ध
प्रपितामहस्यामुकशर्मण आदित्यस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्त्विति वृद्धप्रपितामहायाक्षय्योदकं दत्वा सव्यं कृ
त्वा कृतांजलिर्दक्षिणां दिशमवलोकयेत् ॥ ॐ अघोराः पितरः सन्त्विति पितामहादिपिण्डत्रयोपरि पूर्वाग्रां जलधारां दद्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न २३५

ततः सव्येनैव प्राङ्मुख आशिषः प्रार्थयेत् ॥ ॐ गोत्रं नो वर्द्धतां ॥ ॐ दातारो नोभिवर्द्धन्तां ॥ ॐ विद्याः सन्ततिरेव च ॥ श्रद्धा च नो मा
व्यगमत् ॥ बहुदेयं च नोस्तु ॥ अन्नं च नो बहु भवेत् ॥ अतिथींश्च लभेमहि ॥ याचितारश्च नः सन्तु ॥ मा याचिष्म कंचन ॥ एताः सत्या
आशिषः सन्त्विति ॥ ततः श्राद्धकर्त्ता तिलकं कुर्यात् ॥ अपसव्यं कृत्वा पिण्डोपरि सपवित्रकुशानास्तीर्य ॥ जलादिसहितं घटकं
वामहस्ते कृत्वा ॥ ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं ॥ स्वधास्थ तर्पयत मे पितॄन् ॥ इति सपवित्रकुशोपरि दक्षि
णाग्रां धारां दद्यात् ॥ ततो नत्रीभूय पिण्डानाघ्रायोत्थापयेत् ॥ पिण्डाधारकुशानुल्मुकं च वह्नौ क्षिप्येत् सव्येन पिण्डिकायां शंख
चक्रं विधाय ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥ शंखचक्राभ्यां नमः ॥ इति यवैर्गन्धादिभिः शंखचक्रपूजां विधाय ॥ अपसव्यं
कृत्वा तूष्णीमेव पिण्डान् पिण्डिकोपरि निधाय पूजयेत् ॥ एभिर्मन्त्रैः सव्येन ॥ ॐ वसन्ताय नमोस्तुभ्यं नमस्ते शिशिराय च ॥ मास
संवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥ इति सव्येन विश्वदेवार्घपात्रं संचाल्य ॥ अपसव्येन पित्रर्घपात्रं संचाल्य पितामहार्घपात्रा
दि उत्तानीकृत्य दक्षिणां दद्यात् ॥ ततः सव्येन कुश यव जल दक्षिणाद्रव्याण्यादाय ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः स
पिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकामुकशर्म वसुरुद्रादित्यस्वरूप श्राद्धसंबंधि
नां कालकामविश्वेषां देवानां कृतैतत्क्षुद्र प्रतिष्ठार्थं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे
इति विश्वेदेवश्राद्धदक्षिणां दत्वा ॥ सर्वकर्मापसव्येन दक्षिणादानवर्जितमिति च वचनात् सव्येनैव कुश तिल जल द्रव्याण्यादाय स

235

राम २३५

CC-0. In Public Domain. Digitization by eGangotri

दक्षणानि ॥ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्रा
यब्राह्मणाय दक्षिणां दातुमहमुत्सृजे ॥ इति पितृश्राद्धदक्षिणां दत्वाऽनकुशतिलजलदक्षिणां ब्राह्मणाय ॥ ॐ अद्यामुकगोत्र
स्यास्मत्पितुरमुकशर्मणः सपिण्डीकरणनिमित्तककृतैतदमुकगोत्रपितामहप्रपितामहवसुरुद्रादित्यस्वरूपामुकामुकामु
कशर्मश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दक्षिणां दातुमहमुत्सृजे ॥ इति पितामहादिदक्षि
णां दद्यात् ॥ ततः सव्येनैव ॥ ॐ कालकामविश्वेदेवाः प्रीयन्तामिति विश्वेदेवविसर्जनं कृत्वा ॥ अपसव्येन स्वस्तीति पितृवि
सर्जनं कृत्वा ॐ वाजेवाजे वत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ॥ अस्य मध्वः पिबत मादयध्वं ॥ तृप्ता यात पथिभिर्देवया
नैरिति पितामहादीन् विसर्जयेत् ॥ आमश्राद्धपक्षे तृप्तायानेन स्वत्र तृप्यत यानेति मंत्रोहः कार्य्यः ॥ ततः सव्येन देवताभ्य इति त्रिः प
ठेत् ॥ अपसव्येन रक्षाप्रदीपाच्छादनं विधाय ॥ ततः सव्येन हस्तौ पादौ प्रक्षाल्याचमनं कुर्यात् ॥ ततः ॐ प्रमादात्कुर्वतां कर्म प्रच्य
वेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति पठित्वा ॥ एतत्फलकामो विष्णुस्मरणं कुर्यात् ॥ सहगमने तु ॥ पि
त्रैकोद्दिष्टं सह एव विधाय ॥ पित्रर्घपात्रं पितामहार्घपात्रे मेलयित्वा ॥ ॐ अद्यामुकगोत्राया मातुरमुकदेव्या अर्घपात्रो
दकममुकगोत्रस्य स्वभर्तुरर्घपात्रस्थजले मेलयित्वा ॥ अमुकगोत्रे मातरमुकदेवि अमुकगोत्रेण स्वभर्त्रा सहसायुज्यं गच्छे
ति वदेत् ॥ एवं पितृपिण्डसंयोजनानन्तरं ॥ ॐ अद्यामुकगोत्राया मातुरमुकदेव्याः पिण्डं स्वभर्तृपिण्डेन सह संयोजयामि इत्युक्त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न मातृपितॄणामादाय सर्वमंत्रपाठांते॥ अमुकगोत्रे मातरमुकप्रेते अमुकगोत्रेणास्वभर्त्रामुकशर्मणा संसृजस्वेति वदन् पितृपितृप्रथ
२३६ मभागमुक्तं पितामहपितृसंयोज्य दधिमधुघृताभ्यां मिश्रीकृत्य वर्तुलं कुर्यात्॥ मातृश्राद्धदक्षिणावाक्यं पृथक्कुर्यात्॥ तत्रैवं सव्येन
कुशतिलजलदक्षिणाद्रव्याण्यादाय॥ ॐ अद्यामुकगोत्राया अस्मन्मातुरमुकदेव्याः कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठार्थमि
दं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे॥ इति विशेषः सहगमनाभावे मातृसपिण्डीकरणे पिता
महादिपितृत्रये मातृपितृं संयोजयेत्॥ मृतमातृको मातादिपितृत्रये पत्न्याः पितृ संयोजयेत्॥ अमृतमातृकस्तु पितामह्या
दिपितृत्रये पत्न्याः पितृ संयोजयेदिति॥ ॥इति सपिण्डीकरणं॥ ॥अथ पुनः पाथेयश्राद्धं॥ तच्च सपिण्डीकरणानन्तरं
द्वादशाहे त्रयोदशेह्नि वा पुनः पाथेयश्राद्धं कुर्यात् तच्च पार्वणमेकोद्दिष्टं वा यथाचारं सिद्धान्नेनाग्नेयां देशमागम्य पूर्वाभि
मुख उपविश्य॥ ॐ यद्देवा देवहेडनमिति मंत्रत्रयेणाकर्मपात्रं कर्तव्यं॥ कुशजलेन॥ ॐ अपवित्रः पवित्रो वेत्यादि पठित्वा पु
ण्डरीकाक्षः पुनात्वित्युच्चार्य श्राद्धदेशं द्रव्याण्यात्मानं च प्रक्षिपेत्॥ ततः कुशादिकमादाय॥ ॐ अद्येत्यादि देशकालौ स्मृत्वा अद्यामुकगो
त्रस्यास्मत्पितुरमुकशर्मणः प्रेतलोकात्स्वर्गलोकगमने सुखप्राप्त्यर्थं पाथेयश्राद्धमहं करिष्य इति संकल्प्य सांवत्सरिकश्राद्ध
विधिना पाथेयश्राद्धं कुर्यात्॥ तत्र वाक्ये पाथेयपदप्रक्षेप इति विशेषः॥ ततः कर्त्ता अभ्यंगस्नानं कृत्वा नववासः परिधायाव
स्य पूर्वाभिमुखः कुशतिलजलान्यादाय पूर्वोक्तमंत्रं पठित्वा कुशजलेन प्रक्षिपेत्॥ ततो देवता इति त्रिः पठेत्॥ ततोपसव्यं कृत्वा

236
रत्न
२३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दक्षिणाभिमुखः पातितवामजानुर्मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मण इदमासनं ते स्वधा ॥ ततः उ
टके प्रादेशमात्रं पवित्रे स्थ इति मंत्रेण दक्षिणाग्रं धृत्वा ॥ अन्ने देवीरिति जलं दद्यात् ॥ तिलोसीति तिलान् दत्वा गंधद्वारामिति गं
धं ॥ श्रीश्च ते इति मंत्रेण पुष्पं वक्षिपेत् ततस्तदर्घपात्रं वामहस्ते कृत्वा पवित्रं सपुष्पमन्नपात्रोपरि ॐ नमो नारायणायेति
मंत्रेणोत्तराग्रं धृत्वा ॥ ॐ या दिव्या आप इत्यादिनार्घपात्रस्थं जलमभिमंत्र्य मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रास्मत्पितुर
मुकशर्मणोयं हस्तार्घस्ते स्वधा इति पवित्रोपरि मर्घजलं ददउत्सृजेत् ॥ ततः पवित्रसहितमर्घपात्रमासनवामवामभागेपि त्रे
स्थानमसीति मंत्रं कृत्वा ॥ तदुपरि कुशत्रयं दद्यात् ॥ ततो गंधादिनासंपूज्य मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रास्मत्पितरमु
कशर्मन् पाथेयश्राद्धे स्नानानि गंधपुष्पधूपदीपपूगीफलवासांसि ते स्वधेति गंधादिकमुत्सृजेत् ॥ ततः आसनसहितं त्रिको
णमण्डलं विधाय श्राद्धीयपात्राग्रभागं संघृतमधुतिलजलमादाय मोटकादींश्चादाय ॥ ॐ इदमन्नमेतद्भूस्वामिपितृभ्यो नम इ
त्युत्सृजेत् ॥ ततो व्यंजनमधुघृतजलतिलयुतमन्नमुपनीय मधुमिश्रार्घ ॥ पृथिवी ते पात्रमित्यादि पठित्वा ॥ अपहता असुरा इति तिलान
न्नोपरि क्षिपेत् ॥ इदमन्नमित्यन्ने ॥ इमा आप इति जले इदमाज्यमिति घृते ॥ इदं हविरिति पुनरन्ने ॥ मोटकादीन्यादाय ॥ ॐ अ
द्यामुकगोत्रायास्मत्पित्रे मुकशर्मणे इदमन्नं सजलं सोपकरणं ते स्वधेति उत्सृजेत् ॥ मधुवातेति त्र्यचं ॥ मधुमधुमधिति ॥ अ
न्नहीनमिति च पठेत् ॥ ततोन्नपात्रसमीपदक्षिणस्यां भूमौ कुशानास्तीर्य मोटकादीन्यादाय ॥ असंस्कृतप्रमीतानां त्यागिनां कु

रत्न २३७

लयोषितां॥ उच्छिष्टभागधेयानां दर्भेषु विकरासनं॥ सघृतमधुतिलजलपुष्पमन्नमोदकादिसहितमादाय॥ ॐ अग्निदग्धा
श्च ये जीवा ये प्यदग्धाः कुले मम॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥ इत्युत्सृजेत्॥ कुशान् परित्यज्य सव्येन हस्तौ पादौ
प्रक्षाल्याचम्य विष्णुं स्मरेत्॥ मधुवाता इति त्र्यचं पठेत्॥ गायत्रीं स्मरेत्॥ ततोपसव्येनान्नपात्रसमीपे पिण्डदानार्थं मृत्पिंड
कां विधाय तत्र दर्भपिंजुलीं गृहीत्वा॥ ॐ अपहता असुरा इति दक्षिणाग्रां रेखां कृत्वा उत्तरस्यां क्षिपेत्॥ ततो रेखोपरि यिह
पारीणीति मंत्रेणाङ्गारं भ्रामयित्वा दक्षिणस्यां क्षिपेत्॥ ततो वेदिकायां छिन्नमूलकुशानां स्तीर्य सव्येन देवताभ्य इति त्रिः प
ठेत्॥ अपसव्यं कृत्वा मोदकादीन्यादाय॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् पाथेय श्राद्धपिण्डस्थाने इदमासनं ते स्व
धेति कुशोपर्यासनं दद्यात्॥ ततो घृतमधुतिलयुक्तेनान्नेन पिण्डं निर्माय जलतिलमोदकसहितं पिण्डमादाय॥ ॐ अद्या
मुकगोत्रास्मत्पितरमुकशर्मन् पाथेय श्राद्धे एष पिण्डस्ते स्वधेति पिंडं दद्यात्॥ आस्तृतकुशमूले लेपभागभुजस्तृप्यन्त्विति प्रो
क्ष्य॥ सव्यं कृत्वाचम्य गंधपुष्पं गृहीत्वा॥ ॐ अत्र पितर इति मंत्रेणोत्तराभिमुखो भूत्वा अपसव्येन॥ ॐ अमीमदन्त इति मंत्रे
ण दक्षिणाभिमुखो भूत्वा पितरं भास्वरमूर्तिं चिन्तयेत्॥ ततो मोदकादीन्यादाय॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् पाथे
य श्राद्धे इदं प्रत्यवनेजनं ते स्वधेति प्रत्यवनेजनं पिण्डोपरि दद्यात्॥ ततो नीविविस्रस्य सव्यं कृत्वाचम्यापसव्यं कृत्वा गंधपुष्पादि
तं पिण्डसंस्थं मोदकादीन्यादाय॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् पाथेय श्राद्धपिण्डे एतानि सूत्रगंधपुष्पधूपदीपनै

राप २३७

CC-0. In Public Domain. Digitization by eGangotri

वेद्यानि तेस्वधेतिगंधादिकमुत्सृजेत् ॥ ततः शिवा आपः सन्त्विति जलं ॥ सौमनस्यमस्त्विति पुष्पं ॥ अक्षतं चारिष्टमस्त्विति तंडु
लान् ॥ अन्नपात्रोपरि क्षिपेत् ॥ सर्वं कृत्वा कर्मपात्रोदकं कुशैः प्रति मंत्रस्व शिरस्यभिषिंचेत् ॥ ॐ अस्मत्कुले इत्यादिभिः षिंचेत्
ततोपसव्येन मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः पाथेयश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्त्वि
त्यक्षयोदकं दत्वा सर्वं कृत्वा दक्षिणां दिशं पश्यन् अघोराः पितरः सन्तु इति पूर्वाग्रा जलधारां दद्यात् ॥ ततः सव्येनैव प्राङ्मुखो आ
शिषः प्रार्थयेत् ॐ गोत्रं नो वर्द्धतां ॥ ॐ दातारो नोभिवर्द्धन्तां ॥ वेदाः संततिरेव च ॥ श्रद्धा च नो माव्यगमत् ॥ बहुदेयं च नोस्तु
अन्नं च नो बहु भवेत ॥ अतिथींश्च लभेमहि ॥ याचितारश्च नः संतु ॥ मा याचिष्म कंचन ॥ एताः सत्या आशिषः सन्त्विति
ततः श्राद्धकर्त्ता तिलकं कुर्यात् ॥ अपसव्यं कृत्वा पिण्डोपरि सपवित्रकुशानास्तीर्य जलादिसहितं पुटकं वा महसे कृत्वा ॥ ॐ
उर्जं वहन्तीरिति पयोधारां पिण्डोपरि दद्यात् ॥ ततो नम्रीभूय पिण्डमाघ्रायोत्थापयेत् ॥ पिण्डाधारकुशानुल्मुकं च वह्नौ क्षिपे
त् ॥ सव्येन पिण्डिकायां शंखचक्रं च संलिख्य ॥ ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥ इति शंखचक्रपूजां विधाय ॥ अपसव्यं कृत्वा
तस्मीमेव पिण्डं पिण्डकोपरि निधाय ॥ ॐ वसन्ताय इत्यादिभिर्मन्त्रैः सव्येन पूजयेत् ॥ ततोपसव्येनार्घपात्रमुत्तानीकृत्य सव्येन द
क्षिणाद्रव्यं सकुशादिकमादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः कृतैतत्पाथेयश्राद्धः प्रतिष्ठार्थमिदं रजतं चन्द्र
दैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ॥ ततोपसव्येन ॥ ॐ वाजे वाजे इति पितॄन् वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न २३८

सर्जयेत् ॥ ततः सव्येन देवतातीर्थेन त्रिः पठेत् ॥ अपसव्येन दीपाच्छादनं विधाय सव्येन हस्तोपात्तपुष्पाक्षतावमननं ततः ॐ प्रमादात्कुर्वतां क
र्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति पठित्वा विष्णुं स्मरेत् ॥ श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपाद
येत् ॥ इति पार्वणश्राद्धं ॥ ॥ अथ मंगलार्थं विनायकं विपूजयेत् ॥ तत्र कर्ता भंगस्नानं कृत्वा वस्त्रशुद्धे वाससी परिधाय पूर्वाभिमु
खः कुशतिलजलान्यादाय ॐ अद्येत्यादि देशकालौ स्मृत्वा अमुकगोत्रस्य मम सपरिवारस्य सकलारिष्टोपशान्त्यर्थं समायुः ॥
क्षिद्ध्यर्थं च गणेशपूजनपूर्वकं स्वस्तिवाचनं करिष्ये ॥ इति संकल्प्य ॥ हेहेरंबेत्यादि गणेशं पूजयित्वा यथाशाखं स्वस्त्ययनं वा
चयित्वा आशिषो गृहीत्वा वैश्वदेवादिकं विधाय बंधुभिः सह भुंजीत ॥ इतऊर्ध्वं श्रीखंडधारणं ताम्बूलभक्षणं च कुर्यादिति ॥ इति
विनायकपूजा ॥ ॥ अथैकोद्दिष्टश्राद्धप्रयोगः ॥ एकं पवित्रमेकोर्घ एकः पिंडो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः ॥ स्व
दितमिति तृप्तप्रश्न ॥ सुस्वदितमिति तत्र रेखा उपतिष्ठतामित्यक्षय्यस्थाने अभिरम्यतामिति विसर्गः अभिरताः स्म इति तत्रत्र
तिसूत्रं ॥ स्मृतिश्च ॥ एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं ॥ आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥ इति ॥ ॥ अथ प्रयोगः 238
गोमयोपलिप्ते प्रागग्रदीपं प्रज्वाल्य सव्येनाचम्य अपसव्यं कृत्वा ॥ ताम्बूलादिकं विप्रहस्ते दत्वा दक्षिणाभिमुखो भूत्वा स्ववाम रत्न
हस्तेनोदकपूरस्य पित्र्यब्राह्मणस्य वामजानु स्पृष्ट्वा स्ववामजानु च पातयित्वा निमंत्रयेत् ॥ ॐ अद्येत्यादि अमुकगोत्रस्यास्मत्पितुर २३८
मुकशर्मणोद्य कर्तव्यसांवत्सरिकैकोद्दिष्टश्राद्धे नेन तांबूलगंधाक्षतपुष्पतुलसीदलेन त्वं मया निमंत्रितः ॥ ॐ निमंत्रितोस्मीति

CC-0. In Public Domain. Digitization by eGangotri

प्रतिवचनं ॥ ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ॥ भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥ सर्वयासविनिर्मुक्तैः कामक्रो
धविवर्जितैः ॥ भवितव्यं भवद्भिर्नो यतनेन श्राद्धकर्मणि ॥ ॐ भवितव्यमिति प्रतिवचनं ॥ ततोपसव्येनैव ब्राह्मणचरणौ प्रक्षालये
त् ॥ ॐ नमोस्त्वनन्तायेत्यादि ॥ ॐ यत्फलं कपिलेत्यादि ॥ इति श्लोकाभ्यां विप्रपादौ प्रक्षाल्य ॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्न
द्य कर्त्तव्यसांवत्सरिकैकोद्दिष्टश्राद्धे एकपादार्घस्ते धौतिदर्भत्यागः ॥ ततः सव्येनाचम्य गृहं प्रवेशयेत् ॥ अपसव्येन ॥ ॐ आगता
यूयं ॥ ॐ सुखायतता वयं ॥ ॐ इदमासनमास्यतां ॥ ॐ आस्व प्रतिवचनं ॥ ब्राह्मणमुदङ्मुखमुपवेशयेत् ॥ ततोपसव्येनैव ॥ ॐ क
र्मपात्रमहं करिष्ये ॥ ॐ कुरुष्वेत्यनुज्ञातः सन् ॥ ॐ यद्देवादेवहेडनमिति कण्डिकात्रयेण पवित्रं गंधादिकं स्वस्वमंत्रेणाक्षिप्त्वा कर्म
पात्रं कर्त्तव्यं ॥ सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय ॥ ॐ अपवित्रः पवित्रो वेति पठित्वा ॐ पुण्डरीकाक्षं पुनात्विति मन्त्रेण श्रा
द्धदेशं द्रव्याण्यात्मानं च प्रसिंचेत् ॥ तत्कुशादिकमादाय ॥ ॐ अद्येत्यादि अमुकगोत्रस्यास्मत्पितुरमुकशर्मणो द्य कर्त्तव्यसांवत्सरिकैको
द्दिष्टश्राद्धे ममेभिर्द्रव्यैरहं करिष्ये इति प्रतिज्ञां कुर्यात् ॥ सव्येनैव देवताभ्य इति त्रिः पठित्वा ॐ सप्तव्याधादे० ॥ ॐ श्राद्धारम्भे गयामिति
च पठित्वा ॥ अपसव्येन दिग्बंधनं कुर्यात् ॥ तिलसहितमोदकमादाय तिलान्पूर्वादिक्रमेण वक्ष्यमाणमंत्रैर्विकिरेत् ॥ ॐ अग्निष्वात्ता
ः पितृगणाः प्राचीं रक्षन्तु मे दिशं ॥ अपहता असुरा रक्षाꣳसि वेदिषदः पान्तु याम्यां मे पितरः स्थिताः ॥ ॐ अपहता असुरा रक्षाꣳसि
वेदिषदः ॥ ॐ उदीचीमपि सोमपाः ॥ ॐ अपहता असुरा रक्षाꣳसि वेदिषदः ॥ ततो नीवीबंधः ॥ ॐ रक्षोभूतपिशाचेभ्यस्तथैवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रम्न
२३९

दुरदोषतः ॥ सर्वतश्चाधिपस्तेषां यमोरक्षां करोतु मे ॥ प्रयांतु दूरत इति कुशांस्तिलांश्च क्षिपेत् ॥ इति दिग्बंधनं कृत्वा ततः सव्येन
विष्णुस्मरणं ॥ अथासनं ॥ अपसव्येन मोटकमादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मण इदं मोटकरूपमासनं ते स्वधा इ
ति ब्राह्मणाय मोटकरूपमासनं दद्यात् ॥ ॐ हस्तार्घपात्रमहं करिष्ये ॐ कुरुष्वेत्यनुज्ञातः सन् ॥ मोटकमेकमग्रे कृत्वा ॥ ततः प
वित्रेस्थ इति मंत्रेण दूर्वाग्रं पवित्रं धारयेत् ॥ ॐ शन्नो देवीरिति जलं ॐ तिलोसीति तिलान् ॥ ॐ श्रीश्च त इति पुष्पाणि ॥ ॐ गंधद्वा
रामिति गंधं क्षिपेत् ॥ ॐ हस्तार्घपात्रं संपन्नमिति ब्राह्मणं पृच्छेत् ॥ ॐ सुसंपन्नमिति तेनोक्ते ॥ ॐ हस्तार्घपात्रमुत्थापयामि ॥
ॐ उत्थापयस्वेत्यनुज्ञातो हस्तार्घपात्रं वामहस्ते कृत्वा ॥ ॐ नमो नारायणायेति मंत्रेण पुष्पसहितं पवित्रमुत्तराग्रं विप्रकरे धृ
त्वा वामहस्तस्थहस्तार्घपात्रमुखं दक्षिणकरेणापिधाय ॥ ॐ या दिव्या इति मंत्रेणार्घपात्रस्थजलमभिमंत्र्य जलतिलमोटकमा
दाय ॐ अद्यामुकगोत्रस्मत्पितुरमुकशर्मन्नग्र कर्त्तव्यसांवत्सरिकैकोद्दिष्टश्राद्धे एष हस्तार्घस्ते स्वधेति ब्राह्मणकरे र्घं दद्यात् ॥ अ
र्घपुनः प्रत्यर्घमस्तु ॥ तदर्घपात्रं भूमौ धृत्वा सव्यं कृत्वा तत्र सजलेन ॐ तच्चक्षुरित्यादिना चक्षुः स्पर्शः कर्त्तव्यः ॥ ततो पसव्येना पा 239
त्रं गृहीत्वा ब्राह्मणस्य वामपार्श्वे ॐ पित्रे स्थानमसीति न्युब्जं कुर्यात् ॥ तत उपरि कुशत्रयं दद्यात् ॥ ॐ तत अर्चयिष्ये इति ब्राह्मणा रम्न
पृच्छेत् ॥ ॐ अर्चयेत्युक्ते जलपुष्पाक्षततांबूलयज्ञोपवीतवस्त्रादिभिः समभ्यर्च्य धूपदीपौ च कारयेत् ॥ मोटकादिकमादाय ॥ २३९
ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्नेतान्यर्चनानि अत्र गंधपुष्पाक्षतधूपदीपतांबूलयज्ञोपवीतवासांसि ते स्वधा ॥ अर्चनवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धेः सर्वपरिपूर्णमस्तु ॥ इति विप्रकरे जलं दद्यात् ॥ ॐ अस्त्विति प्रतिवचनं ततो वामावर्त्तेन वस्त्रक्षोणां मण्डलं विधाय सव्येना
वमनं कुर्यात् ॥ ततोपसव्येन तिलयवमधुजलयुतमन्नं मोदकादिसहितमादाय दक्षिणाभिमुखो भूत्वा ॥ ॐ इदमन्नं सजलमे
तन्नस्वामि पितृभ्यो नम इत्युत्सृजेत् ॥ अथान्नसंकल्प ॥ सोपस्करं तिलजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व
स्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य ॥ ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ ॐ इदं विष्णुर्वि
च० इति पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा ॐ इदमन्नमित्यन्ने ॥ ॐ इमा आप इति जले ॐ इदमाज्यमिति घृते ॥ ॐ इदं हविरि
ति उपरन्ने ॥ ॐ यतान्युपकरणानि ॥ इति क्रमेणान्नजलादिषु विप्रदक्षिणाङ्गुष्ठं निवेश्य ॐ अपहता असुरा रक्षांसि वेदिषद इ
ति पठित्वा तिलानन्नोपरि विकीर्य मोदकादिन्यादाय वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेणान्नमपश्चात्स्पृष्ट्वा ॥ ॥ ॐ अद्यामुकगोत्रा
यास्मत्पित्रे अमुकशर्मणे इदमन्नं सजलं सोपकरं परिविष्टं परिवेष्यमाणमस्यय तृप्तिहेतोऽस्तु स्वधा इति भूमावेव मोदकादिक
मुत्सृजेत् ॥ ॐ अन्नसंकल्पसिद्धिरस्तु ॥ इति विप्रकरे जलं दद्यात् ॥ ब्राह्मणाकरे भवान्प्राशयेत्तु इत्ययोआसनं दत्वा यथासुखं
प्राशयन्तु इति ब्राह्मणं ब्रूयात् ॥ ब्राह्मणाश्च नामेन याणिनान्नपात्रमत्यजन्तु भुञ्जीयात् ॥ संज्ञयानेन भक्ष्यप्रार्थनं कर्त्तव्यं ॥ ततः
श्राद्धकर्त्ता कुशोपरि विशंतु सव्येन मधुवाता इति त्र्यृचं पठित्वा ॥ ॥ ॐ मधु३ ॐ अन्नहीनं क्रियाहीनं मिति पठेत् ॥ पितृसूक्तं
च पठेत् ॥ तद्यथा ॥ ॐ अग्नये कव्यवाहनाय धन देवाः ३ कृण्यष्टयाजः ॥ मुरावतं बर्हिषदं ४५ ॥ आशुः शिशानः १७ सहस्वशी

रत्न
२४०

र्वा १६ नमस्तेसमस्ता ६६॥ ब्राह्मणास्यपत्रयत्रेकोयलब्धतेनतत्रस्रयच्छन्नदं मन्देभोजयेत्॥ ततोन्नपात्रसन्निधौगत्वाआस्तृतदक्षिणा
ग्रकुशत्रयायाभूमौविकरासनेअपसव्येनमोदकादिकमादायअसंस्कृतप्रमीतानां त्यागिनां कुलयोषितां॥ उच्छिष्टभागधेयानां
दर्भेषुविकरालनं॥ ॥इतिमंत्रेणामोदकरूपमासनंमास्तृतकुशोपरिउत्सृजेत्॥ समधुघृततिलमन्नमादायजलेनाप्लाव्यमो
दकादिकवादायदग्धाश्चयेजीवाइतिमंत्रेणास्तृतकुशोपरिविकिरेत्॥ अत्रॐकाररहितःकार्य॥ ॥ततःसव्येनकुशान्परित्य
ज्यहस्तौपादौप्रक्षाल्यद्विराचम्यगायत्रीं जपेत्॥ मधुवाताइतित्र्याइतितत्वांपाठः॥ ततोब्राह्मणान्प्रज्ञात्वा॥ अपसव्येन॥ ॐज
लगन्धपुष्पमिदंतेइतिब्राह्मणायप्रत्यपोशानंदद्यात्॥ ततोजलिम्बध्वाब्राह्मणांपृच्छेत्॥ ॐस्वदितमिति॥ ॐसुस्वदितमि
तिप्रतिवचनं॥ ॥अथपिण्डदानं॥ ॐपिण्डदानमहंकरिष्यइतिपृच्छेत्॥ ॐकुरुष्वेतिप्रतिवचनं॥ ततःपिण्डदा
नार्थंहस्तमितंवज्रशलोष्ठितांसैकतादिकं दक्षिणाप्लवांपिण्डिकांनिर्मायतदुपरियेरूपाणीत्यंगारंभ्रामयित्वादक्षि
णस्यांक्षिपेत्॥ ततःपिण्डिकामध्येवामेनपाणिनांदर्भीपंजलींगृहीत्वादक्षिणहस्तेकृत्वात्वासव्योपगृहीतदक्षिणायानि
नां॥ ॐअपहताइतिमंत्रेणादक्षिणाग्रांरेखांकृत्वादर्भपिंजलीमुत्तरस्यांक्षिपेत्॥ ततोजलेनॐशन्नोदेवीरिति मंत्रेणापि
ण्डिकास्त्रेचनं॥ तदनुछिन्नमूलकुशान्पिण्डिकायांदद्यात्॥ ततःसव्येनॐदेवताभ्यइतित्रिःपठेत्॥ अपसव्यंविधायस्रक
पुटकंवामहस्ते कृत्वामोदकमादाय॥ ॐअद्यामुकगोत्रास्मत्पितरमुकशर्मन्निदंपिण्डस्थानेऽत्रावनेनिक्ष्वस्वधा॥ इतिछिन्न

राम
२४०
240

७६१

मूलकुशोपरिअवनेजनंदद्यात् ॥ मोटकादीनिपिण्डंचादायवामहस्तेपुटकादिस्थजलमादाय ॐ अद्यामुकगोत्रास्मित्पितरमुक
शर्मन्नेषपिण्डोमृतस्वरूपोक्षयतृप्तिहेतोस्तेस्वधाइत्यवनेजनोपरिपिण्डंदद्यात् ॥ अत्रलेपभागनिषेधः ॥ करप्रोक्ष्यकुशा
न्परित्यसव्येनद्विरावस्यहरिंस्मरेत् ॥ ततः सव्येनैवगंधपुष्पादीन्यायपितरमुद्दिश्य ॥ ॐ अत्रपितरइत्यनेनउत्तराभिमुखोभूत्वाप
ठेत्श्वासंनियम्याभास्वरमूर्तिंपितरंध्यायन्नयसव्यंकृत्वादक्षिणावर्त्तेनदक्षिणाभिमुखोभूत्वा ॐ अमीमदन्तइतिमंत्रेणगंधपुष्पा
दीनिक्षिपेत् ॥ ततोवनेजनपात्रंवामहस्तेकृत्वामोटकादिकमादाय ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्निदंपिण्डप्रत्यवने
जनंतेस्वधेतिपिण्डप्रत्यवनेजनंदद्यात् ॥ ततोनीवीविस्रस्यसव्यंकृत्वाहरिंस्मरेत् ॥ अपसव्यंकृत्वावामेनपाणिनाधृतंसूत्रंदक्षि
णेनादाय ॐ नमोवइत्यादिमंत्रंपठित्वापिण्डोपरिसूत्रंदद्यात् ॥ ततः पिण्डंगंधादिभिःसंपूज्यधूपदीपौचकारयेत् ॥ मोटका
दिकमादाय ॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्नेतानिपिण्डार्चनान्यन्नव्यसूत्रगंधपुष्पाक्षतधूपदीपैक्षवादिनैवेद्या
निनेस्वधाइतिगंधादिकमुत्सृजेत् ॥ ततोविप्रकरे - ॐ शिवा आपः सन्त्वितिजलं ॐ सौमनस्यमस्त्वितिपुष्पं ॥ ॐ अक्षतंचारिष्टं
मस्त्वितितण्डुलान्दद्यात् ॥ ततः सव्येनपूर्वाभिमुखोभूत्वावक्ष्यमाणामंत्रान्पठेत् ॥ ॐ अयांमद्योक्षिस्थित्वादेवा॰ ममः ॥ ततः
कर्मपात्रोदकंकुशैर्गृहीत्वाप्रतिमंत्रंशिरस्यभिषिंचेत् ॥ ॐ अस्मत्कुलेदीर्घमायुरस्तु ॥ ॐ यद्यच्छ्रेयस्तदस्तु ॥ ॐ यत्पापंप्रतिहतम
स्तु इतिभूमौद्विपदचतुष्पदेभ्यः शान्तिर्भवतु ॥ ततोपसव्येनपिण्डशेषान्नंपिण्डसमीपेविकिरेत् ॥ वामहस्तेपुटकादिस्थज

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२४१

लंकृत्वा मोदकादिकमादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणो श्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामिति पिण्डं अभ्
यर्चादिकं दद्यात् ॥ ततः सव्येन कृतांजलिर्दक्षिणां दिशमवलोकयन् ॥ ॐ अघोरः पितास्त्विति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात्
ततः कृतसव्येनैव प्राङ्मुखो भूत्वा अञ्जलिं बध्वाशिषः प्रार्थयेत् ॥ ॐ गोत्रं नो वर्द्धतामिति ॥ ॐ वर्द्धतामिति प्रतिवचनं ॥ ॐ दातारो
नोभिवर्द्धन्तां ॥ ॐ वर्द्धतामिति वचनं ॥ ॐ वेदाः संततिरेव च ॥ ॐ सन्त्विति प्रतिवचनं ॥ ॐ श्रद्धा च नो मा व्यगमत् ॥ ॐ मा तदिति
प्र० ॥ ॐ बहुदेयं च नोस्तु ॥ ॐ अस्तु ॥ ॐ अन्नं च नो बहु भवेत् ॥ ॐ भवतु ॥ ॐ अतिथींश्च लभेमहि ॥ ॐ लभध्वं ॥ ॐ याचितारश्च नः
सन्तु ॥ ॐ सन्तु ॥ ॐ मा च याचिष्म कंचन ॥ ॐ मा याचेथा इति प्रतिवचनं ॥ ॐ एताः सत्या आशिषः सन्तु ॥ ततः श्राद्धकर्त्ता ब्राह्मणहस्तेन
तिलकं कुर्यात् ॥ ॐ यं काम कामयते सोस्मै कामः समृध्यतामिति मंत्रेण ततोपसव्येन रिक्तांजलिना ॥ ॐ स्वधां वाचयिष्य इति पृ
च्छेत् ॥ ॐ वाच्यतामिति प्रतिवचन ॥ सपवित्रान् कुशान् सह्रयाम्रान् समादाय पिण्डोपरि निक्षिपेदनेन ॥ ॐ अद्यामुकगोत्रा
यास्मत्पित्रेमुकशर्मणे स्वधोच्यतां ॥ ॐ अस्तु स्वधा इति प्रतिवचनं ॥ ततः पयसा दधिसहितं पूर्णकं वामहस्ते कृत्वा ॥ ॐ ऊर्जं
वहन्तीरिति मंत्रं पठित्वा सपवित्रकुशोपरि दक्षिणाग्रायां पयोधारां दद्यात् ॥ ततः पिण्डाः सम्पन्ना इति द्विजं पृच्छेत् ॥ ततः सुसं
पन्नमिति प्र० ॥ ॐ पिण्डानुत्थापयामि ॥ ॐ उत्थापयस्व इत्यनुज्ञातः सव्यतो भूय पिण्डमाघ्रायोत्थापयेत् ॥ पिण्डाधारकुशा
नुल्मुकं च वह्नौ क्षिपेत् ॥ सव्येन पिण्डिकायां शंखं चक्रं लिखेत् ॥ ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥ इति शंखयवैवक्रः पू

241
रत्न
२४१

८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जां विधाय अपसव्यं कृत्वा ॥ ॐ गयायां पितृरूपेण इति मंत्रेण पिण्डं पितृकोपरि निधाय पूजयेदेभिर्मंत्रैः सव्येन ॥ ॐ वसंताय न
मस्तुभ्यं ० नमो नम इति ॥ ततोऽपसव्येनार्घपात्रमुत्तानीकृत्य सव्येन दक्षिणां दद्यात् ॥ कुशतिलजलदक्षिणाद्रव्याण्यादाय ॥ ॐ
अद्येत्यादि अमुकगोत्रस्यास्मत्पितुरमुकशर्मणः कृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्धपिण्डदानप्रतिष्ठासिद्ध्यर्थं दक्षिणां रजतं वन्द्र
देवतं तन्मूल्योपकल्पितं द्रव्यममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति विप्रकरे उत्सृजेत् ॥ पुनर्मोटकादि
कमादाय ॥ ॐ अद्येत्यादि ॥ अमुकगोत्रस्यास्मत्पितुरमुकशर्मणः कृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्धन्यूनातिरिक्तपरिपूर्णार्थं य
देयमन्नपानादिकं द्रव्यं यथानामदैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजेत् ॥ ततोपसव्येन
अभिरम्यतामिति विसर्जयेत् ॥ अभिरताः स्म इति प्रतिवचनं ॥ ततो ब्राह्मणाद्दक्षिणां गृहीत्वोत्थाप्य ॥ ॐ आमावाजस्येति
मंत्रेणाविर्वारिधारयावेष्टनं ॥ सव्येन देवताभ्य इति त्रिः पठेत् ॥ अपसव्येन दीयाच्छादनं विधाय सव्येन हस्तौ पादौ प्रक्षाल्याच
म्य इति पठेत् ॥ ॐ यत्कृतं तन्मु कृतमस्तु ॥ यन्नकृतं तद्विष्णोः प्रसादाद्ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु अस्तु परिपूर्णमिति स
र्वे ब्रूयुः ॥ ॐ प्रमादात्कुर्वतां कर्म १ आयुः प्रजां २ यस्य स्मृत्वा च इति पठित्वा कायेन वाचेत्यादिना श्राद्धकर्म नारायणाय समर्प
येत् ॥ ॥ इति सांवत्सरिकैकोद्दिष्टश्राद्धविधिः ॥ ॥ अथ मासिकश्राद्धपद्धतिर्लिख्यते ॥ तत्र गोमयोपलिप्तभूमौ दीपं प्र
ज्वाल्य कर्णाभिविराचम्य ब्राह्मणाय नम इति ब्राह्मणं संपूज्य प्राङ्मुख उपविश्य अपसव्येन यद्देवादेव हेडनमित्यादिमंत्रेण कर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२४२

पात्रं कृत्वा कुशतिलगंधादीनि – – मन्त्रैक्षिपेत् ॥ सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय ॥ ॐ अपवित्रः पवित्र इत्यादिना
श्राद्धदेशे ऽन्यानात्मानं च प्रोक्षयेत् ॥ ततः कुशादिना संकल्पः ॥ ॐ अद्येत्याद्युक्त्वा ॥ अद्य प्रथममासिकादिमासान्तोदकुंभोपस्थिति
श्च गताश्वमेधयज्ञजन्यफलप्राप्तिकामोऽमुकगोत्रस्यास्मत्पितुरमुकशर्मणः सान्नोदकुंभोत्सर्गपूर्वकान्नसंकल्पादि रुपमासि
कश्राद्धमेभिर्द्रव्यैरहं करिष्ये इति ॥ ततो देवताभ्य इति त्रिः पठेत् ॥ अपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा सान्नोदकुंभमग्रतः
कृत्वा कुशादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः प्रथममासिकश्राद्धे इदमासनं ते तुभ्यं स्वधेति कुंभासन
समीपे उत्सृजेत् ॥ ततो गंधपुष्पाक्षतधूपदीपनैवेद्यवस्त्रादिभिः कुंभं संपूज्य ब्राह्मणं गंधादिभिः संपूज्य मोदकादिकमादा
य ॥ ॐ अद्यामुकगोत्रास्मत्पितुरमुकशर्मन्नेतानि गंधपुष्पाक्षतधूपदीपनैवेद्यवासांसि तुभ्यं स्वधेति कुंभसमीपे उत्सृजेत्
अथ सान्नोदकुंभोत्सर्गः ॥ मोदकादिकमादाय ॥ ॐ अद्यामुकगोत्रायामुकशर्मणे अमुकमासिकश्राद्धे एष सान्नोदकुंभस्ते स्वधे
ति सान्नोदकुंभस्ते स्वधेति सान्नोदकुंभमुत्सृजेत् ॥ अथ भूस्वाम्यन्नं ॥ मधुनाभिघार्य मोदकादिकमादाय ॐ इदमन्नं सजलमेतद्भू
स्वामिपितृभ्यो नम इति ॥ ॥ अथान्नसंकल्पः ॥ सोपस्करतिलजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां उत्तानाभ्यां
हस्ताभ्यामन्नमालभ्य ॐ पृथिवी ते पात्रं जुहोमि स्वाहा ॥ इदं विष्णुरित्यादि सुरेत्यादि पठित्वा ॥ ॐ इदमन्नं ॥ इदमा आपः ॥ इदमा
ज्यं ॥ इदं हविः ॥ अपहता असुरा रक्षांसि वेदिषद इति तिलान्विकीर्य मोदकादिकमादाय ॥ ॐ अद्यामुकगोत्रास्मत्पितुरमुकश

242

रत्न
२४२

र्मणोऽमुकमासिकश्राद्धे इदं मन्नं सजलं सोपस्करं परिवेष्टं परिवेष्यमाणं निषिद्धवर्जितमक्षय्यं तत्प्रि हे तोस्तु स्वधेति उत्सृजेत्
ततो मधुवाता इत्यादि पठेत् ॥ ततो मध्विति त्रिः पठित्वा ॥ ॐ अन्नहीनं क्रियाहीनं मिति च पठेत् ॥ ॐ शिवा आपः सन्तु ॥ सौमनस्य
मस्तु ॥ अक्षतं चारिष्टं ॥ इति जलपुष्पतण्डुलान् ब्राह्मणकरे दत्वा सव्यं कृत्वा ॥ ॐ अयां मध्येस्थिता इत्यादि मन्त्रेन पठित्वा त
तः ॥ ॐ अस्मत्कुले दीर्घमायुरस्तु ॥ शान्तिरस्तु ॥ पुष्टिरस्तु ॥ वृद्धिरस्तु ॥ यत्श्रेयस्तदस्तु ॥ यत्पापं तत्प्रतिहतमस्तु ॥ इति भू
मौ ॥ द्विपदे चतुष्पदे सुखशान्तिर्भवतु ॥ ॥ इति कर्मपात्रोदकेनाभिषेकः ॥ ततो दक्षिणादानं ॥ सव्येन कुशादिकमादा
य अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणोऽमुकमासिकश्राद्धे कृतैतन्नसाङ्गोदकं भोत्सर्गाच्च संकल्पादि रूपमासिकश्राद्ध
प्रतिष्ठासाङ्गतासिद्ध्यर्थं मिमां दक्षिणां यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इत्युत्सृजेत् ॥ यत्कृ
तेनन्युत्कृतमस्तु ॥ यत्नकृतं तत् द्विजौः प्रसादाद्ब्राह्मणानां वचनात्सर्वं परिपूर्णमस्तु ॥ ॐ प्रसादात् कुर्वतां ॥ आयुः प्रज्ञा धनं वि
द्यास्मरणं ॥ गयाश्राद्धफलमस्तु ॥ ततो येकामकामयत इत्यादि ब्राह्मणहस्तेनाशीर्वादः ॥ ॥ इति मासिकश्राद्धपद्धतिः ॥
अथ सहगमनप्रयोगः ॥ अन्वारोहणं द्विविधं सहगमनमनुगमनं च ॥ तत्र सहगमनं सर्वासामपि धर्मः ॥ अनुगमनं तु ब्रा
ह्मणीव्यतिरिक्तं ॥ ॥ तथा च स्मृतिः ॥ मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् ॥ अन्यासामेव नारीणां धर्मोयं परमः स्मृ
तः ॥ तथा ॥ या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् ॥ सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत् ॥ कुशतिलजलान्यादा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य॥ अद्येत्यादि शुभपुण्यतिथौ मम भर्तुश्चैतज्जन्मजन्मांतरपरंपरार्जितसर्वपापक्षयपूर्वकलक्ष्मीनारायणप्रीत्यै पुराणोक्ता
नेकफलप्राप्तये वान्यारोहणं करिष्ये तदंगतया विहितं हरिद्राकुंकुमांजनादिसौभाग्यद्रव्ययुतवंशपात्रदानं वाहं करिष्ये इति सं
कल्प॥ ॥सोपस्कराणि सूर्पाणि वायनैः संदद्यात्॥ ॥ तत्र मंत्र॥ लक्ष्मीनारायणो देवो बलसत्त्वगुणाश्रया॥ गाढं सत्त्वं च मे
याचायनैः परितोषितः॥ सोपस्कराणि सूर्पाणि सूर्पाणि वायनैः संयुतानि च॥ लक्ष्मीनारायणप्रीत्यै सत्त्वकामो ददाम्यहं॥ अ
नेन सोपस्करसूर्पदानेन लक्ष्मीनारायणः प्रीयतां॥ ततो गृहं प्रदक्षिणी॥ दधिदूर्वादिजलयुतशंखार्घ्यमादाय सूर्यायार्घ्यं दद्या
त्॥ एतत्सूर्यसहस्रांशो तेजोराशे जगत्पते॥ अनुकंपय मां भक्त्या गृहाणार्घ्यं दिवाकर॥ इति ततो जलाशयसमीपे गत्वा वेदि
कायां पंचकदलीस्तंभानारोपयित्वा सूत्रैः समंताद्वेष्टयित्वा वेदिमध्ये शिलां स्थापयेत्॥ तत्र गौर्याद्याः पूजयेत्॥ ॥ अथ गौ
र्यादिपूजा॥ ॥ तांश्च यथा॥ कुमुदा माधवी गौरी नंदा भद्रा जया सिता॥ उमा रतिः सती तद्वदुत्पला गिरिजा तथा॥ अपर्णा च ततो देवी
पार्वती च ततः परं॥ एतानि पाद्यार्घ्याचमनीयपुनराचमनीयानि कुमुदादिपंचदशमातृभ्यो नमः॥ इदमनुलेपनं पुष्पाक्षतधू
पदीपैक्षवादिनैवेद्यादि कुमुदायै नमः॥ १ ॥ माधवायै नमः॥ २ ॥ गौर्यै० ३ नंदायै० ४ भद्रायै० ५ जयायै० ६ सितायै० ७ उ
मायै ८ रत्यै ९ सत्यै १० उत्पलायै ११ गिरिजायै १२ अपर्णायै १३ देव्यै १४ पार्वत्यै १५ एतानि कुमुदादिमातृभ्यो नमः॥ इति
गौर्यादिपीठिकायां॥ अस्मत्पुंजे वा प्रत्येकं पूजयेत् इदं सिन्दूरं कुमुदादिपंचदशमातृभ्यो नमः इत्यादि॥ ततः प्रदक्षिणीकृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपठनमंत्रमुदीरयेत् ॥ उमालक्ष्मीस्तथागौरी स्वधास्वाहासरस्वती ॥ गायत्री मंगला गंगा अपर्णा वांबिका तथा ॥ इतिपठित्वा ॥ गौ
र्यै देव्यै नमोस्तुभ्यं कमलायै नमः ॥ पार्वत्यैव नमस्तुभ्यं सर्वकामफलप्रदे ॥ इति देवी नमस्कारः कर्त्तव्यः ॥ अग्नेः समीपमागम्य पंचर
त्नानि यत्नवेनीराजनं तथा वध्वाश्चरवेशुक्ताफलं न्यसेत् ॥ ततोग्निप्रार्थनं कृत्वा मंत्रेणानेन निश्चितं ॥ स्वाहा मंत्र्येषनिविर्णाः सर्वगो
हुताशन ॥ सत्वमार्गप्रदानेन नयमां भर्तुरंतिकं ॥ इत्यग्निंप्रार्थ्य आज्येन जुहुयात् ॥ अग्नये तेजोधिपतये स्वाहा ॥ १ ॥ विष्णवे स
त्वाधिपतये स्वाहा ॥ २ ॥ कालाय धर्माधिपतये स्वाहा ॥ ३ ॥ पृथिव्यै लोकाधिष्ठात्र्यै स्वाहा ॥ ४ ॥ अद्भ्यो रसाधिष्ठात्रीभ्यः स्वाहा ५
वायवे बलाधिपतये स्वाहा ॥ ६ ॥ आकाशाय सर्वाधिपतये स्वाहा ॥ ७ ॥ कालाय धर्माधिष्ठात्रे स्वाहा ॥ ८ ॥ अग्न्यः सर्वसाक्षिभ्यः
स्वाहा ॥ ९ ॥ ब्रह्मणे देवाधिपतये स्वाहा ॥ १० ॥ रुद्राय श्मशानाधिपतये स्वाहा ॥ ११ ॥ एकादशाहुतीर्हुत्वा कुर्याद्ग्नेः प्रदक्षि
णां ॥ ततः शिलां सोपस्करां संपूज्य तां मातृह्यफलपुष्पांजलिं गृहीत्वा अग्निं प्रार्थयेत् ॥ त्वमग्ने सर्वभूतानां मे नत्थरसि साक्षिवत्
त्वमेव देव जानीषे न विदुर्यानि मानुषा ॥ अनुगच्छामि भर्त्तारं त्वेध व्यभयपीडिता ॥ सत्वमार्गप्रदानेन नय मां भर्तुरंतिके ॥ मंत्र
मुच्चार्य सनकैः प्रविशेद्हुताशनं ॥ इति सहगमनप्रयोगः ॥ अथ मातापित्रोर्मरणे प्रथमाब्दे विहितनिषिद्धानि ॥ ॥ तत्र
देवल ॥ प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ॥ न देवं नापि पित्र्यं वा यावत्पूर्णो न वत्सरः ॥ तथा ॥ महागुरुनिपाते तु प्रेत
कार्यं यथाविधि ॥ कुर्यात्संवत्सरादर्वाग् एकोद्दिष्टं न पार्वणं ॥ अन्यदीयमित्यर्थः स्नानं चैव महादानं स्वाध्यायं वाग्नितर्पणं ॥ प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्रत
२७४

थमेऽब्दे न कुर्याच्च महागुरुनिपातने ।तथा ॥सर्वेषां प्रेतकार्याणी महागुरुनिपातने ॥कुर्यात्तं वत्सरादर्वाक् श्राद्धमेकं तु वर्जये
त् ॥भरतः ॥माता चैव तथा भ्राता पत्नी चैव विधीयते ॥तत्र श्राद्धानि कुर्वीत न कुर्याज्जनके मृते ॥स्मृतिमञ्जूषायां ॥पितुरब्दम
शौचं स्यान्यरा मासान्मातुरेव च ॥मासत्रयं तु भार्याया अर्द्धमात् पुत्रयोः ॥महातीर्थस्य गमनं उपवासव्रतानि च ॥संवत्स
रं न कुर्वीत महागुरुनिपातने ॥एतत्सर्वं वर्षपर्य्यन्तमकृते सपिंडने ज्ञेयमिति केचित् ॥अन्यच्च ॥ अस्थिक्षेपं गयाश्राद्धं श्रा
द्धं चामरपक्षकं ॥प्रथमेऽब्दे न कुर्वीत कृते पितुः सपिण्डने ॥अस्यापवाद ॥अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षकं ॥प्रथमेऽब्दे
पि कुर्वीत यदि स्याद्भक्तिमान्सुत इति ॥भक्तिमान् भक्तयात्र श्राद्धं देवतान्तपयोग्यतः ॥संवादकं श्राद्धतन्त्रान् ॥तत्कृत्वाप्यतानि
कुर्यादित्यर्थ इति केचित् ॥केचित्तु यतान्तमेव व्यवस्यते ॥इत्यधिकारिणीरूपणपूर्वकं सूपयुक्तं कथनं ॥ ॥अथ पाला
शपुत्तलिका दाह विधिः ॥तत्र देशान्तरमरणे पराकद्वयमष्टौ कृच्छ्रान्वास्थीनि दहेत् ॥यद्यस्थीनि वाराणालभ्यादिभिः स्पृष्टानि स्यु
स्तदा पंचगव्यगंगोदकाभ्यां प्रक्षाल्य विधिना दहेत् ॥अथ यस्यास्थान्यपि न लभ्यन्ते तस्य पर्णशरदाहः ॥सर्वैवं कुविभूमौ कृष्ण
मृगचर्मास्तीर्य तदुपर्यर्कं शरं दक्षिणाग्रं नराकृतिं निवेश्य शरखराड युगलेन भुजयुगलं ॥तावद्दानं घ्राद्वयं कृत्वा तदुपरि
पलाशपत्राणि न्यसेत् ॥शिरसि चत्वारिंशत् ४० ग्रीवायां दश १० बाह्वोः प्रत्येकं पंचाशत् ५० करांगुलीषु सर्वासु दश ॥१०
उरसि विंशतिः २० जठरे त्रिंशत् ३० शिश्ने चत्वारि ४ अण्डयोः त्रयं त्रयं ३ ऊर्वोः प्रत्येकं पंचाशत् ५० जंघातः पादतलौ

244
व्रत
२७४

CC-0. In Public Domain. Digitization by eGangotri

पाचनादयोः प्रत्येकं पंचदश १५ सर्वासु पादांगुलीषु दश १० एवं षष्ट्यधिकशतत्रयं ३६० मितैः पालाशपर्णैः शरीरं निर्माय पु-
त्तलसूत्रेण शरेण सह बध्वा जललोडितयवपिष्टेन तल्लिंपेत् ॥ ततः शक्तौ सत्यां वक्ष्यमाणान्यपि कार्याणि ॥ मूर्द्धस्थाने कदलीफ-
लं ॥ शिरशि नारिकेलफलं वर्तुलं नेत्रे वा ललाटे कदलीफलं ॥ दंतेषु दाडिमबीजानि ॥ कर्णयोर्ब्रह्मपत्राणि ॥ पक्षे कर्णके कर्ण-
नेत्रयोः कपर्द्दिकौ ॥ नासिकायां तिलपुष्पं ॥ नाभौ आम्रफलं ॥ स्तनयोर्जंबीरफलद्वयं ॥ वाते मनःशिला ॥ पित्ते हरितालकं
कफे समुद्रफेनं ॥ रुधिरे मधु ॥ पुरीषे गोमयं ॥ मूत्रे गोमूत्रं ॥ रेतसि पारदं ॥ वृषणयोर्वृन्ताकद्वयं ॥ शिश्ने गृंजनं ॥ केशेषु वन
शूकरश्मश्रवः ॥ लोमसु रालादियान् ॥ मांसस्थाने यवपिष्टेन वा माषपिष्टेन लिंपेत् ॥ ततः पंचगव्यमंत्रैः पंचगव्येनाभ्युक्षयेत् ॥ पं-
चामृतमंत्रैश्च पंचामृतेन प्रोक्षयेत् ॥ पुनर्नः पितरस्तु इति मंत्रेण प्राणप्रवेशं भावयेत् ॥ शुक्रज्योतिश्चेति मंत्रेण रक्षितं शरी-
रं स्पृशेत् ॥ ततस्तच्छरीरं स्नापयित्वा चन्दनेनानुलिप्य वस्त्रोपवीते परिधार्यालंकृत्य अयं स देवदत्त इति तमभिमृश्य वैतरणी-
दानपूर्वकं सूत्रेणावेष्टयित्वा कृष्णाजिनेनाच्छाद्य पूर्वोक्तविधिना शववद्दहेत् ॥ कृते दाहे तस्मा उदकधारां दद्यात् ॥ त-
तः पूर्वोक्तस्थानोदकदानाशौचनियमावयवपूरकपिण्डदानैकादशाहादि सपिण्डनान्तं कर्म कुर्यात् ॥ पलाशपत्राभावे कुशैः
प्रतिकृतिं कुर्यात् ॥ आहिताग्नेः प्रतिकृतिदाहे स्थिरदाहे वा दशाहमेवाशौचं ॥ अनाहिताग्नेस्त्र्यहं ॥ प्रतिकृतिदाहे पुत्रपत्न्योर-
गृहीताशौचयोर्दशाहं ॥ विदेशस्थमृते यावद्दिनानि संस्कारं तावत् पुत्रादीनामाशौचं न संध्यादिलोपः ॥ ॥ अथ पुनः संस्कारे का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लशुद्धि आशौचं मध्ये पुनः संस्कारे यथासंभवं दिनशोध्यं ॥ कालान्तरे तु शोध्यमेव ॥ संवत्सरादूर्द्ध्वे पुनःकार्ये उत्तरायणः श्रेयान्
तत्रापि कृष्णपक्षे ॥ तिथिषु नन्दात्रयोदशीचतुर्दशीदिनक्षयं च वर्जयेत् ॥ शुक्रशनिवारौ वर्ज्यौ ॥ नक्षत्रेषु भरणी कृत्तिकाश्लेषा
नया धनिष्ठादिपंचत्रिपुष्कराणि च अतिदुष्टानि सर्वथा वर्ज्यानि ॥ व्यतिपाते वैधृतौ योगे परिघे च योगे विष्टिकरणे चतुर्थाष्ट
मद्वादशस्थे चन्द्रे चातिदोषः ॥ रोहिणीमृगशीर्षपुनर्वसुपूर्वोत्तराचित्राविशाखानुराधापूर्वाषाढोत्तराषाढाद्विपुष्कराणि
चेति दुष्टानि संभवे वर्ज्यानि ॥ शिष्टान्यदुष्टानि ॥ सर्वथा दिनशुद्ध्यसंभवे नातिदुष्टं वाह्य नक्षत्रं ग्राह्यं ॥ नन्दायां शुक्रे चतुर्दश्यां त्रिजन्म
नक्षत्रे पुत्रकोटिहा इति निषिद्धं ॥ एकादशाहादौ न दोषः ॥ न चानित्यादिनैव शोध्यं मृगादि संक्रान्त्यमावास्यासु पुनकार्ये पुनः संस्का
रे किंचिदपि नैव शोध्यं ॥ इति पालाशप्रतिकृतिदाहविधिः ॥ ॥ अथ पंचकमरणे विधिः ॥ तत्र गरुडपुराणे ॥ आदौ कृत्वा धनिष्ठा
र्द्धमेतन्नक्षत्रपंचकं ॥ रेवत्यन्तं न सदाहस्य मशुभं सर्वदा भवेत् ॥ दाहस्तत्र न कर्त्तव्यो विपादः सर्वजन्तुषु ॥ न दीयते जलं तत्र ह्यशुभं
सर्वदा भवेत् ॥ दाहस्तत्र न कर्त्तव्यो विपादः सर्वजन्तुषु ॥ पंचकानन्तरं कार्यं कर्त्तव्यं सर्वमन्यथा ॥ पुत्राणां गोत्रिणां तस्य सन्तापो
पजायते ॥ गृहे हानिर्भवेत्तस्य ऋक्षेष्वेषु मृतस्तु यः ॥ ब्रह्मपुराणे ॥ कुंभमीनस्थिते चन्द्रे मरणं यस्य जायते ॥ न तस्योर्द्ध्वगतिर्दृष्टा सं
ततौ न शुभं भवेत् ॥ न तस्य दाहः कर्त्तव्यो विनाशः स्वेषु जन्तुषु ॥ पंचकानन्तरं कार्यं कार्यं दाहादिकं स्वकैः ॥ अथवा तद्दिने कार्यो
दाहस्तु विधिपूर्वकं ॥ धनिष्ठापंचके जीवो मृतो यदि कथं च नः ॥ त्रिपुष्करे याम्यभे च कुजान्मारयते ध्रुवं ॥ तत्रानिष्टविनाशार्थं वि

245

रत्न २८५

CC-0. In Public Domain. Digitization by eGangotri

धानं समुदीर्यते ॥ दाहदेशे शवं नीत्वा स्नापयेच्च प्रयत्नतः ॥ दर्भाणां प्रतिमा कार्याः पंचोर्णासूत्रवेष्टिताः ॥ यवपिष्टेनानुलिप्तास्ता
भिः सह शवं दहेत् ॥ प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः ॥ प्रेतहर्ता पंचमस्तु नामान्येतानि वै क्रमात् ॥ ॥ अथ प्रयोगः ॥ क
र्त्ता सव्येन पूर्वाभिमुखः कुशतिलजलान्यादाय ॥ अद्येत्यादि अमुकगोत्रस्यामुकप्रेतस्य धनिष्ठादिपंचकमरणसूचितवंशानि
ष्टविनाशार्थं पंचकमरणविधिं करिष्य इति संकल्प्य ॥ गन्धमाल्याद्यैः पंचापि प्रतिमा अलंकृत्य दाहसमये प्रेतोपरि न्यसेत्
प्रथमां शिरसि ॥ द्वितीयां दक्षकुक्षौ तृतीयां वामकुक्षौ चतुर्थीं नाभौ पंचमीं पादयोः ॥ तदुपरि ताभ्यां नाममंत्रैर्घृताहुतीः कृत्वोद
कधारां दत्वा ॥ यमाय सोमं त्र्यंबकं यजामहे इति मंत्राभ्यां प्रतिमासु प्रत्येकमाज्याहुतीर्जुहुयात् ॥ सूतकान्ते ततः पुत्रः कुर्या
च्छांतिकपौष्टिकं ॥ कांस्यपात्रस्थितं तैलं वीक्ष्य दद्याद्द्विजन्मने ॥ ब्रह्मविष्णुमहेशेन्द्रवरुणाः प्रीतये ततः ॥ माषमुद्गयवव्रीहि प्रियं
ग्वादि प्रयच्छति ॥ स्वर्णदानं रुद्रजाप्यं लक्षहोमो द्विजार्चने ॥ गोभूदानं षडंशेन कुर्याद्दोषोपशांतये ॥ इति पंचकमरणविधिः ॥
अथ रजस्वलामरणविधिः ॥ अन्तरिक्षमृतायैव बहूनां वस्तु प्रमादतः ॥ उदकान्तकानारीव रेवान्त्यायणात्रयं ॥ ॥ संग्रहे ॥ पंच
भिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां ॥ वस्त्रान्तराहृतां कृत्वा दाहयेद्विधिपूर्वकं ॥ वृद्धशातातपस्तु ॥ रजस्वलायाः प्रेतायाः संस्का
रादीनि नाचरेत् ॥ पूर्वं त्रिरात्रमासनायाः सर्वधर्मेणा दाहयेत् ॥ इति त्र्यहात् परं संस्कारमाह ॥ अत्र देशकालानुसाराद्व्यवस्था पंचका
नन्तरं कार्यमित्यादि वत् ॥ ॥ अथ प्रयोगः ॥ कुशतिलजलान्यादाय ॥ सव्येन अद्यामुकगोत्राया अमुकस्या रजस्वलावस्थामर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२४६

शानिमित्तप्रत्यवायपरिहारार्थमेवं दैहिकयोग्यतार्थं च चान्द्रायणत्रयं च प्रायश्चित्तपूर्वकं सर्वेणाशौचान्तरशतस्नानानि कारयिष्ये इति
संकल्प ॥ ब्राह्मणानुवचनेन चान्द्रायणत्रयं प्रत्याम्नायं कृत्वा ॥ यवपिष्टेन घृतेन मृत्तिकया स्वयं स्नात्वा सूर्योदकेन शतवारं स्नापयेत् ॥ प्रेतं प्र
क्षाल्य पुनर्मन्त्रैर्नवभिः ॥ आपो हि ष्ठेति तिसृभिः ॥ कया न इति तिसृभिः ॥ आपो अस्मानिति तिसृभिर्मन्त्रैः ॥ पञ्चगव्येन शुद्धोदकेन च पु
नः स्नापयेत् ॥ यद्वा रजस्वलां सूतिकां च मलं प्रक्षाल्य स्नापयित्वा काष्ठवद्दग्ध्वा अस्थीनि विधिना दहेत् ॥ ॥ अथ सूतिकाम
रणविधिः ॥ सूतिकामरणे प्राक्सर्वौषधेन लेपनं ॥ अमृतकीनसंसृष्टः शूर्पाणां तु शतं क्षिपेत् ॥ तत्र पूर्ववत्संकल्पपूर्वकं
शूर्पस्नानानि कारयित्वा कुम्भे जलमादाय पञ्चगव्यं तत्र क्षिप्त्वा आपो हि ष्ठेति तिसृभिः ॥ द्रुपदादिव ॥ शन्नो देवीः ॥ इति ताभ्यां वा
भिमन्त्र्य पूर्वोक्तमन्त्रैः स्नाप्य विधिना दहेत् ॥ सूतिकायां मृतायां तु कथं कुर्वन्ति याज्ञिकाः ॥ अह्निगेरभिमन्त्र्यायो वा कुड्डिलभेत्ततः
तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधीति वचनात् ॥ इति गर्भिणीमरणविधिः ॥ ॥ गर्भिण्यां तु मृतायां वै गर्भजीवनशंकया
विमोच्य गर्भं दग्धव्या एवं धर्मो न हीयते ॥ यदा गर्भवती नारी शस्त्रमरणं व्रजेत् ॥ कुक्षिं भित्वा ततः शल्यं निहरेद्यदि जीवति ॥ प्र
मीतं निक्षिपेत्तत्तु प्रायश्चित्तं ततः परं ॥ सा च त्रयहि ज्ञा कृच्छ्रैः शुध्यते ह्यल्पदोषत ॥ सगर्भदहने तस्या वर्णाज्ञं वधयातनं ॥ प्राय
श्चित्तं चरित्वा तु शुद्ध्येत्तेयापकारिणः ॥ दग्ध्वा तु गर्भसंयुक्तां त्रिंशत्कृच्छ्रं समाचरेत् ॥ ॥ इति रजस्वलासूतिकागर्भिणीअन्तरिक्षम
रणविधिः ॥ ॥ अथ पूर्वोक्तपापरणादीनां बुद्धिपूर्वकात्मघातीनां च नारायणबलिः ॥ कस्यांचित्कृष्णैकादश्यां तीर्थनदीजलाश

246

रत्न
२४६

८२

CC-0. In Public Domain. Digitization by eGangotri

यांतं वागत्यास्नानादिकं विधाय पूर्वकल्पितशुद्धस्थाने संपादितसर्वसमभृतीशुक्लदीपं प्रज्वाल्य॥ कर्त्ता शुचिरावांतः पूर्वाभिमुख
ःसवेनकुशतिलजलान्यादाय अद्येत्यादि अमुकगोत्रस्यामुकस्य आत्महत्यापापखंडित्वाजनितपापोपशमनद्वारा और्द्धदेहिकसं
प्रदानयोग्यत्वार्थं नारायणबलिमहं करिष्ये इति संकल्पं कुर्यात्॥ ततः कलशपंचकस्थापनं भूरसीति भूमिं संप्रोक्ष्य मानस्तो
कइति तदुपरि पंचकस्थले गोमयं स्थाप्य आजिघ्रकलशमिति तदुपरि कलशपंचकं प्रत्येकं स्थापयित्वा वरुणस्योत्तंभनमि
ति तेषु जले प्रक्षिप्य॥ हिरण्यगर्भ इति पंचरत्नानि निक्षिप्य॥ याः फलिनीरिति फलं॥ तिलपुष्पगंधादिकं प्रत्येकं क्षिपेत्॥ प्र
त्येकं वस्त्रेणावेष्टयित्वा॥ अंबे अंबिकेति तदुपरि आम्रपल्लवैराच्छाद्य॥ अश्वत्थे वेति अश्वत्थपल्लवैः॥ काण्डात्काण्डादिति दूर्वा॥ धा
न्यमसीति तदुपरि व्रीहीन् धृत्वा तदुपरि ताम्रादिपात्रे ब्रह्मविष्णुशिवयमप्रेतानां पंचमूर्त्तीः रूप्यस्वर्णताम्रलोहकुशैर्निर्मिताः स्था
पयेत्॥ आवाहनादिषोडशोपचारैः पंचापि देवताः पूजयेत्॥ तत्र ब्रह्मणो हिरण्यगर्भ इति मंत्रेण पूजा॥ विष्णोः पुरुषसूक्ते
न॥ शिवस्य नमः शंभवायेति॥ यमस्य सपरिवारस्य यमाय त्वेति॥ प्रेतस्य नाममंत्रेण पूजा॥ षोडशोपचारं च॥ आवाहनासनपा
द्यमर्घ्यमाचमनीयं च॥ स्नानं वस्त्रोपवीतं च अनुलेपनं पुष्पकं॥ धूपदीपं च नैवेद्यं नमस्कारप्रदक्षिणा॥ विसर्जनं च देवस्य षोड
शोपचारकं॥ एवं पंचापि देवताः संपूज्य॥ ब्रह्मणो हेतुश्च वरणं विधाय होता स्वगृह्योक्तविधिनाग्निस्थापनं कृत्वा वैश्वदेवं चरुं श्र
पयित्वा आज्यं होमं कुर्यात्॥ तद्यथा॥ ॐ प्रजापतये स्वाहा॥ ॐ प्रजापतय॥ ॐ रुद्राय स्वाहा॥ इदंमिन्द्राय॥ ॐ अग्नये स्वाहा॥

रत्न २४७

इदमग्नये ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय ॥ ॐ सूर्याय स्वाहा ॥ इदं सोमाय ॥ ॐ भूः स्वाहा ॥ इदमग्नये ॥ ॐ भुवः स्वाहा ॥ इदं वायवे ॥ ॐ
स्वः स्वाहा ॥ इदं सूर्याय ॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठा ॥ यजिष्ठो वह्नितमः ॥ शोशुचानो द्वेषाᳬसि प्र
मुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्यां ॥ ॐ सत्वन्नो अग्ने वमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ॥ अवयक्ष्व नो वरुणᳬ रराणो
वीहि मृडीकᳬ सुहवो न एधि स्वाहा ॥ इदमग्नीवरुणाभ्यां ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमयाअसि ॥ अयानो यज्ञं व
हास्यया नो धेहि भेषजᳬ स्वाहा ॥ इदमग्नये ॥ ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्नो अद्य सवितोत
विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥ ॐ उदुत्तमं वरुणपाशम
स्मदवाधमं विमध्यमᳬ श्रथाय ॥ अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय ॥ ॐ प्रजापतये स्वाहा
इदं प्रजापतये ॥ ॥ अथ चरुहोमं ॥ पुरुषसूक्तेन षोडशाहुतीर्हुत्वा इदं विष्णवे इति सर्वत्र त्यागः ॥ युञ्जते मनः ॥ इदं विष्णुः ॥
इरावती धेनुमती ॥ देवश्रुतौ देवेषु ॥ विष्णोर्नु ॥ दिवो वा ॥ प्रतद्विष्णु ॥ विष्णोरराटं इत्यष्टभिर्हुत्वा इदं विष्णवे विष्णवे इति सर्वत्र त्या
गः ॥ ततआज्येन लोमभ्यः स्वाहा ॥ तपसे स्वाहा ॥ यमाय स्वाहा ॥ यावती द्यावापृथिवी ॥ अश्विना घर्मो अश्व्यः संभृतः ॥ वेदाहं
प्रजापतिश्चरति ॥ यो देवेभ्यः ॥ रुचं ब्राह्मं ॥ श्रीश्च ॥ अक्रमृकर्म ॥ एभिर्मन्त्रैराज्येन हुत्वा इदं विष्णवे इति सर्वत्र त्यागः ॥ ततस्तिला
ज्येन पुरुषसूक्तमन्त्रैः सहस्राहुतीर्हुत्वा इदं विष्णवे इति सर्वत्र त्यागः ॥ एवं होमं विधाय अनन्तरं ब्राह्मणं समाप्यार्चित देवता समी

247

रत्न २४७

८३

पेदशपिंडदानव्याः ॥ एकादशीसमासाद्यशुक्लपक्षस्यवैतिथिं ॥ विष्णुमभ्यर्च्ययेद्देवं यमवैवस्वतंनथा ॥ दशपिण्डान्घृताक्ता
न्दर्भेषुमधुसंयुतान् ॥ तिलमिश्रान्दातव्यास्ययतोदक्षिणामुखः ॥ इतिवचनात् ॥ ततोपसव्येनदक्षिणामुखोदक्षिणाग्रान्
कुशान्स्तीर्यकुशतिलजलान्यादाय ॥ अद्यामुकगोत्रामुकपतिनप्रेतविष्णुरूपस्यानेइदमवनेजनंमदत्तमुपतिष्ठतामित्यास्तृत
कुशोपरिअवनेजनंदद्यात् ॥ एवमेवनवसुस्थानेषुअवनेजनंदत्वातिलघृतमधुमिश्रान्दशपिण्डान्कृत्वाकुशादिसहितंप्र
थमपिण्डमादाय ॥ अद्यामुकगोत्रामुकपतिनप्रेतविष्णुरूपअयंपिण्डोमदत्तस्तवोपतिष्ठतामितिप्रथमावनेजनस्थानेपिण्डं
दत्वा ॥ अपरत्राप्यनेनैववाक्येननवपिण्डादेयाः ॥ ततः कुशादीन्यादायअद्यामुकगोत्रामुकपतिनप्रेतविष्णुरूपपिंडेइदंप्रत्य
वनेजनंतवोपतिष्ठतामितिप्रथमपिण्डेपरिप्रत्यवनेजनन्दत्वाएवंनवसुपिण्डेष्वपिप्रत्यवनेजनन्दद्यात् ॥ ततोगन्धादिभि
पिण्डानभ्यर्च्यकुशादीन्यादाय ॥ अद्यामुकगोत्रामुकपतिनप्रेतविष्णुरूपैतानिगंधपुष्पधूपदीपवस्त्रादि ॥ नैवेद्यानिमदत्तानित
वोपतिष्ठंतामितिगंधादिकमुत्सृज्यकुशैः शंखोदकेनपुरुषसूक्तेनपिण्डानभिषिंच्य ॥ सव्येनकुशादीन्यादायदक्षिणाद्रव्यंचा
दायअद्यामुकगोत्रस्यामुकपतिनप्रेतस्यविष्णुरूपस्यदशपिण्डदानप्रतिष्ठार्थमिदंरजतंचन्द्रदैवतंयथानामगोत्रायब्राह्मणा
यदक्षिणांदातुमहमुत्सृजे इतिदक्षिणांदत्वापिण्डानुत्थायजलेनिःक्षिपेत् ॥ ततःसव्यंकृत्वाचम्यापसव्यंकृत्वादक्षिणामुखः
कुशानादायषोडशर्चेनपुरुषसूक्तेनसाविश्यायुः । अऊनमसिः ॥ पवित्रेस्थः ॥ अदित्यैअुंदनांघृताच्यसिअस्कन्नमद्य ॥ दिविवि

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२४८

स्तः॥ उर्वसि॥ अग्ने स्तनू॥ युंजते मनः॥ इदं विष्णुः॥ रक्षोहणं वलगहनं॥ उरु विष्णो॥ अपत्यात्॥ याने धानानि॥ धान्यमसि॥ विष्णो
कर्माणि न विष्णोः॥ उपयामगृहीतोसि मधवे त्वा॥ मित्रावरुणाभ्यां त्वा॥ उपयामगृहीतोसि हरिरसि॥ उपयामगृहीतोसि ध्रुवो
सि॥ उपयामगृहीतोस्याग्रहायणोसि॥ इदं आसां॥ इंद्रश्च॥ विश्वे देवा अं ७ शुभ्रुष्म्रः॥ अग्निरेकाक्षरेण॥ अग्नये स्वाहा॥ प्राणाय
स्वाहा॥ मधवे स्वाहा॥ आयुर्यज्ञेन कल्पतां ७ स्वाहा॥ इति द्वात्रिंशत्कण्डिका॥ अमुकगोत्रममुकपतिनप्रेतं विष्णुरूपं तर्पयामी
त्यष्टचत्वारिंशद्वारं कर्मवंतिलोदकेन पितृतीर्थेन तर्पयेत्॥ ततः सर्वं कृत्वा वस्त्रः पुरुषाहारपरिमितमन्नं विष्णवे ब्रह्मणोशि
वाय सकिंकराय ममायव॥ वलिं गृहीत्वा ब्रह्मविष्णुमहादेवाय मध्वै व सकिंकर॥ वलिं गृहीत्वाउर्वं तु प्रेतस्य खगु भोगतिमि
त्ति प्रार्थ्य॥ विष्ण्वादिभ्य इमं वलिं समर्पयामीति वलिं दद्यात्॥ ततः प्रतिदेवतं त्रिविधं फलं समर्प्य सर्कराम धुसर्पीषि निवेद
येत्॥ ततो गीतादीनां जागरणं कुर्यात्॥ ततोस्यामेव रात्रौ विप्रनिवेशनं गत्वा पंचब्राह्मणान् दत्ताखवानुपवेश्य कृतापसव्यो द
क्षिणामुख पानितवामजानु॥ ब्राह्मणहस्ते पुर्वंदनपूगीफलानि दत्वा ब्राह्मणाद क्षिणाजानुस्पृष्ट्वा अद्यास्यां रात्र्यां वमुकगोत्रस्या
मुकपतिनप्रेतस्य विष्णुरूपस्य नारायणवलौ श्वः प्रेककर्तव्येति विष्णुश्राद्धे भवंतं ब्राह्मणमहमामंत्रये॥ एवं पूर्ववद्वाकां कृत्वा व
कर्तव्ये ब्रह्मश्राद्धे सपरिवारयमश्राद्धे व भवंतं ब्राह्मणमहमामंत्रये इति प्रत्येकं ब्राह्मणान् आमंत्र्य अद्यास्यां रात्र्यां वमुकपतिनप्रेत
स्य विष्णुरूपस्य श्वः कर्तव्ये श्राद्धे भवंतमहमामंत्रये॥ आमंत्रितोस्मीति प्रत्येकं ब्राह्मणो ब्रूते॥ अंक्रो धनेन शौचपरेणाद्य तत ब्रह्म

248

रत्न
२४८

८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वादिनां ॥ भवितव्यं भवता च मया च श्राद्धकारिणां ॥ सर्वायासविनिर्मुक्ते कामक्रोधविवर्जिते ॥ भवितव्यं भवतानः श्वस्तने श्राद्ध
कर्मणीति प्रत्येकं ब्राह्मणानुद्दिश्य पठेत् ॥ यद्यपि परेद्युरजनीयामिति तदा सर्वमेतत्करिष्यामीति प्रत्येकं ब्राह्मणैरुक्ते तन्नमस्कुर्यात्
ततो नियतउपोषितो रजनीं नीत्वा श्वोभूते स्नानादिकं विधाय मध्याह्ने विश्वादीनभ्यर्च्य बहिरुपलिप्तायां भूमौ तिष्ठन् यजमानः
सवर्णानागतान् ब्राह्मणान् प्रत्येकं स्वागतमिति पृच्छेत् ॥ प्रत्येकं सुस्वागतमिति तैरुक्ते सर्वे उपविशेयुः ॥ ततोपसव्यं कृत्वा जलति
लपुष्पगंधयुतमर्घपात्रपंचकं कृत्वा गंधपुष्पाभ्यां पंचाप्यभ्यर्च्य एकमर्घपात्रं वामहस्ते कृत्वा दक्षिणहस्तेन मोदकमादाय
अद्य विष्णो एष पादार्घस्तुभ्यं नमः ॥ एवमपरं पादार्घपात्रं मोदकं वादाय अद्य ब्रह्मन्नेष पादार्घस्तुभ्यं नमः ॥ एवमपरं गृहीत्वा
अद्य शिवैष पादार्घस्तुभ्यं नमः ॥ पुनरन्यं गृहीत्वा अद्य सपरिवार यमैष पादार्घस्तुभ्यं नमः ॥ पुनः पंचमपात्रं कुशांश्च गृहीत्वा
अद्यामुकगोत्रामुकपिततप्रेत विष्णुरूपैष पादार्घो मदत्तस्तवोपतिष्ठतामिति प्रत्येकं पादार्घं दद्यात् ॥ ततः सव्येनावस्थापात्र(
ब्राह्मणानावस्थाप्य कृत्वा श्राद्धदेशमागत्योपविश्य पात्राभिप्रायेणामिति पृच्छेत् ॥ पूर्वरात्रौ निमंत्रणासंभवे तस्मिन्नेवाह्नि श्रा
द्धवेलायां निमंत्रणं कुर्यात् ॥ तत्र वाक्ये नियममंत्रे च श्वःशब्दः ॥ इत्यत्र अद्येति श्वस्तने इत्यत्र अद्यतने इति पठेत् ॥ नियमश्रवणानंत
रं भवितव्यमिति ब्राह्मणप्रतिवचनमिति शेषः ॥ ततो ब्राह्मणहस्ते धृत्वा उदङ्मुखानुपवेशयेत् ॥ ब्राह्मणपादतले कुशान् द
द्यात् ॥ प्रत्यासन्नसमीपे तिलतैलेन पंचप्रदीपान् प्रज्वाल्य स्थापयेत् ॥ रक्षोघ्नान् सर्षपांस्तिलांश्च श्राद्धदेशे विकिरेत् ॥ ततः स

CC-0. In Public Domain. Digitization by eGangotri

येन॥ यदेवादेवहेडनमित्यनेन त्रयेण कर्मपात्रं कृत्वा कुशत्रयसहितं कर्मपात्रोदकमादाय॥ अपवित्रः पवित्रो वेत्यादि
पठित्वा पुंडरीकाक्षः पुनात्विति वोक्त्वा श्राद्धदेशं द्रव्याण्यात्मानं च सिंचेत्॥ ततः कुशतिलजलान्यादाय॥ अद्यामुकगोत्रस्या
मुकपतितत्प्रेतस्य विष्णुरूपस्य नारायणबलौ विहितं श्राद्धपंचकमेकोद्दिष्टविधिनाहं करिष्ये इति संकल्प्य सप्रणवां गाय
त्रीं त्रिर्जपित्वा देवताभ्य इति त्रिः पठेत्॥ ततोपसव्यं कृत्वा मोटकादीन्यादाय॥ अद्य विष्णोरिदमासनं तुभ्यं नमः॥ अद्य ब्रह्म
णा इदमासनं तुभ्यं नमः॥ अद्य सपरिवारस्य यमस्येदमासनं तुभ्यं नमः॥ इति विष्ण्वादिभ्यो मोटकरूपमासनं निदत्वा कुशा
दीन्यादाय अद्यामुकगोत्रामुकपतितत्प्रेतस्य विष्णुरूपे इदमासनं मद्दत्तं नवोपतिष्ठतामिति कुशरूपमासनं प्रेताय दद्यात्॥ त
तः सव्यं कृत्वा चम्यापसव्यं कृत्वा अपहता असुरा रक्षांसि वेदिषद इति वामावर्त्तेन श्राद्धदेशे तिलान् विकीर्य॥ अर्घपात्रा
णि क्रमेण स्थापयित्वा तदुपरि पवित्रे स्थ इति क्रमेण प्रत्येकं दक्षिणाग्रं पवित्रं धृत्वा॥ शन्नोदेवीरिति जलं॥ तिलोसीति तिला
न्॥ गंधद्वारामिति गंधं॥ श्रीश्चेति पुष्पं च॥ क्रमेण प्रत्येकं क्षिपेत्॥ अर्घपात्राणि संपन्नानीति ब्राह्मणान् पृष्ट्वा सुसंपन्नानी
ति तैरुक्ते॥ प्रथमार्घपात्रं वामहस्ते कृत्वा नमो नारायणायेति पुष्पसहितं वामहस्ते उत्तराग्रं धृत्वा इत्यादिनार्घपात्रस्थाजलं
मभिमंत्र्य मोदकमादाय॥ अद्य विष्णो एष ते हस्तार्घो नम इति विष्णुद्विजकरे पवित्रोपरि अर्घजलं दद्यादुत्सृजेत्॥ पवित्रस
हितमर्घपात्रमग्रे स्थापयेत्॥ एवं ब्रह्मशिवसपरिवारयमानामर्घजलान्युत्सृज्य॥ पवित्रपुष्पसहितान्यर्घपात्राणि अग्रे स्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पयित्वा पंचमअर्घपात्रं वामहस्ते कृत्वा नमो नारायणायेति पुष्पसहितं पवित्रं प्रेतब्राह्मणहस्ते उत्तराग्रं धृत्वा ॥ यदिव्या इत्यादिना अर्घ्य
पात्रस्थं जलमभिमंत्र्य कुशमादाय अद्यामुकगोत्रामुकपतितप्रेत विष्णुरूपे एष हस्तार्घो मद्दत्तस्तवोपतिष्ठतामिति प्रेतविप्रहस्ते प
वित्रोपरि अर्घजलं दद्यादुत्सृजेत् ॥ पवित्रसहितमर्घपात्रमग्रे धृत्वा ॥ विष्णुब्राह्मणवामपार्श्वे विष्णवे स्थानमसीति न्युब्जं कृत्वा ॥ ए
वमेव ब्राह्मणाशिवायसपरिवाराय यमाय स्थानमसीति प्रत्येकं वामपार्श्वे न्युब्जीकृत्वा प्रेताय विष्णुरूपिणे स्थानमसीति उत्तान
मेव स्थापयित्वा ॥ सर्वत्र अर्घपात्रोपरि कुशान् दद्यात् ॥ दक्षिणापर्यन्तं तानि न चालयेत् ॥ ततो ब्राह्मणान् गंधादिभिः संपूज्य मोद
कादीन्यादाय ॥ अद्य ब्रह्मविष्णुशिवसपरिवारयमाः एतानि गंधपुष्पधूपदीपवासांसि युष्मभ्यं नमः ॥ इति गंधादिकमुत्सृजेत्
ततः सव्यं कृत्वा अपसव्यं कृत्वा ॥ अर्चनविधेः सर्वं परिपूर्णमस्तु ॥ अस्तिप्रतिवचनं ॥ ततो विष्णुब्राह्मणं वेष्टयित्वा चतु
रस्त्रमण्डलं विधाय ॥ अपरं ब्रह्मादिब्राह्मणानां चतुरस्त्र्ये मण्डलचतुष्टयं कुर्यात् ॥ परकीयभूमौ श्राद्धकरणे आद्यीयवस्तु किंचित्किं
दिगुद्दिश्य तिलजलघृतयुतमन्नं ॥ इदमन्नमेतद्भूस्वामिपितृभ्यो नम इति दद्यात् ॥ ततः सव्यं जनमन्नं क्रमेण प्रत्येकमुपनीय पृ
थक् पृथक् पुटकस्थितं सतिलजलं चोपनीय अन्ने प्रत्येकं मधुरयात् ॥ ततो विष्णवन्नपात्रं व्यस्ताभ्यां उत्तानाभ्यां हस्ताभ्यामालभ्य पृ
थिवी ते इत्यादि जुहोमि स्वाहेत्यन्तं ॥ इदं विष्णुः मुरे इमंतं च मंत्रं पठित्वा इदमन्नं ॥ इमा आपः ॥ इदमाज्यं ॥ इदं हविरिति ॥ क्रमेणान्न
जलघृतान्नेषु दक्षिणाग्रं गुष्ठं निवेश्य ॥ अपहता असुरा रक्षांसि वेदिषद इति तिलान्नेनोपरि प्रक्षिप्य मोदकादीन्यादाय अद्यवि

CC-0. In Public Domain. Digitization by eGangotri

रत्न स्मवेइदंतेन्नंसोपकरणंनमः ॥ इतिविष्वक्सेनमुत्सृजेत् ॥ ततोब्रह्मान्नपात्रमालभ्यपूर्ववत्पृथिवीतइत्यादिकंसर्वंकृत्वा मोङ्का
२५० रीत्यादाय अघोरशिवायतेन्नंसोपकरणंनमः ॥ इतिशिवायान्नमुत्सृजेत् ॥ ततोयजमानोन्नपात्रमालभ्यपूर्ववत्सर्वंविधाय मो
ङ्कारीत्यादाय अघस्मपरिवाराययमायइदंतेन्नंसोपकरणंनमइतियमायान्नमुत्सृजेत् ॥ ततः प्रेतान्नपात्रेआलंभनांगुष्ठंवि
वाहनंविनापूर्ववत्पृथिवीइत्यादिकंसर्वंकृत्वा ॐशारीत्यादाय अद्यामुकगोत्रायामुकपतिनप्रेतायविष्णुरूपिणेइदंतेन्नंसो
पकरणंमदन्नमुपतिष्ठतामितिप्रेतायान्नमुत्सृजेत् ॥ ततोभवान्प्राशयतुइत्यपोशानक्रमेणप्रत्येकंदत्वायथासुखंजुषस्वेति
प्रत्येकंब्राह्मणान्प्रतिब्रूयात् ॥ ब्राह्मणाश्चवामेनपाणिनान्नपात्रमत्यजन्तोभुंजीरन् ॥ संज्ञयाप्रार्थनंचकुर्युः ॥ कर्त्तामधुवा
ताइतित्र्यचंमधुमधुमध्वितीच ॥ अन्नहीनमित्यादिचपठित्वा ॥ नमस्तुभ्यंविरूपाक्षेतिश्लोकंपठित्वाव्यंजनमुत्कीर्तयन्ते
षांयत्रयत्रेच्छोपलभ्यतेतत्तदुपयन्मंदंमंदंभोजयेत् ॥ ततस्तान्तृप्तान्ज्ञात्वा ॥ उच्छिष्टसमीपेआस्तृतकुशत्रयांभूमिंप्रोक्ष्य 250
सतिलघृतमन्नंजलेनाप्लाव्य ॥ मोदकसहितमादाय ॥ अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम ॥ भूमौदत्तेनतृप्यंतुतृप्तायां
तुपरांगतिमितिआस्तृतकुशोपरितदन्नंविकिरेत् ॥ ततः सर्वंकृत्वाबहिःस्मृत्वापसव्यंकुर्यात् ॥ ततोब्राह्मणेभ्यः प्रत्येकंजल
गण्डूषमिदंतेइतिप्रत्यपोशानंदत्वा ॥ स्वदितमितिप्रत्येकंब्राह्मणान्पृच्छेत् ॥ सुस्वदितमितिप्रत्येकंतैरुक्तेपिण्डानहंकरिष्येइति राम २५०
पृष्टेकुरुष्वेतितैरुक्तेतदुच्छिष्टसन्निधौपिण्डदानार्थंचतुरस्रंहस्तैकप्रमाणंचतुरंगुलोच्छ्रितंपिण्डिकापंचकंविधायप्रथमपिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

डिकां मध्ये वामेन पाणिना दर्भपिंजुलीं गृहीत्वा दक्षिणहस्ते कृत्वा तन्मूले न सव्योपगृहीन दक्षिणपाणिना अपहता असुरा रक्षा
ंसि वेदिषद इति मंत्रेण दक्षिणाग्रां रेखां प्रादेशप्रमाणां सकृदुल्लिख्य दर्भपिंजुलीं उत्तरस्यां क्षिपेत् ॥ रेखोपरि ये रूपाणि प्रतिमुं
चमाना असुराः संतस्वधया चरंति ॥ परापुरो निपुरो ये भरंत्यग्निष्टान् लोकात्प्रणुदात्वस्मादिति मंत्रेण गांगारं भ्रामयित्वा दक्षिणा
नः क्षिपेत् ॥ ततो रेखायां छिन्नमूलकुशानां स्तरणं कुर्यात् ॥ ततो परवेदिकात्रयेप्येवमेव प्रत्येकं रेखां गार भ्रामणं छिन्नमूलकुशा
स्तरणानि विदध्यात् ॥ प्रेतपिण्डिकायां तु रेखाकरणं गार भ्रामणं विना छिन्नमूलकुशानां स्तरणं कुर्यात् ॥ ततः सव्यं कृत्वा चमा
पसव्यं कृत्वा पुटकं पंचकेन गंधपुष्पतिलयुक्तं कर्मपात्रोदकं कृत्वा एकपुटकं वामहस्ते कृत्वा मोटकादीन्यादाय ॥ अद्य विष्णोः पि
ण्डस्थाने चावनेनिक्ष्व ते नमः इति सर्वपश्चिमपिण्डिकायामास्तृतछिन्नमूलकुशोपरि अवनेजनं दद्यात् ॥ ततो परं पुटकं वा
महस्ते कृत्वा मोटकादीन्यादाय अत्र शिवपिण्डस्थाने चावनिनेक्ष्व ते नमः इति ॥ तत्पूर्वपिण्डिकायामास्तृतछिन्नमूलकुशोपरि
अवनेजनं दद्यात् ॥ एवं पंचमपुटकं वामहस्ते कृत्वा कुशानीन्यादाय अद्यामुकगोत्रामुकपति तत्प्रेत विष्णुरूपपिण्डस्थाने चा
वनेजने मद्दत्तं वोपतिष्ठतां मिति सर्वपूर्वपिण्डिकायामास्तृतछिन्नमूलकुशोपरि अवनेजनं दद्यात् ॥ ततः पंचपिंडान् कपित्थ
प्रमाणान्निर्माय मोटकतिलजलसहितं पिण्डमादाय ॥ अद्य विष्णो एष पिण्डस्तुभ्यं नमः इति तत्पूर्वपिण्डिकायामवनेजनस्था
ने पिण्डं दद्यात् ॥ ततो मोटकादीन्यपरं पिंडं चादाय ॥ अद्य ब्रह्मन्नेष पिण्डस्तुभ्यं नमः इति तत्पूर्वपिण्डिकायामवनेजनस्थाने पि

रत्न ण्डं दद्यात्॥ पुनर्मोदकादीनि पिण्डं चादाय॥ अथ शिवरूपपिण्डभ्यं नम इति तन्मूर्ध्नि पिण्डिकायाम् अवनेजनस्थाने पिण्डं दद्यात्॥ पु
२५१ नः कुशादीनि पिण्डं चादाय॥ अद्यामुकगोत्रामुकपतितप्रेतविष्णुरूप एष पिण्डो मद्दत्तस्तवोपतिष्ठतामिति सर्वपूर्वपिण्डिका
याम् अवनेजनस्थाने पिण्डं दद्यात्॥ ततः आस्तृतकुशमूले लेपभागभुजस्तृप्यन्त्विति करं प्रोक्ष्य सव्यं कृत्वा वामहरिं स्मरेत्॥ ततोप
सव्यं कृत्वा अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति दक्षिणामुखः पठेत्॥ ततः उदङ्मुखीभूय स्वासं नियम्य भास्वरमूर्ति
ध्यायन्॥ अमीमदन्त पितरो यथाभागमावृषायिषतेति पठन् पुनः प्रत्यवनेजयेत्॥ एवं ब्रह्मशिवयमानां तत्तन्मन्दप्रक्षेपेण मन्त्र
पाठपूर्वकं विसर्जनं विधाय मन्त्रपाठं विना प्रेतस्य विसर्जनं कुर्यात्॥ ततो विष्णवाद्यवनेजनपात्रं क्रमेण प्रत्येकं वामहस्ते कृत्वा प्र
त्येकं मोदकादीन्यादाय विष्णो पिण्डे प्रत्यवनेनिक्ष्व ते नमः॥ ब्रह्मन् पिण्डे प्रत्यवनेनिक्ष्व ते नमः॥ शिव पिण्डे प्रत्यवनेनिक्ष्व ते न
मः॥ सपरिवारयम पिण्डे प्रत्यवनेनिक्ष्व ते नमः इति प्रत्येकं चतुर्षु पिण्डेषु प्रत्यवनेजनं दत्वा प्रेतावनेजनपात्रं वामहस्ते कृत्वा 251
कुशादीन्यादाय॥ अद्यामुकगोत्रामुकपतितप्रेतविष्णुरूपेदं प्रत्यवनेजनं मद्दत्तं तवोपतिष्ठतामिति प्रेताय प्रत्यवनेजनं द
द्यात्॥ ततो नीवीं विस्रस्य सव्यं कृत्वाचम्यापसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय प्रत्येकं विष्णो ब्रह्मन् शिव य रत्न
यम सपरिवार पतितप्रेतविष्णुरूप एतत्ते वास इति क्रमेण पिण्डोपरि सूत्रं दद्यात्॥ ततो गन्धादिभिः पिण्डान् संपूज्य मोदकादीन्या २५१
दाय॥ अद्य विष्णो एतानि पिण्डे सूत्र गन्ध पुष्प धूप दीप नैवेद्यादीनि नैवेद्यानि तुभ्यं नम इति गन्धादिकमुत्सृजेत्॥ पुनर्मोदकादीन्या

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दाय॥ अथब्रह्मन्नेतानिपिण्डेस्रक्चंगंधपुष्पधूपदीपैश्चवादिनैवेद्यानितुभ्यंनमः॥ पुनर्मोटकमादाय॥ अथशिवेतानिपिंडेस्रक्चं
गंधपुष्पधूपदीपैश्चवादिनैवेद्यानितुभ्यंनमः॥ पुनर्मोटकादीन्यादाय॥ अथसपरिवारयमैतानिपिण्डेस्रक्चंगंधधूपदीपैश्चवा
दिनैवेद्यानितुभ्यंनमः॥ ततःकुशादिकमादाय॥ अद्यामुकगोत्रामुकपतितप्रेतविष्णुरूपेतानिपिण्डेस्रक्चंगंधपुष्पधूपदीपैश्चवा
दिनैवेद्यानिमदत्तानितवोपतिष्ठन्तामितिगंधादिकमुत्सृजेत्॥ ब्राह्मणस्यकरेन्यस्ताःशिवाआपोभवंतुमेइतिजलंदद्यात्॥ ततःपि
ण्डसमीपेनतत्पिण्डशेषान्नंविकिरेत्॥ ततःआचांतेषुविप्रेषुप्रथमंविष्णुविप्रकरे॥ अपांमध्येस्थितादेवाःसर्वमप्सुप्रतिष्ठितं॥
ब्राह्मणस्यकरेन्यस्ताःशिवाआपोभवंतुमेइतिजलंदद्यात्॥ भवंतुतेइतिब्राह्मणाःप्रतिवचनं॥ ततःलक्ष्मीर्वसतिपुष्पेषुलक्ष्मी
र्वसतिपुष्करे॥ लक्ष्मीर्वसतिगोष्ठेषुसौमनस्यंददातुमे॥ अस्तुसदानवेतिप्रतिवचनं॥ अक्षतंचास्तुमेपुण्यंशांतिःपुष्टिर्धृतिश्चमे॥
यद्यच्छ्रेयस्करंलोकेतत्तदस्तुसदाममः॥ इतितण्डुलान्दद्यात्॥ अस्तुसदासमेतिप्रतिवचनं॥ अनेनैवप्रकारेणाप्रत्येकंब्राह्मणहस्ते
जलपुष्पतण्डुलान्दद्यात्॥ मोटकादीन्यादाय॥ अथविष्णोदत्तैतदन्नपानादिकमुपतिष्ठतां॥ अथब्रह्मणोदत्तैतदन्नपानादिक
मुपतिष्ठतां॥ अथशिवस्यदत्तैतदन्नपानादिकमुपतिष्ठतां॥ अथसपरिवारस्ययमस्यदत्तैतदन्नपानादिकमुपतिष्ठतां॥ वि
ष्ण्वादिविप्रकरेषुक्रमेणाक्षय्योदकंदद्यात्॥ ततःकुशादीकमादाय॥ अद्यामुकगोत्रस्यामुकपतितप्रेतस्यविष्णुरूपिणोदत्तैत
दन्नपानादिकमुपतिष्ठतामितिप्रेतविप्रकरेक्षय्योदकंदद्यात्॥ उपतिष्ठतामितिसर्वत्रप्रतिवचनं॥ ततःसव्यंकृत्वादक्षिणांदि

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२५२

शंयश्यन् अघोरो विष्णुः अघोरो ब्रह्मा अघोरः शिवस्तु अघोरः सपरिवाराय मोस्तु ॥ अघोरः पतितप्रेतो विष्णुरूपोस्तु इति प्रत्येकं प
रिपूर्वाग्रां जलधारां दद्यात् ॥ ततोपसव्यं कृत्वा स्वधावाचनीयान् कुशान् सपवित्रान् क्रमेण प्रत्येकं पिंडोपरि धृत्वा स्वधां वाचयि
ष्ये इति विष्ण्वादि चतुरो ब्राह्मणान् प्रति ब्रूयात् ॥ वाच्यतामिति तैरनुज्ञातः ॥ विष्णवे ब्रह्मणे शिवाय सपरिवाराय यमाय स्व
धा नमः ॥ इत्युच्यतामिति वदेत् ॥ अस्तु स्वधा नम इति तेषूच्यमानेषु ॥ जलादिसहितं पुटकादिकं हस्ताभ्यां मादाय ॥ ऊर्जं वहंतीरि
ति मंत्रेण क्रमेण प्रत्येकं पिंडेषु धृत सपवित्रकुशोपरि दक्षिणाग्रां धारां दद्यात् ॥ ततो नमो वाचयिष्ये इति प्रेतब्राह्मणं प्रति ब्रू
यात् ॥ वाच्यतामिति वदेत् ॥ अस्तु नम इत्युच्यमाने ॥ पुटकादिस्थ जलादिकं हस्ताभ्यां मादाय मंत्र पाठं विना ॥ इदमूर्जं मदत्तेः
तवोपतिष्ठतामिति पिंडेषु धृत सपवित्रकुशोपरि दक्षिणाग्रां धारां दद्यात् ॥ ततो नम्री भूय पिंडान् ॥ घ्रायोत्थापयेत् ॥ पिंडाधा
रकुशान् स्तु कांस्यवह्नौ क्षिपेत् ॥ विष्ण्वाद्यर्घपात्राणि उत्तानि कृत्वा प्रेतार्घपात्रं संचालयेत् ॥ तन्त्रप्रेसन कुशादीन्यादाय दक्षि
णां दद्यं च ॥ अद्य विष्ण्वोः कृतैतत्क्षुद्रप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृ
जे इति दक्षिणां दद्यात् ॥ स्वस्तीति प्रतिवचनं ॥ अद्य ब्रह्मणः अद्य शिवस्य अद्य सपरिवारस्य यमस्य कृतैतत्क्षुद्रप्रतिष्ठार्थमि
त्यादि ॥ अद्यामुकगोत्रस्यामुक पतितप्रेतस्य विष्णुरूपिणः कृतैतत्क्षुद्रप्रतिष्ठार्थमित्याद्युक्त्वा प्रत्येकं ब्राह्मणेभ्यो दक्षिणां द
द्यात् ॥ स्वस्तीति प्रतिवचनं ॥ तन्मध्ये ग्रावतं ब्राह्मणं प्रेतस्थाने भोजितं प्रेतबुद्ध्या स्मरन् गोभूहिरण्यवस्त्रादिदानेनातिशयेन सं

252

रत्न
२५२

८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संतोषयेत् ॥ ततोभिरम्यतामित्युक्त्वा विस्वादिवत्तरोब्राह्मणान् दक्षिणाहस्तांगुष्ठे धृत्वोत्थापयेत् ॥ स्वस्त्यस्त्वित्युक्त्वा प्रेतवाहनं दक्षि
णाहस्तांगुष्ठे धृत्वोत्थापयेत् ॥ ततोजलपात्रं गृहीत्वा प्रेतब्राह्मणावर्जं ॥ आमावाजस्येति मंत्रेण वारिधारयो ब्राह्मणान्निर्वेष्टयेत्
प्रणाम्याष्टौ पादानन्तुव्रज्य तान्नमस्कुर्यात् ॥ ततउपविश्यसव्यंकृत्वा ॥ देवाश्चइतिविसर्जयेत् ॥ ततोपसव्येनदीपानाछाद्यसव्यंकृत्वा
हस्तौ पादौ प्रक्षाल्याचमेत् ॥ प्रमादादित्यादिश्लोकंपठित्वा श्राद्धसंपूर्णानाकामो विष्णुंस्मरेत् ॥ पिण्डान्जलेक्षिपेत् ॥ व्यासः स्कंद
ब्रह्मदंतमेवविप्रहिरण्येनसमर्चयेत् ॥ वाचाप्येनभूम्याव प्रेतस्यमनसास्मरन् ॥ वहिर्गत्वातिलांभस्कनतस्मैदद्यात्समाहितः ॥ मित्रभ
त्यजनैः सार्द्धं पश्चाद्भुंजीतवाग्यतः ॥ एवंविशुमतेस्थित्वा योदद्यात्स्त्रघातिने ॥ सत्रुदरंतिनंक्षिप्रं नात्रकार्याविचारणा ॥ ततोस्थी
नि क्षीरेणाक्षालयित्वा पूर्वोक्तप्रकारेणाशववदग्ध्वा उदकदानादिसपिण्डनान्तं कर्मकुर्यात् ॥ ॥ इति प्रेतश्राद्धकरणं ॥ ॥ अ
थ शौचनिर्णय ॥ तत्रतावत्कर्भस्रावाशौचमाह स्नावेमातुस्त्रिरात्रंस्यात्सपिण्डाशौचवर्जनमिति ॥ अत्राद्यमासत्रयपर्यन्तं श्राव इ
त्युच्यते ॥ सपिण्डानांतु मत्रिरात्रं किंतुस्नानमात्राच्छुद्धिः ॥ सद्यश्शौचंसपिण्डानां गर्भस्यपतिते सतीतिस्मरणात् ॥ ततीयमासादू
र्द्धं समप्रमासात्प्राक् मातुर्यथामाससंख्यादिनं ॥ चतुर्थेमासि चतुर्थदिनानि पंचमे पंचमषष्ठे षट् ॥ तथाचमरीचिः ॥ गर्भश्रुतांय
थामाससमचीरेनूत्तमेत्रयइति ॥ अपिरे आद्यमासत्रयेपितृतीयमासादूर्द्धं सद्यःशौचं सपिण्डानांगर्भस्यपतनेसतीतिवचनात्स
पिण्डेषुस्नानादेवशुद्धिः प्राप्नानद्यासाचतुर्थमाससमतिव्याप्त्यैवनतुपंचमषष्ठयोरपि ॥ पातेमातुर्यथामासंसपिण्डानांदिनत्रय

CC-0. In Public Domain. Digitization by eGangotri

मिति मरीचिवचनविहितेन त्रिरात्रेणावाधात् ॥ अत्र यातः पंचमषष्ठयोरिति पराशरोक्त पंचमषष्ठमासयोः पातशब्दोऽ
ष्टव्य ॥ सप्तममासमारभ्य तु मातुः सपिण्डानां च स्वस्वजात्युक्तं दशाहादिकमेव ॥ अनन्तर्द्धस्वजात्युक्तं सामासो वमिष्यत इति स्मृ
तेः ॥ अतऊर्द्ध्वं यराप्मासाद्भर्द्ध ॥ एतच्च गर्भस्रावाशौचं सर्ववर्णानां समानां ॥ तद्विधायकवचनेषु वर्णविशेषस्यानुक्तत्वात् ॥ पत्न्
त्नमेतत्रयः ॥ राजन्ये तु चतूरात्रं वैश्ये पंचाहमेव च ॥ अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्त्तितेति मारीचं ॥ तस्याद्यमासत्रय
परतया अविरयदावगतयाव्यवस्था ॥ ॥ इति गर्भस्रावाशौचं ॥ ॥ अथ शिशुमरणाशौचं ॥ तत्र तावदुत्पन्नस्य शिशोर्ना
लच्छेदनात्प्रागेव मरणे सति जननाशौचे विशेषः स्मर्यते ॥ जीवन्यातो यदि मृतो मृतस्तकस्ववत्तु ॥ सूतकं सकलं मातुः पित्रादी
नां त्रिरात्रकमिति सूतकं जननाशौचमित्यर्थः ॥ वालछेदातु नरं शिशोर्मरणे मृतोत्पत्तौ वा संपूर्णमेव जनना-नाशौचं ॥ जातमृते मृ
तजाते वा सपिण्डानां दशाहमिति हारीतोक्तेः ॥ यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं ॥ छिन्ने नाले ततः पश्चात्सूतकं तु विधी
यते इति जैमिनिवचनाच्च ॥ शिशुमरणनिमित्तस्य त्वाशौचस्य तु नमात्रा चित्तप्तिः ॥ अनिवृत्ते दशाहे तु पंचत्वं यदि गच्छति ॥ स 253
घस्य वविशुद्धिः स्यान्न प्रेतं नोदकक्रियेति विष्णूक्तेः ॥ अत्र दशाहः शब्दः स्वस्वजात्युक्तजन्माशौचकालोपलक्षणं ॥ एवं प्राङ्नाम
करणात्सद्यः शौचमिति विशेषवचने नामकरणशब्दोपि जननाशौचोपलक्षकः ॥ तथा जन्माशौचोत्तरकाले दंतोत्पत्तेः प्राग्मृता रत्न
वग्निदाहाभावे निखननपक्षे सपिण्डानां स्नानादेव शुद्धिः ॥ नादंतजन्मनः सद्य इति याज्ञवल्क्योक्तेः ॥ विष्णुरपि ॥ अदंतजाते वाले २५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सयएवनास्याग्निसंस्कारोवोदकक्रियेति: ॥ अग्निदाहपक्षेतुएकाहः ॥ तथाचयमः ॥ अदंतजातेतनयेशिशौगर्भच्युतेतथा ॥ सपिंडानां
तुसर्वेषांमहोरात्रमशौचकमिति ॥ अग्निदाहविकल्पस्तुमनुस्मृतावुक्तः ॥ नात्रिवर्षस्यकर्त्तव्याबांधवैरुदकक्रिया ॥ जातदंतस्यवां
कुर्यान्नाम्निवापिकृतेसतीति ॥ अत्रनात्रिवर्षस्येतिपूर्वार्द्धेनोदकक्रियोपलक्षितदाहनिषेधाद्दूनद्विवर्षमृतौनिखननपक्षस्यव
मुख्यः जनद्विवर्षंनिखन्नेनकुर्यादुदकंततइतियाज्ञवल्क्योक्तः ॥ यद्यप्यूनराद्धेतनाद्विषयस्यवजातदंतस्यवानांत्रिवार्षीत्यने
नदाहपक्षोप्युक्तस्तथाप्यसावनुकल्पः ॥ ऊनद्विवर्षपदस्यवैयर्थ्यप्रसंगात् ॥ एवंचऊनद्विवर्षादधिकस्यदाहपक्षोमुख्योन्यस्त्व
नुकल्पइतिव्यवस्थापनीयं ॥ अत्रदंतपदंस्वकालस्यसप्तममासलक्षणं ॥ दंतजन्मसप्तमेमासीत्युपनिषद्दर्शनात् ॥ दं
तोत्पत्तेरूर्द्ध्वंतृतीयवर्षमभिव्याप्यचूडाकर्मरहितस्यदाहपक्षेत्र्यहं ॥ यदाहांगिराः ॥ यद्यप्यकृतचूडोवैजातदंतस्तुसंस्थि
तः ॥ दाहयित्वातथाप्येनंनाशौचंत्र्यहमाचरेदिति ॥ यद्यपिदंतवत्त्वंनिमित्तास्मिन्वयोवर्षत्रयाद्दूर्द्ध्वंकुलधर्मापेक्षयायश्चौलक
र्मरहितस्तद्विषयमित्युक्तंतथापिजातदंतइतिविशेषणवैयर्थ्यप्रसक्त्याउपेक्ष्यं ॥ नहिसंपूर्णत्रिवर्षस्याजातदंतासंभवेन
खननपक्षेत्वेकाहः ॥ आचूडान्नैशिकीस्मृतेतियाज्ञवल्क्यस्मृतेः ॥ तत्राकृतचूडानामशुद्धिर्नैशिकीस्मृतेतिमनूक्तेश्च ॥ य
स्तुप्रथमेद्वितीयेवाकृतचौलः ॥ चूडाकर्मद्विजातीनांसर्वेषामेवधर्मतः ॥ प्रथमेद्वितीयेवाकर्त्तव्यंश्रुतिनोदनादिति ॥
मनूक्तेस्तस्यमरणेत्रिरात्रं ॥ निर्वृत्तचूडकानांतुत्रिरात्राच्छुद्धिरिष्यतेइतितेनैवोक्तत्वात् ॥ तृतीयवर्षादूर्द्ध्वंत्वकृतचूडस्याप्रा

CC-0. In Public Domain. Digitization by eGangotri

रत्न २५४

यतःपूर्वं त्रिरात्रमेवाशौचं ॥ त्रिरात्रमाचूडादेशादिति याज्ञवल्क्योक्तेः ॥ यद्यप्यकृतचूडो वै इत्यादि पूर्वोदाहृताङ्गिरोवचनाच्च
एतच्च सपिण्डानामाशौचमुक्तं ॥ मातापित्रोस्तु जन्माशौचोत्तरकाले प्राग्दन्तजननात्पुत्रमृतौ विशेषस्त्रिरात्रं वैत्रिकालादभि
संबंधादूर्ध्वं ध्यादयं त्र्यहमिति स्मरणात् इदमपि सर्ववर्णेषु समानमाशौचं ॥ तुल्यवयसि सर्वेषां मतिक्रान्ते तथैव चेति व्या
घ्रपादोक्तेः ॥ इत्यनुपनीताशौचं ॥ ॥अथ कन्यामरणे विशेषः ॥ तत्र जन्माशौचोत्तरमकृतचौलायाः कन्याया मरणे
सपिण्डानां स्नानात्शुद्धिः ॥ अकृतचूडायां तु कन्यायां सद्यः शौचं विधीयते इत्यापस्तंबोक्तेः ॥ एतच्च मूलपुरुषमारभ्य त्रिपुरुषप
र्यन्तं ज्ञेयं ॥ अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते इति वशिष्ठवचनात् ॥ चौलोत्तरे वाग्दानात्पूर्वमेकाहोरात्रं ॥ अहस्त्वदत्तक
न्यासु बालेषु च विशोधनमिति याज्ञवल्क्यस्मृतेः ॥ वाग्दानोत्तरं विवाहात्प्राक्तु पितृगोत्रे भर्तृगोत्रे च त्रिरात्रं ॥ तदाह मरीचि
अवारि पूर्वं प्रत्तानु याने व प्रतिपादित ॥ असंस्कृतासु संज्ञेया त्रिरात्रमुभयोः स्मृतमिति ॥ विवाहोत्तरं तु न पितृसपिण्डानामा
शौचं ॥ तथा च वसिष्ठः ॥ संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे इति ॥ अयं च निषेधः पितुर्मातुर्भ्रातुश्च सकाशादन्योय ॥ पितृस
पिण्डस्तद्विषयो ज्ञेयः ॥ पित्रादीनां विशेषस्य वक्ष्यमाणत्वात् ॥ अथासंस्कृतकन्यामरणे मातापित्रोर्विशेषमाह माधवीय
मदनरत्नादौ च काश्यपः ॥ अजातदन्तासु पित्रोरेकरात्रमिति ॥ स्मृत्यन्तरे विशेषः ॥ दन्तजननोत्तरं तु त्रिरात्रं प्रत्ताप्रत्तासु
पोषितृसंस्कृतासंस्कृतासु च मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधीति शंखस्मृतेः ॥ अत एव विवाहोत्तरमप्येतत्स्वहृत्ते

254

रत्न २५४

९०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रिरात्रमेव ॥ वैजिकादभिसंबधादनुरुंध्यादघं त्र्यहमिति वचनाच्च ॥ भ्रातृसंस्थाया भगिन्या मरणे परगृहस्वगृहरूपदेशभेदा
त्पक्षिणीत्रिरात्रे व्यवस्थिते इत्ययमेस्फुटीकरिष्यति ॥ इति कन्यायां मरणाशौचं ॥ अथोपनीतसपिण्डाशौचं ॥ ॥ मनुः ॥ दशाहं शा
वमाशौचं सपिण्डेषु विधीयते ॥ जननेप्येवमेव स्यान्निपुणां शुद्धिमिच्छतामि ॥ एतच्च शावाशौचे दशरात्रमुपनयनादनन्तर
मित्युक्तं याज्ञवल्क्येन ॥ दशरात्रमतः परमिति ॥ तथा ॥ क्षत्रस्य द्वादशाहानि विशः पञ्चदशैव तु ॥ त्रिंशद्दिनानि शूद्रस्य षोड
श वर्षान्पूर्वं विवाहसन्निशेयं षोडशवर्षोत्तरं त्वकृतविवाहस्यापि मासाशौचप्रवृत्ति ॥ तथा च शंखः ॥ अनूढभार्यः शूद्रस्तु
षोडशाब्दान्तरात्परं ॥ मृत्युं समधिगच्छेच्चेन्मासांस्तस्यापि बान्धवाः ॥ शुद्धिं समधिगच्छन्ति नात्र कार्या विचारणा ॥ यत्त्वंगिरसो
क्तं सर्वेषामेव वर्णानां सूतके मृतके तथा ॥ दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीदिति ॥ तद्देशाचारतो व्यवस्थाप्यं ॥ सा
पिण्ड्यं च सप्तपूरुषपर्यवसायि ॥ तदुक्तं मात्स्ये ॥ लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ॥ पिण्डदः सप्तमस्तेषां सापिण्ड्यं
साप्तपौरुषमिति ॥ पिण्डदस्य पित्रादिभिः षड्भिः सापिण्ड्यमित्यर्थः ॥ एवं सति सपिण्डानां सपिण्डेषु [illegible]षु दशाहाद्याशौचं
स्मृतिवचः पर्यालोचनया नत्वेवयुक्तत्वात् ॥ इति सपिण्डाशौचं ॥ अथ सोदकाद्याशौचं ॥ जाबालिः ॥ एकोदकानां तु त्र्यहो गो
त्रजानामहः स्मृतमिति ॥ सप्तमपूरुषादूर्द्ध्वं तु दशपूरुषपर्यन्ता एकोदकाः ॥ तेषां सोदकान्तरप्रसवे सोदकान्तरस्योपनीतमर
णे त्रिरात्रमित्यर्थः ॥ यद्यपि मनुना सपिण्डता तु पूरुषे सप्तमे विनिवर्त्तते ॥ समानोदकभावस्तु जन्मनाम्नोरवेदने इति सामा

CC-0. In Public Domain. Digitization by eGangotri

मनोयावज्जन्मनामसोदकत्वमुक्तं ॥ तथापि तच्चतुर्दशपुरुषान्तमेव द्रष्टव्यं ॥ गोत्रजेष्वेकाह विधानात् ॥ समानोदकभावस्तु
निवर्त्तेताचतुर्दशादित्यग्निपुराणवचनात् ॥ यद्यपिचतुर्दशपुरुषादूर्द्धमविशेषेणगोत्रजत्वमस्ति तथापिएकविंशतिपु
रुषपर्यन्तमेवैकाहः तदुत्तरंस्नानाच्छुद्धिरितिपस्यत्प्रवृत्तेरौचित्यात् ॥ तेनाहबृहस्पतिः ॥ स्नात्वाशुध्यन्तिगोत्रजाइति ॥ इ
तिमोदकाद्याशौचं ॥ ॥ अथासगोत्रसपिण्डाशौचं ॥ पित्रोर्मरणेऊढकन्यानामाशौचमाहवृद्धमनुः ॥ पित्रोरुपरमेस्त्रीणांमू
ढानांतुकथंभवेत् ॥ त्रिरात्रैःशुद्धिःस्यादित्याहभगवान्यमइति ॥ अनूढानांतुस्नानादेवशौचं ॥ कन्यामरणेजननेनोत्तरंपि
त्रोरप्यविशेषेणत्रिरात्रमित्युक्तमेव ॥ भ्रातुरपिस्वगृहेभगिनीमृतौत्रिरात्रं ॥ यदाहविष्णुः ॥ संस्कृतासुस्त्रीषुनाशौचंपितृप
क्षेतत्प्रसवमरणेचेत्पितृगृहेस्यातां तदैकरात्रं त्रिरात्रंवेति ॥ अत्रप्रसवस्यैकाहोमरणेत्रिरात्रमितिव्यवस्थितोयंविकल्पइ
त्युक्तंमिताक्षरायां ॥ इदमेवाभिप्रेत्योक्तमंगिरसापि ॥ गृहेयस्यमृतःकश्चिद्दशपिण्डःकथंचन ॥ तस्याप्यशौचंविज्ञेयंत्रि
रात्रंनात्रसंशयइतिः ॥ यत्तुब्रह्मपुराणे ॥ दत्तानारीपितुर्गेहेसूयेताथम्रियेतवा ॥ तद्बन्धुवर्गस्त्वेकेनशुचिस्तज्जनकस्त्रिभि
रित्युक्तं ॥ तदेतत्समानार्थकमेवद्रष्टव्यं ॥ सूतौबन्धुवर्गोजननश्चैकेनशुचिर्मरणेबन्धुवर्गोजनकश्चत्रिभिःशुचिरितिव्याख्या
नात् ॥ अतएवपितृगेहेकन्याप्रसवेपित्रोर्भ्रातुश्चैकाहः प्रसवाशौचं ॥ नतुपितृगृहातिरिक्तगृहेतिवचनाभावात् ॥ मरणा
शौचंतुनचाप्यस्यैव ॥ तत्रपित्रोस्त्रिरात्रेणशुद्धिर्वैजिकादित्याद्युदाहृतवचनात् ॥ भ्रातुःपक्षिणीः श्वशुरयोर्भगिन्याश्चेत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्ष्यमाणाय मवाक्यादित्येतान्वाविशेषः ॥ षडशीतौ तु ः भ्रातृगृहे भगिनीमृतौ भ्रातुस्त्रिरात्रं भगिनीगृहे भ्रातृमृतौ भगिन्या अपि (
त्रिरात्रं अन्यत्र पक्षिणीत्युक्तं ॥ षडुक्तं ग्रामे परस्परमृतौ भ्रातृभगिन्योः पक्षिणी भवेत् ॥ पातुलाशौचवेत्युच्यामात्रान मेवाक्रशिष्य
अथ मातामहादिमृतावाशौचं माह बृहस्पतिः ॥ अहं मातामहाचार्यश्रोत्रियेष्वशुचिर्भवेदिति ॥ दौहित्रादिरित्यर्थः ॥ अशुचिर्विवे
केप्रवेताः ॥ मातृष्वसा मातुलान्योः श्वश्रूश्वशुरयोर्गुरौ ॥ मृते चर्त्विजि याज्ये च त्रिरात्रेणाविशुध्यतीति ॥ एतच्च भगिनीपुत्रादिर्गृ
हमरणे इष्टव्यमिति वदंति गृहांतरमरणे तु पक्षिणी ॥ तथा च यमः श्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले ॥ पित्रोस्स्वसरि
तद्वच्च पक्षिणीं क्षपयेन्निशामिति ॥ एतच्चाचार्यमरणे त्रिरात्राद्यभिधानमन्यस्मिन्दाहकर्तरि सति द्रष्टव्यं ॥ यदा तु स्वयमेव दा
हं करोति तदा दशरात्रमाह मनुः ॥ गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरेत् ॥ प्रेताहारैः समं तत्र दशरात्रेण शुध्यतीति ॥ यम
मातुले श्वशुरे पुत्रे गुरौ गर्वे गतासुष ॥ अशौच पक्षिणी रात्रीं मृता माता मही यदीति गुरुः केवलाध्यापकः ॥ वृद्धमनुः ॥ संस्थि
ते पक्षिणीं रात्रीं दौहित्रे भगिनीसुते ॥ संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थित इति ॥ संस्थिते मृते मनुः ॥ मातुले पक्षिणी रा
त्रीं शिष्यर्त्विग्बांधवेषु चेति ॥ बांधवास्तु ॥ आत्मपितृस्वसुः पुत्रा आत्ममातृष्वसुः सुता ॥ आत्ममातुलपुत्राश्च विज्ञेया आत्मबांध
वाः ॥ पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः ॥ पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः ॥ मातुः पितृष्वसुः पुत्रा मातुर्मातृ
ष्वसुः सुता ॥ मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः ॥ २ ॥ इति विधाः ॥ पक्षिणीशब्दार्थस्तु ॥ दिवामरणे तद्दहः अंतरात्रिः

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२५६

परदिनेव ॥ रात्रौ मरणे तु सा रात्रिस्तद्दिनं माहोरात्रश्चेति हरदत्तादिभिरुक्तः ॥ यद्यप्यागामि वर्त्तमानाह ॥ उक्तायां विशिष्य पक्षिणीय
दभिधेयइत्यदोषः ॥ अत एव संस्थिते पक्षिणीं रात्रिमित्यादि प्रागुदाहृतवचने पक्षिणीशब्दान्तरं गात्रिपदोपादानसंगच्छते
यत्त्व हरीत्यत्र तृतीयान्त वल्काः ॥ एवं तेवास्य नूवानां मातुलश्रोत्रियेषु चेति ॥ अत्र मातुलः ग्रहणाद्युक्तवांधवानाद्ययलक्षणामि
तिमिताक्षराया मुक्तं ॥ यच्च विष्णुः ॥ आचार्य्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्य्यसहाध्यायिशिष्येष्वतीतेष्वेकरात्रेणेति श्वशुर्य्यः श्याल
कः ॥ तत्र येषां त्रिरात्रमुक्तं तेषां मेकाह विधानमन्तयकर्त्तृगुणाबदसंनिहितापन्नतमविषयं ज्ञेयं ॥ एवं स्थितेसन्निहितेष्वपिमा
तवाधवेष्वेकाह ॥ समानोदकानां त्र्यहं गोत्रजानामहः स्मृतं ॥ मातृबंधौ गुरौ मित्रे मण्डलाधिपतौ तथेति ॥ जाबालिवचनादिति
वीरमित्रोदयोक्तमनोदेयं ॥ अत एव स्यालकमरणे सन्निधावेकरात्रं ॥ उक्तविष्णुवचसामाधवहरदत्तयोस्तथैव संमतत्वात्
असन्निधौ तु सद्यः शुद्धिः ॥ एवं मन्यत्रापि गुरु लघुयश्चाबवस्थाप्या ॥ अत्र दौहित्रे इत्यादि पुंस्त्वमविवक्षितं निमित्तविशेषणत्वात्
तथा च ॥ दौहित्री भागिनेयादिमरणे प्युक्त आशौचविधिः प्रवर्त्तते एव ॥ अथैकाचार्यायपनीतयोः परस्परमाशौचमेकाहमहाध्वला
यत् ॥ एकाहं ब्रह्मचारिणाः ॥ विष्णुः ॥ असपिण्डे स्ववेश्मनि मृते एकरात्रमिति ॥ ॥ अथ देशाधिपमरणे आशौचमाह मनुः ॥ प्रे
ते राजनि सज्योतिर्यस्याद्विषये स्थितिः ॥ इति विषयदेशे ॥ सज्योतिर्ज्योतिषा सह ज्योतिर्दिनमस्तोदिनरात्रिमृते रात्रिरित्यर्थः ॥ एवं
ग्रामाधिपमरणेपि ॥ अथान्येष्वपि स्वल्पसंबंधयुक्तेषु जामात्रादिषु सचैलस्नानमात्राच्छुद्धिः ॥ तदुक्तं त्रिंशच्छ्लोक्यां ॥ अथ कथमपि

256

राम
२५६

९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वल्पसंबंधयुक्तंस्नानंवासोयुतंस्यादिदमपिसकलंसर्ववर्णेषुतुल्यमिति ॥ माधवीयेपि ॥ जामातुःश्यालकसुतस्यमृतौसन्निधा
वेवसद्यःशुद्धिरिति ॥ इत्यसगोत्रसपिण्डाद्याशौचं ॥ ॥ अथातिक्रान्ताशौचं ॥ तत्रतावज्जननमरणाशौचयोःप्रवृत्तिदिनातिरि
क्तदिनेदशाहमध्येनिमित्तज्ञानेसतिज्ञानदिनादारभ्यदशरात्रादिप्राप्तावपवादमाहयाज्ञवल्क्यः ॥ प्रोषितेकालशेषस्यादिति
प्रोषितेदेशान्तरस्थेतत्रस्थेनप्रथमदिवसमारभ्यसपिण्डजननादिकंनज्ञायतेतस्मिन्निमित्तज्ञानदिनादारभ्यावशिष्टदिनरूपःकाल
शुद्धिहेतुर्नतुसंपूर्णदशाहादिनिरित्यर्थः ॥ तत्रजननाशौचस्यप्रवृत्तिदिनंयस्मिन्दिनेपुत्रादिजननंतद्दिनमेकमेव ॥ मरणाशौच
स्यतुदिनद्वयंप्राणोत्क्रमणादिनंसदाहदिनंवा ॥ तत्रश्रौताग्निरहितस्याद्यं ॥ श्रौताग्निसहितस्य ॥ तत्राद्यमाहपैठीनसिः
अनग्नीमतउत्क्रान्तेराशौचंवाहिद्विजातिष्विति ॥ अत्रादियदाशौचनिमित्तकसंध्यावंदनादिकर्मत्यागोगृह्यते ॥ द्वितीयमपि
सएवाह ॥ दाहादग्निमतोविंद्याद्विदेशस्थेमृतेसतीति ॥ अतएवपितृमरणोत्तरमपिदाहात्प्राक्संध्यादिकर्मपुत्रेणनत्याज्यं
अथदशाहोत्तरंपुत्रजन्मज्ञानेपित्रादीनांस्नानंकर्नास्तीत्याहदेवलः ॥ नाशुद्धिःप्रसवाशौचेव्यतीतेषुदिनेष्वपीति ॥ यद्यपिसूतके
सूतिकावर्जसंस्पर्शोननिषिध्यतः ॥ इत्यंगिरोवचसासर्वेषांदशाहमध्येपिस्पर्शःप्रतिप्रसूतस्तथापिसूतकेकर्मणांत्यागःसंध्या
दीनांविधीयते ॥ इतिवचनात्कर्मानधिकारःप्रयोजकत्वमस्त्येव ॥ जनकस्यतुसचैलस्नानंयावद्देवदशाहमध्येदशाहानंतरम
थस्यइपतास्येवनतुस्नानोत्तरमपिसानथावसंवर्तः ॥ जातेपुत्रेपितुःस्नानंसचैलंतुविधीयते ॥ मातास्पृश्यादशाहेनस्नानात्तुदर्शनं

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२५८

पितुः ॥ इति ॥ अत्र तु पुत्रग्रहणमविवक्षितं विशेषणत्वात् ॥ अत एव कन्याप्रसवे स्नानात्पूर्वमपि तन्नीमस्पृश्यत्वमिति वाचस्पत्यु
क्तमुपेक्ष्यं ॥ माता शुद्ध्येद्दशाहेनेति तदस्पृश्यत्वाभिप्रायेण कर्मानधिकारस्य तु निमित्तभेदेनावध्यन्तरमाह पैठीनसिः ॥ सूतिका
पुत्रवती विंशतिरात्रेण कर्माणि कारयेन्मासेन स्त्रीजननीमिति ॥ एतच्च शूद्रायां न प्रवर्त्तते तस्या मासं कर्मानधिकारस्य त्रिंश
द्दिनानि शूद्रस्येत्यनेनैव सिद्धत्वात् ॥ अत एव विषयेऽप्यपदर्शनादित्यमाये नविंशतिरात्रेऽप्यपि वर्णत्रयं विषयमेव त्रिंश(
श्लोकानामप्येवमेवाङ्गीकृतं ॥ एवं च मासं प्रसवे तु मातुरपरत्र तद्दशाहाधिकमिति ॥ दशाशौचोक्तमनादेयं ॥ यत्र तु क
न्यापुत्रयोर्यमलयोरुत्पत्तिस्तत्र सूतिकायाः कन्योत्पत्तिनिमित्तमासाशौचोत्तरमेव शुद्धिः ॥ अयानां योगपद्येन तु ज्ञेया शुद्धि
र्गरीयसेति देवलवचनात् पितुस्तु यद्यपि सामान्यतः ॥ कर्मानधिकारो दशाहमस्ति तथापि पक्षविदपवादमाह व्यासः ॥ सूति(
कावासनिलयायजन्मदा नाम देवता ॥ तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्त्तिता प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ॥ त्रि
ष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनीति अत्र यागः पूजा प्रथमदिने तु छिन्ने नाले छेदात्प्राग्ज्ञेवज्ञेया ॥ यदाह हारीतः ॥ प्राङ्नाडीछेद
नात्संस्कारपुरणार्थं नकुर्वीत नाड्यां छिन्नायां मशौचमिति ॥ न केवलं पितुरेव ग्रहणाद्य तत्राधिकार ॥ अपि तु ब्राह्मणानां प्रति
ग्रहेऽपि न दोषः ॥ तदाह वृद्धयाज्ञवल्क्यः ॥ कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः ॥ हिरण्यभूगवाश्वाजवासःशय्यासना
दिषु ॥ तत्र सर्वं प्रतिग्राह्यं मृतान्नं तु न भक्षयेत् ॥ भक्षयित्वा तु तन्मोहाद्द्विजश्चान्द्रायणं चरेदिति तथा कर्मविशेषेष्वप्यपवादमा

257

रत्न
२५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह याज्ञवल्क्यः ॥ वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनादिति ॥ अनेहि श्रौते कर्मणि त्यागमात्रे सूतकिनः कर्तृत्वमुक्तं ॥ अन्यत्र तु
न्यस्यैव स्मार्त्तकर्म वदितिमिताक्षरायामुक्तं ॥ कल्पतरुभाष्यकारादयस्तु सर्वत्रापि स्वयमेव कर्तृत्वं वदंति ॥ अतएव हारीतः ॥ क
र्म वैतानिकं कार्यं स्नातोपस्पर्शनात्स्वयं ॥ जन्महान्यो वितानस्य कर्मत्यागो न विद्यते ॥ शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैरि
ति ॥ तथा जातूकर्ण्यः ॥ सूतके तु समुत्पन्ने स्मार्त्तकर्म कथं भवेत् ॥ पिंडयज्ञं चरुं होमं सगोत्रेण कारयेत् ॥ इति ॥ पुलस्त्यः ॥ सं
ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् ॥ न त्यजेत्सूतके वापि त्यजन् गच्छेदधो द्विज इति ॥ अत्र संध्यार्या मानसीन दर्शितेमि
ताक्षरायां ॥ सूतके कर्मणां त्यागः संध्यादीनामित्यनेन त्यागोक्तेरिति प्रासंगिकं समाप्य प्रकृतमनुसरामः ॥ अथ दशाहोत्तरं सपि
ण्डमरणज्ञाने समानदेशे विशेषमाह बृहद्वशिष्ठः ॥ मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तत आ वर्षादहोरात्रं ततः स्ना
नोदकदाने इत्युक्तं तच्चिंत्यं ॥ तन्मूलभूतस्यात्रिपक्षाद्वित्यादिदेवलवचसो देशान्तरविषयताया अनुपपदमेव वक्ष्यमा
णत्वात् ॥ तस्मादेकस्मिन्देशे मिताक्षरायनसारिणुक्तं बृहद्वशिष्ठवाक्योक्तैव व्यवस्था ज्यायसी ॥ अथ देशान्तरसूतकाशौचं ॥ त
त्र तावद्देशान्तरलक्षणमाह बृहन्मनुः ॥ महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः ॥ वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥ इ
ति बृहस्पतिः ॥ देशान्तरं वदन्त्येके षष्टियोजनमायतं ॥ चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये तथैव चेति ॥ एतद्वचनद्वयेन देशान्तर
स्य लक्षणद्वयमुक्तं ॥ षष्टियोजनानन्तरं तदभ्यन्तरेपि भाषाभेदगिरिमहानदीव्यवधानं चेति विशुद्धिविवेके स्पष्टं ॥ तत्र स

रत्न
२५८

पित्रोर्मरणे निर्णयमाह पराशरमाधवीये विष्णुः ॥ अर्वाक्त्रिपक्षात्त्रीणि शंखः षण्मासाच्चादिवानिशं ॥ अहः संवत्सरादर्वा
क् देशान्तरमृतेष्वपि ॥ अत्र दिवाशब्दोहर्द्वयपरः ॥ तेन दिवानिशशब्देन पक्षिण्युक्ता ॥ यदाह देवलः ॥ आत्रिपक्षात्त्रिरा
त्रं स्यात् षण्मासात्पक्षिणी ततः ॥ परमेकाहमावर्षादूर्द्ध्वं स्नातो विशुध्यतीति ॥ अस्मिंश्च वचने यद्यपि देशांतरपदं नास्ति तथा
पि विष्णुवाक्येनास्य तत्समानार्थत्वादेकमूलभूतश्रुतिकल्पनालाघवाच्च देशांतरविषयत्वेनैवास्य व्याख्यानं वैतदुचितं न त
था ॥ हि सन्निकृष्टेप्येकस्मिन्देशे नवममासादूर्द्ध्वं स्नानमुक्तं शाके ॥ इह तु देशांतरे विप्रकृष्टेपि नवममासात्संवत्सरं यावदे
काह इति चेत् ॥ अत्र समाहितं द्वैतनिर्णये ॥ विष्णुदेवलवाक्ययोः संवत्सरवर्षपदयोरिह दशशिष्टोक्तमासान्यवाक्यस्य
प्रागुदाहृतस्य संवादेन पादोनसंवत्सरपरत्वमिति ॥ एवंच देशान्तरेपि पित्रोर्मरणे नवममासादर्वागपि स्नानमात्रमिति
मिताक्षराकारादिमतमुपेक्ष्यं ॥ एतदुक्तमतिक्रांताशौचं दशाहादौ त्वशौचविषयमेव न तु त्रिरात्रादिविषयमपि ॥ अति
क्रांते दशाहे त्विति मनूक्ते दशाहग्रहणात् ॥ अथ मातापितृमरणोक्तस्य त्रिरात्राद्यतिक्रांताशौचस्यापवादमाह पैठीनसी
पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः ॥ श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति ॥ अपिशब्दात्कालांतरेपि ॥ अथ
दंपत्योर्विषयेप्यपवादमाह माधवीये व्यास एव ॥ देशांतरमृते भर्त्तर्यूर्द्ध्वं दशाहाच्च बहिः श्रुते ॥ संपूर्णसूतकं भार्या कुर्याद्दपि
पत्युरिति ॥ अतएवोक्तं स्मृत्यर्थसारे ॥ दशाहमुपक्रम्य दंपत्योः परस्परं ॥ चैवं सवर्णात्तमसपत्नी भवेति ॥ सपत्नमातृविषय

258
रत्न
२५८

CC-0. In Public Domain. Digitization by eGangotri

तुत्रिरात्रं ॥ तथा वक्ष्य ॥ पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः ॥ संवत्सरे व्यतीतेपि त्रिरात्रमशुचिर्भवेदिति ॥ इदमप्यतिक्रा
न्ताशौचं सर्ववर्णेषु समानं ॥ अतिक्रान्ते तथैव वेति प्रागुदाहृतस्मृतेः ॥ दशाहाभ्यन्तरे तु पित्रादेरपि शेषाहोभिरेव शुद्धिः ॥ अस
मीये पितुः प्रेतं श्रुत्वा देशान्तरे सुतः ॥ तिलमिश्रोदकं कृत्वा तच्छेषेणापि शुध्यतीति ॥ शातातपोक्तेः ॥ दशरात्रमशुध्येत शेष
वासरैरिति चतुर्विंशतिमतोक्तेश्च ॥ इति देशान्तरमृताशौचं ॥ ॥ अथ शवनिर्हरणाशौचं ॥ तत्र यः स्नेहादिना सवर्णमसु
पिण्डं शवं निर्हृत्य तत्कुद्धादेर्गृहे वसति तस्य त्रिरात्रं ॥ यदाह मनुः ॥ असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ॥ विशुध्यति
त्रिरात्रेण मातुराप्तांश्च बान्धवानिति ॥ यस्तु तदन्नमश्नाति तस्य दशाहो यस्त्वन्नमश्नाति न च तद्गृहे वसति तस्य त्वेकाहोरात्र
तथा वसत्येव ॥ यद्यन्नमत्ति तेषां तु दशरात्रेण शुध्यति ॥ अनदन्नन्नमह्नैव न च तस्मिन्गृहे वसेदिति ॥ यस्तु शवं स्पृष्ट्वा ग्रामा
न्तरे वसति स्य सज्योतिः ॥ तदाह हारीतः ॥ प्रेतस्पर्शो ग्रामसन्निवेशे दानक्षत्रदर्शनाद्रात्रौ चेदादित्यस्येति ॥ यदि तु वेतनं गृही
त्वा निर्हरति ॥ तदोक्तं कौर्मे ॥ यदि निर्हरति प्रेतं प्रलोभाक्रान्तमानसः ॥ दशाहेन द्विजः शुध्येद्दशाहेन भूमिपः ॥ अर्द्धमासे
न वैश्यस्तु शूद्रो मासेन शुध्यतीति ॥ असवर्णशवाहरणे तु गौतमः ॥ अपरेश्च वर्णाः पूर्ववर्णाद्यस्पर्शेन स्पृष्टो वा वरणान्तत्रश
योक्तमाशौचमिति ॥ उपस्पर्शेनिर्हरेद्यदि तु वेतनं गृहीत्वा हरति तदा द्विगुणमाह व्याघ्रपादः ॥ अवरश्चेद्वरं वर्णं वरो वाप्य
वरं यदि ॥ वहेच्छवं तदाशौचं दृष्ट्वा द्विगुणं भवेदिति ॥ असपिण्डप्रेतालंकरणे कृते ॥ अज्ञानाद्यवासः स्याद्दशकोल्लानमिष्यते

Nepal Sanskrit University, Balaram ... Manuscript ...

CC-0. In Public Domain. Digitization by eGangotri

इति ॥ अनाथशवाहरणे धर्मार्थं तु नाशौचं किंतु स्नानप्राणायामाग्निस्पर्शैरेव शुद्धिः ॥ तदाह पराशरः ॥ अनाथं ब्राह्मणं प्रेतं ये वहं
ति द्विजातयः ॥ पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते ॥ न तेषामशुभं किंचित्पापं वा शुभकर्मणां ॥ जलावगाहनात्तेषां सद्यः शौचं वि
धीयते ॥ तथा ॥ असगोत्रमबंधुं च प्रेतीभूतं द्विजोत्तमं ॥ वहित्वा च दहित्वा च प्राणायामेन शुध्यतीति अंगिराः ॥ यः कश्चिन्नि
र्हरेच्छवं न मसपिंडः कथंचन ॥ स्नात्वा सचैलः स्पृष्ट्वाग्निं तस्मिन्नेवाह्नि वै शुचिरिति ॥ ब्रह्मचारी न कुर्वीत शववाहादिकक्रिया
यदि कुर्याच्चरेत्कृच्छ्रं पुनः संस्कारमेव चेति ॥ वृद्धाशौचं च अयं च निषेधो मातापित्रादिव्यतिरिक्तविषयः ॥ तथा वाह मनुर्दे
वलो ॥ आचार्यं स्वमुपाध्यायं मातरं पितरं गुरुं ॥ निर्हृत्य तु व्रती प्रेतं न व्रतेन वियुज्यत इति ॥ याज्ञवल्क्यः ॥ आचार्यपित्रुपाध्या
यान्निर्हृत्यापि व्रती -- सकटान्नं च नाश्नीयान्न च तैः सह संवसेदिति ॥ सकटान्नमाशौचिनामन्नं ॥ तैराशौचिभिः न देवं ब्रह्म
चारिणः पित्रादेर्दाहादिकरणे तदन्नभोजनाभावेपि संपूर्णाशौचमस्पृश्यत्वलक्षणमस्त्येव ॥ कर्मानधिकारस्तु नास्ति तदाहका
त्यायनः ॥ न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचिदिति ॥ एतदेवाभिप्रेत्य स्मृतिचंद्रिकायां सवर्त्तेनोक्तं ॥ तेनाशौचं न कर्त्तव्यं संध्या
चैव न लुप्यते ॥ अग्निकार्यं च कर्त्तव्यं सायं प्रातस्तु नित्यशः इति ॥ अशौचं कर्मानधिकारलक्षणं न कर्त्तव्यमित्यर्थः ॥ इति निर्हरणा
शौचं ॥ ॥ अथ शवानुगमनाशौचं ॥ अनुगम्यान्यथा प्रेतं ज्ञातिमज्ञातिमेव वा ॥ स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यती
ति ॥ ज्ञातिर्मातृसपिंडः तस्य प्रेतनिर्हरणादिविधाने न दोषाभावात् ॥ दोषः स्यान्न सपिंडस्य तत्रानाथक्रियां विनेति हारीतोक्ते

259

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतच्चमनुवचनंसमवर्णोत्तमवर्णप्रेतविषयंब्राह्मणस्यक्षत्रियप्रेतानुगमनेत्वेकरात्रं॥अहोरात्रंप्रकृतस्यशवानुगमनेवश्ये
यं॥ब्राह्मणस्यवैश्यानुगमनेपक्षिणीइतिमिताक्षरामदनपारिजातत्रिंशच्छ्लोक्यादाउक्तंवस्ननद्विरात्रमुचितं॥तथाचमाध
वीयेपराशरः॥शवंचवैश्यमज्ञानाद्ब्राह्मणोयोनुगति॥कृत्वाशौचंद्विरात्रंसप्राणायामान्षडाचरेदिति॥कौर्मेपिब्राह्मणांप्रक
म्योक्तं॥एकाहात्क्षत्रियेशुद्धिर्वैश्येपिस्यात्त्र्यहेनत्विति॥एवंक्षत्रियस्यशूद्रानुगमनेपि॥दशश्लोकीकर्तुरप्येतदेवसंगतं॥ब्रा
ह्मणस्यशूद्रानुगमनेत्रिरात्रं॥तदाहपराशरः॥प्रेतीभूतंतुयःशूद्रंब्राह्मणोज्ञानदुर्बलः॥अनुगच्छेन्नीयमानंसत्रिरात्रेणा
शुध्यति॥त्रिरात्रेतुततश्चीर्णेनदींगत्वासमुद्रगां॥प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यतीति॥ज्ञानदुर्बलःशास्त्रार्थज्ञानरहि
तः॥यत्तुयाज्ञवल्क्यः॥ब्राह्मणेनानुगंतव्योनतुशूद्रःकथंचन॥अनुगम्यांभसिस्नात्वाअग्निस्पृक्घृतभुक्शुचिरिति॥तद्यदाका
र्यंतरेणाप्यवश्यंशूद्रशवस्यानुगमनंवर्जनीयंस्यात्तदास्नानाग्निस्पर्शादिनाशुचिरितिप्रतिपादनार्थमितिशुद्धिविवेकेव्यक्तं॥शू
द्रस्यद्विजानिगमनेसज्योतिरशौचमाहपारस्करः॥स्पर्शंविनानुगमनेशूद्रोनक्तेनशुध्यतीति॥इत्यनुगमनाशौचं॥ ॥अथमर
णनिमित्तकरोदनाशौचं॥तत्रतावद्ब्राह्मणस्यास्थिसंचयनात्पूर्वममपित्राब्राह्मणानिमित्तकरोदनेकृतेस्नानाच्छुद्धिः॥अस्थि
संचयनादुत्तरंत्वाचमनंतथाच॥शुद्धिविवेकादौब्रह्मपुराणोक्तं॥मृतस्ययावदस्थीनिब्राह्मणस्याहनानितु॥तावत्तोवाध
वास्तत्रैतिनतसंधवैःसह॥तस्यस्नानादेवशुद्धिस्ततस्त्वाचमनंस्मृतमिति॥क्षत्रियादीनांक्षत्रियविषयेवैश्यशूद्रयोश्चवै

Nepal Sanskrit University, Balmeeki Campus, Exhumanated

CC-0. In Public Domain. Digitization by eGangotri

दम
२६०

श्यविषये शूद्रस्यैव शूद्रविषये रोदने सत्यस्थिसंचयनात्पूर्वं सचैलं स्नानं। अस्थिसंचयनादूर्द्ध्वं तु केवलं स्नानं। तदुक्तं तत्रैव
सचैलं स्नानमन्येषां मरणेनास्थिसंचये। कृते तु केवलं स्नानं भवत्रविट्शूद्रजन्मनामिति। अन्येषां क्षत्रविट्शूद्रजनानामित्यन्व
यः। ब्राह्मणस्य क्षत्रियवैश्यविषयेपि तत्रैव। अनस्थिसंचयाद्विप्रो रौति चेत्क्षत्रवैश्ययोः। तदा स्नानः सचैलस्तु द्वितीयेहनि
शुध्यति। कृते तु संचये विप्रः स्नानेनैव शुचिर्भवेदिति। एतदेव क्षत्रियस्य वैश्यविषयेपि ज्ञेयं। ब्राह्मणस्य शूद्रविषयेस्थि
संचयनात्पूर्वं त्रिरात्रं क्षत्रियवैश्ययोस्तु द्विरात्रं अस्थिसंचयनादूर्द्ध्वं तु शूद्रविषये सर्वेषां द्विजातीनामेकाहोरात्रः। तदाह पार
स्करः। अस्थिसंचयनादर्वाग्यदि विप्रोऽश्रुपातयेत्। मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुध्यतीति। अस्थिसंचयनादूर्द्ध्वं मासोया
वद्द्विजातयः। अहोरात्रेण शुध्यन्ति वाससः क्षालनेन वा। सजातेर्दिवसेनैव यहान्क्षत्रियवैश्ययोरिति। अत्र सजातेरित्य
तिमात्रमस्थिसंचयनात्प्राक्कालविषयं। सजातेरिति शूद्रस्याहोरात्राभिधानं तद्गृहं वा माघतु वंधनोऽद्रष्टव्यं। अन्यस्य तु सचै
लं स्नानमेवेति वाजपेययाजिकृतं। त्रिंशच्छ्लोकविवृतैस्थितं। एतच्च सर्वं सर्वसपिण्डविषयं द्रष्टव्यं। सपिण्डस्य तु दोषाभा
वस्योक्तत्वात्। तदाह हारीतः। विहितं हि सपिण्डस्य प्रेतनिर्हरणादिकं। दोषः स्यादसपिण्डस्य तत्रानाथक्रियां विनेति इ
त्यसपिण्डमृतकनिमित्तकरोदनाशौचं। अथ दाहादिकर्मणाशौचं। तत्रासपिण्डे न संबधिनाक्रियमाणो दाहादिकर्मणि
दाहादिनिमित्तं त्रिरात्रमाशौचं कार्यं। तथा च पैठीनसिः। असंबधिद्विजान्नवाहित्वा दहित्वा च सद्यःशौचं संबध त्रिरात्रमिति

260
राम
२६०

९६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्र वहनदहनयोः साहित्यमविवक्षितं ॥ अत एवाग्यविशेषणात्वादित्युक्तं पृथ्वीचन्द्रोदये ॥ तथा च केवलदाहकर्त्तुर्वहनं विना
त्रिरात्रं यथा भवति तथा केवलवहनकर्त्तुर्वहनं विनापि त्रिरात्रं यथा भवति तथा केवलवहनकर्त्तुर्दहनं विनाप्यसगोत्रस्य
त्रिरात्रं यथा भवति तथा केवलवहनकर्त्तुर्वहनं विनापि त्रिरात्रं यथा भवति तथा केवलवहनकर्त्तुर्दहनं विनाप्यसगोत्रस्य
त्रिरात्रं भवत्येव प्रेतपुत्रादिसंबन्धाधिक्ये सति केवलं वहनेऽप्यसपिण्ड्यं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ॥ विशुध्यति त्रिरा
त्रेणेति प्राग्यदुपन्यस्तमनुवचनमपि त्रिरात्रस्योक्तत्वात् ॥ एवं च त्र्यब्दाद्दशवर्षान्तरकालेऽप्रोषितस्यानाहिताग्नेर्मरणावधारणा
द्दाहादि क्रियते तत्र सपिण्डानामगृहीताशौचानां त्रिरात्रं तदुक्तं मैगिरसा देशान्तरमृते श्रुत्वा नाशौचं वेत्कथं च न ॥ कालान्तरे
पितृकर्वीत दाहकाले दिनत्रयमिति ॥ कथं च न मरणसंदेहादीना ॥ गृहीताशौचानां तु सपिण्डानां स्नानमात्रमिति स्मृत्यर्थसारेऽपि
तं ॥ पत्नीपुत्रपौत्रस्तु अगृहीताशौचयोः संपूर्णागृहीताशौचयोस्तत्कर्माधिकारिणोस्त्रिरात्रं ॥ तदुक्तमाश्वलायनगृह्यपरिशिष्टे
अथाहिताग्नेः संस्कारः ॥ स चेद्देशान्तरे दशाहं स्यात्तत्रैव सर्वं समापयेदूर्ध्वमाहिताग्नेर्दाहादिभ्यः सर्वमाशौचं कुर्यात् ॥ कर्म च यथाकाल
मन्येषु पत्नीपुत्रयोः पूर्वमगृहीताशौचयोः ॥ सर्वमाशौचं गृहीताशौचयोः कर्माङ्गं त्रिरात्रमिति ॥ अत्र कर्माङ्गमित्युक्ते दाहादिक
र्मकर्तुरेव त्रिरात्रविधानात् पत्नीपुत्रग्रहणाद्दाहकर्तृमात्रोपलक्षणं ॥ अत एव विज्ञानादर्शे प्रतिकृतिदहनेऽप्यग्निदेशात्त्रिरात्रमित्यु
क्तं त्रात्मेऽपि ॥ एवं पराशरे दग्ध्वा त्रिरात्रमशुचिर्भवेत् ॥ इति ॥ अत्र हि दग्ध्वेति क्त्वाप्रत्ययात् समानकर्तृकयोः ॥ पूर्वकाल इति वि

रत्न २६१ हितप्रतीयमाणांसमानकर्तृकत्वमुपपद्यते॥ एवं पत्नीपुनः संस्कारे पत्युरपि ज्ञेयं॥ पत्योर्मिथश्चैवमिति स्मृत्यर्थसारे॥ आहिता
ग्नेस्तु॥ प्रकृतदाहे सपिण्डानां दशाहमेव॥ नदाहविशिष्टः॥ आहिताग्नेश्चेत्प्रमयोऽग्नियेन तत्पुनः संस्कारं कृत्वा शववद्दाशौचमिति॥ अवै
धदाहस्य पूर्वकृतत्वसंस्कारत्वाभावेपि संस्कारसमानकार्यत्वात्संस्कारत्वविवक्षितत्वात्तद्रूपेक्षया पुनः संस्कारं कृतवंतमुक्तं॥ इतिकर्म
गाशौचं॥ ॥अथमृत्युविशेषप्रयुक्तमाशौचं॥ वृद्धगार्ग्यः॥ वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः॥ आत्मानं घातयेद्यस्तु भृ
ग्वग्न्यनशनांबुभिः॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः॥ तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेदिति॥ असाध्यव्याधि
ग्रस्तस्य शौचाचमनाद्यसमर्थस्यासन्नमृतिकालस्य स्वेच्छया भृगुपातस्य दिनामरणे पुत्रादिसपिंडानां त्रिरात्रमाशौचमित्य
र्थः॥ एतच्च युगांतरपरं॥ भृग्वग्न्यनशनांबुवृद्धस्य मरणं तथेति कलिवर्ज्येषु पाठात्॥ अत्रामत्तमरणाकालस्य प्रमादे
शास्त्रादिनामरणेत्वाहांगिराः अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः॥ तस्याशौचं विधातव्यं कर्तव्या चोदकक्रियेति॥ आ
शौचप्रत्यक्षश्च शवदाहे संपूर्णं पलाशादिप्रतिकृतिदाहे तु त्रिरात्रमिति विवेकः॥ अत्र विषयप्रायश्चित्तमुक्तं स्मृत्यंतरे॥ वा
ह्यालाभिहते विप्रे त्वंतरिक्षमृते पि वा॥ कृच्छ्रातिकृच्छ्रौ कुर्वीत शुद्धिमन्वप्रकीर्तितेति॥ एवं फलकामनया वेणीप्रवेशपति रत्न २६१
सहगमनादिनामरणे संपूर्णमेवाशौच॥ वैधमरणत्वेनाशौचनिषेधस्यासन्नमृतिकालविषयत्वाभावाद्वृद्धगार्ग्योक्तत्रि
रात्रस्य चाप्रवृत्तौ सामान्यसंपूर्णाशौचविधिप्रवृत्तेरेवयुक्तत्वात्॥ अतएव वेणीप्रवेशादौ सद्यःशौचं तद्धरोक्तमनादेयं

261

९६

एवमरणांतिकप्रायश्चित्तमृतेष्वपि ज्ञेयं ॥ यदाह गौतमः ॥ अस्यन्तु प्राणांतिकप्रायश्चित्तं समृतः शुध्येत् सर्वाण्येव तस्मिन्नुदकादीनि
प्रेतकार्याणि कुर्युरिति ॥ अथ ब्राह्मणादिरक्षणार्थं प्रवृत्तस्य मृताशौचं मिताक्षरायां स्मर्यते ॥ ब्राह्मणार्थं विपन्नानां योषितां गा
गृहे पि वा ॥ आहवे पि हतानां च एकरात्रमशौचकमिति ॥ हारलताशुद्धिविवेकयोस्तु पोषितामित्यस्य स्थाने बंदिनामिति
पठित्वा ब्राह्मणार्थे गोगृहे युद्धे च दावाग्नौ मृतानां मेकमेवाशौचमिति ॥ व्याख्याने ॥ रत्नाकरस्तु वंदिनामिति पठित्वा वंदिनां चौ
रादिगृहीतानां च स्त्रीणामाश्रयामेव सरणेऽस्यैकरात्रमशौचमिति व्याख्यौ ॥ आहवः संग्रामस्तत्र हतानां मेत देकाहोरात्राशौचं युद्धभ
ग्नेन कालांतरमरणविषयं ॥ अत एव वृद्धबृहस्पतिः सद्यः स्वाशौचकं मनुना ॥ उद्यते राहवे शस्त्रैः क्षत्रधर्महतस्य च ॥ स
द्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः ॥ क्षत्रधर्मोऽकातरत्वादि ॥ यज्ञः पिण्डदानादिरूपः ॥ संतिष्ठते समाप्तिमेति तथाशौच
मपि सद्यः समाप्तिरित्यर्थः ॥ सद्य इति पातस्य समानेऽहनि सद्य इति शुद्धत्वाहोरात्रार्द्धपरत्वात् ॥ त्रिसंध्यस्य सद्य एव स्नात्रि सध्येका
दिकं स्मृतं ॥ इति ॥ गोभिलभाष्ये भट्टनारायणलिखितवचनात् ॥ अवैधात्मघाते तु मृतानां नाशौचादि निषेधः ॥ कौर्मे ॥ क्रोधा
त्प्रायं विषं वह्निं शस्त्रमुद्बंधनं जलं ॥ गिरिवृक्षप्रपातं च ये कुर्वन्ति नराधमाः ॥ तथा ब्रह्मदण्डहता ये च ये चापि ब्राह्मणैर्हताः ॥ म
हापातकिनो ये च पतितास्ते प्रकीर्तिताः ॥ पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसंचयः ॥ नाश्रुपातश्च पिण्डो वा कार्यं श्राद्धादिकं
क्वचित् ॥ एतानि पतितानां तु यः करोति विमोहितः ॥ तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथेति ॥ अंगिराः ॥ चाण्डालादुदकात्सर्पा

राम
२६२

ब्राह्मणादिहननादपि ॥ दिनिषेधः ॥ आशौचनिषेधस्याप्युपलक्षणं ॥ यदाह यमः ॥ नाशौचं नोदकेनापि न वाहाश्रं न कर्म च ॥ ब्रह्म
दण्डहतानां च न कुर्यात्कटधारणमिति ॥ अत्र विमोहितशब्देन स्नेहादिना निषेधस्तु हस्त्यादिहादिकर्तृः प्रस्तुतार्थेन प्रकृच्छ्रत्रयं
प्रायश्चित्तमुक्तं ॥ अयं चाशौचनिषेधः ॥ संवत्सरं यावदेव ज्ञेयः संवत्सरादूर्द्ध्वं तु सर्वमाशौचादिकं कर्तव्यमेव ॥ तदुक्तं षट्त्रिंश
न्मते ॥ गोब्राह्मणहतानां च पतितानां तथैव च ॥ ऊर्द्ध्वं संवत्सरात्कार्यं सर्वमेवौर्द्ध्वदेहिकमिति तत्र नारायणबलिपूर्वकं कार्यं
यदाह सुमन्तुयाज्ञवल्क्यच्छागलेयाः ॥ राजभिर्निहतानां च शृंगिदंष्ट्रिसरीसृपैः ॥ आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेत् ॥ ना
रायणबलिः कार्यो लोकगर्हाभयान्नरैः ॥ तदा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः इति ॥ आत्मत्यागिनामित्येतत् पतितानामप्युप
लक्षणं ॥ बोधायनादिभिः पतितमृतानामपि नारायणबलिर्विहितत्वात् ॥ सर्पहते तु संवत्सरं यावद्यथा पंचम्यां नागपूजां कृत्वा
वर्षान्तरं नारायणबलिं कृत्वा सौवर्णनागं ब्राह्मणेभ्यो गां च दद्यात्स्नानाय इत्यधिको विशेषः ॥ यदुक्तं भविष्यपुराणे ॥ सुवर्णका
रनिष्पन्नं नागं कृत्वा तथैव गां ॥ व्यासाय दत्वा विधिवत्पितुरानृण्यमाप्नुयादिति यदि तु संवत्सरादूर्द्ध्वं पुत्रादिर्जीवदेवजीवनसं
देहस्तदा संवत्सरादर्वागपि विहितं प्रायश्चित्तं विधाय नारायणबलिं च कृत्वा दाहाशौचादिकं सर्वं कर्तव्यं ॥ तदुक्तं स्मृतिरत्नाव
ल्यां ॥ आत्मनो घातकस्यार्थे ब्रह्मदण्डहतस्य च ॥ तत्र कृच्छ्रचतुष्कं वा त्रिंशत्कृच्छ्राणि वा पुनः ॥ अर्वाक्संवत्सरात्कुर्याद्दहनादि
यथोचितं ॥ कृत्वा नारायणबलिमनित्यत्वान्न दृश्यते इति तत्रैकस्मिन् ब्राह्मणे अष्टौ गावः यकस्मिन् प्रकृच्छ्रे षट्त्रिंशत्कृच्छ्रेषु

262

राम
२६२

षुद्देशेतिप्रायश्चित्तप्रत्याम्नायासम्यगाकल्प्योक्तप्रायश्चित्तं कृत्वा संवत्सरमध्येपि दाहादि विधेयमित्यवसेयं एतच्चाप्रायश्चित्तपू
र्वकनारायणबलिं कृत्वा दाहाद्यनुष्ठाने प्रायश्चित्तार्हाणामेव प्रायश्चित्तानर्हाणां तु प्रकारांतरमुक्तं ब्राह्मे पतितस्य कारुण्याद्यस्तुप्रिं
कर्तुमिच्छति॥ सहिदासीसमाहूय सर्वगां दत्तवेतनां॥ अशुद्धघटहस्तां तां यथाहृत्तत्रवीत्यपि॥ देहासि गच्छ मूलेन तिलानां नव
मव्रणं॥ तोयपूर्णं घटं वेमं सतिलं दक्षिणामुखी॥ उपविष्टस्तु वामेन चरणेन ततः शिवः॥ कीर्त्तयेत्पानकी सतां त्वपि वेति गुरु
र्वदेत्॥ निशम्य तस्य वाक्यं सा तु च्चतत्वा करोति तत्॥ एवं कृते भवेत्तृप्तिः पतितानां च नान्यथेति॥ पानकीसंज्ञा पतितनामोच्चा
र्यघटं क्षिप्येत्यर्थः॥ ॥इति मृतकविषयप्रयुक्ताशौचं॥ अथ शंकरजातीनामाशौचं॥ विष्णुः॥ ब्राह्मणस्य क्षत्रियविट्शूद्रेषु षड्रा
त्रत्रिरात्रैकरात्रैः क्षत्रियस्य विट्शूद्रेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य शूद्रे सपिण्डे षड्रात्रेण शुद्धिर्हीनवर्णानां तूत्कृष्टेषु सपिण्डेषु तदाशौ
चव्यपगमे शुद्धिरिति॥ ब्राह्मणात्क्षत्रियायामुत्पन्नो मूर्द्धावसिक्तोऽनुलोमजस्तस्य सजातीयजननमरणयोस्तु क्षत्रियादिजात्याशौचमे
व॥ क्षत्रियादिकायामुत्पन्नस्य क्षत्रियादिरूपत्वात्॥ क्षत्रियादेर्ब्राह्मण्यामुत्पन्नानां प्रतिलोमजानां तु यद्यपि प्रतिलोमा धर्म
हीना इति वचनात्सजातीयजननमरणयोराशौचं नास्त्येवेति मिताक्षरायामुक्तं तथापि शूद्रवदाशौचं तेषामस्त्येव तदुक्तं माधवीये
ब्राह्मे॥ शौचाशौचे प्रकुर्वीरन् शूद्रवद्वर्णसंकरा इति शंकरजातीनामाशौचं त्रिरात्रं प्रकृत्य विष्णुः॥ अनौरसेषु पुत्रेषु जातेषु च मृ
तेषु च॥ परपूर्वासु भार्यासु प्रसूतासु मृतासु च॥ औरसो धर्मपत्नीज इति परिभाषितादौरसादन्येऽनौरसास्तेष्वित्यर्थः॥ तेन वीजि

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२६३

नोपिक्षत्रजादौ त्रिरात्रमाशौचं सिद्धं पितृपत्न्योः सपिण्डानां त्वेकरात्रं ॥ तदाह हारीतः ॥ परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च ॥ भर्तृ
पित्रोस्त्रिरात्रं स्यादेकाहं तु सपिण्डतः इति ॥ सपिण्डतः सपिण्डानामित्यर्थः ॥ यत्तु प्रजापतिः ॥ अन्याश्रितेषु दारेषु परपत्नीसुते
षु च ॥ गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पितेति ॥ तत्र गोत्रिणः समानोदकाः स्पृष्टा इति माधवीये ॥ स्थितिर्भिन्नपितृक
स्य सोदरस्य जनने एकाहो मरणे त्र्यहः ॥ तदाह मरीचिः ॥ मातृकया द्विपितृकौ भ्रातरावन्यगोत्रजौ ॥ एकाहं सूतके तत्र त्रि
रात्रं मृतके तयोरिति ॥ ॥ इत्यनौरसपुत्राद्याशौचं ॥ ॥ अथ दासाद्याशौचं ॥ तत्र यद्यपि सर्वेषां दासानां स्वस्ववर्णाशौचं क
र्मानधिकारलक्षणमस्त्येव ॥ दासीदासश्च सर्वो वै यस्य वर्णस्य यो भवेत् ॥ तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूतकमित्यंगिर
स्मृतेस्तथापि स्वदास्यां जातस्य गर्भदासस्य स्वैकसाध्ये दास्यकर्मणि स्नानमात्राच्छुद्धिः ॥ अनेनांगीकृतस्य भक्तदासस्य तु त्र्यहाच्छु
द्धिः ॥ तदुक्तं मिताक्षरायां ॥ सद्यः स्पृश्यो गर्भदासो भक्तदासस्त्र्यहाच्छुचिरिति ॥ दत्तक्रीतादिदासानां तु स्वाम्याशौचवाहसंख्यासम
दिनोत्तरं शुद्धिः ॥ तथा चोक्तं षडशीतौ ॥ स्वामिशौचेन दासाद्याः स्पृश्या मासान्तकर्मसु ॥ योग्यास्तु मासतो दासीसूतनाश्चेत्स्पृश्य ता   263
मियादिति ॥ आदिपदादन्तेवास्यादयः यदाह बृहस्पतिः ॥ दासान्तेवासिभृतकाः शिष्याश्चैकत्रवासिनः ॥ स्वामितुल्येन शौचेन शु   राम
ध्यन्ति मृतसूतके इति ॥ अंतेवास्यादिस्वरूपं संशितिस्मृतिखन्नाहृंजवां धवानामन्तज्ञया आचार्यस्य वदेदंतेषु त्वा कालं गुणनिश्चि   २६३
तमित्यादिनारदस्मृतौ स्पष्टं ॥ इति दासाद्याशौचं ॥ ॥ अथ ब्रह्मचार्याशौचमध्ये आशौचं ॥ ॥ तत्र यातेनिर्णयः ॥ यद्यप्यंतरा जन्म

९९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मरणाशौचाहोभिर्विशुध्यतीति सामान्येन याज्ञवल्क्यवचनेन पूर्वाशौचशेषेणैव शुद्धिः प्राप्ता ॥ तथाप्यपवादवचनैर्विशेषविषये साव्य
वस्थाप्यते ॥ तथाहि ॥ तत्र तावत्त्रिरात्रादिसूतकाशौचमध्ये दशरात्रजननाशौचपाते पवादमाहोशनाः ॥ स्वल्पाशौचस्य मध्ये तु दी
र्घाशौचं भवेद्यदि ॥ न पूर्वेणाविशुद्धिः स्यात्स्वकालेनैव शुध्यतीति ॥ यत्र तु दीर्घजननाशौचमध्येऽल्पकालमरणाशौचापन्ने
त्तत्रापि पूर्वशेषेणाशुद्धेरपवादउक्तः षट्त्रिंशन्मते ॥ शावेन शुध्यते सूतिर्न सूतिः शावशोधनीति ॥ यदा तु पूर्वप्रवृत्ताशौचं
स्वल्पमपि पश्चादन्तरापतिताशौचकालार्द्धादधिककालं तदा विधीयते ॥ स्याच्चेत्पंचनमादहः पूर्वेणैवात्र शुध्यत इति अत्र पू
र्वार्द्धे ऽसतो वचनार्थवाद उत्तरार्द्धेन तस्यापवादउच्यते यदि पूर्वाशौचं पंचनमादहः परतोप्यनुवर्त्तते ॥ दशाहाशौचार्द्धकाल
रूपपंचदिनादधिकमिति यावत् ॥ तदा पूर्वशेषेणैव शुद्धिरिति तदर्थः ॥ उदाहरणंतु ॥ गर्भयानकनिमित्तकषडहाशौचम
ध्ये दशाहाशौचमन्येद्युरापन्ने तदा पूर्वशेषेणैव शुद्धिरिति ॥ तथा पूर्वशेषेणाशुद्धेरपवादान्तरमुक्तं बृहन्मनुना ॥ शावशौचे परिस्रा
वे तु सूतका परि सूतके ॥ शेषाहोभिर्विशुद्धेत उदक्यासूतिकां विनेति ॥ उदक्यापदं गर्भस्रावाशौचवतीपरं ॥ तथान्यदप्युक्तं ॥ षड
शीत्यां पूर्वाशौचेन यायातु सूतके मृतके च सा ॥ सूतिकामपि दहित्वा प्रेतस्यैव सुतानयीति ॥ अतएवान्यमरणनिमित्तकपूर्वा
शौचमध्ये मातापित्रोर्मरणनिमित्तमाशौचं पूर्वशेषेण न निवर्त्तते ॥ अपितु मातापित्रमरणनिमित्तं संपूर्णमेव दशाहं एवं मा
त्राशौचमध्ये पित्राशौचपाते पित्रन्तेयं पित्राशौचमध्ये मात्राशौचपाते तु पितृराशौचशेषेणैव शुद्धिः ॥ न तु मातुः संपूर्णादशाहं कि

रम
२६४

त्येकां पक्षिणीमधिकां कुर्यात् ॥ तदुक्तं शंखस्मृतौ मातर्य्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ॥ पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणी
मिति मिति ॥ प्रमीतायां मृतायामित्यर्थः ॥ एतच्चाधिकपक्षिणीविधानं द्वितीयाद्यहोरात्रे सहागमने सति न प्रवर्त्तते ॥ तथा च पृथ्वी
चंद्रोदये पदर्शीति वचनं ॥ मृतं पतिमनुव्रज्य पत्नी चेदनलं गता ॥ तत्र पक्षिणी कार्या येन कादेव शुध्यतीति ॥ अत्र शिष्टाचारो
प्यनुकूलः ॥ तदेवं नाशौचसंनिपाते सति पूर्वाशौचेनोत्तराशौचनिमित्तककार्य्यस्य न प्रतिबंधो न चोत्तरेण पूर्वस्य ॥ तदाहुः शा
तातपः ॥ अंतर्दशाहे जननात्पश्चात्स्यान्मरणं यदि ॥ प्रेतमुद्दिश्य कर्त्तव्यं पिंडदानं स्वबंधुभिः ॥ प्रारब्धे प्रेतपिंडे तु मध्ये चेज्जन
नं भवेत् ॥ तथैवाशौचपरिगणस्तु शेषाद्दशाद्यथाविधीति ॥ ॥ अथाशौचांतरसंनिपातकालविशेषप्रयुक्तं पूर्वाशौचशेष
शुद्धेरपवादं तदाह ॥ गौतमः ॥ रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिरिति अत्र रात्रिशब्दो होरात्रपरः ॥ अत एवाहुः शेषे द्वाभ्या
मिति शंखलिखितौ व्याहुः शब्दोप्येवमिति तानयोः परस्परं विरोधः एवं त्रिरात्रिमात्रावशिष्टे इति मिताक्षरोक्तरात्रिशब्द
स्याप्यहोरात्रपरत्वमिति न तद्विरोधोपि एवं प्रभातशब्दो यामपरः यामशेषे शुद्धिविरुद्धे हादिति शातातपवचोविरोधात् ॥ अ
त एवात्र प्रभातशब्दस्य संगवपरत्वं हरदत्ताभिहितमुपेक्ष्यं ॥ तथा चायमर्थः ॥ पूर्वप्रवृत्ताशौचे होरात्रमात्रे वशिष्टे सति
यद्यन्यदाशौचमापन्ने तत द्वाभ्यामहोरात्राभ्यामधिकाभ्यां शुद्धिः ॥ याममात्रावशिष्टे तु त्रिभिरहोरात्रैरधिकैः शुद्धिरिति ॥
प्रतिवसवविधिश्चायं आशौचांतरेणांतरापतिते तद्दशाहव्ये हादिरूप्येणांधिकयोः प्राप्तयोरेव स्मृत्यहयोः शेषशुद्ध्यानिष्ट

264
रम
२६४

CC-0. In Public Domain. Digitization by eGangotri

नोत्प्रसक्तायां क्रमेणाहोरात्रयामयोः शेषे सत्युत्तरयोरपि द्व्यहत्र्यहयोः प्रापकत्वात्॥ अतएव पूर्वप्रवृत्ताशौचस्याहोरात्रे वशिष्टे प
क्षिण्याशौचपाते सति न द्व्यहवृद्धिः अपूर्वविधित्वापत्तेः अपि च पूर्वाशौचशेषेणैव शुद्धिः एवं पूर्वाशौचे याममात्रावशिष्टे एका
होरात्ररूपाशौचान्तरपातेपि ज्ञेया॥ पूर्वाप्रतिष्टभागइत्यत्रैव प्रतिप्रसवे लाघवात्॥ एतत्तत्त्वद्वैतनिर्णयशुद्धिमयूखयोः॥
स्थितं॥ अत्र द्व्यहत्र्यहद्विर्दशाहाशौचान्तरपातएव नतु त्र्यहाशौचसंनिपातेपीति रुद्रधरोक्तं तूपेक्ष्यं॥ अथ यदि दशरा
त्राः सन्निपाते ऊरांधे दशरात्रमानवमाद्दिवसादिति बोधायनादिवचः मूलवंतः पातिदीर्घसूत्यंतपातिशावं चाशौचं परि
हृत्य दशरात्रादिपदानामाशौचमात्रोपलक्षणत्वात्॥ अन्यथा क्षत्रियादिद्वादशाहादिसंग्रहस्त्रिरात्रादियाते पूर्वशेषेणाशु
द्धिश्च न स्यादिति॥ अथ यत्र पूर्वप्रवृत्ताशौचे होरात्रमात्रावशिष्टे याममात्रावशिष्टे वा सति मात्राशौचसन्निपातस्तत्रापि क्रमे
णाद्व्यहत्र्यहवृद्धिर्भवत्येव पूर्वोदाहृतशंखस्मृत्युक्ताया अधिकपक्षिण्यास्तत्रैवान्तर्भावे सामञ्जस्यात्॥ न हि शंखगौतमःस्मृ
त्योः परस्परं बाधकभावो युक्तिमानुभयोः॥ परस्परपरिहारेण सावकाशत्वादिति दिक्॥ इति पूर्वप्रवृत्ताशौचमध्ये आशौचा
न्तरसन्निपाते निर्णयः॥ ॥ अथाशौचनिषेधः॥ गौतमः नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणां॥ नाशौचं सूतकं प्रोक्तं शा
वे वापि तथैव चेति॥ यत्तु याज्ञवल्क्यो नैषां सद्यः शौचमुक्तं॥ तथाशौचाभावस्यैव प्रतिपादकमित्युक्तं शुद्धिविवेकादौ॥ अतएव
यतीनां सपिंडमरणादौ स्नानानुष्ठानं न दृश्यते॥ ब्रह्मचारिणां तु स्नानानुष्ठानं शवानुगमनादिनिमित्तमित्यन्यथासिद्धं॥ अयं

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मचारिणां सपिण्डादिमरणे आशौचनिषेधः समावर्तनपर्यन्तमेव पूर्वं ब्रह्मचर्यकालमध्ये जातानामेव सपिण्डादीनां समावर्तनान्तर
कालं ब्रह्मचारिणां तु हेयस्य त्रिरात्राशौचस्य प्रमाणसिद्धत्वात्॥ तथाच मनुः॥ आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात्॥ समा
प्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत्॥ इति॥ आदिष्टी ब्रह्मचारीति विज्ञानेश्वरहरदत्तादयः॥ अथाधिकारिभेदात्कर्मविशेषे
आशौचकर्मनिषेधमाह॥ विष्णुः॥ आशौचं न राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्त्रिणां सत्रे न कारूणां कारुकर्मणि न राजा
ज्ञाकारिणां तदिच्छायां न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोरिति॥ एतदेवाभिप्रेत्याह॥ कारवः शिल्पिनो वैद्या दासीदासा
स्तथैव च॥ राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिता इति॥ लघुविष्णुः॥ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे॥ प्रारब्धे सू
तकं न स्यादनारब्धे तु सूतकमिति॥ प्रारंभश्च तेनैवोक्तः प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः॥ नान्दीश्राद्धं विवाहादौ श्रा
द्धे पाकपरिक्रियेति॥ अत्र यज्ञीयवरणं मधुपर्कान्तरं ज्ञेयं॥ गृहीतमधुपर्कस्य यजमानात्तु ऋत्विजः॥ पश्चादशौचे पति
ते भवतीति विनिश्चय इत्यादिपुराणोक्तः॥ यत्तु ज्योतिष्टोमे वृत्तेऽवरणे वरणपक्षे यद्यहृतस्यान्यस्याशौचं स्यात्तन्नस्तेन
न्का तस्य स्थाने मागमयेदिति रामाण्डारभाष्ये उक्तं तेषु यद्यहृतेन स्वीय आद्यः॥ पदार्थोनानुष्ठितस्तद्विषयं यदि त्वनुष्ठित
स्तदा तस्य त्यागः॥ ऋत्विजां दीक्षितानां च याज्ञियं कर्म कुर्वतामिति याज्ञवल्क्यवचसा वरणाभावेपि ऋत्विक्त्वे नैवाहृ
तस्यापि स्वपदार्थकाउपनीतश्ररणानंतरमाशौचाभावस्योक्तत्वात्॥ अतएव दर्शपूर्णमासयोः सामिधेनीरन्वाहहे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ते उक्ते रष्टेने: सामिधेनीभ्य प्रहृत्नोयथाशौचीनदानत्यजे दीक्षितयजमानस्यतु दीक्षणीयेष्ट्यनन्तरे याजमाने कर्मणि नाशौचं दी
क्षणीयातः॥ प्राग्दीक्षितत्वाभावात् नववैतानोयोसनाः कार्यइत्येना वतेवाभिउदीक्षितंग्रहणं याज्ञवल्क्यस्मृतौ व्यर्थमिति मि
ताक्षरायामुक्तत्वात्॥ नदाहच्छंदोगपरिशिष्टे कात्यायनः॥ नत्यजेत्सूतके कर्मब्रह्मचारिस्वकं क्वचित्॥ नदीक्षणात्परंयज्ञे न
कृच्छ्रादितपश्चरेत्॥ पितर्यपिमृते नैषां दोषो भवति कर्हिचित्॥ कर्मणोन्ते सूतकं स्याच्छ्रोहं ब्राह्मचारिणां॥ गोविन्दार्णवेपिमत्
स्यंनरोपन्यासपूर्वमुक्तोर्थोभ्युपगतइत्यवसेयं विवाहादाविन्मन्त्रादिपदानांदीश्राद्धवत्कर्मउपनयनादिकं गृह्यते॥ अतस्य
वाशौचसंभावनायां नांदीश्राद्धस्य प्रधानकर्मदिनव्यवहितकर्त्तव्यतास्मर्यते॥ एकविंशत्यहो यज्ञे विवाहे दशवासराः॥ त्रि
षट्चौलोपनयने नांदीश्राद्धंविधीयतइति श्राद्धकर्त्तव्यत्वे ब्राह्मणानिमंत्रिणाविशिष्टपाकक्रियारूपारम्भे सति नाशौचं श्राद्ध
भोक्तुर्वैधनिमंत्रणादेव नाशौचं तदेतदुक्तं ब्राह्मणानिमंत्रिते च विप्रेष्वारब्धे श्राद्धकर्मणीति मंत्रितस्य विप्रस्य स्वाध्यायाद्वि निरस्य
च॥ देहेपितृषु तिष्ठत्सुनाशौचंविद्यते क्वचित्॥ इति॥ पैठीनसिः॥ विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि॥ न तत्र सूतकं क
र्मतद्वेतयज्ञादिकारयेत्॥ यत्तुभारते॥ तीर्थप्रकस्य नास्नातोनाथ विगच्छेत् उक्तानवसूतकीति वचनं तन्मार्गस्थास्यविषयं मध्ये
मार्गमाशौचसमाप्तियावदवस्थायत्तदुत्तरगमनसंभवात्॥ मार्गस्थास्थैर्नावस्थानासंभवाबाधनेतु नसूतकं॥ अतएवद
क्षः॥ स्वस्थकालेत्विदंसर्वंसूतकंपरिकीर्तितं॥ आपद्गतस्य सर्वस्य सूतकेपि न सूतकमिति॥ यावदापदुपस्थितिस्तावदेवेत्यर्थः

CC-0. In Public Domain. Digitization by eGangotri

राम
२६६

अथ ऽब्दविशेषविषये । आशौचनिषेधमाह मरीचिः ॥ लवणे मधुमांसे च पुष्पमूलफलेषु च ॥ शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयस्सु
च ॥ तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः ॥ पण्येषु चैव सर्वेषु नाशौचं मृतसूतके ॥ इति ॥ आशौचिस्वामिकत्वकृतं प्रतिग्रहायत
क्षणामाशौचमेतेषु लवणादिद्रव्येषु नास्ति वनिज आशौचेप्यप्रतिग्राह्यत्वव्रक्रेयत्वं च सर्वद्रव्येषु नास्तीत्यर्थः ॥ पक्वं शष्कुल्या
दि अपक्वं तण्डुलादि पक्वापक्वाभ्यनुज्ञातमन्नसत्रप्रवृत्तविषयं ॥ यदाहांगिराः ॥ अन्नसत्रप्रवृत्तानामाममन्नमगर्हितं ॥ भु
क्त्वा पक्वान्नमेतेषां त्रिरात्रं तु व्रती भवेदिति ॥ अत्र पक्वान्नपदं शष्कुल्यादिव्यतिरिक्तौदनादिविषयं आमपदं भक्ष्यस्याप्युपल
क्षणं पूर्ववाक्यैकवाक्यत्वात् ॥ तथा चोक्तं ब्राह्मे ब्राह्मे ॥ लवणं मधु मांसं च पुष्पमूलफलानि च काष्ठं तथा पर्णं दधि क्षीरं घृ
तं तथा ॥ औषधं तैलमजिनं पक्वमन्नं च नित्यशः ॥ आशौचिनो गृहाद्ग्राह्यं स्वयं परार्पं च मूलजमिति ॥ मूलजं माकरजं
इत्याशौचनिषेधाः ॥ ॥ अथाशौचिनियमाः ॥ आचन्तविप्रो दशाहमासीत वैश्वदेवविवर्जितः ॥ पंचयज्ञविधानं तु न कुर्यान्मृ
त्युजन्मनोः ॥ मनुः ॥ अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहं ॥ मांसाशनं च नाश्नीयुः शयीरंश्च पृथक्क्षिताविति ॥ क्षारग
रास्तु क्वापि पुराणे ॥ तिलमुद्गाढकी शैब्यं समयत्रीधूमकाडकैः ॥ धान्याकं देवधान्यं च सी धान्यं तथैव च ॥ शिवधान्यं तथा पर्णं राम
मूलक्षारं गणाः स्मृत इति ॥ क्षारेयवक्षारादिलवणविशेषणं वा क्षारग्रहणं तेन सैंधवादेर्निषेध इति मेधातिथिः ॥ निमज्जेयु २६६
रिति मार्जनरहितनिमज्जनमात्रपरं तेन मार्जनं निवृत्तिः ॥ यदाह गौतमः ॥ अधः शय्यासनिनो ब्रह्मचारिणः सर्वे न मार्जयी

266

१०२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रम्भासं न भक्षयेयुः सुराप्रदानादिति ॥ प्रदानमेकादशाहादिकं श्राद्धं तत्पर्यन्तमेतदधःशय्यादिकं मातापित्रोर्मरणोत्तराणामेव ज्ञेयं
दशाहं कष्टयासीरन्मातापित्रोरेव मरणे ॥ इति बौधायनोक्तेः ॥ सपिण्डानां त्वस्थिसंचयनान्तमेव न तु तदुत्तरं ॥ यदुक्तं वि
ष्णुपुराणे ॥ शय्यादानोपभोगस्तु सपिण्डानामपीष्यते ॥ अस्थिसंचयनादूर्द्ध्वं संयोगस्तु न योषितामिति ॥ योषितां संयोगो मैथु
नमस्थिसंचयनादूर्द्ध्वमपि यावद्दशाहं नेष्यत इत्यर्थः ॥ बृहस्पतिः अधःशय्यासनादीनां मलिनाभोगवर्जिताः ॥ अक्षारलवणा
न्नाः स्युर्लघ्वशिनस्त्वस्नशनास्तथेति ॥ दीनाहम्यादिरहिता मलिनां वस्त्रक्षाररहिता ॥ अतएवांत्यदिने वस्त्रक्षालनमुक्तं व्यासे ॥ यस्य
यस्य तु वर्णस्य यत्स्यादशौचं त्वहः ॥ मनत्रगृहशुद्धिं च वस्त्रशुद्धिं करोत्यपीति ॥ लघ्वशीनमन्नमेकस्मिन्नेव प्रथमदिने भोक्तव्यं
क्रीत्वा लब्ध्वान्यगृहादेकान्नमलवणमेकरात्रिं भुजीरन्निति वैजवायस्मृतान् ॥ अत्र रात्रिशब्दो होरात्रपरः ॥ आशौचव्रतकरणाप्र
यशोरात्रिशब्दस्याहःपदस्य च ॥ तथा तथा त्वस्यैव सर्वसंमतत्वात् ॥ प्रथमाहोरात्रे लघ्वशीनमेवान्नमाशौचिभिर्भोज्यमित्यत्र
तात्पर्यात् ॥ भोजनं तु दिवस एव न तु रात्रौ दिवा च नक्तं भोक्तव्यममांसमनुजर्षभेति ॥ विष्णुपुराणोक्तेः ॥ अत्र शक्तस्योपवासोऽ
शक्तस्य लघ्वशीनाशनमिति व्यवस्था युक्ता स्मृतिवचनस्वारस्यात् ॥ तथा च वशिष्ठः ॥ गृहान्तव्रजित्वा अधःप्रस्तरे अनश्नन्त आ
सीरन् क्रीतोत्पन्नेन वा वर्तेरन्निति ॥ आशौचिनां शयनार्थं तृणमयः कटादिः प्रस्तरः ॥ आश्वलायनोऽपि ॥ नैतस्यां रात्र्यामन्नं
पचेरन् क्रीतोत्पन्नेन वा वर्तेरन्निति ॥ त्रिंशच्छ्लोकीकर्तुरप्येवमेव संमतं ॥ अन्नविशेषनिषेधश्च गृह्यकारिकायामलवणाशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रमापान्नभूपमांसानिपायसं ॥ वर्जयेदाहृतान्नेषुवालवृद्धातुरैर्विनेति ॥ भोजनंस्वगोत्रैः सहोक्तंत्वाले ॥ आशौचमध्येयत्नेनभोज
येत्स्वगोत्रजानिति ॥ भोजनपात्राणिपाषाणादीनिज्ञेयानि ॥ पाणिभूसृक्षमयेषुपर्णपुटेषुवाश्नीरन्निति हारीतोक्तेः ॥ स्मृत्यर्थसा
रे एतेनियमाज्ञानसूतके नसूतिरित्यादि ॥ आशौचोत्तरं दानमुक्तं दानमुक्तंसवर्तेन ॥ दशाहात्तुपरंसम्यक्विप्रोधीयीतधर्म
वित् ॥ दानेचविविधंनादेयमशुभात्तारकंमहदिति ॥ इदंदानमशुभादाशौचात्तारकंनिवर्तकमित्यर्थः ॥ ॥ परिसमाप्ते ॥
इतिश्रीगीर्वाणयुद्धविक्रमसाहदेवकृता० शुद्धिनिर्णयनिबंधरत्नं ॥ ॥श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ॥ कृ
तोरत्नोरत्नावलीनामनिबंधः सर्वसंग्रहः समाप्तं तत्र पूर्वार्द्धेनेतत्प्रष्टकेशवः ॥ १ ॥ सिंहोरुद्धतरत्नजातिनिकरैर्विः
न्यासदक्षा यथासच्चित्राभरणायसाधुरवयंच्छिल्पीजनैःपूज्यते ॥ नानाधर्मनिवंधसंग्रहकृतैः सद्भिः प्रयोगैस्तथागीर्वा
णादिमयुद्धविक्रमनृपोरत्नावलीकारकः ॥ २ ॥ अथविवाहोपयोगित्वाज्जोत्रप्रवरनिर्णयः ॥ तत्रबौधायनः ॥ गोत्राणां 267
तुसहस्राणिप्रयुतान्यर्बुदानिच ॥ ऊनपंचाशदेवेषां प्रवराऋषिदर्शनात् ॥ जमदग्निर्भरद्वाजोविश्वामित्रोथगोतमः ॥ अत्रिर्व
शिष्ठः कश्यपः इत्येतेसप्तऋषयः ॥ सप्तानामृषीणामगस्त्याष्टमानां यदपत्यंतद्गोत्रमिति ॥ प्रव्रियंतेहोत्रध्वर्युभ्यामृत्वीयं
तइतिप्रवराः ॥ समानप्रवरांसमानगोत्रांचनोद्वहेत् ॥ पंचानांत्रिषुसामान्यादविवाहस्त्रिषुद्वयोः ॥ भृग्वंगिरोगणोष्वेवशे
ष्वेकोपिवार्यतइतिपरिभाषा ॥ यानिधिकृत्यप्रवराआम्नातास्तेदश गणाऊनपंचाशत् ॥ ॥ तथाहि ॥ भृगूणांसप्तानांगणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

:॥ तत्र त्रयो जामदग्न्या वत्सा विदा आर्ष्टिषेणाश्चेति· तत्र वत्सानां पंच प्रवराः॥ भार्गवच्यावनआप्नवानऔर्वजामदग्न्येति
त्रयो वा॥ भार्गवऔर्वजामदग्न्येति भार्गवच्यावनआप्नवानेति वा ॥ १ ॥ विदानां पंच प्रवराः भार्गवच्यावनआप्नवानऔ
र्वविदेति· त्रयो वा· भार्गवऔर्वजामदग्न्येति ॥ २ ॥ आर्ष्टिषेणानां· भार्गवच्यावनआप्नवानआर्ष्टिषेणाअनूपेति पंच प्रव
राः॥ भार्गवआर्ष्टिषेणाअनूपेति त्रयो वा· एषां त्रयाणां परस्परं अविवाहः॥ गोत्रैक्यात्प्रवरैक्याच्च॥ आर्ष्टिषेणानां केवलभा
र्गवमतेऽपि स्मृत्यर्थसारादिमतेऽपि विदवत्साभ्यां सह प्रवरसाम्यादविवाह इति फलं तुल्यमेव· इति पंच वर्णिताः॥ ग्रंथांतरे· यत्वेजा
मदग्न्या वत्सास्तेषामार्षेयस्य वः भार्गवच्यावनआप्नवानेति वत्सानामार्षेयः प्रवरः भार्गवच्यावनआप्नवान्॥ वात्स्यपुरोधसेति
वत्सपुरोधसयोः पंचार्षेयः॥ भार्गवच्यावनआप्नवानवैजवनिमथितेति पंचार्षेयप्रवरो वैजवनिमथितयोः॥ एषामपि प
रस्परं पूर्वैस्सह अविवाहः॥ प्रवरसाम्यात्॥ चत्वारः शुद्धभृगवः॥ यस्काः मित्रयवः वैन्याः शुनकाश्च॥ यस्कानां॥ यव~ प्रवरः
भार्गववैतहव्यसावेदसेति॥ ४ ॥ मित्रयूनां त्रयः॥ भार्गवदिवोदासवाध्र्यश्वेति॥ भार्गवच्यावनदिवोदासेति वा॥ एको वावा
ध्र्यश्वेति॥ ५ ॥ वैन्यानां त्रयः॥ भार्गववैन्यपार्थेति॥ ६ ॥ शुनकानामेकः॥ शौनकेति ॥ गार्त्समदेति वा॥ भार्गवगार्त्समदेति शौ
वा॥ भार्गवशौनहोत्रगार्त्समदेति त्रयो वा॥ एषां चतुर्णां परस्परं विवाहोऽस्ति ॥ पूर्वोक्तैस्त्रिभिश्च॥ क्वचित्त्वधिकं गणाद्वयमुक्तं
वेदविश्वज्योतिषामार्षेयः प्रवरः॥ भार्गववेदवैश्वज्योतिषेऽति॥ शाठमाठराणां॥ भार्गवशाठरमाठरेति २॥ भृगोस्स प्रवंशा निरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिताः॥ ॥आंगिरसाः षोडश॥ तत्र गौतमांगिरसां सप्त॥ आयास्याः शारद्वताः कौमंडाः दीर्घतमसः कारेणुपालयः वामदेवा औ
शनसाश्चेति॥ तत्रआयास्यानां त्रयः प्रवराः॥ आंगिरस आयास्य गौतमेति॥ ८ ॥ शारद्वतां त्रयः॥ आंगिरस गौतम शारद्वति
त्रयो वा॥ आंगिरस सैन्य गार्ग्येति॥ भारद्वाज सैन्य गार्ग्येति वा॥ आंगिरस सैनैनिरकापिक्केति वा॥ १६ ॥अक्षाणां पंच॥ आं
गिरस बार्हस्पत्य भारद्वाज वादन मानसवेति॥ त्रयो वा॥ आंगिरस वादन मतिसवेति॥ १७ ॥ कपीनां त्रयः प्रवराः॥ आं
गिरस आमहीयव औरुक्षयसेति॥ आंगिरस बार्हस्पत्य भारद्वाजेति वा॥ आंगिरस बार्हस्पत्य कापेयेति वा॥ १८ ॥रूक्षांवजु
र्गां भारद्वाजानां गोत्रैक्यात्प्रायेण प्रवरैक्याच्च नान्वयः॥ केचित्तु आमहीयव औरुक्षयस प्रवरस्य कपेविष्णुवृद्धादिवत्केवलां
गिरसत्वं स्वीकृत्य भारद्वाजैः सह नान्वयमिच्छंति॥ तन्नादर्तव्यम्॥ गोत्रप्रवरमंजरीप्रयोगपारिजातस्मृत्यर्थसारादिबहुग्रंथवि
रोधात्॥ केवलांगिरसस्तु पंच॥ विष्णुवृद्धाः कण्वाः हरितारथीतरामुद्गलाश्चेति॥ तत्रविष्णुवृद्धानां त्रयः॥ आंगिरस पौरु
कुत्स्य त्रासदस्यवेति॥ १९ ॥ कण्वानां त्रयः॥ आंगिरस आजमीढ काण्वेति॥ २० ॥ हरितानां त्रयः॥ आंगिरस ऽ आंबरीषयौ
वनाश्वेति॥ मांधात्रांबरीषयौवनाश्वेति वा॥ २१ ॥ रथीतराणां त्रयः॥ आंगिरस वैरूप राथीतरेति॥ आंगिरस वैरूप पार्ष
दश्वेति वा॥ २२ ॥ मुद्गलानां त्रयः आंगिरसः भार्म्यश्व मौद्गलेति॥ तार्क्ष भार्म्यश्व मौद्गलेति वा॥ २३ ॥ विष्णुवृद्धानां पंचाना
मपि केवलांगिरसत्वं स्वं गणं हित्वा अन्यैः सह विवाहोऽस्ति॥ कश्चित्तु अन्येऽपि केवलांगिरसः पठ्यते॥ यथा कुत्सानां त्रयः॥ आं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गिरसां धानकोल्मेति ॥ एषां हरितैरविवाहः ॥ हरितकुत्सपिंगदर्भभैमगवानामित्याश्वलायनेन सर्वप्रवरसाम्योक्तेः एष
दश्वानां त्रयः ॥ अंगिरसपार्षदश्ववैरूपेति ॥ अष्टादंष्ट्रपार्षदश्ववैरूपेति वा ॥ एषां रथीतरैरविवाहः ॥ प्रवरद्वयसाम्यात् ॥ इ
त्थमंगिरसां षोडश गणा निर्णीताः ॥ ॥ अत्रेश्चत्वारो भेदाः ॥ आद्यास्त्रयो गविष्ठिरवाद्भुतकामुद्गलाश्चेति ॥ तत्राद्यात्रीणां त्रय
प्रराः ॥ आत्रेयआर्चनानसश्यावाश्वेति ॥ २४ ॥ गविष्ठिराणां त्रयः ॥ आत्रेयआर्चनानसगविष्ठिरेति ॥ आत्रेय गाविष्ठिर
पौर्वातिथेति वा ॥ २५ ॥ वाद्भुतकानां त्रयः ॥ आत्रेयआर्चनानसवाद्भुतकेति ॥ २६ ॥ मुद्गलानां त्रयः ॥ आत्रेयआर्चनानसपौ
र्वातिथेति ॥ २७ ॥ एषां चतुर्णां परस्परमविवाहः ॥ कपिञ्जु अतिथीनां त्रयः ॥ आत्रेयआर्चनानसः आतिथेति ॥ धनंजया
नां त्रयः ॥ आत्रेयार्चनानसधानंजयेति ॥ सुमङ्गलानां त्रयः ॥ अत्रिसुमङ्गलश्यावाश्वेति ॥ ॥ इत्यत्रिवंशा निर्णीताः ॥
कश्यपानां त्रयो भेदाः ॥ निध्रुवरेभशाण्डिल्येति ॥ तत्र निध्रुवाणां त्रयः ॥ काश्यपआवत्सारनैध्रुवेति ॥ २८ ॥ रेभानां त्र
यः ॥ काश्यपावत्साररैभेति ॥ २९ ॥ शांडिलानां ॥ काश्यपावत्सारशांडिलेति ॥ काश्यपावत्सारदेवलेति वा ॥ काश्यपावत्सार
आसितेति वा ॥ शांडिलासितदेवलेति वा ॥ काश्यपासितदेवलेति वा ॥ द्वौ वा ॥ देवलासितेति ॥ एषां त्रयाणां कश्यपानां प
रस्परं नोद्वाहः ॥ कपिञ्जु पंचभेदा उक्ताः ॥ तत्र त्रयः पूर्वोक्ता एव ॥ कश्यपानां त्रयः ॥ काश्यपावत्सारासितेति ॥ लौगाक्षाणां
काश्यपावत्सारवासिष्ठेति ॥ वसिष्ठानां चत्वारो भेदाः ॥ वसिष्ठाः कुण्डिनाउपमन्यवः पराशराइति ॥ वशिष्ठानामेकः ॥ वा

CC-0. In Public Domain. Digitization by eGangotri

सिष्ठेति ॥ त्रयो वा ॥ वासिष्ठस्येन्द्रप्रमदभरद्वस्विति ॥ ३१ ॥ कुण्डिनां त्र्ययः ॥ वासिष्ठमैत्रावरुणकौण्डिन्येति ॥ ३२ ॥ उपमन्यू
नां त्र्ययः ॥ वासिष्ठेन्द्रप्रमदआभरद्वस्विति ॥ ३३ ॥ पराशराणां त्र्ययः ॥ वाशिष्ठशाक्त्यपाराशर्येति ॥ ३४ ॥ एषां चतुर्णां वा
सिष्ठानां परस्परमविवाहः ॥ क्वचिदेव भेदाः ॥ जातूकर्णानां त्र्ययः ॥ वसिष्ठात्रिजातूकर्ण्येति ॥ ॥ अथ विश्वामित्राः ॥ ते दश
कुशिका रोहिता रौक्षकाः कामकायना धनंजयाः कताः अजा अघमर्षणाः पूरणा इंद्रकौशिका इति ॥ तत्र कुशिकानां त्र्य
यः ॥ विश्वामित्रदेवरातऔदलेति ॥ ३५ ॥ रोहितानां त्र्ययः विश्वामित्राष्टकरोहितेति ॥ विश्वामित्रमाधुछंदसाष्टकेति
वा ॥ द्वौ वा ॥ विश्वामित्राष्टकेति ॥ ३६ ॥ रौक्षकानां त्र्यय ॥ वैश्वामित्ररौक्षकरैवणेति ॥ विश्वामित्रगाधिनरैवणेति वा ॥
३७ ॥ कामकायनानां त्र्ययः ॥ वैश्वामित्रदैवश्रवसदैवतरसेति ॥ ३८ ॥ धनंजयानां त्र्ययः ॥ वैश्वामित्रमधुछंदसधानंज
येति ॥ वैश्वामित्रमाधुछंदसधानंजयेति ॥ विश्वामित्रमाधुछंदसाघमर्षणेति वा ॥ ३९ ॥ कतानां त्र्ययः ॥ वैश्वामित्रकात्यआ
त्कीलेति ॥ ४० ॥ अजानां त्र्ययः ॥ वैश्वामित्रमाधुछंदसआजेति ॥ ४१ ॥ अघमर्षणानां त्र्ययः ॥ वैश्वामित्राघमर्षणकौशिकेति
४२ ॥ पूरणानां द्वौ ॥ वैश्वामित्रपौरणेति ॥ ४३ ॥ इंद्रकौशिकानां द्वौ ॥ वैश्वामित्रऐंद्रकौशिकेति ॥ ४४ ॥ एषां दशानां परस्पर
मविवाहः ॥ क्वचित्त्वेषु क्ताः ॥ अजानां कुशिकानां च त्र्यय ॥ वैश्वामित्रआश्मरथ्यवाधुलेति ॥ हर्यश्वादीनां त्र्ययः ॥ विश्वामित्रगा
धिनरैवणेति ॥ वेणूनां त्र्ययः ॥ वैश्वामित्रगाधिनवैणवेति ॥ शालंकायनानां त्र्ययः ॥ वैश्वामित्रशालंकायनकौशिकेति ॥ रौहिणानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रय॥ वैश्वामित्रमाधुछंदसरौहिणेति॥ कथकानांत्रयः॥ वैश्वामित्रकाथकक्राथकेति॥ साङ्कलानांत्रयः॥ वैश्वामित्रसाङ्कलवा
ङ्कलेति॥ हिरण्यरेतसांद्वौ॥ विश्वामित्रहैरण्यरेतसेति॥ सुवर्णरेतसांद्वौ॥ वैश्वामित्रसौवर्णरेतसेति॥ कपोतरेतसांद्वौ॥ वै
श्वामित्रकापोतरेतसेति॥ घृतकौशिकानांद्वौ॥ वैश्वामित्रघृतकौशिकेति॥ ॥अथागस्त्यः॥ तेचत्वारः॥ इध्मवाहाः शां
भवाहाः सोमवाहाः यज्ञवाहा इति॥ तत्रेध्मवाहानांत्रय॥ आगस्त्यदार्ढच्युतइध्मवाहेति॥ एकोवाआगस्त्येति॥ ४५॥ सांभ
वाहानांत्रयः॥ आगस्त्यदार्ढच्युतसांभवाहेति॥ ४६॥ सोमवाहानांत्रयः॥ आगस्त्यदार्ढच्युतसोमवाहेति॥ ४७॥ यज्ञवा
हानांत्रयः॥ आगस्त्यदार्ढच्युतयाज्ञवाहेति॥ एषांचतुर्णांपरस्परमविवाहः॥ कात्यायनसूत्रेतु॥ पुलस्त्यपुलहक्रतूनांत्रय
आगस्त्यदार्ढच्युतदार्भवाहेति॥ शुकहंसादीनांत्रयः॥ आगस्त्यहैमवर्चिहैमोदकेति॥ पगणिकादीनांत्रयः॥ आगस्त्यपैनाय
कपाणिकेति॥ ॥इत्यागस्त्यः॥ इत्थंभृगवः ७ अङ्गिरसः षोडश १ ग्रामण्यायशोभवश्यमारााास्तांकृतपोथ्यांगिरसस्तेएके
१॥ अत्रयश्चत्वारः ४ कश्यपास्त्रयः ३ वशिष्ठाश्चत्वारः ४ विश्वामित्रादश १० अगस्त्यश्चत्वारः इत्यमेकोपंचाशगणानिर्णी
ताः॥ ॥अथद्वामुष्यायणाः॥ देवगतानांत्रयः॥ विश्वामित्रदेवरातऔदलेति॥ एषांविश्वामित्रजमदग्निभ्यांनान्वय॥ शौंग
शैशिरीणांपंच॥ आंगिरसबार्हस्पत्यभारद्वाजकात्याक्षीलेति॥ आंगिरसबार्हस्पत्यभारद्वाजशौंगशैशिरेतिवा॥ त्रयोवा॥ आंगि
रसकात्यआक्षीलेति॥ एषामपिविश्वामित्रभरद्वाजाभ्यांनान्वयः॥ ४॥ कपिलानांपंच॥ आंगिरसबार्हस्पत्यभारद्वाजवादनमा

CC-0. In Public Domain. Digitization by eGangotri

रल
२७०

मानवचवसेति॥ एषामपि भरद्वाजविश्वामित्राभ्यां नान्वयः॥ ५ ॥ वामरथ्यानां त्र्ययः॥ आत्रेयवामरथ्यपौत्रिकेति॥ एषामत्रिवि
श्वामित्राभ्यांनान्वयः॥ धनंजयानां त्र्ययः॥ वैश्वामित्रमाधुछंदसधानंजयेति॥ एषामप्यत्रिविश्वामित्राभ्यांनान्वयः॥ जातूकर्ण्या
नां त्र्ययः॥ वासिष्ठात्रेयजातूकर्ण्येति एषामत्रिवसिष्ठाभ्यांनान्वयः॥ संकृतीनां त्र्ययः॥ आंगिरसगौरीवीतशांकृत्येति॥ शात
पगौरिवीतशांकृत्येति वा॥ एषां स्वगणस्थैस्तथा वसिष्ठैः कश्यपैश्च न संबंधः॥ एषां केवलांगिरोमध्यपाठस्य फलं चिंत्यं॥ स्मृ
तिमाधवीयां सर्वेषां शांकृतिवत्॥ लौगाक्षीणां त्र्ययः॥ काश्यपावत्सारवासिष्ठेति॥ काश्यपावत्सारासितेति वा॥ ११॥ इदं त्ववधे
यं॥ इदानींतनानामपि दत्तकानां द्वयोरपि पित्रोस्सगोत्रैरविवाहः॥ गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः इति मनुवच
नात्॥ दत्तस्योत्पादकगोत्रसंबंधाभावेपि पितृसगोत्रत्वप्रयुक्तप्रतिषेधात्॥ असगोत्रा च या पितुरित्यत्रापि पितृग्रहणस्य हे
तदेव प्रयोजनं स्मृतिचन्द्रिकादौ स्थितम्॥ नन्वेवं दत्तकस्य पुत्रपौत्रादीनां गोत्रद्वयविवाहनिषेधो न लभ्येतेति चेन्न॥ तत्रा
पि परिज्ञातोद्वाहनवचनान्तरान्तलाभात्॥ अत एव दत्तस्य देवरात एतस्य चामुष्यायणेषु गणनं संगच्छते॥ गोत्रप्रवरमं
जरीकारोप्याह॥ एवं पुत्रिकापुत्रदत्तक्रीतपुत्रादीनामपि द्वयोरपि गोत्रयोरविवाहः इति॥ न त्वेवं गोत्ररिक्थे इति मनुव
चनस्य निर्विषयत्वं शंक्यं॥ आर्षेयवरणाभिवादनादिषु श्राद्धदेवताह्वानेजनगोत्रनिष्ठत्वार्थत्वात्तस्येतिदिक्॥ आपस्तंबधर्म
व्याख्यायां उज्वलायां हरदत्तकृतायां पैठीनसिः॥ अथ दत्तकीतकृत्रिमपुत्राः परपरिग्रहेणार्षेयेण जातास्ते संहताः कुलीना

270

रम
२७०

१०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यामुष्यायणाभवतीति ॥ इतिद्यामुष्यायणावर्गः ॥ गोत्रंप्रवरस्तेनैवाभिन्नौनिषेधनिमित्तम् ॥ सगोत्रायदुहितरंनप्रयच्छेदिमा
पस्तंबोक्तेः ॥ असमानप्रवरैर्विवाहइतिगौतमोक्तेश्च ॥ तत्रगोत्रप्रवरलक्षणमाह ३ प्रवरमंजर्यांबौधायनः ॥ विश्वामित्रोजमद
ग्निर्भरद्वाजोगौतमोत्रिर्वसिष्ठः ॥ कश्यपइत्येतेसप्तऋषयः सप्तानामृषीणामगस्त्याष्टमानांयदपत्यंतद्गोत्रमिति ॥ यद्यपिकेवलभा
र्गवेषुआर्ष्टिषेणादिषुचकेवलाङ्गिरसेषुचहरितादिषुनैतत् ॥ भृग्वंगिरसोरुक्तेषुनेतरगतेः ॥ तथाप्यत्रेष्टापत्तिरेवेतिकेचित् ॥
अतएवस्मृत्यर्थसारे ॥ प्रवरैक्यादेवात्राविवाहः ॥ यद्यपिवशिष्ठादीनांनगोत्रत्वंयुक्तं तेषांसप्तर्षित्वेनतदपत्यत्वाभावात् ॥ तथा
पितत्पूर्वभाविवसिष्ठाद्यपत्यत्वेनगोत्रत्वंयुक्तं ॥ अतएवपूर्वेषांपरेषांचैतद्गोत्रम् ॥ अत्रविशेषः प्रवरदर्पणेवध्येयः ॥ प्रव
रास्तु २ प्रवरणानिप्रवराः ॥ कल्पकाराहिवासिष्ठेतिहोतावसिष्ठवदित्यध्वर्युरित्यादिनायेषांवरणमामनंतितेप्रवराः ॥ तच्च
वरणंयद्यपिगोत्रभूतस्यापिदृश्यतेतथापिपूर्ववदृषिभेदोद्रष्टव्यः ॥ अन्यथातेषांआर्षेयएकार्षेयइत्यादिनिर्देशानुपपत्तेः
अन्येतुतद्गोत्राणामार्षेकवि ॥ यइतिभेदमाहुरितिदिक् ॥ तत्रोक्तगोत्रभूतस्यपितृपितामहएवप्रवराः ॥ पितेवाग्रेथपुत्रोथ
पौत्रइतिशतपथश्रुतेः ॥ परंपरंप्रथममित्याश्वलायनोक्तेश्च ॥ अत्रविशेषमाहबौधायनः ॥ एकएवऋषिर्यावत्प्रवरेष्वनु
वर्त्तते ॥ तावत्समानगोत्रत्वमन्यत्रभृग्वंगिरसांगणादितिस्मृत्यर्थसारः ॥ त्रियमाणतयावापिसत्तयावानुवर्त्तनम् ॥ एकस्य
दृश्यतेयत्रतद्गोत्रंतस्यकथ्यते ॥ भृग्वंगिरोगणेषुतुमाधवीयेस्मृत्यंतरेपंचानांत्रिषुसाम्यादविवाहस्त्रिषुद्वयोः ॥ भृग्वंगिरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२७१

गणेषु चैवं शेषेष्वेकोपि वारयेत् ॥ शेषगोत्रभृगुष्वेकोपि समानप्रवरो विवाहं वारयतीति समर्थः ॥ बौधायनोपि ॥ भृग्वंगिरसाधि वह्नय
त्र्यार्षेयसन्निपातेऽविवाहः पंचर्षेयाणामिति ॥ भृग्वङ्गिरोगणेष्वपि जमदग्निगोतमभरद्वाजेषु एकप्रवरसाम्ये सर्वेषामप्य
साम्येवा सगोत्रत्वादेवाविवाह इति दिक् ॥ इति निर्णयसिंधौ शुभं ॥ अथ विवाहोपयोगिकानि वचनानि ॥ याज्ञवल्क्यः ॥ अविप्लु
तब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ॥ अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीं ॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्
मनुः ॥ असपिण्डा च या मातुरसगोत्रा च या पितुः ॥ सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥ नारदः ॥ वध्वा वरस्य वा तातः कू
टस्थाद्यदि सप्तमः ॥ पंचमी चेत्तयोर्माता तत्सपिण्ड्यं निवर्तते आसप्तमात्पंचमाच्च बन्धुभ्यः पितृमातृतः अविवाह्या सगोत्रा च समान
प्रवरा तथा ॥ विश्वरूपनिबंधे ॥ एवमुक्तप्रकारेणापि तु वंशभृगुसप्तमात् ॥ ऊर्ध्वमेव विवाहस्त्वं पंचमान्मातृबंधुतः ॥ संतानो भि
द्यते यस्मात्सर्वजाड्यभयच्च ॥ नमातृयगोत्रोद्भवां मात्वरेयां वक्ष्यकन्यकाम् ॥ आश्व ॥ सर्वेषामेव वर्णानां विज्ञेया साप्तपौरुषी स
पिण्डता ततः पश्चात्समानोदकधर्मता ॥ आपद्दिपराशरः ॥ चतुर्थीं सुदपेत्कन्यां चतुर्थः पंचमोपि वा ॥ पराशरमते षष्ठीं पंचमो त
पंचमीसु ॥ शातातपः ॥ मातुलस्य सुतां कश्चिन्मातृष्वसृसुतां तथा ॥ विवहंति च विदेशं संकोच्यापि सपिण्डतां ॥ मरुच मातुलस्य सु राम
तां मूढ्वा मातृगोत्रां तथैव च ॥ समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् ॥ बृहस्पतिः ॥ उह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः २७१
मन्यादेशश्च नराः पूर्वे व्यभिचाररतास्त्रियः ॥ उत्तरे मद्यपाश्चैव स्पृश्या नृणां रजस्वला ॥ इत्यनाचारत्वमाह ॥ ब्राह्मे ॥ यत्र मातुलजोद्वा

271

१०६

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्यपत्रचैव हि वृषलीपतिः ॥ श्राद्धं न गच्छेत् द्विप्राः कृतं यत्रैनिराभिषं ॥ मात्स्ये ॥ समानप्रवरा वै वशिष्यसंततिरेव वा ॥ ब्रह्मदातुर्गुरोश्चैव सं
ततिः प्रतिषिध्यते ॥ बौधायनमः ॥ मातुलस्य पत्न्या भगिनीं तत्सुतां च विवर्जयेत् ॥ पितृव्यपत्न्या भगिनीं तत्सुतां च विवर्जयेत् ॥ गा
यत्र्याउपदेष्टुश्च कंन्यां नैवोद्वहेद्द्विजः ॥ गुरोश्च कन्यां शिष्यो वा तत्सुतं न्यापि नेष्यते ॥ मनुः ॥ उत्पादक ब्रह्मदात्रोर्गरीयान् ब्रह्मदः पितेति
पुरुषत्रयपर्यंते सापिराद्यं गुरुरोच्यते ॥ केचित्तु ॥ पुरुषत्रयपर्यंते आचार्ये नैतदिष्यते ॥ वाक्संबंधकृतानां तु स्नेहसंबंधभा
गिनाम् ॥ विवाहोत्र न कर्त्तव्यो लोकगर्हाप्रसज्यते ॥ इत्यादि तत्र मूलं मृग्यम् ॥ मनुः ॥ इत्थं सगोत्रसंबंधविवाहविषयेऽस्थिते ॥ य
दि काश्चिज्ज्ञानतस्तां कन्यामुद्वोपगच्छति ॥ गुरुतल्पव्रतं कुर्व्वेद्गर्भसञ्जोत्पतां व्रजेत् ॥ भोगतस्तां परित्यज्य पालयेज्जननीमिव ॥
आज्ञानादैदवैः शुद्धेत्रिभिर्गर्भस्तु कश्यपः । सपिराद्यापत्यदारेषु प्राणत्यागो विधीयते ॥ अथ विवाहकालो ज्योतिर्निबंधे ॥ षडब्दमध्ये
नोद्वाह्या कंन्या वर्षद्वयं यतः ॥ सोमो भुंक्ते ततस्तद्वद्गंधर्वश्च ततोनलः ॥ राजमार्तण्डे ॥ आयुग्मे दुर्भगा नारी युग्मे तु विधवा भवेत् ॥ त
स्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रता ॥ मासत्रयादूर्ध्वमयुग्मवर्षे युग्मेपि मासत्रयमेव यावत् ॥ विवाहशुद्धिं प्रवदंति संतो वत्स्या
दयः स्त्रीजनियुग्ममासात् ॥ इति ॥ ॥ अथ विवाहपद्धतिः ॥ अत्र वाग्दानम् ॥ तत्रादौ वरार्चनम् ॥ ॥ मण्डपैकदेशे प्राङ्गणे वा व
रार्चनोपकरणानि संपाद्य ॥ प्राङ्मुखं वरमुदङ्मुखः पीठाद्युपरिस्थितं संबोध्य ॥ साधु भवानास्तामर्चयिष्यामो भवन्तमित्युक्त्वा ॥ व
रहस्ते गन्धाक्षततांबूलादि दत्वा ॥ वरस्य पूजा कर्त्तुश्चात्मनः पटं दत्वा मन्त्रान् पठेत् ॥ अथ वरहस्तेनैव लवर्द्धवैदेवाग्नस्य ग्रहस्य होमं

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२७२

प्रेप्सन्ति ते तस्मादेतावरं ठ॰ समर्द्धइति क्षिप्रेणाद्दमं ग्रहं प्रभवतीति तस्माद्वरं वृणीते ॥ अथ वरं वृणीते यज्ञ ह वै कं वरुण वा ने
वरं भवते सोऽस्मै समृध्यते तस्माद्वरं वृणीते साजगाम इति स होवाच प्रतिज्ञातो मयैष वक्रो याति कुमारस्यान्ते वाचमभाषतां मे
ब्रूहीति ॥ स होवाच विज्ञायते ह्यग्निर्हिरण्यं तस्य पात्रं गो अश्वानां दासीनां परिवाराणां परिधाराणां मा नो महान्तं महीरणास्य
पर्याप्योधानयि भूदिति ॥ स वै गोतम तीर्थे नेक्षासाइत्युय भवतं इति वा वाह मस्मै वस होया यनकी त्यों वाच ॥ अथ वारा
णाउपानहाउपसृश्च नेऽयो ह वै देवा घृतकुम्भप्रवेशयं वकृक्षितो वाराह मस्मै वसं वभूव तस्माद्वाराहाउपानहाउपसृश्च
ते ॥ असौयः द्वे ॥ इत्यन्तः पठे निराकृत्य जलधारयात्रि वेष्टयित्वा ॥ ॐ आगतोसि वर श्रेष्ठ सर्वकामार्थसिद्धये ॥ प्रतिग्रह
समर्थोसि अर्घ्यं गृह्णातु मे वरः ॥ इति प्रार्थयित्वा ॥ पीतवस्त्रा परिस्थितं पश्चरत्नाशोकपल्लवोपेतं कुशाग्र जलउश्च दधिति
लतण्डुलपवसिद्धार्थरक्तपदार्थैः श्वस्त्रयुतं शङ्खार्घं गृहीत्वा ॥ नाभौ हस्ते स्कंधे सिरसि जान्वोः पादयोर्हृदये वा ह्येरर्घं दत्वा
पूजयेत ॥ गन्धद्वारामिति गन्धम् ॥ अक्षताः पुष्पमाल्यानि ॥ धूपदीपं नैवेद्यं ताम्बूलदक्षिणां च दत्वा । ब्राह्मणाशिषो गृही
त्वा । वरस्य सकुङ्कुमं करं गृहीत्वा ॥ ॐ दूरदेशागतो भद्र शान्तिक प्रियदर्शनः ॥ कालक्षेपो न कर्त्तव्यो लग्नवेला प्रशस्यते । वंशोद्भ
वकुले जाता योषिता वाहसवर्षकम् ॥ तुभ्यं वरप्रदास्यामि श्रीयतां पुरुषोत्तम इति पठित्वा कौतुकागारादि भ्र नयेदिति वरार्च
नम् ॥ ॥ विवाहे कन्याहस्ते न षोडशहस्तं मण्डपं तद्दक्षिणादिशि पश्चिमां दिश माश्रित्य वा मण्डपसंलग्न मप्युत्तराभिमुखं कौतुका

272

राम
२७२

१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गारम् ॥ मण्डपाद्वहिरैशान्यांयजमानश्चतुर्हस्तोन्मितकर्तादिपरिष्कृतंतुषकेशशर्करादिशून्यां वेणुनिर्मितां वेदींवकारयेत् ॥ वि
वाहदिने कृतनित्यक्रियेणजामाता पित्रामातृपूजापूर्वकमाभ्युदयिकंकर्त्तव्यम् ॥ कन्यापितावधूविराधाल्लः शुक्लाम्बरधरः
कृतनित्यक्रियोमातृपूजाभ्युदयिके कृत्वा ॥ अर्हणावेलायां मण्डपे प्रत्यङ्मुखः प्राङ्मुखं वरमूर्द्धजानुं सम्बोध्य ॥ ॐ साधु भ
वानास्तामर्चयिष्यामो भवन्तमितिब्रूयात् ॥ अर्च्चयेतिप्रत्युक्ते वरोपवेशनार्थं शुभ्रमासनं दत्वा विष्टरमादाय ॥ ॐ विष्टरो
विष्टरोविष्टरइत्यन्येनोक्ते ॥ ॐ विष्टरः प्रतिगृह्यतामितिवदेत् ॥ ॐ विष्टरं प्रतिगृह्णामीत्यभिधाय ॥ विष्टरं गृहीत्वा ॐ वर्ष्मो
स्मीत्याथर्वणऋषिर्विष्टरो देवता ऽनुष्टुप्छन्द आत्मस्तुतिपूर्वकोपवेशने विनियोगः ॥ ॐ वर्ष्मोस्मि समानानामुद्यतामिवसू
र्यः ॥ इमन्तमभितिष्ठामि यो मा कश्चाभिदासति ॥ इत्यनेनासने उत्तराग्रं दत्वा ॥ विष्टरोपरि वर उपविशति ॥ ततउपविश्य यजमा
नः पाद्यमञ्जलिनादाय ॥ ॐ पाद्यं पाद्यं पाद्यमित्यन्येनोक्ते ॥ ॐ पाद्यं प्रतिगृह्यतामिति वदेत् ॥ ततः ॐ पाद्यं प्रतिगृह्णामीत्यभिधा
य यजमानाञ्जलितोऽञ्जलिना पाद्यमादाय वरः ॥ ॐ विराजो दोहोसीति प्रजापतिऋषिरापो देवता यजुः पादप्रक्षालने विनियो
गः ॥ ॐ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः ॥ इति दक्षिणपादं प्रक्षालयति ॥ अनेनैव क्रमेण वामपा
दं प्रक्षालयति ॥ ततः पूर्ववद्विष्टरान्तरं गृहीत्वा चरणयोरधस्तादुत्तराग्रं वरः कुर्यात् ॥ ततो दूर्वाक्षतफलचन्दनजलयुतार्घपात्र
गृहीत्वा यजमानः ॥ ॐ अर्घो ऽर्घो ऽर्घ इत्यन्येनोक्ते ॥ ॐ अर्घः प्रतिगृह्यतामिति वदेत् ॥ ततो वरः ॐ अर्घं प्रतिगृह्णामि ॥ इत्यभिधाय

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२७३

यजमानहस्तादर्घं गृहीत्वा ॥ ॐ आपः स्थेति प्रजापतिर्ऋषिरापो देवता यजुरर्घग्रहणे विनियोगः ॥ ॐ आपस्थ युष्माभिः सर्वान्कामान
वाप्नवानि ॥ इति यच्छिरस्यक्षतादिकं किञ्चिद्दत्वा ॥ ॐ समुद्रं वः इत्यथर्वण ऋषिरापो देवता अनुष्टुप्छन्दः अर्घाभिमंत्रणे विनियो
गः ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत ॥ अरिष्टास्माकं वीरा मा परासेचि मत्पयः इत्यर्घपात्रे शेषान्यजन्यठति ॥ तद
र्घं असञ्चरदेशे धारयेत् ॥ ततो यजमान आचमनीयमादाय ॥ ॐ आचमनीयमाचमनीयमनीयमितिमन्येनोक्ते ॥ ॐ आचम
नीयं प्रतिगृह्यतामिति वदेत् ॥ ततो वरः ॥ ॐ आचमनीयं प्रतिगृह्णामीत्यभिधाय ॥ यजमानहस्तादाचमनीयमादाय ॥ 273
ॐ आमागन्निति परमेष्ठी ऋषिरापो देवता बृहती छन्दः आचमने विनियोगः ॥ ॐ आमागन्यशसा संसृज वर्चसा तं माकु
रु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम् ॥ इत्यनेन मन्त्रेण द्विराचमति द्विः तूष्णीम् ॥ ततो यजमानः कांस्यपात्रस्थ दधि
मधुघृतानि कांस्यपात्रेणापिहितान्यादाय ॐ मधुपर्को मधुपर्को मधुपर्क इत्यन्येनोक्ते ॐ मधुपर्कम् प्रतिगृह्यतामिति वदेत्
ततो वरः ॐ मधुपर्कं प्रतिगृह्णामीत्यभिधाय ॐ मित्रस्य त्वेति बृहस्पतिऋषिर्मधुपर्को देवता यजुर्मधुपर्कावेक्षणे विनियो
गः ॥ ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे इति दानकरस्थमेव निरीक्ष्य ॐ देवस्य त्वेति बृहस्पतिराङ्गिरस ऋषिः सविता यजुर्देवता राम
र्मधुपर्कग्रहणे विनियोगः ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् प्रतिगृह्णामि इत्यनेन मधुपर्कं गृ २७३
हीत्वा स्ववामहस्ते कृत्वा ॥ ॐ नमः श्यावास्येति प्रजापतिर्ऋषिः सविता देवता यजुर्मधुपर्कालोडने विनियोगः ॥ ॐ नमः श्यावास्या

१०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याम्यशनेयन्नआविद्धंतन्नेनिकृन्तामि॥इत्यनामिकयात्रिःप्रदक्षिणमालोड्य·अनामिकाङ्गुष्ठाभ्यांकिंचिद्भूमौनिःक्षिपेत्॥पुन
स्तथैवद्विर्निःक्षिपेत्॥ततः ॐ यन्मधुनइतिकुत्सऋषिर्मधुपर्कोदेवताजगतीछन्दोमधुपर्कप्राशनेविनियोगः॥ॐ यन्मधु
नोमधव्यंपरमꣳरूपमन्नाद्यंतेनाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येनपरमोमधव्योन्नादोसानि इत्यनेनअनामिका
ङ्गुष्ठाभ्यांमात्रयवारत्रयंमधुपर्कप्राशनम्॥प्रतिप्राशनेतन्मन्त्रपाठः॥ततोमधुपर्कशेषमसञ्चरदेशेधारयेत्॥ततआच
म्य॥ॐ वाङ्मइत्यादीनांमन्त्राणांपरमेष्ठीऋषिर्दैवीगायत्रीछन्दः परमात्मादेवताप्राणास्पर्शनेविनियोगः॥ॐ वाङ्मआस्येस्तु·
ॐ नसोर्मेप्राणोस्तु॥ॐ अक्ष्णोर्मेचक्षुरस्तु·ॐ कर्णयोर्मेश्रोत्रमस्तु·ॐ बाह्वोर्मेबलमस्तु·ॐ ऊर्वोर्मेओजोस्तु·ॐ अरिष्टानिमेङ्गानि
तनूस्तन्वामेसहसन्तु॥इत्यास्यादिप्रत्येकंसर्वगात्राणिस्पृष्ट्वा॥ॐ गौर्गौर्गौरित्यभिहिते॥ॐ मातारुद्राणामितिब्रह्मर्षिर्गौर्देव
तात्रिष्टुप्छन्दोगोरभिमंत्रणेविनियोगः॥ॐ मातारुद्राणांदुहितावसूनाꣳस्वसादित्यानाममृतस्यनाभिः॥प्रनुवोचंचिकि
तुषेजनायमागामनागामदितिंवधिष्ट॥ममचामुष्यचाउकशर्मणोयजमानस्यपाप्माहत॥ॐ उत्सृजततृणान्यत्तु॥इतितृणा
च्छिंद्यात्॥ततोवेदिकायांतुषकेशशर्करादिशून्यायांहस्तमात्रंचतुरस्रांभूमिंकुशैःपरिसमूह्य॥तान्नैशान्यांपरित्यज्य·गोमयोद
केनोपलिप्य·स्फ्येनस्रुववामूलेनप्रागग्रप्रादेशमितमन्तरोत्तरक्रमेणत्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य·ज
लेनाभ्युक्ष्य॥तूष्णींकांस्यपात्रस्थवह्निंप्रत्यङ्मुखमुपसमाधाय·तद्रक्षार्थंकञ्चिन्नियुज्य·कौतुकागाराद्वरःकन्यामानीय·मराउपे

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२७४

ॐ जरां गच्छेति प्रजापतिर्ऋषिर्वासो देवता त्रिष्टुप् छन्दो वस्त्रपरिधापने विनियोगः॥ ॐ जरां गच्छ परिधत्स्व वासो भवा कृष्टीना
मभिशस्तिपावा॥ शतं च जीव शरदः सुवर्चा रयिं च पुत्राननु संव्ययस्वायुष्मतीदं परिधत्स्व वासः इति पठित्वा परिधानवस्त्रं त
स्मै दद्यात्॥ ॐ या अकृन्तन्नवयं या अतन्वत॥ याश्च देवीस्तन्तूनभितो ततन्थ। तास्त्वा देवी जरसे संव्ययस्वायुष्मतीदं परिधत्स्व
वासः इति पठित्वोत्तरीयं तस्मै परिधापयति॥ ततः वराय वस्त्रदानम्॥ ॐ परिधास्यै इत्याथर्वण ऋषिर्लिङ्गोक्ता देवता पंक्ति
श्छन्दो वस्त्रपरिधाने विनियोगः॥ ॐ परिधास्यै यशो धास्यै दीर्घायुत्वाय जरदष्टिरस्मि॥ शतं च जीवामि शरदः पुरूची राय
स्पोषमभिसंव्ययिष्ये॥ इति पठित्वा वरः परिधत्ते ततउत्तरीयः॥ ॐ यशसा मे इत्याथर्वण ऋषिर्लिङ्गोक्ता देवता त्रिष्टुप् छन्दो उ
त्तरीयवस्त्रपरिधाने विनियोगः॥ ॐ यशसा माद्यावापृथिवी यशसेन्द्राबृहस्पती॥ यशो भगश्च माविदद्यशो मा प्रतिपद्यता
म् इति पठित्वा उत्तरीयं परिधत्ते॥ ततो वरस्य कन्यायाश्च शिरावमनू॥ ततः कन्याप्रदस्य परस्परं समञ्जयामिति प्रैषेणाक
न्या वरयोः परस्परमभिमुखीकरणम्॥ वरः ॐ समञ्जन्त्वित्याथर्वण ऋषिर्लिङ्गोक्ता देवता अनुष्टुप् छन्दः समञ्जने विनियो
गः॥ ॐ समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ। सम्मातरिश्वा संधाता समुदेष्ट्री दधातु नौ॥ इति वरः पठति॥ ततः कन्याप्र
दकर्ने कं ग्रन्थि बन्धनं साक्षतदूर्वापूगैः॥ ॥अथ कन्यादानम्॥ दाता शंखस्थदूर्वाक्षतफलजलान्यादाय॥ जामातृदक्षिणाक
रोपरि कन्यादक्षिणाकरं निधाय॥ ॐ दाताहं वरुणो राजा द्रव्यमादित्यदैवतम्॥ वरोसौ विष्णुरूपेण प्रतिगृह्णात्वयं विधिः इति प

राम
२७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ठित्वा ॥ ॥प्रतिज्ञासंकल्पं कुर्यात् ॥ ॥अथ महासंकल्पं कुर्यात् ॥ श्रीमंन्नारायणस्याचिन्त्यापरिमितशक्त्याभिर्ध्रियमाणा
जलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमेऽव्यक्तमहदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृतेऽस्मिन्म
हति ब्रह्माण्डखण्डमण्डले आधारशक्तिश्रीकूर्मवराहानंतादिदिग्गजोपरिप्रतिष्ठितस्य रसातलसुतलमहातलावितलंतलात
लस्य सप्तपाताललोकस्योपरि सकलनिवासभूतभूर्भुवः स्वर्महर्जनतपःसत्याख्यस्वर्गलोकषट्कस्याधोभागे महाकायफणी
राजशेषस्य सहस्रफणामणिमण्डितमण्डिते दिग्दन्तिशुण्डादण्डोत्तंभित पंचाशत्कोटियोजनविस्तीर्णलोकालोकाचलावृतलवणे
क्षुरासर्पिर्दधिक्षीरोदकार्णवैश्च परिवृते जंबुप्लक्षकुशक्रौंचशाकशाल्मलिपुष्कराख्यसप्तद्वीपदीपिते उपद्वीपकांस्यताम्रगभ
स्तिनागसौम्यगांधर्ववारुणभारताख्यनवखण्डात्मके महासरोरुहाकारपंचाशत्कोटियोजनविस्तीर्णभूमंडलमध्ये मेरुनिष
धत्रिकूटहिमवद्विंध्याचलानां किंपुरुषहरिवर्षयोश्च दक्षिणे नवसहस्रयोजनविस्तीर्णलयाचलादुत्तरतः स्वामिप्रस्थादा
रभ्य पावजन्यासिंहलकालंकाख्यनवभागात्मकभरतखण्डे स्वामिशैलावनिकुरुक्षेत्रादिसमस्तभूमध्ये देशे दण्डकारण्यचम्प
कारण्यबदरिकारण्यनैमिषारण्यादिसमस्तपुण्यारण्यमध्यदेशे भास्करक्षेत्रे सकलजगत्सृष्टिपरार्द्धद्वयजीविनो ब्रह्मणो द्वि
तीयपरार्द्धे पंचाशन्नातीते परमार्द्धे नवममासे षोडशदिवसे द्वितीययामे तृतीयमुहूर्त्ते षघ्रुव्यतीपातेषु सप्तमे वैवस्वतमन्वंत
रे अष्टाविंशतितमे महाकलियुगे प्रथमचरणे भारतवर्षे भरतखण्डे जम्बूद्वीपे कर्मभूमौ समस्तभूर्भुवारेखायाः पश्चिमदिग्भागे

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२७५

गोदावरीनर्मदयोर्मध्येदेशेनपत्याउत्तरेतीरे श्वेतवाराहकल्पे विक्रमशके बौद्धावतारे अमुकक्षेत्रे चांद्रसौरसावननाक्षत्रादिमा
नेप्रभवविभवादिषष्टिसंवत्सराणांमध्येवर्तमानसंवत्सरे। अमुकायने अमुकर्त्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुक
वारे अमुकनक्षत्रे एवंगुणविशेषविशिष्टायां शुभपुण्यतिथौ अस्मिन्संसारे चक्रे विचित्राभिः कर्मगतिभिर्विचित्रासु योनिषु पुनः पुन
रनेकशः कलयोजनयित्वा केनापि पुण्यविशेषेणेदानीं ननमानुष्ये द्विजजन्मविशेषं प्राप्तवतो अमुकसाक्षी यस्यामुकप्रवरस्या
मुकशर्मणो मम नानाजन्माभ्यासादेनदाजन्मप्रभृति एतत्पर्यंतं बाल्ययौवनवार्द्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनोवाक्का
यव्यापारैः कामक्रोधलोभमोहमदमत्सरकृतानां वाक्पाणिपादपायूपस्थकृतानां त्वक्चक्षुः श्रोत्रजिह्वानासिकाभिश्च कृतानां प्र
काशाप्रकाशत्र ब्रह्महत्यासुरापानसुवर्णस्तेयगुरुदाराभिगमनतत्संसर्गित्वमयमनधेयप्रपंचितमहापातकव्यतिरिक्तानांपि
तमातृगुरुभ्रातादिताडनतर्जननब्राह्मणयामर्मदोषकथनद्विजदेवसंबंधिभूम्यपहरणान्यायार्जितद्विजवित्तहरणगु
रुवधाक्षेपनडागडुमच्छेदनदहनकर्मविषप्रयोगाभिचारमहसंग्रामोन्मादन्यशकृशास्त्राभ्यासवित्ताप्रायश्चित्तशकुनि
त्वशास्त्रप्रयोगादिछंदोनिन्दाकरणाकृत्याकरणाधरणीवित्तहरणाधर्मकार्यविघ्नावरणोत्कर्षपरनिन्दाकरणापंचवादान
तभाषणापंक्तिभेदवृथापाकप्रतिश्रुतानां अप्रदानादीनां ब्रह्महत्यासमानानां पृथिव्यां गाणुरस्वस्वादनक्षालनोदकयानशूरवनिःसृत
नीरपानकपिलाक्षीरपानपंचयज्ञोपासनपरित्यागकूटसाक्षित्वानां मद्यपानसमानानांपितृमातृसपत्नीभ्रातृभार्यातनयाभ

राम
२७५

275

२७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गित्याचार्यतनयासखिभार्याप्रव्रजितानां शरणागतानां माध्वीवर्णोत्तमान्त्यनागम्यागमनानां शूद्रसेवनाधानत्वभृतकाध्यापकान्ना
ग्नित्वपौरोहित्यदेवलकात्वं सरक्षणात्कृषिकर्महत्यादिशिक्षाभारवाहित्वशिल्पविद्याभ्यासादीनां स्वर्णास्तेयसमानानां गजाश्वो
ष्ट्रखरखड्गमहिषशरभशार्दूलसिंहव्याघ्रादिप्राणिवधादीनां सकरीकरणानां मयूरचाषहंसगृहगोधास्केदजोद्भिज्जभारद्व
जादिपक्षिवधजानां मद्याघ्रातगतभोज्यर्के लैशुकसुमस्नेयादीनां मलिनीकरणानां ब्राह्मणरात्रक्ष्यहरणाप्रियाघ्राणादिमैथुनादिवि
षयाशक्तकृतभ्रादीनां मपात्रीकरणानाम योनिपश्वयोनिरेतोविसर्जनयतिब्रह्मचारिब्राह्मणाशास्त्रनिन्दागोसंचितनृणासेव
याग्निप्रदानादीनां जातिभ्रंशकरणानां सुरवनासिकाकवरणाहननहिंसनविषमकृष्णप्रजीवनविषमव्यवहारवाक्पारुष्यस
हसंग्रहणाक्रीडनद्युतदन्तकालनिन्दाकरदन्तधावननिषिद्धदिनमैथुनक्षौरवैश्यादासीकन्याप्रतिलोमजामातृसाधारणागन
सत्यगनागमनैकादश्यन्नगणिकान्नभिक्षकान्नकांस्यभोजनखड्गाहंसगमनविचित्रवस्त्रालंकारस्वप्नेन्द्रियपातानां चतुर्दश्यष्ट
म्यादिवाभोजनभानुवारपर्वद्वयरात्रिभोजनान्यगृहिणीगर्भिणीमनोरथक्षारणाब्रात्यान्नयतिप्रेतान्नपतितान्नतुरुष्कान्न
काराग्रहनिवासभोजनतुरुष्कसहनिवासतुरुष्कस्पृष्टद्रव्योपभोगकुग्रामवासदुष्टप्रतिग्रहदुष्टभोजनपक्वपाकपत्रमस्करान्न
कण्टकान्ननखकृन्तनाकृतस्नानसंध्योपासनकुराज्ञ्नवैश्वदेवकर्मरहितोदक्यादृष्टिभोजनम्लेच्छसेवासंसर्गभाषणादिपापो
त्प्रताकरणा लशुनगृंजनाद्यभक्ष्यभक्षणाकांस्यपात्रस्थितनारिकेलजलपानाद्यपेयपानवाराङ्गनाद्यस्पृश्यस्पर्शनपतितादिसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाषणां हन्ताकडुष्मारणादिनिषिद्धतिथिभोजनदेवब्राह्मणकलादिहरणाविक्रेयविक्रयणाभक्ष्यकौषधादिविक्रयणाप्रवालर
त्नादिविक्रयअगुलीयोनिविदारणान्नृविवाहभंजनगुरुद्रोहमन्तुणासूकसरीसृपवधाक्रन्ताग्निभुश्रूषानदवज्ञानितिथिभिक्षुवं
वनतीर्थागमनाशक्तजनविघ्नकरणाब्रतोद्यापनाकरणाचारणालादिगीतश्रवणानिमित्तभोजननदीलंघनसमुद्रस्नानप्रकी
र्णकानामेतेषांनानाविधपातकानांमपहरणायचांद्रायणादिप्रायश्चित्तमहंकरिष्ये॥ इति ॥ इतिमहासंकल्पः॥ ॥ ॐअ
द्यामुकमासीयामुकपक्षीयामुकतिथौ· अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रायामुकगोत्रस्यामुकप्रवरस्यामु
कशर्मणः प्रपौत्रीम्॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रीम्· अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीम् इ
तिवारत्रयं पठित्वा॥ अनेनवरेणाऽस्यां कन्यायामुत्पन्नमानसन्तत्याद्वादशावरान्द्वादशपरान्पुरुषान्पवित्रीकर्तुमात्म
नश्चश्रीलक्ष्मीनारायणप्रीतये· अमुकगोत्रायामुकप्रवरायामुकशर्मणेब्राह्मणायवराय· अमुकगोत्रामुकप्रवरामुक
नाम्नीमिमांकन्यांप्रजापतिदैवतांस्वर्गकामः पत्नीत्वेनतुभ्यमहंसंप्रददे॥ ॐकन्यांकनकसंयुक्तांकनकाभरणैर्युतान्॥ दास्या
मिविष्णवेतुभ्यंब्रह्मलोकजिगीषया॥ इतिदानम्॥ स्वस्तीतिप्रतिवचनम्॥ ततः ॐद्यौस्त्वेतिप्रजापतिर्ऋषिर्लिंगोक्तादेवता राम
त्रिष्टुप्छन्दोयजुर्भूमिस्पर्शनेविनियोगः॥ ॐद्यौस्त्वाददातुपृथिवीत्वाप्रतिगृह्णातु इतिवरः पठेत्॥ ततः कन्याप्रदः॥ ॐमद्य २७६
कृतैतत्कन्यादानप्रतिष्ठार्थमंमुवर्णमग्निदैवतममुकगोत्रायामुकप्रवरायामुकशर्मणेब्राह्मणायवरायतुभ्यमहंसंप्रददे

276

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इतिदक्षिणांदद्यात्॥ ॐस्वस्तीतिप्रतिवचनम्॥ गोमिथुनंरुद्रदैवतंदद्यात्॥ ततः कोदादितिमन्त्रंवरः पठेत्॥ ततस्तांपाणौगृही
त्वा॥ यदैषीत्याथर्वणाऋषिर्लिङ्गोक्तादेवतानुष्टुप्छन्दोनिष्क्रमणेविनियोगः॥ ॐयदैषिमनसादूरंदिशोनुपवमानोवाहिरण्य
पर्णोवैकर्णः सत्वामन्मनसांकरोतुश्रीअमुकदेवीइतिपठन्निष्क्रामति॥ ततोवेदिदक्षिणास्यांवारिपूर्णकलशमेकमूर्द्धनितिष्ठ
तोमौनिनःपुरुषस्यस्कन्धेऽभिषेकपर्यन्तंधारयेत्॥ ततःपरस्परंसमीक्षेथामितिकन्याप्रदक्षिणानन्तरम्॥ ॐअघोरचक्षुरित्या
दीनांचतुर्णांमन्त्राणांप्रजापतिर्ऋषिः कुमारीदेवताआद्यस्यात्रिष्टुप्छन्दोद्वितीयस्यानुष्टुप्छंदस्तृतीयस्यचतुर्थस्यचत्रिष्टुप्छं
दः समीक्षणेविनियोगः॥ ॐअघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यः सुमनाः सुवर्चाः॥ वीरसूर्देवकामास्योनाशन्नोभवद्वि
पदेशंचतुष्पदे॥ १॥ सोमः प्रथमोविविदेगन्धर्वोविविदउत्तरः॥ तृतीयोऽग्निष्टेपतिस्तुरीयस्तेमनुष्यजाः॥ २॥ सोमोददद्
गन्धर्वायगन्धर्वोददद्ग्नये॥ रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमाम्॥ ३॥ सानः पूषाशिवतमामैरयसानऊरूउशतीविहर॥
यस्यामुशन्तः प्रहरामशेपंयस्यामुकामाबहवोनिविष्ट्यै॥ ४॥ इतिवरपठितमन्त्रान्तेपरस्परंनिरीक्षणम्॥ ततोग्निप्रदक्षि
णांकृत्वा॥ पश्चादग्नेरहतवस्त्रवेष्टिततृणपूरकेकटेवा॥ तदुपरिदक्षिणाचरणांदत्वा॥ वेधूदक्षिणातः कृत्वा॥ वरउपविशेत्पुष्प
चन्दनताम्बूलवस्त्रादीनादाय॥ ॐअद्यकर्त्तव्यविवाहहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्माणा
ब्राह्मणममेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणेइतिब्रह्माणंवृणुयात्॥ ततः ॐवृतोस्मीतिप्रतिवचनम्॥ ॐ

CC-0. In Public Domain. Digitization by eGangotri

यथाविहितं कर्म कुरु इति वरेणोक्ते । करवाणीति ब्रह्मा ब्रूयात् ॥ ततो वरोऽग्नेर्दक्षिणतः शुद्धमासनं दत्वा । तदुपरि प्रागग्रान् कुशाना
स्तीर्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीय अत्र त्वं मे ब्रह्मा भवेत्यभिधाय कल्पितासने उपवेशयेत् ॥ ततः प्रणीतापात्रं पुरतः
कृत्वा जलेनापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात् । ततः परिस्तरणम् । वर्हिषश्चतु
र्थभागमादाय ॥ आग्नेयादीशानान्तम् ॥ ब्रह्मणोऽग्निपर्यन्तम् ॥ नैर्ऋत्याद्वायव्यान्तं ॥ अग्नीतः प्रणीतापर्यन्तम् ॥ ततोऽग्नेरुत्त
रतः पश्चिमदिशि पवित्रछेदनार्थं कुशत्रयम् ॥ पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम् ॥ प्रोक्षणीपात्रम् ॥ आज्यस्था
ली ॥ संमार्जनकुशत्रयम् । उपयमनार्थं कुशत्रयम् ॥ तिस्रः समिधः ॥ स्रुवः ॥ आज्यम् ॥ षट्पञ्चाशदुत्तरवरशतमुष्टिशनद्वयावच्छिन्ना
मनतण्डुलपूर्णपात्रम् ॥ पवित्रछेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयम् ॥ अथ तस्यामेव वासा धारणावस्तून्युपकल्पनी
यानि तत्र शमीपलाशमिश्रलाजा ॥ दृषदुपलम् ॥ कुमारीभ्राता ॥ शूर्पं ॥ दृढपुरुषः ॥ अन्यदपि तदुपयुक्तद्रव्यम् ॥ ततः
पवित्रछेदनकुशैः प्रादेशमितपवित्रकरणम् ॥ ततः सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निनिधाय अनामिका
ङ्गुष्ठाभ्यामुत्तराग्रे गृहीत्वा त्रिरुत्पवनम् ॥ ततः प्रोक्षणीपात्रस्य सव्यहस्तकरणम् ॥ अनामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा त्रि
रुदिङ्गनम् ॥ प्रणीतोदकेन प्रोक्षणीप्रोक्षणम् ॥ ततः प्रोक्षणीजलेन यथासादितवस्तुसेचनम् ॥ ततोऽग्निप्रणीतयोर्मध्ये
प्रोक्षणीपात्रनिधानम् ॥ आज्यस्थाल्यामाज्यनिर्वापः ततोऽधिश्रयणम् ॥ ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रदक्षिणक्रमेण

277

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पर्यग्निकरणम्॥ ततः स्रुवप्रतपनम्॥ सम्मार्ज्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवसमार्ज्जनम्॥ प्रणीतोदकेनाभ्युक्ष्य
पुनः पूर्ववत्त्रिः प्रतप्य स्रुवं दक्षिणतो निदध्यात्॥ ततः आज्यस्याग्नेरवतारणम्॥ ततः आज्यप्रोक्षणीवदुत्पवनम्॥ अवे
क्ष्य सत्यपद्रव्ये तन्निरसनम्॥ पुनः पूर्ववत्प्रोक्षण्युत्पवनम्॥ ततउपयमनकुशान्वामहस्ते कृत्वा उत्तिष्ठन् प्रजापतिं मन
साध्यात्वा तूष्णीमग्नौ समिधः प्रक्षिपेत्॥ ततउपविश्य॥ सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं प्रदक्षिणं कृत्वा प्रणी
तापात्रे निधाय॥ पतितदक्षिणजानुः कुशेन ब्रह्मणाऽन्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति॥ तत्राघारादारभ्य द्वाद
शाहुतिषु ततदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः॥ ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्
दः प्रजापतिर्देवता आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये॥ इति मनसा॥ १॥ ॐ इन्द्रायेति प्रजापतिऋ
षिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः॥ ॐ मिन्द्राय स्वाहा॥ इदमिन्द्राय॥ इत्याघारौ॥ ॐ अग्नय इति प्रजापतिऋषिस्त्रि
ष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः॥ ॐ अग्नये स्वाहा॥ इदमग्नये॥ ३॥ ॐ सोमायेति प्रजापतिऋषिस्त्रिष्टुप्छन्दः
सोमो देवता आज्यहोमे विनियोगः॥ ॐ सोमाय स्वाहा॥ इदं सोमाय॥ इत्याज्यभागौ॥ ४॥ ॐ व्याहृतीनां प्रजापतिऋषिर्गाय
त्र्युष्णिगनुष्टुभश्छन्दांस्यग्निवायुसूर्या देवता अग्न्याधाने विनियोगः॥ ॐ भूः स्वाहा॥ इदं भूः॥ ५॥ ॐ भुवः स्वाहा॥ इदं भुवः॥ ६
ॐ स्वः स्वाहा॥ इदं स्वः॥ ७॥ इता महाव्याहृतयः॥ ॐ त्वन्नो अग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते होमे विनि

CC-0. In Public Domain. Digitization by eGangotri

योगः ॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषां ᳪसि प्रमुमुग्ध्य
स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ८ ॥ ॐ सत्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दो ग्नीवरुणौ देवते होमे विनियोगः ॥ ॐ सत्वन्नो
अग्ने वमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ॥ अवयक्ष्व नो वरुणᳫं रराणो वीहि मृडीकᳫं सुहवो न एधि स्वाहा ॥ इदमाग्नीव
रुणाभ्याम् ॥ ९ ॥ ॐ अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दो ग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः ॥ ॐ अयाश्चाग्नेस्य
नभिशस्तिपाश्च सत्वमित्वमया असि ॥ अया नो यज्ञं वहास्यया नो धेहि भेषजᳫं स्वाहा ॥ इदमग्नये १० ॐ ये ते शतमिति वाम
देवऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वे मरुतः स्वर्का देवताः सर्वप्रायश्चित्तहोमे विनियोगः ॥ ॐ ये ते शतं वरुणं
ये सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे वि
ष्णवे विश्वेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥ ११ ॥ ॐ उदुत्तममिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः ॥
ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमᳪं श्रथाय ॥ अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा ॥ इदं वरुणा
य ॥ १२ ॥ एता प्रायश्चित्तसंज्ञकाः ततो न्वारंभं विना ॥ ॐ राषाडिति प्रजापतिऋषिर्ऋताषाडृतधामाग्निर्गन्धर्वो देवता यज्ञ
होमे विनियोगः ॥ ॐ ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदमृताषाहे ऋतधाम्ने ग्नये गन्ध
र्वाय ॥ १ ॥ ॐ ऋताषाडिति प्रजापतिऋषिरोषधयोप्सरसो ऽनुष्टुप्छन्दो देवता यज्ञहोमे विनियोगः ॥ ॐ ऋताषाडृतधामाग्निर्गन्धर्व

278

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्यौषधयोप्सरसो मुदो नाम ताभ्यः स्वाहा ॥ इदमोषधिभ्योप्सरोभ्यो मुद्भ्यः ॥ २ ॥ ॐ सꣳहित इति प्रजापतिर्ऋषिः सꣳहितो वि
श्वसामा सूर्यो गन्धर्वो देवता यजुर्होमे विनियोगः ॥ ॐ सꣳहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्
इदं सꣳहिताय विश्वसाम्ने सूर्याय गंधर्वाय ॥ ३ ॥ ॐ सꣳहित इति प्रजापतिर्ऋषिर्मरीचयोप्सरस आयुवो देवता यजुर्होमे वि
नियोगः ॥ ॐ सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोप्सरस आयुवो नाम ताभ्यः स्वाहा ॥ इदं मरीचिभ्योप्सरोभ्य आयुभ्य
॥ ४ ॥ ॐ सुषुम्णा इति प्रजापतिर्ऋषिः सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वो देवता यजुर्होमे विनियोगः ॥ ॐ सुषुम्णः सूर्यरश्मिश्च
न्द्रमा गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय ॥ ५ ॥ ॐ सुषुम्णा इति प्र
जापतिर्ऋषिर्नक्षत्राण्यप्सरसो भेकुरयो देवता यजुर्होमे विनियोगः ॥ ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गंधर्वस्तस्य नक्षत्राण्यप्सर
सो भेकुरयो नाम ताभ्यः स्वाहा ॥ इदं नक्षत्रेभ्योप्सरोभ्यो भेकुरिभ्यः ॥ ६ ॥ ॐ इषिर इति प्रजापतिर्ऋषिरिषिरो विश्वव्यचा वातो गंध
र्वो देवता यजुर्होमे विनियोग ॥ ॐ इषिरो विश्वव्यचा वातो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदमिषिराय विश्व
व्यचसे वाताय गन्धर्वाय ॥ ७ ॥ ॐ इषिर इति प्रजापतिर्ऋषिरापोप्सरस ऊर्जो देवता यजुर्होमे विनियोगः ॥ ॐ इषिरो विश्वव्य
चा वातो गंधर्वस्तस्यापो अप्सरस ऊर्जो नाम ताभ्यः स्वाहा ॥ इदमद्भ्योप्सरोभ्य ऊर्ग्भ्यः ॥ ८ ॥ ॐ भुज्युरिति प्रजापतिर्ऋषिर्भुज्युः सुप
र्णो यज्ञो गंधर्वो देवता यजुर्होमे विनियोगः ॥ ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इदं भुज्यवे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२७९

वेसुपर्णायायज्ञायगंधर्वाय ॥ ९ ॥ ॐ भुज्युरितिप्रजापतिऋषिर्दक्षिणाप्सरसस्तावादेवतायजुर्होमेविनियोगः ॥ ॐ भुज्युः सुप
र्णोयज्ञो गन्धर्वस्तस्यदक्षिणाअप्सरसस्तावानामनाम्यः स्वाहा ॥ इदंदक्षिणाभ्योप्सरोभ्यस्तावाभ्यः ॥ १० ॥ ॐ प्रजापतिरितिप्रजा
पतिऋषिर्विश्वकर्मामनोगंधर्वोदेवतायजुर्होमेविनियोगः ॥ ॐ प्रजापतिविश्वकर्मामनोगन्धर्वः सनइदंब्रह्मक्षत्रंपातु
नस्मैस्वाहावाट् ॥ इदंप्रजापतयविश्वकर्मणोमनोगंधर्वाय ॥ ११ ॥ ॐ प्रजापतिरितिप्रजापतिऋषिऋक्सामान्यप्सरसए
ष्टयोदेवतायजुर्होमेविनियोगः ॥ ॐ प्रजापतिविश्वकर्मामनोगधर्वस्तस्यऋक्सामान्यप्सरसएष्टयोनामनाम्यः स्वाहा ॥ इद
मृक्सामभ्योप्सरोभ्यएष्टिभ्यः ॥ १२ ॥ इतिराष्ट्रभृत ॥ ॐ चित्तंचेतिपरमेष्ठीऋषिश्चित्तंदेवतायजुर्होमेविनियोगः ॥ चित्तंच
स्वाहा ॥ इदंचित्ताय ॥ चित्तिरितिपरमेष्ठिऋषिश्चित्तिर्देवतायजुर्होमेविनियोगः ॥ ॐ चित्तिश्चस्वाहा ॥ इदंचित्त्यै ॥ २ ॥ ॐ आकू
तंचेतिपरमेष्ठीऋषिराकूतंदेवतायजुर्होमेविनियोगः ॥ ॐ आकूतंचस्वाहा ॥ इदमाकूताय ॥ ३ ॥ ॐ आकूतिश्चेतिपरमेष्ठीऋ
षिराकूतिर्देवतायजुर्होमेविनियोगः ॥ ॐ आकूतिश्चस्वाहा ॥ इदमाकूत्यै ॥ ४ ॥ ॐ विज्ञातंचेतिपरमेष्ठीऋषिर्विज्ञातंदेवता
यजुर्होमेविनियोगः ॥ ॐ विज्ञातंचस्वाहा ॥ इदंविज्ञाताय ॥ ५ ॥ ॐ विज्ञातिश्चेतिपरमेष्ठीऋषिर्विज्ञातिर्देवतायजुर्होमेविनि
योगः ॥ ॐ विज्ञातिश्चस्वाहा ॥ इदंविज्ञात्यै ॥ ६ ॥ ॐ मनश्चेतिपरमेष्ठीऋषिर्मनोदेवतायजुर्होमेविनियोगः ॥ ॐ मनश्चस्वाहा
इदंमनसे ॥ ७ ॥ ॐ शक्वरीश्चेतिपरमेष्ठीऋषिः शक्वरीदेवतायजुर्होमेविनियोगः ॥ ॐ शक्वरीश्चस्वाहा ॥ इदंशक्वरीभ्य ॥ ८

279

राप
२७९

७२४

CC-0. In Public Domain. Digitization by eGangotri

ॐ दर्शश्चेति परमेष्ठी ऋषिर्दर्शो देवता यजुर्होमे विनियोगः ॥ ॐ दर्शश्च स्वाहा ॥ इदं दर्शाय ॥ ९ ॥ ॐ पौर्णमासं चेति परमेष्ठी ऋषि
पौर्णमासं देवता यजुर्होमे विनियोगः ॥ ॐ पौर्णमासं च स्वाहा ॥ इदं पौर्णमासाय ॥ १० ॥ ॐ बृहच्चेति परमेष्ठी ऋषिर्बृहद्देवता य
जुर्होमे विनियोगः ॥ ॐ बृहच्च स्वाहा ॥ इदं बृहते ॥ ११ ॥ ॐ रथन्तरं चेति परमेष्ठी ऋषिरथन्तरं देवता यजुर्होमे विनियोगः ॥ ॐ रथ
न्तरं च स्वाहा ॥ इदं रथन्तराय ॥ १२ ॥ ॐ प्रजापतिरिति प्रजापतिर्ऋषिर्जयानिन्द्रो देवता त्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ प्र
जापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु ॥ तस्मै विशः समनमन्त सउग्रमनन्तसर्वाः सइहव्यो बभूव स्वाहा ॥ इदं प्रजापत
येजयानिन्द्राय ॥ १३ ॥ इति जयाहोमः ॥ नादृशी वभवेत्कन्या विप्रवाक्येन नन्दिनी ॥ अग्निर्भूतानामिति प्रजापतिऋषिरग्नि
र्भूतानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ अग्निर्भूतानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षेत्रेऽस्यामा
शिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदमग्नये भूतानामधिपतये ॥ १ ॥ ॐ इन्द्रो ज्येष्ठानामिति प्रजापति
ऋषिरिन्द्रो ज्येष्ठानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ इन्द्रो ज्येष्ठानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्ष
त्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा ॥ इदमिन्द्राय ज्येष्ठानामधिपतये ॥ २ ॥ ॐ यमः पृथिव्या इति
प्रजापतिर्ऋषिर्यमः पृथिव्या अधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ यमः पृथिव्या अधिपतिः समावत्वस्मिन्० ॥ इ
दं यमाय पृथिव्या अधिपतये ॥ ३ ॥ अत्र प्रणीतोदकस्पर्शः ॥ ॐ वायुरन्तरिक्षस्याधिपतिरिति प्रजापतिर्ऋषिर्वायुरन्तरिक्षस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिपतिर्देवतात्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ वायुरन्तरिक्षस्याधिपतिः स मा० इदं वायवे ऽन्तरिक्षस्याधिपतये ॥ ४ ॥ ॐ सूर्यो
दिवोधिपतिरिति प्रजापतिर्ऋषिः सूर्यो दिवोधिपतिर्देवतात्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ सूर्यो दिवोऽधिपतिः स० इदꣳ०
सूर्याय दिवोधिपतये ॥ ५ ॥ ॐ चन्द्रमा नक्षत्राणामधिपतिरिति प्रजापतिर्ऋषिश्चन्द्रमा नक्षत्राणामधिपतिर्देवतात्रिष्टुप्छ
न्दो होमे विनियोगः ॥ ॐ चन्द्रमा नक्षत्राणामधिपतिः स० इदं चन्द्रमसे नक्षत्राणामधिपतये ॥ ६ ॥ ॐ बृहस्पतिर्ब्रह्मणोधिप
तिरिति प्रजापतिर्ऋषिर्बृहस्पतिर्ब्रह्मणोधिपतिर्देवतात्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ बृहस्पतिर्ब्रह्मणोधिपतिः स ॥ इदं
बृहस्पतये ब्रह्मणोधिपतये ॥ ७ ॥ ॐ मित्रः सत्यानामधिपतिरिति प्रजापतिर्ऋषिर्मित्रस्सत्यानामधिपतिर्देवता देवत्रिष्टु
प्छन्दो होमे विनियोगः ॥ ॐ मित्रस्सत्यानामधिपतिः स ॥ इदं मित्राय सत्यानामधिपतये ॥ ८ ॥ ॐ वरुणोपामधिपतिरिति
प्रजापतिर्ऋषिर्वरुणोपामधिपतिर्देवतात्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ वरुणोपामधिपतिस्स० इदं वरुणाय अपाम
धिपतये ॥ ९ ॥ ॐ समुद्रः स्रोत्यानामधिपतिरिति प्रजापतिर्ऋषिः समुद्रः स्रोत्यानामधिपतिर्देवतात्रिष्टुप्छन्दो होमे वि
नियोगः ॥ ॐ समुद्रः स्रोत्यानामधिपतिः स० ॥ इदं समुद्राय स्रोत्यानामधिपतये ॥ १० ॥ ॐ अन्नꣳ साम्राज्यानामिति प्रजापति
र्ऋषिरन्नꣳ साम्राज्यानामधिपतिर्देवतात्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ अन्नꣳ साम्राज्यानामधिपतिः स मावत्वस्मिन्
० इदमन्नाय साम्राज्यानामधिपतये ॥ ११ ॥ ॐ सोम ओषधीनामिति प्रजापतिर्ऋषिः सोम ओषधीनामधिपतिर्देवतात्रिष्टु

रत्न
२८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृछंन्दोहो मे विनियोगः ॥ ॐ सोम ॐ षधीनामधिपतिः स मा व० ॥ इदं सोमायौषधीनामधिपतये ॥ १२ ॥ ॐ सविता प्रसवानामि
ति प्रजापतिर्ऋषिः सविता प्रसवानामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ सविता प्रसवानामधिपतिः स० ॥ इदं
सवित्रे प्रसवानामधिपतये ॥ १३ ॥ ॐ रुद्रः पशूनामिति प्रजापतिर्ऋषी रुद्रः पशूनामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनि
योगः ॥ ॐ रुद्रः पशूनामधिपतिः स० ॥ इदं रुद्राय पशूनामधिपतये ॥ १४ ॥ अत्र प्राशीतोदकस्पर्शः ॥ ॐ त्वष्टा रूपाणामि
ति प्रजापतिर्ऋषिस्त्वष्टा रूपाणामधिपतिर्देवता त्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ त्वष्टा रूपाणामधिपतिः स० ॥ इदं त्वष्ट्रे
रूपाणामधिपतये ॥ १५ ॥ ॐ विष्णुः पर्वतानामिति प्रजापतिऋषिर्विष्णुः पर्वतानामधिर्देवता त्रिष्टुप्छन्दो होमे विनियो
गः ॥ ॐ विष्णुः पर्वतानामधिपतिः स० ॥ इदं विष्णवे पर्वतानामधिपतये ॥ १६ ॥ ॐ मरुतो गणानामिति प्रजापतिऋषिर्म
रुतो गणानामधिपतयो देवता त्रिष्टुप्छन्दो होमे विनियोगः ॥ ॐ मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन् ० ॥ इदं मरुद्भ्यो
गणानामधिपतिभ्यः ॥ १७ ॥ ॐ पितर इति प्रजापतिर्ऋषिः पितरः पितामहाः परेवरे ततास्ततामहा देवता त्रिष्टुप्छन्दो हो
मे विनियोगः ॥ ॐ पितरः पितामहाः परेवरेस्ततामहा इह मावन्त्वस्मिन् ० ॥ इदं पितृभ्यः पितामहेभ्यः परेभ्यो वरेभ्यस्ततेभ्यस्त
तामहेभ्यः ॥ १८ ॥ अत्र प्राशीतोदकस्पर्शः ॥ ॥ ब्रह्मा विष्णुस्तथा रुद्रः शक्रो गुरु विशेषतः ॥ आयुर्दीर्घं च सौख्यं च पुत्रपौत्रप्र
वर्द्धनम् ॥ अग्निभूपश्च मे यज्ञे श्रीधरः श्रीयउच्यते ॥ पुत्रान्लक्ष्मीस्तथा कामान्सौभाग्यं चैव अर्पयेत् ॥ इत्यभ्यातानामकम् ॥ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ २८१ ॥

अथगृहाऊनयः॥ उपांशु॥ ॐ अग्निरैत्विति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः॥ ॐ अग्निरैतु प्रथमो देव
तानाँ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात्॥ तदयँ राजा वरुणोऽनुमन्यतां यथेयँ स्त्री पौत्रमघन्नरोदात्स्वाहा॥ इदमग्नये॥ १
ॐ इमामग्निरिति प्रजापतिऋषिरग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः॥ ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु
दीर्घमायुः॥ अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियँ स्वाहा॥ इदमग्नये गार्हपत्याय॥ २॥ ॐ स्व
स्ति न इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः॥ ॐ स्वस्ति नो ऽग्ने॥ दिव आ पृथिव्या विश्वानि धेह्ययथा यत्र
यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रँ स्वाहा॥ इदमग्नये॥ ३॥ ॐ सुगन्नु पन्थामिति प्रजापतिर्ऋषि
रग्निर्देवता त्रिष्टुप्छन्दो विनियोगः॥ ॐ सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आयुः॥ अपैतु मृत्युरमृतं न आगाद्वैवस्व
तो नो अभयं कृणोतु स्वाहा॥ इदं वैवस्वताय॥ ४॥ अत्र प्रणीतोदकस्पर्शः॥ ॐ परं मृत्यो इति संकसुक ऋषिर्मृत्युर्देवता त्रिष्टुप्
छन्दो आज्यहोमे विनियोगः॥ ॐ परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजा
ँ रीरिषो मोत वीरान्स्वाहा॥ इदं मृत्यवे॥ अत्र प्रणीतोदकस्पर्शः॥ ५॥ इति गृहाऊनयः॥ ॥ अथ शिलापूजा॥ अथ नवलाजा ॥ राम ॥
ऊनयः॥ ततो वधूमग्रतः कृत्वा उत्तिष्ठेतो वधूवरौ प्राङ्मुखौ भवतः॥ ततो वराञ्जलिपुटे पवित्संलग्न वध्वञ्जलिस्थघृताभि ॥ २८१ ॥
घारितवधूभ्रातृदत्तशमीपलाशमिश्रैर्लाजैर्वधूकर्तृक मंत्रपाठको होमः॥ ॐ अर्यमणं देवमित्यथर्वणऋषिरर्यमा देव

281

११६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ताऽनुष्टुप्छन्दो लाजहोमे विनियोगः॥ ॐ अर्यमणां देवं कन्या अग्निमयक्षत॥ स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा॥ इदमग्नये॥१
ॐ इयन्नार्युपब्रूत इत्याथर्वण ऋषिरग्निर्देवतानुष्टुप्छन्दो लाजहोमे विनियोगः॥ ॐ इयं नार्युपब्रूते लाजानावपन्तिका॥ आयुष्मा
नस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा॥ इदमग्नये॥ २॥ ॐ इमांल्लाजानावपामीत्याथर्वण ऋषिरग्निर्देवतानुष्टुप्छन्दो लाजहोमे वि
नियोगः॥ ॐ इमांल्लाजानावपाम्यग्नौ समृद्धिकरणं तव॥ मम तुभ्यं च संवननं तदग्निरनुमन्यतामियं स्वाहा॥ इदमग्नये॥ ३॥ त
तो वधूदक्षिणहस्तं साङ्गुष्ठं गृह्णाति वरः॥ ॐ गृह्णामीत्यादीनां चतुर्णां याज्ञवल्क्यभरद्वाजाथर्वणाहस्ता मार्षयो भगवन्यो देवता
त्रिष्टुबुष्णिगनुष्टुभश्छन्दांसि पाणिग्रहणे विनियोगः॥ ॐ गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः॥ भगो
अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥ १ ॥ अमोहमस्मि सा त्वं सा त्वमस्यमो अहं सामाहमस्मि ऋक्त्वं द्यौरहं पृ
थिवी त्वम्॥ २ ॥ तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विन्दावहै बहून्॥ ३ ॥ ते सन्तु जरदष्टयः संप्रि
यौ रोचिष्णू सुमनस्यमानौ॥ पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम्॥ ३॥ इति मन्त्रेण॥ ॥ अथ वधू
मग्नेरुत्तरतः प्राङ्मुखीं पूर्वोपकल्पितदृषदुपलं दक्षिणपादेनारोहयति वरः॥ ॐ आरोहेममित्याथर्वण ऋषिरग्निर्देवतानुष्टु
प्छन्दोऽश्मारोहणे विनियोगः॥ ॐ आरोहेममश्मानमश्मेव त्वं स्थिरा भव॥ अभितिष्ठ पृतन्यतो ववाधस्व पृतनायतः॥ इति मं
त्रेण॥ आरूढायामेव तस्यां वरो गाथां गायति॥ ॐ सरस्वती प्रेदमिति विश्वामित्र ऋषिः सरस्वती देवतानुष्टुप्छन्दो गाथागा

CC-0. In Public Domain. Digitization by eGangotri

राम
२८२

नेविनियोगः ॥ ॐ सरस्वतीप्रेदमवस्व भगेवाजिनीवति ॥ यान्त्वाविश्वस्य भूतस्य प्रजायामस्याग्रतः यस्यां भूतꣳ समभवद्यस्यां वि
श्वमिदञ्जगत् ॥ तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः इति ॥ ततोऽग्रेवधूः पश्चाद्वरः पुरोणीतावृत्तसहितः अग्निं प्रदक्षि
णीकुर्वतः ॥ तत्र ॐ तुभ्यमग्ने इत्याथर्वणाऋषिरग्निर्देवता अनुष्टुप्छन्दः परिक्रमेणे विनियोगः ॥ ॐ तुभ्यमग्ने पर्यवहन्त्सूर्यां
वहतुना सह ॥ पुनः पतिभ्यो जायां दाऽग्ने प्रजया सह ॥ इति वरः पठति ॥ ततः पश्चादग्नेः पूर्ववत्स्थित्वा लाजहोमसाङ्गुष्ठहस्त
ग्रहणाश्मारोहणगाथागानाग्निप्रदक्षिणानि पूर्ववत् ॥ पुनस्तथैव ॥ एतेन नवलाजाऽऽहुतयः ॥ साङ्गुष्ठग्रहणात्रयम् ॥ अश्मा
रोहणात्रयम् ॥ गाथागानत्रयम् ॥ अग्निप्रदक्षिणात्रयं वसम्पते ॥ १ ॥ ततो वसिष्टलाजैः कन्याञ्जलिस्थ सूर्पकोणे
न वधूर्जुहोति ॥ ॐ भगाय इति प्रजापतिर्ऋषिर्भगवत्योदेवता त्रिष्टुप्छन्दो लाजहोमे विनियोगः ॥ ॐ भगाय स्वाहा ॥ इ
दं भगाय ॥ ततस्तूष्णीं परिक्रमणम् ॥ ततो वरउपविश्य ब्रह्मणान्वारब्ध आज्येन जुहुयात् ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजाप
तये ॥ इति मनसा ॥ ॥ अत्र प्रोक्षणीपात्रे हुतशेषस्याज्यस्य प्रक्षेपः ॥ ततः आलेपने नोत्तरोत्तरकृतसप्तमण्डलेषु सप्त
पदाक्रमणं वरो वधूं कारयति वक्ष्यमाणमन्त्रैः ॥ अत्रैव सप्तर्षिपूजनम् ॥ तत्र प्रथमे मण्डले ॥ ॐ एकमिषे विष्णुस्त्वा नयतु
१ ॥ द्वितीये ॥ ॐ द्वे ऊर्जे विष्णुस्त्वा नयतु ॥ २ ॥ तृतीये ॥ ॐ त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु ॥ ३ ॥ चतुर्थे ॥ ॐ चत्वारि मायो
भवाय विष्णुस्त्वा नयतु ॥ ४ ॥ पञ्चमे ॥ ॐ पञ्च पशुभ्यो विष्णुस्त्वा नयतु ॥ ५ ॥ षष्ठे ॥ ॐ षडृतुभ्यो विष्णुस्त्वा नयतु ॥ ६ ॥ सप्तमे

राम
२८२

282

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ मखेस प्रपदा भवसामामनुव्रता भव विष्णुस्त्वा नयतु ॥ ७ ॥ ततो ऽग्नेः पश्चादुपविश्य उदकुम्भस्थितकुम्भादाम्रपल्लवे
न जलमानीय तेन जलेन वरो वधूमभिषिञ्चति ॥ ॐ आप इति प्रजापतिर्ऋषिर्लिङ्गोक्ता देवतानुष्टुप् छन्दो मूर्द्धाभिषेचने
विनियोगः ॥ ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥ इत्यनेन ॥ पुनस्ततस्तत कुम्भान्थेव जलमा
नीयाभिषिञ्चति ॥ ॐ आपो हि ष्ठेति त्र्यृचस्य सिन्धुद्वीप ऋषिरापो देवता गायत्री छन्दो मार्जने विनियोगः ॥ ॐ आपो हि ष्ठा
य ॥ १ ॥ ॐ यो वः ० ॥ २ ॥ ॐ तस्मा अरङ्गमा० ॥ ३ ॥ इति तिसृभिः ॥ ॥ ततः सूर्यमुदीक्षस्वेति वधूं सम्बोध्य वरः ॥ आह ॥ ॐ तच्च
क्षुरिति दध्यङ्ङाथर्वण ऋषिः पुरउष्णिक् छन्दः सूर्यो देवता सूर्यप्रेक्षणे विनियोगः ॥ ॐ तच्चक्षुर्देशतान् ॥ इति पठित्वा वधूः सू
र्यं पश्यति ॥ ॥ अस्तमिते सूर्ये ध्रुवमुदीक्षस्वेति प्रैषानन्तरं ध्रुवं पश्यति ॥ तत्र वरपठनीयो मन्त्रः ॥ ॐ ध्रुवमसि ध्रुवं त्वाप
श्यामि ध्रुवैधि पोष्ये मयि ॥ मह्यं त्वादाद्बृहस्पतिः ॥ मया पत्या प्रजावती सञ्जीव शरदः शतम् इति ॥ इति दृष्ट्वा सा यदि न पश्यति
तथापि पश्यामीति ब्रूयात् ॥ ॥ अथ वरो वध्वा दक्षिणांसोपरि हस्तं नीत्वा तस्या हृदयमालभते ॥ ॐ मम व्रते त इति मन्त्रस्य
प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दो बृहस्पतिर्देवता हृदयालम्भने विनियोगः ॥ ॐ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते
अस्तु ॥ मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमिति मन्त्रेण ॥ ॥ अथ वधूमभिमन्त्रयति वरः सुमङ्गलीरियं
वधूरिमां समेत पश्यत ॥ सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन इति मन्त्रेण ॥ ॥ अथ वधूं बलवान्कश्चिदुग्रसरा उत्थाप्य प्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२८३

गृहस्याग्न्यागारे लोहितानडुहो लोहितचर्मणि उपरि लोमास्तीर्णे तामुपवेशयेत्।। वरो वा।। ॐ इह गावो निषीदन्त्विहाश्वा इह पूरु
षाः इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदतु।। इति मन्त्रेण।। ।। अथ स्विष्टकृद्धोमः।। ॐ अग्नये स्विष्टकृत इति मन्त्रस्य प्र
जापतिर्ऋषिरग्निर्देवता स्विष्टकृद्धोमे विनियोगः।। ॐ अग्नये स्विष्टकृते स्वाहा।। इदमग्नये स्विष्टकृते।। इति स्विष्टकृतम्।। स्रु
वावस्थितहुतशेषस्याग्नौ प्रक्षेपः।। अयं च होमो ब्रह्मणान्वारब्धकर्तृकः।। तत आज्यसंस्रवप्राशनम्।। ।। पुनराज्यत
त्रैव प्राशनम्।। ।। ॐ अद्य कृतैतद्धोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुक
गोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणात्वेनाहं संप्रददे।। इति ब्रह्मणे दक्षिणां दद्यात्।। ॐ स्वस्तीति प्रतिवचनम्
ॐ सुमित्रिया दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिऋषिरापो देवता आदानप्रक्षेपयोर्विनियोगः।। ॐ सुमित्रिया न आप ओषध
यः सन्तु इति पवित्रं गृहीत्वा।। प्रणीताजलेन शिरः संमृज्य।। ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः।। इत्यैशान्यां प्र
णीतापात्रं न्युब्जीकुर्यात्।। ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य हस्तेनैव बर्हिर्जुहुयात्।। तत्र मन्त्रः।। ॐ देवा गातुवि
दो गातुं।। वाते धाः स्वाहा ततउत्थाय वध्वा दक्षिणहस्तेन स्रुवे स्पृष्टे घृतपुष्पफले।। पूर्णाहुतिः।। तत्र मन्त्रः।। मूर्द्धानं दिवो· देवा
स्वाहा।। ।। ततः स्रुवेण भस्मानीय दक्षिणाकरानामिकागृहीतभस्मना।। ॐ त्र्यायुषं जमदग्नेः इति ललाटे।। ॐ कश्यपस्य त्र्यायुष
मिति ग्रीवायाम्।। ॐ यद्देवेषु त्र्यायुषमिति दक्षिणांसे।। ॐ तन्नो अस्तु त्र्यायुषमिति हृदि।। त्र्यायुषं कुर्यात्।। अनेनैव क्रमेण वध्वा अ

283

राम
२८३

११८

CC-0. In Public Domain. Digitization by eGangotri

पि॥ तत्र तन्तोऽन्यस्य स्थाने तन्ते इति विशेषः॥ तत आचारात्॥ शराशं रवसुवर्णाग्रेरित्यसिन्दूरकरणम्॥ ग्राम्यवचने च वरः कुर्या
त्॥ ग्राम्यामात्रादिह्नडह्रियः॥ अथ वधूनो मराग्यमागत्य दूर्वाक्षतादिग्रहणम्॥ ॥ ततस्त्रिरात्रमक्षारलवणाशिनौ निह्नन्न
मैथुनौ च भवतः॥ ॥ इति सूत्रानुसारि विवाहपद्धतिः॥ ॥ अथ चतुर्थ्यामपररात्रे चतुर्थीकर्म॥ तच्च गृह्यपल्लरेस्ववक
र्त्तव्यम्॥ तैलोद्वर्त्तनादिकं कृत्वा युगकाष्ठ उपविश्य स्नात्वा शुचिवस्त्रं परिधाय गृहं प्रविश्य प्राङ्मुखौ वधूवरावुपविशतः॥
तत्र कुशकण्डिकारम्भः॥ कुशैर्हस्तमात्रं चतुरस्रं भूमिं परिसमूह्य कुशानैशान्यां निक्षिप्य गोमयोदकेनोपलिप्य स्रुवमूलेनो
त्तरतस्त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यां समुद्धृत्य वारिणाभ्युक्ष्य देशमभिषिंच्य॥ कांस्यपात्रेणाग्निमादाय तत्र प्रत्यङ्
मुखं निदध्यात्॥ ततः ॐ अद्येह अस्यां रात्रौ कर्त्तव्यचतुर्थीहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्त्तुममुकगोत्रममुक
शर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे॥ इति ब्रह्माणं वृणुयात्॥ ॐ वृतोऽस्मीति प्रतिवच
नम्॥ यथाविहितं कर्म कुरु इति वरेणोक्ते॥ ॐ करवाणीति प्रतिब्रह्मवचनम्॥ ततोऽग्नेर्दक्षिणतः शुद्धमासनं निधाय तदु
परि प्रागग्रान् कुशानास्तीर्य अग्निं प्रदक्षिणीकृत्य अस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय॥ ॐ भवानीति तेनोक्ते॥ तत्र ब्रह्मा
णमुदङ्मुखमुपवेशयेत्॥ ततः पृथुदयात्रमग्नेरुत्तरतः प्रतिष्ठाप्य॥ प्रणीतापात्रं पुरः कृत्वा॥ वारिणा पूर्य कुशैराच्छाद्य॥
ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः॥ कुशोपरि निदध्यात्॥ ॥ ततः परिस्तरणम्॥ बर्हिषश्चतुर्थभागमादाय आग्नेयादीशाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२८४

न्तम्॥ अपरश्चतुर्थभागमादाय उल्मुकोग्निपर्यन्तं॥ अपरेणैकमुल्मुकमादाय व्यान्तम्॥ अवशिष्टेनाग्निनः प्रणीतापर्यन्तम्॥ ततो
ऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थकुशत्रयम्॥ पवित्रकरणार्थं साग्रमनन्तगर्भकुशपत्रद्वयम्॥ प्रोक्षणीपात्रम्
आज्यस्थाली॥ चरुस्थाली॥ सम्मार्जनकुशाः॥ उपयमनकुशाः॥ समिधस्तिस्रः॥ स्रुवः आज्यम्॥ तण्डुलाः॥ पूर्णपात्रम्॥
एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि॥ अथ पवित्रच्छेदनकुशैर्वरप्रादेशमितं पवित्रे छित्वा प्र
णीतोदकं त्रिः सपवित्रकरेण प्रोक्षणीपात्रे निधाय॥ कराभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम्॥ ततः प्रोक्षणीपात्रं
वामहस्ते कृत्वा॥ अनामिकाङ्गुष्ठाभ्यां त्रिरुद्दिङ्गनम्॥ प्रणीतोदकेन प्रोक्षणीप्रोक्षणम्॥ ततः प्रोक्षणीजलेनासादितवस्तुसे
चनम्॥ ततोऽग्नेरुत्तरतः प्रणीतादक्षिणादिशि प्रोक्षणीपात्रं निदध्यात्॥ आज्यस्थाल्यामाज्यनिर्वापः॥ प्रणीताजलं किंचिच्च
रौ दत्वा प्रणीताजले न तण्डुलांस्त्रिः क्षाल्य चरौ प्रक्षिपेत्॥ स्वयं वा गृहीत्वा ब्रह्मणा वाज्यं वह्नेरुत्तरतश्चरुं दक्षिणत आज्यं निद
ध्यात्॥ तत आज्यमग्नितश्चरोः पूर्वेणानीयाग्रे धृत्वा पश्चिमेन चरुमानीयाज्यस्योत्तरतो निदध्यात्॥ ततो वारत्रयी प्रोक्षणी
वदाज्यस्योत्पवनम्॥ अवेक्ष्य सत्यपद्रव्ये तन्निरसनम्॥ पुनः पूर्ववत्प्रोक्षण्युत्पवनम्॥ तत उपयमनकुशान् वामहस्ते कृ
त्वा प्रजापतिं मनसा ध्यात्वा॥ उत्तिष्ठन् समिधस्तूष्णीमग्नौ प्रक्षिपेत्॥ तत उपविश्य सपवित्रप्रोक्षणीजलेनाग्निं प्रदक्षिणां प
र्युक्ष्य॥ पवित्रे प्रोक्षणीपात्रे धृत्वा॥ ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ पातितदक्षिणजानुर्जुहुयात्॥ तत्राघारादारभ्याहुतिचतु

284

राम
२८४

११९

ष्टये ततदाऊत्यवनन्तरं स्रुवावस्थितघृतस्य प्रोक्षणीपात्रे संस्रव प्रक्षेपः॥ ॥ॐ प्रजापतये इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द
प्रजापतिर्देवता चतुर्थीहोमे विनियोगः॥ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये॥ १॥ इति मनसा॥ ॐ इन्द्रायेति प्रजापति(
र्ऋषिस्त्रिष्टुप्छन्दो इन्द्रो देवता चतुर्थीहोमे विनियोगः॥ ॐ इन्द्राय स्वाहा॥ इदमिन्द्राय॥ २ ॥ इत्याघारौ॥ ॐ अग्नये इति प्र
जापतिर्ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता चतुर्थीहोमे विनियोगः॥ ॐ मग्नये स्वाहा॥ इदमग्नये॥ ३ ॥ ॐ सोमायेति प्रजापतिर्ऋ
षिस्त्रिष्टुप्छन्दः सोमो देवता चतुर्थीहोमे विनियोगः॥ ॐ सोमाय स्वाहा॥ इदं सोमाय॥ ४ ॥ इत्याज्यभागौ॥ ॥ततआज्या
हुति पश्चनये स्थालीपाकाऊतीच पूर्वोपकल्पित ष्टथ्थूदयाज्येन ततदाऊत्यनन्तरं ऊतशेषप्रक्षेपः॥ आज्याऊति पश्चके चना
न्वारम्भः॥ ॐ अग्ने प्रायश्चित्त इत्यादीनां पंचानां प्रजापतिऋषिरग्निवायुसूर्यचन्द्रमो देवता गधर्वा अनुष्टुप्छंदासि चतुर्थी
होमे विनियोगः॥ ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्ये पतिघ्नी तनूस्तामस्यै
नाशय स्वाहा॥ इदमग्नये॥ १ ॥ ॐ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि॥ यास्ये प्रजा
घ्नी तनूस्तामस्यै नाशय स्वाहा॥ इदं वायवे॥ २ ॥ ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि
यास्ये पशुघ्नीस्तनूस्तामस्यै नाशय स्वाहा॥ इदं सूर्याय॥ ३ ॥ ॐ चन्द्रः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथका
म उपधावामि॥ यास्ये गृहघ्नीस्तनूस्तामस्यै नाशय स्वाहा॥ इदं चन्द्रमसे॥ ४ ॥ ॐ गंधर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि

राम
२८५

तल्परास्त्वा नाथकामउपधावामि ॥ यास्येयशोग्निःसा मस्येनाशायस्वाहा । इदं गन्धर्वाय ॥ ५ ॥ ॥ ततः स्थालीपाकेन जुहोति ॥ ॥
ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ १ ॥ इति मनसा ॥ अग्निमारुतिदशानयेन तत्स्वकृत्यं तत्र कृतशेषस्य प्रोक्षणीपात्रे प्रक्षे
पः ॥ ततः प्रत्येकाग्रारब्धः आज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः ॥ ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते ॥ १ ॥ ततः
आज्येन ॥ ॐ व्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि चतुर्थी होमे विनियोगः ॥ ॐ भूः स्वा
हा ॥ इदं भूः ॥ २ ॥ ॐ भुवः स्वाहा ॥ इदं भुवः ॥ ३ ॥ ॐ स्वः स्वाहा ॥ इदं स्वः ॥ ४ ॥ एता महाव्याहृतयः ॥ ॥ ॐ त्वन्नो अग्न इति वामदे
वऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दश्चतुर्थी होमे विनियोगः ॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अव यासिसीष्ठा
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्यां ॥ ५ ॥ ॐ सत्वन्न इति वामदेवऋ
षिरग्निवरुणौ देवते त्रिष्टुप्छन्दश्चतुर्थी होमे विनियोगः ॥ ॐ स त्वन्नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ॥ अव य
क्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा ॥ इदमग्निवरुणाभ्यां ॥ ६ ॥ ॐ अयाश्चाग्न इति वामदेवऋषिर
ग्निर्देवता त्रिष्टुप्छन्दश्चतुर्थी होमे विनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमया असि अया नो यज्ञं वहास्ययानो
धेहि भेषजं स्वाहा ॥ इदमग्नये ॥ ७ ॥ ॐ ये ते शतमिति वामदेवऋषिर्वरुणः सविता विष्णुर्विश्वे मरुतः ॥ स्वर्का देवता त्रिष्टु
प्छन्दश्चतुर्थी होमे विनियोगः ॥ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे

285
राम
२८५

१२०

ञ्चन्तु मरुतस्स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यः मरुद्भ्यः स्वर्केभ्यः॥ ८ ॥ ॐ उदुत्तममिति शुनःशेप ऋ
षिर्वरुणो देवता त्रिष्टुप्छन्दः चतुर्थिहोमे विनियोगः॥ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय॥ अथा वयमा
दित्य व्रते तवानागसो अदितये स्याम स्वाहा॥ इदं वरुणाय॥ ९ ॥ इति सर्वप्रायश्चित्तसंज्ञका॥ अथ प्रजापतये इति प्रजापति ऋ
षिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता चतुर्थिहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये॥ १० ॥ इति मनसा॥ इदं प्रजा
पतये॥ ॥ ततः संस्रवप्राशनं॥ तत आचम्य अस्यां रात्रौ कृते तच्चतुर्थीहोमकर्मणि कृताकृतावेक्षणारूपब्रह्मकर्मप्रतिष्ठार्थमि
दं पूर्णपात्रं प्रजापतिदैवतं अमुकगोत्राय अमुकशर्मणे दक्षिणां तुभ्यमहं संप्रददे॥ इति ब्रह्मणे दक्षिणां दद्यात्॥ ॐ स्वस्तीति प्रतिव
चनं॥ ॐ सुमित्रिया दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिऋषिरापो देवताः॥ प्रणीताविमोके विनियोगः॥ ॐ सुमित्रिया न आप ओ
षधयः सन्तु इति पवित्राभ्यां शिर उन्मृज्य॥ ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्म इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्या
त्॥ ततस्तरणक्रमेण बर्हिरानीय घृतेनाभिघार्य हस्तेनैव जुहुयात्॥ ॐ देवा गातुविद इत्यस्य वनस्पति ऋषिर्विराट्छन्दो देव
ता बर्हिर्होमे विनियोगः॥ ॐ देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं देव यज्ञं स्वाहा॥ वाते धाः स्वाहा॥ इत्यनेन मं
त्रेण॥ ततः पृथक्पात्रस्थमुदकमाम्रपल्लवेनानीय वरो वधूमभिषिञ्चति॥ ॐ या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी नि
न्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सह श्री अमुकदेवि इति मन्त्रेण॥ ततो वधूं स्थालीपाकं प्राशयति वरः॥ ॐ

CC-0. In Public Domain. Digitization by eGangotri

ॐ प्राणैस्ते प्राणान्संदधामि ॥ ॐ अस्थिभिस्ते आस्थिनि संदधामि ॥ ॐ मांसैस्ते मांसानि संदधामि ॐ त्वचा ते त्वचं संदधामि
इति मंत्रचतुष्टयेन प्रतिमंत्रान्ते प्राशनं ॥ तन्मे वरो वधूहृदयं स्पृष्ट्वा पठति ॥ ॐ यत्ते सुशिमे हृदयं दिवि चंद्रमसि श्रितं ॥ वेदाहं त
न्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम् ॥ ततः कंकणं विमोचनं ॥ घृतग्रंथिविमोकादीनि आचारप्राप्ता
नि कुर्यात् ततउत्थाय वधूदक्षिणहस्तस्पृष्टस्रुवेण घृतपुष्पफलपूर्णेन ॥ ॐ मूर्द्धानं दिवो अरतिं पृथिव्यां वैश्वानरमृत आज्य
मग्निं कविं सम्राजमतिथिं जनानामासन्नपात्रं जनयन्त देवाः स्वाहा ॥ ॥ ततः स्रुवेण भस्मानीय दक्षिणकरानामिकागृहीत
भस्मना ॥ ॐ त्र्यायुषं जमदग्नेरिति ललाटे ॥ ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायां ॥ ॐ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले ॐ त
न्नो अस्तु त्र्यायुषमिति हृदि ॥ इति त्र्यायुषं कुर्यात् ॥ अनेनैव क्रमेण वध्वा अपि तत्र तन्त्रोस्थाने तत इति विशेष ॥ इति चतुर्थीकर्म ॥ ॥
अथ विवाहपद्धतिः समाप्तं ॥ ॥ अथ गर्भाधानं ॥ तत्र कृतौ स्नातां चतुर्थदिने वधूं प्रातरादित्याऊर्भिमितिरस्मीवादि तस्य पति
ष्टेन ॥ ततस्तद्दिने मातृपूजापूर्वकमाभ्युदयिकश्राद्धं कृत्वा षोडशवासरादर्वाक् शुभरात्रौ दक्षिणकरेण पतिर्वध्वा उपस्थमभिमृश
ति ॐ पूषा भगं सविता मे ददातु रुद्रः कल्पयतु ललामगुं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजापतिर्धाता
गर्भं दधातु ते वैश्वानर आदधातु ॥ इति मंत्रेण ततः प्राङ्मुखउपविष्टउदङ्मुखोपविष्टां नाभिमंत्रयेत ॥ ॐ गर्भं धेहि सिनीवालि गर्भं धे
हि पृथुष्टुके ॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ इति मंत्रेण ॥ ततो वधूकरास्समीपे शरवं कृत्वा ॥ ॐ रेतो मूत्रं विजहाति योनिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रविशद्दिन्द्रियं ॥ गर्भो जरायुजावृत उल्वं जहाति जन्मना । इति मंत्रं पठित्वा रेतुः श्रावणं कुर्यात् ॥ अथ तस्या हृदयमालभेत् ॥ ॐ यत्ते
सुसीमइति मंत्रस्य प्रजापति ऋषिर्जगती छंदो हृदयं देवता हृदयस्पर्शने विनियोगः ॥ ॐ यत्ते सुसीमे हृदयं दिवि चंद्रमसि श्रितं ॥
वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम् इति मंत्रेण ॥ ततः स्वस्थो हृष्टमना हृद्ये प्रदेशे
प्रसन्नामनातुरां कामयमानां भर्ता शय्यायां प्रदोषादूर्द्ध्वं स्त्रियमधिगच्छेत् सा यदि गर्भं दधाति तदा पतिः कृतोपवासः पुष्यनक्षत्रे
श्वेतपुष्पकण्टकारिकाया मूलमुत्पाट्य उदकेन पिष्ट्वा चतुर्थे हनि स्नातायावध्वा दक्षिणनासापुटेन संदद्यात् ॥ अनेन मंत्रेण ॥ ॐ
इयमोषधीरिति अस्य प्रजापतिऋषिर्जगतीछंदो ओषधीर्देवता आसेके विनियोगः ॥ ॥ ॐ इयमोषधी त्रायमाणा सहमाना सर(
स्वती अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति ॥ इति गर्भाधानं ॥ ॥ अथ पुंसवनं तच्च गर्भमासापेक्षया द्वितीय तृती
ययोरन्यतरस्मिन्करणीयं ॥ पुष्य पुनर्वसु मृगशिरो हस्त मूल श्रवणास्वात्यन्यतमपुन्नामकनक्षत्रयुतो भयचंद्रताराऽनुकूले दिव
समागत्य तत्पूर्वदिवसे वधूमुपवासं कारयित्वा अग्रिमद्दिने तस्याः स्नातायाः अहतवासोयुग परिधानं तदनंतरं पतिः स्नातः
शुचिः कृताचमनो मातृपूजा पूर्वकाभ्युदयिकश्राद्धं कृत्वा वटशाखां वटशृङ्गाग्रां च आचारतः कृयकुंठकमपि शिशिरेणापिष्ट्वा
वधूदक्षिणनासापुटेनस्यं दद्यात् ॥ ॐ हिरण्यगर्भ इति मंत्रस्य प्रजापतिऋषिस्त्रिष्टुप्छंदः प्रजापतिर्देवता आसेके विनियो
गः ॥ ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकः ॥ आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
२८७

१ ॥ ॐ अद्भ्यः सम्भृत इति मंत्रस्य नारायण ऋषिस्त्रिष्टुप्छन्दः पुरुषो देवता आसेके विनियोगः ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च वि
श्वकर्मणः समवर्त्तताग्रे ॥ तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ २ ॥ इति गर्भाधानं ॥ इति पुंसवनं ॥ ॥ अथ
सीमन्तोन्नयनं ॥ तत्र पुंसवनं गर्भमासापेक्षयो षष्ठेऽष्टमे वा पूर्वोक्तपुन्नामक नक्षत्रेष्वन्यतम नक्षत्रयुक्ते चंद्रताराऽनुकू
लविहितदिने मातृपूजाभ्युदयिके कृत्वा बहिःशालायां कुशकण्डिकायां कुर्यात् ॥ ॥ तत्क्रमः ॥ कुशत्रयेण परिमित चतु
रस्रभूमिं परिसमूह्य कुशान्नैर्ऋत्यां परिक्षिप्य गोमयोदकेनोपलिप्य स्रुवमूलेन स्फ्येन वा उत्तरोत्तरतस्त्रिर्लिख्य उल्लेखनक्रमे
णोद्धृत्य वारिणा तद्देशमभ्युक्ष्य कांस्यपात्रेणाग्निमानीय ॥ तत्र प्रत्यङ्मुखं निदध्यात् ॥ ततो वरं ब्रह्मवरणं कुर्यात् ॥ तत्र वाक्यं
ॐ अद्य कर्त्तव्य सीमन्तोन्नयन होमकर्मणि कृताकृतावेक्षणरूप ब्रह्मकर्म कर्तुं अमुकगोत्रम् अमुकशर्माणं ब्राह्मणमेभिः पुष्प
चंदनताम्बूलयज्ञोपवीतवासोभिः ब्रह्मत्वेन त्वामहं वृणे ॥ इति ब्रह्माणं वृणुयात् ॥ ॐ वृतोस्मीति प्रतिवचनं ॥ ॐ यथाविहितं क
र्म कुरु इति होत्राभिहिते करवाणीति प्रतिवचनानन्तरं ॥ दक्षिणतो ब्रह्मासनं दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य ॐ अस्मिन् सी
मन्तोन्नयनकर्मणि त्वं मे ब्रह्मा भव इत्यभिधाय ॐ भवानीति तेनोक्ते अग्निं प्रदक्षिणं कारयित्वा ब्रह्माणं पूर्वोपकल्पिते कुशास्तृते
आसने उपवेशयेत् ॥ ततः प्रणीतापात्रं पुरतः कृत्वा जलेनापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि नि
दध्यात् ॥ ततः परिस्तरणं बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानान्तं ॥ ब्रह्मणोऽग्निपर्यन्तं ॥ २ ॥ नैर्ऋत्याद्वायव्यान्तं ॥ ३ अ

287

रत्न
२८७

ग्नितप्रणीतापर्यन्तं ॥ ४ ॥ इति परिस्तीर्य ॥ ततोग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं ॥ ३ ॥ पवित्रकरणार्थं साग्रम
नंतगर्भकुशपत्रद्वय ॥ २ ॥ प्रोक्षणीपात्रं ॥ आज्यस्थाली ॥ चरुस्थाली सम्मार्जनकुशाः पंच ॥ ५ ॥ उपयमनकुशास्त्रयोदश
१३ ॥ समिधस्तिस्रः ॥ ३ ॥ स्रुवः आज्यं ॥ षट्पंचाशउत्तरशतद्वय २५६ ॥ यजमानमुष्टिपरिमिताः मतण्डुलपूर्णपात्रं ॥ तिलमु
द्गमिश्रास्तण्डुलाः ॥ एतानि पवित्रच्छेदनकुशानां पूर्वदिशि क्रमेणासादनीयानि ॥ तदुत्तरतो वीरणागायनौ ॥ प्रादेशमिताश्व
श्वत्थशंकुः ॥ त्रिश्वेतशल्यकीकण्टकं ॥ पीतसूत्रपूर्णतर्कुं ॥ दर्भपिंजुलिकात्रयं ॥ औदुम्बरयुग्मफलान्वितशाखा ॥ औदुम्बर
युग्मफलसुवर्णघटितदेवाकर्कराद्युक्तसूत्रदारुण्यविल्वादिफलयुतवराटयादि ॥ अथ दर्पिरवावारपरिस्रा प्रद्रव्यमा
सादनीयं ॥ ततः पवित्रच्छेदनकुशैः प्रादेशमिते पवित्रे कृत्वा ॥ सपवित्रेणपाणिना त्रिः प्रोक्षणीपात्रे प्रणीतोदकं कृत्वा अ
नामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रस्य सव्यहस्तकरणं ॥ अनामिकाङ्गुष्ठाभ्यां पवित्रे गृही
त्वा त्रिरुल्लिंगनं ॥ प्रणीतोदकेन प्रोक्षणीप्रोक्षणं ॥ ततः प्रोक्षणीजलेनासादितवस्तुसेचनं ॥ ततोग्निप्रणीतयोर्मध्ये प्रोक्षणी
निधानं ॥ ततः आज्यस्थाल्यामाज्यनिर्वापः ॥ वरौ तु तिलमुद्गमिश्रतण्डुलानां प्रणीतोदकेन प्रक्षाल्य तण्डुलं किंचिद्दत्वा प्रक्षेप
ततः स्वयं चरुं गृहीत्वा ब्रह्मणा वाज्यं वह्नेरुत्तरतश्चरुं दक्षिणात आज्यं निदध्यात् ॥ ततः सिद्धे वरौ ज्वलनतृणं प्रदक्षिणमुभयोरुप
रिभ्रामयित्वा वह्नौ तत्प्रक्षेपः ॥ ततः स्रुवप्रतपनं ॥ ततः सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतस्तु वं सम्मृज्य प्रणीतोद

रम
२८८

केनाभ्युक्ष्य॥ पुनः प्रतप्य दक्षिणतो विदध्यात्॥ ततः आज्ये मथितनश्वरोः पूर्वेणानीयाग्रे धृत्वा॥ आज्यमथिमेनवरुमानीयाज्यस्योत्तरतो
निदध्यात्॥ ततः आज्यप्रोक्षणी वउत्पवनं॥ अवेक्ष्य सत्यपइवे तन्निरसनं॥ ततः पूर्ववत्प्रोक्ष्य पुनरुत्पवनं॥ ततः उपयमनकुशानादा
य प्रजापतिं मनसा ध्यात्वा उत्थाय तूष्णीमग्नौ समिधः प्रक्षिपेत्॥ अथोपविश्य सपवित्रप्रोक्षणीजलेनाग्निं प्रदक्षिणक्रमेण प
र्युक्ष्य प्रोक्षणीपात्रे पवित्रे धृत्वा ब्रह्मणान्वारब्धः पातितदक्षिणजानुर्जुहुयात्॥ तत्राहुतीचतुष्टये प्रत्याहुत्यनंतरं हुतशेष
स्य प्रोक्षणीपात्रे प्रक्षेपः॥ ततः समिद्धतमेऽग्नौ होमे॥ ॐ प्रजापतये इति प्रजापतिऋषिस्त्रिष्टुप्छंदः प्रजापतिर्देवता आज्यहोमे
विनियोगः॥ ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये॥ १॥ इति मनसा॥ ॐ इन्द्रायेति प्रजापतिऋषिस्त्रिष्टुप्छंद इन्द्रो देवता आ
ज्यहोमे विनियोगः॥ ॐ इन्द्राय स्वाहा॥ इदमिन्द्राय॥ २॥ इत्याघारौ॥ ॐ अग्नये इति प्रजापतिऋषिस्त्रिष्टुप्छंदोऽग्निर्देवता आज्यहोमे वि
नियोगः॥ ॐ अग्नये स्वाहा॥ इदमग्नये॥ ३॥ ॐ सोमायेति प्रजापतिऋषिस्त्रिष्टुप्छंदः सोमो देवता आज्यहोमे विनियोगः
ॐ सोमाय स्वाहा॥ इदं सोमाय॥ ४॥ इत्याज्यभागौ॥ ततोऽन्वारब्धः स्थालीपाकेन होमः॥ ॐ प्रजापतये इति प्रजापतिऋषि
स्त्रिष्टुप्छंदः सोमो देवता सीमन्तोन्नयने होमे विनियोगः॥ ॐ प्रजापतये स्वाहा॥ इदं प्रजापतये॥ ५॥ इति मनसा ततो
न्वारब्धो जुहुयात्॥ ततस्तदुत्पवनतानंतरांकवावशिष्टं हुतशेषद्वयं तस्य प्रोक्षणीपात्रे प्रक्षेपः॥ तत्रैवाज्यस्थालीपाकाभ्यां स्वि
ष्टकृद्धोमः॥ ॐ अग्नये स्विष्टकृते इति मंत्रस्य प्रजापतिऋषिर्गायत्री छंदोऽग्निर्देवता सीमंतोन्नयने विनियोगः॥ ॐ अग्नये स्विष्ट

288

राम
२८८

१२३

CC-0. In Public Domain. Digitization by eGangotri

कृते स्वाहा॥ इदमग्नये स्विष्टकृते॥ ६ ॥ ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिः ऋमेणागायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्नि
वायुसूर्या देवताः सीमन्तोन्नयनहोमे विनियोगः॥ ॐ भूः स्वाहा॥ इदमग्नये॥ ७॥ ॐ भुवः स्वाहा॥ इदं वायवे॥ ८॥ ॐ स्वः स्वाहा॥ इ
दं सूर्याय॥ ९ ॥ एता महाव्याहृतयः॥ ॐ त्वन्नो अग्न इति वामदेव ऋषिस्त्रिष्टुप् छन्दो ग्नीवरुणौ देवते सीमन्तोन्नयनहोमे वि
नियोगः॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः॥ यजिष्ठो वह्नितमः॥ शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्म
त्स्वाहा॥ इदं वाग्नीवरुणाभ्यां॥ १० ॥ ॐ स त्वन्न इति वामदेव ऋषिरग्नीवरुणौ देवते त्रिष्टुप् छन्दः सीमन्तोन्नयनहोमे विनियोगः
ॐ स त्वन्नो अग्नेवमो भवो तेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व णो वरुणं ररराणो वीहि मृडीकं सुहवो न एधि स्वाहा॥ ११॥ इ
दमग्नीवरुणाभ्यां॥ ॐ अयाश्चाग्न इति वामदेव ऋषिर्बृहती छन्द अग्निर्देवता सीमन्तोन्नयनहोमे विनियोगः॥ ॐ अयाश्चाग्नेस्य
नभिशस्तिपाश्च सत्वमित्वमया असि॥ अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा॥ ॥ इदमग्नये॥ १२॥ ॐ ये ते शतमिति वामदेव
ऋषिस्त्रिष्टुप् छन्दो वरुणः सविता विष्णुर्विश्वे देवा मरुतः स्वर्का देवताः सीमन्तोन्नयनहोमे विनियोगः॥ ॐ ये ते शतं वरुणं ये
सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे वि
ष्णवे विश्वेभ्यो मरुद्भ्यः स्वर्केभ्य॥ १३ ॥ ॐ उदुत्तममिति शुनः शेफ ऋषिस्त्रिष्टुप् छन्दो वरुणो देवता सीमन्तोन्नयनहोमे विनि
योगः॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय॥ अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा

Nepal Sanskrit University, Balmiki Campus, Kathmandu

रत्न २८९

इदंवरुणाय ॥ १४ ॥ एताः सर्वप्रायश्चित्तसंज्ञकाः ॥ ॐ प्रजापतयइति प्रजापतिऋषिस्त्रिष्टुप्छंदः प्रजापतिर्देवता सीमन्तो
न्नयनहोमेविनियोगः ॥ ॐ प्रजापतयेस्वाहा ॥ इदंप्रजापतये ॥ १५ ॥ इतिमनश्चाइतिप्राजापत्यं ॥ ॥ अथसंस्रवप्राशन
म् ॥ ततआवश्यदेशकालादिसंकीर्त्य कृतस्यास्य सीमन्तोन्नयनकर्मणः कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपा
त्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणात्वेन तुभ्यमहंसंप्रददे ॥ इति ब्रह्मणे दक्षिणांदद्यात् ॥ ततः
ताविमौवार्हिहोमस्थ ॥ ततः पश्चादग्नेर्वधूमहतेवाससी परिधायभद्रपीठउपवेशयेत् ॥ ततस्त्रिश्वेतशलल्लीकंठकाश्व
त्थसाग्रसंकुपितंतंतुपरिपूर्णाकर्कंदं प्रजापतिऋषिः कर्मेणगायत्र्युष्णिगनुष्टुभश्छंदांस्यग्निवायुसूर्यादेवताविनियनेवि
नियोगः ॥ ॐ भूर्भुवःस्वर्विनयामीति मंत्रेण सकृत् ॥ ॐ भूर्विनयामि ॥ १ ॥ ॐ भुवोविनयामि ॥ २ ॥ ॐ स्वर्विनयामि ३ ॥ इतिमं
त्रत्रयेणवाप्रत्येकं ॥ औदुम्बरफलयुगलान्वितशल्लकीकण्ठकादीपंचकेवधूसीमन्तदक्षिणातोवेणीकृत्वापतिर्वध्नाति ॥
ॐ अयमूर्जावतोवृक्षइतिमंत्रस्य प्रजापतिऋषिस्तुरीयश्छंदः ॥ फलिनीदेवता वेणीबंधने विनियोगः ॥ ॐ अयमूर्जाव
तोवृक्षउर्जीवफलिनीभवइतिमंत्रेण ॥ ततऔदुम्बरयुग्मफलादिसमन्वितसूत्रदोकंवधूग्रीवायामावारतोम्येनैवमंत्रे
णावन्धीयात् ॥ ततोविल्वफलादिसमन्वितवाराक्षतेस्नापनं ॥ तत्त्वफलपुष्पादिकंनूतनवस्त्रेणवध्वासमीक्ष्यकर्तव्या ॥
प्रतिस्नपनेस्वामिपठनीयोमंत्रः ॥ ॐ अयमूर्जावतोवृक्षउर्जीवफलिनीभवइति ॥ राजानमिति प्रजापतिऋषिर्गायत्री

रत्न २८९

289

१२८

छन्दः सोमो देवता गाथा गायने विनियोगः ॥ ॐ राजानं संमायेतां ॥ इति प्रेषा नन्तरं ॥ ॐ सोम एव नो राजेमा मानुषीः प्रजाः अविमु
क्त चक्र आसीरं तीरे तुभ्यमसौ श्री अमुक देवी ॥ इति गाथापि नां गाथि नो गायन ॥ अन्यो वी वी स्तर ॥ ततो यात्रामसन्निहिता नदी
तस्या नाम गृह्णीयात ॥ ततउत्थाय वध्वा दक्षिणा करेणाम्बु वेस्पृष्टे फलपुष्पसमन्वित घृतेन ॥ ॐ मुर्द्धानिमत्यं भरद्वाज ऋषिस्त्रि
ष्टुप् छन्दोग्निर्देवता घृताञ्जुति योगे विनियोगः ॥ ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरं मृत आजातमग्निं कविं सम्राजमति
थिं जनानामासन्नापात्रं जनयन्त देवाः ॥ इति घृताञ्जुतिं दत्वोपविश्य स्नुवेण भस्मानीय दक्षिणा करानामिका गृहीत भस्मना
ॐ त्र्यायुषमिति नारायण ऋषि रुष्णिक छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः ॥ ॐ त्र्यायुषं जमदग्नेः इति ललाटे ॥ १
ॐ कश्यपस्य त्र्यायुषं इति ग्रीवायां ॥ ॐ यद्देवेषु त्र्यायुषं ॥ इति दक्षिणा मूले ॥ २ ॥ ॐ तन्नो अस्तु त्र्यायुषमिति हृदि ॥ ४ ॥ इति त्र्यायु
षं कुर्यात् ॥ तत्र तन्त्रोऽश्य स्वस्त्यानेन ते इति प्रयोगः ॥ ततो ब्राह्मण भोजनं ॥ इति सीमन्तोनयनं ॥ ॥ अथ जातकर्म ॥ तत्र प्रथ
मं प्रशवः ॥ मूल वति मद्भिः परितमभिषिंचति ॥ ॐ यजत्तु दश मास्य इति प्रजापति ऋषि महापंक्तिश्छन्दो गर्भो देवता अञ्क्षयो
विनियोगः ॥ ॐ औजत्तु दशमास्यो गर्भो जरायुणा सह ॥ यथायं वायुरेति यथा समुद्र ओजति ॥ एवायं दशमास्यो अस्रज्जरायु
णा सह ॥ इति मंत्रेण ॥ ततो वधूसमीपे पति र्जपति ॥ ॐ मवैतु पृश्नीत्यस्य प्रजापति ऋषि र्बृहती छन्दो अग्नि र्देवता अवपाने
ने विनियोगः ॥ ॐ अवैतु पृश्नि शेवलं शुने जरायुं त्तवे नैव मांसेन पीवरि न कस्मिंश्च नायतम् अवजरायु पद्यतां ॥ इति ॥ ततः

CC-0. In Public Domain. Digitization by eGangotri

रुल
२९०

पुत्रे जाते नार्भवर्द्धनात्प्राक्कृत्वा तान्मुद्रयिकः कुमारदक्षिणाकरस्यानामिकयासुवर्णान्तर्या मधुघृते नैकीकृत्य घृतमेव वा
पिता प्राशयति ॥ ॐ भूस्त्वयी दधामि ॥१॥ ॐ भुवस्त्वयि दधामि ॥२॥ ॐ स्वस्त्वयि दधामि ॥३॥ ॐ भूर्भुवः स्वः सर्वं त्वयि द
धामि ॥४॥ इति मंत्रैः ॥ एतन्मेधाजननं ॥ ततः कुमारस्य दक्षिणे कर्णे नाभ्यां वाउरवंदत्वा ॥ ॐ अग्निरायुष्मानित्यादी
नां प्रजापतिऋषिर्गायत्री छंदो लिंगोक्ता देवता आयुष्यकरणे विनियोगः ॥ ॐ अग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तेन
त्वायुषायुष्मन्तं करोमि ॥१॥ सोम आयुष्मान्स ओषधिभिरायुष्मांस्तेन त्वायुषायुष्मन्तं करोमि ॥२॥ ॐ ब्रह्म आयुष्मं तद्ब्राह्म
णैरायुष्मत्तेन त्वायुषायुष्मन्तं करोमि ॥३॥ ॐ देवा आयुष्मन्तस्तेमृतेनायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि ॥४॥ इति त्रिर्ज
पित्वा ॥ ॐ त्र्यायुषमिति ॥ नारायण ऋषिरुष्णिक् छंदः शिवो देवता आयुष्यकरणे विनियोगः ॥ ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्या
युषं ॥ यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषं ॥१॥ इति त्रिर्जपति ॥ इति आयुष्यकरणं ॥ ॥ अथ तस्य दीर्घमायुः ॥ कामयमानः पुत्र
मभिमृशन्मंत्रवाकं जपति ॥ सवायं ॐ दिवस्परित्यकादशर्चस्य वात्सप्रीर्भलन्दन ऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवता अभिमर्शने
विनियोगः ॥ ॐ दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परिजातवेदाः ॥ तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वा
धी ॥१३॥१८॥ विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ॥ विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगं
थ ॥१२॥१९॥२॥ समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ॥ तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा

290

राम
२९०

१२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

षाअवर्द्धनः॥१२॥२०॥३॥ अक्रन्ददग्निस्तनयन्निव द्यौः क्षामारेरिहद्वीरुधः समञ्जन्॥ सद्योजज्ञानो विहीमिद्धो अख्यदारोदसी
भानुनाभात्यन्तः॥१२॥२१॥४॥ श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः॥ वसुः सूनुः सहसो॥ अप्सुराजा
विभात्यग्र उषसामिधानः॥१२॥२२॥५॥ विश्वस्य केतुर्भुवनस्य गर्भ आरोदसी अपृणाज्जायमानः॥ वीडुं चिदद्रिमभिनत्परायञ्ज
ना यदग्निमयजन्त पञ्च॥१२॥२३॥६॥ उशिक्पावको अरतिः सुमेधा मर्त्तेष्वग्निरमृतो निधायी॥ इयर्त्ति धूममरुषम्भरिभ्रदुच्छु
क्रेण शोचिषा द्यामिनक्षन्॥१२॥२४॥७॥ दृशानो रुक्म उर्व्या व्यद्यौदुर्मर्षमायुः श्रिये रुचानः॥ अग्निरमृतो अभवद्वयोभिर्यदे
नं द्यौरजनयत्सुरेताः॥१२॥२५॥८॥ यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने॥ प्रतन्नय प्रतरं वस्यो अच्छाभि सुम्न
ं देवभक्तं यविष्ठ॥१२॥२६॥९॥ आ तं भज सौश्रवसेष्वग्न उक्थ उक्थ आभज शस्यमाने॥ प्रियः सूर्ये प्रियो॥ अग्ना भवात्यु
ज्जातेन भिनदुज्जनित्वैः॥१२॥२७॥१०॥ त्वामग्ने यजमाना अनु द्यून्विश्वा वसु दधिरे वार्याणि॥ त्वया सह द्रविणमिच्छमाना
व्रजं गोमन्तमुशिजो विवव्रुः॥१२॥२८॥११॥ इत्येककण्डिकानूनेवान्तप्राशुवाक॥ ॥ततः कुमारस्य प्रतिदिशमेकैकं
ब्राह्मणाम्मध्येयं वममूर्द्धमवेक्षमाणामवस्थाप्य॥ तानुद्दिश्य॥ ॐ इदममनुप्राणितमिति पिता ब्रूयात्॥ ततस्तेषु मध्ये प्राणो
ऽसि पूर्वो॥ व्यानेति दक्षिणो २ पानेत्यपर ३ उदाने ४ त्युत्तर उपरिष्टादवेक्षमाणः पंचमः समानेतिः ब्रूयात्॥ एषामसम्भवे स्वयमे
वतत्वतन्नोपगम्यार्थैवं ब्रूयात्॥ अथ कुमारजन्मभूमिमभिमन्त्रयेत॥ ॐ वेद ते भूमि हृदयमित्यस्य प्रजापतिर्ऋषिरनुष्टुप्छं

CC-0. In Public Domain. Digitization by eGangotri

दोभूम्यभिमंत्रणेविनियोगः॥ ॐ वेदतेभूमिहृदयंदिविचंद्रमसिश्रितं वेदाहंतन्मांतद्विद्यात्पश्येम : शरदः शतं७ शृणुयाम
शरदःशतं॥इतिमंत्रेण॥ अथकुमारमभिमृशति॥ ॐ अस्माभवेत्यस्यप्रजापतिऋषिरनुष्टुप्छंदोलिंगोक्तादेवताअभिमं
त्रणेविनियोगः॥ ॐ अश्माभवपरशुर्भवहिरण्यमस्रुतंभवआत्मावैपुत्रनामासिसजीवशरदंशतम्॥ इत्यनेनमन्त्रेण॥ त
तःकुमारमातरमभिमंत्रयेत्॥ ॐ इडासीत्यस्यप्रजापतिऋषिरनुष्टुप्छंदइडादेवताअभिमंत्रणेविनियोगः॥ इडासिमै
त्रावरुणीवीरेवीरमजीजनः॥ सात्वंवीरवतीभवयास्मान्वीरवतोकरत्॥ इत्यनेनततःकुमारनाभिवर्द्धनेकृतेमातुर्दक्षिण
स्तनंदक्षाल्यकुमारायप्रयच्छति॥ ॐ इमं॥७स्तनमित्यस्यप्रजापतिऋषिस्त्रिष्टुप्छंदःअदितिर्देवतास्तनदानेविनियोगः
ॐ इमछंस्तनमूर्जस्वंतंधयापांप्रपीनमग्नेशरीरस्यमध्ये॥ उत्संजुषस्वमधुमंतमर्वन्समुद्रियछंसदनमाविशस्व॥१७
१८॥ ततोवामस्तनंप्रक्षाल्यप्रयच्छति॥ ॐ यस्तेस्तनइत्यस्यदीर्घतमाऋषिस्त्रिष्टुप्छंदोवाग्देवतास्तनदानेविनियोगः
ॐ यस्तेस्तनःशशयोमयोभूर्योरत्नधावसुविद्यःसुदत्रः॥ येनविश्वापुष्यसिवार्याणिसरस्वतितमिहधातवेकः॥ इतिमंत्रा
भ्यां॥ ततःप्रसवित्रीसपत्नीयमस्तकोपरिभूमौवारिपूर्णंनिदधाति॥ ॐ आपोदेवेष्वित्यस्यप्रजापतिऋषिरनुष्टुप्छंदआ
पोदेवताउदपात्रनिधानेविनियोगः॥ ॐ आपोदेवेषुजाग्रथयथादेवेषुजाग्रथ॥ एवमस्यां॰ सूतिकायां॰ सपुत्रिकायांजा
ग्रथइतिमंत्रेण॥ तच्चसूतिकोत्थानदिवसपर्यंततत्रैवधर्त्तव्यं॥ ततःसूतिकागृहद्वारेदेशेपंचभूसंस्कारान्कृत्वाग्नेरूपसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धानम्॥ ऊशत्त्रयेणाहस्तपरिमितं चतुरस्त्रभूमिं परिसमूह्य तानैशान्यां प्रक्षिप्य गोमयोदकेनोपलिप्य॥ स्रुवमूलेन स्फ्येन वा उत
रोत्तरं त्रिरुल्लिख्योल्लेखनक्रमेणोद्धृत्य वारिणा तं देशमभ्युक्ष्य कांस्यपात्रेणाग्निमानीय तत्र प्रत्यङ्मुखं निदधाति॥ इत्यग्नेरुप
समाधानं॥ स वाग्निरुत्थानपर्यन्तं धार्यः॥ तत्र वाग्नौ संध्ययोः फलिणीकरणमिश्रसर्षपान् दशदिनानि पिता अन्यो ब्राह्मणो
वाञ्जलिहस्तेन जुहोति॥ तत्र प्रथमाहुतौ मंत्रः॥ ॐ शण्डामर्केति प्रजापतिऋषिस्त्रिष्टुप्छंदः आलिखता देवता फलिनीकरण
मिश्रसर्षपहोमे विनियोगः॥ ॐ शण्डामर्का उपवीरः शौण्डिकेय उलूखलः मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा॥ इदं श
ण्डामर्काभ्यामुपवीराय शौण्डिकेयायोलूखलाय मलिम्लुचाय द्रोणाय च्यवनाय॥ १॥ द्वितीयाहुतौ॥ ॐ आलिखन्नित्यस्य प्र
जापतिऋषिस्त्रिष्टुप्छंदः आलिखता देवताः फलिनीकरणमिश्रसर्षपहोमे विनियोगः॥ ॐ आलिखन्ननिमिषः किंवदन्त उपश्रु
तिर्हर्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहा॥ इदमालिखतेऽनिमिषाय किंव
दन्तायोपश्रुतये हर्यक्षाय कुम्भीशत्रवे पात्रपाणये नृमणये हन्त्रीमुखाय सर्षपारुणाय च्यवनाय॥ २॥ अथ यदि दश
हाभ्यन्तरे कुमारग्रहो बालमाविशेत्॥ नाविष्टं न नामयति न रोदिति न हृष्यति न तुष्यति न स्नायति च तदैतं नैमित्तिकं कर्म क
र्तव्यं॥ तदा तं बालं जालेनाच्छाद्य उत्तरीयसावासेन वा पिता अङ्के आधाय जपति॥ ॐ कूर्कुरः सुकूर्कुर इत्यादि त्रयाणां प्रजापतिऋ
षिरनुष्टुप्छन्दः श्वा कूर्कुरो देवता जपे विनियोगः॥ ॐ कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपे

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२९२

तापहरन्तस्य सूयन्ते देवा वरमदद्‍ः सत्वं कुमार मेवाष्टगाथा ॥ वेद्वेहुनकसञ्जननमस्ते अस्तुसीसरोलपेनामहर ॥ इतिजयः
ननामयन्ति नरोदिति न हृष्यति न ग्लायति यदा तदा ॥ ॐ यत्र वयन्त्वदामो यत्र वाभिमृशामसि इत्यभिमृशति ॥ ॥ इतिजातक
र्मः ॥ अथषष्ठिकापूजा ॥ अथ षष्ठे जाते षष्ठे दिने रात्रौ षष्ठिकापूजा ॥ तत्र कुमारपिता प्रदोषसमये सूतिकागृहे पूजामण्डपं
विधाय प्राङ्मुख उदङ्मुखो पविश्य दीपं प्रज्वाल्य गौरसर्षपांश्च यवान् सूतिकागृहे पूजास्थाने विकिरेत् ॥ तत्र रक्षोहणं मि
तिभिर्मन्त्रैः ॥ अपक्रामन्तु ते भूता ये भूता भूमिमाश्रिता ॥ ये भूतविघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥ इत्यनेन ॥ ॥ अथप्रयो
गः ॥ कुशतिलजलान्यादाय अद्येत्यादि देशकालादीन्संकीर्त्य अमुकगोत्रोमुकशर्माहं समानन नवोत्पन्नकुमारस्यायुरारोग्यैश्वर्य
बलपुष्टिवृद्ध्यर्थं कुमारजन्मनो दुष्टस्थानस्थितानां ग्रहाणां दुष्टदोषोपशान्त्यर्थं शुभस्थानस्थिताधिकशुभफलप्राप्त्यर्थं बालस्य
हृदशान्तर्दशाजनितदोषोपशान्त्यर्थं विशेषतो रक्षोभूतपिशाचवाराक्षसवेतालभैरवनानाविधयोगिनीगणयक्षगंधर्वविद्याध
रोप्सरोगणादेवगणामातृगणाडाकिनीशाकिनीशकुनीरेवतीगणादिभ्यो रक्षार्थं त्रिविधोत्पातशान्त्यर्थं गणेशमातृपूजापूर्वकं
षष्ठिकादेव्याः पूजनमहं करिष्ये इति सकल्प ॥ ब्राह्मणाननुज्ञाप्य यातन् ॥ दीपदानेप्रातः सूर्योदयपर्यन्तदीपदानमहं करिष्ये इति
संकल्प्य ॥ नमोस्त्वनन्तायेति दीपं संपूज्य कलशस्थापनविधिना कलशं स्थाप्य ॥ गणानां त्वेति मंत्रेण गणपतिं संपूज्य वक्रतुण्ड
त्यादिना प्रार्थयित्वा ततः पीठदावक्ष्यतण्डजेषु वा गौर्यादिषोडशमातृः पूजयेत् ॥ ॐ गौरि हागच्छेह तिष्ठेत्यादि प्रत्येकं मावाहपाद्या

292

रत्न
२९२

१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिनां प्रणावादिवत्तु र्थंत नमोंत नाम मंत्रेणासंपूज्य गौर्यादि षोडशमातरः क्षमध्वमितिविसर्जयेत ॥ ततः षष्ठिके इहागच्छति
ष्ठेत्यावाहनादिभिः संपूज्य प्रार्थयेत ॥ रूपं देहि यशो देहि भगं भगवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वान्कामान्प्रदेहि मे इति ॥
ॐ षष्ठिके पूजितासि क्षमस्वेति विसर्जयेत ॥ ततः षट्कृत्तिकाः पूजयेत ॥ ॐ शिवे इहागच्छेत्यादि शंभुः कर्त्तेः सन्नतेः अनसूये
क्षमे एताः पूजयित्वा षट्कृत्तिकाः क्षमध्वमितिविसर्जयित्वा ॥ ॐ यदक्रंदइतिस्कंदं पूजयित्वा यो नंदनः पशुपतेर्मानसोपा
वकस्य च ॥ गंगोमाकृत्तिकानां च स नो देवः प्रसीदतु ॥ इति प्रार्थयित्वा स्कंद मस्वेति विसर्जयेत ॥ ततस्तु षष्ठि योगिनिः सम्
दाये नैव पूजयेत ॥ ॐ ब्रतु षष्ठियोगिन्य इहागच्छ तेत्यावाहनापूजयित्वा विसर्जयेत ॥ ॥अथ ब्रह्मसत्र निमंत्रणामंत्राः ॥ म
नोजुतिः सूर्येरश्मि २ सोमो धेनुम् ३ पितृभ्यः स्व० प्रजापते न ॥ वातो न ॥ नमः शंभवायः इतारमिन्द्रम् ॥ नमोस्तु सर्प्येभ्यः अ
ग्निर्देवता ब्रह्मयज्ञानम् ॥ इति ब्रह्मसत्र मंत्राणां ॥ ॥अथ षष्ठिदिवालग्रहहरतां ॥ प्रयोगसारे ॥ षष्ठेदिने च फेत्कारी गृहीत्वा हन्ति
तिवालकं ॥ तच्चेष्टमात्रविक्षेपो हास्यरोदनमोहनं ॥ कुष्टगुग्गुलसिद्धार्थगजदंतैर्घृतेन च ॥ धूपयेत्तेन ये येद्वापि ततोसौ वतिसा
ग्रही ॥ बलिमंत्रश्च नारायणीये ॥ दधिभक्तमत्स्यमांसादिसाधितबलिमादाय बालकोपरि भ्रामयेदनेन मंत्रेण ॥ ॐ फेत्कारि
णीऊ ष्माणि भगवति सुराणि राणी समक्षि तेस्र्श्च स्र्श्च दह दह यंच पंच मरसर गच्छ गच्छ स्वाहा ॥ इति मंत्रेणा बालकोपरि भ्राम
यित्वा चतुष्पथे क्षिपेत ॥ ततो बालरक्षार्थं मृत्युंजयपूजनं मन्थनी पूजनं द्वारदेशे मूलस्थायन जाले इर्वमेवं स्मृतिकोपरिस्था

CC-0. In Public Domain. Digitization by eGangotri

रत्न २९३ पित्तपोटलिकाकारोऽनवेधनं छागकर्णमोटनं बालग्रहहरस्तोत्रपाठादिकं कृत्वा ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वा रात्रौ जागरणं कुर्यात्
षष्ठीपूजादानानादिशुद्धिरुक्ता व्यासेन ॥ सूतिकावासनिलया जन्मदा नाम देवता ॥ तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता ॥ प्रथ
मे दिवसे षष्ठे दशमे चैव सर्वदा ॥ त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनीति ॥ इति षष्ठिकापूजाप्रयोगः ॥ ॥ श्रीगणेशाय नमः ॥
अथ षष्ठिकापूजा ॥ ॥ भविष्योत्तरे ॥ युधिष्ठिर उवाच ॥ पुत्रे जातेऽथ कन्यायामुत्सवः किं विधीयते ॥ किं दानं कस्य पूजा वा किंस्व
रूपः को विधिः स्मृतः ॥ ॥ श्रीकृष्ण उवाच ॥ पुत्रे जाते व्यतीपाते ग्रहणे चन्द्रसूर्ययोः ॥ पितुः सम्वत्सरदिने दानं कोटिगुणं भवेत्
शृणु पार्थ प्रयत्नेन सुतोत्सवमहोत्सव ॥ जन्मषष्ठदिने कार्या षष्ठी नाम्नी त्रिशूलिनी ॥ दिव्यवस्त्रपरिधाना दिव्याभरण
भूषिता ॥ परार्ध्यसमये सिन्धां गोमयीं मूर्तिमालिखेत् ॥ कपर्दिकाप्रदानं च वांगे वांगे विशेषतः ॥ कर्णयोः कुंडलं दद्यात्पूर्वा
पल्लवशोभितः ॥ अग्रे दीपाष्टकं दद्यान्नैवेद्यं विविधैः फलैः ॥ नालिकेरादिकं तत्र देशकालोद्भवं फलं ॥ सफलं कलशं तस्या अग्र
तस्याः पयस्तु धः ॥ द्विजन्मानं सपत्नीकं सदाचारसमन्वितं ॥ आहूय कारयेत्तस्यास्तपो हस्ते न पूजनं ॥ यथा ॥ भुक्तनराशूल वे
ग्या वा षष्ठी पूज्या नराधिप ॥ षष्ठीपूजामंत्रस्तु अम्बे अम्बिके इति ॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ॥ त्रिष्वेतेषु न कुर्वीत सू रत्न २९३
तकं पुत्रजन्मनि ॥ इति व्यासोक्तेः प्रथमदिने जातकर्मारम्भे दानादौ षष्ठदिने षष्ठीपूजायां दशमदिने व्यंजनसंधानादौ च सूत
काभावो दर्शितः ॥ पुत्रशब्दश्चात्र योऽपत्यमात्रवाचकः ॥ पुत्रे जातेऽथ कन्यायामिति प्रागुक्तेः ॥ ॥ अथ प्रयोगः ॥ कृतनित्य

293

१२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शुक्लांवरधरः प्रदोषसमये पूजास्थानमागत्य हस्तौ पादौ प्रक्षाल्यासनमुपविश्य पूर्वाभिमुखः पीतादीयं प्रज्वाल्यावश्यसा
मान्यार्घस्थापनं विधाय अपसर्पंतु इति सर्षपान् विकिरेत्॥ कुशादीन्यादाय संकल्पं कुर्यात्॥ ॐ अद्येत्यादि अमुकगोत्रस्या
मुकशर्मणो मम अभिनवजातवालस्यायुरारोग्यवृद्धिपूर्वकमुत्तरोत्तरतो हर्षविजयप्राप्त्यर्थं षष्ठीमहोत्सवकर्मणि नानागो
त्रनाम्नां शर्मणां ब्राह्मणोभिश्चंदनपूगफलपुष्पाक्षतेयुष्मानहं वृणो॥ दूर्वांकुरशर्षपराजिकाभिः पीतवस्त्रे पोटलिकां कृत्वा
सूतिकोपरि रक्षार्थं लंबयेत्॥ तां सर्वकर्मनिकायेउ नभिं याददितिसमाचारः॥ ततो वहिर्वलिदानम्॥ क्षेत्रपाल नमस्तुभ्यं सर्व
शान्तिफलप्रदं॥ वालस्याविघ्नार्थमिमं गृह्णत्वलिं मम॥ दैत्यभूतपिशाचाद्या गंधर्वा राक्षसागणाः॥ शुभं कुर्वंतु ने सर्वे म
म गृह्णंत्विमं वलिं॥ योगिनीडाकिनी चैव मातरो निवसंति या॥ शांतिं कुर्वंतु नाः सर्वे मम गृह्णंत्विमं वलिं॥ ॥ ततः सूतिका
गृहद्वारदेहलीमध्ये गणपतिं संपूज्य॥ सर्वविघ्नहरोसि त्वमेकदंत गजानन॥ षष्ठीगेहे विनित्येत्वा शिशुं दीर्घायुषं कुरु॥ ल
म्बोदर महाभाग सर्वोपद्रवनाशन॥ त्वत्प्रसादादविघ्नेन चिरं जीवंतु वालकः॥ द्वारदक्षिणे क्षेत्रपालाय नमः॥ द्वारवामे दु
र्गायै नमः॥ कुशादीन्यादाय॥ ॐ अद्येह अमुकगोत्रस्यामुकशर्मणो मम अभिनवजातवालस्यायुरारोग्यवृद्धिपूर्वकमुत्तरोत्तर
हर्षविजयप्राप्त्यर्थं षष्ठीमहोत्सवकर्मणि दीपकलशगणेशपूजनपूर्वकषष्ठ्यादिदेवतापूजनमहं करिष्ये॥ नमोस्त्वनं
तायेति दीपं संपूज्य। ॐ मही द्यौरित्यादि वैदिकमन्त्रैः कलशं संस्थाप्य सर्वे समुद्रा इति कलशे तीर्थान्यावाह्य॥ ॐ तत्वायामीति

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥ वरुणमावाह्य पूजयित्वा कलशस्य पुरखेविलिख्य त्यार्घमिमं त्रणां कुर्यात् ॥ ततो ॐ गणानां त्वेति गणपतिं वस्त्राद्यादिभिः संपूज्य वः ॥ राम ॥
॥ २९४ ॥ ऋतु राणेति प्रार्थयेत् ॥ तत्रैव कलशे मृत्युंजयं उमां च पूजयेत् ॥ ध्यानम् ॥ वृषपीठे हस्थितं देवं हिमकुन्देन्दुसन्निभ ॥ एकवक्त्रं त्रिनेत्रं
च चतुर्बाहुं महेश्वरं ॥ त्रिशूलाक्षधरं देववरदंभविदारिणा ॥ वामपार्श्वे स्थितां देवीं द्विभुजां कलशां वरां ॥ हेमाभरणभूषांगीं श्वेतां
वरविभूषितां ॥ एवं मृत्युंजयं देवीं ध्यात्वा सर्वपापं प्रणाशयेत् ॥ ॐ नमः शंभवायेति शिवं ॐ देवीद्वारेति देवीं त्वं पूजयेत् ॥ विश्वे
रराटमिति विलिख्य संपूज्य त्रैलोक्यपूजितः सौम्य सदा विजयवर्द्धन ॥ शांतिकृत् गरुडपाणी नारायण नमोस्तु ते ॥ इति प्रार्थयेत् ॥ ॐ
आकृष्णेनेति सूर्यः ॐ इमं देवा इति सोम ॥ ॐ अग्निर्मूर्द्धेति मंगारकं ॐ उद्बुध्यस्वेति बुध ॐ बृहस्पते ॥ ॐ अन्नात्परिस्रुत इति शुक्रः
ॐ शन्नो देवीरिति शनैश्चर ॥ ॐ कयान इति राहुं ॐ केतुं कृण्वन्निति केतुं ॐ तिथिभ्यो नमः ॐ वासरेभ्य नमः ॥ ॐ योगेभ्यो नमः ॥ 294
ॐ सकरणेभ्यो नमः ॥ ॐ ऋतुभ्यो नमः ॥ ॐ राशिभ्यो नमः ॥ ॐ मुहूर्तेभ्यो नमः ॥ इति संपूज्य ॥ पादादावश्वत्थपुष्पं संस्थाप्य अश्वत्था
म्नो ध्यानं ॥ श्यामवर्णो महातेजाः खड्गपाणि वरप्रदः ॥ अश्वत्थामा नमावार्यं ध्याय द्रोणसुतं शिवम् ॥ ॐ ब्राह्मणासः पितरः
आवाहनादि ॥ ब्राह्मणाय नमो तुभ्यं द्रोणाचार्यसुताय वै ॥ वेदवेदांगपूर्णाय अश्वत्थाम्ने नमो नमः ॥ इति प्रार्थयेत् ॥ वलेः कृष्णे ॥ राम ॥
तेजो द्विबाहु च सदा पातालसंस्थितं ॥ रक्ताभयकरं ध्याये द्वलिनं बलिदायकं ॥ ॐ मही द्यौः ॥ आवाहनादि ॥ भूमिस्वर्गं च याता ॥ २९४ ॥
लंये न दत्त द्विजन्मने ॥ भविताया मरावत्यां महेन्द्रस्ते नमो बले ॥ इति प्रार्थयेत् ॥ व्यासस्य ॥ कंजलि जलक वर्णाभ कमण्डलु कलश

१२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्करं ॥ सर्वशास्त्रार्थतत्वज्ञं ध्यायव्यासमुनिं सदा ॥ यस्य कूर्म ॥ आवाहनादि ॥ सर्वशास्त्रार्थतत्वज्ञं वेदवेदांगपारगं ॥ शास्त्रसू
लप्रवक्तारं याराशरसुतं भजे ॥ इति प्रार्थयेत् ॥ हनूमन ॥ वायुपुत्रं महावीरं रक्तवर्णं त्रिलोचनं ॥ कंदमूलफलप्रीतं हनू
मंतं नमाम्यहं ॥ ॥ आवाहनादि ॥ अजनीकजनं वीरं जानकीशोकनाशनं ॥ कपीशमक्षहंतारं वंदे लंकाभयंकरं ॥ इति प्रा
र्थयेत् ॥ विभीषणस्य पौलस्त्यकुलसंभूतं कुंकुमाभं द्विबाहुकं ॥ राक्षसोघैः परिवृत्तं सदा ध्याये विभीषणं ॥ रक्षसांभागेरि आवाह
नादि लंकावास नमस्तुभ्यं पौलस्त्यकुलसंभवं ॥ राक्षसाधीपते देव नमस्तेस्तु विभीषण ॥ इति प्रार्थयेत् ॥ कृपस्य ॥ धनुर्वाणधरं वी
रं श्वेतपीतं श्रुतिं परं ॥ भारद्वाजकुलोत्पन्नं कृपं ध्याये मलापहं ॥ अयदं सहस्रम् ॥ आवाहनादि ॥ राजर्षभ नमोस्तुभ्यं भारद्वाजकु
लोद्भव ॥ कृपाचार्य सदानुष्ट धीर वीर पराक्रम ॥ इति प्रार्थयेत् ॥ परशुरामस्य ॥ जयदग्नीकुलोद्भूतं योमां जनसमप्रभं ॥ ध्या
ये परशुरामं वै दधानं परशुं वरं ॥ प्रजापतेन ॥ आवाहनादि ॥ कार्तवीर्यस्य हंतार यगुंहस्तं महाबल ॥ एकविंशतिनिःक्ष
त्रंकृतं त्वा नमाम्यहं ॥ इति प्रार्थयेत ॥ मार्कंडेयस्य शरदिंदुनिभं शांतं द्विभुजं तं वरप्रदं ॥ छत्राभयकरं ध्याये मार्कंडेयं
महामुनिं ॥ सप्तकल्पय ॥ आवाहनादि ॥ वटवृक्षसमारूढं सच्छत्रं ब्रह्मविंतकं ॥ ऋषिवृन्दशतैस्तुभ्यं मार्कंडेय नमाम्यहं ॥ इ
ति प्रार्थयेत् ॥ ॥ अथ षष्ठि पूजा ॥ गोमयप्रतिमायामक्षतंपुंजे वा स्वसंप्रदायानुरोधेन ॥ ध्यानम् ॥ वज्रभुजां महादेवीं
गपीनयनस्तनी ॥ मयूरवाहनारूढा रक्तवस्त्रधरं शुभां ॥ शूलशक्तिवराभीतिहस्ता ध्यायेन्महेश्वरी ॥ अम्बे अम्बिके ॥ आवा

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥२९५॥

हनम् ॥ आयाहि वरदे देवी महाषष्ठीति विश्रुता ॥ शक्तिभिः सह पुत्रं मे रक्ष जागरवासरे ॥ प्राणावेशाकरांगन्यासौ कुर्यात् ॥ अ
र्घा ॥ पत्रपुष्पफलाभोभीरत्नैश्च वरुभिर्युतं ॥ षष्ठीदेवि मया दत्तं अर्घ्यं गृह्ण नमोस्तु ते ॥ आचमनम् ॥ सर्वलोकस्य रक्षार्थं सदा
सान्निध्यकारिणि ॥ गृहाण षष्ठिके देवी स्नानाय श्रद्धया जनम् ॥ वस्त्रम् ॥ तंतुसंतानसंयुक्त कलकौशेयकल्पितं ॥ सर्वगावर
णांग्रे श्रेष्ठं वसनं परिधीयतां ॥ चंदनं ॥ सकुंकुमं चंदनं वकर्पूरादिसमन्वितं ॥ षष्ठीदेवी मया दत्तं धारस्व यथासुखं ॥ अक्षतमी
मदंतिति अक्षतान् ॥ पुष्पं ॥ चतुर्वर्णानि पुष्पाणि सुगंधानि विशेषत ॥ मया दत्तानि विचित्राणि पूजार्थं प्रतिगृह्यतां ॥ सिंदूरं
सिंदूरताटं केति ॥ धूप ॥ गुग्गुलं घृतसंयुक्तं दशांगेन समन्वितं ॥ षष्ठिदेवि मया दत्तं धूपं मे प्रतिगृह्यताम् ॥ दीप ॥ गव्येनाज्ये
न संपूर्णां विज्योर्कपूररगर्भया ॥ दीपं देवि मया दत्तमिमं गृह्ण नमोस्तु ते ॥ नैवेद्यै ॥ मोदकानि विचित्राणि पक्वानानि दधानि च
विविचरससंयुक्तं तथा पूगसमन्वितं ॥ फेणिकां घृतपूराढ्या नैवेद्यं प्रतिगृह्यतां ॥ मूलेन पुनराचमनीय ॥ ताम्बूलादिनिक
र्पूरैलालवंगादि पूगीफलसमन्वितं ॥ ताम्बूलं कल्पितं भक्त्या गृहाण षष्ठिके मम ॥ इदं फलमिति नारिकेलं ॥ हिरण्यगर्भ इति उपा
यनद्रव्यं ॥ नीराजनं ॥ अंतस्तेजो वहिस्तेजो एकीकृत्यामितप्रभं ॥ आरार्तिक्यं मया दत्तं तं गृहाण मदनुग्रहात् ॥ अथ प्रार्थना ॥ शक्ति
त्वं सर्वदेवानां लोकानां हितकारिणी ॥ मातर्बालमिमं रक्ष महाषष्ठि नमोस्तु ते ॥ गौरीपुत्रो यथा स्कंदः शिशुः संरक्षितः पुरा ॥ त
थेमं मम बालं हि रक्ष त्वं षष्ठिके मम ॥ अथ प्रार्थना ॥ पुरा देवैः पूजितासि ब्रह्मविष्णुशिवादिभिः ॥ अवाप्याम मयि देपि त्वं पूज्यसे

॥ राम ॥
॥२९५॥

295

१२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तिपूर्वकं ॥ देहास्य बालकस्यायुर्दीर्घमस्तु भयं नमोस्तु ते ॥ बालकस्य पिता पश्चात्तवं देव्याः पुरस्थितः ॥ बद्धांजलिभक्तिनम्रो वाचमु
च्चारयेद्रुतं ॥ अथ बालकपितुः प्रार्थना ॥ त्वं देवि मातादितिरंघ्रिनाता त्वं गौरी त्वमेवासि धृतः क्षमा त्वं ॥ कीर्तिः समृद्धिर्भुवनस्य धात्री
त्वमेव देवी प्रणतोस्मि तुभ्यं ॥ यथा सर्वाणि भूतानि त्वयि स्थूलानि रत्नवत् ॥ चराचराणि भूतानि त्वयि स्थूलान्यशेषतः ॥ प्रमानृसा
क्षी भवस्येषते नमस्येन बुद्धिमान् ॥ त्वं सृष्टिरायामजसि प्रजास्त्वं स्थितिस्त्वमेवासकलान्विर्षि ॥ त्वमेव वासि द्विषतस्तवावासमर्व
याम्यस्तु शिशुश्चिरायु स्वस्तिमेस्तु गृहे नित्यं त्वत्प्रसादात्सुरेश्वरी ॥ पुत्रोत्सवमर्हनि संपश्येयं त्वदनुग्रहात् ॥ ततो जननी प्रार्थना
ततोर्भकस्य जननी प्रार्थयेताम तंद्रिता ॥ तव प्रसादात्तनयस्य वक्त्रं दृष्टं मया देवि नमोस्तु तुभ्यम् ॥ सौभाग्यमारोग्यमभीष्टसिद्धिं
देहि प्रजायाश्चिरजिवितां च ॥ गौर्याः पुत्रो यथा स्कंदः शिशुः संरक्षितस्त्वया ॥ तथा ममाप्ययं बालो रक्ष्यतां षष्ठिके नमः ॥ ॥ स
वाधप्रार्थना ॥ प्रथमतः पुण्याहवाचनं ॥ ॐ भो ब्राह्मणाः ३ मुकगोत्रस्यामुकप्रवरस्यामुकवेदाध्यायिनो ३ मुकशर्मणो मम गृ
हे पुण्याहं भवंतो ब्रुवंतु ३ पुण्याहं ३ कल्याणं भवंतो ब्रुवंतु ३ ॐ कल्याणं ३ ॥ ॐ ऋद्धिं भवंतो ब्रुवंतु ३ ऋध्यतां ३ ॐ वृद्धिं भवंतो
ब्रुवंतु ३ ॥ ॐ वर्धतां ३ ॐ श्रियं भवंतो ब्रुवंतु ३ ॐ श्रीः ३ ॐ स्वस्ति भवंतो ब्रुवंतु ३ ॐ स्वस्ति ३ ॥ ॐ शांतिं भवंतो ब्रुवंतु ३ ॐ शांतिः ३
पुनंतु मा १ यथेमां वाचं कल्याणी ॥ २ ॥ सत्रस्य ऋद्धिः ३ पुनस्त्वा ४ मनसः कामं ५ ॥ स्वस्ति न इंद्र ६ ॥ द्यौः शांतिः ७ सर्वेश्वते बाध
वाश्च स्वस्तिवाकाः पुरःसरं ॥ कामयंतोर्भकस्यायुः प्रार्थयं तस्य योषितः ॥ जननी सर्वसौख्यानां वर्द्धिनी कुलसंपदां ॥ माधवी सर्व

Nepal Sanskrit University, Balmiki Campus Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥ सिद्धिनांजन्मदेत्वां नतावयं ॥ ॥षष्ठिकायै वालनिवेदनं ॥ देवतानांमृषीनांच भक्तानां भक्तवत्सले ॥ अर्पितं रक्ष मे पुत्रं महा
॥२९६॥ षष्ठि नमोस्तु ते ॥ जननी सर्वभूतानां विशेषतः ॥ नारायणीस्वरूपेण पुत्रं मे रक्ष सर्वतः ॥ भूतदैत्यपिशाचेभ्यो डाकिनीभ्यो विशे
षतः ॥ सुतं मे स्वसुतं मत्वा रक्ष रक्ष वरानने ॥ एवं रक्ष महाषष्ठि सदा त्वं विघ्ननाशिनी ॥ वालं मम रदा रक्ष नित्यं मम कुक्षिसंस्थित
सर्वभूतहिते मातर्जगतसृष्टिकारिणी ॥ सर्वतः षष्ठिरूपेण वालरक्षां कुरुष्व मे ॥ षष्ठि देवि महाभागे हिताहितवरप्रदे ॥ त्वत्प्र
सादाद्विघ्नेन चिरंजीवतु वालकः ॥ अस्मिन्सूतिकागारे देविभिः परिवारिते ॥ रक्षां कुरु महाभागे सर्वविघ्नविनाशिनी ॥ अ
यं मम कुलोत्पन्नो रक्षार्थं तव पादयो ॥ नीतो मया महाभागे चिरंजीवतु मे सुतः ॥ अथ वालाया मार्जनं ॥ नागरं यद्वलं यच्च (
विष्णोरतुलतेजस ॥ हरस्य यद्वलं यच्च सर्वं भवतु मे सुते ॥ ॥अथ स्कंदपूजा ॥ ध्यान ॥ वराभयंकरः साक्षाद्विभुजः शिखिवाहनः
किरीटी कुंडली देवो दिव्याभरणभूषितः ॥ इयाश्च स्कंदेति मंत्रेणावाहन ॥ स्कंदेहागच्छ इहतिष्ठेति आवाह्य पाद्यं ॥ अर्घ्य ॥ आच 296
मनीयं स्नानं ॥ गंधपुष्पाक्षत वस्त्र यज्ञोपवीतं ड्वयं धूपः दीपः नैवेद्यादिक स्कंदाय नमः ॥ ततः प्रार्थना ॥ ॥कार्तिकेय म
हावाहो गौरीहृदयनन्दन ॥ कुमारं रक्ष मे भाव्यास्त्वीह देव नमोस्तु ते ॥ ॥ततः स्तुति नमः कुमाराय महाप्रभाराय स्कंदा ॥ राम ॥
यने स्कंदितदानवाय ॥ नवार्कविंवद्युतये नमोस्तु ते नमोस्त्व मोघाय तशक्तिपाणये ॥ नमो विशाखाय पवित्राय नमो नमो ॥२९८॥
स्तु ते पराय स्वकामरूपिणे ॥ गुहाय गूढभरणाय धर्त्रे नमो रणोदारणाय ॥ नमोस्तु ते र्कप्रतिमप्रभाय नमोस्तु गुह्याय शु

121

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हायतुभ्यं ॥ नमोस्तु ते लोकभयापहाय नमो नमस्तेतु करोत्कराय ॥ नमो मयूरोज्वलवाहनाय नमोस्तु केयूरधरायतुभ्यम् ॥ नमोध
तोदग्रपताकिने नमो नमः ॥ प्रभाय प्रशान्ताय तेस्तु ॥ सेनानये पादकिने नमोस्तु रूपापरीतामलदिव्यमूर्तये ॥ ॥ अथ वंशपू
यथालाभोपचारैर्वंशं संपूज्य प्रार्थयेत् ॥ नमो नमस्तेतु मनोरमाय नमो नमस्तेतु बालपराक्रमाय ॥ नमो विशालाय नमोस्तु के
यूरधरायतुभ्यम् ॥ सर्वमंगल्यमांगल्य गोविन्दस्य कोस्थित ॥ वंशं वर्द्धय मे वंश सदानंदन नमोस्तु ते ॥ ॥ अथ खड्गपूजा ॥ यथाला
भोपचारैः खड्गं संपूज्य ॥ प्रार्थयेत् ॥ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च ॥ इत्य
ष्टौ तव नामानि स्वयमुक्तानि वेधसा ॥ नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः ॥ रोहिणी चापि नक्षत्रं ते देवं च जनार्दनं ॥ पिता पि
तामहा देवस्त्वं मां पालय सर्वदा ॥ इत्येतेन धृतः शौरी हतं च महिषासुर ॥ तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥ अथ
मातृकापूजा ॥ अथाक्षतपुंजेषु गौरि इहागच्छ इहतिष्ठ इत्यावाह्य स्थापयेत् पाद्यं: अर्घ्यः स्नानं: आचमनं: गंधः अक्षताः पुष्पाणि सिंदू
रं· वस्त्रं· नारिकेलादिफलम् द्रव्यं· दीप· नैवेद्यं· ॐ गौर्यै नमः ॥ एवं मक्षतपुंजेषु· पद्मा· शची· मेधा· सावित्री· विजया· जया· दे
वसेना· स्वधा· स्वाहा ॥ मातरः· लोकमातरः· धृति· पुष्टि· तुष्टि आत्मनः कुलदेवता ॥ यथालाभोपचारैः पूजयेत् ॥ ॥ अथ मृत्
तिकापूजा ॥ तथैवाक्षतपुंजेषु शिव इहागच्छ इहतिष्ठ· पाद्यं· अर्घ्यं· स्नानीयं· आचमनीयं· गंधं· पुष्पं· अक्षता· सिंदूरं· द्रव्यं· वस्त्रं· धूप·
दीपो· नैवेद्यं· ॐ शिवाय नमः ॥ एवं संभूति· कीर्ति ॥ सन्नतिः अनसूया· क्षमा ॥ प्रणवादिनमोन्त नाम मंत्रेण पूजा कार्य ॥ ॥ अथ

ब्रह्मसूत्र· मनोजूति ॥ सूर्यरश्मिः सोमोधेनुः पितृभ्यः प्रजापतेन ॥ वातोवा ॥ नमः शंभवाय ॥ त्रातारमिंद्रं ॥ नमोस्तु सर्पेभ्य ॥ अग्निर्दे
वता ॥ ब्रह्मजज्ञानं ॥ इति मंत्रैर्ब्रह्मसूत्रमभिमंत्र्य वालके धारयेत् ॥ रक्षोहणमिति धारणामंत्रः ॥ वटकाष्ठकमालाभिर्वद्ध्वा श्रीवसज्जा
पुतं ॥ पुनः पुनः महाशब्दं कारयेत् ॥ कर्णामाडनात् ॥ भूतप्रेतपिशाचाश्च यातुधानाश्च साकिनी ॥ वालग्रहाश्च नश्यन्ति सद्यःन्तक
र्णनाडनं ॥ अजबंधनं द्वारदेशे प्रशालं च द्वारदेशे वध्नीयात ॥ ततः शस्त्रापाणिभिः पुरुषैर्जाग्रद्भिः सूतिकारक्षार्थं द्वारदेशे स्थाप
येत् ॥ ॥ अथ मंथानपूजा ॥ यथालाभोपचारैर्मंथानं संपूज्य प्रार्थयेत् ॥ मंथानं: त्वं हि गोलोके देवदेवेन निर्मितः ॥ पूजितश्च
पिधानेन सूतिरक्षां कुरुष्व मे ॥ ॥ अथ तज्जातवालहृषिणो मातरः पूज्या ॥ यथालाभोपचारैः संपूज्य प्रार्थयेत् ॥ जातं हरंति याः
वालं मातरो शूढविग्रहा ॥ अभिरक्षतु मे पुत्रं वलिपूजां हरंति ताः ॥ गीतवाद्यविनोदेन नित्ये न वत्स धष्टिरः ॥ रात्रौ जागरणं कुर्याद्दे
वज्ञेर्न द्विजैः सह ॥ तत्र दानानि देयानि ब्राह्मणेभ्यो यथाविधि ॥ वह्नस्वर्णान्नदानेन षष्ठी मे प्रीयतामिति ॥ प्रमाते स्नपनेदानन्त
र्तनकगायके ॥ स्त्रियः स्वभर्तृकाः पूज्याः वासोलंकारणादिभिः ॥ अनेन विधिना यस्तु षष्ठी देवं प्रपूजयेत् ॥ आयुर्वृद्धिर्भवेत्तस्य सं
ततेरपि पारगो भवः ॥ ततो दक्षिणा ॥ ॥ ॐ अद्य त्यादि देशकालौ संकीर्त्य ॥ अद्यकृतैतद्मुकगोत्रस्यामुकशर्मणोभिनववालकस्या
युर्वृद्धि पूर्वकोत्तरोत्तरोहर्षविजयप्राप्त्यर्थं वालग्रहदृष्यावोत्तर्दशानिवारणार्थं षष्ठिमहोत्सवकर्मांग तया षष्टिकादिदेवतापूजा
सांगतासिद्ध्यर्थं इमां दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजेत ॥ ॥ त

297

तःपूजितेदेवताक्षमध्यमितिउक्त्वाविसृज्यमंत्रपाठआसीर्वादंनीत्वा· ब्राह्मणाम्भोजयेत्॥ स्वयंबन्धुसुहृद्युतोभुंजीत॥ शर्षपपोटलि
कांकांडेनताडयेत्॥ ततःसर्वेस्तनकंमन्यतेनखादंतिनपिबंतीतिदेशाचार॥ ॥इतिभविष्योत्तरेषष्ठीपूजासमाप्ता॥ ॥केश
वः१ नारायण२ माधवः३ गोविन्द४ विष्णु५ मधुसूदन६ त्रिविक्रम७ वामन८ हृषीके९ पद्मनाभ१० दामोदर११ पुरुषो
त्तम १२॥ एतानिद्वादशनामानि॥ हरिद्रयावस्त्रेलिखित्वाबालकमातुर्ललाटेवध्नीयात्॥ ॥अथबालग्रहस्तोत्रं॥ प्रणम्यशि
रसानंगणेशानन्तमीश्वरं॥ बालग्रहस्तवंवक्ष्येसमस्ताभ्युदयःप्रदम्॥१॥ तपशायसशादीप्तावपुषाविक्रमेणाव॥ निर्दिष्टोयः
सदास्कंदःसनोदेवःप्रसीदतु॥२॥ रक्तमाल्यांबरधरोरक्तगंधानुलेपनं॥ रक्तादित्योज्वलःशाःसनोदेवप्रसीदतु॥३॥ योदनंद
नःपशुपतेर्मातृगांयावकस्यच॥ गणेमातृकानांवसनोदेवप्रसीदतु॥४॥ देवसेनापरिवृतोदेवसेनार्चितःसदा॥ देव
सेनापतिश्रीमान्सनोदेवःप्रसीदतु॥५॥ शक्तःशक्तिधरःशूरःकुमारःशिखिवाहनः॥ सुरारिहामहासेनःसनो०॥६॥ प्रकृ
त्यासुन्दरोदान्तोदेवैश्वर्योदयान्वितः॥ नानाविनोदसंपन्नःसनो०॥७॥ प्रबोधप्रबोधावबोधनाप्रबोधना॥ प्रकृष्टाप्रवृ
द्धावधीनासुमनानतथा॥८॥ मनोन्मनीतिविख्यातायोगिन्यःपांतुबालक॥ सुखनास्त्रूकमिनीचैववंडवेगाविभीषणा॥९॥
विद्युज्जिह्वामहानासासतानन्दातथापरा॥ बालदाप्रमदावेतियोगिन्यःपांतुबालकं॥१०॥ हरिणीवायवाराहीवानरीको
कुकीतथा॥ कुवेरीकोटराक्षीवकुम्भकर्णीविवणिका॥११॥ बलादिकारिणीवेतियोगिन्यःपांतु०॥ श्रद्धाविशुद्धाशुद्धावयोगमि

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२९८

ड्डामिनवदा ॥१२॥ सुभगासुभदागौरीवलानिकरणीतिव ॥ विनाविज्ञानविख्यातायोगिन्यः पातु० ॥१३॥ लंवाप्रलंवावन
थालंवकर्णीवलंविका ॥ ज्वालाकरालीकालिंदीकालिकेतियथोदिताः ॥१४॥ स्वछंदावारसंपन्नायोगिन्यः पांतु० ॥ प्रणीता
सुप्रणीताचमालिनीविश्वमालिनी ॥१५॥ विमलाकमलामालीलोलारौवविश्रुता ॥ विंवरन्तोयथाकामंयोगिन्यः पांतुवा
लकं ॥१६॥ वायुवेगामहावेगासुवेगावैववाहिनी ॥ शशिनीहंशिनीहृष्टिःपुष्टिःपोष्टिकसिद्धिदा ॥१७॥ दिव्यातुभाववाहि
न्योयोगिन्यः पांतु ॥ प्रमणिप्रामणीनित्यानिर्भिन्नासुभगागुहा ॥१८॥ छेदिनीद्राविणीवामायोगिन्यः पांतु ॥ रुद्रशक्तिविनि
क्रांतमेकाशीतिक्रमोदितं ॥ १९ ॥ योगिनीवृन्दमेतद्धिसिद्धिविद्याधरार्चितं ॥ स्कंदग्रहाधिदेवनवालकन्यातुसर्वदा ॥२०
शकुनीरेवतीदेवीशिखावक्त्रखमंडिका ॥ प्रलंवाहतनाख्यावकटपुटनिकापुनः ॥२१ ॥ विजयागोमुखीप्रग्रासुरामालात
थापरा ॥ अधोलम्बावपमावक्रसुदायाथवाम्बिका ॥ २२ ॥ नाविनीवैवकालीवदेवीप्रेतमुखीतथा ॥ सेंडीमार्जारिकाभूय
ऊरुगीवमुभाक्रुशा ॥२३ ॥ कालरात्रीश्वभार्याश्वलोहितापिलिपिच्छिका ॥ भीनारिणीवक्रगदाभीषणादुर्जयापरा ॥ २४
तापिनीकटकोलीवमुक्तकेशीमहावला ॥ अहंकारीजयानन्दजमेपांत्रिदण्डिका ॥ २५ ॥ रोदिनीभ्रुकुटाभिख्यालम्बागपिंग
लातथा ॥ शीतलाचालिनीवैवतामसीपापराक्षसी ॥ २६ ॥ मानसीधनदादेवीवर्तनीवर्जनीतथा ॥ यमुनाजानवेदावमालि
नीकलहंसिनी ॥ २७ ॥ वालिकादेवदूतीववायसीपक्षिणीतथा ॥ स्वछंदायालिकावैववामिनीवांविकेतिव ॥ २८ ॥ पंचाशातु

298

राम
२९८

१३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुलोत्पन्नास्तुतः षष्टिसमीरिता ॥ योगिन्यो नित्यसंतुष्टाः स्कंदापस्मारदेवता ॥ २९ ॥ नानारक्षाधिकारस्था बालकं पातु० ॥
महालक्ष्मीर्महातुंगा महासेना महाबला ॥ ३० ॥ माहाकंपा महाभामा महातेजा महोत्सवा ॥ महासेना महामुंडा मोहिनी वीर
नायका ॥ ३१ ॥ एकवीरा विशालाक्षी सुकेशी सुमना तथा ॥ सुकेशीनी च संतुष्टा दारिणी च विलंबिनी ॥ ३२ ॥ भामिनी चाथ सो
वर्णी सिंहवक्त्रा करंकिनी ॥ भ्रमरा चंचला चंपा चंडला सिद्धिदायदा ॥ ३३ ॥ शाकोदरी धृतिः स्वाहा स्वधाख्या च सनातनी ॥ सं
वरा वनतथा देवी नीलग्रीवा तथांबिका ॥ ३४ ॥ वितला गंधिनी वामाक्रीडंती चैव वाहिनी ॥ कर्षणी मालती कुष्मा कालकर्णी च
घण्टिका ॥ ३५ ॥ विघ्ननाशहा चेति पार्वती संगनिर्गति ॥ पंचाशत्पदसोपन्ना शक्रनी देवतप्रिया ॥ ३६ ॥ योगिन्यो बालकं पातु
सर्वदा ॥ विश्वं तया प्रभावज्ञा सर्वज्ञ सर्वग्राग्रहा ॥ ३७ ॥ दुर्गा सरस्वती ज्येष्ठा पद्मा परापरा ॥ प्रमदा रोहिणा शीता प्रभा प्रज्वालि
नी विभा ॥ ३८ ॥ विभूतिर्विनतिः प्रीतिः प्रकृतिः प्रमतिर्जयः ॥ एता भगवता सृष्टा योगिन्यो योगसिद्धिदाः ॥ ३९ ॥ पंचविंशति (
राख्याता रेवती शक्तिगोचरा ॥ जगदाप्यायनकरा बालकं पातु० ॥ ४० ॥ नंदश्चैवोपनंदश्च गोमतिः सुमतिस्तथा ॥ विद्युज्जिह्वो
महाकालः करालस्तिमिललोचन ॥ ४१ ॥ जयो जयो विरूपाक्षो गोमुखो वदवामुख ॥ कालाननः करालश्च शंकुकर्णो विभी
षणा ॥ ४२ ॥ एते शक्रराउनोत्पन्ना वीराः घोउग्रा राक्षसा ॥ पूतना कामिका ज्ञ एवा बालकं पातु ॥ ४३ ॥ वज्रिणी शक्तिनी चा पाशः
दंडिनी खड्गिनी तथा ॥ पाशिनी ध्वंजिनी देवी गादिनी शूलिनी परा ॥ ४४ ॥ पद्मिनी चक्रिणी चेति सर्वकाराभयप्रदाः ॥ एता

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ २९९ ॥

दिङ्निर्मिता देव्यो योगिन्यो देवकीर्तिता ॥ ४५ ॥ अधिभूतप्रधानाया याया क्षांशांतपूजना ॥ प्रसंनामानरः सर्वा बालकं० ॥ ४६ ॥ अर्थकोन
लकोभूमाउग्रः स्कंदश्च कीर्तिताः ॥ वीरेशापि तथाभिः सृष्टा नैजनेषाधिदेवता ॥ ४७ ॥ पंचशक्तिप्रधानास्ते बालकं० ॥ भारवा भैरवावी
राक्षेत्रपाल विनायका ॥ ४८ ॥ डाकिन्यो रुद्रशाकिन्यो यक्षरक्षांसि पन्नगा ॥ वराथा वनरा भूता मनुष्याः पशवो मृगाः ॥ ४९ ॥ सरी
सृपाश्च संतुष्टा बालकं पातु० ॥ आदित्या वसवो रुद्रा पितरो मरुतस्तथा ॥ ५० ॥ मनयो मनवः कालाग्रह योगाः सनातना ॥ स
रीसृपाश्च संतुष्टा बालकं पातु सर्वदा ॥ ५१ ॥ सिद्धा साध्याश्च गंधर्वा देव्यश्चाप्सरसो वरा ॥ विद्याधरा महादेव्या बालकं पातु सर्व
दा ॥ ५२ ॥ सहजा योगजा चैव वीरजा मंत्रजा तथा ॥ योगिन्यो योगविनया नानाविलयगोचरा ॥ ५३ ॥ भवानीनामसंतुष्टा बाल
कं पातु सर्वदा ॥ अर्ध्वलोके च अवर्लोके स्वर्लोके याश्च मातरः ॥ ५४ ॥ अधश्चोर्ध्वं च तिर्यक् च की उंन्यो न नमूर्तयः ॥ प्रसन्नयोगसं
पन्ना दिव्यैश्वर्यसमन्विता ॥ ५५ ॥ स्वच्छंदपदसंभूतैर्भैरवैः परिवारिता ॥ रक्षंतु बालकं प्रीताः शांतिं तु यच्छ्वेतसा ॥ ५६ ॥ दि
व्यस्तोत्रमिमं पुण्यं बालरक्षाधिकारकं ॥ जपेत्तेन नरः रक्षार्थं बालग्रहोपशांतिदं ॥ ॥ इति बालग्रहस्तवसमाप्तम् ॥ ॥ अथ
नामकर्म ॥ तत्र दशमे सूतिहकातिक्रम्यास्य काद्वशोहनि विहितदिनांतरे वा पिता नाम करोति ॥ तत्र प्रथमं मातृपूजाभ्युदय ॥ राम ॥
कादि कृत्वा ब्राह्मणान् भोजयित्वा कुरसंस्थाप्याहतं वासः परिधाप्य कृतस्वस्त्ययनं शिशुं स्वं दक्षिणा करौ अमुक नामासीति वि ॥ २९९ ॥
श्रावयति ॥ नामच घोषवदाद्यन्तरन्तःस्थं दीर्घाभिनिष्ठांतं कृतं कुर्यान्न तद्धितं ॥ अयुजाक्षरमाकारान्तं स्त्रियः

299

१२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शर्मान्तं ब्राह्मणस्य ॥ १ ॥ वर्मान्तं क्षत्रियस्य ॥ २ ॥ गुप्तान्तं वैश्यस्य ॥ ३ ॥ दासान्तं शूद्रस्य ॥ ४ ॥ इति नामकरणं ॥ ॥ अथ निःक्रमणं ॥ त
त्र चतुर्थे मासि चंद्रतारानुकूले दिने स्नातमंगलकृत्य गृहाद्बहिरानीय पिता अन्यो वा ब्राह्मणः सूर्यं संदीक्षयति ॥ तत्र मंत्र ॥ ॐ च
क्षुरित्यस्य दध्यंगाथर्वण ऋषिः पुरउष्णिक् छन्दः सूर्यो देवता सूर्यो दीक्षणे विनियोग ॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चारयेत्
पश्येम शरदः शतं जीवेम शरदः शतं ७ शृणुयाम शरदः शतं इति ॥ अत्र च फलपुष्पसमन्वितेन पयसा वा भगवते भास्करार्घो
दीयते ॥ इति निःक्रमणाचारः इति निष्क्रमणं ॥ ॥ अथान्नप्राशनं ॥ तत्र षष्ठे मासि चंद्रतारानुकूले शुभदिने स्नातः शुचिराचान्तः
पिता गृहस्थ एव कुशकंडिकां कुर्यात् ॥ तत्र क्रमः कुशैः परिसमूह्य तानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेन प्रादेशमात्रं
त्रिरुल्लिख्योल्लेखनक्रमेणानामिकांगुष्ठाभ्यां समुद्धृत्य वारिणाभ्युक्ष्य कांस्यपात्रेणाग्निमादाय प्रत्यङ्मुखमग्नेरुपसमाधानं कु
र्यात् ॥ ततः पुष्पचन्दनतांबूलवस्त्राण्यादाय ब्रह्मवरणं कुर्यात् ॥ ॐ अद्य कर्तव्यान्नप्राशनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्म
कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः ॥ पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणुयात् ॥ ॐ वृतोस्मी
ति प्रतिवचनं ॥ ॐ यथाविहितं कर्म कुरु इत्यभिधाय ॐ करवाणीति तेनोक्ते अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान् कु
शानास्तीर्य अग्निं प्रदक्षिणं कारयित्वा ॥ ॐ अस्मिन् कर्मणि त्वं मे ब्रह्मा भव इत्यभिधाय ॥ ॐ भवानीति तेनोक्ते ॥ ब्रह्माणमुदङ्मुखं तत्रो
पवेश्य प्रणीतापात्रं पुरतः कृत्वा वारिणा पूर्य कुशैराच्छाद्य ब्राह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात् ॥ ततः परि

परिस्तरणं ॥ बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानान्तं ॥ ब्रह्मणोग्निपर्यन्तं २ नैरृत्याद्वायव्यान्तं ३ अग्नितः प्रणीतापर्यन्तं ॥ ४ ॥ ततो
ग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं ३ पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम् ॥ प्रोक्षणीपात्रम् ॥ आज्यस्थाली
सम्मार्जनकुशा १२ समिधस्तिस्रः ॥ ३ ॥ स्रुवः आज्यं ॥ तण्डुलपूर्णपात्रं ॥ एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीया
नी ॥ ततः पवित्रछेदनकुशैः पवित्रे छित्वा ॥ सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय ॥ अनामिकाङ्गुष्ठाभ्यां उत्तराग्रे प
वित्रे गृहीत्वा तज्जलेन किंचिद्भूमौ त्रिरुत्क्षिप्य ॥ प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वा अग्निप्र
णीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥ तत आज्यस्थाल्यामाज्यं निरूप्याधिश्रयणम् ॥ ततस्तृणं प्रज्वाल्य तस्याग्नेश्चो परिधामयित्वा व
ह्नौ तत्प्रक्षिप्य ॥ ततः स्रुवं त्रिः प्रतप्य सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः ॥ स्रुवं सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य
दक्षिणतो निदध्यात् ॥ ततः आज्यमग्निप्रदक्षिणां कारयित्वा वर्तयित्रिः प्रोक्षणीवदुत्पूय ॥ अवेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः
प्रोक्षणीमुत्पूय ॥ उपयमनं कुशान् वामहस्ते कृत्वा प्रजापतिं ॥ मनसा ध्यात्वा तूष्णीमेवाग्नौ घृताक्ताः समिधः प्रक्षिपेत् ॥ तत उपवि
श्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणाक्रमेणाग्निपर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः समिद्धतमेऽग्नौ ब्रह्मणान्वा
रब्धः स्रुवेणाज्याहुतीर्जुहोति ॥ तत्र प्रथमाहुतिचतुष्टये प्रत्याहुत्यनन्तरं स्रुवावशिष्टशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॐ प्रजा
पतये इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवताऽऽज्यप्राशने होमे विनियोगः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ १ ॥ इ

CC-0. In Public Domain. Digitization by eGangotri

तिमनसा॥ ॐ इन्द्रायेति प्रजापतिर्ऋषिरिन्द्रो देवता त्रिष्टुप्छन्दोन्नप्राशनहोमे विनियोगः॥ ॐ इन्द्राय स्वाहा॥ इदमिन्द्राय॥ २॥ इन्माया
ये॥ ॐ अग्नय इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दोन्नप्राशनहोमे विनियोग॥ ॐ सोमाय स्वाहा॥ इदं सोमाय॥ ४॥ इन्मा
ज्यभागौ ततो चत्वारस्नेनमाधारराहुतिद्वयं॥ तत्र प्रथमाहुतौ मंत्रः॥ ॐ देवींवाचमिति मंत्रस्य भार्गवऋषिस्त्रिष्टुप्छन्दो देवीवा
ग्देवता आज्यहोमे विनियोगः॥ ॐ देवींवाचमजनयंत देवास्तांविश्वरूपां पशवो वदन्ति। सानो मन्द्रेषमूर्जं दुहाना धे
नुर्वागस्मानुपसुष्टुतैतु स्वाहा॥ इदं वाचे॥ १॥ द्वितीयाहुतौ॥ ॐ वाजो नो अद्येति मंत्रस्य देवा ऋषयस्त्रिष्टुप्छन्दोन्नं देवता आ
ज्यहोमे विनियोगः॥ ॐ वाजो नः अद्य प्रसुवाति दानं वाजो देवां ऋतुभिः कल्पयाति वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजप
तिर्जयेयम्॥ १८। ३३॥ इदं वाजे वाजाय इति मंत्रेण ततस्थालीपाकेनाहुतिचतुष्टयम्॥ ॐ प्राणेनान्नमशीय स्वाहा॥ इदं प्रा
णाय॥ १॥ अपानेन गंधमसीय स्वाहा॥ इदमपानाय॥ २॥ ॐ चक्षुषा रूपाण्यशीय स्वाहा॥ इदं चक्षुषे॥ ३॥ ॐ श्रोत्रेण यशो
शीय स्वाहा॥ इदं श्रोत्राय॥ ४॥ ततोन्वारब्धकर्तृको होमः॥ तत्र ततदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे
प्रक्षेपः॥ ततैवाज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः॥ ॐ अग्नये स्विष्टकृत इति प्रजापतिर्ऋषिर्गायत्रीछन्दोग्निर्देवता स्विष्टकृद्हो
मे होमे विनियोगः॥ ॐ अग्नये स्विष्टकृते॥ ११॥ इति स्विष्टकृद्धोमः॥ ततः आज्येन॥ ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापति
ऋषिः॥ क्रमेण गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निवायुसूर्या देवता अन्नप्राशनहोमे विनियोगः॥ ॐ भूः स्वाहा॥ इदमग्नये॥ १२॥

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२०१

ॐ भुवः स्वाहा ॥ इदं वायवे ॥ १३ ॥ ॐ स्वः स्वाहा ॥ इदं सूर्याय ॥ १४ ॥ एता महाव्याहृतयः ॥ ॐ त्वन्नो अग्ने इति वामदेव ऋषिस्त्रिष्टुप्
छन्दोग्नीवरुणौ देवते अन्नप्राशन होमे विनियोगः ॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्टाः ॥ यजिष्ठो वह्नि
तमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्याम् ॥ १५ ॥ ॐ स त्वन्नो अग्ने इति वामदेव ऋषिस्त्रिष्टुप् छन्दो
ग्निवरुणौ देवते अन्नप्राशन होमे विनियोगः ॥ ॐ स त्वन्नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ॥ अव यक्ष्व नो वरुणं रर
राणो वीहि मृडीकं सुहवो न एधि स्वाहा ॥ इदमग्निवरुणाभ्याम् ॥ १६ ॥ ॐ अयाश्चाग्न इति वामदेव ऋषिर्बृहती छन्दोग्निर्देवतान्न
प्राशन होमे विनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमया असि ॥ अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा ॥ इद
मग्नये ॥ १७ ॥ ॐ यते शतमिति वामदेव ऋषिस्त्रिष्टुप् छन्दो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता अन्नप्राशन हो
मे विनियोगः ॥ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्का
स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥ १८ ॥ ॐ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप् छन्दो वरुणो
देवता अन्नप्राशन होमे विनियोगः ॥ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ॥ ॐ अथा वयमादित्य व्रते तवाना
गसो अदितये स्याम स्वाहा ॥ १९ ॥ इदं वरुणाय ॥ इति प्रायश्चित्तम् ॥ ॐ प्रजापतय इति ऋषिस्त्रिष्टुप् छन्दः प्रजापतिर्देवतान्नप्रा
शने विनियोगः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ २० ॥ इति मनस्या ॥ इति प्राजापत्यम् ॥ ततः संस्रवप्राशनम् ॥ तत अ

301

रत्न
२०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च्य॥ ॐ अद्य कृतैतदन्नप्राशनहोमकर्मणि कृताकृतावेक्षणारूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं ममुकगोत्रायामु
कशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां त्वेन तुभ्यमहं संप्रददे॥ इति दक्षिणां दद्यात्॥ ॐ स्वस्तीति प्रतिवचनं॥ ततप्रणीताविमोक॥ ॐ सु
मित्रिया उर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिऋषिर्यायो देवता प्रणीतानवप्रक्षेपयोर्विनियोगः॥ ॐ सुमित्रियानआपओषधय
:सन्तु॥ इति पवित्राभ्यां प्रणीताजलेन शिरः समृज्य॥ ॐ दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यञ्च वयंद्विष्मः॥ इति मंत्रेणैशान्यां प्र
णीतापात्रं न्युब्जीकुर्यात्॥ ततस्तरणक्रमेण बर्हिरानीय॥ ॐ देवागातुविद इत्यस्य वनस्पतिऋषिर्विराट्छंदो वातो देवता बर्हि
होमे विनियोगः॥ ॐ देवागातुविदागातुं वित्त्वागातुमित॥ मनसस्पत इमं देवयज्ञं स्वाहा वाते धाः स्वाहा॥ २ ॥ इति बर्हि
होमः॥ ॥अथान्नप्राशनं॥ सर्वान् कटुमधुरलवणाम्लतिक्तक्षारादिरसान् सर्वादीनि वशाल्यन्नानि यथासम्भवमुद्धृत्य स्वक
स्मिन्नु न मपात्रे कृत्वा नालंकरणादिरहितवासः कुमारं तूष्णीं हन्तेति मंत्रेण वा भोजयितव्यः॥ अथ कुमारस्य वाक्प्रचारकामे
न भारद्वाजीमांसं॥ अन्नाशकामेन कपिंजलमांसं जवकामेन मत्स्यान्॥ आयुःकामेन कृकषायामांसं॥ ब्रह्मवर्चसकामेन भारद्वा
जीमांसम्॥ अन्नाद्यकामेन कपिंजलमांसं॥ जवकामेन मत्स्यान्॥ आयुःकामेन कृकषायामांसं॥ ब्रह्मवर्चसकामेन नाडिमांसं॥ स
र्वफलकामेन कृधितमांसं॥ अलाभे पिष्टकमय भारद्वाजीनामेकदेशः प्राशयितव्यः॥ ततः आचमनं तथाय फलपुष्पसमन्वित
घृतेन स्रुवं परिपूर्णाहुतिं कुर्यात्॥ ॐ मूर्द्धानमिति मंत्रस्य भारद्वाजऋषिस्त्रिष्टुप्छंदोऽग्निर्देवता पूर्णाहुति होमे विनियोगः॥ ॐ मू

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥३०२॥

र्द्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृत आजातमग्निं ॥ कविं सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः स्वाहा ॥ २५॥
इति पूर्णाहुतिः ॥ ततः उपविश्य स्रुवेण भस्मानीय दक्षिणाकरानामिकागृहीतभस्मना ॥ ॐ त्र्यायुषमिति नारायणऋषिरुष्णिक्
छंद आयुर्देवता भस्मना तिलककरणे विनियोगः ॥ ॐ त्र्यायुषं जमदग्नेः ॥ इति ललाटे ॥ १ ॥ कश्यपस्य त्र्यायुषम् ॥ इति दक्षि
णबाहुमूले ॥ २ ॥ ॐ तन्नो अस्तु त्र्यायुषम् ॥ इति हृदये ॥ ४ ॥ नत्र्यायुषाणि कुर्यात् ॥ दूर्वाक्षतादिब्राह्मणाशीर्वादग्रहणम् ॥
ततो ब्राह्मणभोजनम् ॥ इति अन्नप्राशनम् ॥ ॥ अथ चूडाकरणं ॥ तत्र संवत्सरानंतरमाद्विरब्दौ उदगयन आपूर्यमाणप
क्षे शुक्लाः स्तादिदोषरहितैरिक्तादिदोषवर्जिते सोमबुधगुरुशुक्रान्यतमवारविहितनक्षत्रसमन्वितायां तिथौ ॥ पूर्वरात्रौ
नूतिकानि मंत्राणां पीतवस्त्रैः गौरसर्षपदध्यक्षतदूर्वागोरोचनकुंकुमहरिद्राययववन्दनकुशगोमयादिभिः पोटलिकां कृत्वा
ब्रह्मजज्ञानं विष्णोरराटनमः शंभवाय एतैर्मंत्रैः पोटलिकां त्रयं संपूज्य एकया पोटलिकया माणवकस्य शिरो दक्षिणतः
स्थितान् केशान् बध्नीयादेवमेव पश्चादुत्तरस्य प्रीतोस्मीषेण शिरो येष्टुनं च ॥ कृतनित्यक्रियो यजमानो मातृपूजापूर्वकाभ्युद
यिकादिकं कृत्वा ब्राह्मणान् भोजयित्वा मराऽ पर्यग्निकरणं भूमौ कुश कण्डिकामारभेत ॥ उल्लेखनक्रमेणानामिकांगुष्ठाभ्यामुद्ध
त्य वारिणाभ्युक्ष्य कांस्यपात्रेणाग्निमानाय्य प्रत्यङ्मुखमग्नेरुपसमाधानं कुर्यात् ॥ ततोऽग्नेः पश्चिमतो यजमानाद् दक्षिणदिशि
स्नापितमहतवासः परिधाप्य कुमारमंके निधाय माताउपविशति ॥ ततः पुष्पचंदनताम्बूलवस्त्राभरणादाय ब्राह्मणावरणं कुर्यात्

॥ रत्न ॥
॥३०२॥

302

226

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्र वाक्यं ॥ ॐ अद्य कर्तव्यचूडाकरणहोमे कर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुम् अमुकगोत्रम् अमुकशर्माणं ब्राह्मणम् एभिः पुष्प
चन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे ॥ इति ब्रह्माणं प्रार्थयात् ॥ ॐ वृतोस्मीति प्रतिवचनं ॥ यथाविहितं कर्म कुरु ॥ इति य
जमानेनोक्ते ॥ ॐ करवाणीति प्रतिवचनं ॥ ततो यजमानोग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्याग्निं प्रद
क्षिणं दक्षिणं कारयित्वा अस्मिन् कर्मणि त्वं मे ब्रह्मा भव इत्यभिधाय ॐ भवानीति तेनोक्ते ब्रह्मासनोपरि ब्रह्माणमुदङ्मुखमुपवे
श्य प्रणीतापात्रं पुरतः ॥ कृत्वा वारिणा पूर्य कुशैराछाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात् ॥ ततनापर्य
तं ॥४॥ ततोग्नेरुत्तरतः पश्चिमायां दिशि पवित्रछेदनार्थं कुशत्रयम् ॥ पवित्रकरणार्थं साग्रमनन्तर्गर्भकुशपत्रद्वयम् ॥२
प्रोक्षणीपात्रं ॥ आज्यस्थाली ॥ सम्मार्ज्जनकुशाः ॥५॥ उपयमनकुशाः ॥१३॥ समिधस्तिस्रः ॥३॥ स्रुवः ॥१॥ आज्यं ॥ षट्पंचा
शदुत्तरशतद्वयं २५६ यजमानमुष्टिपरिमिता३३मतण्डुलपूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेण आसादनीय
म् ॥ अमीषामुत्तरतो ऽसाधारणावस्तूनुपकल्पनीयानि ॥ तत्र शीतोदकं ॥ उष्णोदकं च ॥ घृतदधिनवनीतानमपिण्डाः ॥ त्रिश्वेतशल्यकी
कण्टकम् ॥ प्रादेशमितसाग्रसप्तविंशति २७ कुशपत्राणि ॥ लोहक्षुरः ॥ नापितः ॥ वृषगोमयपिण्डः ॥ अन्यान्यप्याचारपरिप्राप्तनलि
नी ॥ ततः पवित्रछेदनकुशैः पवित्रे छित्वा ॥ सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे कृत्वा अनामिकाङ्गुष्ठाभ्यां प्रोक्षणीजलं
त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीमभिषिंच्य प्रोक्षणीजलेन यथासादितवस्तुसेचनं कृत्वा ॥ अग्निप्रणीतयोर्मध्ये प्रोक्षणीपा

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ ३०३ ॥

णीपात्रं निदध्यात् ॥ ततआज्यस्थाल्यामाज्यं निधायाभिश्रियज्वलन्तणमादायाधस्यसोपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तन्क्षेपः
ततः स्रिः स्रुवप्रतपनं ॥ ततः सम्मार्जनकुशानामग्रैरन्तरतोमूलैर्बाह्यतः स्रुवंसम्मृज्यप्रणीतोदकेनाभ्युक्षणं ततः ॥ पूर्ववत्प्रति
त्विप्रतप्य दक्षिणतो निदध्यात् ॥ ततोग्नेर्दक्षिणाक्रमेणाआज्यमवतार्यस्थाप्यतो निदध्यात् ॥ ततः प्रोक्षणीवत्तच्चयरुत्यूया
अवेक्ष्य सत्वपङ्क्तेतन्निरस्य ॥ पूर्ववत्प्रोक्षण्युत्पवनं ॥ ततउत्थाप्यउपयमनकुशान्वामहस्तेकृत्वाप्रजापतिमनसाध्यात्वा
तूष्णींसमिधः त्रयमादायाग्नौक्षिपेत् ॥ ततउपविश्य ॥ सपवित्रप्रोक्षण्युदकेनदक्षिणाङ्गुलिकग्रहीतेनप्रदक्षिणाक्रमेणाग्नि
पर्युक्ष्य प्रणीतापात्रे पवित्रे धृत्वाब्रह्मणान्वारब्धःपानितदक्षिणजानुः समिद्धतमेग्नौजुहुयात् ॥ ततः प्रत्याहुत्यनन्तरं स्रुवावस्थित
हुतशेषघृतस्यप्रोक्षणीपात्रे प्रक्षेपः ॥ ॐ प्रजापतयइति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवताआज्यहोमेविनियोगः ॥ ॐ प्र
जापतयेस्वाहा ॥ इदं प्रजापतये ॥ १ ॥ इति मनसा ॥ ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता आज्यहोमे विनियोगः ॥ ॐ इ
न्द्रायस्वाहा ॥ इदमिन्द्राय ॥ २ ॥ इत्याघारौ ॥ ॐ अग्नयइति मंत्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताआज्यहोमे विनियोगः ॥ ॐ अ
ग्नयेस्वाहा ॥ इदमग्नय ॥ ३ ॥ ॐ सोमायेति मंत्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः ॥ ॐ सोमायस्वा ॥ राम ॥
हा ॥ इदं ॰ सोमाय ॥ ४ ॥ इत्याज्यभागौ ॥ ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निर्वा ॥ ३०३ ॥
युसूर्या देवता आज्यहोमे विनियोगः ॥ ॐ भूः स्वाहा ॥ इदमग्नये ॥ ५ ॥ ॐ भुवः स्वाहा ॥ इदं वायवे ॥ ६ ॥ ॐ स्वः स्वाहा ॥ इदं ॰ सूर्या

303

१३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य ॥ ७ ॥ एता महाव्याहृतय ॥ ॐ त्वन्नो अग्न इति मंत्रस्य वामदेव ऋषिस्त्रिष्टुप् छंदो अग्नीवरुणौ देवते आज्यहोमे विनियोगः ॥
ॐ त्वन्नो ऽअग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठा यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वा
हा ॥ इदमग्नीवरुणाभ्याम् ॥ ८ ॥ ॐ स त्वन्नो अग्न इति मंत्रस्य वामदेव ऋषिस्त्रिष्टुप् छंदो अग्नीवरुणौ देवते आज्यहोमे विनियोग
ॐ स त्वन्नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ॥ अव यक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न ऽएधि स्वाहा
इदमग्नीवरुणाभ्याम् ॥ ॐ अयाश्चाग्न इति मंत्रस्य वामदेव ऋषिर्बृहती छंदो ऽग्निर्देवता आज्यहोमे विनियोगः ॥ ॐ अयाश्चाग्ने
स्यनभिशस्ति ॥ अया नो यज्ञं वहास्य या नो धेहि भेषजꣳ स्वाहा ॥ इदमग्नये ॥ ११ ॥ ॐ ये ते शतमिति मंत्रस्य वामदेव ऋषिस्त्रिष्टु
प् छंदो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता आज्यहोमे विनियोगः ॥ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः ॥ पा
शा वितता महान्तः ॥ तेभिर्वो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो
मरुद्भ्यः स्वर्केभ्यः ॥ ११ ॥ ॐ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप् छंदो वरुणो देवता आज्यहोमे विनियोगः ॥ ॐ उदुत्तमं वरु
णपाशमस्मदवाधमं वि मध्यमꣳ श्रथाय ॥ अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा ॥ इदं वरुणाय ॥ एता
ः प्रायश्चित्तसंज्ञकाः ॥ ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप् छंदः प्रजापतिर्देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतये
स्वाहा ॥ इदं प्रजापतये ॥ १३ ॥ इति मनसा ॥ इदं प्राजापत्य ॥ ॐ अग्नये स्विष्टकृते इति मंत्रस्य प्रजापतिर्ऋषिरग्निर्देवता स्वि

CC-0. In Public Domain. Digitization by eGangotri

रत्न ३०४ ष्टकृद्धोमे विनियोगः अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्विष्टकृते इति स्विष्टकृद्धोमः॥ ॥अथ संस्रवप्राशनं॥ तत आच
म्य॥ ॐ अद्य कृतैतच्चूडाकरणहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतम
मुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणात्वेनाहं संप्रददे॥ इति दक्षिणां ब्रह्मणे दद्यात्॥ स्वस्तीति प्रतिवचनम्॥
ततः प्रणीताविमोकः॥ तत्र सुमित्रियाः दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिऋषिरापो देवता प्रणीताविमोके विनियोगः
ॐ सुमित्रिया न आपः ओषधयः सन्तु इति॥ पश्चिमायां प्रणीताजलेन शिरः संमृज्य ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि
यं च वयं द्विष्मः॥ इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्यात्॥ ततो बर्हिर्होमः॥ ॐ देवा गातुविद इत्यस्य वनस्पतिऋषिर्विराट्
छन्दो वातो देवता बर्हिर्होमे विनियोगः॥ ॐ देवा गातुविदो गातुं वित्त्वा गातुमित॥ मनसस्पत इमं देव यज्ञꣳ स्वाहा॥ वाते धाः
स्वाहा॥ इति बर्हिर्होमः॥ अथ शीतोदके उष्णोदकम्॥ ॐ उष्णेन वाय इति मन्त्रस्य परमेष्ठी ऋषिः प्रतिष्ठा छन्दोऽदितिर्देवता उद
कासेके विनियोगः॥ ॐ उष्णेन वाय उदकेनेह्यदितिः केशान्वपत्विति मन्त्रेणाभिषिञ्च्य॥ तत्र मिश्रोदके॥ नवनीतपिण्डं घृतपिं
डं दध्नो वा पिण्डं निक्षिप्य॥ दक्षिणापश्चिमोत्तरके मणवकस्य निशावच्छकुमारकेशजूटिकात्रये दक्षिणजूटिकायां॥ ॐ स रत्न
वित्रेति मन्त्रस्य प्रजापतिऋषिर्गायत्री छन्द आपो देवताः क्लेदने विनियोगः॥ ॐ सवित्रा प्रसूता दैव्या आप उदन्तु ते तनूं दी ३०४
र्घायुत्वाय वर्चसे॥ इति मन्त्रं पठित्वा तेनैव वारिणा प्रक्षाल्य॥ त्रिभिः स्वकीयकराङ्गुलीविवरांत्कृत्वा भागत्रयं कुर्यात्॥ त

304

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तः सप्तविंशतिकुशपत्रतः ॥ कुशपत्रत्रयमानीय तत्केशमूलसंलग्नाग्रजूटिकाग्रदध्यात्तरितं कुर्यात् ॥ ॐ ओषधे त्रायस्वे
ति मंत्रस्य प्रजापतिर्ऋषिर्जुर्गायत्रीछंदः रुद्रास्वधितिर्देवता लोहकुशतरुणामंतर्धारणे विनियोगः ॥ ॐ ओषधे त्राय
स्वधिते मैनं हिंसीः ॥ इति मंत्रेण ततो वामहस्तेन सकुशदक्षिणाग्र प्रथमभागजूटिकां गृहीत्वा ॐ शिवो वा मेति प्रजा
पतिर्ऋषिर्बृहती छंदः क्षुरो देवता क्षुरग्रहणे विनियोगः ॥ ॐ शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिं
सीः ॥ इति मंत्रेण लोहक्षुरं गृहीत्वा ॥ ॐ निर्वर्तयामीति प्रजापतिर्ऋषिर्यजुः क्षुरो देवता सज्जीकरणे विनियोगः ॥ ॐ नि
वर्तयाम्यायुषे अन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय इति मंत्रेण जूटिकामलनं कुर्यात् ॥ ततः कुश
पत्रत्रयसहितां जूटिकां छिनत्ति ॥ ॐ येनावपदिति मंत्रस्य आलम्बायन ऋषिः पंक्तिश्छंदः सविता देवता केशनखा
छेदने विनियोगः ॥ ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टि
र्यथासत् ॥ इति मंत्रेण ॥ ततस्तां छिन्नकुशत्रयसहितां जूटिकामानडुहगोमयपिण्डोपरि उत्तरस्यां दिशि निदध्यात् ॥ अत्रै
व पूर्ववत्प्रक्षालितापरभागद्वये कुशपत्रत्रितयान्तर्निधानादिछेदनवर्जं सर्वं पूर्ववद्देवा ॥ छेदनं तूष्णीं ततः पश्चिमज
टिकायाः पूर्ववत् ॥ तेनैव मंत्रेण प्रक्षालनं ॥ तूष्णीं शस्त्रकीकराटकेन भागत्रकरणम् ॥ केशमूलसंलग्नाग्रकेशान्तरितम
ध्यकुशपत्रत्रयधारणं ॥ क्षुरग्रहणम् ॥ ततः संयोजनानि ॥ ततन्मंत्रैर्गो वा ततः ॥ प्रथमजूटिकाछेदनमंत्रः ॥ ॐ आयुष

रत्न
३०५

षमिति मंत्रस्य नारायण ऋषिरुष्णिक छंद आसी देवता छेदने विनियोगः ॥ ॐ आयुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ॥ यद्देवे
षु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ॥ इति ॥ ततः पूर्ववद्दक्षगोमयपिण्डे केशधारणम् ॥ तत्रापि वशिष्ठभागद्वये कुशपत्रत्रयके
शान्तर्निधानादि छेदनवर्जं सर्वं पूर्ववद्देवच्छेदनं तु तूष्णीमेव ॥ लूनकुशपत्रत्रयसहितकेशानां गोमयपिण्डे धारणं च ॥
तत उत्तरभागजूटिकायां प्रक्षालनादिक्षुरसंयोगान्तेषु पूर्ववत्तन्मंत्रप्रयोगः ॥ प्रथमजूटिकाछेदनमंत्रः ॥ ॥ ॐ येन
भूरिश्चर इति मंत्रस्य वामदेव ऋषिर्यजुश्छंदः क्षुरो देवता छेदने विनियोगः ॥ ॐ येन भूरिश्चरा दिवयो - यश्चाक्षिसूर्यम् ते
न ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये इति ॥ ततः केशान् गोमयपिण्डे निदध्यात् ॥ ततो वशिष्ठभागद्वये
कुशपत्रत्रयकेशान्तर्निधानादि छेदनवर्जं सर्वं पूर्ववद्देवच्छेदनं तूष्णीं ॥ गोमयपिण्डोपरि धारणमपि ॥ ततः शमस्तशिर
श्चिक्षुरं प्रदक्षिणाक्रमेणानुप्रकेशान् भ्रामयति ॥ ॐ यत्क्षुरेणेति मंत्रस्य वामदेव ऋषिर्यजुश्छंदः क्षुरो देवता भ्रामणे विनियो
गः ॥ ॐ यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा वा वपति केशाञ्छिन्धि शिरो मास्यायुः प्रमोषीः ॥ इति मंत्रेण ॥ ततस्ताभिरेवा
द्भिः समस्तं शिरः प्रक्षाल्य ॥ ॐ अक्षरावन्निति मंत्र वामदेव ऋषिर्यजुश्छंदः क्षुरो देवता क्षुरदाने विनियोगः ॥ ॐ अक्षरावन्म
रिवप इति नापिताय क्षुरं प्रयच्छति ॥ अथ नापितः शिखां धृत्वा समस्तशिरोवपनं वा यथाकुलं कुर्यात् ॥ नालूनकुशकेशा
न्जनवस्त्रेणाप्रतीनाससमाता दधिभक्तसमन्वितगोमयपिण्डोपरि निदध्यादिति समाचारः ॥ ततः पुराणोक्तिः ॥ ॐ मूर्द्ध निमि

राम
३०५

305

तन्मंत्रस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता क्षुरार्पणे होमे विनियोगः ॥ ॐ मूर्द्धानं दिदेवाः स्वाहा इति मंत्रेण ततः क्षुवेशा
भस्मानीय त्र्यायुषं कुर्यात् ॥ ॐ त्र्यायुषं मंत्रस्य नारायणऋषिरुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः ॥
ॐ त्र्यायुषं जमदग्नेः ॥ इति ललाटे ॥ १ ॥ ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायाम् ॥ २ ॥ ॐ यद्देवेषु त्र्यायुषम् ॥ इति दक्षिणबाहु
मूले ॥ ३ ॥ ॐ तन्नोऽस्तु त्र्यायुषम् ॥ इति हृदि ॥ ४ ॥ इति त्र्यायुषं कुर्यात् ॥ ततस्तान् केशान् गोमयपिण्डान् ॥ गोष्ठे सरि
त्सरस्तीरे वा स्मिन्नुदकान्तरे वा निदध्यात् ॥ ततआचार्याय गोदानम् ॥ इति चूडाकरणम् ॥ ॥ अथ कर्णवेधः ॥ तत्र तृ
तीये वर्षे पंचमे वाऽष्टमे तु विष्णुहरिरेवत्यन्यतमनक्षत्रसति तिथौ पूर्वाह्ने पिताऽन्यो वा पूर्वाभिमुख उपविष्टः कुमारस्य
दक्षिणकर्णमभिमंत्रयेत् ॥ ॐ भद्रं कर्णेभिरिति मंत्रस्य प्रजापतिऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता कर्णाभिमंत्रणे विनियो
ग ॥ ॥ ॐ भद्रं कर्णेभिः यजत्रा ॥ ॥ इति मंत्रेणाभिमंत्र्य ॥ ॥ ततः ॐ वक्ष्यन्तीति मंत्रस्य प्रजापतिऋषिस्त्रिष्टुप्छन्दो लिं
गोक्ता देवता कर्णाभिमंत्रणे विनियोगः ॥ ॥ ॐ वक्ष्यन्ती वेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ॥ योषेव शिङ्क्ते
वितताधि धन्वञ्ज्या इयं समने पारयन्ती ॥ इति वामकर्णमभिमंत्रयेत् ॥ ततो मध्यान्तरीक्ष्य नापितद्वारा वेधयेत् तस्मिं
न्समये मधुरादिदानमाचरेत् ॥ ततो नापिताय वेतनदानम् ॥ ततो ब्राह्मणभोजनम् ॥ इति कर्णवेधः ॥ ॥ अथोपनय
नम् ॥ तत्र शुद्धसमये रविचंद्रादिशुद्धौ गर्भाष्टमे वा एवमेवाष्टके वा षोडशाभ्यन्तरवत्सरान्तरे ॥ ब्रह्मवर्चसकामस्य पंचमे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽपि॥ उदगयन आपूर्यमाणपक्षे वध्यायषष्ठीरिक्तान्यतिथौ रविगुरुशुक्रान्यतमवारे मध्याह्नात्पूर्वं कुमारपित्रा मातृपूजापूर्वकाभ्यु
दयिके कृते तदभावे आचार्येणैव तस्मिन्कृते आभ्युदयिकश्राद्धभोक्तृव्यतिरिक्तब्राह्मणान्माणवकं च भोजयित्वा॥ सशिखं कृतक्षौर
स्नानानन्तरं यथाशक्त्यलंकृतं कृत्वा॥ बहिःशालायां तुषकेशशर्करादिशून्यपरिष्कृतभूमौ आचार्योऽग्निस्थापनं कुर्यात्॥ त
त्रहस्तपरिमितचतुरस्रकुशाकरशाकभूमिं परिसमूहनानन्तरं गोमयोदकेनोपलिप्य स्फ्येन स्रुवमूलेन वा प्रादेशमात्र
मुत्तरक्रमेणाचिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रेणाग्निमानाय्य स्वाभिमुखं तदु
परि निदध्यात्॥ ॥ ततः कुमारमाचार्यः शिष्यद्वारा अग्नेः पश्चाद्दक्षिणपार्श्वेऽवस्थापयति॥ ततः कुमारो बद्धाञ्जलिस
म्बोध्य ब्रह्मचर्यमागामिति ब्रूहीति प्रैषानन्तरं॥ ॐ ब्रह्मचर्यमागामिति कुमारमाह॥ ततो ब्रह्मचार्यसानि इति ब्रूहीति
आचार्येणोक्ते॥ ॐ ब्रह्मचार्यसानि॥ इति कुमार आह॥ ॥ अथ माणवकमाचार्यो वासः परिधापयति तत्र आचार्यपठ
नीयो मन्त्रः॥ ॐ येनेन्द्रायेति मन्त्रस्याङ्गिरस ऋषिर्बृहती छन्दो बृहस्पतिर्देवता वासःपरिधाने विनियोगः॥ ॥ ॐ येनेन्द्रा
य बृहस्पतिर्वासः पर्यदधादमृतं तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे॥ ततो माणवकस्य द्विराचमनम्
अथ माणवकवेष्टनत्रयेण माणवकप्रवरसमसंख्यग्रन्थियुतां कृत्वा मेखलामाचार्यो बध्नाति॥ तत्र माणवकपठनीयो मं
त्रः॥ ॐ इयं दुरुक्तमिति मन्त्रस्य वामदेव ऋषिस्त्रिष्टुप्छन्दो मेखला देवता बन्धने विनियोगः॥ ॐ इयं दुरुक्तं परिबाधमाना वर्णं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पवित्रंउननीम आगात्॥ प्राणापानाभ्यां बलमादधानांस्वषादेविस्रुभगामेखलेयम्॥ ॐयुवासुवासाइतिमंत्रस्यविश्वामित्र
ऋषिस्त्रिष्टुप्छन्दः सूर्योदेवतामेखलाबंधनेविनियोगः॥ ॥ॐयुवासुवासाःपरिवीतआगात्सउश्रेयान्भवतिजायमान
तंधीरासःकवयउन्नयन्तिस्वाध्योमनसादेवयन्तः॥इतिवापरिधत्ते॥तूष्णींवा॥अथयज्ञोपवीतानाष्टकंसफलतूतनमा(
राणष्टकेस्थितंब्राह्मणाष्टकेभ्योदद्यात्॥तत्रवाक्यं॥ॐअद्यत्यादिअमुकगोत्रोत्पन्नकुमारस्यास्मिन्नुपनयनकर्मणिभूड्वावार
वरणान्तजातकद्विजावारप्राप्तयेइमानिसफलतूतनभाणष्टकसहितानियज्ञोपवीतानिब्रह्मदैवतानिनानानामगोत्रेभ्यो
ब्राह्मणाष्टकेभ्यइत्यादि॥ ॥ततोमाणवकाययज्ञोपवीतदानम्॥ ॐयज्ञोपवितमितिमन्त्रस्यपरमेष्ठीऋषिस्त्रिष्टुप्छन्दःदेलि
गोक्तादेवताश्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थमुपवीतधारणेविनियोगः॥ ॐयज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्ता
त्॥आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रंयज्ञोपवितंबलमस्तुतेजः॥ॐयज्ञोपवीतमसियज्ञस्यत्वायज्ञोपवीतेनोपनह्यामि॥इतिमं
त्रेणमाणवकस्यदक्षिणवाहुमुद्धृत्यवामस्कंधेनिवेशयेदाचार्यआचामयतिच॥इतिमंत्राभ्यांयज्ञोपवीतंमाणवकः ततः
एणेयमजिनंअजिनाहःयरोयमजिनंब्रह्मणस्यः रौरवं राजन्यस्य॥आजंवैश्यस्यपरिधत्ते॥ॐमित्रस्यचक्षुर्वरुणांवली
यस्तेजोयशस्विस्थविरंसमिद्धम्॥अनाहनस्यवसनंजरिष्णुपरिदंवाज्यजिनंदधेहं॥इतिमंत्रेण॥ततोमाणवककेश
सम्मितंपलाशदण्डमाचार्यस्तस्मैतूष्णींप्रयच्छति॥ततःॐयोमेदण्डइतिमंत्रस्यप्रजापतिऋषिर्यजुर्दण्डोदेवतादण्डग्रहणे(

CC-0. In Public Domain. Digitization by eGangotri

राम ३०७

हृदोविनियोगः ॐ योमेदण्डःपरापतद्वैहायसोधिभूम्याम्॥ तमहंपुनरादद आयुषेब्रह्मणेब्रह्मवर्चसाय॥ इतिमंत्रेणमाणव
कोदक्षिणहस्तेनगृह्णाति॥ ततआचार्योञ्जलिनास्वाञ्जलिंपूरयित्वाकुमारस्याञ्जलिंतेनैवाञ्जलिजलेनपूरयतिवारत्रयं॥
ॐ आपोहिष्ठेतित्र्यृचस्यसिन्धुद्वीपऋषिर्गायत्रीछन्दआपोदेवताउदकासेकेविनियोगः॥ ॐ आपोहि॥ ॐ योवः ॐ तस्माअ
रंगमितितिसृभिरृग्भिः॥ सवनक्षीमुर्दूमनुक्षियतीनिनृसिंहभक्तनयद्धतौ॥ ततःसूर्यमुदीक्षस्व इतिआचार्यप्रैषानन्त
रं॥ ॐ तच्चक्षुरितिमन्त्रस्यदध्यङ्गाथर्वणऋषिःपुरउष्णिक्छन्दःसूर्योदेवतासूर्योदीक्षणेविनियोगः॥ ॐ तच्चक्षुः॥ इतिमं
त्रेणादित्यमुपतिष्ठेत्॥ अथमाणवकस्यदक्षिणांसमधिहृदयंदक्षिणहस्तेन॥ ॐ ममव्रतइतिमन्त्रस्यप्रजापतिर्ऋषिस्त्रिष्टु
प्छन्दोबृहस्पतिर्देवताहृदयालंभनेविनियोगः॥ ॐ ममव्रतेतेहृदयंदधामिममचित्तमनुचित्तंतेअस्तुममवाचमेक
मनाजुषस्व॥ बृहस्पतिष्ट्वानियुनक्तुमह्यं॥ इतिमन्त्रेणस्पृशेदाचार्यः॥ ततःकुमारस्यदक्षिणहस्तंगृहीत्वापृच्छतिआचार्य
ॐ कोनामासि॥ श्रीअमुकशर्माहंभो३ इतिकुमारआह॥ ॐ कस्यब्रह्मचार्यसि॥ इत्याचार्यः॥ ॐ भवतइतिकुमारआह॥ तत
आचार्योभाषते॥ इन्द्रस्येत्यस्यप्रजापतिर्ऋषिर्यजुर्लिङ्गोक्तादेवताजपेविनियोगः॥ ॐ इन्द्रस्यब्रह्मचार्यस्यग्निराचार्यस्तवा
हमस॥ श्रीअमुकशर्मन्निति॥ अथमाणवकंबद्धाञ्जलिंपूर्वादिदिक्षुप्रदक्षिणमुपस्थानंकारयेत्॥ तत्राचार्यस्यमंत्रपाठ
ॐ प्रजापतयेत्वेत्यादीनांप्रजापतिऋषिर्यजुर्लिङ्गोक्तादेवतारक्षणेविनियोगः॥ ॐ प्रजापतयेत्वापरिददामि॥ इतिप्रा

307

राम ३०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यां ॥ ॐ देवाय त्वा सवित्रे परिददामि ॥ इति दक्षिणस्यां ॥ ॐ अद्भ्यस्त्वौषधीभ्यः परिददामि ॥ इति प्रतीच्यां ॥ ॐ द्यावापृथिवीभ्यां त्वा प
रिददामि ॥ इत्युदीच्यां ॥ ॐ विश्वेभ्यस्त्वा भूतेभ्यः परिददामि ॥ ॐ सर्वेभ्यस्त्वा भूतेभ्यः परिददामि ॥ इत्यूर्ध्वं ॥ ततोऽग्निं प्रदक्षिणं कृ
त्वा आचार्य्यदक्षिणादिशि माणवक उपविशति ॥ ततः ॥ ॐ अद्य कर्त्तव्योपनयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म क
र्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः ॥ पुष्पचंदनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणुयात् ॥ ॐ वृ
तोऽस्मीति प्रतिवचनं ॥ ॐ यथाविहितं कर्म कुरु इत्याचार्येणोक्ते ॥ ॐ करवाणीति प्रतिवचनं ॥ अग्नेर्दक्षिणतः शुद्धमासनं
दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य अग्निं प्रदक्षिणीकारयित्वा अस्मिन्नुपनयनकर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय ॥ ॐ भवानि
इति तेनोक्ते तदुपरि ब्रह्माणमुदङ्मुखमुपवेशयेत् ॥ प्रणीतापात्रं पुरतः कृत्वा वारिणा पूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलो
क्य अग्नेरुत्तरतः कुशोपरि निदध्यात् ॥ ततः परिस्तरणम् ॥ बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानान्तं ॥ ब्रह्मणोऽग्निं प
र्यन्तं नैऋत्यां वायपत्रद्वयम् ॥ प्रोक्षणीपात्रं आज्यस्थाली ॥ चरुस्थाली ॥ सम्मार्जनकुशाः ॥ ५ ॥ उपयमनकुशाः ॥ १२ ॥ स
मिधस्तिस्रः स्रुवः ॥ आज्यम् तण्डुलपूर्णपात्रं ॥ पवित्रच्छेदनकुशानां ॥ पूर्वदिशि क्रमेणासादनं ॥ ततः पवित्रच्छेदनकुशैः पवि
त्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय ॥ अनामिकाङ्गुष्ठाभ्यां गृहीतपवित्राभ्यामुत्तराग्रे पवित्रे गृही
त्वा त्रिरुत्पवनं ॥ ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा अनामिकाङ्गुष्ठाभ्यां जलं किंचित् त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीमभि

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

मिथिंचनेत् ॥ प्रोक्षणीजले नयथासादितवस्तूनिसेचनंकृत्वा अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥ ततआज्यस्थाल्यामा
ज्यं निरूप्याधिःश्रयणाम् ॥ ततः कुशाग्रज्वाल्याज्यस्याग्रे थ्वोपरि प्रदक्षिणांभ्रामयित्वा वह्नौ तत्प्रक्षेपः ॥ ततः स्रुवंत्रिः प्रतप्य
समार्जनकुशानां मग्रैरन्तरतो मूले वाह्यतस्रुवं सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः त्रिः प्रतप्य दक्षिणतो निदध्यात् ॥ ततआ
ज्यमग्नेरवतार्य त्रिः प्रोक्षणीवदुत्पूय अवेक्ष्य सत्यपद्रव्ये तन्निरसनंकृत्वा ॥ आत्वाहार्षमिति प्रजापतिं मनसाध्यात्वा ॥ तूष्णीं
घृताक्ताः समिधोऽग्नौ क्षिपेत् ॥ ततउपविश्य सपवित्रप्रोक्षण्युदकेन दक्षिणावलुक्यगृहीतेन प्रदक्षिणाक्रमेणाग्निं पर्युक्ष्य
प्रणीतापात्रे पवित्रे निधाय पातितजानुः ॥ कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ जुहुयात् ॥ तत्रदाऽऽज्यनन्तरं स्रुवावस्थि
तहुतशेषं धृत्वा प्रोक्षणीपात्रे प्रक्षेपः ॥ ॐ प्रजापतयइति मंत्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छंदः ॥ प्रजापतिर्देवता आज्यहोमे
विनियोगः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥१॥ इतिमनसा ॥ ॐ इन्द्रायेतिप्रजापतिर्ऋषिस्त्रिष्टुप्छंदः इंद्रोदेवताउपय
नहोमे विनियोगः ॥ इन्द्रायस्वाहा ॥ इदमिंद्राय ॥२॥ इत्याघारौ ॥ ॐ अग्नयइति मंत्रस्य प्रजापतिऋषिस्त्रिष्टुप्छंदोऽग्निर्देवता
उपनयने विनियोगः ॥ अग्नये स्वाहा ॥ इदमग्नये ॥३॥ ॐ सोमायेति मंत्रस्य प्रजापतिऋषिस्त्रिष्टुप्छंदः ॥ सोमोदेवताउपन
यहोमे विनियोगः ॥ ॐ सोमायस्वाहा ॥४॥ इत्याज्यभागौ ॥ ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टु
प्छंदांसि अग्निवाय्वसूर्या देवताउपनयनेहोमे विनियोगः ॥ ॐ भूः स्वाहा ॥ इदमग्नये ॥५॥ ॐ भुवः स्वाहा ॥ इदं वायवे ॥६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ स्वः स्वाहा ॥ इदं सूर्याय ॥ ७ ॥ एता महाव्याहृतयः ॥ ॐ त्वन्नो अग्न इति मंत्रस्य वामदेव ऋषिस्त्रिष्टुप्छंदोऽग्नीवरुणौ देवते
उपनयनहोमे विनियोगः ॥ ॐ त्वन्नो अग्ने० इदमग्निवरुणाभ्यां ॥ ८ ॥ ॐ सत्वन्नो अग्न इति मंत्रस्य वामदेव ऋषिस्त्रिष्टुप्छं
दोऽग्नीवरुणौ देवते उपनयनहोमे विनियोगः ॥ ॐ सत्वन्नो अग्ने इदमग्नीवरुणाभ्याम् ॥ ९ ॥ ॐ अयाश्चाग्न इति मंत्रस्य वाम
देव ऋषिस्त्रिष्टुप्छंदोऽग्निर्देवता उपनयनहोमे विनियोगः ॥ ॐ अयाश्चाग्ने० इदमग्नये ॥ १० ॥ ॐ ये ते शतमिति मंत्रस्य
वामदेव ऋषिस्त्रिष्टुप्छंदो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता उपनयनहोमे विनियोगः ॥ ॐ ये ते शत
म् ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥ ११ ॥ ॐ उदुत्तममिति मंत्रस्य शुनःशेप ऋषिस्त्रिष्टुप्छंदो व
रुणो देवता उपनयनहोमे विनियोगः ॥ ॐ उदुत्तमम् ॥ इदं वरुणाय ॥ १२ ॥ एताः प्रायश्चित्तसंज्ञकाः ॥ ॐ प्रजापतय इति
मंत्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छंदः प्रजापतिर्देवता उपनयनहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥
१ ॥ ॐ प्राजापत्यम् ॥ अथ स्विष्टकृद्धोमः ॥ ॐ अग्नये स्विष्टकृत इति मंत्रस्य प्रजापतिर्ऋषिर्गायत्री छंदोऽग्निर्देवता स्विष्टकृद्धो
मे विनियोगः ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते ॥ १ ॥ इति स्विष्टकृतम् ॥ ततः संस्रवप्राशनं ॥ तत आचम्य
ॐ अद्यकृतैतदेतस्मिन्नुपनयनहोमकर्मणि कृताकृतविसरणारूपब्रह्मकर्मप्रतिष्ठार्थमिदमपूर्णपूर्णार्थं पूर्णपात्रं प्रजा
पतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां तं भवमहं संप्रददे ॥ इति दक्षिणां दद्यात् ॥ ॐ स्वस्तीति प्रतिव

CC-0. In Public Domain. Digitization by eGangotri

चनं ॥ ततः प्रणीताविमोकः ॥ ॐ सुमित्रियाउर्मित्रियाइति द्वयोर्यजुषोः प्रजापतिऋषिरापो देवता प्रणीताविमोके विनियोग
ॐ सुमित्रियानऽ आपऽ ॐ षधयसन्तु ॥ इति पवित्राभ्यां शिरः सम्मृज्य ॥ ॐ दुर्म्मित्रियास्तस्मै सन्तुयोस्मान्द्वेष्टि यञ्च वयन्द्विष्म
इत्यैशान्यां प्रणीतापात्रं न्युब्जी कुर्यात ॥ ततस्तरणक्रमेण वर्हिरुत्थाप्य आज्येनाभिघार्य्य हस्तेनैव वर्हिर्होमः ॥ ॐ देवागातुवि
द इति मंत्रस्य वनस्पति ऋषिर्विराट् छन्दो वातो देवता वर्हिर्होमे विनियोगः ॥ ॐ देवागातुं विदोगातुं वित्वागातुंमितमनस
स्पतऽ इमन्देवयज्ञं ॐ स्वाहा वाते धाः ॥ इति वर्हिर्होमः ॥ ततः आचार्य्यः कुमारस्यानुशासनं करोति ॥ ॐ ब्रह्मचार्यसीत्युक्त्या
चार्य्यः ॥ ॐ असानीति कुमारः ॥ ॐ आपोशानः इत्याचार्य्यः ॥ ॐ अश्नानि ॥ इति कुमारः ॥ ॐ ककुरु इत्याचार्य्यः ॥ ॐ करवाणी
इति माणवः ॥ मादिवासुषुप्थाः इत्याचार्यः ॐ नस्वपामीति कुमारः ॥ ॐ वाचंयच्छ ॥ इत्याचार्य्यः ॥ ॐ यच्छानीति कुमारः ॥
ॐ समिधमाधेहि ॥ इत्याचार्यः ॥ ॐ आदधानि ॥ इति कुमारः ॥ आपोशान ॥ इत्याचार्य्यः ॐ अश्नानिः ॥ इति कुमारः ॥ अथ कु
मारस्य पितात्रुष्टस्यानस्थितग्रहगणान्दोषपरिहारार्थं ग्रहदानन्दत्वा ॥ गोदानदीनां संकल्पं कुर्यात ॥ एनं कुशादिकमादाय
अस्य कुमारस्य गायत्रीग्रहणवेदाध्ययनाधिकारित्वसिद्धये कामचारकामवादकामभक्ष्यादिदोषपरिहारकसर्वप्रायश्चित्त
र्थमिदं गोमूल्यं द्रव्यं सुवर्णादिकं ब्रह्मादिदैवतं मत्सकगोत्रायेत्यादि ॥ अथ गायत्रीदानम् ॥ तत्राग्नेरुत्तरतः प्रत्यङ्मुखायोप
विष्टायाचार्यवरणोपसङ्ग्रहपूर्वकमुपसन्नाय आचार्यसमीक्ष्यमाणाय आचार्य्यः स्वयमपि समीक्षितायास्मैनिवारि

Nepal Sanskrit University, Balmiki Campus, Kathmandu

नशंखवन्यादिशाबद्धजुष्णाङ्केसाविवीमन्त्राह ॥ तत्रमंत्रदानक्रमः ॥ तत्रप्रथमावृत्तौत्रिपदायाः सावित्र्याः सप्रणवव्याहृतिपूर्व
कएकःपादः ॥ द्वितीयावृत्तौद्विपादः ॥ तृतियावृत्तौत्रिपादः ॥ इतित्रिपदागायत्रीतत्रेत्थस्वरूपम् ॥ प्रथमावृत्तौ ॥ ॐभूर्भुव
स्वः तत्सवितुर्वरेणम् ॥ द्वितीयावृत्तौ ॥ ॐभूर्भुवः स्वः तत्सवितुर्वरेणभ्भर्गोदेवस्यधीमही ॥ तृतीयावृत्तौ ॥ ॐभूर्भुवः स्व
तत्सवितुर्वरेणंभर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात ॥ इतिमंत्रदानक्रमः ॥ अथमाणवकंआचार्यदक्षिणादि
शि अग्निपश्चिमोपविष्टोघृताक्तशुष्कनिषिद्धेतरेधनेनपश्चाकृतीर्जुहुयात ॥ अग्नेसुश्रवइत्यादीनांमन्त्राणांब्रह्माऋषिर्य
जुष्यग्निर्देवतासमिधनेविनियोगः ॥ ॐअग्नेसुश्रवसंमाकुरु ॥ १ ॥ ॐयथात्वमग्नेसुश्रवःसुश्रवाअसि ॥ २ ॥ एवंमा
ंसुश्रवःसौश्रवसंकुरु ॥ ३ ॥ ॐयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि ॥ ४ ॥ ॐएवंमहंमनुष्याणांवेदस्यनिधिपो
भूयासम् ॥ ५ ॥ इतिमंत्रेण ॥ ततः प्रदक्षिणामग्निंवारिणापर्युक्ष्य ॥ उत्थायस्वप्रादेशमितांघृताक्तपलाशसमिधमादाय
ॐअग्नयेसमिधामितिमंत्रस्यप्रजापतिऋषिराकृतिछन्दः ॥ समिद्देवतासमिदाधानेविनियोगः ॥ ॐअग्नयेसमिधमा
हार्षम्बृहतेजातवेदसे ॥ यथात्वमग्नेसमिधासमिध्यसएवमहमायुषामेधयावर्चसाप्रजयापशुभिर्ब्रह्मवर्चसेनस
मिधे ॥ जीवपुत्रोममाचार्योमेधाव्यहमसान्यनिराकरिष्णुराशुष्मान्यशस्वीतेजस्वीब्रह्मवर्चस्यन्नादोभूयासंस्वाहा
इतिमंत्रेणजुहुयात ॥ ततस्तेनैवक्रमेणद्वितीयांतृतीयांमपिसमिधंजुहुयात एषातइतिमंत्रेणवासमिदन्तरंजुहुयात

CC-0. In Public Domain. Digitization by eGangotri

ततउपविश्यघृताक्तश्रुवकंनिधिडेनरेध्येनपश्चाहुतौपनज्जुहुयात् ॥ ॐ अग्नेसुश्रवइत्यादीनांब्रह्माऋषिर्यजुरग्निर्देव
तासमिन्धनेविनियोग ॥ ॐ अग्नेसुश्रवः सुश्रवसम्माकुरु ॥ १ ॥ ॐ यथात्वमग्नेसुश्रवसुश्रवाअसि ॥ २ ॥ ॐ एवम्मां
सुश्रवसौश्रवसंकुरु ॥ ३ ॥ यथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि ॥ ४ ॥ ॐ एवमहंमनुष्याणांवेदस्यनिधिपोभूया
सम् ॥ ५ ॥ ततः प्रदक्षिणामग्निंवारिणापर्युक्ष्य ॥ तूष्णींपाणीप्रतप्यललाटादिचिबुकान्तमुखंप्रतिमन्त्रान्तेवमृशति:
ॐ तनूपाअग्नइत्यादीनांबृहस्पतिर्ऋषिर्यजुरग्निर्देवतामुखविमर्शनेविनियोगः ॥ ॐ तनूपा३अग्नेसितन्वंमेपाहि ॥ १
ॐ आयुर्दा३अग्नेस्यायुर्मेदेहि ॥ २ ॥ ॐ वर्च्चोदा३अग्नेसिवर्च्चोमेदेहि ॥ ३ ॥ ॐ अग्नेयन्मेतन्वा३ऊनन्तन्मआपृण ॥ ४
ॐ मेधाम्मेदेवः सविताआदधातु ॥ ५ ॥ ॐ मेधाम्मेदेवीसरस्वतीआदधातु ॥ ६ ॥ ॐ मेधाम्मेअश्विनौदेवाधत्तांपुष्करस्र
जौ ॥ ७ ॥ ततः सर्वगात्राणिदक्षिणपाणिनास्पर्शे ॥ तत्रप्रत्येकमंत्रा ॥ ॐ अङ्गानिचमइत्यादीनांप्रजापतिऋषिर्यजु
र्लिंगोक्तादेवताअङ्गाप्यायनेविनियोगः ॥ ॐ अङ्गानिचमआप्यायताम् ॥ इतिसर्वगात्रालम्भने ॥ २ ॥ ॐ वाक्चमआ
प्यायतामितिमुखालम्भने ॥ ३ ॥ ॐ प्राणश्चमआप्यायतामितिनासिकयो ॥ ४ ॥ ॐ चक्षुश्चमआप्यायतामितिचक्षु
षोः ॥ ॐ श्रोत्रंचमआप्यायतामितिश्रोत्रयो ॥ ५ ॥ ॐ यशोबलंचमआप्यायताम् ॥ इतिमंत्रपाठमात्रम् ॥ यदितस्मीन्
नेवदिनेवेदारम्भसमावर्त्तनेक्रियतेतदा ॥ मूर्द्धानन्दिवइत्यादिनापूर्णाहुतिंदद्यात् ॥ ॐ मूर्द्धमितिमंत्रस्यभारद्वाजऋषि

310

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

त्रिष्टुप्छन्दोऽग्निर्देवता मूर्धाकृतिहोमे विनियोगः ॥ ॐ मूर्धानं दिवः ॥ ततः स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्म
ना त्र्यायुषं कुर्यात् ॥ ॐ त्र्यायुषमिति नारायण ऋषिरुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः ॥ तत्र यथाक्र
मेण मन्त्रचतुष्टयम् ॥ ॐ त्र्यायुषं जमदग्नेः ॥ इति ललाटे ॥ १ ॥ ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम् ॥ ॐ यद्देवेषु त्र्यायुष
मिति दक्षिणबाहुमूले ॥ ॐ तन्नो अस्तु त्र्यायुषम् ॥ ४ ॥ इति त्र्यायुषं करणं ततो व्यस्तपाणिभ्यां पृथिवीं स्पृशन्नभिवादयेत् ॥
तत्र प्रकारः ॥ ॐ अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं भो वैश्वानर त्वामभिवादये ॥ ततस्तेनैव क्रमेण सम्बोध्य वरुणमभि
वादयेत् ॥ तेनैव क्रमेण सम्बोध्य रुद्रमभिवादयेत् ॥ ॐ आयुष्मान् भव सौम्य अमुकशर्मन् ३ इत्याचार्यो ब्रूयात् ॥ अथ भि
क्षार्थं पात्रमादाय प्रथमं मातुः सकाशात् ॥ मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ॥ भिक्षेत भिक्षां प्रथमं या चैनं न
विमानयेदिति वचनात् ॥ भिक्षाप्रकारश्चैवम् ॥ आदिमध्यावसानेषु भवच्छब्दं वर्णानुक्रमात् ॥ भवति भिक्षां मे देहि इति क्रम
तो विनियोजयेत् ॥ ब्राह्मणो भवति भिक्षां मे देहि क्षत्रियः भिक्षां भवति मे देहि ॥ वैश्यो भिक्षां मे देहि भवति ॥ इति प्रार्थना
नन्तरं तद्दत्तां भिक्षां मात्रादाय ॥ आचार्याय निवेद्य तथैव भिक्षान्तरयाचनम् ॥ तत आचार्येणाऽभ्यनुज्ञातो भिक्षां भो
कुर्यात् ॥ अथ क्षारलवणमधुमांसादिनिवृत्तिः ॥ उद्धृतजलस्नानस्यापि निवृत्तिः ॥ दण्डकृष्णाजिनधारणम् ॥ वृक्षारोहणाद्वि
षमभूमिलङ्घनं नग्नस्त्रीनिरीक्षणं स्त्रीसहोपवेशनं स्वदारोहणं नादन्तादानं व्याहृतिरूपा ब्रह्मचारिणो नियमाः ॥ त

CC-0. In Public Domain. Digitization by eGangotri

राम
२११

ऽदिने उत्तरवारीवाप्यतोऽह्नः शेषस्थितस्य वनयेत्॥ ततः सायंसंध्यां कृत्वा तस्मिन्नेवाग्नौ पूर्ववत् पञ्चभूसंस्कारान् परिसमूहनं कृत्वा वा
चं विसृजेत्॥ परिसमूहनं तु शुष्कानिषिद्धेतरेन्धनस्याग्नौ प्रक्षेपः॥ तच्च संध्यात्रयास्वं प्रतिदिनं सायं प्रातरपि ब्रह्मचारिणा कर्त्त
व्यमिति॥ ॥अथ वेदारम्भ॥ तत्र कृतनित्यक्रिय आचार्यः कुशैर्हस्तमात्रपरिमितं चतुरस्रां भूमिं परिसमूह्य॥ तानैशान्यां प
रित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरतः॥ प्रागग्रप्रादेशमात्रं त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेना
भ्युक्ष्य कांस्यपात्रेणाग्निमादाय स्वाभिमुखमुपसमाधाय गन्धचन्दनताम्बूलवस्त्राण्यादाय॥ ॐ अद्य कर्तव्यवेदारम्भहोमकर्म
णि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुं अमुकगोत्रममुकशर्माणं ब्राह्मणमेभिः॥ गन्धचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृ
णे॥ इति ब्रह्माणं वरणं कुर्यात्॥ ॐ वृतोऽस्मीति प्रतिवचनम्॥ ॐ यथाविहितं कर्म कुरु इत्याचार्येणोक्ते॥ ॐ करवाणि॥ इति प्रति
वचनम्॥ इति ब्रह्मवरणं कृत्वा॥ अग्नेर्दक्षिणतः शुद्धमासनं दत्वा॥ तदुपरि प्रागग्रान् कुशानास्तीर्य॥ अग्निप्रदक्षिणक्रमेण नयि
त्वा॥ ॐ अस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय॥ ॐ भवानीति तेनोक्ते ब्रह्माणमुदङ्मुखं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा
वारिणा पूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात्॥ ततः परिस्तरणम्॥ बर्हिषश्चतुर्थभागमादा
य॥ आग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यन्तं नैरृत्याद्वायव्यान्तं अग्नितः प्रणीतापर्यन्तम्॥ ततोऽग्नेरुत्तरतः पश्चिमदिशि॥ पवित्रच्छेद
नार्थं कुशत्रयम्॥३॥ पवित्रकरणार्थं साग्रमनन्तर्गर्भकुशपत्रद्वयम्॥२॥ प्रणीतापात्रम्॥ आज्यस्थाली सम्मार्जनकुशाः॥५॥

राम
२११

311

Nepal Sanskrit University, Balmiki Campus, Kathmandu

उपयमनकुशाः ॥ १२ ॥ समिधस्तिस्रः ॥ ३ ॥ आज्यम् ॥ तण्डुलपूर्णपात्रम् ॥ पवित्रछेदनकुशानां पूर्वपूर्वदिशिक्रमेणासादनीयम्
ततः पवित्रछेदनकुशैः पवित्रे छित्वा ॥ सपवित्रकरेण प्रणीतोदकं प्रोक्षणीपात्रे निधाय द्वाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरु
त्पूय ॥ ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा ॥ अनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुद्दिङ्गनम् ॥ ततः प्रणीतोदकेन प्रोक्ष
णीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासादितवस्तून्यभिषिंच्य ॥ अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥ ततः आज्यस्थाल्यामा
ज्यं निरूप्याधिश्रयणम् ॥ ततः कुशाग्रज्वालया आज्यस्याग्नेश्चोपरि भ्रामयित्वा प्रदक्षिणां वह्नौ तत्प्रक्षेपः ॥ ततः स्रुवः स्रुवप्रतपनम्
सम्मार्जनकुशानां मध्यैरन्तरतो मूलैर्बाह्यतः स्रुवं सम्मृज्य ॥ प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रताप्य दक्षिणतो निदध्यात् ॥ ततआज्यम
ग्नेः प्रदक्षिणां कारयित्वाऽवतार्य स्वाग्रतो निदध्यात् ॥ ततः आज्ये प्रोक्षणीवदुत्पवनम् ॥ अवेक्ष्य सत्यपः पतितनिरसनम् ॥ ततः
प्रोक्षण्युत्पवनम् ततउत्थाय उपयमनकुशान् वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ समिधः प्रक्षिपेत् ॥ ततउपविश्य
सपवित्रप्रोक्षण्युदकेन प्रदक्षिणाक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय ॥ ब्रह्मणान्वारब्धयातिदधतिराजाजुः समि
द्धतमेऽग्नौ जुहुयात् ॥ तत्रआघमाकृतिवतुष्टयेस्रुवावशिष्टहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ ॐ प्रजापतय इति प्रतिप्र
जापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ १ ॥ इति मनसा ॥ ॐ
इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः ॥ ॐ इन्द्राय स्वाहा ॥ इदमिन्द्राय ॥ इत्याघारौ ॥ ॐ अग्नये स्

CC-0. In Public Domain. Digitization by eGangotri

रत्न ३१२ ति प्रजापति ऋषिस्त्रिष्टुप् छंदोग्निर्देवता आज्यहोमे विनियोगः ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये ॥ ३ ॥ सोमायेति प्रजापति ऋषिस्त्रि
ष्टुप् छंदः सोमो देवता आज्यहोमे विनियोगः ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय ॥ ४ ॥ इत्याज्यभागौ ॥ ततः प्रकृतोऽनन्वारब्धक
र्तृहोमः ॥ ॐ अन्तरिक्षाय स्वाहा ॥ इदमन्तरिक्षाय ॥ १ ॥ ॐ वायवे स्वाहा ॥ इदं वायवे ॥ २ ॥ ॐ ब्रह्मणे स्वाहा ॥ इदं ब्रह्मणे ॥ ३
ॐ छंदोभ्यः स्वाहा ॥ इदं छंदोभ्यः ॥ ४ ॥ ततः सामान्याहुतयः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ १ ॥ इति मनसा ॥ ॐ देवे
भ्यः स्वाहा ॥ इदं देवेभ्यः ॥ २ ॥ ॐ ऋषिभ्यः स्वाहा ॥ इदमृषिभ्यः ॥ ३ ॥ ॐ श्रद्धायै स्वाहा ॥ इदं श्रद्धायै ॥ ४ ॥ ॐ मेधायै स्वाहा ॥
इदं मेधायै ॥ ५ ॥ ॐ सदसस्पतये स्वाहा ॥ इदं सदसस्पतये ॥ ६ ॥ ॐ अनुमतये स्वाहा ॥ इदमनुमतये ॥ ७ ॥ अथ प्रत्येकं ॐ
पृथिव्यै स्वाहा ॥ इदं पृथिव्यै ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये ॥ इति ऋग्वेदे ॥ ॐ वायवे स्वाहा ॥ इदं वायवे ॥ १ ॥ ॐ अन्तरि
क्षाय स्वाहा ॥ इदमन्तरिक्षाय ॥ २ ॥ इति यजुर्वेदे ॥ ॐ दिवे स्वाहा ॥ इदं दिवे ॥ ॐ सूर्याय स्वाहा ॥ इदं सूर्याय ॥ इति सामवेदे ॥
दिग्भ्यः स्वाहा ॥ इदं दिग्भ्यः ॥ ॐ चन्द्रमसे ॥ इदं चन्द्रमसे ॥ इत्यथर्ववेदे ॥ ॐ ब्रह्मणे स्वाहा ॥ इदं ब्रह्मणे ॥ ॐ छन्दोभ्यः स्वाहा ॥ इ
दं छन्दोभ्यः ॥ १ ॥ इति सर्वत्र स्वस्व वेदाहुति प्रथमम् ॥ ततोऽन्वारब्धकर्तृको होमः ॥ तत्र तत्तदाहुत्यनन्तरं स्रुवावस्थितहु
तशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापति ऋषिर्गायत्र्युष्णिगनुष्टुभश्छंदांस्यग्निवा
युसूर्या देवता वेदारम्भहोमे विनियोगः ॥ ॐ भूः स्वाहा ॥ इदमग्नये ॥ १ ॥ ॐ भुवः स्वाहा ॥ इदं वायवे ॥ २ ॥ ॐ स्वः स्वाहा ॥ इ

राम ३१२ 312

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द॰ सूर्याय ॥ ३ ॥ एता महाव्याहृतयः ॥ ॐ त्वन्नो अग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोग्नि वरुणौ देवते वेदारम्भ होमे विनियोगः ॥ ॐ त्व
न्नो ऽअग्ने वरुणस्य विद्वान् देवस्य हेडो ऽअवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांऽसि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदम
ग्नीवरुणाभ्यां ॥ ४ ॥ ॐ सत्वन्नोअग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोग्नीवरुणौ देवते वेदारम्भ होमे विनियोगः ॥ ॐ सत्वन्नो अ
ग्नेवमो भवोती नेदिष्ठो ऽउषसो व्युष्टौ ॥ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं ऽसुहवो न ऽएधि स्वाहा ॥ इदमग्नीवरुणाभ्यां
५ ॥ ॐ अयाश्चाग्न इति मन्त्रस्य वामदेव ऋषिर्बृहती छन्दोग्निर्देवता वेदारम्भ होमे विनियोगः ॥ ॐ अयाश्चाग्नेस्य नभिशस्तिपा
श्च सत्वमया असि ॥ अया नो यज्ञं वहास्य या नो धेहि भेषजं ऽ स्वाहा ॥ इदमग्नये ॥ ६ ॥ ॐ ये ते शतमिति वामदेव ऋषिस्त्रिष्टुप्
छन्दो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता वेदारम्भ होमे विनियोगः ॥ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा
वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यः मरुद्भ्य
ः स्वर्केभ्यः ॥ ७ ॥ ॐ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता वेदारम्भ होमे विनियोगः ॥ ॐ उदुत्तमं वरुण पाशंम
स्मदवाधमं वि मध्यमꣳ श्रथाय ॥ अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा ॥ इदं वरुणाय ॥ ८ ॥ एता प्राय
श्चित्तसंज्ञकाः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ ९ ॥ इति मनसा ॥ इदं प्राजापत्यम् ॥ ॐ अग्नये स्विष्टकृत इति प्रजाप
तिर्ऋषिरग्निर्देवता स्विष्टकृद्धोमे विनियोगः ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते ॥ इति स्विष्टकृत ॥ ततः सहस्र

Nepal Sanskrit University, Beljhundi, Dang, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥रत्न॥ ॥३१३॥

वप्राशनम्॥ ततआचार्य्य॥ ॐ अद्यकृतैतद्वेदारम्भहोमकर्म्मणिकृताकृतावेक्षणारूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदै
वतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसम्प्रददे॥ इतिदक्षिणांदद्यात्॥ ॐ स्वस्तीतिप्रतिवचनं॥ ॐ
सुमित्रियाउर्मित्रियाइतिद्वयोर्यजुषोः॥ प्रजापतिऋषिरापोदेवताःप्रणीताविमोकेविनियोग॥ ॐ सुमित्रियानआपओषध
यःसन्तुइतिपवित्राभ्यांप्रणीताजलेनशिरःसम्मृज्य॥ ॐ दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयंद्विष्मः॥ इत्यैशान्यांप्रणीता
पात्रंन्युब्जीकुर्यात्॥ ततोबर्हिहोमः॥ ॐ देवागातुविदइत्यस्यवनस्पतिऋषिर्विराट्छन्दोवातोदेवताबर्हिहोमेविनियोगः॥ ॐ
देवागातुविदोगातुंवित्त्वागातुमितः॥ मनसस्पत३ इमंदेवयज्ञँ स्वाहावातेधाःस्वाहा॥ इतिबर्हिहोमः॥ ॥ततउष्णीशके
गुरुर्वेदारम्भंकारयेत्॥ तत्रेत्थंप्रकारः॥ प्रणवंप्राक्प्रयुञ्जीतव्याहृतीस्तदनन्तरम्॥ सावित्रीञ्चानुपूर्व्येणततोवेदान्समारभेत्
१॥ ओ३म् भूर्भुवःस्वः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात्०॥ ॐ भूः॥ इतिप्रणवान्तंपठित्वा॥ ॐ समिधा
ग्निं॥१॥ सुसमिद्धायशोचिषे॥२॥ इतिवर्णिकान्तंपङ्क्तिकान्तञ्चपाठयेत्॥ ततःसप्रणवंस्वस्तिवाचयित्वा॥ उत्थायफलपु
ष्पसमन्वितब्रह्मचारिकरसम्पुटस्रुवस्रुग्घृतेनपूर्णाहुतिंजुहुयात्॥ तत्रमन्त्रः॥ ॐ मूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृ
तआजातमग्निं॥ कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयन्तदेवाः स्वाहा॥ इतिपूर्णाहुतिंकृत्वा॥ ततउपविश्य॥ स्रु
वेणभस्मानीयदक्षिणकरानामिकागृहीतभस्मना॥ ॐ त्र्यायुषमितिमन्त्रस्यनारायणऋषिरुष्णिक्छन्दआयुर्देवताभस्मना

॥राम॥ ॥३१२॥

313

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri

तिलककरणेविनियोग॥ ॐत्र्यायुषंजमदग्नेः॥ इतिललाटे॥ १॥ ओम्कश्यपस्यत्र्यायुषम्॥ इतिग्रीवायाम्॥ २॥ ॐयद्देवेषु
त्र्यायुषम्॥ इतिदक्षिणबाहुमूले॥ २॥ ॐतन्नोऽअस्तुत्र्यायुषम्॥ इतिहृदये॥ ४॥ इतित्र्यायुषंकुर्यात्॥ ॥इतिवेदारम्भ
अथसमावर्त्तनम्॥ तत्रशुभदिनेप्रक्षीभूयः॥ ॐआचार्य्यस्नास्यामि॥ इतिकुमारआचार्यंप्रतिभाषतेततः॥ ॐस्नाहिइत्या
चार्यः॥ तत्राचार्य्यःप्राणानायम्यदेशकालौस्मृत्वाअस्यब्रह्मचारिणोब्रह्मचर्यावस्थातोगृहाश्रमान्तरप्राप्तिद्वाराश्रीप
रमेश्वरप्रीत्यर्थंसमावर्त्तनाख्यंकर्माहंकरिष्ये॥ तदङ्गतयाप्रजापतिमिन्द्रमग्निंसोममन्तरिक्षंवायुंब्रह्माणंछन्दांसिप्रजाप
तिंदेवानृषीन्श्रद्धांमेधांसदसस्पतिमनुमतिमग्निंवायुंसूर्यमग्निंवरुणंवग्निंवरुणंसवितृविश्वेदेवमरुत्स्वर्कान्वरुणं
प्रजापतिंस्विष्टकृतेवाज्येनाहंयक्ष्येइतिसङ्कल्पः॥ ततोब्रह्मचारिणिआचार्यसंनिहितदक्षिणप्रदेशेउपविष्टे॥ कृतस्ना
नादिराचार्य॥ ऊर्ध्वहस्तमात्रपरिमितंचतुरस्रंभूमिंपरिसमूह्य॥ तानैशान्यांपरित्यज्यगोमयोदकेनोपलिप्यस्रुवमूलेनोत्तर
क्रमेणत्रिरुल्लिख्यउल्लेखनक्रमेणअनामिकाङ्गुष्ठाभ्यांमुद्धृत्यजलेनाभ्युक्ष्य॥ कांस्यपात्रेणाग्निमानीयप्रत्यङ्मुखंतदुपरिनिद
ध्यात्॥ ततःपुष्पचन्दनताम्बूलवस्त्राण्यादाय॥ ॐअद्यकर्त्तव्यसमावर्त्तनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुं
ममुकगोत्रममुकशर्माणंब्राह्मणमेभिःपुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे॥ इतिब्रह्माणंवृणुयात्॥ ॐवृतो
ऽस्मीतिप्रतिवचनम्॥ ॐयथाविहितंकर्मकुर्वित्यभिधाय॥ ॐकरवाणि॥ इतितेनोक्ते॥ अग्नेर्दक्षिणतःशुद्धमासनंदत्वा॥ न

रत्न उपरिप्रागग्रान्कुशास्तीर्यअग्निप्रदक्षिणांकृत्वा० ॐ अस्मिन्कर्मणित्वमेब्रह्माभवइत्यभिधाय ॥ ॐ भवानीतितेनोक्ते० ब्रह्माणा
३०४ मग्नुखमुपवेश्य ॥ प्रणीतापात्रंपुरस्कृत्यवारिणापूर्य० ॐ सेसद्धायब्रह्मणोमुखमवलोक्यअग्नेरुत्तरतःकुशोपरिनिदध्यात् ॥ त
तःपरिस्तरणम् ॥ वर्हिषचतुर्थभागमादाय ॥ आग्नेयादीशानान्तं ॥ १ ॥ ब्रह्मणोग्निपर्यन्तं नैर्ऋत्याद्वायव्यान्तं ॥ अग्नितःप्रणीता
पर्यन्तम् ॥ ४ ॥ ततोग्नेरुत्तरतःपश्चिमदिशि ॥ पवित्रछेदनार्थकुशत्रयम् ॥ ३ ॥ पवित्रकरणार्थंसाग्रमनन्तर्गर्भकुशपत्रद्वयं ॥ २
प्रोक्षणीपात्रं ॥ १ ॥ आज्यस्थाली ॥ १ ॥ समार्जनकुशाः ॥ ५ ॥ उपयमनकुशाः ॥ १६ ॥ समिधस्तिस्रः ॥ ३ ॥ स्रुवः ॥ १ ॥ आज्यम् ॥ तण्डु
लपूर्णपात्रंपवित्रछेदनकुशानांपूर्वपूर्वदिआसादनम् ॥ ततःपवित्रछेदनकुशैःपवित्रेछित्वा ॥ ततःपवित्रकरेणप्रणी
तोदकत्रिःप्रोक्षणीपात्रेनिधायअनामिकाङ्गुष्ठाभ्यामुत्तराग्रेपवित्रेगृहीत्वातज्जलंकिञ्चिद्भूमौत्रिरुत्क्षिप्यप्रणीतोदकेन
प्रोक्षणीमभिषिंच्यप्रोक्षणीजलेनासादितस्कसेचनंकृत्वाअग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिदध्यात् ॥ ततःआज्यस्था
ल्यामाज्यंनिरुप्याधिश्रयणं ॥ ततस्तृणंप्रज्वाल्यआज्यस्याग्नेश्चपरिभ्रामयित्वावह्नौतत्प्रक्षिप्यस्रुवंत्रिप्रतप्यसम्मार्जनकु
शानामग्रैरन्तरतोमूलैर्बाह्यतःस्रुवंसंमृज्यप्रणीतोदकेनाभ्युक्ष्य ॥ पुनःत्रिःप्रतप्यदक्षिणतोनिदध्यात् ॥ ततआज्यमग्निंप्रद राम
क्षिणांकारयित्वाअवतार्यत्रिःप्रोक्षणीवदुत्पूय ॥ अवेक्ष्यसत्यपद्रव्येभ्यसत्यःपडवेतन्निरसनंकृत्वापुनःप्रोक्षणीमुत्पू ३१४
यः ॥ उपयमनकुशान्वामहस्तेकृत्वाप्रजापतिमनसाध्यात्वातूष्णीमेवाग्नौघृताक्ताःसमिधःप्रक्षिपेत् ॥ ततउपविश्यसमुपवि

314

७४९

CC-0. In Public Domain. Digitization by eGangotri

त्रप्रोक्षणयुदकेशप्रदक्षिणाक्रमेणाउग्निं पर्युक्ष्य ॥ प्रणीतापात्रे पवित्रे निधाय ॥ यानि नदक्षिणाजानुः समिधन मेश्रौत्रस्रुणान्वार
धः स्रुवेणाज्याऊतिर्जुहोति ॥ नत्रप्रथमाऊतिवजुहूयेप्रम्याऊत्यनन्तरस्रुवावशिष्टशेषम्यनस्यप्रोक्षणीपात्रेप्रक्षेपः ॥ ॐ
प्रजापतयइतिप्रजापतिर्ऋषिस्त्रिष्टुप्छंदः प्रजापतिर्देवतासमावर्त्तनहोमेविनियोगः ॥ ॐ प्रजापतयेस्वाहा ॥ इदंप्रजाप
तये ॥ १ ॥ इतिमनसा ॥ ॐ इन्द्रायेतिप्रजापतिऋषिस्त्रिष्टुप्छंदइन्द्रोदेवतासमावर्तनहोमेविनियोगः ॐ इन्द्रायस्वाहा
इदमिन्द्राय ॥ २ ॥ इत्याघारौ ॥ ॐ अग्नयइतिप्रजापतिऋषिरग्निर्देवतात्रिष्टुप्छंदसमावर्तनहोमेविनियोगः ॥ ॐ अ
ग्नयस्वाहा ॥ इदमग्नय ॥ ३ ॥ ॐ सोमायेतिप्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमोदेवतासमावर्तनहोमेविनियोगः ॥ ॐ सोमा
यस्वाहा ॥ इदंसोमाय ॥ ४ ॥ इत्याज्यभागौ ॥ नत्रप्रकृतोनत्वारधकनकोहोमः ॥ ॐ मन्तरिक्षायस्वाहा ॥ इदमन्तरिक्षाय ॥ १
ॐ वायवेस्वाहाः इदंवायवे ॥ २ ॥ ॐ ब्रह्मणेस्वाहाः इदंब्रह्मणे ॥ ३ ॥ ॐ छंदोभ्यःस्वाहाः इदंछंदोभ्यः ॥ ४ ॥ प्रजापतयइति
प्रजापतिर्ऋषिस्त्रिष्टुप्छंदः प्रजापतिर्देवतासमावर्तनेहोमेविनियोगः ॥ ॐ प्रजापतयेस्वाहाः इदंप्रजापतये ॥ १ ॥ इ
तिमनसाः ॐ देवेभ्यःस्वाहा ॥ इदंदेवेभ्यः ॥ १ ॥ ॐ ऋषिभ्यस्वाहा ॥ इदमृषिभ्यः ॥ २ ॥ ॐ श्रद्धायैस्वाहा ॥ इदंश्रद्धायै ॥ ३ ॥ ॐ
मेधायैस्वाहाः इदंमेधायै ॥ ४ ॥ ॐ सदसस्पतयेस्वाहा ॥ इदंसदसस्पतये ॥ ५ ॥ ॐ अनुमतयेस्वाहा ॥ इदमनुमतये ॥ ६
अथप्रत्येकं ॥ ॐ वायुव्येस्वाहा ॥ इदंवायवे ॥ १ ॥ ॐ अन्तरिक्षायस्वाहा ॥ इदमन्तरिक्षाय ॥ २ ॥ इदंयजुर्वेदा ॥ ॐ पृथिव्यैस्वा

CC-0. In Public Domain. Digitization by eGangotri

॥रत्न॥ हा॥ इदं पृथिव्यै॥ ॐ अग्नये स्वाहा॥ इदमग्नये॥ २॥ इति ऋग्वेदे॥ ॐ दिव्ये स्वाहा॥ इदं दिव्ये॥ १॥ ॐ सूर्याय स्वाहा॥ इदं सू
॥३१५॥ र्याय॥ २॥ इति सामवेदे॥ ॐ दिग्भ्यः स्वाहा॥ इदं दिग्भ्यः॥ १॥ ॐ चंद्रमसे स्वाहा॥ इदं चन्द्रमसे॥ २॥ इत्यथर्ववेदे॥ ॐ ब्रह्मणे स्वा
हा॥ इदं ब्रह्मणे॥ १॥ ॐ छन्दोभ्यः स्वाहा॥ इदं छन्दोभ्यः॥ २॥ इति सर्ववेदस्य स्ववेदाहुतिः प्रथमम्॥ ततो ब्रह्मणाऽन्वारब्धो
जुहुयात्॥ तत्राहुति द्रव्यान्ते यत्तदाज्यमन्तरिक्तं वा वस्थितं शेषं हुतस्य प्रोक्षणी पात्रे प्रक्षेपः॥ ॐ भूर्भुवः स्वरिति महा
व्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छंदांस्यग्निवायुसूर्यादि देवतास्समावर्त्तन होमे विनियोगः॥ ॐ भूः स्वाहा
इदमग्नये॥ १॥ ॐ भुवः स्वाहा॥ इदं वायवे॥ २॥ ॐ स्वः स्वाहा॥ इदं सूर्याय॥ ३॥ एता महाव्याहृतयः॥ ॐ त्वन्नो अग्न इति वा
मदेव ऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते समावर्त्तन होमे विनियोगः॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासि
सीष्ठाः॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा॥ इदमग्नीवरुणाभ्याम्॥ ४॥ ॐ स त्वन्नो अग्न इति
वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्निवरुणौ देवते समावर्तन होमे विनियोगः॥ ॐ स त्वन्नो ऽग्नेवमो भवोती नेदिष्ठो ऽस्या उषसो व्यु
ष्टौ॥ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा॥ इदमग्नीवरुणाभ्याम्॥ ५॥ अयाश्चाग्न इति वा ॥राम॥
मदेव ऋषिर्बृहती छन्दोऽग्निर्देवता समावर्तन होमे विनियोगः॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्त्वमया असि॥ अ ॥३१५॥
या नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा॥ इदमग्नये॥ ६॥ ये ते शतमिति वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणः सविता वि

315

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुर्विश्वेदेवा मरुतः स्वर्का देवताः समावर्त्तनहोमे विनियोगः॥ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः॥ ते
भिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः
२॥ ॐ उदुत्तमम् इति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता समावर्त्तनहोमे विनियोगः॥ ॐ उदुत्तमं वरुण पाशमस्म
दवाधमं विमध्यमं॰ अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा॥ इदं वरुरुणाय॥ ८॥ इति सर्वप्रायश्चित्त
सञ्ज्ञकाः॥ ॐ प्रजापतये इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता समावर्त्तनहोमे विनियोगः॥ ॐ प्रजापतये
स्वाहा॥ इदं प्रजापतये॥ ९॥ इति मनसा॥ ॐ अग्नये स्विष्टकृते इति प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता स्विष्टकृद्धोमे विनि
योगः॥ ॐ अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्विष्टकृद्धोमः॥ ततः संस्रवप्राशनम्॥ तत आचम्य॥ ॐ अद्यकृतैतत्समावर्त्तन
होमकर्मणः कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय
ब्रह्मणे दक्षिणात्वेन अहं संप्रददे॥ इति दक्षिणादानम्॥ ॐ स्वस्तीति प्रतिवचनम्॥ ॥ ततः प्रणीताविमोकः॥ ॐ सुमित्रि
या उर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवताः प्रणीताविमोके विनियोगः॥ ॐ सुमित्रिया न आप ओषधयः
सन्तु॥ इति मन्त्रेण शिरः सम्मृज्य ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥ इति मन्त्रेणैशान्यां प्रणीतापात्रं न्युब्जी
कुर्यात्॥ ततः स्तरणक्रमेण बर्हिरानीय॥ ॐ देवा गातुविद इत्यस्य मनसस्पतिर्ऋषिर्विराट्छन्दो वातो देवता बर्हिर्होमे विनि

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥३१६॥

योगः॥ ॐ देवागातुविदोगातुंवित्वागातुमित मनसस्पत इमंदेवयज्ञं स्वाहा॥ वाते धाः स्वाहा॥ ॥इति बर्हिर्होमः॥ ततोग्नि
पश्चिमोपविष्टोब्रह्मवारिपरिसमूहनंकुर्यात्॥ ततघृताक्तशुष्कनिमिषेद्धेतरेन्धनेनपश्चात्कृतिहस्तेनजुहुयात्॥ ॐ अग्नेसुश्रव
इत्यादीनामन्त्राणांब्रह्मऋषियजुश्छन्दोग्निर्देवतासमिन्धनेविनियोगः॥ ॐ अग्नेसुश्रवः सुश्रवसम्माकुरु॥ १ ॥ॐ यथात्वमग्ने
सुश्रवःसुश्रवाअसि॥ २ ॥ ॐ एवम्माꣳ सुश्रवः सौश्रवसंकुरु॥ ३ ॥ॐ यथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि॥ ४॥
ॐ एवंमहंमनुष्याणांवेदस्यनिधिपोभूयासम्॥ ५ ॥ इतिमंत्रैः॥ ॥ततप्रदक्षिणामग्निंवारिणापर्युक्ष्य॥ उत्थाय॥ घृता
क्तांप्रादेशमितपलाशसमिधमादायजुहुयात्॥ तत्रमन्त्रः॥ ॐ अग्नयसमिधमिति मंत्रस्यप्रजापतिऋषिराकृतिश्छन्दः
समिधोदेवतासमिदाधानेविनियोगः॥ ॐ अग्नये समिधमहार्षंबृहते जातवेदसे॥ यथात्वमग्नेसमिधासमिध्यसएवमा
युषामेधयावर्चसाप्रजयापशुभिर्ब्रह्मवर्चसेनसमिधोजीवपुत्रोममाचार्योमेधावाहसमान्यनिराकरिष्णुरायुष्मान्यशस्वी
तेजस्वीब्रह्मवर्चस्यन्नादोभूयासꣳ स्वाहा॥ ततःसमिदन्तरद्वयमनेनैवमंत्रेणहुत्वा॥ ततउपविश्यपतितैर्वक्ष्यमाणपश्चाद्धु
तिर्घृताक्तशुष्कनिमिषेद्धेतरेन्धनेनजुहुयात्॥ ॐ अग्नेसुश्रवइत्यादीनांब्रह्माऋषिर्यजुश्छन्दोग्निर्देवतासमिंधनेविनियोगः
ॐ अग्नेसुश्रवः सुश्रवसमाकुरु॥ १ ॥ ॐ यथात्वमग्नेसुश्रवाअसि॥ २॥ ॐ एवंमाꣳ सुश्रवंसंकुरु॥ ३ ॥ॐ यथात्व
मग्नेदेवानांयज्ञस्यनिधिपाअसि॥ ४ ॥ॐ एवंमहंमनुष्याणांवेदस्यनिधिपोभूयꣳ स्वाहा॥ ५ ॥ततप्रदक्षिणामग्नि

॥रत्न॥
॥३१६॥

316

७५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारिणापयुक्ष्य ॥ तूष्णीं पाणिं प्रतप्य तूनि मन्त्रान्ते मुखमवमृशति ॥ ॐ तनूपा ३ अग्ने इत्यादीनां बृहस्पतिर्ऋषिर्यजूंष्यग्निर्देवता
मुखविमर्शने विनियोगः ॥ ॐ तनूपा अग्नेसि तन्वम्मे पाहि ॥ १ ॥ ॐ आयुर्दा अग्नेस्यायुर्मे देहि ॥ २ ॥ ॐ वर्चोदा अग्नेसि वर्चो मे
देहि ॥ ३ ॥ ॐ यदग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥ १ ॥ ॐ मेधां मे देवः सविता आदधातु ॥ १ ॥ ॐ मेधां मे देवी सरस्वती आद
धातु ॥ ६ ॥ ॐ मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ७ ॥ ततः सर्वगात्रादिषु दक्षिणपाणिना स्पर्शः ॥ ॐ अङ्गानि च म ३
आप्यायन्तामित्यादीनां प्रजापतिर्ऋषिर्यजूंषि लिङ्गोक्ता देवता अङ्गाप्यायने विनियोगः ॥ ॐ अङ्गानि च म ३ आप्यायन्तामि
ति सर्वगात्रस्पर्शः ॥ १ ॥ ॐ वाक् च म ३ आप्यायन्तामिति मुखस्पर्शः ॥ २ ॥ ॐ प्राणश्च म आप्यायन्ताम् ॥ इति नासिकाद्वयस्पर्शः
३ ॥ ॐ चक्षुश्च म आप्यायन्ताम् ॥ इति चक्षुर्द्वयस्पर्शः ॥ ४ ॥ ॐ श्रोत्रं च म ३ आप्यायन्ताम् ॥ इति श्रोत्रद्वयस्पर्शः ॥ ५ ॥ ॐ यशो
बलं च म आप्यायन्ताम् ॥ इति पाठमात्रम् ॥ ततो दक्षिणकरानामिकागृहीतभस्मना ॥ ललाटे ॥ १ ॥ ग्रीवायाम् ॥ दक्षि
णबाहुमूले ॥ ३ ॥ हृदि ॥ ४ ॥ यथासुखेन मन्त्रवर्जं त्र्यायुषं कुर्यात् ॥ ॐ त्र्यायुषमिति नारायणऋषिरुष्णिक् छन्द आ
युर्देवता भस्मना तिलककरणे विनियोगः ॥ ॐ त्र्यायुषं जमदग्नेः ॥ १ ॥ ॐ कश्यपस्य त्र्यायुषम् ॥ २ ॥ ॐ यद्देवेषु त्र्यायुषम्
३ ॥ ॐ तन्नो अस्तु त्र्यायुषम् ॥ ४ ॥ इति त्र्यायुषकरणम् ॥ ततो ब्रह्म ॥ तत्पाणिभ्यां पृथिवीं स्पृशन् ॥ प्रथमं वैश्वानरं सम्बोध्य
अभिवादयेत् ॥ ॐ अमुकगोत्रो ३ मुकप्रवरो ३ मुकशर्माहं भो वैश्वानर त्वामभिवादये ॥ इति प्रकारः ॥ ततस्तथैव वरुणं

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२१८

संम्बोध्य वरुणामभिवाद्य ॥ तथैवाचार्यसम्बोध्य गुरुमभिवादयेत् ॥ ततः ॐ आयुष्मान्भव सौम्य इत्याचार्यो ब्रूयात् ॥ अथास्तोद
कुम्भजलाभिषेकः ॥ ततो ऽग्नेरुत्तरतः प्रागग्रान् कुशानास्तीर्य तदुपरि दक्षिणोत्तरक्रमेण आसादितवारिपूर्णकलशा
स्थापये ॥ कलशानां पुरतः प्रागग्रेषु कुशेषु स्नानकर्त्तास्थित्वा एकस्मादाम्रपल्लवे ॥ तदुदकं गृहीत्वा ॥ ॐ येप्स्वन्तारिति प्र
जापतिर्ऋषिर्यजुरापो देवता उदकग्रहणे विनियोगः ॥ ॐ येप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहा ऽस्खलो
विरुजस्तनदूषुरिन्द्रियहा तान् विजहामि योरोचनस्तमिह गृह्णामि ॥ इति मन्त्रेण ततः आम्रपल्लस्य जलेन आत्मानम
भिषिञ्चति ॥ ॐ तेन मामिति मन्त्रस्य प्रजापतिर्ऋषिर्यजुरापो देवता अभिषेचने विनियोगः ॥ ॐ तेन मामभिषिञ्चामि श्रिये
यशसे ब्रह्मणो ब्रह्मवर्चसायेति मन्त्रेण ॥ १ ॥ ततः पूर्ववद्द्वितीयकलशस्योदकं गृहीत्वा ॥ आम्रफलवस्थतज्जलेनैवाऽभि
षिञ्चति ॥ ॐ येन श्रियमिति मन्त्रस्य प्रजापतिर्ऋषिर्यजुरापो देवता अभिषेचने विनियोगः ॥ ॐ येन श्रियमकृणुतां येनाव
मृशतां ॐ सुराणाम् ॥ येनाक्षावभ्यषिञ्चतां यद्वां तदश्विना यशः ॥ इति मन्त्रेण ॥ २ ॥ ततस्तेनैव क्रमेण तृतीयकलशस्य ज
लमादाय ॥ ॐ आपो हि ष्ठेति ऋचस्य सिन्धुद्वीप ऋषिर्गायत्री छन्द आपो देवता अभिषेचने विनियोगः ॥ ॐ आपो हि ष्ठा मयो
भुवस्ताम् ऊर्जे दधातन ॥ महेरणाय चक्षसे ॥ इति मन्त्रेणाभिषिञ्च्य ॥ ३ ॥ तेनैव क्रमेण चतुर्थकलशस्य जलमादाय ॥
ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥ इति मन्त्रेणाभिषिञ्च्य ॥ ४ ॥ पञ्चमकलशस्य जलं तथैवा

317

रत्न
३१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दाय॥ ॐ तस्मा३ अरङ्ग मामवो यस्य क्षयाय जिन्वथ आपो जनयथा च नः इति मंत्रेणाभिषिञ्चेत्॥५॥ ततः पुनः पूर्ववत् येस्व
त्तरमय इति मंत्रेण षष्ठसप्तमाष्टमकुम्भेभ्यः॥ प्रत्येकमुदकं गृहीत्वा तूष्णीं वारत्रयमभिषिञ्चेत्॥६ ७ ८॥ ततः ॐ उदुत्तम
मिति मन्त्रस्य शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता मेखलामोचने विनियोगः॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधम
विमध्यमं श्रथाय॥ अथा वयमादित्य व्रते तवानागसो अदितये स्याम इति मन्त्रेण शिरोमार्गेण मेखलामुन्मुच्य निधाया
दण्डकृष्णाजिने वनस्पतीमूले निधाय॥ वासोन्यत्परिधाय॥ सूर्यमुपतिष्ठेत्॥ उद्यन्भ्राजभृष्णुरिति मन्त्रस्य प्रजापति ऋषि
:शक्करीछन्दः सविता देवादित्योपस्थाने विनियोगः॥ ॐ उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि
दशसनिम्माकुर्वाविदन्मागमयो घन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवायावभिरस्थाच्छतसनिरसि शतसनिम्माकुर्वापि
दन्मागमयो घन्॥ भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायंयावभिरस्थात्सहस्रसनिम्माकुर्वाविदन्मागमयः॥ इत्युपस्थानं कृ
त्वा॥ ततो दधिप्राशनं॥ तिलप्राशं वा कुर्यात्॥ ततो जललोमनखानां कर्त्तनं कारयित्वा॥ स्नात्वा आचम्य॥ प्रादेशमि
तौदुम्बरकाष्ठेन दन्तधावनं कुर्यात्॥ ॐ अन्नाद्यायेति मंत्रस्याथर्वण ऋषिरनुष्टुप्छन्दः सोमो देवता दन्तधावने विनियोगः
ॐ अन्नाद्याय व्यूहध्वं सोमो राजायमागमत्॥ स मे मुखम्प्रमार्क्ष्यते यशसा च भगेन च॥ इति दन्तधावनमंत्रः॥ ततो दन्तधा
वनकाष्ठं परित्यज्य॥ आचम्य सुगन्धिद्रव्येणोद्वर्त्तनम्॥ स्नानम्॥ द्विराचमनम्॥ स्नानाद्यनुलेपनं च गृहीत्वाङ्गुष्ठानामिकयो

CC-0. In Public Domain. Digitization by eGangotri

रालम्भनम्॥ ॐ प्राणापानाविति मन्त्रस्य प्रजापतिर्ऋषिर्यजुः प्राणापानौ देवते चन्दनोपग्रहणे विनियोगः॥ प्राणापानौ मे तर्पयः
ॐ चक्षुर्मे तर्पय॥ ॐ श्रोत्रं मे तर्पय॥ ततो द्वीति यज्ञोपवीतं दानम्॥ पूर्ववत मन्त्रेण ततो उपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा अ
ञ्जलिनोदकमादाय॥ ॐ पितरः शुन्धध्वम्॥ इति दक्षिणस्यां दिशि पितृतीर्थेन निक्षिपेत्॥ ततस्तथा वस्त्र॥ चन्दनेन आत्मान
मनुलिम्पेत्॥ अनेन मंत्रेण ॐ सुचक्षा अहमिति मंत्रस्य प्रजापतिऋषिर्यजुराशीर्देवता जपे विनियोगः॥ ॐ सुचक्षा अ
हमक्षिभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम्॥ ततः अहतो वाससि परिधाय॥ ॐ परिधास्य इति मन्त्रस्य आ
लम्बन ऋषिः पङ्क्तिश्छन्दो वायोर्देवता वस्त्रपरिधाने विनियोगः॥ ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि॥ शतं
जीवामि शरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये॥ इति मंत्रेण अथोत्तरीयं॥ ॐ यशसा मेति मंत्रस्यार्थवण ऋषिः पङ्क्तिश्छ
न्दो लिङ्गोक्ता देवता उत्तरीयवस्त्रधारणे विनियोगः॥ ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती॥ यशो भगश्च माविदद्य
शो मा प्रतिपद्यताम्॥ इति मंत्रेण॥ अथ पुष्पमालाग्रहणम्॥ ॐ या अहरज्जमदग्निरिति मन्त्रस्य भारद्वाज ऋषिरनुष्टुप् छन्दः
सुमनसो देवताः पुष्पग्रहणे विनियोगः॥ ॐ या अहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा
च भगेन च॥ इति मंत्रेण प्रतिगृह्य तां मालां शिरसि बध्नीयादनेन मंत्रेण ॐ यद्यशोऽप्सरसामिति मंत्रस्य भारद्वाज ऋषिरनुष्टु
प् छन्दः सुमनसो देवताः पुष्पबन्धने विनियोगः॥ ॐ यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु तेन संग्रथिताः सुमनस आबध्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मियशो मयि ॥ अथोष्णीषेण शिरोवेष्टयेत् ॥ ॐ युवासुवासा इति विश्वामित्रऋषिस्त्रिष्टुप्छंदः सूर्यो देवता उष्णीषेण शिरोवेष्टने
विनियोगः ॥ ॐ युवा सुवासाः परीवीत आगात्स उ श्रेयान्भवति जायमानः ॥ तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः
इति मंत्रेण ॥ ततः कुण्डले परिदधाति ॥ ॐ अलङ्करणमिति मन्त्रस्य भरद्वाजऋषिरुष्णिक्छंदो ऽलङ्करणो देवता लङ्करणधारणे
विनियोगः ॥ ॐ अलङ्करणमसि भूयो लङ्करणं भूयात् ॥ इति मंत्रेण प्रथमं दक्षिणकर्णमलङ्करोति ततो वाममप्यनेनैव ॥ अथ
चक्षुषोरञ्जनम् ॥ अनेन मंत्रेण ॥ ॐ वृत्रस्येति मंत्रस्य प्रजापतिर्ऋषिर्गायत्री छंदो ऽञ्जनं देवता चक्षुरञ्जने विनियोगः ॥ ॐ वृ
त्रस्यासि कनीनकश्चक्षुर्दा ऽअसि चक्षुर्मे देहि इति प्रथमं दक्षिणं चक्षुषः ॥ वामस्याप्यनेनैव मन्त्रेण ॥ तत आदर्शे आत्मानमव
लोकयेत् ॥ ॐ रोचिष्णुरिति मंत्रस्य सूर्य ऋषिर्यजुरादर्शो देवता आदर्शावेक्षणे विनियोगः ॥ ॐ रोचिष्णुरसि इति मंत्रेण अथ
छत्रं प्रतिगृह्णाति ॥ ॐ बृहस्पतेरिति मंत्रस्य गोतम ऋषिर्बृहती छंदश्छत्रं देवता छत्रग्रहणे विनियोगः ॥ ॐ बृहस्पतेश्छ
दिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो मामन्तर्धेहि इति मंत्रेण ॥ अथोपानहौ ॥ ॐ प्रतिष्ठस्थ इति मंत्रस्य विश्वामित्रऋषि
र्यजुर्लिङ्गोक्ता देवता उपानहौ परिधाने विनियोगः ॥ ॐ प्रतिष्ठे स्थो विश्वतो मा पातम् ॥ इत्यनेन मंत्रेणोपानहौ पादयोर्युगप
त्परिदधाति ॥ अथ वैणवं दण्डमादत्ते ॥ ॐ विश्वाभ्य इति मन्त्रस्य याज्ञवल्क्य ऋषिस्त्रिष्टुप्छंदो दण्डो देवता दण्डग्रहणे विनियोगः
ॐ विश्वाभ्यो मा नाष्ट्राभ्यः परिपाहि सर्वतः ॥ इत्यनेन मंत्रेण ततो रथमारुह्य पूर्वोत्तरं गच्छेत् ॥ ततो विवाहाय वेदेत ॥ अथ गो

CC-0. In Public Domain. Digitization by eGangotri

रत्न ३१९

दानम् ॥ ततआचार्यायसालङ्कारगोवरं दद्यात् । तत्रक्रमः ॥ ॐ नमो गोभ्य इति मंत्रेण गां सां पूज्य आचार्यं च संपूज्य ॥ ॐ अद्ये
त्यादि देशकालादीन् स्मृत्वा अमुकगोत्रस्यामुकशर्मणो मम श्रामावर्तनकर्मणस्तथा उत्सवर्यत्वन्तस्यवसाद्भृतासिद्ध्यर्थं ॥ अ
मुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्य वेदमां गां रुद्रदेवतां सालङ्कारां सवत्सां दक्षिणां त्वेनूज महं संप्रददे इति दत्वा पठेत्
ॐ कपिले सर्वदेवानां पूजनीया सि रोहिणी ॥ तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥ ॐ अद्य कृतैतत् गोदानप्रतिष्ठार्थं
मिदं सुवर्णमग्निदैवतं यथानामगोत्रायेत्यादि ॥ ततो भूहिरण्यवस्त्रान्नादिदानं यथाशक्ति कुर्यात् ॥ तत उत्थाय मूर्ध्ना न
न्दिव इत्यादिमंत्रैर्माणवककरस्पृष्टेन फलपुष्पसमन्वितेन घृतपूर्णस्रुवेण पूर्णाहुतिमाचार्यः कुर्यात् ॥ एधोस्येधिषी
निवस्त्रहोमः ॥ अभ्यादधामीति च्यापुरपंविधाय यज्ञ यज्ञं गच्छेति यज्ञं विसृज्य ॥ देवस्यत्वासवैसप्रसवइत्यादिमंत्रैरभिषि
क्तो यजमानो ब्राह्मणान् ॥ भोजयित्वा स्वयमपि भुंजीतेति ॥ ॥ इति श्रीगीर्वाणयुद्धविक्रमसाहसंगृहे गृह्यानुसारिसंस्का
रप्रकरणं समाप्तम् ॥ ॥ अथ संवत्सरप्रतिवत्सरारम्भतिथिनिर्णयः ॥ तत्र चैत्रशुक्लप्रतिपदि वत्सरारंभः ॥ तत्रौदयीकी
ग्राह्या ॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ॥ शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥ ब्राह्मोक्तोदिनक्षये तु ग्राह्यो वा पूर्वै ३१९
व ॥ तदुक्तं ज्योतिर्निबंधे ॥ चैत्रसितप्रतिपदियो वारोऽर्कोदये स वर्षेशः ॥ उदयद्वितीये पूर्वो नोदयमुभयगलेपि पूर्वस्मात् ॥ य राम ३१९
स्माच्चैत्रसितादेहत्याप्तानो प्रवृत्तिरब्दादेरिति ॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च ॥ पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधै

Nepal Sanskrit University, ...

रिति वृद्धवसिष्ठोक्तेः ॥ चैत्रमासस्य या शुक्ला प्रथमा प्रतिपद्भवेत् ॥ तद्दिने ब्रह्मणः कृत्वा सोपवासस्य पूजनं ॥ संवत्सरमवाप्नोति
सौख्यानि भृगुनन्दनेति विष्णुधर्मोक्तेः प्रथमापूर्वा यदा तु चैत्रे मलमासो भवति तदा दैवकार्य्यस्य तत्र निषिद्धत्वात् शुद्धे मासि संव
त्सरारंभः कार्य इति केचिदाहुः ॥ निष्कर्तुः ॥ शुक्लादेर्मलमासस्य सोन्तं भवति चान्तरे इत्यादिवचनादग्रिमवर्षान्तःपातिम
लमाससारभ्यैव वर्षप्रवृत्तेः शुक्लास्यादाविमलमासे एव कार्य्यमिति वयं प्रतीमः ॥ न च शुक्लास्योदौ चैत्रशुक्लप्रतिपदंतरस्या
भावायुक्तं तन्मध्यस्यैवानुष्ठानं ॥ मलमासे तु शुद्धप्रतिपदंतरस्यासंभवान्शुक्लस्यैव वत्सरारंभो युक्त इति चेत् ॥ भ्रान्तोसि ॥ नहि
प्रतिपदंतरसत्वं प्रयोजकं ॥ द्वे करणायने र्वचक्षणयापत्तेश्च अपि तु वत्सरारंभः ॥ स तु मलमासेपि युक्तं प्राक् ॥ नहि चैत्र
शुक्लादिर्मलमासः पूर्वे वर्षेन्तर्भवतीति ब्रह्मणापि सुवचं ॥ अत्र तैलाभ्यंगो नित्यः ॥ वत्सरादौ वसंतादौ वलिराज्ये तथैव च
तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यते इति वृद्धवसिष्ठोक्तेः ॥ अस्यामेव नववर्षारंभः ॥ तत्र परयुतैव ग्राह्या ॥ अमायुक्ता न कर्त्त
व्या प्रतिपच्चण्डिकार्चने मुहूर्त्तमात्रं कर्त्तव्या द्वितीयादिगुणान्वितेति देवीपुराणात् ॥ तिस्रो ह्येताः पराः प्रोक्तास्तिथयः कुरुन
न्दन कार्त्तिकाश्वयुजोर्मासोश्चैत्रमासि च मारसेति ब्राह्मोक्तेः ॥ पराः पराः परयुता ॥ अत्र प्रपादानमुक्तमपरार्के भविष्ये अतीते
फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे ॥ पुराणेषु हि विप्र कथिते प्रपादानं समारभेद्दिसुयराक्रमा ॥ ततश्चोत्सर्जयेद्विद्वान् मंत्रेणानेन मा
नव ॥ प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ॥ अस्याः प्रदानात्पितरस्तृप्यन्तु हि पितामहाः ॥ अनिवार्यमतो देयं जलमासव

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥३२०॥

त्रष्टयमिति ॥ यथा ॥ प्रपादानं मयाक्ते न विशेषाद्धर्मसीमया ॥ प्रसह्य धर्मघटको वशे संवेष्टितानन ॥ आलयास्य गृहे देवः शीताम
लजलप्रवि ॥ तत्र मंत्रस्वधर्मघटये दत्ते ब्रह्मविष्णुशिवात्मकः ॥ अस्य प्रदानात्सकला मम संतु मनोरथाः ॥ अनेन विधिना यस्तु ध
र्मकुंभं प्रयच्छति ॥ प्रपादानफलं सोऽपि प्राप्नोति ह न संशय इति ॥ चैत्रशुक्लतृतीयायां गौरीमीश्वरसंयुतां संपूज्य दोलान्तवं कुर्यात् ॥
तदुक्तं देवीपुराणे तृतीयायां यजेद्देवीं शंकरेण समन्वितां ॥ कुंकुमागुरुकर्पूरमणिवस्त्रसुगंधकैः ॥ स्रक्गंधधूपदीपैश्च द
मनेन विशेषतः ॥ आंदोलयेत्ततो वत्स शिवोमातुष्टये सदेति ॥ अत्र च तृतीया सुनाद्या मुहूर्तमात्रसत्वेऽपि दिमगौरीव्रतं परे
इति माधवोक्तेः ॥ अत्रैव सौभाग्यशयनव्रतमुक्तं मात्स्ये ॥ वसंतमासमासाद्य तृतीयायां जनप्रिये सौभाग्याय सदा स्त्रीभि ॥
कार्यं पुत्रसुखेप्सुभिरिति ॥ तत्रापि पार्श्व नैव ॥ इयं च मन्वादिरपि ॥ अत्रैव प्रसंगात्सर्वमन्वादितिथिनिर्णय उच्यते तत्राश्वेकादीपि
कायां ॥ तिथ्याग्निनतिथिलिख्या शोकक्रष्णेमोऽनलोग्रहाः ॥ तिथ्यकौ नागशावोब्धो मासि तिथि मन्वादयो मधौ रिति तिथिपूर्णिमा ॥ अ
ग्निस्तृतीया नेति वैशाखेनास्तीत्यर्थः ॥ आशादशमी कृष्णेभः कृष्णाष्टमी ॥ अनलस्तृतीया ॥ ग्रहो नवमी ॥ अर्को द्वादशी ॥ शि
वरूकादशी ॥ अब्धिः सप्तमी ॥ मधौ चैत्रादेरित्येता मन्वादय इत्यर्थः ॥ एताश्च मन्वादयो हेमाद्रिमते शुक्लपक्षस्थाः पौर्वाह्णिका ॥ राम ॥
कृष्णपक्षस्था अपराह्णिका ग्राह्या ॥ पूर्वाह्णे तु सदा ग्राह्या शुक्ला मन्वादयस्तथा ॥ दैवकर्मणि पित्र्ये च कृष्णे चैवापराह्णिका इति ॥३२०॥
गारुडवचनात् ॥ अथो मन्वादियुगादिकर्मतिथयः पूर्वाह्णिकाः स्मृताः सिताः ॥ विज्ञेया अपराह्णिकाश्च बहुले इति दीपिकोक्तेश्च

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

अत्र च श्राद्धमुक्तं मात्स्ये कृतश्राद्धविधानेन मन्वादिषु युगादिषु ॥ हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेदिति मन्वादिश्राद्धं मलमासे सति मासद्वयेपि कार्य्यं ॥ मन्वादिकं नैर्थिकं च कुर्यान् मासद्वयेपि चेति स्मृति ॥ अत्र पिंडरहितं श्राद्धं कुर्यात् ॥ तदुक्तं कालादर्शे ॥ विषुवायनसंक्रान्तिमन्वादिषु युगादिषु ॥ विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेदिति मन्वादिश्राद्धवनित्वं अकरणे प्रायश्चित्तदर्शनात् ॥ तदुक्तं स्मृतिविधाने ॥ त्र्यंबकः प्रतिमंत्रं च शतनवारं जपेत् ॥ मनो दयो यदा नूनाकृत्तैनै चपियः ॥ इति ॥ एवं यत्र प्रायश्चित्तपीसादिदर्शनं तानि सरानवतिश्राद्धानि नित्यानि ॥ तानि तु ॥ अमामनुयुगक्रान्तिपात महालयाः ॥ अन्वष्टकां च पूर्वेद्युः परा नवत्यः प्रकीर्तिता इत्युक्तानि ॥ वकारादष्टकाग्रहणं वै च शुक्लतृतीयेव मत्स्यजयंती अत्रैव प्रसंगाद्दशावतारजयंत्यो निर्णीयन्ते ॥ तत्र गुणासमुच्चये ॥ मत्स्यो भूत्तुतरुद्दिने मधुसिते कूर्मो विधौ माधवे वाराहो गिरिजासुते नभसि यत्तु ते सिते माधवे ॥ सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवरामो गोरितिथौ च राः परमत्रूर्जामो नवम्यां मधो ॥ कृष्णाष्टम्यां नभसि सितिनपरे चाश्विने यद्दशम्यां बुधः कल्की नभसि सप्रभूत्कुत्तच्छ्रांकमेश ॥ अत्र मध्ये वामनो राम रामौ मत्स्यक्रोधश्चापह्वविभागे ॥ कूर्म्म सिंहौ वौध कल्की च साय कृष्णो रात्रौ कालसामेव पूर्वेति ये त्रेजुशुक्लपंचम्यां भगवान् मीनरूपधृक ॥ ज्येष्ठे तु शुक्लद्वादश्यां वामनो हरिः ॥ राधशुक्लतृतीयायां रामो भार्गवरूपधृक ॥ नारसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके ॥ मासि भाद्रपदे शुक्लद्वादश्यां वामनो हरिः ॥ राधशुक्लतृतीयायां रामो भार्गवरूपधृकः ॥ चैत्रशुक्ले

२ कूर्मरूपधरो हरिः ॥ चैत्रकृष्णे नवम्यां च - हरिर्वाराहरूपधृक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३२१

नवम्यां तु रामो दाशरथात्मजः ॥ नभस्ये तु द्वितीयायां बलभद्रो भवद्धरिः ॥ श्रावणे वा कृष्णे अष्टम्यां कृष्णो दुष्टोकरक्षकः ॥ ज्येष्ठे तु शु
क्लद्वितीयायां बौद्धः कल्की भविष्यति ॥ आषाढे शुक्लपक्षे तु एकादश्यां महातिथौ ॥ जयन्ति मत्स्यनाम्नीति तस्यां कार्या शुभोप
रा ॥ नभोमासि तृतीयायां हरिः कमठरूपधृक् ॥ नभस्यशुक्लपंचम्यां वराहस्य जयंतिका ॥ वैशाखे वा चतुर्दश्यां नृसिंहः समप
द्यत ॥ वैशाखे शुक्लपक्षे तु तृतीयायां भृगूद्वहः ॥ मासि भाद्रपदे शुक्ले काद्दश्यां वामनो हरिः ॥ चैत्रे नवम्यां रामो भूत्वा कौशल्या
यां परमात्मा ॥ श्रावणे वा कृष्णे अष्टम्यां वासुदेवो जनार्दनः ॥ पौषशुक्ले तु सप्तम्यां कुर्यात् बौद्धस्य पूजनं ॥ माघशुक्ल तृतीयायां
कल्किमः पूजनहरे ॥ प्रातः शतस्य मध्याह्ने सायं सायं तथा निशि ॥ मध्याह्ने मध्यरात्रिं च मायं शतस्तु क्रमादिति ॥ चैत्रशुक्लपं
चमी कल्यादि ॥ तदुक्तं मत्स्ये ॥ ब्राह्मणो यादितस्यादिः कल्यादिः साधु कीर्तिता ॥ वैशाखस्य तृतीयायां कृष्णायां फाल्गुनस्य च ॥ पं
चमी चैत्रमासस्य तथैवान्या तथापरा ॥ शुक्लात्रयोदशी माघे कार्तिकस्य तु सप्तमी ॥ नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्य
हं ॥ कल्पानामादयो ह्येता दत्तस्याक्षयकारकाः ॥ अत्र सर्वापि निर्णयो मन्वादिवत् ज्ञेयः ॥ हेमाद्रौ ब्राह्मे शुक्लायामथ पंचम्यां
चैत्रे मासि शुभाननां ॥ श्रियम् लोकानमातृष्यं संप्राप्तो केशवात् ज्ञया ॥ ततस्तां पूजयेत्तत्र यस्तल लक्ष्मीनं भवति ॥ चैत्रशुक्लाष्ट राम
म्यां भवान्याउत्पत्तिः ॥ तत्र नवमीयुता ग्राह्या अष्टमी नवमीयुक्ता नवमी वाष्टमीयुतेति ॥ उक्तं चैव तंत्रान्तरे ॥ अत्र भवानी यात्रो ३२१
त्सवा शीघ्रं उभवोनी यस्य पश्येत शुक्लाष्टम्यां मधानरः ॥ न जातु शोकं लभते सदानंदमयो भवेदिति ॥ अत्रैवासोक कलिका

321

१५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्राशनमुक्तं लैंगे ॥ अशोककलिकाश्चाष्टौ ये पिबंति पुनर्वसौ ॥ चैत्रमासि सिताष्टम्यां न ते शोकमवाप्नुयुः ॥ प्राशनमंत्रस्तु ॥ त्वामशोक
वराभीष्टं मधुमाससमुद्भवं ॥ पिबामि शोकसंतप्तो मामशोकं सदा कुर्विति ॥ अत्र विष्णुः ॥ पुनर्वसुबुधोपेता चैत्रमासि सिताष्टमी ॥
प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेत् ॥ तिथितत्त्वे कालिकापुराणे ॥ चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ॥ स्नायाल्लौ
हित्यतोयेषु स याति ब्रह्मणः पदं ॥ चैत्रं तु सकलं मासं शुचिः प्रयतमानसः ॥ लौहित्यतोयैः स्नायात्तु कैवल्यमवाप्नुयात् ॥ लौ
हित्यो ब्रह्मपुत्रः ॥ मंत्रस्तु ॥ ब्रह्मपुत्र महाभाग शंतनोः कुलसंभव ॥ अमोघागर्भसंभूत पापं लौहित्य मे हर ॥ चैत्रशुक्ले नवमी राम
नवमी ॥ तदुक्तमगस्त्यसंहितायां ॥ चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ ॥ उदये गुरुगौरांश्वोः स्वोच्चस्थे ग्रहपंचके ॥ मेषे पू
षणि संप्राप्ते लग्ने कर्कटकाह्वये ॥ आविरासीत्सकलया कौशल्यायां परः पुमान् ॥ तस्मिन्दिने तु कर्तव्यमुपवासव्रतं सदा ॥ तत्र
जागरणं कुर्याद्रघुनाथपरो भुवि ॥ इयं च मध्याह्नयोगिनी ग्राह्या ॥ चैत्रशुद्धे तु नवमी पुनर्वसुयुता यदि ॥ सैव मध्याह्नयोगेन मह
त्पुण्यतमा भवेदिति तत्रैवोक्तेः ॥ तथा ॥ चैत्रे मासि नवम्यां तु जातो रामः स्वयं हरिः ॥ पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा
श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ॥ तथा केवलापि सदोपोष्या नवमी सप्रसंग्रहात् ॥ तस्मात्सर्वात्मना सर्वैः कार्यं
वै नवमीव्रतं ॥ पूर्वेद्युरेव मध्याह्नयोगे कर्मकालव्याप्तेः सैव ग्राह्या ॥ दिनद्वयमध्याह्नव्याप्तौ तदभावे वा पूर्वदिने पुनर्वस्वृक्ष
युक्तामपि त्यक्त्वा परैव कार्या ॥ तदुक्तं माधवीये अगस्त्यसंहितायां ॥ नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ॥ उपोषणं न

राम
३२२

वम्यां च दशम्यां चैव पारणामिति ॥ अष्टमी विद्धा सप्तम्यापि नोपोष्येति माधवः ॥ रामार्चनचन्द्रिकायामपि ॥ विद्धैव वेदस्पृगुक्ता
त्र नं तत्र कथं भवेत् ॥ विद्धानिषेधश्च वशान्नवमी वेति वाकतः ॥ वैष्णवानां विशेषात्तु नत्वविद्धापरैरपि ॥ दशम्यादिषु वृद्धि
श्चेद्विद्धा त्याज्यैव वैष्णवैः ॥ तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितमिति ॥ अत्र दशम्यादिषु वृद्धिश्चेदित्ति तदन्येषामिति च
वदन्यक्षप्राप्तविद्धत्तिनवमीदशमी च क्षयवशात्सूर्योदयात्प्रागेव समाप्यते ॥ तदास्मार्तानां तत्रैव एकादशीनिमित्तोपवा
सात् ॥ नवमीव्रतांगपारणालोपः स्यात् ॥ अतोष्टमीविद्धैव स्मार्तैः कार्या वैष्णवानां त्वरुणोदयविद्धैवोपोष्या इत्यर्थसिद्धं ॥ इदं
च व्रतं संयोगपृथक्त्वन्यायेन काम्यं नित्यं च ॥ तदुक्तं हेमाद्रावगस्त्यसंहितायां ॥ उपोषणं जागरणं पितृनुद्दिश्य तर्पणं ॥ त
स्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्तिमनीषिभिः ॥ सर्वेषामप्ययं धर्मो भुक्तिमुक्त्यैकसाधनः ॥ अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्त
मं ॥ पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव च ॥ यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः ॥ कुंभीपाकेषु घोरेषु पच्यते ना
त्र संशयः ॥ ॥ तथा ॥ अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमं ॥ व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् ॥ प्राप्ते श्रीरामनव
मीदिने मर्त्यो विमूढधीः ॥ उपोषणं न कुरुते कुंभीपाकेषु पच्यते ॥ अत्र केचित्तदुपासकानामेवेदं व्रतं नित्यं नत्वन्येषामित्याहुः
अनेन वाकरणे दोषश्रवणात्स्मात्सर्वात्मना सर्वैरेव कार्यं चैतन्नवमीव्रतमिति पूर्वोक्तवचनाच्च जन्माष्टम्यादिवदिदमपि सर्वे
षां नित्यं ॥ अन्यथा जन्माष्टम्यादावपि तदुपासकानामेव नित्यतां वक्तुः को वारयितेत्याहुः ॥ ॥ अत्र विशेषोऽगस्त्यसंहितायां

राम
३२२

322

१५

CC-0. In Public Domain. Digitization by eGangotri

आचार्यं चैव संपूज्य ह्यशक्यात्वार्थयं निशि॥ श्रीरामप्रतिमादानं करिष्ये हं द्विजोत्तम॥ भक्त्याचार्यो भवप्रीतः श्रीरामोस्मि त्वमेव च॥ ॥
तथा॥ स्वगृहे चोत्तरे देशे दानस्योज्वलमंडपं॥ शंखचक्रमत्स्यहस्तैः द्वारे समलंकृतं॥ गरुडमच्छाङ्कचापौश्च दक्षिणे समलंकृतं॥ गदा
खड्गदण्डैश्चैव पश्चिमे सुविभूषितां॥ पद्मस्वस्तिकनीलैश्च कौबेरे समलंकृतं॥ मध्ये हस्तचतुष्काढ्यवेदिकायुक्तमायतं॥ ततः संक
ल्पयेद्देवं राममेव स्मरन्सुते॥ अस्यां रामनवम्यां च राममाराधनतत्पर॥ उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि॥ इमां स्वर्णमयीं
रामप्रतिमां च प्रयत्नतः॥ श्रीरामप्रीतये दास्ये रामभक्ताय धीमते॥ प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे॥ अनेकजन्मसंसि
द्धान्यभ्यस्तानि महान्ति च॥ ततः स्वर्णमयीं रामप्रतिमां पल — मानतः॥ निर्मितां द्विभुजां दिव्यां वामांकस्थितजानकीं॥ बिभ्रतीं दक्षि
णाकरे ज्ञानमुद्रां महाद्भुते॥ वामेनाधः करेणाराद्देवीमालिंग्य संस्थितां॥ सिंहासने राजते च पलद्वयविनिर्मितं॥ ॥ तथा॥ अ
शक्तोपि महाभागः स्ववित्तानुसारतः॥ पलेनार्द्धेन तदर्द्धार्द्धेन तदर्द्धार्द्धेन वा पुनः॥ सौवर्णां राजतं वापि कारयेद्रघुनंदनं॥ पार्श्वे
भरतशत्रुघ्नौ तालहस्तकराउभौ॥ चापद्वयसमायुक्तं लक्ष्मणं वापि कारयेत्॥ दक्षिणांगे दशरथं पुत्रावेक्षणतत्परं॥ मातुरंक
गतं राममिंद्रनीलसमप्रभं॥ पंचामृतस्नानपूर्वं संपूज्य विधिवत्ततः कौशल्यामंत्रसु॥ रामस्य जननी चासि राम रूपमिदं जगत्
अतस्त्वां पूजयिष्यामि लोकमातर्नमोस्तु ते॥ नमो दशरथायेति पूजयेत्पितरं ततः॥ अत्र दशावरणा पंचावरणादिपूजान्यत्र
ज्ञेया॥ कुशोककुसुमैर्युक्तमर्घ्यं दद्याद्विचक्षणः॥ दशाननवधार्थाय धर्मसंस्थापनाय च॥ राक्षसानां विनाशाय दैत्यानां नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनायच॥ परित्राणाय साधूनां जातो रामः स्वयं हरिः॥ गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ॥ पुष्पांजलिं तु नैवेद्यं दत्त्वा यामे यामे प्र
पूजयेत्॥ पिदैवं विधिवत्कृत्वा रात्रौ जागरणं ततः॥ ततः प्रभाते उत्थाय स्नानसंध्यादिकाः क्रियाः॥ समाप्य विधिवद्रामं पूज
येद्विधिवन्मुने॥ ततो होमं प्रकुर्वीत मूलमंत्रेण मंत्रवित्॥ पूर्वोक्तपद्मकुंडे वा स्थंडिले वा समाहितः॥ लौकिकाग्नौ विधानेन अष्ट
तमष्टोत्तरशतं॥ साज्येन पायसेनैव स्मरन्रामं मनन्यधीः॥ ततो भक्त्या सुसंतोष्य आचार्यं पूजयेन्मुने॥ ततो रामं स्मरन्नुद्द
श्यादेव मंत्रमुदीरयेत्॥ इमां स्वर्णमयीं राम प्रतिमां समलंकृतां॥ चित्रवस्त्रयुगच्छन्नां रामो हं राघवाय ते॥ श्रीरामप्रीतये
दास्ये तुष्टो भवतु राघवः॥ इति दत्त्वा विधानेन दद्याद्वै दक्षिणां ध्रुवं॥ ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशय इति॥ इयं मल
मासे न कार्या॥ ऋजव्रमयं स्यान्नोजयं स्यान्नोपवासः कृतो भवेदिति॥ न कुर्यान्मलमासे तु महादानव्रतानि चेति च॥ साध
वीयसंग्रहवचनात्॥ न तु रामनवमीव्रतस्य नित्यत्वादेकादशीवन्मलमासेऽपि कर्तव्यता स्यादिति वाच्यं॥ सन्मस्॥ नैकादश्युपवा
सस्य व्रतत्वेन प्राप्तिः किंतु एकादश्यां न भुंजीत पक्षयोरुभयोरपीत्यादिनिषेधस्य मलमासेऽपि पालनीयत्वात्॥ कृष्णैकादश्यां
पुत्रवद्गृहीणा इत्यथान्ययुपवासः प्रसज्यते॥ न चेह तथेति व्रतत्वेन प्राप्तिर्वाच्या॥ सा च निषिद्धेत्यप्रसंगः॥ स्पष्टं मासवि
शेषाख्याविहितं वर्जयेन्मले इति निषेधाच्च॥ एवं जन्माष्टम्यादावपि बोध्यं॥ ॥अथ रामनवमीव्रतप्रयोगः॥ चैत्रशुक्लै
कादश्यां दोलोत्सव उक्तो ब्राह्मे॥ चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवीः॥ आंदोलनीयो देवेशः सलक्ष्मीको महोत्सवैरिति

323

१५८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चैत्रशुक्लद्वादश्यां दमनोत्सवः॥ द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः। बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति रामार्च्चनचं-
द्रिकोक्तः॥ उर्ज्जे व्रतं मधौ दोलां श्रावणे तंतुपूजनं॥ चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः इति पद्मपुराणवचनाच्च॥ शिवभक्तादिविष्णु-
वत् द्वादश्यादौ कार्य्यं॥ तत्र स्वस्वाभिमततिथिषु वस्यादेर्दमनार्पणमिति॥ तच्चोक्तं तिथयस्तु॥ वह्निर्विरिञ्च्यो गिरिजागणेशः फ-
णी विशाखो दिनकृन्महेशः॥ दुर्गान्तको विष्णुहरिस्मरश्च शर्वः शशी चेति पुराणदृष्टा इत्युक्ताः॥ अथागमोक्तदीक्षावतो दमना-
रोपणविधिः॥ ॥ ~~रामार्चनचंद्रिकोक्ते~~॥ तत्रैकादश्यां क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो॥ न मे विघ्नो भवेत्तत्र कुरु ना-
थ दयां मयि॥ सर्वथा सर्वदा विघ्नो मम त्वं परमा गतिः॥ उपवासेन त्वां देव तोषयामि जगत्पते॥ कामक्रोधादयो येन न मे स्युः प्र-
तिघातन –॥ अद्यप्रभृति देवेश यावद्वैशेषिकं दिनं॥ तावद्रक्षा त्वया कार्या सर्वस्मात् जगत्पते इति देवं संप्रार्थ्य दमनमादाय
पंचगव्येन प्रोक्ष्य॥ वारिणा प्रक्षाल्याशोकमूले देवाग्रे वा अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन॥ शोकार्त्तिं हर मे नित्यं मानं-
दं जनयस्व मे॥ इत्यशोकं॥ त्र्यादिकालपर्यन्तः कालरूपो महाबल॥ कलनं चैव यः सर्वं तस्मै कालात्मने नम इति कालं॥ व-
संताय नमस्तुभ्यं वृक्षगुल्मलताश्रय॥ सहस्रमुखसंवास कामरूपो नमोस्तु ते इति दमनं च संपूज्य॥ नमोस्तुवाणाय जगदाह्ला-
दकारिणे॥ मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते इति मदनमुपस्थाय ओं कामाय नमः इति संपूज्य निशायां देवाग्रे पंचवर्णैः
श्चंदनेन वाष्टदलं कृत्वा बहिश्चतुरस्रं तद्बहिर्वर्तुलत्रयं तद्बहिश्चतुरस्रं च कृत्वा तत्र कुंभं स्थाप्योपरि दमनं पूजयित्वा॥ पूजा

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥ र्थं देवदेवस्य विष्णो लक्ष्मीपतेः प्रभो॥ दमनत्वमिहागच्छ सान्निध्यं कुरु ते नमः॥ ॐ कामदेवाय नमः॥ ॐ ह्रीं रत्यै नमः॥ इत्यावाह्य
॥३२४॥ दिक्षु पूर्वादितः॥ स्मरशरीराय नमः॥ अनङ्गाय नमः॥ मन्मथाय नमः॥ कामाय नमः॥ क्लीं वसन्तसखाय नमः॥ स्मराय नमः
इक्षुचापाय नमः॥ पुष्पास्त्राय नमः इति पूजयित्वा ओं तन्नस्वरूपाय विद्महे कामदेवाय धीमहि॥ तन्नो नगः प्रचोदयात् इत्यष्टो
त्तरशतं संमन्त्र्य पूजयित्वाङ्गीनम इति पुष्पाञ्जलिं दत्वा॥ नमोस्तु पुष्पबाणाय जगदाह्लादकारिणे॥ मन्मथाय जगन्नेत्रे रतिप्री
तिप्रियाय नमः इति नत्वा॥ आमन्त्रितोसि देवेश पुराणपुरुषोत्तम॥ प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव॥ क्षीरोदधि
महानागशय्यावस्थितविग्रह॥ प्रातस्त्वां पूजयिष्यामि संनिधौ भव ते नमः॥ विवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम्॥ सर्व
था सर्वदा विष्णो नमस्तेस्तु प्रसीद मे॥ इति देवं संप्रार्थ्य पुष्पाञ्जलिं दत्वा अस्त्रेण वक्रं मन्त्रेण वा रक्षणं कुर्यात्॥ ततः प्रातर्नित्य 324
पूजां कृत्वा पुर्ववं संपूज्य सर्वाङ्गे धाक्षनयुक्तं दमनमादाय मूलमन्त्रं पठित्वा देवदेव जगन्नाथ वाञ्छितार्थप्रदायक॥ ततः प्रातर्नि
त्यपूजां कृत्वा हृदि स्थान् यकामान् मम कामेश्वरी प्रिया॥ इदं दमनकं देव गृहाणात्म मनुग्रहात्॥ इमां सांवत्सरीं पूजां भगवन् परिपू
रय॥ इति मन्त्रात्तेन मूलमन्त्रेण देवस्य समर्पयेत्॥ ततोऽङ्गदेवताः स्वस्वमन्त्रेण दत्वार्थयेत्॥ मणिविद्रुममालाभिर्मन्दारकुसु ॥ राम ॥
माद्दिभिः॥ इयं सांवत्सरी पूजा तवास्तु गरुडध्वज॥ वनमाला यथा विष्णो कौस्तुभं सततं हृदि॥ तद्वद्दमनकीं मालां पूजां च हृदये ॥३२४॥
वह॥ जानताजानता वापि कृतं पयज्ञ बार्चनं॥ तत्सर्वं पूर्णतां यातु त्वत्प्रसादात् रमापते॥ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन

१५८/२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नमस्तेस्तु हृषीकेश मत्पुरुषपूर्वजं ॥ मंत्रहीनमितिव संपूर्णार्थं पंचोपचारैस्ततः संपूज्य नीराज्य पारयेदिति ॥ दीक्षारहितानां
तु नाम्नैव समर्पणं ॥ अथ द्वादशीमंतं त्रिकृत्य पारणाहे ग्राह्य ॥ पारणाहे मलभ्येन द्वादशी घटिकापि वेत् ॥ न दात्रयोदशी
ग्राह्या पवित्रदमनार्पणा ॥ इति मंत्रे वोक्तेः इदं च मलमासेन कार्य्यं ॥ उपाकर्मोत्सर्जनं च पवित्रदमनार्पणामितिकाला दर्शे
मलमासवर्ज्येषु परिगणनात् ॥ उपाकर्म च हव्यं च कव्यपर्वान्तं च तथा ॥ उत्तरेनियतं कुर्यात् पूर्वे नान्निः फलं भवेन्निमाधवी
ये प्रजापतिवचनाच्च ॥ शुक्लास्तादो न कार्य्यमेव पूर्वोक्तवचनात् ॥ उपाकर्मोत्सर्जनं च पवित्रदमनार्पणं ॥ ईशानस्य बलिर्वि
ष्णोः शयनं परिवर्तनं ॥ कुर्यात्कुक्कुरस्य वत्सरोमाघेपीति विधिश्च यद् इति ज्योतिर्निबंधे वृद्धगार्ग्यवचनाच्च ॥ ॥ ~~इतिदमनार्प~~
परां ॥ चैत्रशुक्लत्रयोदश्यां मदनं गत्रतं हेमाद्रौ भविष्ये ॥ चैत्रोत्सवे सफललोकमनोनिवासे कामं त्रयोदशतिथौ च वसंतयु
क्तं ॥ पत्न्या महार्घपुरुषप्रवरोपि योपि सौभाग्यरूपसुतसौख्ययुतः सदास्यात् ॥ तत्र सा पूर्वा ग्राह्या ॥ त्रयोदशी तिथि पूर्वः सि
त इति दीपिकोक्तेः ॥ चैत्रशुक्लचतुर्दशी पूर्वा ग्राह्या ॥ मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी ॥ सा रात्रिव्यापिनी ग्राह्या नान्या
शुक्ला कदाचनेति ॥ बौधायनोक्तेः ॥ परा पूर्वाह्णगामिनीति वा पाठः ॥ चैत्रपूर्णिमासामान्यनिर्णयात् परैव ॥ अत्र विशेषो नि
र्णयामृते विष्णुस्मृतौ ॥ चैत्रीं चित्रायुतां वेत्स्यान्नस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोतीति तथा ब्रह्मे कलनरो ॥ मदेवार्के गु
रौ वापि वारेष्वेतेषु चैत्रिका ॥ तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्लभेदिति ॥ अत्र सर्वदेवानां दमनपूजोक्ता वायवीये ॥ सं

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ २२५ ॥

वत्सरकृता गीर्वाणा मा कल्पायाखिला स्मृता इति ॥ दमनेनार्च्चयच्चैत्र्यां विशेषेण सदाशिवमिति ॥ ॥ इयं मन्वादिरपि ॥ चैत्रकृ
ष्णत्रयोदश्यां महावारुणीसंज्ञको ॥ योगो गौडेषु प्रसिद्धस्तदुक्तं वाचस्पतिः ॥ कृतो मूलपाशी वस्त्रं देवा वारुणेन समायुक्ता म
धौ कृष्णत्रयोदशी ॥ गंगायां यदि लभ्येत कोटिसूर्यग्रहैः समा ॥ शुभयोगसमायुक्ता शनौ शतभिषा यदि ॥ महामहेति विख्या
ता त्रिकोटिकुलमुद्धरेत् ॥ ॥ तत्रैव ज्योतिषे ॥ चैत्रासिते वारुणऋक्षयुक्ता शनौ शतभिषा यदि ॥ महामहेति विख्याता त्रिको
टिकुलमुद्धरेत् ॥ योगे शुभे सा महती महत्यां गंगाजले कोटिग्रहकोटितुल्येति ॥ त्रिस्थलीसेतौ ॥ तुल्यपुराणेपि ॥ वारुणेन स
मायुक्ता मधौ कृष्णत्रयोदशी ॥ गंगायां यदि लभ्येत शतसूर्यग्रहैः समेति ॥ ॥ कल्पतरौ ब्राह्मे ॥ मधौ कृष्णत्रयोदश्यां श
नैश्शतभिषायुते ॥ वारुणीति समाख्याता शुभे तु महती स्मृता ॥ चैत्रकृष्णचतुर्द्दश्यां ॥ ॥ पुलस्त्यः ॥ चैत्रे कृष्णे चतुर्द्दश्यां पंच
स्नायाच्छिवसन्निधौ ॥ न प्रेतत्वमवाप्नोति गंगायां तु विशेषत इति ॥ अत्र पूर्वा ग्राह्या कृष्णपक्षस्थत्वात् ॥ ॥ इति श्रीगीर्वा
णयुद्धविक्रमसाहदेवकिरमने कालनिर्णये चैत्रमासः ॥ ॥ श्रीमहाराजगीर्वाणयुद्धविक्रमवर्म्मणा ॥ कृता रत्नावली
तत्र गतश्चैत्रस्य निर्णय ॥ ॥ मेषसंक्रमे प्रागपरा दश घटिकाः पुण्यकाल ॥ रात्रौ तु प्रागुक्तं ॥ अत्र धर्मघटादिदानमुक्तं
पृथ्वीचंद्रोदये पाद्मे ॥ तीर्थे वा तु दिनं स्नानं तिलैश्च पितृतर्प्पणं ॥ दानधर्मघटादीनां मधुसूदनपूजनं ॥ माधवे मासि कुर्वी
त मधुसूदनतुष्टिदं ॥ ॥ अथ वैशाखस्नान ॥ तत्र विष्णुस्मृतिपद्मयोः ॥ तुलामकरमेषेषु प्रातःस्नानं विधीयते ॥ हविष्यं ब्र

॥ राम ॥
॥ २२५ ॥

325

१८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वमेव महापातकनाशनमिति सौरमासउक्तः॥ अथान्यक्षद्वयमुक्तं पाद्मे॥ मधुमासस्य शुक्लायामेकादश्यामुपोषितः॥ पं
चदश्यां वमोदीरमेषसंक्रमणेऽथवा॥ वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया॥ मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकम्॥
तत्र मंत्रः॥ वैशाखसकलं मासं मेषसंक्रमणोरवेः॥ प्रातः सनियमं स्नास्ये प्रीयतां मधुसूदनः॥ मधुहन्तुः प्रसादेन ब्राह्मणा
नामनुग्रहात्॥ निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहं॥ माधवे मेषगे भानौ मुरारे मधुसूदनः॥ प्रातःस्नानेन मे नाथ फल
दो भव पापहन्निति॥ ॥तीर्थविशेषोपि तत्रैवोक्तः॥ मेषसंक्रमणे भानौ माधवे मासि यत्नतः॥ महानद्यां नदीतीर्थे नदे सर
सि निर्झरे॥ देवखाते थवा स्नायाद्यथाप्राप्ते जलाशये॥ दीर्घिकाकूपवापीषु नियतात्मा हरिं स्मरन्निति॥ संकल्पे च नतीर्थमि
दमित्विति॥ तीर्थस्य देवता विष्णुः सर्वत्रापि न संशयः॥ इति तत्रैवोक्तेः॥ तथा सोपि विशेषस्तत्रैव पाद्मे॥ तुलसीकृष्णगौराख्या
तयाभ्यर्च्य मधुद्विषं॥ विशेषेणात्तु वैशाखे नरो नारायणो भवेत्॥ माधवं सकलं मासं तुलस्या योर्चयेन्नरः॥ त्रिसंध्यं मधुहंतारं
नास्ति तस्य पुनर्भवः॥ ॥तथा प्रातः स्नात्वा विधानेन माधवे माधवप्रियां॥ योश्वत्थमूलमासिंचेत्तोयेन बहुना सदा॥ कुर्यात्प्र
दक्षिणां तं तु सर्वदेवमयं ततः॥ पितृदेवमनुष्यांश्च तर्पयेत्सचराचरं॥ योश्वत्थमर्चयेदेवमुदकेन समन्ततः॥ कुलानामयु
तं तेन तारितं स्यान्न संशयः॥ कंडूयस्पृष्टतो गां तु स्नात्वापिप्पलतर्पणं॥ कृत्वा गोविंदमभ्यर्च्य न दुर्गतिमवाप्नुयात्॥ ॥त
था॥ एकभक्तमथो नक्तमयाचितमतंद्रितः॥ माधवे मासि यः कुर्यात्स भवेत्सर्वमीप्सितं॥ वैशाखे विधिना स्नानं देवनद्यादिके च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि ॥ हविषां ब्रह्मचर्य्यं च भूशय्यां नियत स्थितिः ॥ व्रतं दानं दयो देवि मधुसूदनपूजनं ॥ अपि जन्मसहस्रोत्थं पापं दहति दा
रुणं ॥ ॥ मदनरत्ने स्कान्दे ॥ प्रपा कार्या च वैशाखे देवे देया गलंतिका ॥ उपानह्यजनच्छत्रसूक्ष्मवासांसि चंदनं ॥ जल
पात्राणि देयानि तथा पुष्पगृहाणि च ॥ पानकानि विचित्राणि द्राक्षा रंभाफलान्यपि ॥ निर्णयामृते ॥ ददाति यो हि मेषादौ स
क्तूनंबुघटान्वितान् ॥ पितृनुद्दिश्य विप्रेभ्यः सर्वपापैः प्रमुच्यते ॥ ॥ तथा ॥ वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने ॥ द
दाति सुरराजेन्द्र स याति परमां गतिं ॥ एवं संपूर्णस्नानाशक्तो त्र्यहं स्नायात् ॥ ॥ तदुक्तं तत्रैव पाद्मे ॥ त्रयोदश्यां चतुर्दश्यां वै
शाख्यां वा दिनत्रयम् ॥ अपि सम्यग्विधानेन नारी वा पुरुषोपि वा ॥ प्रातः स्नातः सनियमः सर्वपापैः प्रमुच्यते इति ॥ यदा
तु वैशाखो मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधान्मासद्वयं स्नानं तन्नियमाश्च कर्तव्या ॥ मासोपवासो चान्द्रा
यणादिकं मलमासे एव समापयेत् ॥ ॥ तदुक्तं दीपिकायां ॥ नियतविशेषादि न त्वाकुंभे सास्यारभ्य समापयेत् मलिन मा
सोपवासव्रतमिति ॥ अत्र दानविशेषः उक्तो पुराणे वामनपुराणे ॥ गंधाश्च माल्यानि तथा वैशाखे सुरभीणि च ॥ देयानि
द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥ एवं स्नाने कृते तन्मोद्यापनं कार्य्यं ॥ तदुक्तं तत्रैव ॥ मासमेकं बहिः स्नात्वा तथादौ विम
ले जले ॥ एकादश्यां च द्वादश्यां पौर्णमास्यामथापि वा ॥ उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः ॥ मंडपं कारयेद्दिव्यं कलशं
जयदासने बुधः ॥ भूषयोद्बंदनैः पुष्पैर्दीपनैवेद्यसंचये ॥ एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत् ॥ श्वोभूते कृते मेत्रोन्यथग्रह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेयोग्रहन्नयनेन ॥ होमंकुर्यात्प्रयत्नेन यायसे नविचक्षणाः ॥ तिलाज्येन यवैर्वापि समृद्धौ वापि स्वशक्तितः ॥ अष्टोत्तरसहस्रं वा शतमष्टो-
त्तरं तु वा ॥ प्रतद्विस्तरेनैवदद्दंविस्तरेन वा ॥ व्रतसंपूर्त्तिसिद्ध्यर्थं धेनुमेकां पयस्विनीं ॥ पादुकोपानहौ छत्रं गुरवे व्यजनं तथा ॥
शय्यां सोपस्करां दद्याद्दीपिकीदर्पणं तथा ॥ ब्राह्मणान्भोजयेत्रिंशत्तेभ्यो दद्याच्च दक्षिणां ॥ कलशान्नजलसंपूर्णांस्तेभ्यो दद्याद्यथावि-
त्तथा ॥ एवं कृते माधवस्य उद्यापनं विधौ शुभे ॥ फलमाप्नोति सकलं विस्नुसायुज्यमाप्नुयात् ॥ एतावन्मात्रशक्तौ नचैवोक्ते ॥ वैशाख्यां
विधिवत्स्नात्वा भोजयेद्ब्राह्मणान्दश ॥ कृशरं सर्वपापेभ्यो मुच्यते नात्र संशय इति ॥ वैशाखशुक्लतृतीयाअक्षय्यतृतीयोच्यते
सा पूर्वाह्णव्यापिनी ग्राह्या ॥ दिनद्वयेपि तद्व्याप्तौ परैव ॥ ॥ ~~मत्स्यपुराणे नारदीये~~ ॥ वैशाखे शुक्लपक्षे तु तृतीयां रोहिणीयुता ॥ दुर्लभा
बुधवारेण सोमेनापि युता तथा ॥ रोहिणीबुधसंयुक्तापि पूर्वविद्धा विवर्जिता ॥ भक्त्या कृतापि मोधाता:पुण्यं हंति पुराकृतं ॥ गो-
रीविनायकोपेता रोहिणीबुधसंयुता ॥ विनापि रोहिणीयोगात्पुण्यकोटिप्रदा सदेति ॥ ~~इयं युगादिरपि~~ ॥ ॥ सा चोक्ता र-
क्तमालायां ॥ माघे पंचदशी कृष्णा नभस्ये च त्रयोदशी ॥ तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः ॥ इति विष्णुपुराणे चकारे-
णात मिस्रपक्षात्तु येमः ॥ अत्र श्राद्धमुक्तं मात्स्ये ॥ कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ॥ हायनानि द्विसाहस्रं पितॄणां तृप्ति-
दं भवेदिति ॥ ॥ ~~भारतेपि~~ ॥ या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः ॥ स्नात्वा हुत्वा च दत्त्वा च जप्त्वानंतफलं लभेदिति ॥ आ-
द्येपि पूर्वाह्णव्यापिनी ग्राह्या ॥ पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः ॥ दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिका इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राम
३२८

ग्रासोन्के॥ द्वेशुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः॥ शुक्ले पौर्वाह्लिके ग्राह्ये कृष्णे चैवापराह्लिके इति॥ ॥नारदीयवचनाच
दीपिकापि॥ अथो मन्वादियुगादि कर्म तिथयः पूर्वाह्लिकाः स्मृताः॥ विज्ञेया अपराह्लिकाश्च बहुले इति॥ ॥स्मृत्यर्थसा
रेपि॥ युगादिमन्वादिश्राद्धे शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या॥ कृष्णपक्षे पराह्लव्यापिनीति॥ ॥अत्र विशेषो हेमाद्रौ
भविष्ये॥ वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च॥ गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः॥ तस्यां कार्यो यवैर्होमो यवै
र्विष्णुं समर्चयेत्॥ यवान् दद्याद् द्विजातिभ्यः प्रयतः प्राशयेद्वा इति॥ अत्र दानविशेषस्तत्रैव भविष्ये॥ इमां प्रकम्प्य॥ उ
दकुंभान् सकनकान् सान्नान् सर्वरसैः सह॥ यवगोधूमचणकान् सक्तु दध्योदनं तथा॥ ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते इ
ति॥ देवीपुराणे॥ तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूज्य तु॥ उदकुंभप्रदानेन शिवलोके महीयते॥ ॥मंत्रस्तु॥ एष धर्मघ
टो दत्तो ब्रह्मविष्णुशिवात्मकः॥ अस्य प्रदानात् तृप्यंतु पितरोपि पितामहाः॥ गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं॥ पितृभ्यः
संप्रदास्यामि अक्षय्यमुपतिष्ठतु इति॥ ॥अत्र च पिंडरहितं श्राद्धं कुर्यात्॥ अनयच्छिन्तये श्राद्धं विष्णुवह्नितये तथा॥ युगा
दिषु च सर्वासु पिंडनिर्वपणाद् ऋते इति॥ ॥मत्स्यवचनात्॥ अत्र रात्रिभोजने प्रायश्चित्तं स्मृतिविधाने॥ रात्रौ भुंक्ते च यस्त्वेतु मन्वा ३२७
दिषु युगादिषु॥ अभिस्वबृहस्थिमंत्रं च जपेत्॥ अज्ञानपातकमिति॥ अपरार्के यमः॥ कृतोपवासाः सलिलं ये युगादिदिने भव राम ३२८
दात्यन्नाद्यादि सहितं तेषां लोका महोदयाः इति॥ वैशाखे मलमासे तु तत्रैव युगादिः कार्या॥ ॥तथा च ऋष्यशृंगः॥ दशहरा तु

६६२

नोत्कर्षश्चतुर्थ्यपि युगादिषु ॥ उपाकर्मणि चोत्सर्गे ह्येतद्दिनस्पृष्टादि न इति ॥ एतद्दशहरादिकं वृषादिसंक्रमे ह्येव ॥ कन्यावृश्चि
षे रवावित्यादिना सौरमासोक्तेरित्यर्थः ॥ ॥कालादर्शेपि॥ अब्दोदकुंभमन्वादिमहालययुगादिषु स्थितिर्मलमासकर्त्तव्येषु प
रिगणनाच्च ॥ महालयशब्देन मघात्रयोदश्यपरपक्षश्च इति माधवः ॥ ॥स्मृतिचंद्रिकायां तु मासद्वयकर्तव्यमित्युक्तं ॥ योगा
दिकं मासिकं च श्राद्धं चापरपाक्षिकं ॥ मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि चेति ॥ अपरपक्षः कृष्णपक्षः नतु महालय
स्य तत्र निषेधात् ॥ ॥मदनरत्नेपि मरीचिः ॥ प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरं ॥ मन्वादौ च युगादौ च तन्मासे उभयो
रपीति ॥ प्रतिवत्सरक्रियमाणं कल्पादिश्राद्धमिति स एव व्याचष्टे ॥ ॥अत्र श्राद्धकरणे प्रायश्चित्तमुक्तमृग्विधाने ॥ नयस्य
याचामेत्त्रं च शतवारं तदा जपेत् ॥ युगादयो यदा मूढाः कुरुते नैव चापि य इति ॥ ॥अत्र समुद्रेत्वानंतरसत्तं ॥ नतूक्तं सौरपु
राणे ॥ युगादौ तु वरस्नात्वा विधिवल्लवणोदधौ ॥ गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं हि यत् ॥ तत्फलं लभते मर्त्यो भूमिदानस्य
वधू च वमिति ॥ अयं निर्णयः सर्वयुगादिषु बोध्यः ॥ ॥इति युगादिनिर्णयः ॥ ॥इयमेव तृतीया परशुरामजयंती ॥ सा प्रदो
षव्यापिनी ग्राह्या ॥ ॥तदुक्तं स्कान्दभविष्ययोः ॥ वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ ॥ निशायाः प्रथमे यामे रामाख्यः सम
ये हरिः ॥ स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते ॥ रेणुकायास्तु यो गर्भादवतीर्णो हरिः स्वयमिति ॥ दिनद्वये तद्व्याप्तावंशत
समव्याप्तौ च परा ॥ अन्यथा पूर्वैव तदुक्तं भविष्ये ॥ शुक्लातृतीया वैशाखे शुद्धोप्यादिनद्वये ॥ निशायां पूर्वयामे चेद्धत्तरा तु

CC-0. In Public Domain. Digitization by eGangotri

रत्न त्यत्र पूर्वकोति॥ वैशाखशुक्लशप्तम्यां गंगोत्पत्तिः॥ ॥तदुक्तं ब्राह्मे॥ वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा॥ क्रोधात्पीता पुनन
३२८ स्त्यक्ता कर्णरंध्रात्तु दक्षिणात्॥ तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति॥ अत्र शिष्टाचारात् मध्याह्नव्यापिनी ग्राह्या॥ दिनद्व
येतद्व्याप्तावव्याप्तावेकदेशव्याप्तौ वा पूर्वा॥ युग्मवाक्यात्॥ करभेरायुक्ता तिथिर्व्यतिपातनदीतीह योग॥ अस्मिंस्तु गोभूहिरण्य
वस्त्रदानेन सर्वं परिहापयाप्यं॥ पाशाभिधाना वैशाखशुक्लद्वादश्यां योगविशेषो ज्योतिःशास्त्रे॥ पंचाननस्थोत्र गुरुस्मिंप्रच्ये
मेषे रविः स्याद्यदि शुक्लपक्षे॥ सुरत्वमिंद्रत्वममनामयत्वं मर्त्योपि निर्लभते मनुष्य इति॥ पंचाननः सिंहः॥ पाशाभिधाना
तिथिर्द्वादशी॥ करभो हस्तः॥ वैशाखशुक्लचतुर्दशी नृसिंहजयंती॥ साप्रदोषव्यापिनि ग्राह्या॥ तदुक्तं नृसिंहपुराणे॥ वैशा
खशुक्लपक्षे तु चतुर्दश्यां निशामुखे॥ मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं॥ वर्षे वर्षे तु कर्त्तव्यं मम संतुष्टिकारणमिति॥ दि
नद्वयेपि तद्व्याप्तावव्याप्तौ तु समव्याप्तौ च परा॥ विषमव्याप्तौ त्वधिकव्याप्तिमती॥ दिनद्वये व्याप्तौ परा॥ परदिने गौणकालव्या
प्तेः सत्वात् पूर्वदिने च तदभावात्॥ यत्तु तन्नो मध्याह्नवेलायां नद्यादौ विमले शुभपंकमपरिधाय ततो वासोत्र तत्कर्म समार
भेदिति तत्रैवोक्तं तत्संकल्परूपव्रतोपक्रमविषयं॥ न त्वेतावता मध्याह्नव्यापिनी ग्राह्येति भ्रमितव्यं॥ पूर्वोक्तवचनविरोधात् राम
वैशाखस्य चतुर्दश्यां सोमवारेनिलर्क्षके॥ अवतारो नृसिंहस्य प्रदोषसमये द्विजा इति॥ ~~स्कान्दात्~~ ॥ कर्मसिंहो वोधकल्कीवसा ३२८
यमिति पूर्वोक्तं पुराणसमुच्चयवचनात्॥ इयमेव योगविशेषेणातिप्रशस्ता॥ तदुक्तं तत्रैव स्वातिनक्षत्रयोगे च शनिवारे तु म

328

१६३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददृत्तं ॥ सिद्धियोगस्य संयोगे वणिजे करणे तथा ॥ पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः ॥ ॥ तथा ॥ स्वातियोगैर्विनापि स्या
न्मद्दिनं पापनाशनं ॥ ॥ तथा सर्वेषामेव वर्णानामधिकारोऽस्ति मद्व्रते ॥ मद्भक्तैस्तु विशेषेण कर्त्तव्यं मत्परायणैः ॥ ॥ तथा
सिंहः स्वर्णमयो देवो मम संतोषकारकः ॥ ॥ तथा ॥ विज्ञाय मद्दिनं यस्तु लंघयेत्पापकृन्नरः ॥ स याति नरकं घोरं यावच्चंद्र
दिवाकरौ ॥ इदंव्रतसंयोगप्रयत्नेनाद्येन नित्यं काम्यं च अथात्र विशेषः ॥ मध्याह्ने तिलामलकस्नानं कृत्वा ॥ नृसिंह देव देवेश
तव जन्मदिने शुभे ॥ उपवासं करिष्यामि सर्वभोगविवर्जितः इति ॥ संकल्पं कृत्वा चार्घ्यं कृत्वा सायंकाले ॥ हेमीं तु तत्र तन्मूर्त्ति
स्थाप्यालभ्यास्तथैव च ॥ पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः ॥ यथाशक्ति तथा कुर्याद्वित्तशाठ्यविवर्जितः ॥ इत्युक्त्वा नृसिंहमू
र्त्तिं शक्त्या कृत्वा तं सुवर्णसिंहं च कलशोपरि संपूज्य रात्रौ जागरणं कृत्वा प्रातः पुनः संपूज्य ॥ नृसिंहाच्युत देवेश लक्ष्मीकांत जगत्प
ते ॥ अनेनार्घ्यप्रदानेन सफलाः स्युर्मनोरथाः ॥ इत्यार्घ्यं दत्वा ॥ मद्वंशे ये नरा जाता ये — जनिष्यंति वा परे ॥ तांस्त्वमुद्धर देवेश
दुःसहाद्भवसागरात् ॥ पातकार्णवमग्नस्य व्याधिदुःखाम्बुवारिभिः ॥ तीव्रैश्च परिभूतस्य महादुःखगतस्य मे ॥ करावलंबनं देहि
शेषशायिन् जगत्पते ॥ श्रीनृसिंह रमाकांत भक्तानामभयप्रदानं ॥ क्षीरांबुनिधिवासिस्त्वं चक्रपाणे जनार्द्दनं ॥ व्रतेनानेन देवेश
भुक्तिमुक्तिप्रदो भवेति प्रार्थयेदिति संक्षेपः ॥ वैशाखयोर्गामास्यां विशेषः ॥ अपरार्के जावालिः ॥ घृतादमुदकुंभं च वैशाख्यां च वि
शेषतः ॥ निर्दिश्य धर्मराजाय गोदानफलमाप्नुयात् ॥ सुवर्णतिलयुक्तैस्तु ब्राह्मणान् सप्त पंच वा ॥ तर्पयेदुदपात्रैस्तु ब्रह्महत्यां व्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पोहन्तीति ॥ ॥ इति श्रीमहाराजाधिराजगीर्वाणयुद्धविक्रमसाहदेवकृतौ वैशाखनिर्णयः ॥ ॥ ज्येष्ठशुक्लतृतीयायां रंभाव्रत
मुक्तं साभविष्ये ॥ भाद्रे कृष्णपक्षे यत्नेन रंभाख्यं व्रतमुत्तमं ॥ ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परेति ॥ सा पूर्वविद्धा ग्राह्या ॥ ब्र
ह्मन्तपानतथा रंभासावित्रीवटयेन्तकी ॥ कृष्णाष्टमी च भूता च कर्तव्या सम्मुखतिथिरिति स्कान्दे ॥ ज्येष्ठशुक्लदशमी दशहरा
नमुक्तं ब्राह्मे ॥ ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ॥ हरते दश पापानि तस्माद्दशहरा स्मृतेति ॥ वाराहेपि ॥ दशमी शुक्ल
पक्षे तु ज्येष्ठे मासि कुजेहनि ॥ अवतीर्णा यतः स्वर्गात् हस्तर्क्षे च सरिद्वरा ॥ हरते दश पापानि तस्माद्दशहरा स्मृतेति ॥ ॥ स्का
न्दे तु दशयोगा उक्ता यथा ॥ ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ॥ व्यतीपाते गरानन्दे कन्याचन्द्रे वृषे रवौ ॥ दशयोगे वरः स्ना
त्वा सर्वपापैः प्रमुच्यते ॥ इति ॥ अत्र बुधभौमयोः कल्पभेदेन व्यवस्था ॥ इयं च यत्रैव योगबाहुल्यं सैव ग्राह्या ॥ योगाधिक्ये फ
लाधिक्यात् ॥ ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्या न तु शुद्धे ॥ दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु इति ॥ ॥ हेमाद्रौ भवि
ष्यशृंगोक्ते ॥ ॥ अथ स्कान्दे ॥ यां कांचित् सरितं प्राप्य दद्याद्दर्भतिलोदकं ॥ मुच्यते दशभिः पापैः समहापातकोपमैः ॥ ॥ अत्र विशे
षः ॥ काशीखण्डे ॥ ज्येष्ठस्य मासि सिते पक्षे प्राप्य प्रतिपदं तिथिं ॥ दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः ॥ एवं सर्वासु तिथिषु
क्रमनरोत्तमः ॥ आशुक्लपक्षदशमीं प्रतिजन्माच्च मुन्मजेन ॥ ॥ तथा ॥ लिंगं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ॥ दशजन्मा
र्जितैः पापैः त्यज्यते नात्र संशयः ॥ ॥ तथा ॥ निशायां जागरं कृत्वा समुपोष्य च भक्तितः ॥ पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च स्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सांख्यया ॥ तथादीपैश्च तांबूलैः पूजयेच्छ्रद्धयान्वितः ॥ स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः ॥ दशप्रसृतिकृष्णांश्च तिला
न्सर्पिश्च वै जले ॥ सक्तुपिंडान्गुडपिंडान्दद्याच्च दशसंख्यया ॥ ततो गंगातटे रम्ये हेमरूपेण वा तथा ॥ गंगायाः प्रतिमां कृ
त्वा वक्ष्यमाणस्वरूपिणीं ॥ संस्थाप्य पूजयेद्देवीं तदलाभे मृदापि च ॥ अथ तत्राप्यशक्तश्चेच्छिरवे सिष्ट‾ वेअवि ॥ वक्ष्यमाणेन मं
त्रेण कुर्यात्पूजां विशेषतः ॥ नारायणं महेशं च ब्रह्माणं भास्करं तथा ॥ भगीरथं वनपतिं हिमवंतं नगेश्वरं ॥ गंधपुष्पादिभि
स्सम्यग्यथाशक्ति प्रपूजयेत् ॥ दशप्रस्थांस्तिलान्दद्याद्दशविप्रेभ्य एव च ॥ दशप्रस्थान्‾‾ दद्याद्दशसंख्या गवीस्तथा ॥ पुस्य
षोडशपलानि पलं तु मुष्टिमात्रं पलं स्मृतमिति मितिर्महार्णवे उक्तः ॥ ॥ मत्स्यकच्छपमंडूककाकरादि जले चरान् ॥ कारयित्वा य
थाशक्ति स्वर्णेन रजतेन वा ॥ तदलाभे पिष्टमयानभ्यर्च्य कुसुमादिभिः ॥ गंगायां प्रक्षिपेदाज्यदीपांश्चैव प्रवाहयेत् ॥ उपचारैः पू
जयेद्गंगां मंत्रेणानेन भक्तितः ॥ ओं नमः शिवायै नारायण्यै दशहरायै गंगायै नमः ॥ इति मंत्रं तु यो मर्त्यो दिने तस्मिन्दिवानिशं
जपेत्पंचसहस्राणि दशधर्मफलं लभेत् ॥ ॥ काशीखंडोक्तो मंत्र उक्तः ॥ नमः शिवायै प्रथमं नारायण्यै पदं ततः ॥ दशह
रायै पदमिति गंगायै मंत्र एव च स्वाहांतः प्रणवादिश्च भवेद्विंशाक्षरो मनुः ॥ पूजा दानं जपो होमो नेनैव मनुना स्मृत इति ॥ अत्र गं
गास्तोत्रपाठमपि दशवारं कुर्यात् ॥ तदुक्तं भविष्ये ॥ तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थिताः ॥ यः पठेद्दशकृत्वस्तु दरिद्रो वा
पि वाक्षमः ॥ सोपि तत्फलमाप्नोति प्रेत्य ब्रह्मणि लीयते इति त्वा विधानेन विघ्नशाठ्यविवर्जितः ॥ उपवासी वक्ष्यमाणो ह्यापेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र.त्न
३३०

पूज्यते ॥ सर्वान् कामनवाप्नोति प्रेत्य गंगां संपूज्य यत्नतः ॥ एवं कृत्वा विधानेन विघ्नशाठ्यविवर्जितः ॥ अस्यां सेतुबंधरामेश्व
रस्य प्रतिष्ठादिनत्वाद्विशेषेण पूजा कार्या ॥ ॥ तदुक्तं स्कान्दे सेतुमाहात्म्ये ॥ ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ॥ गरानं
देव्यतीपाते कन्याचंद्रे वृषे रवौ ॥ दशयोगे सेतुमध्ये लिंगरूपधरं हरं ॥ रामो वै स्थापयामास शिवलिंगमतस्तु नमस्मिन्निति ॥ ॥ इ
ति दशहरा ज्येष्ठशुक्लैकादशी निर्जला ॥ ॥ ज्येष्ठे मासि नृपश्रेष्ठ यच्छुक्लैकादशी शुभा ॥ निर्जलं समुपोष्यात्र जलकुंभान् शर्करा
न्वितान् ॥ प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ ॥ ज्येष्ठपौर्णमास्यां सावित्रीव्रतं ॥ ॥ तदुक्तं स्कान्दे ॥ ज्येष्ठे मासि सिते पक्षे त्रयोदश्यां
रजनीमुखे ॥ इत्युपक्रम्य व्रतं त्रिरात्रमुद्दिश्य पदिवारात्रिं स्थिरा भवेदिति ॥ अंतेषूपसंहृतं ॥ ज्येष्ठे मासि सिते पक्षे पूर्णिमायां त
थाव्रतं ॥ चीर्णं पुरा महाभक्त्या कथितं ते मयानघेति ॥ दाक्षिणात्यास्त्वेवं देवाडियते ॥ एतच्चामावास्यायामप्युक्तं निर्णयामृते ॥
भविष्ये ॥ अमायां च तथा ज्येष्ठे वटमूले महासती ॥ त्रिरात्रोपोषिता नारी विधानानेन पूजयेत् ॥ ॥ मदनरत्नेपि तद्वाक्यं ॥
पंचदश्यां तथा ज्येष्ठे इति पठित्वा ज्येष्ठपौर्णमास्यामुक्तं ॥ ॥ तथा ॥ अत्रासक्तो त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रिया ॥ अयाचितं
चतुर्दश्याममायां समुपोषणमिति ॥ तत्तु पाश्चात्यैराद्रियते ॥ हेमाद्रिसमयोद्योतादिषु तु भाद्रपदपौर्णमास्यामुक्तं तत्तु नेदा
नीं प्रचरति ॥ ॥ गौडास्तु ॥ मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत् ॥ ज्येष्ठकृष्णचतुर्दश्यां सावित्रीमर्चयंति याः ॥ वटमूले
सोपवासा न ता वैधव्यमाप्नुयादिति ॥ ॥ परोक्ते श्च चतुर्दश्यां प्रदोषव्रतं ॥ दिनद्वये तद्व्याप्तौ परैवेत्याहुः ॥ तन्निर्मलं अत्र पूर्णि

330

राम
३३०

१६

CC-0. In Public Domain. Digitization by eGangotri

मामावास्ये पूर्वविद्धे ग्राह्ये ॥ भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा ॥ वर्जयित्वा नरश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैव
र्तात् ॥ ॥ स्कान्देपि ॥ भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् ॥ वर्जयित्वा तु सावित्रीव्रतं तु शिखिवाहनेति ॥ मदनरत्ने ॥ ब्रह्म
वैवर्तेपि ॥ प्रतिपत्संवमी भूतसावित्रीवटपूर्णिमा ॥ नवमी दशमी चैव नोपोष्या परसंयुता इति ॥ ॥ यदा त्वष्टादशघटिका
चतुर्दशी तदा परा ग्राह्या ॥ पूर्वविद्धैव सावित्रीव्रते पंचदशी तिथिः ॥ नाड्योष्टादश भूतस्य स्युश्चेत्तस्य परेहनीति माधवः ॥ व
स्तुतस्तु ॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति तस्य व्रतांतरे सावकाशत्वात् ॥ विशेषतः प्रवृत्तपूर्वविद्धाविधायकव
चनेन तस्य बाधादष्टादशनाडीवेधेपि पूर्वैवेत्यग्रे यथाः साधु ॥ अत्र पौर्णिमानुरोधेनैव यथा त्रिरात्रं समाप्तिर्भवति तथा त्रयो
दश्यादि ग्राह्यं ॥ तस्याः प्रधानत्वात् ॥ अयं निर्णयोऽमायामपि ज्ञेयः ॥ पारणं तु पौर्णिमान्ते कार्यं ॥ अत्र स्त्रीव्रते विशेषः प
रिभाषायामुक्तः ॥ अत्र विशेषो भविष्ये ॥ गृहीत्वा वालुकापात्रे प्रस्थमात्रं युधिष्ठिर ॥ ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते ॥
सावित्रीप्रतिमां कुर्यात् सौवर्णीं वापि मृन्मयीं ॥ साईसत्यवता साध्वी फलनैवेद्यदीपकैः ॥ रजन्यां कंठसूत्रैश्च कुसुंभैः कुंकुमैः केशर
पूजयेदिति शेषः रजनी हरिद्रा कंठसूत्रं सौभाग्यतंतुः ॥ सावित्र्याख्यानकं चापि वाचयीत द्विजोत्तमं ॥ रात्रौ जागरणं कृत्वा प्र
भाते विमले ततः ॥ तामपि ब्राह्मणाय दत्वा प्रणिपत्य क्षमापयेत् ॥ ॥ मंत्रस्तु ॥ सावित्रीयं मया दत्ता सहिरण्या महासती ॥ ब्रह्म
णः प्रीननार्थाय ब्राह्मणाय प्रतिगृह्यतां ॥ अनेनानेन राजेन्द्र वैधव्यं नाप्नुयात्क्वचित् ॥ ज्येष्ठपौर्णिमास्यां आदित्यपुराणे ॥ ज्येष्ठे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न
३३१

ष्ठे मासि तिलान् दद्यात् पौर्णमास्यां विशेषत ॥ अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ॥ ॥ विष्णुरपि ॥ ज्येष्ठी ज्येष्ठायुता चे
न्मासांतस्यां छत्रोपानत्प्रदानेन नरो नराधिपत्यमाप्नोति ॥ ॥ हेमाद्रौ ज्योतिषे ॥ ज्येष्ठे ज्येष्ठा शशी चैव प्राजापत्ये रविस्तथा ॥ पू
र्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता ॥ ॥ इयं मन्वादिरपि ॥ सा पौर्वाह्णिकी ग्राह्या ॥ विशेषस्तु वैवे उक्तेः ॥ तथा परार्के
वामनपुराणे ॥ उदकुंभप्रदानं च तालवृन्तं समं चंदनं ॥ त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि तु इति ॥ ॥ इति श्रीमहारा
जगीर्वाणयुद्धविक्रमवर्म्मकृतरत्नावलीतत्र गतो ज्येष्ठस्य निर्णयः ॥ ॥ आषाढशुक्लद्वितीयायां रथोत्सवः ॥ तदुक्तं स्कांदे
आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ॥ तस्यां रथे समारोप्य रामं मां भद्रया सह ॥ यात्रोत्सवं प्रवर्त्याथ प्रीणयेत् द्विजान् बहू
न् ॥ ॥ तथा ॥ ऋक्षाभावे तिथौ कार्या यात्रा सा प्रीतये मम ॥ आषाढशुक्लदशमी पौर्णमासी च मन्वादिः सा च पूर्वाह्नव्यापिनीति
प्रागुक्तं ॥ आषाढशुक्लद्वादश्यां विष्णुशयनोत्सव उक्तो व्रतखंडे ॥ एकादश्यां तु शुक्लायां माषाढे भगवान्हरिः ॥ भुजंगशयने शेते क्षी
रार्णवजले सदेति ॥ ॥ यम ॥ क्षीराब्धौ शेषपर्यंके आषाढ्यां संविशेद्धरिः ॥ निद्रां त्यजति कार्त्तिक्यां तयोः संपूजयेत्सदा ॥ ब्रह्महत्
यादिकं पापं क्षिप्रमेव व्यपोहति ॥ हिंसात्मकोल्पकिं तस्य यज्ञैः कार्यं महात्मनः ॥ प्रस्वापे च प्रबोधे च पूजितो येन केशवः ॥ राम ३३१
स्कांदे ॥ आषाढशुक्लैकादश्यां कुर्यात्तत्र महोत्सवं ॥ इति भविष्योक्तेः ॥ द्वादश्यां संधिसमये नक्षत्राणामसंभवे ॥ आभाकासि
तपक्षे तु शयनावर्त्तनादिकमिति वाराहोक्तेश्च ॥ द्वादश्यामित्यत्रापि पारणाहो मात्रे विवक्षितो ॥ पारणाहे पूर्वरात्रे घटीदीन्याद

331

१६६

दयन्प्रकुरितिरामार्चनचन्द्रिकोक्ते ॥ इदं च मलमासे न कार्यं ॥ ईशानस्य वलिं विष्णोः शयनं परिवर्त्तनमिति कालादर्शे निषेधात्
यदपि एकादश्यां तु गृह्णीयात्संक्रान्तौ कर्कटस्य वा ॥ आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतं क्रियमिति ब्रह्मवैवर्त्तं तदपि मलमासे
सति द्रष्टव्यं ॥ मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ॥ द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे इति ॥ ॥ मोहचूलोत्तरो
क्तेः ॥ अत्रैव चातुर्मास्यव्रतारम्भ उक्तो भारते ॥ आषाढे तु सिते पक्षे एकादश्यामुपोषितः ॥ चातुर्मास्यव्रतं कुर्यात् यत्किंचिन्नियतो
नर इति ॥ अस्य कनिष्ठत्वं तत्रैवोक्तं ॥ वार्षिकांश्चतुरो मासान् वाहयेत्केनचिन्नरः ॥ व्रतेन नो चेदाप्नोति किल्विषं वत्सरोद्भवं ॥ असं
भवे तुलार्केपि कर्त्तव्यं तत्प्रयत्नत इति ॥ अस्यारंभश्च शुक्लासाद्यावपि कार्यं ॥ न शौशवे न मौढ्ये च शुक्लस्य गुर्वेर्न वा तिथे ॥ खंडत्वेपि नय
च्चादौ चातुर्मास्यविधौ नर इति वृद्धगार्ग्योक्तेः ॥ इयं च द्वितीयायारंभविषये ॥ प्रथमारंभस्तु न भवत्येव ॥ आशौचमध्येपि द्विती
यायारंभो भवति ॥ अशुचिर्वाशुचिर्वापि यदि स्त्री यदि वा पुमान् ॥ व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैरिति स्कान्दोक्तेः ॥ आ
रब्धे सूतकं न स्यादनारब्धे तु सूतकमिति विष्णुवचनाच्च ॥ इदं च द्विजैश्च भक्त्यादिभिरपि कार्यं ॥ द्विजो वा भक्तिसंयुक्तो भानौ नाग
राज्ञानायके ॥ कृत्वा व्रतस्य नियमं यथोक्तफलभाग्भवेदिति ब्रह्मवैवर्त्तात् ॥ व्रतग्रहणप्रकारस्तु भविष्ये ॥ महापूजां ततः कुर्या
द्देवदेवस्य चक्रिणः ॥ जातिकुसुममालाभिर्मंत्रेणानेन पूजयेत् ॥ सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदं ॥ विबुद्धे च विबुध्ये
त प्रसन्नो मे भवाच्युतः ॥ एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः ॥ प्रभाते वाग्रतो विष्णोः कृतांजलिपुटस्तथा ॥ चतुरो वार्षि

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३३२

कान्मासान् देवसोत्थायनावधि ॥ इमं करिष्यनियमं निर्विघ्नं कुरु मेच्युत ॥ इदं व्रतं मया देव गृहीतं पुरतस्तव ॥ निर्विघ्नं सिद्धिमा
यातु प्रसादात्तव केशव ॥ गृहीतेस्मिन् व्रते देव यद्यपूर्णे म्रिये ह्यहं ॥ तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दनेति ॥ ॥ तथा ॥ श्रा
वणे वर्जयेच्छाकं दधि भाद्रपदे तथा ॥ दुग्धमाश्वयुजे मासि कार्त्तिके द्विदलं त्यजेदिति ॥ ॥ स्कान्देपि चातुर्मास्यप्रकल्पो ॥ तत्वार्य
तानि नित्यानि चतुराश्रमवर्णानां ॥ प्रथमे मासिक कर्त्तव्यं नित्यं शाकव्रतं नरैः ॥ द्वितीय मासि कर्त्तव्यं दधिव्रतमनुत्तमं ॥ पयोव्रतं
तृतीये तु चतुर्थेपि निशामये ॥ द्विदलं बहुबीजं च वृन्ताकं च विवर्जयेत् ॥ निष्पावे तानि विप्रेन्द्र व्रतान्याहुर्मनीषिणः ॥ जंबीरं रा
जमाषांश्च मूलकं रक्तमूलकं ॥ कूष्माण्डं चेक्षुदण्डं च चातुर्मास्ये त्यजेद्बुधः ॥ तथा विशेषाद्बदरं धात्रीं कूष्माण्डं इति निशी त्यजेत् ॥ जी
र्णा धात्रीफलं ग्राह्यं कथं विन्त्या यशोधनमिति ॥ ॥ स्कान्दे ॥ वार्षिकांश्चतुरो मासान् प्रसुप्ते वै जनार्दने ॥ मंचखट्वादिशयनं वर्ज
येद्भक्तिमान्नरः ॥ अनृतौ वर्जयेज्जायां मांसं मधु परौदनं ॥ पटोलं मूलकं चैव वृन्ताकं च न भक्षयेत् ॥ अभक्ष्यं वर्जयेद्दूरात् मसू
रं शिंबि सर्षप ॥ राजमाषान् कुलत्थांश्च भाष्यधान्यं च तत्त्यजेत् ॥ शाकं दधि पयो माषान् श्रावणादिषु संत्यजेत् ॥ अन्ये त्वेते दिति
वर्जनसंकल्पस्य पर्यन्तमाज्ञेयः ॥ व्रते पक्वमान्न ॥ अन्ये केचित् ॥ शाकाने शिग्रु मने नेति शाक इति ॥ योग बलात् व्यंजनमा
त्रस्य निषेधमाचक्षते ॥ अन्ये तु शाकशब्दस्य पत्रादि दशविधशाके योगरुढत्वात् ॥ योगावरुधेर्वलीयस्त्वात् पादीनामपि
त्यागायन्ते च्छत त्रयमाचक्षते ॥ ते न मूलपत्रकरीराग्रफलकं डधिरुढकाः ॥ त्वक्पुष्पं कवकं चेति शाकं दशविधं स्मृतं ॥ मू

332

राम
३३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्तस्य शाकस्य निषेध इति ॥ अधिरूढको अंकुरः वस्तुतस्तु ॥ तत्कालोद्भवा शाका वर्जनीयाः प्रयत्नतः ॥ बहुबीजमबीजं च विकारि
च विवर्जयेदिति भविष्ये च नानतकालोत्पन्नानां दशविधशाकानां निषेधः ॥ अत्र तत्कालोद्भवजातीयत्वं विवक्षितं ॥ तेनानातपादि
शोषितानां वर्षान्तरोद्भवानामपि निषेधः ॥ अत्र तत्कालोद्भवत्वमात्रत्वं विवक्षितं ॥ ननु तन्मात्रकालोद्भवत्वं गौरवात् ॥ तेनान्य
कालोद्भवानां तत्कालोद्भवानां च विवक्षीनां निषेधः ॥ अत्र न तत्कालोद्भवा इति वीप्सा वशात्स्वस्वकालोद्भवानां सर्वेषां नीषेध इ
ति निष्कर्षः ॥ बहुबीजमित्यनेकबीजमिति केचित् ॥ इतरावयवापेक्षया बीजावयवा यत्र बहवस्तदित्यन्ये अबीजं कदल्यादि
आचारप्रदीपे ॥ वृन्ताकं च कलिंगं च विल्वोदुम्बरभिस्सटाः ॥ उदरे यस्य जीर्यन्ति तस्य दूरतरो हरिः ॥ ॥तथा देवलः ॥ ब्रह्मचर्यं तथा
शौचं सत्यमामिषवर्जनं ॥ व्रतेष्वेतानि चत्वारि विरष्ठानीति निश्चयः ॥ आमिषाणि चोक्तानि पाद्मे ॥ प्राणपंगचूर्णं च मंतुजं वीरबी
जपूरकं ॥ अथ जंबीरं माषादि यच्छिद्रोरतिवेदितं ॥ दग्धमन्नं मसूरं च मांसं चेत्यष्टधामिषं ॥ रुच्यं तत्त्र देशलभ्यं सुप्ते देवे विव
र्जयेत् ॥ पाद्मे ॥ गोछागीमहिषीदुग्धादन्यदुग्धादिनामिषं ॥ धान्ये मसूरिकाः प्रोक्ता अन्नं पर्युषितं तथा ॥ द्विजक्रीता रसाः सर्वे
लवणं भूमिजं तथा ॥ ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितं ॥ आत्मार्थं याचितं चान्नमामिषं तत्स्मृतं बुधैः ॥ निष्पावान्राजमाषां
श्च मसूरं संधितानि च ॥ वृन्ताकं च कलिंगं च सुप्ते देवे विवर्जयेत् ॥ संधितानि लवणशाकादीनि ॥ ॥तत्रैव विष्णुधर्मे ॥ चतुर्थ्या
हमासे तु हविष्याशी न पापभाक् ॥ ॥हविष्याणि तु भविष्ये ॥ हैमन्तिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः ॥ कलायकंगुनीवा

रत्न
३३३

रवास्तूकं हिलमोचिका ॥ षष्टिका कालशाकं च मूलकं केमुकेतरत् ॥ कंदसैंधवसामुद्रगव्यं च दधिसर्पिषि ॥ पयोनुद्धृतसारं च पन
साम्रौ हरीतकी ॥ पिप्पलि जीरकं चैव नागरंगं च तिंतिणी ॥ कदली लवली धात्री फलान्यगुडमैक्षवं ॥ अतैलपक्वं मुनयो हविष्याणि
प्रचक्षते ॥ ॥ इति मदनरत्नेप्येवं ॥ ॥ सितमस्विन्नमनूष्यपक्वधान्यं च तंडुला ॥ केमुकं कंदविशेषः कलायास्तु सतीनकं इत्यम
रः ॥ कङ्गुरिति प्रसिद्धधान्यं ॥ ॥ अगस्त्यसंहितायां हैमंतान्युक्त्वा ॥ नारिकेरफलं चैव कदलीं लवलीं तथा ॥ आम्रमामलकं चैव
पनसं च हरीतकीं ॥ व्रतांतरप्रशस्तं च हविष्यमन्न्य तद्बुधाः ॥ अथान्यमित्रतान्युक्तानि भविष्ये ॥ स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृ
ढव्रतः ॥ गृहीतान्नियमान्येतान्नुदेनधावदूर्ध्वकान् ॥ तेषां फलानि वक्ष्यामि तन्वनर्तानां पृथक्पृथक् ॥ मधुरस्वरो भवेद्राजन्नृपगुड
षो गुडवर्जनात् ॥ तैलस्य वर्जनाद्राजन्नृसुंदरांगः प्रजायते ॥ योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ॥ तांबूलवर्जनाद्भोगी
रक्तकंठश्च जायते ॥ घृतत्यागाच्च लावण्यं सर्वस्निग्धतनुर्भवेत् ॥ शाकपत्राशनाद्रोगी अपक्वादो मलो भवेत् ॥ भूमौ प्रस्तरशा
यी च विप्रो अनिवरो भवेत् ॥ एकांतरोपवासेन ब्रह्मलोके महीयते ॥ धारणान्नखरोमाणां च गंगास्नानफलं लभेत् ॥ मौनव्रती
भवेच्छस्तु तस्या – स वलितो भवेत् ॥ भूमौ भुंक्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ॥ प्रदक्षिणाशतनुतिपाठः ॥ हंसयुक्तविमाने
न स च विष्णुपुरं व्रजेत् ॥ अयाचितेन प्राप्नोति पुत्रान् धर्मान्न शेषतः ॥ षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि ॥ पर्णाभुयो
नरो भुंक्ते क्रतुस्त्रेच फलं लभेत् ॥ गुडवर्जी नरो दद्यात्स घृतं ताम्रभाजनं ॥ संहिताराप नरश्रेष्ठ लवणास्याप्ययं विधिः ॥ सुप्ते देवे तु यो

333
रत्न
३३३

विष्णोशिवस्यांगणानर्च्चयेत् ॥ पंचवर्णैस्तु योनिस्थं स्वस्तिकैः पद्मकैस्तथा ॥ सयाति रुद्रलोकं हि मारापत्यमवाप्नुयात् ॥ अथैषां
समाप्तौ कार्त्तिक्यां दानानि ॥ नरके वस्त्रयुग्मं ॥ १ ॥ एकांतरोपवासे गौ ॥ २ ॥ भूशयने शय्या ॥ ३ ॥ षष्ठकालभोजने गौ ॥ ४ ॥ व्री
हिगोधूमादित्यागे हैमव्रीह्यादि ॥ ५ ॥ कृच्छ्रे गोयुग्मं ॥ ६ ॥ कामाशने गौः ॥ ७ ॥ पयोव्रते च ॥ ८ ॥ मधुदधिघृतव्रतेषु वासो गौश्च
२ ॥ ब्रह्मचर्ये स्वर्णसुवर्णं ॥ १० ॥ तांबूलव्रते वासोयुग्मं ॥ ११ ॥ मौने घृतकुंभो वस्त्रयुग्मं घंटा च ॥ १२ ॥ देवाग्रे रंगमालिकाकरणे धे
उहेनुर्हेमपद्मं च ॥ १३ ॥ दीपव्रते दीपिका वासोयुग्मं च ॥ १४ ॥ भूमिभोजने ॥ १५ ॥ पर्णभोजने च कांस्यपात्रं गौश्च ॥ १६ ॥ चतुष्प
दादीपे गोमासे च गोवृषौ ॥ १७ ॥ प्रदक्षिणाशते वस्त्रं ॥ १८ ॥ अन्नकेषु स्वर्णं गौश्चेत्यादि हेमाद्रौ ॥ ॥ तथा पाद्मे ॥ शयनीबोध
नीमध्ये शमीदूर्वापमार्गकैः ॥ भृंगराजेन देवास्तु नार्च्चपीतकदावन ॥ ॥ हेमाद्रौ पाद्मे ॥ आषाढ्यां चतुर्मास्यं नम्यं गं वर्ज्जयेन्नरः
समाप्तौ च पुनर्दद्यात्तिलतैलयुतं घटं ॥ आषाढादि चतुर्मासं वर्ज्जयेन्नखकृन्तनं ॥ वृंताकं स्थजनं चैव मधुसर्पिर्घटान्वितं ॥ का
र्त्तिक्यां तु पुनर्हैमं ब्राह्मणाय निवेदयेत् ॥ ॥ स्कांदे ॥ एकांतरं चान्तरं वा कुर्यान्मासोपवासकं ॥ अनोदनं फलाहारं नक्तव्रतम
थापि वा ॥ अत्रैव तप्तमुद्राधारणामुक्तं रामार्चनचंद्रिकायां ॥ भविष्ये ॥ शयन्यां चैव बोधिन्यां चक्रतीर्थे तथैव च ॥ शंखच
क्रविधानेन वह्नितप्तो भवेन्नर इति ॥ अतप्ततनूर्न तदामो अश्नुत इति ॥ ऋग्वेदात् ॥ सहोवाच याज्ञवल्क्यस्स्मात्सुमानात्महि
तायहरिभवेत् ॥ सुश्लोकमौले च मार्शणरूपिनाशं दधतु इति ज्ञानपथश्रुतेः ॥ श्रुतविष्णोअत्र चक्रेणतप्तजन्मामोधातवर्ज्ज वे च र्षं

राम ३३७ शीङः ॥ मूले वार्हेर्द्दधन्ये पुराणलिंगान्यन्येन ग्राह्यधान्यर्थ्यं यंत इति साम वेदात् ॥ अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ॥ ब्राह्मणा
यनं तथैवेदं तप्तमुद्रादिधारणमिति पद्मपुराणाच्चेति ॥ तप्तप्रकारस्तु रामार्च्चनचंद्रिकोक्तो ज्ञेयः ॥ पृथ्वीचंद्रोदये तु ॥ यत्तु शंखतप्तसखादि
लिंगविहूनस्तु नरः ॥ स सर्वयातनाभोगी चंडालो जन्मकोटिषु ॥ द्विजस्तु तप्तसंधारि लिंगांकिततनस्तु नरः ॥ संभाष्य रौरवं याति यावदिं
द्राश्चतुर्दशेति ॥ ॥ हृद्व्यासदेयोक्ते ॥ शंखचक्राद्यंकमंचगीतनृत्यादिकं तथा ॥ एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥ शंखच
क्रे मृदा यस्तु कुर्यात्तप्ता येन वा ॥ स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः ॥ यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु ॥ तथा चक्रां
कितो विप्रः सर्वकर्मसु गर्हितः ॥ ॥ तथा ॥ शिवकेशवयोरंकान् शूलचक्रादिकान् द्विजः ॥ न धारयेत प्रतिमां न वैदिके वर्त्म
नि स्थितः ॥ इति विश्वाश्वलायनादिवचनात् ॥ स्मृत्येदादिश्रुतिनामप्यार्थत्वादन्यश्रुतीनामप्यार्थत्वादन्यश्रुतीनां बाधत्वात् ॥ च
क्रादिधारणं शूद्रविषयमिति तत्त्वः ॥ अत्र शिष्टाचार एव मम ॥ ॥ आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं भविष्ये ॥ आषाढ
पौर्णमास्यां तु संध्याकाले ह्युपस्थिते ॥ संकल्पयेन्मासमेकं श्रावणे ऽप्यहं ह्यहं ॥ स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती 334
भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयामिति ॥ अस्य नक्तव्रतत्वात् सायाह्नव्यापिनी ग्राह्या ॥ अत्रैव शिवशयनोत्सव उ
क्तो वामनपुराणे ॥ पौर्णमास्यां समाषाढे स्वपते वर्मसंस्तरे ॥ वैयाघ्रे च जटाभारं समुद्ग्रथ्याहिवर्मणा ॥ इयं प्रदोषव्या राम ३३७
पिनी अत्रैव व्यासपूजोक्ता ॥ तत्र त्रिमुहूर्त्तार्थेन पर्विवत् त्रिमुहूर्त्ताधिकं ग्राह्यं पर्वश्लोकप्रमाणमयोरिति वचनात् ॥ ॥ श्रीमह

१६९

CC-0. In Public Domain. Digitization by eGangotri

राजगीर्वाणयुद्धविक्रमवर्मणा ॥ कृतारत्नावलि तत्रगतः आषाढनिर्णयः ॥ ॥ कर्कटसंक्रान्तौ ॥ पूर्वेस्त्रिंशद्दण्डाः पुण्यकालः
सूर्योदयोत्तरंसंक्रमे तु परतस्तथैवपुण्यं ॥ रात्रौ तु निशीथात्प्राक्परतश्च संक्रमे यथार्क हेमाद्रिमतं तन्मदनरत्नादिमते पूर्वोत्तरदिनयोः पं
चनाड्यः पुण्यकालः ॥ धनुर्मीनावतिक्रम्य कन्या च मिथुनं तथा ॥ पूर्वापरविभागेन रात्रौ संक्रमते रविः ॥ दिनान्ते पञ्चनाड्यस्तु
तत्रपुण्यतमाः स्मृताः ॥ उदयेपि तथा पञ्च दैवे पित्र्ये च कर्मणीति स्कान्दोक्तेः ॥ पूर्वापरविभागेनेति मकरकर्कभिन्नसंक्रान्तिपरं
वक्ष्यमाणवचोविरोधादित्युक्तं मदनरत्ने ॥ तेनायमर्थः ॥ रात्रौ पूर्वभागे मकरे उदये पञ्चनाड्यः पुण्याः रात्र्यपरभागे कर्कसंक्र
मे दिनान्ते पञ्चनाड्यः पुण्याः ॥ विषुवतोस्तु पूर्वदिने पञ्च वा परदिने वा पञ्चेति ॥ वाक्यान्तरविरोधात् ॥ तेन हेमाद्रिमाधवयोः सर्व
वचनानां वा विरोधः ॥ माधवमते तु अर्द्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने ॥ पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति वृद्धग
र्गोक्तेः ॥ मिथुनात्कर्कसंक्रान्तिर्यदिस्यादंशुमालिनः ॥ प्रभाते वा निशीथे वा तदा पुण्यं तु पूर्वतः इति ॥ भविष्योक्तेश्च पूर्वदिने पु
ण्यं दक्षिणायनस्यास्त्वेतदेवाद्रियन्तो ॥ अत्र रात्रावपि स्नानादि भवतीत्युक्तं प्राक् ॥ अत्र दानोपवासादि पूर्ववदुक्तं ॥ ॥ तथा ॥
कर्कटे केशादिकर्तनं निषिद्धं ॥ कुम्भे कर्कटके वापि कन्यायां तु के रवौ ॥ रोमखण्डं गृहस्थस्य पितॄन्प्राशयते यम इति सुमन्तुवचनाद्
अनदीनां रजोदोषः अत्रिः ॥ सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ॥ तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगा इति व्याघ्रोक्तेः ॥
मात्स्ये त्वगस्त्योदयावधित्वमुक्तं ॥ यावन्नोदेति भगवान् दक्षिणाशाविभूषणं ॥ न स्नानादीनि कर्माणि तासु कुर्वीत मानवः ॥ इदं

CC-0. In Public Domain. Digitization by eGangotri

रत्न चभृङनदीषुसिंहकर्कटयोर्मध्येसर्वानद्योरजस्वला॥नावङजोवहानद्यकरतोयाप्रकीर्त्तिताः॥करतोयाःअल्पतोयाः॥ ॥तथा
३३५ कात्यायनः॥याशोषसुपगच्छन्तिग्रीष्मेकुशरीतोऽपिवि॥तासुप्राप्तेषिनस्नायादष्टौदशवासरे॥ इदंवापदिः॥ ॥स्मृतिसंग्रहे
धनुःसहस्राण्यष्टौतुगतिर्यासानविद्यते॥नतानदीशब्दवहागर्त्तास्तेपरिकीर्त्तिताः॥ ॥महानदीषुतुभविष्योक्तं॥आदौतु
कर्कटेदेविमहानद्योरजस्वला॥त्रिदिनंचचतुर्थेह्निशुद्धास्युर्जाह्नवीयथा महानद्यश्चत्रास्ते॥गोदावरीभीमरथीतुंगभद्राचवे
णिका॥तापिपयोष्णीविंध्यस्यदक्षि—तुप्रकीर्त्तिताः॥ भागीरथीनर्मदाचयमुनाचसरस्वती॥विशोकाचवितस्ताचविंध्य
स्यान्तरतःस्थिताः॥द्वादशैतेमहानद्योदेवर्षिक्षेत्रसंभवा॥ ॥मदनरत्नेपुराणान्तरे॥महानद्योदेविकाचकावेरीवंजरा
तथा॥रजसाततुदुष्टास्युःकर्कटादौत्र्यहंनृप॥ ॥कात्यायनः॥कर्कटादौरजोदुष्टागोमतीवासरत्रयं॥चंद्रभागासतासिंधु
सरयूनर्मदातथा॥इदंगंगाव्यतिरिक्तविषयं॥गंगाचयमुनाचैवप्लक्षजासरस्वती॥रजसानाभिभूयन्तेयेचान्येनदसं 335
ज्ञिताः॥शोणःसिंधुर्हिरण्याख्यःकोकलोहितघर्घरौ॥शतद्रुश्चनदाःसप्तपावनाःपरिकीर्त्तिताः॥ ॥इतिदेवलोक्ते॥ ॥प्र
थमंकर्कटेविद्यात्त्र्यहंगंगारजस्वलेत्यादिवचनंतुजाह्नवीभिन्नगोदावर्यादिगंगापरमितिमदनरत्ने॥अन्येत्वेतानिरजोविषयं रत्न
गंगाधर्मद्रवापुण्यायमुनाचसरस्वती॥अंतर्गतरजोदोषाःसर्वावस्थासुवामला॥ ॥इतिनिगमोक्ते॥ ॥तीरवासिनांतु ३३५
रजोदोषोनास्ति॥नतुतत्तीरवासिनामितिनिगमोक्ते॥ जोदुष्टमपिजलंगंगाजलयोगेपावनं॥गंगाभस्यसमायोगादुष्टमप्य

१६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उपावनमितिमात्स्योक्तेः॥ नूतनकूपादौतुयोगयाज्ञवल्क्यः॥अजागावोमहिष्यश्चब्राह्मणीचप्रसूतिका॥भूमेर्नवोदकंचैवदश
रात्रेणशुध्यतीति॥ ॥कश्चित्त्वदोषमाह॥व्याघ्रपादः॥अभावेकूपवापीनामनपापिपयोमृतां॥रजोदुष्टेपिपयसिग्रामभो
गोनदुष्यति॥ ॥वसिष्ठोपि॥उपाकर्मणिचोत्सर्गेप्रेतस्नानेनथैवच॥चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यते॥इत्यलंविस्तरेण॥
श्रावणशुक्लतृतीयामधुश्रवाख्याउत्तरेषुप्रसिद्धा॥सापरयुताग्राह्येतिदिवोदासः॥श्रावणशुक्लचतुर्थीपूर्वयुता॥मातृविरो
गरोध्वरइतिवचनात्॥श्रावणशुक्लपंचमीनागपूजादौपरैवेतिसामान्यनिर्णयउक्तः॥ ॥चमत्कारचिंतामणौ॥पंचमीनागपू
जायांकार्याषष्ठीसमन्विता॥तस्यांतुतुषितानागाइतरासुचतुर्थिकेति॥श्रावणेपंचमीशुक्लासंप्रोक्तानागपंचमी॥तांपरित्य
ज्यपंचम्यंचतुर्थिसहिताहिता॥ ॥इतिमदनरत्नेभिधानाच्च॥तेनपरैवेति॥ ॥अत्रविशेषोभविष्ये॥श्रावणेमासिपंच
म्यांशुक्लपक्षेनराधिप॥द्वारस्योभयतोलेख्यागोमयेनविषोल्बणा॥पूजयेद्विधिवद्वीरदधिदूर्वांकुरैःकुलैः॥गंधपुष्पोपहा
रैश्चब्राह्मणानांचतर्पणैः॥येतस्यांपूजयंतीहनागान्भक्तिपुरःसराः॥नतेषांसर्पतोवीरभयंभवतिकुत्रचित्॥श्रावण
शुक्लद्वादश्यांदधिव्रतमुक्तं॥अत्रैवविष्णोःपवित्रारोपणमुक्तं॥ ॥विष्णुरहस्ये॥श्रावणस्यसितेपक्षेकर्कटस्थेदिवाकरे॥
द्वादश्यांवासुदेवायपवित्रारोपणंस्मृतं॥द्वादश्यांश्रावणेवापिपंचम्यामथवाद्विजा॥अनुकूल्येनकर्त्तव्यंपंचदश्यामथापिवेति
शिवेनतत्रैवकालोत्तरे॥आषाढांतेचतुर्दश्यांनभस्येनभसोस्तथा॥अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोःसममिति॥ ॥अम

CC-0. In Public Domain. Digitization by eGangotri

देवतानां तु वक्ष्यते ॥ अधिवासनं तु दीपिकायां ॥ गोदोहांतरितेकाले पूर्वेद्युर्वाधिवासनमिति ॥ गौणाकालो रामार्चनचंद्रिकायां
पवित्रारोपणाविघ्नात्कुर्वाणो नभवेद्यदि ॥ कार्त्तिकावधि शुक्लाख्ये कर्त्तव्यमिति नारद ॥ हेमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः
कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्त्तितैः शुभैः ॥ कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् ॥ ततोत्तमपवित्रं तु षष्ट्यासहशतै
स्त्रिभिः ॥ सप्तत्या सहितं त्वर्धं शताभ्यां मध्यमं स्मृतं ॥ साशीतिनाशतेनैव कनिष्ठं तन्तमाचरेत् ॥ साधारणपवित्राणि त्रिभिः सू
त्रैः समाचरेत् ॥ उत्तमं तु शतग्रंथिमं वाशङ्कुथिमध्यमः ॥ कनिष्ठं तु पवित्रंस्यात्षट्त्रिंशत्कुथिशोभनं ॥ षट्त्रिंशच्च चतुर्विंशं द्वाद
शेति च केचन ॥ चतुर्विंशद्वादशाष्टाविंशके तु न यो विदुः ॥ हेमाद्रौ विष्णुरहस्येत्वन्यथोक्तं ॥ अष्टोत्तरशतं कुर्यात्तु पंचाश
देवता ॥ सप्तविंशतिरेवाथ ज्येष्ठमध्यकनीयसं ॥ अथ मनाभिमात्रं स्यादूरुमात्रं द्वितीयकं ॥ पलवतोजानुमात्रं प्रतिमायां निग
यते ॥ शीवपवित्रं तु तत्रैव शोवागमे ॥ स्फाटिकीम्यथवास्यत्रे स्त्रिंशतावाष्टयुक्तवा ॥ पंचशतावा कर्त्तव्यं तु स्यग्रंथं तरालकां ॥ द्वा
दशांगुलमानानि व्यासादष्टांगुलानि वा ॥ लिंगविस्तारमानानि चतुरंगुलकानि वेति ॥ अधिकारोपितत्रैव विष्णुरहस्ये ॥ ब्राह्मणा
क्षत्रियो वैश्यस्तथा स्त्रीशूद्रस्य च वा ॥ स्वधर्मावस्थिताः सर्वे भक्त्या कुर्युः पवित्रकं ॥ ॥ तथा ॥ अतो देवेति मंत्रेण द्विजो विष्णोर्नि
वेदयेत् ॥ शूद्रस्य मूलमंत्रो वा येन वा पूजयेद्धरिं ॥ स्त्रतन्त्रनित्यं ॥ न करोति विधानेन पवित्रारोपणं तु यः ॥ तस्य संवत्सरी पूजा निः
फला मुनिसत्तमाः ॥ तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ॥ वर्षे वर्षे प्रकर्त्तव्यं पवित्रारोपणं हरेरिति तत्रैवोक्तेः ॥ देवताविशेषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिथयोपि तत्रैव ॥ धनद १ श्रीरमा २ गौरी ३ गणेशः ४ सोम ५ राहुर्गुहः ६ भास्करा ७ चंडि ८ कांता ९ श्रीवासुकि १० श्वनतर्षयः
११ चक्रपाणि १२ ह्यनंगश्च १३ शिवो १४ ब्रह्मा १५ तथैव च ॥ प्रतिपत्प्रभृतिष्वेता पूज्यास्तिथिषु देवता ॥ यथोक्ताः शुक्लपक्षे
तु तिथयः श्रावणा वेति ॥ ॥ तथा हेमाद्रौ कालोत्तरे ॥ चतुर्दश्यामथाष्टम्यां सर्वसाधारणं तु तदिति ॥ तत्प्रकारस्तु रामार्चनचन्द्रि
कायां ॥ ततस्तानि पवित्राणि वेणावेपटले शुभे ॥ संस्थाप्य पुष्पवस्त्रेणापिधाय पुरतो – सेत् ॥ अरत्निसंमितां वेणीं कुर्यात्तु षट्
त्रिंशतांगुलै ॥ क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ॥ तेन तत्क्रियते तदेव तव तुष्ट्यै पवित्रकं ॥ न मे विघ्नो भवेद्देव कुरु नाथ
दयां मयि ॥ सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ॥ उपवासेन देवता तोषयामि जगत्पते ॥ कामक्रोधादयो प्येते न मे स्युर्व्रत
घातकाः ॥ अद्यप्रभृति देवेश यावद्वैशेषिकं दिनं ॥ तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोस्तु ते ॥ इति देवं संप्रार्थ्य ॥ कुंभं सं
स्थाप्य तत्र वंशपात्रे ॥ ओं संवत्सरस्य यागस्य पवित्रीकरणाय भोः ॥ विष्णुलोकात्पवित्राय आगच्छेह नमोस्तु ते ॥ अनेन सूत्रे
नचावाह्योत्तममध्यमकनिष्ठेषु विष्णुब्रह्मरुद्रान् सत्वरजस्तमांसि वेदत्रयं वनमालायां प्रकृतिं वा वाह्य त्रिसत्यां ब्रह्मविष्णुरु
द्रान् ग्रंथिषु क्रियापौरुषी ॥ वीरा विजया ईशा ॥ अपराजिता ॥ मनोन्मना ॥ जया भद्रा शक्तिष्वेतावाह्य संपूज्य ओं संवत्सरकृता
र्चायाः संपूर्णफलदायिनम् ॥ पवित्रारोपणायैतत् ॥ कृतकंधरते नमः ॥ विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनं सर्वकाम
प्रदं देव तवांगे धारयाम्यहमिति ॥ देवकरे मंगलसूत्रं बध्वा देवं संपूज्य निमंत्रयेत् ॥ आमंत्रितोसि देवेश पुराणपुरुषोत्तमः

रत्न ३३८

मानस्त्वां पूजयिष्यामि मानिष्यं कुरु केशव ॥ क्षीरोदधौ महानागशय्यावस्थितविग्रह ॥ प्रातस्त्वां पूजयिष्यामि संनिधो कुरु मे न
म ॥ निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकं ॥ सर्वथा सर्वदा विष्णो नमस्ते तु प्रसीद मे ॥ ॥ ततः पुष्पांजलिं दत्वा ॥ रात्रौ जागरणं
कुर्याद्दिनमधिवासने ॥ प्रातर्नित्यपूजां कृत्वा गंधदूर्वाक्षतयुतं पवित्रमादाय ॥ देवदेव नमस्तुभ्यं गृहाणेदं पवित्रकं ॥ पवित्री
करणार्थाय वर्षपूजाफलप्रदं ॥ पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतं ॥ शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर ॥ मूलसंपु
टितेनानेन दत्वांगदेवताभ्यो नाम्ना समर्प्य महानैवेद्यं ॥ दत्वा नीराजनामणिविद्रुममालाभिरित्यादिभिर्द्दमनरोपोक्तमंत्रैः
प्रार्थयित्वा गुरवे दत्वा शेषमश्व दत्वा स्वयं धारयेत् ॥ ॥ तथा मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ॥ देवे न मन्त्रसंदर्भदेशका
लविवधा ॥ ॥ हेमाद्रौ तु ॥ मूलमंत्रेणाज्यं कुर्याद्वा होमं धनपायसं ॥ पवित्रे धार्यमाणे वै नत्याज्यं देवतांतिके ॥ विसर्जयीत मंत्रे
णानेनैव पवित्रकं ॥ सांवत्सरीमिमां पूजां संपाद्य विधिवन्मम ॥ व्रजेदानीं पवित्र त्वं विष्णुलोकं विसर्जितः ॥ उत्तार्य ब्राह्मणाय द 337
द्यात्तोयेवाप्यविसर्जयेत् ॥ दिनस्तु कार्या ॥ अकरणे तु तत्रैव ॥ पवित्रारोपणकालेन करोति कथंचन ॥ तदा तु नंजपेन्मंत्रं वापि समा
हितः शतं ॥ ॥ इति पवित्रारोपणम् ॥ ॥ अथोपाकर्म ॥ तत्र बह्वृचानां प्रयोगपारिजाते शौनकः ॥ अथातः श्रावणे मासे श्रा रत्न
वणार्क्षयुते दिने ॥ श्रावणं श्रावणे मासि पंचम्यां हस्तसंयुते ॥ दिवसे विदधीतेन उपाकर्म यथोदितं ॥ अध्यायोपाकृतिं कु ३३८
र्यात्तत्रोपासनवह्निनेति ॥ अत्र पौर्णमास्युपसंहारन्यायेन यजुर्वेदिपरेति हेमाद्रिः ॥ अत्र हस्तयुता पंचमी उक्ता ॥ कालिकापि

१६२५

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तन्मासे हस्तयुक्तायां पंचम्यां वा तदिष्यत इति ॥ केवलपंचम्यां हस्तयुते न्यस्मिन्वा दिने इति तु हेमाद्रिः ॥ उपासनवह्निनेति तु क
र्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्वते इति ॥ कारिकोक्तलौकिकाग्निर्नाविकल्पते ॥ तच्चाप्यध्याप्येरन्वारब्ध इति सूत्रात्समस्तिष्व
त्वे तदधिकारिकस्याचार्यस्यैव नान्यस्याग्नावन्यो जुहुयादिति निषेधाल्लौकिकस्यैव ॥ तदभावे तु स्मार्त इति निष्कर्षः ॥ यद्यपि दीपि
कायां वेदोपाकृतिरोषधिप्रजनने पश्चेमिते श्रावणे इति शुक्लपक्षेपि सर्वेषां मुख्यकालत्वेनोक्तः ॥ वक्ष्यमाणगार्ग्यवचने
न छंदोग्यतिविहितस्य तस्याविरोधितः सर्वान्प्रति प्रवृत्तिश्च ॥ तथापि श्रावणमाससंबधस्य सूत्रोक्तत्वात् कृष्णपक्षेपि कार्य्य
मिति वृद्धाः ॥ ॥ तथा बह्वृचे ॥ अथातोध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पंचम्यां हस्तेन वा ॥ अत्र श्र
वणो मुख्योन्ये गौणाः तस्माद्धर्षणयोगे हेमाद्रौ व्यासः ॥ धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत् ॥ तत्कर्म सफलं ज्ञेयमुपा
करणसंज्ञितं ॥ श्रवणेन तु यत्कर्मोत्तराषाढसंयुतं ॥ संवत्सरकृतोध्यायस्तत्क्षणादेव नश्यतीति ॥ ॥ गार्ग्योपि ॥ उदयव्या
पिनी त्वेव विज्ञेया घटिकाद्वयं ॥ तत्कर्म सफलं ज्ञेयं तस्य पुराणत्वं न तत्कमिति ॥ पूर्वेद्युरुत्तराषाढयोगे पूर्वेद्युः श्रावणाभावे घ
टिकाद्वयन्यूनेवा पंचम्यां दौ कार्य्यं ॥ श्रवणयुतदिने संक्रान्त्यादौ च ॥ उपाकर्म न कुर्वीत क्रमान्मासमर्ग्यजुर्विदः ॥ ग्रहसंक्रान्तियु
क्ते पुहस्त श्रवणापर्वस्विति हेमाद्रौ निषेधात् पंचम्यादयो ग्राह्याः ॥ ॥ नवनरत्नेपि ॥ यदि स्याच्छ्रावणापर्व ग्रहसंक्रान्तिदूषि
तं ॥ स्यादुपाकरणं शुक्लपंचम्यां श्रावणस्य तु ॥ ॥ स्मृतिमहार्णवे ॥ संक्रान्तिग्रहणं वापि यदि पर्वणि जायते ॥ तन्मासे हस्त

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

रम
३३८

शुक्लायां पंचम्यां वा तदिष्यत इति ॥ ॥ तत्रापि ॥ प्रयोगपारिजाते वृद्धमनुकात्यायनौ ॥ अर्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणं तदा ॥ उपाकर्म
न कुर्वीत परतश्चेन्न दोषकृदिति ॥ ॥ मदनरत्नेगार्ग्योपि ॥ यद्यर्द्धरात्रादर्वाक्तु ग्रहसंक्रमणं भव: ॥ नैपाकर्म न तत्कुर्यात्कुर्वतां पापं श्रव
णोपि वा ॥ ॥ माधवीयेप्येवं ॥ यत्तु ॥ प्रतिपन्मिश्रिते नैव नोत्तराषाढसंयुते ॥ श्रवणे श्रावणं कुर्याद्ग्रहसंक्रांतिवर्जिते इति ॥ प्रतिप
न्मिश्रमिषे नैव नोत्तराषाढसंयुते ॥ श्रावणे श्रावणं कुर्याद्ग्रहसंक्रांतिवर्जिते ॥ इति प्रतिपन्मिश्रनिषेधकं वचनं तन्निर्मूलकं
मत्रं च वेदोपाकरणो प्राप्ते कुलीरसंस्थिते रवौ ॥ उपाकर्मेण कर्त्तव्यं कर्त्तव्यं सिंहयुक्तके ॥ इति वचनं देशान्तरविषयं ॥ नर्मदो
त्तरे भागे तु कर्तव्यं सिंहयुक्तके ॥ कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणा इति बृहद्बृहस्पतिवचनादिति प्रयोगपारिजाते नोक्ते
पराशरमाधवीयेप्येवं ॥ सामगा कुर्युः सिंहस्थोऽर्को भवेद्यदि ॥ सहस्तशुक्लपंचम्यां वा तद्ग्रहासंक्रमे ॥ असिंहार्के प्रोष्ठप
द्यां श्रावणो न व्यवस्थयेति ॥ तन्मूलालिखनाच्चिंत्यं ॥ श्रावणो सस्यात्तु गमादेतु वह्वृचपरिशिष्टे ॥ अप्रस्थौषधयस्तस्मिन्मासे तु
न भवंति चेत् ॥ तदा भाद्रपदे मासि श्रावणो वत्तदिष्यते इति ॥ तत्राप्यनुकूमे तु कुर्यादेव तद्वार्षिकमित्याचक्ष्यते ॥ इति सुचात् ३३८
वर्षत्तौ भवं वार्षिकं ॥ एतच्च शुक्रास्तादावपि कार्य्यं ॥ उपाकर्मोत्सर्जनं च पवित्रदमनार्पणमिति ॥ दमनोपे लिखितच्चवचात् ॥ रम
नित्यनैमित्तिके जप्ये होमयज्ञक्रियासु च ॥ उपाकर्मणि चोत्सर्गे – हवेधो न विद्यते ॥ इति प्रयोगपारिजातसंग्रहोक्तेः ॥ प ३३८
र्वणि ग्रहणे सति पूर्वेद्युः सत्त्वादिवेधाभावं च कृत्तुमिदं तेन पर्वणि ग्रहणेपि चतुर्दश्यां श्रावणो कार्य्यमिति हेमाद्रिः ॥ प्रथमारंभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तु न भवति॥ गुरु भार्गवयोर्मौढ्ये बाल्ये वा वार्द्धके पि वा॥ तथाधिमाससंसर्पे मलमासादिषु द्विजे॥ प्रथमोपाकृतिर्नस्यात्कृतं क
र्मविनाशकृत् इति तत्रैव कश्यपोक्तेः॥ एतच्चाधिमासे न कार्य्यं॥ उपाकर्मतथोत्सर्गः प्रसवाहेत्स्ववाष्टकामासवृद्धौ परे कार्या वर्जयि
त्वातु पैतृकमिति॥ ॥ पराशरोक्तेः॥ उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणि॥ अभिषेकादिकृद्धीनां न तूत्कर्षो युगादिषु इ
ति कात्यायनोक्तेश्च॥ ॥ यत्तु॥ उपाकर्मणि चोत्सर्गे ह्येतदिष्टं वृषादि तदिति॥ तत्पश्यृंगवचनं सामगविषयं॥ तेषां सिंहार्के
एवोक्तेः॥ एतच्च परान्हे कार्य्यं॥ उपाकर्मापरान्हे स्यादुत्सर्गः प्रातरेव हि इति॥ अध्यायानामुपाकर्म कुर्यात्काले पराह्णिके॥ पू
र्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति च हेमाद्रौ गोभिलोक्तेः॥ वस्तुतस्तु भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्णे एवेति प्रचेत
सो वचनात्सर्ववाक्यं सामगविषयं॥ तेषामपराह्णे एवोक्तेरित्युपदेक्ष्यते॥ ॥ दीपिकायां॥ अस्यास्तु विधेः पूर्वाह्णे एवस्म
तइति॥ यात्तु षास्तु पर्वणि कुर्युः॥ तच्चापरत्वे वैरोदयिकं ग्राह्यमन्यैस्तु पूर्वं॥ पर्वण्युदयिके कुर्युः श्रावणे तैत्तिरीयकाः॥ बह्वृचाः
श्रावणे कुर्युः संक्रान्तिवर्जिते इति गार्ग्योक्तेः॥ संप्राप्तवान् स्मृतिवचनात् पर्वण्योदयिके पुनः॥ अतो भूतदिने तस्मिन्नोयाकरणामि
ष्यत इति कालिकाखण्डाच्च॥ अत्र सिंगाभट्टीये विशेष उक्तः॥ श्रवणां श्रावणां पर्व संगवस्पृग्यदा भवेत्॥ तदेवौदयिकं कार्य्यं
नान्यदौदयिकं भवेत्॥ ॥ पराशरमाधवीयेपि॥ गार्ग्यः॥ श्रावणी पौर्णमासी तु संगवात्परतो यदि॥ तदैवौदयिकी ग्राह्या ता
न्यदौदयिकं भवेत्॥ कर्मकालमहाकालादर्शे भिगमः॥ श्रावण्यां पौष्ठ्यां वा प्रतिपत्स संगहूर्त्तके॥ विहास्याछंदसां तच्चो

र.ल
२३९

पाकर्मोत्सर्जनं भवेत्॥ अत्र पौर्णमासीति श्रवणाहस्तयोरुपलक्षणं॥ तेन तावपि संगवस्पृशौ उदये संगमे स्पर्शश्चेत्तौ पर्वणि
वार्जयेत्॥ ऊर्द्धं नभस्युपाकर्म ऋग्यजुःसामगाः क्रमादिति॥ पृथ्वीचंद्रः एतच्च ग्राधिके परं॥ कात्यायनादीनां तु दिनद्वये पूर्व
त्वव्याप्तौ एकदेशस्पर्शे वा॥ पूर्वैवेति हेमाद्रिः॥ यदपि॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी॥ पूर्वविद्धा तु कर्त्तव्या शिवरा
त्रिर्बलेर्दिनमिति॥ ब्रह्मवैवर्त्ते तद्ब्रह्मपवित्रश्रवणाकर्माणि दैवकर्मविषयमिति हेमाद्रिः॥ अत एव वचनात्कुलधर्मत्वता
दावपि पूर्वैव॥ मदनरत्नेप्येवं॥ मदनपारिजातेपि॥ पूर्वविद्धायां श्रावण्यां वाजसनेयिनामुपाकर्मेत्युक्तं॥ ॥मदनरत्ने तु
पर्वण्यौदयिके कुर्युः॥ श्रावणं तैत्तिरीयकाः॥ इति बह्वृचपरिशिष्टाद्बह्वृचान्प्रति कर्मविधानार्थं प्रवृत्ते तत्र तैत्तिरीयककर्म
विध्ययोगात् पूर्वोक्तकालिकापुराणादौ सामान्यत औदयिकपर्वप्राप्ते स्वविषेधेन बह्वृचानां श्रवणाविधानां तैत्तिरीयकपदं अ
नुवादत्वात्तस्य च प्राप्यधीनत्वात् प्राप्तेश्च यजुर्वेदिमात्रपरत्वात्सर्वयजुर्वेद्युपलक्षणार्थं अवश्यमनुवादो वा॥ न तु विधायकं॥ ये
न विशेषविधिना उपसंहारः स्यात्॥ अनुवादत्वाद्बह्वक्षणान दोषः॥ अन्यथा औदयिकपर्वविशिष्टोपाकर्मोद्देशेन कर्त्तृविधाने कर्त्तृ
विशिष्टे वा औदयिकपर्वविधौ वाक्यभेदापत्तेः॥ तस्मात्तैत्तिरीयकपदाविवक्षया सर्वयजुर्वेदिनामौदयिकमेव पर्वेत्युक्तं॥ त
न्नानतावन्मात्रशिष्टे बह्वृचाप्रत्येव विधिः॥ धनिष्ठाप्रतिपद्युक्तस्त्वाष्ट्रऋक्षसमन्वितमित्यादितदुदाहृते॥ एव परिशिष्टे वेदान्तरध
र्मविधानां दर्शनात्॥ तथा तु वायोदयं कारिकापुराणाद्बह्वृचादीनामपि नदापत्ते॥ ऊर्द्धं नभस्य विधित्वेन तस्येवार्थवादत्वेनैवमा

339

राम
२३९

९७४

श्रानुवादित्वाच्च तैत्तिरीयकानां गृह्ये तद्विरधिरस्ति ॥ येनानुवादः स्यात् ॥ नचवाक्यभेदः तैत्तिरीयकमात्रस्य कर्मपात्रस्य वाउद्देश्य
त्वायोगे न हविरार्जि वदष्ट वर्षत्राख्यणाम्रयनयितेति तच्चागत्या विशिष्टस्योद्देश्यत्वात् ॥ अन्यथोत्तरार्द्धे वहव यदस्याप्यविव
क्षायत्याश्रवणास्य सर्वत्राधारणापत्ते ॥ तस्माद्धेमाद्रिमतमेवयुक्तमितिदिक् ॥ इदं चाश्विन्या नध्यायन आवसथ्येऽग्नौ ॥ अन
ध्याय यतो नाधिकार इति कर्कः ॥ श्रावणमपि ग्रहणादिदुष्टाया कातीयभिन्नैः प्रौष्ठपद्यां कार्यं तं स्तु श्रावणपंचम्यां ॥ संक्रांति
ग्रहणं वापि पौर्णमास्यां यदिवेत् ॥ उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमा
द्रिः ॥ ॥ यजुर्बौधायनः ॥ श्रावणं पौर्णमास्यामाषाढ्यां वोपाकृत्य तू वेतन्त्रौघु यद्यामपि दोषे आधात्वांकार्य्यमित्येवमर्थं ॥ त
च्छाखीयविषयं ॥ सामगास्तु श्रावणे हस्ते कुर्युः ॥ वहवाः श्रवणे वै वह हस्तर्क्षे सामवेदिनः इति निर्णयामृते गोभिलोक्तेः सोप्युत्त
रः ॥ धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितं ॥ श्रावणीकर्म कुर्वीरन् नक्षत्रगुज्ञसामपाठका ॥ ॥ इति परिशिष्टोक्तेः ॥ ॥ सिंहे रवौ
तु पुष्यर्क्षे पूर्वाह्ने वरे वहि ॥ छंदोगामिलिनाकुर्युः रूत्सर्गं स्व स्व छंदसां ॥ शुक्लपक्षेतु हस्तेनः उपाकर्मापराह्णिकमिति ॥ पुष्यर्क्षे पू
र्वाह्ने उत्सर्गः ॥ अपराह्णिकमुपाकर्मेत्यन्वय ॥ ॥ प्रयोगपारिजाते गोभिलः ॥ उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते ॥ धारणा
ध्ययनां गत्वा गृहीणां ब्रह्मचारिणां उत्सर्जं च वेदानामुपाकरणाकर्मव ॥ अकृत्वा वेदजप्येन फलं नाप्नोति मानवः ॥ ॥ अथ प्रसंगा
त्तत्रैवोत्सर्जनमुच्यते ॥ तच्च पौषमासे रोहिण्यां तत्कृष्णाष्टम्यां वा कार्यं ॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा ॥ जलांते छंदसां

रल ३४० कुर्यादुत्सर्गविधिवद्बहिरिति याज्ञवल्क्योक्तेः ॥ श्रावण्यां प्रौष्ठपद्यां वोपाकृत्योक्तमत्रापौषशुक्लप्रतिपदि माघशुक्लप्रतिपदि
वा कार्य्यं ॥ अर्द्धपंचमान्मासानधीयीतेति तेनोक्तेः ॥ ॥ पञ्चमीति ॥ अर्द्धपंचमान्मासानत्योर्द्धमुत्सृजेत् ॥ पंचार्द्धषष्ठान्वेति
तदाषाढ्युपाकर्मविषयं ॥ बौधायनात्पौष्यां माघ्यां वा कुर्युः ॥ पौष्यां माघ्यां चोत्सृजेदिति नक्षत्रात् ॥ तैत्तिरीयैस्तु तैष्यां कार्य्यं ॥ तैष्यां
पौर्णमास्यां रोहिण्यां वा विरमेदिति नक्षत्रात् ॥ बह्वृचैस्तु माघ्यां कार्य्यं ॥ अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते ॥ ॥ इति का
रिकोक्तेः ॥ कतीयास्तु भाद्रपदे कुर्युः ॥ उत्सर्गश्चेत्तदा निष्यन्तिष्यां प्रौष्ठपदेपि वेति कात्यायनोक्तेः ॥ सामगास्तु सिंहार्के पुराणे कुर्युः
तथा वसिंहे रवौ त्विति गार्ग्यवचनं पूर्वमुक्तं सर्वैरुपाकर्मदिने वा कार्य्यं ॥ पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेथवेति ॥ ॥ हेमाद्रौ
खादिरगृह्योक्तेः ॥ यदा सिंहस्थे सूर्य्ये सति तन्मध्यस्थहस्तनक्षत्रात्प्राक्पुष्यः कर्कस्थो भवति ॥ तदा तस्मिन्पुष्ये उत्सर्गं कृत्वा
तदुक्ता हस्ते उपाकर्म सामगाः कुर्युः ॥ मासे प्रौष्ठपदे हस्तात्पुष्यः पूर्वो भवेद्यदा ॥ तदा श्रावणके कुर्यादुत्सर्गं छंदसां द्विज इति त
त्रैव परिशिष्टोक्तेः ॥ अत्र त्वापि सौरो मासो ज्ञेयो तेषां सौरस्यैवोक्तेः ॥ ॥ अत्र विशेषमाह कार्ष्णाजिनिः ॥ उपाकर्मणि चोत्स 340
र्गे यथाकालं समेत्य च ॥ ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्तत इति ॥ ॥ अत्र नदीनां रजोदोषो नास्ति ॥ उपाकर्मणि चोत्स
र्गे रजोदोषो न विद्यत इति गार्ग्योक्तेरिति ॥ अत्रैव रक्षाबंधनमुक्तं हेमाद्रौ भविष्ये ॥ तस्याप्युक्तं इदं प्रतिपद्युतायां न कार्य्यं न राम ३४०
दायादर्शने रक्षो बलिदानं दशास्व ॥ भद्रायां गोकुलक्रीडा देशनाशाय जायते ॥ इति मदनरत्ने ब्रह्मवैवर्त्तात् ॥ शांतिदः सर्व

९६५

विघ्नानां रक्षाबंधविधिस्मृतः ॥ इति भविष्यवचनात् ॥ इदं भद्रायां न कार्य्यं ॥ भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा ॥ श्रावणी
नृपतिं हन्ति ग्रामं दहति फाल्गुनीति संग्रहोक्तेः ॥ तत्सत्वे तु रात्रावपि तदंते कुर्यादिति निर्णयामृते ॥ ॥ मंत्रस्तु ॥ येन बद्धो बली
राजा दानवेंद्रो महाबलः ॥ तेन त्वामपि बध्नामि रक्षे मा चल मा चल ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः ॥ कर्त्तव्यो रक्षिका
चारो द्विजान्संपूज्य शक्तित इति ॥ अत्रैव हयग्रीवजयंति ॥ ॥ तदुक्तं कल्पतरौ ॥ श्रावणं श्रवणे जातः पूर्वं हयशिरा हरिः ॥ जगा
म साम वेदं तु सर्वकल्मषनाशनं ॥ स्नात्वा संपूजयेत्तं तु शंखचक्रगदाधरं ॥ अत्राश्वलायनेन श्रवणाकर्मोक्तं ॥ श्रावणपौर्ण
मास्यां श्रवणाकर्मेति ॥ तत्रास्तमययोगिनी ग्राह्या ॥ अस्तमितेस्थालीपाकं श्रपयित्वेति सूत्रात् ॥ श्रावणादिमासचतुष्टये
कृष्णपक्षद्वितीयासु अशून्यशयनव्रतं ॥ तत्र चंद्रोदयव्यापिनी दिनद्वये तु त्वेपरेति निर्णयामृते ॥ ॥ श्रीमहाराजगीर्वाणा
युद्धविक्रमवर्मणा ॥ कृता रत्नावली तत्र कृतश्रावणनिर्णयः ॥ ॥ सिंहे परा षोडशघटिकाः पुण्यकाल ॥ अन्यपूर्ववत् ॥
अत्र गोप्रसवे ऽद्भुतसागरे वादरायणः ॥ भानौ सिंहगते चैव यस्य गोः संप्रसूयते ॥ मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः ॥ तत्र
शांतिं प्रवक्ष्यामि येन संपद्यते शुभं ॥ प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥ ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः
आहुतीनां घृताक्तानां मधुनं तु कृपानमः ॥ व्याहृतिभिश्चाय होमः ॥ सोपवासप्रयत्नेन दद्याद्विप्राय दक्षिणाः मिति ॥ तथाः
सिंहराशौ गते सूर्ये गोप्रसूतिर्यदा भवेत् ॥ पौषे च महिषीसूते दिवैवाश्वतरी तथा ॥ तदानिष्टं भवेत्किंचित्तच्छांत्यै शांतिकं च

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३४१

रेन् ॥ अस्यवामेतिसूक्तेन तद्विष्णोरिति मंत्रतः ॥ जुहुयाद्घृततिलाज्ये नशतमष्टोत्तराधिकं ॥ मृत्युंजयविधानेन जुहुयाच्च तथाप्र
ते ॥ श्रीसूक्तेन ततः स्नाया: शांतिसूक्तेन वा पुनः ॥ मध्यरात्रेनिशीथे वा यदा गोर्क्षं दृश्यते सदा ॥ ग्रामे वा स्वगृहे वापि शान्तिकं पूर्ववद्
द्दिशेत् ॥ एवं श्रावणो वडवा प्रसवो दिने निषिद्धः ॥ तदुक्तमथर्ववेदिनं गार्ग्यपरिशिष्टे ॥ माघे तु हेव महिषी श्रावणे वडवादि
वा ॥ सिंहे गावः प्रसूयंते स्वामिनो मृत्युदायका· इति ॥ ॥ अत्र तदुक्तमृतावार्शान्तिः कार्या ॥ भाद्रे कृष्णतृतीयां कज्जलीसं
ज्ञा ॥ सापराग्राह्येति दिवोदासीये उक्तं ॥ भाद्रे कृष्णचतुर्थी च वकुलाख्या मध्यदेशे प्रसिद्धा: ॥ सा याहूव्यापिनी ग्राह्या दिनद्वयेत
न्ते पूर्वा ॥ गौर्यश्चतुर्थी च ८ धेनुपूजा दुर्गार्चनं तु भर्तृहरितालिके च ॥ वत्सस्य पूजा शिवरात्रिरेताः परान्विता घ्नंति नृपं सराष्ट्रमिति
दिवोदासीयवचनात् ॥ अत्र वत्सपूजायाः पृथक्पादनाद्धेनुपूजाशब्देन वकुलाख्या गृह्यते ॥ इति स एव व्याचक्षौ मदनरत्नेप्ये
वं ॥ अत्र गोपूजा पवान्नाशनं च न चैवोक्तं ॥ भाद्रकृष्णषष्ठी हलषष्ठी सप्तमीयुतेति ॥ दिवोदासः ॥ भाद्रकृष्णसप्तम्यां शीतलाव्र
तं तत्र पूर्वाग्राह्येति हेमाद्रौ ॥ ॥ अथ जन्माष्टमी ॥ सा च कृष्णादिनासेन भाद्रपदकृष्णाष्टमी तथा भाद्रपदेमासि कृष्णाष्टम्यां कलौ
युगे ॥ अष्टाविंशतिमे जातः कृष्णोसौ देवकीसुत इति कल्पतरौ ब्राह्मोक्ते ॥ अत्रेदं साधमतं ॥ अष्टमी द्वेधा जन्माष्टमी जयंती चे
ति ॥ तत्राद्या केवलाष्टमी ॥ येन कुर्वंति जानंतः कृष्णजन्माष्टमीव्रतं ॥ ते भवंति नराः प्राज्ञः व्याला व्याघ्राश्च कानने इति स्कांदरात्
दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला ॥ रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतमिति पुराणांतरात् ॥ श्रावणो वकुलेपक्षे

341
रत्न
३४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णजन्माष्टमीव्रतं॥ नकरोतिनरोयस्तु भवंतिक्रूरराक्षसः इति भविष्योक्तेश्च केवलाष्टम्याएवोपोष्यात्वावगते॥ सैवरोहिणीयुक्ता
जयंती॥ कृष्णाष्टम्यां भवेद्यत्रकालैकारोहिणीयदि॥ जयंतीनामसाप्रोक्ताउपोष्यासाप्रयत्नतः इति वह्निपुराणात्॥ अष्टमीकृ
ष्णपक्षस्यरोहिणीऋक्षसंयुता॥ भवेत्प्रौष्ठपदेमासिजयंतीनामसास्मृतेतिविष्णुरहस्यादिवचनाच्च ज्योतिरादिवत्संज्ञयाक
र्मभेदः॥ रोहिणीयोगश्चारोहात्रमुख्यः॥ निशीथमात्रेमध्यमः॥ दिवसादावधमः॥ अहोरात्रंतयोर्योगोह्यसंपूर्णोभवेद्यदि॥
मुहूर्त्तमप्यहोरात्रेयोगश्चेत्तामुपोषयेदितिवशिष्ठःसंहितोक्तेः॥ अर्द्धरात्रेतुयोगोयं तारापत्युदयेसति॥ नियतात्माशुचिःस्ना
तःपूजांतत्रप्रवर्त्तयेदितिविष्णुधर्मोक्तेः॥ व्यसरेवानिशायांवायत्रस्वल्पापिरोहिणी॥ विशेषेणनभोमासेसैवोपोष्यामनी
षिभिरितिपुराणांतराच्च॥ तत्रजन्माष्टमीव्रतंनित्यं॥ पूर्वोक्तवचप्रअकरणेनिन्दाश्रुतेः॥ वर्षेवर्षेतुयानारीकृष्णजन्माष्टमी
व्रतं॥ नकरोतिमहाप्राज्ञव्यालीभवतिकाननेइतिस्कांदेवीप्याश्रुतेश्च॥ मदनरत्नस्कांदेत्वत्रफलमप्युक्तं॥ जन्माष्टमीव्रतं
येवैप्रकुर्वंतिनरोत्तमाः॥ कारयंत्यथवानूलोकात्रलक्ष्मीतेषांसदास्थिरा॥ सिध्यंतिसर्वकार्याणिकृतेजन्माष्टमीव्रतेइति॥ ज
यंतीव्रतंतुनित्यकाम्यं॥ महाजयार्थंकुरुतांजयतीमुक्तयेनघ धर्ममर्थंचकामंचमोक्षंचमुनिपुंगव॥ ददातिवांछितानर्था
न्येचान्येप्यतिदुर्लभा॥ इतिस्कांदादौफलश्रुतेः॥ शूद्रान्नेनतुयत्पापंशवहस्तस्यभोजने॥ तत्पापंलभतेकृतिजयतीविमुखो
नरः॥ नकरोतियदाविष्णोजयंतीसंभवंव्रतं॥ यमस्यव्रतमापन्नःसहतेनारकींव्यथामित्यकरणेनिंदाश्रुतेश्च॥ यदावपूर्वे

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३४२

रुः परेद्युर्वा रोहिणीयोगस्तदा जन्माष्टमी जयंत्यामंतर्भूता ज्ञेया न तु जन्माष्टमीव्रतं पृथक्कार्यं ॥ ॥ तदुक्तं माधवेनैव ॥ यस्मि
न्वर्षे जयंत्याख्यो योगो जन्माष्टमी तदा ॥ अंतर्भूता जयंत्यां सा ह्यक्षयोगप्रशस्तितः इति ॥ हेमाद्रिस्तु रोहिणीसंयुतोपोष्या सर्व
दोषविनाशिनी ॥ अर्द्धरात्रादधश्चोर्द्ध्वं कलयापि यदा भवेत् ॥ जयंतीनाम सा प्रोक्ता सर्वपापप्रणाशिनीत्यग्निपुराणादर्द्ध
रात्रस्यैव रोहिणीयोगस्य प्राशस्त्यात् ॥ अर्द्धतमपि लभ्येतेत्यादीनां वार्द्धरात्रयोगेप्युपपत्तेर्न जयंतिव्रतभिन्नं । तत्त्वे हेतुर्हेमा
द्रिमतेपि जयंतीव्रतभिन्नमेव ॥ उपयेवाष्टमी त्वस्य तेन जयंती परत्वोक्ते ॥ ॥ किंच ॥ रोहिण्यामर्द्धरात्रे च यदा कृष्णाष्टमी
भवेत् ॥ तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमिति विष्णुधर्मोक्तेः ॥ समायोगे तु रोहिण्यां निशीथे राजसत्तम ॥ समजाय
त गोविंदो बालरूपी चतुर्भुजः ॥ तस्मात्तं पूजयेत्तत्र यथावित्तानुरूपतः ॥ इति वह्निपुराणाच्चार्द्धरात्रस्य कर्मकालत्वमवसी
यते ॥ अतः कर्मणो यस्य यः काल इत्यादिवचनात्पूर्वेद्युरेव प्राप्तेः परदिने रात्रावपि रोहिणीयोगस्य न प्रयोजकत्वं ॥ अन्य
था बुधवारादेरपि तत्त्वापत्तेः ॥ ॥ किंच ॥ जयंतीशब्दो रात्रीविशेषवचनः ॥ अभिजिन्नाम नक्षत्रं जयंती नाम शर्वरी ॥ मु
हूर्तो विजयो नाम यत्र जातो जनार्दन इति ब्रह्माण्डपुराणात् ॥ तेन तद्योगि रोहिण्यां गौणत्वान्न तु भेदः ॥ यत्तु वासरे वा नि
शायां वेति तन्निर्णयामृतकृन्मतेन निशीथयोगस्यैव मुख्यत्वे सूर्योदयेर्द्धरात्रयोगाभावे वा प्राशस्त्यार्थं ॥ ॥ यद्यपि । दिवा वा
यदि वा रात्रौ नास्ति चेद्रोहिणी कला ॥ रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतामित्यनेन रोहिणीयोगाभावेर्द्धरात्रव्याप्तिर्य

342

राम
३४२

६८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्यप्रोक्ता ॥ तथापि ॥ यस्मिन् वर्षे जयंतीयोगो नास्ति तत्र जयंतीव्रतलोपे प्राप्तेष्टमीमात्रे जयंतीव्रतं कार्यमित्येवं परमिदमिति त
दाशयः ॥ अत एवोक्तं जयंती नाम शर्वरीति ॥ ॥यच्च स्कान्दे॥ उदये वाष्टमी किंचिन्नवमी सकलादि ॥ भवते बुधसंयुक्ता प्राजापत्य
र्क्षसंयुता ॥ अपि वर्षशतेनापि लभ्यते वाथवा न वेति ॥ ॥यच्च पाद्मे॥ प्रेतयोनिगतानां तु प्रेतत्वं नाशितं तु धै ॥ येकृता श्रावणे मा
सि अष्टमी रोहिणीयुता ॥ किं पुनर्बुधवारेण सोमेनापि विशेषतः ॥ किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति तदा नादिविषयं
अत्र निशीथस्थ व्याप्त्य ॥ पूर्वोक्तवचनेन तस्यैव मुख्यकालत्वोक्तेः ॥ अष्टमी शिवरात्रिश्च मध्ये रात्राद धो यदि ॥ दृश्यते घटिका या सा
पूर्वविद्धा प्रकीर्तितेति ॥ ॥माधवीय पुराणान्तरात्॥ अर्द्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत् ॥ तस्यामभ्यर्चनं शौरेर्हन्ति पापं
त्रिजन्मजमिति भविष्योक्तेः ॥ अष्टमी रोहिणीयुक्ता निश्यर्द्धे दृश्यते यदि ॥ मुख्यकालइति ख्यातस्तत्र जातो हरिः स्वयमिति ॥
वशिष्ठसंहितोक्तेश्च ॥ तत्राष्टमी द्विधा रोहिणीरहिता तद्युता च ॥ आद्यापि चतुर्धा पूर्वेद्युरेव निशीथयोगिनी परेद्युरेवोभयद्युर
नुभयेद्युश्चेति ॥ तत्राद्ययोरसंदेह एव कर्मकालव्याप्तः ॥ जन्माष्टमी रोहिणी वा शिवरात्रिस्तथैव च ॥ पूर्वविद्धैव कर्त्तव्या तिथिभां
ते च पारणमिति भृगूक्तेश्च ॥ अस्मात्केवलरोहिण्युपवासोपि सिद्धः ॥ अन्त्ययोः परैव ॥ प्रातः संकल्पकालव्याप्तेराधिक्यात् ॥ वर्ज
नीया प्रयत्नेन सप्तमीसंयुताष्टमीति ब्रह्मवैवर्ताच्च ॥ एवं मध्यतः समव्याप्तावपि ॥ विषमव्याप्तौ त्वाधिक्येन निर्णयः रोहिणी
युतापि चतुर्धा ॥ पूर्वेद्युरेव निशीथे रोहिणीयुता परेद्युरेवोभयेद्युरनुभयेद्युश्च ॥ अत्राद्ययोरसंदेहः कार्याविद्धापि सप्तमी रोहि

CC-0. In Public Domain. Digitization by eGangotri

राम ३४३ णीसहिताष्टमीतिपाद्मोक्तेः ॥ जयंत्यांपूर्वविद्धायांउपवासंसमाचरेदितिगारुडात ॥ सप्तमीसहिताष्टम्यांनिशीथेरोहिणीयदि ॥ भविता
साष्टमीपुण्यायावच्चन्द्रदिवाकराविति वह्निपुराणाच्च ॥ द्वितीयपक्षेसंदेहस्यवक्तनीयपक्षेपरेव ॥ वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी
सऋक्षापिनकर्त्तव्यासप्तमीसंयुताष्टमीतिब्रह्मवैवर्त्तात् ॥ चतुर्थ्यपिद्वेधा ॥ पूर्वेद्युर्निशीथेष्टमीपरेद्युरोहिणी ॥ ४ ॥ परेद्युरष्टमीपू
र्वेद्यूरोहिणी ॥ ५ ॥ उभयेद्युरुभयस्यनिशीथव्याप्त्यसंबंधोवेति ॥ आद्येपरेद्युर्जयंतीयोगस्यसत्वात्परैतिमाधवः ॥ तदुक्तंतेनैवः य
स्मिन्वर्षेजयंत्याख्ययोगोजन्माष्टमीनदा ॥ अंतर्भूतांजयंत्याख्यांदृष्टयोगप्रशस्तितः ॥ इतिः ॥ पूर्वविद्धाष्टमीयातुउदयेनवमी
दिने ॥ मुहूर्तमपिसंयुक्तासंपूर्णासाष्टमीभवेत् ॥ कलाकाष्ठामुहूर्तापियदाकृष्णाष्टमीतिथिः ॥ नवम्यांसैवग्राह्यास्यात्सप्तमी
संयुतानहीतिपाद्मोक्तेश्च ॥ तत्वेतुअष्टम्याःकर्मकालव्याप्तेदिवावायदिवारात्रौनास्तिचेद्रोहिणीकला ॥ रात्रियुक्तांप्रकुर्वीतेति
पूर्वोक्तवाक्येरोहिणीयोगाभावेग्राह्यत्वोक्तेर्वचनात्कर्मकालव्यापिनींत्यक्त्वापूर्वापरावाव्यापिरोहिणीयुताजयंत्यांग्राह्या ॥ उपवा
सद्वयंकार्य्यंद्वयोर्नित्यसत्वादितितत्वं ॥ अंत्ययोपरैव ॥ सप्तमीसंयुताष्टम्यांभूत्वाऋक्षंद्विजोत्तमः ॥ प्राजापत्यंद्वितीयेहिमुहूर्ता
र्धंभवेद्यदि ॥ तदाष्टयामिकंप्राप्तंप्रोक्तंव्यासादिभिःपरैरितिस्कान्दात् ॥ मुहूर्त्तेनापिसंयुक्तासंपूर्णासाष्टमीभवेत् ॥ किंपुनर्नवमी राम
युक्ताकुलकोट्यास्तुमुक्तिदेति ॥ पाद्मावेतिदिक् ॥ पारणंतु ॥ तिथिरष्टगुणांहंतिनक्षत्रंचचतुर्गुणां ॥ तस्मात्प्रयत्नतःकुर्यात्ति ३४३
थिभांतेचपारणामितिब्रह्मवैवर्त्तात् ॥ तिथ्यार्क्षयोर्यदाछेदोनक्षत्रांतमथा – – ॥ अर्द्धरात्रेथवाकुर्यात्पारणंत्वपरेहनीति ॥ हे

343

१६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

माडौ ववना वार्द्धरात्रे प्ययमयां नेष्यनरांते वे निर्णयः पक्षः ॥ सर्वेष्वेवोपवासेषु दिवा पारणमिष्यत इति ब्रह्मवैवर्त्तेन्नव्यविषयं ॥ दिने
प्रत्यक्षकाललाभे त्वन्तरांते वाज्ञयं ॥ ॥ गोतमस्तु ॥ नरात्रौ पारणां कुर्य्यादृते वै रोहिणीव्रतात् ॥ तत्र निशापि तत्कुर्य्याद्वर्जयित्वा महानिशा
मिति ॥ ब्रह्माण्डपुराणात् रात्रौ सार्द्धप्रहरमध्ये कार्य्यं ॥ मतिशान्तु विज्ञेया मध्यमं मध्यमयामयोः ॥ ॥ तथा ॥ मध्यमप्रहरे मात्रे विज्ञेया
तु महानिशेति स्मृतं नरान् ॥ ॥ कालान्तरीयमदनरत्ने चैव ॥ कामधेनौ गर्गस्तु ॥ महानिशान्तु विज्ञेया मध्यमं प्रहरद्वयमित्याह ॥ ॥ वृ
द्धशातातपस्तु ॥ महानिशा द्वे घटिके रात्रौ मध्यमयामयोरित्याह ॥ वेदपाठपरमेतदित्यन्ये ॥ महानिशायामन्यतरांते नतीयेदि
ने पारणां कार्यं ॥ अपरेह्नी त्रियारणोत्तरदिनपरत्वात् ॥ अयं त्वा ॥ उभयांतां पेक्षणादित्याऊः ॥ तत्वत्तु महानिशातो वमित्यन्तरां
तलाभे महानिशानिषेधः ॥ महानिशायामेवलाभे तत्रैव पारणमिति ॥ अशक्तौ तु वह्निपुराणे भोजने कुर्य्यात् तिथेर्वापि शस्त भारतपार
णामिति ॥ ॥ विष्णुधर्मेच ॥ जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् ॥ तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्वीत पारणं ॥ तिथ्यन्ते चोत्सवां
ते वा व्रती कुर्वीत पारणमिति कालादर्शोक्तश्चेति संक्षेपः ॥ अष्टम्यां विशेषो हेमाद्रौ भविष्ये ॥ ततोष्टम्यां तिलैः स्नातो नद्यादौ विमलेज
ले ॥ सुदेशे शोभनं कुर्य्याद्देवक्याः सूतिकागृहं ॥ तन्मध्ये प्रतिमास्थाप्या सा चाप्यष्टविधा स्मृता ॥ कांचनी राजती ताम्री पैत्तली मृन्मयी
तथा ॥ वार्क्षी मणिमयी चैव वर्णकैर्लिखिताथवा ॥ सर्वलक्षणसंपूर्णा पर्यंके च पटावृता ॥ देवकीं तत्र वै कस्मिन् प्रदेशे सूतिकागृ
हे ॥ प्रसूतां च प्रसूतां च स्थापयेन्मंचकोपरि ॥ कश्यपो वसुदेवोयमदितिश्चैव देवकी ॥ देवकीं तत्र चैकस्मिन् प्रदेशे सूतिकागृहे

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३५४

प्रसूतां च प्रसूतां वस्थापयेच्छोभो वैवलभद्रो पं यशोदा क्षितिरन्वभूत् ॥ नन्दः प्रजापतिर्द्रोणो गर्गश्चापि चतुर्मुख ॥ गोधेनुः कुंजरश्चैव दान
वाः शस्त्रपाराय ॥ लेखनीयश्च तत्रैव कालियो यमुनाह्रदे ॥ इत्येवमादि यत्किंचिद्दृश्यते चरितं मम ॥ लेखयित्वा प्रयत्नेन पूजयेद्भक्तित
न्नरः ॥ मंत्रेणानेन कौंतेय देवकीं पूजयन्नरः ॥ गायद्भिः किन्नराद्यैस्तु सततं परिवृता वेणुवी ॥ णानिनादैः भृंगारादर्शमंकुशप्रवरकृ
तकरैः किंकरैः सेव्यमाना पर्यंके स्वास्तृते या मुदितनरसुखीभिर्वृणी सम्यगास्ते सा देवी देवमाता जयति सुतनया देवकी कांतरू
पा ॥ पादौ सेवाहयं तौ श्रीर्देवकाश्चरणांतिके ॥ निषण्णा पंकजे पूज्या नमो देव्यै श्रियै इति ॥ अर्धरात्रे वसोर्धारां पातयेद्गुडसर्पिषा
नाडीवर्द्धापनं षष्ठी नामादेः करणं मम ॥ ततो मंत्रेण वै दद्यादर्घ्यं पार्थ समाहितः ॥ शंखतोयं समादाय सपुष्पं कुशचंदनं ॥ जानु
भ्यां धरणीं गत्वा चंद्रायार्घ्यं निवेदयेत् ॥ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव ॥ गृहाणार्घ्यं शशांकेमं रोहिण्या सहितो मम ॥ ज्यो
त्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते ॥ नमस्ते रोहिणीकांत अर्घ्यं नः प्रतिगृह्यतां ॥ प्रभाते ब्राह्मणान् शक्त्या भोजयेद्भक्तिमान
रः ॥ ॐ नमो वासुदेवाय गोब्राह्मणहिताय च ॥ शांतिरस्तु शिवं चास्तु इत्युक्त्वा मां विसर्जयेत् ॥ इदं प्रतिमासकृष्णाष्टम्यामप्युक्तं
मदनरत्ने वह्निपुराणे ॥ प्रतिमासं मम पूजामष्टम्यां यः करिष्यति ॥ मम वै चाखिलान् कामान् संप्राप्स्यत्यसंशयं ॥ अनेन विधिना रत्न
यस्तु प्रतिमासं नरेश्वर ॥ करोत्वत्सरं पूर्णां यावदागमनं हरेः ॥ दद्याद्धव्यां स संपूर्णां गोभी रत्नैरलंकृतं ॥ ॥ इति जन्माष्टमीव्रतं ॥ ३५४
भाद्रमावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन ॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः ॥ अयातयामास्ते दर्भा विनियोज्याः

344.

१७२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुनः पुनः॥ नभाश्रावणः॥ तेन दर्शान्तमासे जन्माष्टमान्तेन स्वर्णो लभ्यते॥ मदनरत्ने तु॥ मासे नभस्ये मावास्या तस्यां दर्भोच्चयो म
तः॥ ॥ इति मरीचिवाक्यमुक्तं॥ नभस्यां भाद्रपदः॥ तेन महालयान्तर्गतदर्शो लभ्यते॥ गोडास्तु वचनाभ्यामेक एव दर्श इत्यन्ये
भाद्रशुक्लतृतीया हरितालिकाव्रतं॥ तत्र परा ग्राह्या॥ मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रतं परे॥ शुद्धाधिकायामप्येवं गणयोग
प्रशंसनादिति माधवोक्तेः॥ आद्या मधुश्रावणिका कज्जली हरितालिका॥ चतुर्थी मिश्रिता स्त्रीभिर्दिवा नक्तं विधीयते॥ तृतीया न
भसः शुक्ला मधुश्रावणिका स्मृता॥ भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिकेति॥ दिवोदासोदाहृतवचनाच्च॥ भाद्रशुक्लचतुर्थी सि
द्धिविनायकव्रतं॥ तत्र मध्याह्नव्यापिनी ग्राह्या॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपेति हेमाद्रौ भविष्योत्तरे वचनोक्तेः॥ ॥मद
नरत्नेप्येवं॥ परदिन एव तद्देशेन सा कल्येन वा मध्याह्नव्याप्त्यभावे सर्वपक्षे पूर्वैव ग्राह्या॥ ॥तथा च बृहस्पतिः॥ चतुर्थी गणनाथस्य
मातृविद्धा प्रशस्यते॥ मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेहनीति॥ मातृविद्धा प्रशस्तास्याच्चतुर्थी गणनायके॥ मध्याह्ने परतश्चेत्स्या
न्नागविद्धा प्रशस्यते॥ इति माधवीये स्मृत्यन्तराच्च॥ इयं रविभौमयोरतिप्रशस्ता॥ भाद्रशुक्लचतुर्थ्यां भौमेनार्केण वा युता॥ महती
सात्र विघ्नेशमर्चित्वेष्टं लभेन्नर इति वाराहोक्तेः॥ अत्र चन्द्रदर्शनं निषिद्धं तथा चापरार्के॥ ॥ मार्कण्डेयः॥ सिंहादित्ये शुक्लपक्षे चतु
र्थ्यां चन्द्रदर्शनं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदेति॥ चतुर्थ्यां न पश्येदित्यन्वयः॥ प्रधानक्रियालाभात्॥ तेन चतुर्थीशुद्धि
तस्य पंचम्यां न निषेधः॥ ॥ पराशरोपि॥ कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा॥ त

CC-0. In Public Domain. Digitization by eGangotri

रत्न दोषशान्तये। सिंहः प्रसेनमित्यतिवै पठेदिति ॥ ॥श्लोकस्तु विष्णुपुराणे॥ सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः॥ सुकुमारक मा रो
३४५ दीस्तव ह्येष स्यमन्तकः इति भाद्रशुक्लपंचमी ऋषिपंचमी सा मध्याह्नव्यापिनी परा॥ सितायपरयुतास्यात् पंचमीति दीपिकोक्तेः॥ मा
धवमते पूर्वा सर्वत्र पंचमी पूर्वेत्युक्तेः॥ पंचमीव्रतकर्तव्या षष्ठ्या युक्ता च नारद॥ नहि षष्ठी नागविद्धा कर्तव्या सर्वदा बुधैरिति
पंचम्याः समन्वितत्ववचनं ऋषिपंचमीव्रतपरं॥ ऋषिपंचमी षष्ठीयुतैवेति दिवोदासः॥ युग्मवाक्यान्निर्णायकत्वोक्तेः॥ अत्र ऋ
षीन् प्रतिमासु पूजयित्वा अकृष्टभूमिजशाकेन वर्तनं॥ एवं सप्तवर्षाणि कृत्वा सप्तकुंभेषु प्रतिमासु संपूज्य परेह्नि तन्मध्ये गाम्भो
नरश्चान्नं तिलान् कृत्वा सप्तब्राह्मणान् भोजयेदिति निर्णयामृते॥ भाद्रशुक्लषष्ठी स्कन्दषष्ठी सा सप्तमीयुतेति दिवोदासः॥ शुक्ले भा
द्रपदे षष्ठ्यां स्नानं भास्करपूजनं॥ प्राशनं पंचगव्यस्य अश्वमेधफलाधिकमिति वचनात्॥ ॥कल्पतरौ भविष्ये॥ यं यं भाद्रपदे
मासि षष्ठी स्यात् भरतर्षभ॥ योस्यां पश्यति गाङ्गेयं दक्षिणापथवासिनं॥ ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः॥ गाङ्गेयः स्वामिका 345
र्त्तिकेयः॥ भाद्रशुक्लाष्टमी दूर्वाष्टमी सा पूर्वा ग्राह्या॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी॥ पूर्वविद्धा तु कर्तव्या शिवरात्रिर्ब
लेर्दिनमिति॥ बृहद्यमोक्तेः॥ शुक्लाष्टमीतिथिर्या तु मासि भाद्रपदे भवेत्॥ दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयत इति पुराणस रत्न
मुच्चयाच्च॥ यत्तु मूलेनैरोहिणोष्टम्या दूर्वा वा यदि वापरा॥ ॥तथा॥ एकभक्ते पूजिता दूर्वा हन्त्यपत्यानि नान्यथा॥ भर्तुरायुर्हरा मू ३४५
ले तस्मात्तां परिवर्जयेदिति॥ तत्रैव॥ तन्निषेधात्॥ इदमगस्त्योदये कन्याके वनकार्यं॥ शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्टमी ॥ सिंहार्कस्य च कर्त्तव्या न कन्यार्के कदाचन ॥ सिंहस्थे सोऽतमासर्ये तु दिने सुनिस्तनमः ॥ ॥ इति मदनरत्ने स्कांदोक्तेः ॥ अगस्त्यउ
दितेतानः पूजयेदमृतोद्भवां ॥ वैधव्यं पुत्रशोकं च दशवर्षाणि पंच वेति ॥ ॥ तत्रैव दोषोक्तेश्च भाद्रशुक्लाष्टम्यामगस्त्योदये माविनि
सति पूर्वं कृत्स्नाष्टम्यामेव कुर्यादिति हेमाद्रिः दीपिकाप्येवं ॥ इदं च तु नंस्त्रीणां नित्यं ॥ या न पूजयते दूर्वां मोहादिह यथाविधि ॥ त्रीणि
जन्मानि वैधव्यं लभते नात्र संशय ॥ तस्मात्सा पूजनीया सा प्रतिवर्षं वधूजनैरिति ॥ उत्तरामासमुत्त्वयात् ॥ यदा ज्येष्ठादिकं विष्टमी नल
भ्यते ॥ तदा न तैवोक्तं ॥ कर्त्तव्या वैकभक्तेन ज्येष्ठामूलं यदा भवेत् ॥ दूर्वामभ्यर्च्य यो भक्त्या न वधं दिवसं नयेदिति ॥ अत्र विधिर्मदन
रत्ने भविष्ये ॥ ॥ भवोद्देशे प्रजातायां दूर्वायां ब्राह्मणोत्तमः ॥ स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः समर्चयेत् ॥ दध्यक्षतैर्द्विज
श्रेष्ठ अर्घं दद्यात्त्रिलोचन ॥ दूर्वासमीभ्यां विधिवन्न पूजये ल्कुद्ध्यान्वितः ॥ ॥ मंत्रस्तु ॥ त्वं दूर्वे मृतजन्मासि वंदितासि सुरासुरैः ॥ सौ
भाग्यं संततिं देहि सर्वकार्यकरी भव ॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले ॥ तथा ममापि संतानं देहि त्वमजरामरमिति
अत्रानग्निपक्वं भक्षयेत् ॥ अनश्रीयकमश्नीयाद्दं तु दधिफलं तथा ॥ अक्षारलवणां तु मत्स्य नश्रिया नृ मधुनान्वितामिति भविष्योक्ते
भाद्रपदे धिमासे समतिस्कांदे ॥ अधिमासे तु संप्राप्ते नभस्य हृदये तु ते ॥ अर्वाक्तु दूर्वाव्रतं कार्यं परतो नैव कुत्रचित् ॥ अत्रैव ज्येष्ठाश्
जोक्तास्कांदे ॥ मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायोः परिपूजनमिति तत्रैवोक्ते ॥ ॥ अस्यापवा
दः ॥ यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणु ॥ तस्मिन्हविष्यपूजाय मूनावेनूर्ववासरे इति ॥ इदं केवलतिथौ नक्षत्रे वोक्ते ॥ न

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३४६

त्राणं केवलतिथौ कार्य्यः अत्र केवलर्क्षे तदुक्तं मात्स्ये ॥ प्रत्यादिकं तिथ्यादुक्तं यज्ज्येष्ठा देवतं व्रतं ॥ प्रतिज्येष्ठाव्रतं यच्च विहितं केवलो
दुक्ति ॥ तिथावेवाचरेदाद्ये द्वितीये केवलर्क्षतः इति ॥ ॥ अतएव भविष्ये ॥ नक्षमात्रेदुक्तं ॥ मासि भाद्रपदे शुक्ले -- ज्येष्ठा यदा
भवेत् ॥ रात्रौ जागरणं कृत्वा एभिर्मन्त्रैश्च पूजयेदिति ॥ दाक्षिणात्यास्तु अतएव कुर्वन्ति हेमाद्रौ स्कान्देपि ॥ मासि भाद्रपदे शुक्ले पक्षे
ज्येष्ठर्क्षसंयुते ॥ यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति तथा ॥ मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् ॥ मूले विसर्ज
येद्देवीं दिनेत्रतव्रतमामिति ॥ ॥ मंत्रस्तु ॥ एह्येहि त्वं महाभागे सुरासुरनमस्कृते ॥ ज्येष्ठे त्वं सर्वदेवानां मत्समीपगता भवेत्यावाहनमन्त्र
वर्णामिति संपूज्य ॥ ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः ॥ शर्वायै ते नमस्तुभ्यं शाकर्यै ते नमो नमः ॥ ज्येष्ठश्रेष्ठतपोनिष्ठे ब्रह्मि
ष्ठे सत्यवादिनि ॥ एह्येहि त्वं महाभागे अर्घं गृह्ण सरस्वतीर्थैः ॥ भाद्रशुक्लद्वादश्यां श्रवणायोगरहितायां पारणं कुर्यात् ॥ आभा
सितपक्षे क्षितिदिवोदासोदाहृतवचनात् ॥ उपोष्यैकादशीमोहात्पारणं श्रवणे यदि ॥ करोति हन्ति तत्पुण्यं द्वादशद्वादशीभ
वमिति ॥ ॥ तत्रैव स्कान्दात्तु ॥ अत्र तत्रैव प्रतिप्रसवः ॥ ॥ मार्कण्डेयः ॥ विशेषेण महीपाल श्रवणं वर्द्धते यदि ॥ तिथिक्षयेन
भोक्तव्यं द्वादशी लंघयेन्नहि इति ॥ ॥ केचित्तु ॥ यदात्वपरिहार्यो योगस्तदा श्रवणनक्षत्रे चतुर्धा विभक्ते मध्यमविंशतिघटिकायोगं
त्यक्त्वा पारणं कार्यं ॥ ॥ तदुक्तं विष्णुधर्मे ॥ श्रुतेश्च मध्ये परिवर्तमेति सुप्तप्रबोधे परिवर्तनमेव वर्ज्यमिति ॥ अत्रैव विष्णुपरिव
नोत्सवं कुर्यात् ॥ संध्यायां विष्णुं संपूज्य प्रार्थयेत् ॥ ॥ मंत्रस्तु ॥ तिथितत्त्वे उक्तः ॥ ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ॥ पा

346
राम
३४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्श्वेन परिवर्तनोत्सवं कुर्यात् ॥ संध्यायां विष्णुं संपूज्य प्रार्थयेत् ॥ ॥ मंत्रस्तु ॥ तिथितत्वे उक्तः ॥ ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी त
व ॥ पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधवेति ॥ अत्रैव शक्रध्वजोत्थापनमुक्तं मपरार्के गार्ग्येण ॥ द्वादश्यां तु सिते पक्षे मासि प्रोष्ठपदे
तथा ॥ शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे ॥ इयमेव श्रवणद्वादशी ॥ तत्रैकादश्यां श्रवणद्वादशीश्रवणायोगे सैवोपोष्या। ए
कादशी द्वादशी चैव वैष्णव्यमपि तत्र वै तत् ॥ तद्विष्णुशृंखलं नाम विष्णुसायुज्यकृद्भवेदिति विष्णुधर्मोक्तेः ॥ ॥ नारदीयेपि ॥ संस्पृशे
कादशी राजन् द्वादशी यदि संस्पृशेत् ॥ श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति ॥ द्वादशी श्रवणास्पृष्टा स्पृशेदेकादशीं यदि ॥ स ए
व वैष्णवो योगो विष्णुशृंखलसंज्ञित इति हेमाद्रौ मात्स्योक्तेश्च ॥ दिनद्वये द्वादशीश्रवणायोगेपि पूर्वा निर्णयामृते त्वस्य पूर्वार्द्धमन्य
थापठितं ॥ द्वादशीं श्रवणर्क्षं च स्पृशेदेकादशीं यदि ॥ स एव वैष्णवो योगो विष्णुशृंखलं भवति निर्णयामृते तन्मते तु श्रवणस्यैकाद
शीस्पर्शायोग एव विष्णुशृंखलं नान्यथेति ॥ यदा निशीथान्तं तरं सूर्योदयावधि वा द्विकलामात्रं श्रवणर्क्षं भवति तदा पूर्वैव ॥ तदु
क्तं तत्रैव नारदीये इमां प्रकृत्य तिथिनक्षत्रयोर्योगो योगश्चैव नराधिप ॥ द्विकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिक इति द्वादशीश्रव
णास्पृष्टा कृत्स्ना पुण्यतमा तिथिः ॥ नतु सा तेन संयुक्ता तावन्मात्रेव प्रशस्यत इति मदनरत्ने मात्स्यात् ॥ ॥ बुधवारेति प्रशस्ता ॥ बुधश्र
वणसंयुक्ता सैव चेद्द्वादशी भवेत् ॥ अत्यन्तमहती सा स्यात् दत्तं भवति चाक्षयमिति स्कांदात् ॥ ॥ यदपि स्मृत्यर्थसारे ॥ उदयव्यापिनी
ग्राह्या। श्रुतके ॥ ॥ यच्च ब्रह्मनारदीये ॥ उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रत इति ॥ तद्यद्युदये त्वधिका द्वादशी परदिने एवोदये

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३४७

श्रवणायोगः॥ पूर्वेह्नि च तद्दिने कालेयोगस्त्वपरादिने द्वयेतु दययोगे पूर्वैव॥ बहुकर्मकालव्याप्तेरिति युक्तं मदनरत्ने॥ यदा त्वेका
दश्येव श्रवणायुता न द्वादशी तदापि पूर्वैव॥ यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित्॥ एकादशी तदोपोष्या पापघ्नी श्रवणान्वि
तेति मदनरत्ने नारदीयोक्तेः॥ यदा परे व ऋक्षयुता न तदा परा॥ तत्र शक्तेनोपवासद्वयं कार्यं॥ एकादशीमुपोष्यैव द्वादशीं समुपो
षयेत्॥ न चात्र विधिलोपः स्यादुभयोर्देवतं हरिरिति भविष्योक्तेः॥ ॥यत्तु विष्णुधर्मे पारणान्तं व्रतं ज्ञेयं व्रतान्ते विप्रभोजनं॥ अ
समाप्ते व्रते पूर्वे नैव कुर्याद्व्रतान्तरमिति तदेतद्भिन्नपरं॥ ॥अत्र गौडाः॥ शृणु राजन् परं काम्यं श्रवणाद्वादशीव्रतमिति स्थूलशीर्ष
वचनात्॥ काम्यमेवेदं तेनाशक्तस्य नित्यैकादशीव्रतमेवेति मन्यन्ते॥ द्वादश्यामुपवासेन तुष्टस्तस्मा नृपशार्वरः॥ चक्रवर्तित्वमतु
लं संप्राप्नोत्यतुलां श्रियमिति गौडनिबंधे मार्कण्डेयोक्तेश्च॥ ॥दाक्षिणात्यास्तु॥ एकादश्यां नरो भुक्त्वा द्वादश्यां समुपोषणात्॥ व्र
तद्वयकृतं पुण्यं सर्वं प्राप्नोत्यसंशयमिति वराहवामनपुराणोक्तेः॥ श्रवणाद्वादशीव्रतमेवेत्याहुः॥ अशक्तेतिफलाद्याहारपरं
त्वन्नादि॥ अन्नाभिनानि पानीतिनिषेधात्॥ उपवासद्वयं कर्तुं न शक्नोति नरो यदि॥ प्रथमेह्नि फलाहारी निराहारोऽपरेऽहनीति
भविष्योक्तेश्च॥ अशक्तो तु गृही नैकादशीव्रतो नो यस्तोपसंकंमात्से॥ द्वादश्यां भुक्तापभेतु नक्षत्रे श्रवणं यदि॥ उपोष्यैकादशीं तत्र
द्वादश्यां पूजयेद्धरिमिति॥ पूजयेत्तत्रदुपवसेदित्यर्थः॥ अशक्तो गृही नैकादशीव्रतस्थ देकादश्यां भुक्त्वा द्वादश्यां समुपोषयेत्॥ एवमे
कादशीं भुक्त्वा द्वादशीं समुपोषयेत्॥ पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति नारदीयोक्तेः॥ पारणान्तभयान्तेऽप्यतरां नेवा

राम
३४७

347

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कुर्यात् ॥ तिथिनक्षत्रनियमे तिथिभान्ते च पारणमिति स्कान्दात् ॥ तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ॥ पारणं तु न कर्तव्यं याव
न्नैकस्य संक्षयमिति नारदीयादिति हेमाद्रिः ॥ यद्यप्यत्र नक्षत्रमात्रान्तेपि पारणं प्रतिभाति तथापि तिथिमात्रान्ते ज्ञेयं ॥ तत्र भा
न्ते तिथिमध्येपि ॥ याः काश्चित्तिथयः प्रोक्ता नक्षत्रयोगतः ॥ ऋक्षान्ते पारणं कुर्याद्विना श्रवणरोहिणीमिति विष्णुधर्मे श्रवणान्तमा
त्रे पारणनिषेधात् ॥ रोहिण्यां तु भान्ते कुर्यात्तिथेर्वापीति वह्निपुराणात् तदन्तेप्यस्तु ॥ नन्वत्रैवमस्त्विति न श्रक्षान्ते तु कल्प इति मद
नरत्ने द्वादशी द्वैधे वा श्रवणान्ते एव पारणं कुर्यात् पारणं तिथिद्वैधे तु द्वादश्यामृतुसंक्षयात् ॥ द्वैधे कुर्यात्त्रयोदश्यां तत्र दोषो न
विद्यते ॥ इति वह्निपुराणादिस्मृत्यन्तरप्रकरणादेतस्यामेव श्रवणयुतैकादश्यां विहितं विजयैकादशीव्रतं परं तु श्रवणद्वाद
शीपरमिति मदनरत्ने ॥ ॥अत्र विधिर्मदनरत्ने विष्णुधर्मे ॥ तस्मिन्दिने तथा स्नानं यत्र कृष्णवनसंगमे ॥ तथा दध्योदनयुतं तं तस्यां
जलपूर्णं घटं द्विजे ॥ वस्त्रसंवेष्टितं दत्वाच्छत्रोपानहमेव च ॥ न दुर्गतिमवाप्नोति गतिमग्र्यां च विंदति ॥ ॥मंत्रस्तु भविष्ये ॥
घटे जनार्दनपूजामभिधाय ॥ नमो नमस्ते गोविंद बुधश्रवणसंज्ञक ॥ अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव ॥ प्रीयतां देवदे
वेशो मम संशयनाशनः ॥ ॥ वामनावतारनिमित्तोपवासस्तु भविष्ये ॥ द्वादश्यां तु विधिः प्रोक्तः श्रवणेन युधिष्ठिर ॥ सर्वपापप्र
शमनः सर्वसौख्यप्रदायकः ॥ एकादशी यदा सा स्याच्छ्रवणेन समन्विता ॥ विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदेत्युपक्रम्य
अथ काले बहुतिथिगतेस्मन्गर्विणी भवेत् ॥ सुषुवे नवमे मासि पुत्रं सा वामनं हरिमित्याद्युक्त्वा एतत्सर्वं समभवदेकादश्यां युधि

CC-0. In Public Domain. Digitization by eGangotri

रत्न ३४८

ष्टिर ॥ तेनेष्टा देवदेवस्य सर्वथा विजया तिथिः ॥ एषा वुष्टिं समाख्याता एकादश्यां मया तव ॥ पूर्वमेव समाख्याता द्वादशी श्रव
णान्विते तूपसंहारादेकादश्यामेव वुष्टिफलं ॥ भागवतेष्टमस्कंधे द्वादश्यां वामनोऽभिनिरुक्तो ॥ श्रोणायां श्रवणाद्वादश्यां मु
हूर्त्तेऽभिजिति प्रभुः ॥ ग्रहनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणां ॥ द्वादश्यां सवितातिष्ठन् मध्यंदिनगतो नृप ॥ विजया नाम सा प्रो
क्ता यस्यां जन्म विदुर्हरेः ॥ ॥ श्रोणायां वंदे ॥ अभिजित् श्रवणां प्रथमोंश ॥ अत्र कल्पभेदाद्व्यवस्था ॥ तद्विधिश्च हेमाद्रावग्नि
पुराणे ॥ नदीनां संगमे स्नात्वा यादर्चयेदत्र वामनं ॥ सौवर्णं वस्त्रसंयुक्तं द्वादश्यां जलकुंडितं ॥ तेनातो विधिवत्संपूज्य ॥ हिरण्म
येन पात्रेण दद्यादर्घ्यं प्रयत्नतः ॥ नमस्ते पद्मनाभाय नमस्ते जलशायिने ॥ तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे ॥ नमः क
मलकिंजल्कपीतनिर्मलवाससे ॥ महाहवरिपुस्कंधाय वक्रिणे ॥ नमः शार्ङ्गिवबाणपाणये वामनाय च ॥ मज्ञकलदा
त्रे च वामनाय नमो नमः ॥ देवेश्वराय देवाय देवसंभूतिकारिणे ॥ प्रभवे सर्वदेवानां वामनाय नमो नमः ॥ एवं संपूजयित्वा तं द्वा
दश्यामुदये रवेः ॥ भृंगारसहितं तं तु ब्राह्मणाय निवेदयेत् ॥ वामनः प्रतिगृह्णाति वामनोहं ददामि ते ॥ वामनं सर्वतोभद्रं द्वि
जाय प्रतिपादयेत् ॥ अनंतभट्टोप्याह श्रवणाद्वादश्यां वामननामा विष्णुः पूज्यते ॥ श्रवणैकादश्यां वामनावतार इति ॥ श्रव
णायुतशुद्धैकादश्यलाभे तु दशमीविद्धापि श्रवणायुता कार्या ॥ दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः ॥ श्रवणेन तु संयु
क्ता सा चेत्स्यात्सर्वकामदेति वह्निपुराणादिषूक्तं मदनरत्ने ॥ पूजा च मध्याह्ने कार्या ॥ अह्नो मध्ये वामनो रामरामाविति पूर्वोक्त

348

राम ३४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वचनात् ॥ ॥भगवन्नाथ ॥अत्रैव दुग्धव्रतं संकल्पयेत् ॥तदुक्तं दुग्धमाश्वयुजे मासीति ॥अत्रैवं दधि त्यजेत् ॥दुग्धव्रते पायसादि
वर्ज्यं न वेति नेति केचित् ॥नहि प्रकृतिवर्जने विकारवर्जनं ॥दधिघृतादीनादीनामपि वर्जनापत्ते ॥तस्माद्दध्यादिवत् पायसा
दि भक्ष्यमिति ॥ ॥अत्र ब्रूमः ॥यत्र विकारे प्रकृतिरसोपलंभस्तत्र तदभिन्नत्वात् तत्र विकारस्यापि निषेधः ॥अस्ति च मांसविका
रे मांसत्वप्रत्यभिज्ञा मांसत्वान्न पायसात् ॥यत्तु औडुम्बरदध्यादेरनिषेधायतिरिति ॥तत्र ॥औडुम्बरमिति विकारे न हि तेन निषेधात् ॥ ॥त
थाच विज्ञानेश्वर औडुम्बरमेकं शफं ह्येतां मारकं पकमथा विकमित्यत्र औडुम्बरमिति विकारे न हि तक्रमूत्रादीनामपि निषेध इ
त्याहि ॥नन्वेवं संधिन्यनिर्दशावत्सागोपयः ॥परिवर्जयेदिति संधिन्यादिक्षीरनिषेधेपि दध्यादिग्रहणं स्यात् ॥सत्यं प्रायं ॥व
चनेन परं निषेधः ॥तदाह पराशरः क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ॥सप्तरात्रं व्रतेः कुर्यात् प्रयत्नेन समाहित
इति ॥ ॥व्रतं गोमूत्र पावकं ॥तस्मात् पायसे दुग्धरसोपलंभाद्वर्जनं अन्नरसत्वाभिक्षायां दधिमस्त्वे माधुर्योपलंभात्तयोरूपत्व
मुक्तं मीमांसकैः ॥तदुक्तं पयस्य वस्यानीभूतमामीक्षेत्यभिधीयते इति दध्यादि भक्षणेन तदभावाद वर्जनमिति ॥इति दुग्धव्रतं ॥
अथ भाद्रशुक्लचतुर्दशी नमनेनव्रतं ॥तच्च त्रिमुहूर्तोदयव्यापिन्यां कार्यात् ॥उदये त्रिमुहूर्तापि ग्राह्यानन्तव्रते तिथिरिति माध
वोक्ते ॥मध्याह्ने भोज्यवेलायां मिनि कथायां श्रावणानूजात्व्रते तु मध्याह्नव्यापिनी तिथिरिति माधवीये वचनात् मध्याह्नव्यापि
नी ग्राह्येति दिवोदासः ॥निर्णयामृते तु घटिकामात्राप्यौदयिकी सूक्तं ॥तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम ॥ पौर्णमास्या

रत्न
३४९

समासायोगे ब्रतं चानंतकवरैदिति भविष्योक्ते ॥ मुहूर्त्तमपि वेज्ञाडे पूर्णिमायां चतुर्द्दशी ॥ संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययमि
ति स्कांदाद्वेति मुहूर्त्तमपि वेज्ञाडे पूर्णिमायां चतुर्द्दशी ॥ संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययमिति स्कांदाद्वेति ॥ मुहूर्त्तमिति त्रिमु
हूर्त्तप्रसंसापरं ॥ उदये त्रिमुहूर्त्तं तु ग्राह्या नंतब्रते तिथिरिति माधवोक्तेः ॥ तत्त्वतु उदयव्यापिन्यां तस्यां विष्णुं पूजयेदिति प्रत्यक्ष
विधिनामध्याहृनीति हास्तरूपार्थवादस्य बाधात्त्रिमुहूर्त्तोदयव्यापिनी ग्राह्येति ॥ अत्र चतुर्द्दशग्रन्थियुतदोरकबंधनं प्रधा
नं ॥ संसारगह्वरगुहासुसुखं विहर्त्तुं वांछंति ये कुरुकुलोद्भवशुद्धसत्वा ॥ संपूज्य च त्रिभुवनेशमनं--देवं बंधंति दक्षिणक
रे वरदोरकं ते ॥ अनंतस्यैव फलसम्बंधात् ॥ ॥ अथ ब्रतविधि ॥ मासपक्षाद्युल्लिख्य पापनिर्मुक्तिनमक्षिद्धिपुत्रपौत्रप्राप्तिनभोग
धनधान्यपरगतिप्राप्तये चतुर्द्दशवर्षावधि अनंतब्रतं करिष्ये इति संकल्प ॥ सर्वतोभद्रमंडलं विधाय ॥ तत्र मंडलदेव
ता आवाह्य ॥ तदुपरि कलशं संस्थाप्य तत्र फणासप्तकमण्डितं दर्भमयं नागं संस्थाप्य तदग्रे चतुर्द्दशग्रंथितो दोरकमभ्यर्च्य
नेन पूजयिष्ये ॥ इति संकल्प षोडशोपचारैः कलशोपरि पूजयेदिन्याद्य प्रयोगे ॥ द्वितीयादौ गृहीतानंतब्रतेन पूजनं दोरकबं
धनं च करिष्ये इति संकल्पयेत् ॥ ॥ अथानंतपूजा ॥ मंडले सर्वतोभद्रं कृत्वा कुंभं तु विन्यसेत् ॥ तत्र वाष्टदले पद्मे पूजये
द्विष्णुमव्ययम् ॥ कृत्वा दर्भमयं देवं फणासप्तकमण्डितम् ॥ तस्याग्रतो दृढं सूत्रं कुंकुमाक्तं सुशोभनम् ॥ चतुर्द्दशग्रंथियुतमु
पस्थाप्य प्रपूजयेत् ॥ ततस्तु मूलमंत्रेण नमस्कृत्य चतुर्भुजम् ॥ नवाम्रपल्लवाभासं पिङ्गभ्रूश्मश्रुलोचनं ॥ पीताम्बरधरं देवं शं

349

राम
३४९

खचक्रगदाधरं॥ प्रसन्नवदनं विष्णु विश्वरूपं विश्वविचिंतयेत्॥ ॥ध्यानं॥ आगच्छानंतदेवेश तेजोराशे जगत्पते॥ क्रियमाणोम
या पूजां गृहाणासुरसत्तमम्॥ सहस्रशीर्षेत्यावाहनं॥ ॥ततो ग्रंथिदेवता॥ विष्णु १ रग्नि २ स्तथादित्य ३ सहस्राक्षः ४ पितामह
५ इन्द्रः पिनाकी ७ विघ्नेशः ८ स्कंदः ९ सोमस्तथैव च १० वरुणा ११ पवन १२ पृथ्वी १३ वसवो १४ ग्रन्थिदेवताः॥ ॥अथा
सनं॥ नानारत्नसमायुक्तं कार्तस्वरविभूषितम्॥ आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां॥ पुरुषएव २॥ ॥अथपाद्यं॥ मात्रे
स्तु सर्वतीर्थेभ्यो मयाप्रार्थनमाहृतम्॥ तोयमेतत्सुखस्पर्शं पाद्यार्घं प्रतिगृह्यतां॥ एतावानस्या ३॥ ॥अथाचमनम्॥ कर्पू
रवासितं तोयं मंदाकिन्यासमाहृतं॥ आचम्य - जगन्नाथ मयादत्तं हि भक्तितः॥ ततो विराट् ४॥ ॥अथपंचामृतस्नानम्॥
पंचामृतेन स्नपनं करिष्ये सर्वसिद्धिदं॥ कार्यमेसिद्धिमायान्तु पूजिते त्वयि धातरि॥ पयोदधिघृतं गव्यं माक्षिकं शर्करा तथा ५
अथार्घ्यं॥ अनंतानंत देवेश अनंतफलदायक॥ अनंतानंतरूपोसि गृहाणार्घ्यं नमोस्तु ते॥ त्रिपादूर्ध्व॥ पंचामृतेन स्नपनं
गृहाण जगतपते॥ ॥अथस्नानं॥ गंगा च यमुना चैव नर्मदा च सरस्वती॥ तापीपयोष्णीरेवा च ताभ्यः स्नानार्थमाहृतं॥ तोय
मेतत्सुखस्पर्शं स्नानीयं प्रतिगृह्यतां॥ तस्माद्यज्ञात्सर्वहुतऋ॥ ॥अथयज्ञोपवीतम्॥ दामोदर नमस्तेस्तु त्राहि मां भवसागरा
त् ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम॥ तस्मादश्वा॥ ॥अथचन्दनम्॥ कस्तूरीकुंकुमोपेतं कर्पूरेणाचसंयुतम्॥ गंधं दास्या
मि देवेश अनंताय नमो नमः॥ तं यज्ञम्॥ ॥अथाक्षता॥ अथतास्र - श्वेताः कुंकुमाक्ताः सुशोभना॥ वासुदेव जगन्नाथ प्रीत्या

CC-0. In Public Domain. Digitization by eGangotri

रत्न मे स्वीकुरु प्रभो ॥ ॥ अथ पुष्पं ॥ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो ॥ मयाहृतानि पुष्पाणि पूजार्थं स्वीकुरु प्रभो ॥
३५० अथांगपूजा ॥ अनन्ताय नमः पादौ पूजयामि ॥ संकर्षणाय नमो गुल्फौ पू० ॥ कालात्मने नमो जानुनी पू० ॥ विश्वरूपाय नमो
जंघे पू० ॥ विश्वनेत्राय नमः कटिं पूजयामि ॥ मधुसूदनाय नमः मेढ्रं पू० ॥ पद्मनाभाय नमो नाभिं पू० ॥ परमात्मने नमो हृत्पू०
श्रीकंठाय नमः कंठं पू० ॥ सर्वास्त्रधारिणे नमो बाहू पू० ॥ हरये नमो मुखं पू० वाचस्पतये नमः जिह्वां पू० ॥ दामोदराय नमः द
न्तान् पू० ॥ केशवाय नमः ललाटं पू० कमलासनाय नमो शिरः पू० सर्वात्मने नमः सर्वांगं पू० ॥ अथ धूप ॥ वनस्पतिरसोद्
भूतो गंधाढ्यो गंधउत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥ यत्पुरुषं व्य० ॥ ॥ अथ दीपम् ॥ आज्यं च वर्तिसंयुक्तं व 350
ह्निना योजितं मया दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ ब्राह्मणोस्य ॥ ॥ अथ नैवेद्यम् ॥ अन्नं चतुर्विधं स्वादु रसैः षड्भि
समन्वितं ॥ नानाभक्ष्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥ नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु ॥ ईप्सितं मे वरं देहि परत्र च प
गतिं ॥ चद्रमासन ॥ ॥ अथ फलम् ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ नाभ्या
आसीत् ॥ ॥ अथ तांबूलम् ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतं ॥ कर्पूरादिसमायुक्तं तांबूलं प्रतिगृह्यतां ॥ यत्पुरुषेणा राम
अथ दक्षिणा ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो ॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ सप्तास्यासन् ॥ ॥ अथ नीरा ३५०
जनम् ॥ पंचवर्तिसमायुक्तं सर्वमंगलदायक ॥ नीराजनं निरीक्षस्व अनंताय नमो नमः ॥ ॥ अथ पुष्पांजलि ॥ मालतीमल्लि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कापुष्पे मागत्वं पकसंयुते ॥ पुष्पांजलिं गृहाणेमां पादांबुजयुगार्पिताम् ॥ विष्णुमेत्रैश्व ॥ ॥ अथ प्रार्थना ॥ अनन्तकामान् मे देहि स
र्वकामफलप्रद ॥ अनंताय नमस्तुभ्यं पुत्रपौत्रं प्रवर्द्धय ॥ अनंतः सर्वकामानामधिपः सर्वकामद ॥ व्रतेनानेन सुप्रीतो भव त्वं
हसदारनं ॥ नमस्ते देवदेवेश नमस्ते धरणीधर ॥ नमस्ते कमलाकांत नमस्ते ह्यमरप्रिये ॥ नमस्ते सर्वभूतेश वासुदेव नमोस्तु ते ॥
यज्ञेन ॥ ॥ अथ दोरकबंधनमंत्रः ॥ अनंताय नमस्तुभ्यं सहस्रसिरसे नमः ॥ नमोस्तु पद्मनाभाय नागाधिपतये नमः ॥ संसारगह
रगुहासु सुखं विहर्तुं वांछन्ति ये कुरुकुलोद्भवशुद्धसत्वाः ॥ संपूज्य च त्रिभुवनेसम नंतदेवं बध्नन्ति दक्षिणकरे वरदोरकं ते ॥ अनं
त संसारमहासमुद्रे मग्नं समभ्युद्धर वासुदेव ॥ अनंतरूपे विनियोजयस्व अनंतसूत्राय नमो नमः ॥ कृते नमस्कारः ॥ अनंतसुया
रत्नाय विश्वरूपधराय च ॥ अनंतमात्मदेवाय अनंताय नमो नमः ॥ ˉजीर्णदोरकं पूर्वबद्धं ह्यप्सु विसर्जयेत् ॥ ॥ तत्र मंत्रः ॥ न्यू
नातिरिक्तानि परिस्फुटानि यानीह कर्माणि मया कृतानि ॥ क्षम्याणि चैतानि मम क्षमस्व प्रयाहि तुष्टः पुनरागमाय ॥ ॥ अथ पक्वान्ना
दिदानप्रार्थना ॥ दाता च विष्णुर्भगवाननन्तः प्रतिगृहीता च स एव विष्णुः ॥ तस्मात्त्वया सर्वमिदं तˉ वप्रसीद देवेश वरं ददस्व
प्रतिग्रह द्विजश्रेष्ठ अनन्तफलदायकः ॥ त्वत्प्रसादादहं विप्र मुच्येहं कर्मबंधनात् ॥ पक्वान्नं फलसंयुक्तं सघृतं दक्षिणान्वितम् ॥
द्विजवर्याय दास्यामि व्रतसंपूर्तिहेतवे ॥ ॥ अथ वायनदानमंत्रः ॥ अनंतः प्रतिगृह्णाति अनंतो वै ददाति च ॥ अनन्तस्तारको मामपा
मनंताय नमो नमः ॥ इति अनंतपूजाविधिः ॥ ॥ अथागस्त्यार्घ्य ॥ तत्कालो भविष्ये ॥ कन्यायामागते सूर्ये अप्राप्ते संप्रमे दिने ॥ क

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३५१

मायां समनुप्राप्ते दीर्घकालो निवर्त्तते ॥ तेन उदयोत्तरं सप्तदिनमध्ये इत्यर्थः ॥ यत्नान्तरे ॥ आसप्तरात्रादुदयात्समभ्यर्च्य दानमेतत्स
कलं नरेश ॥ या-न्तमासप्रदशाथवासरयोर्ध्वमप्यत्र वदंति केचित् ॥ यमस्यागस्त्यस्य उदयकालश्च दिवोदासीये उक्तः उदेति या
म्यां हरिसंक्रमाद्रवेरेकाधिके विंशतिमे ह्यगस्त्यः समसप्तमे स्त्रीवृषसंक्रमाच्च प्रयाति गर्गादिभिरभ्यधायि ॥ अत्र विधिर्विष्णुरहस्ये
काशपुष्पमयीं रम्यां कृत्वा मूर्त्तिमुवाकृशो ॥ प्रदोषे विन्यसेत्तां तु पूर्णकुंभे स्वलंकृते ॥ कुंभस्थां पूजयेत्तां तु पुष्पधूपविलेपनैः
दध्यक्षतबलिं दद्याद्रात्रौ कुर्यात्प्रजागरं ॥ पूजा च वक्ष्यमाणार्घमंत्रेण कार्या ॥ प्रभाते मां समादाय यायात्सुराप जलाशयम् ॥ निशा
वशाने तां पश्यन् जलांते प्रतिमां मुने ॥ अर्घ्यं दद्यादगस्त्याय भक्त्या सम्यगुपोषितः ॥ ॥ मात्स्ये तु ॥ अंगुष्ठमात्रपुरुषं तथैव सौवर्णम
स्मायतबाहुदंडं ॥ पूर्वं काशमयं त्वमशाकौ ॥ वज्राभिन्नं कुंभमुखे निधाय धान्यानि सप्तांकुरसंयुतानि सकाशपुष्पासितशुक्लयुक्तं
मंत्रेण दद्याद्द्विजपुंगवाय क्षेत्रं बहुक्षीरवतीं च दद्यात् सवत्सघंटाभरणां द्विजाय ॥ भविष्ये ॥ विहृधेः सप्तधान्यैश्च वंशपात्रेनि
धापितैः ॥ सौवर्णरुप्यपात्रेण ताम्रवंशमयेन वा ॥ पूरयित्वा ततस्तेन न्यस्ते राजानुभां धरणीगतः ॥ ॥ विष्णुरहस्ये ॥ अगस्त्यः ख
नमानेति पठन्मंत्रमिमं मुने अर्घ्यं दद्यादगस्त्याय मृडे मंत्रविधिस्त्वयं ॥ काशपुष्पप्रतीकाश वह्निमारुतसंभव ॥ मित्रावरु
णयोः पुत्रः कुंभयोने नमोस्तु ते ॥ विंध्यवृद्धिक्षयकर मेघतोयविषापह ॥ रत्नवल्लभ देवेश लंकावास नमोस्तु ते ॥ वातापि भ
क्षितो येन समुद्रः शोषितः पुरा ॥ लोपामुद्रापतिः श्रीमान् योसौ तस्मै नमो नमः ॥ येनोदितेन पापानि विलयं यांति व्याधयः

351

राम
३५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्मै नमोस्त्वगस्त्याय वपुत्रिणे ॥ अगस्त्यः खनमानेति विप्रोर्घ्यं विनिवेदयेत् ॥ राजपुत्रि महाभागे ऋषिपत्नि वरानने ॥ लोपामु
द्रे नमोस्तुभ्यं मर्घ्यमे प्रतिगृह्यतां ॥ दत्वैवमर्घ्यं कौरव्य प्रणिपत्य विसर्जयेत् ॥ अर्चितस्त्वं यथाशक्त्या नमोगस्त्य महर्षये त ॥ गृहि
कामुष्मिकीं दत्वा कार्यसिद्धिं व्रजस्व मे ॥ विसर्जयित्वागस्त्यं तं विप्राय प्रतिपादयेत् ॥ अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः
दानमंत्रः ॥ अगस्त्यः सप्तजन्मार्घं नाशयित्वा पयोरयं ॥ अतुलं विमलं सौख्यं प्रयच्छत्वं महामुने ॥ प्रतिग्रहमंत्रः ॥ विप्रहस्ते
न्यस्ते दगस्त्यमुद्दिश्य धान्यमेकफलरसं ॥ होमं कृत्वा ततः पश्चाद्वर्जयेन्मानवः फलं ॥ होमश्चार्घ्यमंत्रेणाज्येन भविष्ये ॥ दत्वार्घ्यं
सप्तवर्षाणि क्रमेणानेन पाण्डव ॥ ब्राह्मणः स्याच्चतुर्वेदी क्षत्रियः पृथिवीपतिः ॥ वैश्यश्च धान्यनिष्पन्नः शूद्रश्च धनवान् भवेत्
यावदायुश्च यः कुर्यात् स परं ब्रह्म गच्छति ॥ ॥ इत्यगस्त्यार्घः ॥ भाद्रयोर्मासयोः प्रपितामहान् परांस्त्वावुद्दिश्य श्राद्धं कार्य्यं ॥
तदुक्तं हेमाद्रौ ॥ ब्राह्मणमार्कण्डेययोः ॥ नांदीमुखानां प्रथमं कन्याराशिगते रवौ ॥ पौर्णमास्यां तु कर्त्तव्यं वराहवचनं यथेति ॥ ना
न्दीमुखत्वं चोक्तं ब्राह्मे ॥ पिता पितामहश्चैव तथैव प्रपितामहः त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः ॥ तेभ्यः पूर्वतरा ये च
प्रजावंतः सुखैधिताः ॥ ते तु नांदीमुखा नांदी समृद्धिरिति कथ्यते ॥ एतच्च प्रथमपक्षमित्युक्तं ॥ पक्षे श्राद्धपक्षे सकृन्महालयपक्षे वा
वश्यकमिति प्रयोगपारिजाते ॥ ॥ अत्र मातामहा अपि कार्याः ॥ पितरो यत्र पूज्यन्ते तत्र मातामहा अपीति धौम्योक्तेः ॥ पितृश
ब्दस्य वजनकपरत्वे वऊववनविरोधेन पितृभावायत्त्वपरतात् ॥ वार्षिके तु वचनानि स्मृतिः ॥ नवजीवत्पितृकस्यान्वष्टका

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३५२

यांमानश्राद्धं नत्रायतिः ॥ इष्टापत्तेः ॥ अतएव मदुक्तश्राद्धेषु मासनामानामदर्शादर्शादिति मदनरत्नकालादर्शौ ॥ केचित्तु ॥ अत्र
ह्रस्वपक्षरायापित्र्यादयो यत्रतत्र स्वतामहालये नात्र नेत्याहुः ॥ नचात्र नामादीनांदीश्राद्धधर्मातिदेशः ॥ वैश्वदेवादिशब्दवद्देवताप
रत्वकर्मनामत्वाभावात् ॥ नापिनांदीमुखत्वं पितृविशेषणं ॥ पारिभाषिकत्वादिति दिक् ॥ तथा निर्णयदीपे गार्ग्यः ॥ पौर्णमासी
षु सर्वासु तिथिषु ह्यपिंडदानं ॥ वर्जयित्वा प्रोष्ठपदीं यथा दर्शस्तथैवसेति ॥ ॥ श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा
कृतारत्नावलिनत्वरातोभाद्रस्यनिर्णयः ॥ ॥ कन्यासंक्रमेपराः षोडशघटिकाः पुण्याः शेषंप्राग्वत् ॥ ॥ अथमहालयः
तत्रपृथ्वीचन्द्रोदये मत्स्ये ॥ आषीमवधिकृत्वायं वर्मपक्षमाश्रिता ॥ कांक्षंति पितरः क्लिष्टाअन्नमप्यन्वहंजलं ॥ कन्यायोगेपुराण
तमत्वमाहत्याप्याययितिः कन्यास्थार्कान्वितः पक्षः सोऽत्यंतं पुण्यउच्यते इति ॥ अत्रविशेषमाहब्रह्मः ॥ मध्येवायदिवाप्यंतेय
त्रकन्यांव्रजेद्रविः ॥ सपक्षः सकलः श्रेष्ठः श्राद्धषोडशकंप्रति ॥ ॥ तथाब्राह्ममार्कंडेययोः ॥ कन्यागतेसवितरिदिनानि
दशपंचच ॥ पार्वणेनेहविधिनाश्राद्धंतत्रविधीयते ॥ तथातत्रैवषोडशदिनान्युक्तानि ॥ कन्यागतेसवितरियान्यहानितुषो
डश ॥ क्रतुभिस्तानितुल्यानि देवोनारायणोब्रवीत् ॥ अत्रहेमाद्रिः षोडशमंत्रेधाव्याचख्यौ तिथिवृद्ध्यापक्षस्यषोडशदिनत्वेश्रा
द्धावृत्त्यर्थमित्येकः पक्षः ॥ भाद्रपूर्णिमयासहेतिद्वितीयः ॥ आश्विनशुक्लप्रतिपदासहेतितृतीया ॥ अंत्यएवतुयुक्तः अहःषो
डशकंयत्तुशुक्लप्रतिपदासह ॥ चंद्रक्षयाविशेषेणसापिदर्शात्मिकास्मृतेतिदेवलोक्तेः ॥ अत्रपंचपक्षाः ॥ ॥ तदुक्तंहेमाद्रौ

रत्न
३५२

352

१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्राह्ये ॥ अश्वयुक्कृष्णपक्षे तु श्राद्धं कार्य्यं दिने दिने ॥ त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा ॥ दिने दिने इति पक्षपर्यंतं तत्त्वमुक्तं
त्रिभागहीनमिति पंचम्यादिपक्षः ॥ भौजंगीतिथिमारभ्य यावच्चंद्रार्कसंगममिति वाक्यात् ॥ अर्द्धमित्यष्टम्यादिपक्ष त्रिभागमिति
दशम्यादिः ॥ त्रिभागहीनमिति चतुर्दशीसहितप्रतिपदादिचतुष्टयवर्जनाभिप्रायेणेति ॥ कल्पतरुः ॥ अत्र दिनपदं तिथि
परं ॥ वीप्सया तत्पक्षीयमिति त्वं श्राद्धव्याप्यतावच्छेदकं ॥ तेन पंचदशतिथिव्यापि श्राद्धमिति ॥ तेन चतुर्दशीनिषेधो न कृ
त्स्नपक्षपर इति गौडाः ॥ तन्न ॥ श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये इत्यादिविरोधात् ॥ यत्तु कश्चित् शस्त्राप्रत्ययलोपेन तृती
यभागहीने षष्ठ्यादि ॥ पक्ष्य तृतीयभागमेकादश्यादिः ॥ तदर्धं त्रयोदश्यादि उत्तरोत्तरलकालोक्तेरिति ॥ तत्र गौतमादिवशेन मूल
कल्पनागौरवात् ॥ पक्षमित्यत्र तत्त्वयायनेश्च ॥ पंचम्यूर्ध्वं न तो याती ति विष्णुधर्मोक्तः ॥ षष्ठ्यादेकादश्यादिपक्षादिपक्षावपि ज्ञेयावि
ति तत्त्वाकालादर्शेपि ॥ पक्षाद्यादिवदर्शांतं पंचम्यादिदिगादिव ॥ अष्टम्यादिर्यथाशक्ति कुर्यात्परपक्षिकं ॥ पक्षादिः प्रतिपत्
दिक् दशमी दर्शांतमिति सर्वत्र ॥ ॥ गौतमोपि ॥ अथापरपक्षे श्राद्धं पितृभ्यो दद्यात् ॥ पंचम्यादिदर्शांतमष्टम्यादिसर्वेस्मिंश्चे
ति ॥ तथैकस्मिन्नपि दिने श्राद्धमुक्तं हेमाद्रौ नागरखंडे ॥ असाध्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे ॥ यो वै श्राद्धं नरः कुर्यादेकस्मि
न्नपि वासरे ॥ तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवमिति ॥ अत्र शक्त्यशक्तिपरा व्यवस्थेति प्रायः ॥ तन्न ॥ तत्रावकयदाभावा
न्त्रयोदश्यादिपक्षस्यैव नित्यः ॥ तत्रैतदाश्रुते ॥ ब्राह्मे एवकारेणात्स्यैव पंचमपक्षस्यैव नित्यत्व ॥ तत्रैव निंदाश्रुतेः ॥ ब्राह्मे एव

CC-0. In Public Domain. Digitization by eGangotri

एल
३५३

कारेणा तस्यैव पंचमपक्षायोगव्यवच्छेदोक्तेरिति गौडाः॥ तन्न॥ एकवाक्यताविरोधात्॥ तेन फलभूमार्थिनाऽमानिकार्याणी
ति तत्त्वं॥ तच्च चतुर्दशीश्राद्धमावे पंचम्यादिदशम्यादिपक्षौ॥ तत्सत्त्वे षष्ठ्येकादश्यादिकौ॥ एवं चतुर्दश्यसंभावे द्वादश्यादिः
तत्सत्त्वे त्रयोदश्यादिरिति व्यवस्था॥ ॥विधवायास्तु विशेषः॥ स्मृतिसंग्रहे॥ चत्वारः पार्वणाः प्रोक्ता विधवायाः सदैव हि
स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च॥ ततो मातामहानां च स्नानदानमुपक्रमेत्॥ ॥तथा॥ श्वश्रूणां च विशेषेण माता
महास्तथैव चेति॥ अशक्तौ तु स्मृतिरत्नावल्यां स्वभर्तृप्रभृतित्रिभ्यः स्वपितृभ्यस्तथैव च॥ विधवा कारयेच्छ्राद्धं यथाकालमतन्द्रि
ता॥ विधवा स्वयं संकल्पं कृत्वान्यब्राह्मणद्वारा कारयेदित्युक्तं॥ ॥ प्रयोगपारिजाते॥ सकृन्महालये चैव वर्ज्यं तिथ्याद्युक्तं पारिजातादि
षु॥ ॥वशिष्ठः॥ नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु॥ एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात्॥ जन्मभं तत्पूर्वोत्तरे च त्रिजन्मानि
वृद्धगार्ग्यः॥ प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा॥ यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति॥ प्राजापत्यं रोहिणी पौष्णं रेवती
पित्र्यं मघा॥ अन्यान्यपि प्रतिपदादीनि तत्रैव ज्ञेयानि॥ एतच्च सकृन्महालयविषयं॥ सकृन्महालयकाम्येषु नः श्राद्धे विलेपुच
अतीतविषये चैव सर्वमेतन्न वर्जयेदिति॥ ॥नारदोक्तेः॥ अस्यापवादो हेमाद्रौ॥ अमापाते भरण्यां च द्वादश्यां पक्षमध्यके॥ त
थातिथिं च नक्षत्रं वारं च न विचारयेत्॥ पितृमृताहे निषिद्धदिनेपि सकृन्महालयः कार्य इत्युक्तं॥ आषाढ्याः पंचमे पक्षे कन्या
संस्थे दिवाकरे॥ मृताहनि पितुर्यो वै श्राद्धं दास्यति मानवः॥ तस्य संवत्सरं यावत्तृप्ताः पितरो ध्रुवमिति॥ यातिथिर्यस्य मास

याम
३५३

353

१८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यमृताहेतुप्रवर्त्तते ॥ सातिथिः पितृपक्षेतु करोत्येकदिनेयदा ॥ निषिद्धेपिदिनेकुर्यात्पिंडदानंयथाविधीतिस्मृतिवचना
त् ॥ तथापक्षश्राद्धकरणेविनंदादिषुनतिषेधइत्याह कार्ष्णाजिनि ॥ नभस्यस्यापरेपक्षेश्राद्धकार्य्यंदिनेदिने ॥ नैवनंदादिव
र्ज्यस्यान्नैवनिंद्याचतुर्द्दशीति ॥ पूर्वोक्तनंदादिनिषेधस्तुसकृन्महालयेमृताहानिक्रमेपौर्णमास्यादिमृतश्राद्धेवर्ज्ञेयः ॥ ॥ यत्तुस्मृ
त्यर्थसारे ॥ विवाहव्रतचूडासुवर्षमर्द्धंतदर्द्धकं ॥ पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणकमिति ॥ तस्यापवादोदिवोदासीयेबृह
स्पति ॥ तीर्थेसंवत्सरेप्रेतेपितृयागेमहालये ॥ पिंडदानंप्रकुर्वीतयुगादिभरणीमघे ॥ महालयेगयाश्राद्धेमातापित्रोः क्षये
हनि ॥ कृतोद्वाहोपिकुर्वीतपिंडनिर्वपनंसदेति ॥ सन्यासिनांतुद्वादशेणश्राद्धंकार्यंयतीनांचतुतस्थानां ॥ वैष्णवानांविशेषत
द्वादश्यांविहितंश्राद्धंकृष्णपक्षेविशेषतइतिसंग्रहोक्ते ॥ ॥ अत्रपक्षेश्राद्धकरणेगौणकालमाह हेमाद्रौयमः ॥ हंसेकन्यासु
वर्षास्योज्ञाकेनापिगृहेवसन् ॥ पंचम्योरंतरेदद्यादुभयोरपितृणांवैमहालये ॥ ॥ तत्राप्यसंभवेभारते ॥ यावच्चकन्यातुलयो
क्रमादास्तेदिवाकरः ॥ शून्यंप्रेतपुरंतावद्वृश्चिकंयावदागत ॥ ब्राह्मे ॥ वृश्चिकेसमतिक्रांतेपितरोदैवतैःसह ॥ निःश्वस्यप्रति
गच्छंतिशापंदत्वासुदारुणं ॥ यत्तुजातूकर्ण्यः ॥ आकांक्षंतिस्मपितरःपंचमंपक्षमाश्रिताः ॥ तस्मात्तत्रैवदातव्यंदत्तमन्यत्रनिः
फलमिति ॥ तत्कृलातिशयहानिपरं ॥ कन्यागच्छंतुवानवेतितुर्यपाठतेनकन्यायोगेप्राशस्त्यमात्रइदंचश्राद्धमन्नेनैवकार्य्यं
नामात्रादिना ॥ मृताहंचसपिंडंचगयाश्राद्धंमहालयं ॥ आपन्नोपिनकुर्वीतश्राद्धमामेनकर्हिचिदितिगालवोक्तेः ॥ ॥ अथा

रत्न
३५४ त्रद्देवताः संग्रहे ॥ तातांबाद्वितयं सपत्नजननीमातामहादित्रयं ॥ सस्त्रीस्त्रीतनयादितातजननीस्वभ्रातरः सस्त्रियः ॥ तातां
बात्मभगिन्यपत्यधवयुग्जायापितामद्गुरुः ॥ शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे ॥ ॥ अस्यार्थः ॥ तातत्रयीपितृ
त्रयी अंबात्रयी च ॥ ॥ स्वस्वार्थसारेपि ॥ सस्त्रीति मातामहानां सपत्नीकत्वेपि विभवे सति मातामहीनां पृथक्कार्यं ॥ महालयेग
याश्राद्धे श्राद्धे चान्वष्टकाश्च ॥ नवदैवत्यमेवेष्टं शेषं षाघो रूषं विदुरिति ॥ ॥ धर्माब्धौ ॥ तातभ्रातापितृव्यः ॥ जननीभ्राता मातु
लः ॥ तत्स्त्रियः ॥ पितृष्वस्री मातुलानी भ्रातृजाया पितृष्वसृभगिन्योपत्यभर्तृयुक्ता ॥ तेन सापत्न्यास भवा इति प्रयोगो ज्ञेयः
जायापिता श्वशुरः श्वश्रूरप्यशोयलक्षा ॥ अत्र पार्वणैकोद्दिष्टव्यवस्थोक्ता हेमाद्रौ ॥ उपाध्यायगुरुश्वश्रूपितृव्याचार्यश्च मातुला
श्वशुरभ्रातृतनयत्र— त्विकशिष्ययोषका ॥ भगिनीस्वामिदुहितृजामातृभगिनीसुता ॥ पितरौ पितृपत्नीनां पितृमातृश्वयास्व
सा ॥ अविद्धवदशिष्याप्तास्तीर्थे चैव महालये ॥ एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नत इति ॥ इतरेषां पिचारीनां पार्वणासमर्थश्चेद्
अत्रकमानत्वेप्याचाराद्व्यवस्था ॥ अत्राक्तोतु पृथ्वीचंद्रोदये चतुर्विंशतिं शतिमने ॥ एकस्मिन्नुपासरो सर्वासावा यदी न्यु पूजयेत् ॥
दद्यात्दशवापितृणां नृपपादकरणां ततु ॥ एकोद्दिष्टस्वरूपं चाह याज्ञवल्क्यः ॥ एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं ॥ आवाह रत्न
नाग्नौकरणारहितं त्वपसव्यवदिति ॥ महालये सन्यस्तपितृकादिना जीवत्पितृकेनापि कार्यं ॥ वृद्धो तीर्थे च संन्यस्ते ताते च पतिते ३५४
सति ॥ सत्यासव पितादद्यात्तेभ्यो दद्यात्स्वयं सुत इति कात्यायनोक्ते ॥ पंतुकोऽपि न्यद्दर्शश्राद्धं गयाश्राद्धं वापरपक्षकं ॥ नजीवत्पितृ

354

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कः कुर्यात्तिलैस्तर्पणमेव चेति ॥ तन्मृतव्यस्तपित्राद्यतिरिक्तविषयं काम्यश्राद्धपरं वा ॥ एतच्च जीवत्पितृकेण पितृरहितेन कार्यं ॥ प्रप
न्नेपितृव्यदानं च प्रेतकर्म च सर्वशः ॥ न जीवत्पितृकः कुर्यात्कुर्विणीपतिरेव चेति दक्षेणापि पितृव्यनिषेधात् ॥ अन्वष्टका मातृवार्षिका
देशेति वचनाद्भवतीति ॥ तथा छागलेयः ॥ पितृव्ययत्नानि वर्ज्जितमयायादिषु कथं चन ॥ साकल्पं तु तदा कार्यं नियमाद्ब्रह्मवादिभिः ॥
श्राद्धपक्षतानुक्तम् ॥ अथ श्राद्धांगतर्पणं पक्षश्राद्धे प्रतिदिनं श्राद्धोत्तरं सकृन्महालये तु परेऽह्नि कार्यं ॥ ॥ तदुक्तं नारदीये ॥ पक्षश्रा
द्धं यदा कुर्यात्तर्पणं तु दिने दिने ॥ सकृन्महालये चैव परेऽहनि तिलोदकं ॥ गार्ग्योपि ॥ पक्षश्राद्धे हिरण्ये च अनुव्रज्यति लोदकमिति
तथा प्रयोगपारिजाते गर्गः ॥ कन्यास्थे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् ॥ पितृणां प्रत्यहं कार्यं निषिद्धेपि तर्पणं ॥ सकृन्महाल
ये श्वः स्यादष्टकास्वंतस्य चाहि ॥ इदं निषिद्धदिनेपि कार्यं ॥ तिथितीर्थविशेषेषु कार्यं — प्रेत च सर्वदेति स्मृत्यर्थसारोक्तेः ॥ तीर्थे ति
थिविशेषे च गयायां प्रेतपक्षके ॥ निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितमिति स्मृतेश्च ॥ एतच्च श्राद्धं मलमासे न कार्यं ॥ ॥ तदा
ह भृगुः ॥ वृद्धिश्राद्धं तथा सोमम ग्न्याधेयम — लयं ॥ राजाभिषेकं काम्यं च न कुर्याद्भानुलंघिते ॥ इति हेमाद्रौ ॥ ॥ नागरखण्डेपि
नभो वाथ नभस्यो वा मलमासो यदा भवेत् ॥ सप्तमः पितृपक्षस्याद्दन्यत्रैव तु पंचमं ॥ इदं च नित्यकाम्यं ॥ पुत्रानायुस्तथारोग्यमैश्व
र्यमतुलं तथा ॥ प्राप्नोति पंचमे दत्वा श्राद्धं कामांश्च पुष्कलानिति जाबालोक्तेः ॥ वृश्चिके समतिक्रांते पितरो दैवतैः सह ॥ निःश्वस्य प्र
तिगच्छंति शापं दत्वा सुदारुणमिति कार्ष्णाजिनिवचनाच्च ॥ तदतिक्रमे प्रायश्चित्तं सक्तसन्निधाने तु रोऽम्भस्समेत्रं बदशा मासं दिमा

रम
२५५

मासयोः॥ महालयं यदा नूनं न तु संपूर्णा -मिति नदिति॥ द्विमासयोः कन्यातुलयोर्महालय श्राद्धं यदा हीनसामर्थ्ये मंत्रः॥ उरो अथ्यस्यदि
व इंद्र गोरदिवो यमस्य वरुण नष्ट नश्यति॥ सिक्षा नरः प्रदिवो अकाम कर्शनः सख्या सखिभ्य स तमिदं गृणीमसि॥ अत्र भरण्या श्राद्धमति
प्रशस्तं॥ ॥तदुक्तं मात्स्ये॥ भरणी पितृपक्षे तु महती परिकीर्त्तिता॥ अस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत्॥ ॥बृहस्पतिः॥ नभ
स्यापरपक्षस्य द्वितीयायां यदि वा भभे॥ तृतीया वाश्विनी ताराभ्यः सहिताणी नित्यदा पितुः॥ एतन्नक्षे षष्ठी योगविशेषेतु या कपिला संज्ञा
तदुक्तं वाराहे॥ नभस्यकृष्णपक्षे तु रोहिणी पातभूसुते॥ युक्ता षष्ठी तु राराजैः कपिला परिकीर्त्तिता॥ उनोपवास नियमै भास्करं
तत्र पूजयेत्॥ कपिलां वह्निजाग्णाय दत्वा क्रतुफलं लभेत्॥ उराराम सउद्वये॥ भाद्रे मासस्यासिते पक्षे भानौ चैव करे स्थिते॥ पाते कु
जे वरोहिण्यां सा षष्ठी कपिला भवेत्॥ अत्र दर्शान्तत्वेन महालयो भाद्रकृष्णपक्षो ज्ञेयः॥ हस्तार्कस्तु फलातिशयार्थः॥ संयोगेतु
चतुर्णां वै निर्दिष्टा परमेष्ठिना नेतितन्त्रे चोक्तं॥ ॥अत्र विशेषो स्कान्दे॥ देवदत्तं तथोशीरं कुंकुमैलामनःशिला॥ पत्रकं पद्मकं य
ष्टीमधु गव्येन पेषयेत्॥ क्षीरेण नोयकल्केन स्नानं कुर्यात्समंत्रकम्॥ आपन्नत्वमसि देवेश ज्योतिषां पतिरेव च॥ पापं नाशय मे दे
व वाङ्मनःकायकर्मजं॥ पंचगव्यकृतस्नानः पंचभंगेस्तु मार्जयेत्॥ पंचभंगैः पंचपल्लवैः॥ ॥तथा॥ रत्नैर्नानाविधैर्युक्तं सौव
र्णं कारयेद्रवि॥ शक्तितस्तु पलाद्धर्द्धं तदर्द्धकव्यतोपि वा॥ सौवर्णमरुणां कुर्यान्नोक्ता चैव तथा रथं॥ ॥तथा॥ अल्पवित्तोपि यः
कश्चित्सोपि कुर्यादिमं विधिं॥ ॥प्रभासखण्डे॥ स्थापयेदत्रुणां कुंभं चंदनोदकपूरितं॥ रक्तवस्त्रयुगच्छन्नं ताम्रपात्रेण संयुतं॥ रथौ

355

रम
२५५

रोक्तपलसैवरुकवक्रः सुविचित्रित ॥ सौवर्णपलसंयुक्तां मूर्त्तिं सूर्यस्य कारयेत् ॥ ततः सूर्यकपिलांच षोडशोपचारैः संपूज्य दद्या
त् ॥ दिव्यमूर्त्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकर ॥ कपिलासहितो देवो मम मुक्तिं प्रयच्छतु ॥ यस्मात्त्वं कपिले पुण्या सर्वलोकस्य पाव
नी ॥ प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भवेदिति ॥ इयमेव चंडषष्ठी ॥ सा चंद्रोदयव्यापिनी ग्राह्या ॥ उभयत्र तथात्वे पूर्वा तदुक्तं
भविष्ये ॥ नभस्याद्यपदे मासि षष्ठ्यां पक्षे सिते नरे ॥ चंडषष्ठीव्रतं कुर्यात् पूर्वैर्विधः प्रशस्यते ॥ चंद्रोदये यदा षष्ठी पूर्वाह्ले वा परेहनि
चंडषष्ठ्यां सिते पक्षे सेतो पोथ्या प्रयत्नत इति ॥ अष्टम्यामाश्वलायनेन मायावर्षसंज्ञं श्राद्धमुक्तं ॥ एतेन माध्या वर्षप्रोष्ठपद्या अ
परपक्षे इति ॥ इदं सप्तम्यादिषु त्रिष्वहस्सु ग्राह्ये ॥ आषाढ्याः पंचमे पक्षे गयामध्याष्टमी स्मृता ॥ त्रयोदशी गजच्छाया गयायास्तुल्यास्तु पै
तृके ॥ आश्विनकृष्णाष्टम्यां महालक्ष्मीव्रतं ॥ ॥ तत्र पुराणसमुच्चये ॥ श्रियो व्रतं भाद्रपदे सिताष्टमी प्रारभ्य कन्यागतिगेन सूर्ये
र्ये समापयेत्तत्र तिथौ च यावत्सूर्यस्तु पूर्वार्द्धगतो भवत्या इति ॥ ॥ तत्रैव ॥ कन्यागते केर्के प्रारभ्य कर्त्तव्यं तच्छ्रियो व्रते ॥ हस्तप्रोत
दलस्थेर्के तद्व्रतं न समापयेत् ॥ पूजनीया गृहस्थानामष्टमी आहृषिभिः श्रियः ॥ दोषैश्चतुर्भिः संत्यक्ता सर्वसंपत्करी तिथिः ॥ ॥
तथा ॥ पुत्रसौभाग्यराज्यायुर्नाशिनी सा प्रकीर्तिता ॥ तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ ॥ विशेषेण परित्याज्या नवमीदू
षिता यदीति ॥ दोषचतुष्टयं तत्रैवोक्तं ॥ त्रिदिने चावमे चैव अष्टमी नोपवासयेत् ॥ पुत्रहा नवमीविद्धा स्वश्रीहस्तार्द्धगे रवावि
ति ॥ त्रिदिनावमदिनलक्षणं च रत्नमालायां ॥ यत्रैकः स्पृशति तिथिद्वयावसानं वारश्चेदवमदिनं तदुक्तमाचार्यैः ॥ यः स्प

CC-0. In Public Domain. Digitization by eGangotri

र्शाद्धवर्जितं तिथिक्षयवास्यावाहुंतितुमस्कथितमिदद्वयं वचनेदृष्टं॥ एतेच सर्वे निषेधाः प्रथमारंभविषया॥ मध्येतु मतिसंभवेन्ने
यात्रनस्य षोडशश्राद्धसाध्यत्वेन मध्येत्यागायोगात्॥ इयं चंद्रोदयव्यापिनी ग्राह्या॥ तत्रैव पूजाप्रयुक्तेः॥ परदिने चंद्रोदयादूर्ध्वं त्रि
मुहूर्तव्यापित्वे परैव कार्या॥ अन्यथा पूर्वैव॥ पूर्वा वा परविद्धा वा ग्राह्या चंद्रोदये सदा॥ त्रिमुहूर्तापि सा पूज्या परतश्चोर्ध्वगामिनीति
संग्रहोक्तेः॥ इति महालक्ष्मीव्रतनिर्णयः॥ ॥ अथ नवम्यामन्वष्टकाश्राद्धं॥ तत्र कात्यायनः॥ अन्वष्टकासु नवभिः पिंडैः श्राद्धमुदा
हृतम्॥ पित्र्यादिमातृमध्यं च ततो मातामहांतकम्॥ ॥ तुलांडे॥ पितृणां प्रथमं दद्यान्मातॄणां तदनंतरम्॥ ततो मातामहानां
च अन्वष्टक्ये क्रमः स्मृतः॥ छागलेयः केवलानां क्षये कार्या वृद्धावादौ प्रकीर्तिता॥ अन्वष्टकासु मध्यस्थानां तासां कार्यस्क्रमातरं
दीपिकायां तु मातृश्राद्धमादौ कार्यमित्युक्तं॥ मातृयजनं त्वं तकास्वादि तइति॥ हेमाद्रौ ब्राह्मेपि॥ अन्वष्टकासु क्रमशो मातृपूर्वं
तदिष्यत इति॥ अत्रशाखाभेदेन व्यवस्थेति पृथ्वीचंद्रोदयः॥ जीवत्पितृकविषयमिति निर्णयदीपः॥ इदं च जीवत्पितृकेना
पि कार्यं तदुक्तं मैत्रायणीयपरिशिष्टे॥ अन्वष्टक्यं गयाप्राप्तौ मृतापत्यं च मृतेहनि॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवती
ति॥ यद्यपि जीवत्पितृकस्य पंचान्वष्टकाअवस्मकर्तव्यास्तथापि शक्तस्येयमावश्यकी प्रोष्ठपद्यष्टकाभूयः पितृलोके भविष्य
तीति हेमाद्रेपाद्मोक्तेः॥ सर्वासामेव मातॄणां श्राद्धं कन्यागते रवौ॥ नवम्यां हि प्रदातव्यं तुल्सलध्ववरायत इतिस्मृतेनावश्यकत्वोक्ते
श्च॥ इदं जीवत्पितृकेनापि सपिंडकार्यं हेमाद्रौ विष्णुधर्मोत्तरे॥ अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं तथैव च वेतुपक्रम्या॥ पित्राद्यनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वपरां कार्यं तस्यामपि तत्संतमेतिवचनं श्राद्धविधिना पिंडदाने प्राप्ते तन्नस्तत्कीर्तनं यस्य जीवत्पितृगर्भिपतित्वादिना पिंडदा
नं निषिद्धं ॥ तस्य तत्राप्यर्थमिति ॥ असुवासिनीभोजनमुक्तं मार्कण्डेयपुराणे ॥ मातृश्राद्धे तु संप्राप्ते ब्राह्मणैः सह भोजनं ॥ सुवासि
नी प्रदातव्यमिति शातातपोऽब्रवीत् ॥ भर्तुरग्रे मृता नारी सहदाहेन वा मृता ॥ न तत्स्थाने नियुंजीत विप्रैः सह सुवासिनीं ॥ ॥ त
त्रैवं मदालसावाक्यं ॥ स्त्रीश्राद्धे तु तद्देयास्त्वलंकाराश्च योषिते ॥ मंजीरमेखलादानं कर्णिकाकंकणादयः ॥ अत्राशक्तौ वस्त्रकल
महाश्वलायनं ॥ अनडुहो यवसमाहरे ॥ दग्निना वा कक्षमुपोषेदेषा मेऽष्टकेति न त्वेवानष्टकः स्यादिति ॥ ॥ हेमाद्रौ पितामह
अमावास्याव्यतीपात पौर्णमास्यष्टकासु च ॥ विद्वान्श्राद्धमकुर्वाणो नरकं प्रतिपद्यते ॥ अकरणे च प्रायश्चित्तमुक्तमृग्विधाने ॥
एभिर्द्युभिर्जपेन्मंत्रं शतवारं तु तद्दिने ॥ आन्वष्टक्यं यदाभूत्यं संपूर्णं याति सर्वथेति ॥ एतत्पक्षे द्वादश्यां विशेषो माधवीये ॥ स
न्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधि ॥ महालये तु यच्छ्राद्धं द्वादश्यां पार्वणात्तु तदिति ॥ ॥ अथ त्रयोदशीश्राद्धं ॥ तत्र चंद्रिका
त्रयोदशी भाद्रपदी कृष्णा सर्वापि तत्प्रिया ॥ तर्पयंति पितरस्तस्यां स्वयं पंचदशांते समा ॥ मघायुतायां तस्यां तु जलाद्यैरपि तोषि
ताः ॥ तर्पयंति पितरस्तद्वद्वर्षाणामयुतायुतं ॥ शंखः ॥ प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीं ॥ प्राप्य श्राद्धं तु कर्तव्यं मधुना पा
यसेन च ॥ प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तथा ॥ नृणां श्राद्धे सदा प्रीताः प्रयच्छंति पितामहाः ॥ एतन्नित्यमपि विष्णुधर्मे ॥ प्रौ
ष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशीत्युक्ता ॥ एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ॥ श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्य

... Nepal Sanskrit University, Balmiki Campus ...

तदुक्तं ॥ एतच्चाविभक्तैरपि पृथक्कार्यं ॥ ॥तथा च हेमाद्रौ ॥ विभक्ता वाविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः ॥ मघासु च ततोऽन्यत्र
नाधिकारः पृथग्दिने इति ॥ ॥ एतच्चावाच्यवीये ॥ हंसे हस्तस्थिते या तु मघायुक्ता त्रयोदशी ॥ तिथिर्वैवस्वती नाम सा छाया कुं-
जरस्य तु ॥ अन्यच्च ॥ अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशी ॥ पायसं मधुसर्पिभ्यां प्राक्छाये कुञ्जरस्य वेति विमतवचने ॥
केवलत्रयोदशीश्राद्धे धर्मशास्त्रा इति कल्पतरु ॥ शूलपाणिस्तु केवलवाक्यानामर्थवादत्वाद्विधौ च मघायोगश्रवणे विधिस्ता-
घवाद्विशिष्टमेव निमित्तमित्याह ॥ वस्तुतस्तु ॥ मधुमांसैश्च शाकैश्च पयसा पायसेन च ॥ प्रयतो दास्यति श्राद्धं वर्षासु च मघासु चे-
ति वशिष्ठवचने केवलमघाश्राद्धे विनिगमकाभावादुभयं भिन्नं निमित्तं पूर्वोक्तवचनाच्च योगाधिक्ये फलाधिक्यं भवत्येव याज्ञ-
वल्क्य ॥ तथा वर्षात्रयोदश्यां मघासु च विशेषत इति ॥ त्रयोदशीश्राद्धं नित्यं ॥ अमत्स्कामंसनतिंउरहितं कार्यं मघायुक्तत्रयो-
दश्यां पिण्डनिर्वपणं द्विजः ॥ ससंततानो नेव कुर्यान्नितेपते — वयोविदुरिति ॥ ॥ बृहत्पराशरोक्तेः ॥ इदं मलमासेपि कार्यं ॥ म-
घात्रयोदशीश्राद्धं प्रसूपस्थितिहेतुकं ॥ अनुनागतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे इति काठकगृह्योक्तेः ॥ ॥ अथ चतुर्दशी ॥ प्रचेता-
वृक्षारोहणालोहाद्यैर्विद्युज्ज्वालाविषाग्निभिः ॥ नखिदंष्ट्रिविपन्नानां तेषां शस्ता चतुर्दशी ॥ ॥ ब्राह्मे ॥ युवानः पितरो यस्य मृताः शस्त्रे-
णवा हताः ॥ तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता ॥ ॥ नागरखण्डे ॥ अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा ॥ श्राद्धं तेषां प्र-
कर्त्तव्यं चतुर्दश्यां नराधिप ॥ विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनां ॥ चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हितं ॥ शस्त्रहतस्य

357

रप
३५८

चतुर्द्दश्यां मिश्राद्धपरिशिष्टे च ॥ एतच्च दैवयुक्तमेकोद्दिष्टं कार्यमित्युक्तं प्रयोगपारिजाते ॥ प्रेतपक्षे चतुर्द्दश्यामेकोद्दिष्टविधानत
दैवयुक्तं तु नश्राद्धं पितॄणामक्षयं भवेत् ॥ नश्राद्धं दैवहीनं वै तत्पुत्रदारधनक्षय ॥ एकोद्दिष्टं दैवयुक्तमित्येवमनुरब्रवीत् ॥ भवि
ष्येपि ॥ समन्त्रमागतस्यापि पितुः शस्त्रहतस्य च ॥ चतुर्द्दश्यां तु यच्छ्राद्धं सपिंडीकरणाकृते ॥ चतुर्द्दश्यां तु कर्तव्यं मेकोद्दिष्टं महालये
एकोद्दिष्टविधाने न तत्कार्यं शस्त्रघातिन इति ॥ हारीतः ॥ विश्वेदेवाश्च तत्रापि पूजयित्वा दितो मलान् ॥ यत्त्वेशस्त्रहतास्तेषां श्रा
द्धं कुर्यादनंदितः ॥ अत्र शस्त्रहतस्यैव चतुर्द्दश्यामिति नियमो न तु चतुर्द्दश्यां मेव शस्त्रहतस्येति ॥ श्राद्धं शस्त्रहतस्यैव चतुर्द्दश्यां
महालये इति कालादर्शोक्तेः ॥ वार्षिकादीनामकरणाय तेर्थ पितामहापि शस्त्रहते श्चेदेकोद्दिष्टद्वयं कार्यं ॥ ॥ ननु कंस्मत्संत
रेत् ॥ एकस्मिन् द्वयोर्वैकोद्दिष्टमिति चिच्छास्त्रं हते भ्रातॄणामेव कार्यं ॥ पित्रादयस्त्रयो यस्य शस्त्रैर्घातास्तत्तु क्रमात् ॥ सम्भू
तेपार्वणं कुर्याद्दाद्धिकानि पृथक् पृथगिति वृद्धहस्तराशरोक्तेः ॥ एतस्मिन्वा द्वयोर्वा पित्रिषु च्छस्त्रेण घाहते ॥ एकोद्दिष्टं सुतः कु
र्यात्त्रयाणां दर्शवद्वैवादिति स्मृत्यंतराच्चेति ॥ ॥ अथ पर्वतिः ॥ इति चतुर्द्दशी ॥ ॥ अमायां विशेषमाह ॥ पराकेयमः ॥ हंसे
करस्थिते या तु अमावास्या करान्विता ॥ सा ज्ञेया कुंजरच्छाया इति बौधायनोब्रवीत् ॥ वनस्पतिगते सोमे या च्छाया प्राङ्मुखी भ
वेत् ॥ गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥ ॥ भारते ॥ अजेन सर्वलोहेन वर्षासु नियतव्रतः ॥ हस्तिच्छायासु विधि
वत्कर्णव्यंजनवीजितं ॥ श्राद्धं दद्यादिति शेषः ॥ आश्विन भन्कृप्रति यदि दोहिचेरामातामह श्राद्धं कार्यम् ॥ जातमात्रोपि दौ(

CC-0. In Public Domain. Digitization by eGangotri

एल
३५८

हित्रो विद्यमानेपि मातुले ॥ कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते निमन्ते ॥ इयं संगवव्यापिनी ग्राह्या प्रतिपद्याश्विने शुक्ले
दौहित्रस्त्वेकपार्वणं ॥ श्राद्धं मातामहं कुर्यात्सपिता संगवे सदेति वचनात् ॥ इदं च जीवत्पितृकेनापि पिण्डरहितं कार्य्यं ॥ मुण्डनं पि
ण्डदानं च प्रेतकर्म च सर्वशः ॥ न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति दक्षेणापि पिण्डनिषेधात् ॥ आन्वष्टक्यवद्विशेषवच
नाभावात् ॥ इति महालयनिर्णयः ॥ ॥ आश्विनशुक्लप्रतिपदि नवरात्रारंभः ॥ तन्निर्णयः ॥ ॥ देवीपुराणे ॥ शृणु राजन्प्र
वक्ष्यामि चण्डिकापूजनं क्रमं ॥ आश्विनस्यासिते पक्षे प्रतिपत्सु शुभे दिने ॥ शुद्धे तिथौ प्रकर्त्तव्यं प्रतिपच्चोर्द्ध्वगामिनी ॥ आद्यास्तु
नाडिकास्त्यक्त्वा षोडश द्वादशापि वा ॥ अपराह्णे च कर्त्तव्यं शुभसंततिकांक्षिभिः ॥ इदं चापराह्णयोनित्याः प्राशस्त्यं द्वितीयदि
ने प्रतिपदोऽभावज्ञेयं ॥ ॥ तथा च डामरतंत्रे च देवीवचः ॥ अमायुक्ता न कर्त्तव्या प्रतिपत्पूजने मम ॥ मुहूर्त्तमात्रा कर्त्तव्या
द्वितीयादिगुणान्विता ॥ आद्याः षोडश नाडीस्तु लब्ध्वा यः कुरुते नरः ॥ कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवं ॥ ॥ देवीपुरा
णे ॥ पूर्वविद्धा तु या शुक्ला भवेत्प्रतिपदाश्विनी ॥ नवरात्रव्रतं तस्यां न कार्य्यं शुभमिच्छता ॥ देशभंगो भवेत्तत्र दुर्भिक्षं चोपजा
यते ॥ नंदायां दर्शयुक्तायां यत्र स्यान्मम पूजनमिति ॥ ॥ स्कांदेपि ॥ प्रतिपद्याश्विने मासि सा भवा शुभदा भवेत् ॥ मा पं
चदर्शी कृत्वा तया युक्ता न स्थापने ॥ विरुद्धफलदा सा हि पुत्रदारभयावहेति ॥ ॥ तथा ॥ वर्जनीया प्रयत्नेन अमायुक्ता तु पा
र्थिव ॥ द्वितीयादियुतायुक्ता प्रतिपत्स्थापने मम ॥ तस्य शापायुतं दत्वा भस्मशेषं करोम्यहं ॥ ॥ तथा देवीपुराणे ॥ यो

358

राम
३५८

१८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मां पूजयन्नेनित्यं द्वितीयादिगुणान्वितः ॥ प्रतिपत्काद्दीं ज्ञात्वा सोऽश्वमेधफलमव्ययं ॥ यदि कुर्याद् अमायुक्ता प्रतिपत्सर्वकामदा ॥ आ
ग्रहात्कुरुते यस्तु कलशस्थापनं मम ॥ तस्य संपद्विनाशः स्यात्ज्येष्ठः पुत्रो विनश्यति ॥ अमायुक्ता न कर्त्तव्या प्रतिपच्चण्डिकार्च्चने ॥
धनार्थिभिर्विशेषेण वंशहानिश्च जायते ॥ तद्दर्शकलया युक्ता प्रतिपच्चण्डिकार्च्चने ॥ उदये द्विमुहूर्त्तापि ग्राह्या सोदयदायिनी ॥
यावाश्वयुजि मासे स्यात्प्रतिपद्भद्रयान्विता ॥ शुद्धा महार्च्चनं तस्याः शतयज्ञफलप्रदं ॥ प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत् ॥ ॥ तत्रैव ॥ शरत्काले महापूजा क्रियते या च वार्षिकी सा कार्या उदयगामिन्यां नत्र
तिथियुग्मता ॥ यदा तु पूर्वदिने संपूर्णा शुद्धा च भूत्वा परदिने वर्द्धते तदा संपूर्णत्वाद् अमायोगाभावाच्च पूर्वैव यानि द्वितीयायो
गः निषेधकानि वचनानि केचित्पठन्ति तान्यपि शुद्धाधिकानि वेधपराणि ॥ परदिने प्रतिपदोऽत्यन्तास्तत्वे तु दर्शपूर्वैव ग्राह्या ॥ तह
लक्षण ॥ तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमिति ॥ अत्र देवीपूजैव प्रधानं उपवासादि तु ॥ अष्टम्यां वा
नवम्यां वा जगन्मातरमम्बिकां ॥ पूजयित्वाश्विने मासि विशोको जायते नरः इति ॥ भविष्यात् नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिक
मिति ॥ देवीपुराणात् शरत्काले महापूजा क्रियते या च वार्षिकी ॥ इति मार्कण्डेयपुराणाच्च ॥ रूकाह पशोपि कालिकापुराणे ॥ य
स्त्वेकस्यामथाष्टम्यां नवम्यां मथसाधकः ॥ पूजयेद्वरदां देवीं महाविभवविस्तरैरिति ॥ ॥ देवीपुराणे ॥ महानवम्यां पूजये
यं सर्वकामप्रदायिका ॥ सर्वेषु वत्सरेष्वेषु तव भक्तिः प्रकीर्तिता ॥ कृत्वा प्रीतियशोराज्यपुत्रायुर्धनसंपद ॥ स्नावकाम्यानि

CC-0. In Public Domain. Digitization by eGangotri

स्मच ॥ एवमन्यैरपि तथा देव्याः कार्यं प्रपूजनं ॥ विभूतिमतुलां लब्ध्वा चतुर्वर्गप्रदायिकमिति ॥ यो मोहादथ वालस्याद्देवीं दुर्गां महोत्सवे
न पूजयेत्तिदंभाद्वा द्वेषाद्वाप्यथ भैरव ॥ क्रुद्धा भगवती तस्य कामानिष्टान्निहंति वै ॥ इति कालिकापुराणे फलनिंदाश्रुतेः ॥ ॥ वर्षे व
र्षे विधातव्यं स्थापनं च विसर्जनमिति देवीपुराणाच्च ॥ अत्रोपवासादिकमुक्तं हेमाद्रौ भविष्ये ॥ एवं च विंध्यवासिन्यां नवरात्रोपवास
तः ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ॥ गृहे ग्रे शाक्तिपरैर्ग्रामे ग्रामे वने वने ॥ स्ना
तैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ॥ वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैरिति ॥ ॥ यत्तु भविष्ये ॥ एवं नानाम्लेच्छग
णैः पूज्यते सर्वदस्युभिरिति ॥ तन्मानसपूजापरं ॥ विना मंत्रैस्तामसी स्यात्किरातानां तु संमतेति ॥ ॥ तत्रैवोक्ते ॥ ॥ देवीपुरा
णेपि ॥ कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नंदिकां ॥ अयाची ह्यथ वैकाशी नक्ताशी वाथ वा पदः ॥ भूमौ शायी तु वामं च कुमारी
भोजयेत्सुदा ॥ वस्त्रालंकारदानैश्च संतोष्या प्रतिवासरं ॥ बलिं च प्रत्यहं दद्यादोदनं मांसमाषवत् ॥ त्रिकालं पूजयेद्देवीं जप
स्तोत्रपरायणा इति ॥ नंदिका प्रतिपदम् तत्र पूजनं रात्रौ कार्यं ॥ आश्विने मासि मेघांते महिषासुरमर्दिनीं ॥ निशासु पूजयेद्भक्त्या
सोपवासादिकः क्रमादिति देवीपुराणात् ॥ ॥ संग्रहेपि ॥ आश्विने मासि मेघांते प्रतिपद्यां तिथिर्भवेत् ॥ तस्यां नक्तं प्रकुर्वीत
रात्रौ देवीं च पूजयेत् ॥ रात्रिरूपा यतो देवी दिवारूपो महेश्वरः ॥ रात्रिव्रतमिदं देवी सर्वपापप्रणाशनम् ॥ सर्वकामप्रदं नृ
णां सर्वशत्रुनिवर्हणां ॥ नतु मासि वाश्वयुजे शुक्ले नवरात्रविशेषतः ॥ संपूज्य नवदुर्गां च नक्तं कुर्यात्समाहितः ॥ नवरात्राभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धंकर्म नक्तव्रतमिदं स्मृतमित्यादिवचनान्नक्तमेव प्रधानमिति चेत् ॥ नवरात्रोपवासत इत्यादेरनुपपत्तेः ॥ तेन पाक्षिकनक्तो
पवादोयं ॥ नवरात्रेः कर्मकालत्वेन व्यापिनी पूर्वैव प्रतिपत् ग्राह्या इत्येवं ॥ न्यायतः प्राप्तावपि पूर्वोक्तवचनैर्विधानात् ॥ प्रतिप
द्वैधृत्यादियोगनिषेधो देवीपुराणे ॥ त्वाष्ट्रवैधृतियुक्ता चेत् प्रतिपच्चण्डिकार्चने ॥ तयोरन्ते विधातव्यं कलशारोपणं
गृहे ॥ चित्रावैधृतियुतापि द्वितीयायुता चेत्तत्रैव ग्राह्येत्युक्तं ॥ ॥ दुर्गोत्सवे ॥ भद्रान्विता वेत्प्रतिपत्तु लभ्यते विरुद्धयोगैरपि सं
गतोस्तु नो ॥ सैवापराह्णेपि तु धैर्विधेयो श्रीपुत्रराज्यादिविवृद्धिहेतुरिति ॥ यदा तु वैधृत्यादिपरिहारेण प्रतिपन्न लभ्यते तदो
क्तं कात्यायनेन ॥ प्रथापयाश्विने मासि भवेद्वैधृतिचित्रयो ॥ आद्यपादौ परित्यज्य प्रारंभेन्नवरात्रकमिति ॥ ॥ मत्स्येपि ॥ चि
त्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप त्याज्या ह्यंशास्तु यत्नाद्यास्तुरीयांशे तु पूजनमिति ॥ ॥ रुद्रयामलेपि ॥ वैधृतौ पुत्रनाशः स्या
च्चित्रायां धननाशनं ॥ तस्मान्न स्थापयेत्कुंभं चित्रायां वैधृतौ तथा ॥ संपूर्णा प्रतिपद्देवि चित्रायुक्ता यदा भवेत् ॥ वैधृत्या वापि
युक्ता स्यात्तदा मध्यंदिने रवौ ॥ अभिजित्तु मुहूर्ते यत्तत्र स्थापनमिष्यते ॥ इति ॥ इदं कलशस्थापनं रात्रौ न कार्यं ॥ न रात्रौ स्था
पनं कार्यं न च कुंभाभिषेचनमिति मात्स्योक्तेः ॥ भास्करोदयमारभ्य यावत्तु दश नाडिकाः ॥ प्रातःकाल इति प्रोक्तः स्थापनारो
पणोष्ठिति ॥ ~~विष्णुधर्मोत्तरे~~ ॥ ॥ रुद्रयामले ॥ स्नानं मंगलिकं कृत्वा ततो देवीं प्रपूजयेत् ॥ शुभाभिर्मृत्तिकाभिश्च पूर्वं कृ
त्वा तु वेदिकां ॥ यवान्वै वापयेत्तत्र गोधूमैश्चापि संयुतान् ॥ तत्र संस्थापयेत्कुंभं विनिनामंत्रपूर्वकम् ॥ सौवर्णं राजतं वापि

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३६०

ताम्रं मृन्मयं जं तु वेति॥ ॥अथ पूजाविधि॥ सा च जयंती मंत्रेण नवाक्षरेण वा कार्या॥ ॥तदुक्तं देवीपुराणे॥ कुर्याद्देवा
स्तु मंत्रेण पूजां क्षीरघृतादिभिरस्तु क्त्वा॥ जयंती मंगला काली भद्रकाली कपालिनी॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते॥
अनेनैव तु मंत्रेण जपहोमौ तु कारयेदिति॥ ॐ दुर्गे दुर्गे रक्षणि स्वाहेति नवाक्षरः॥ तत्र प्रतिपदि प्रातरभ्यंगं कृत्वा देशकालौ संकीर्त्य
ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वक दीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्त्ति
लाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं शारदनवरात्रप्रतिपदि विहितकलशस्थापनदुर्गापूजाकुमारीपूजादि करिष्ये इति
संकल्प मही द्यौरिति भूमिं स्पृष्ट्वा ओषधयः समिति यवान्निक्षिप्य कुंभसंस्थाप्य इमं मे गंगे इति जलेनापूर्य गंधद्वारामिति गं
धं या ओषधीरिति सर्वौषधीः काण्डात्काण्डादिति दूर्वा अश्वत्थे व इति पंच पल्लवान् स्योना पृथिवीति सप्तमृदः याः फलिनीरिति
फलं परि वाजपतिरिति पंचरत्नानि हिरण्यं वक्षि स्वा युवा सुवासा इति वस्त्रेण वेष्ट्य पूर्णा दर्वि इति पात्रं निधाय तत्र वरुणं
संपूज्य जीर्णायां नूतनायां वा प्रतिमायां दुर्गामावाह्य पूजयेत्॥ ॥तद्यथा॥ पूर्वोक्तमंत्रमुक्त्वा॥ आगच्छ वर दे देवि दैत्यदर्प
निसूदनि॥ पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये॥ सर्वतीर्थमयं वारि सर्वदेवसमन्वितं॥ इमं घटं समागच्छ तिष्ठ देवग ३६०
णैः सह॥ दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय॥ बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह॥ इत्यावाह्य पूर्वोक्तमंत्रेण षोड
शोपचारैः पूजयित्वा माषभक्तबलिं कूष्मांडादिबलिं क्षत्रियादिश्छागादिबलिं वा निवेदयेत्॥ ॥ततः कुमारीपूजा॥ तदुक्तं

राम
३६०

१८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्कांदे ॥ एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च ॥ द्विगुणं त्रिगुणं वापि प्रत्येकं नवमं तु वा ॥ ॥ तथा ॥ नवभिर्लभते भूमिमैश्वर्यं
द्विगुणेन तु ॥ एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं लभेत् ॥ गंधपुष्पफलादीनां प्रीणितस्या न विद्यते ॥ तेन द्विवर्षमारभ्य दशवर्ष
पर्यंतास्तु च पूज्या ॥ तासां च क्रमेण कुमारिका त्रिमूर्त्तिः कल्याणी रोहिणी कालीचंडिका शांभवी दुर्गा सुभद्रेति नामभिः पूजा का
र्या ॥ मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं ॥ नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहमिति ॥ एवमभ्यर्च्चनं कुर्यात्
कुमारीणां प्रयत्नतः ॥ कंचुकैश्चैव वस्त्रैश्च गंधपुष्पाक्षतादिभिः ॥ नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः ॥ ॥ तथा ॥ ग्र
थिस्फुटितशीर्णांगीं रक्तपूयव्रणांकितां ॥ जात्यंधां केकरां काणांधोज्यै भोजयेत्पायसादिभिः कुरूपां तनुरोमशां ॥ संत्यजेद्रो
गिनीं कन्यां दासीगर्भसमुद्भवां ॥ ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां ॥ लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजां ॥ दारुणे
चांत्यजातीनां पूजयेद्विधिना नर इति ॥ ॥ ~~अत्र वेदपारायणमुक्तं~~ ॥ ~~रुद्रयामले~~ ॥ एवं च वेदविदो विप्रान्सर्वान्संसाद
येत् ॥ तेषां च वरणं कार्यं वेदपारायणाय वै ॥ इति ॥ ॥ तथा ॥ एकोदराभिवृद्ध्या तु नवमीयावदेव हि ॥ चण्डीपाठं ज
पेच्चैव जापयेद्वा विधानतः ॥ ~~तिथितत्त्वे वाराहीतन्त्रे~~ ॥ प्रणवं वादितो जप्त्वा सोत्रं वा संहितां पठेत् ॥ अंते च प्रणवं दद्यादित्युवा
च दिव्यपूरुष ॥ आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः ॥ हस्तसंस्थापनाद्देव्यस्माद्देवि फलं भवेत् ॥ स्वयं च लिखितं यच्च
शूद्रेणालिखितं भवेत् ॥ अब्राह्मणेन लिखितं तच्चापि विफलं भवेत् ॥ ऋषिछंदादिकं यस्तु पठेत्सो त्वेवि वक्षणाः ॥ तं यच्च शू

CC-0. In Public Domain. Digitization by eGangotri

स्तोत्रे न हृदयेनेयत्र प्रणवं तत्र विन्यसेत्॥ सर्वत्र पाठे विज्ञेयस्त्वन्यथा विफलं भवेत्॥ एवं नवमीपर्यन्तं प्रत्यहं कुर्यात्॥ ॥तत्र
विशेषो देवीपुराणे॥ यदाश्वे दिवसे कुर्याच्चंडिकार्चनादिकम्॥ द्विगुणां तद्दिनीयह्नि द्विगुणां तत्परेहनि॥ नवमीतिथिपर्यन्तं
-- वृद्ध्या जपादिकमिति॥ एतेन नवरात्रे पूजैव प्रधानं उपवासादि त्वंगमिति गम्यते॥ तिथिह्रासे तु तिथिद्वयनिमित्तं पूजा
दि महालयश्राद्धदेकं दिने आहृत्या कार्यं॥ वृद्धौ तद्देवाहुति॥ ततो नवरात्रोपवासादिसंकल्पं कुर्यात्॥ संकल्पविशेषो दु(
र्गोत्सवे॥ स्वशक्त्या वनेनवा पूजादि कारयेत्॥ स्वयं वाप्यन्यतो वापि पूजयेत्पूजयीत वेति देवीपुराणात्॥ इदं च देवी
पूजनं शुक्लास्वपि कार्यं॥ ॥तदुक्तं धर्मप्रदीपे॥ नष्टे शुक्रे तथा जीवे सिंहस्थे च वृहस्पतौ॥ कार्यं वै वत्स देव्याश्चार्चा प्रत्य
ब्दं कुलधर्मत इति॥ अत्राश्वपूजनमप्युक्तं देवीपुराणे॥ आश्वयुक्शुक्लप्रतिपत्स्वातियोगे शुभे दिने॥ पूर्वमुच्चैःश्रवा नामप्र
थमं श्रियमावहम्॥ तस्मात्साश्वैर्नरैस्तत्र पूज्योसौ अश्वयामह॥ पूजनीयास्तुरगा नवमीयावदेव हि॥ शांतिःस्वस्त्ययनं का
र्यं तदा तेषां दिने दिने॥ धान्यभक्ष्यातकंकुष्ठं वचासिद्धार्थकास्तथा॥ पंचवर्णेन सूत्रेण ग्रंथितेषां तु बंधयेत्॥ वायव्ये वरुणै
सौरैः शाक्रैर्मन्त्रैः सवैश्रवैः॥ वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने॥ ॥कल्पतरौ॥ ज्येष्ठायोगे पुरा तत्र राजाश्वा होमहाब

लाः॥ पृथिवीमवहन्पूर्वं सशैलवनकानना॥ कुमुदैरावणौ पद्मः पुष्पदंतोथ वामन॥ सुप्रतीकोंजनो नीलस्तस्मात्तत्र तु पूज
येत्॥ शक्रादशान्तमारभ्य नवम्यंतं च पूर्ववत्॥ अश्ववदेव मादेशमर्थ॥ ॥अथ प्रतिपदादिकविशेषो भविष्ये॥ केशसंस्का

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रुद्रयामिले प्रद्यात्प्रतिपद्दिने ॥ पट्टं तैलं द्वितीयायां केशसंयमहेतवे ॥ पट्टडोरमिति पाठः ॥ दर्पणं च तृतीयायां सिंदुरालक्तकं
तथा ॥ मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमण्डलं ॥ पंचम्यामंगरागं च शक्त्यालंकरणानि च ॥ षष्ठ्यां बिल्वतरौ बोधं सायं संध्यासु का-
रयेत् ॥ सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् ॥ उपोषणमथाष्टम्यामात्मशक्त्या च पूजनं ॥ नवम्यामुग्रचण्डायाः पूजां कुर्या-
द्बलिं तथा ॥ संपूज्य प्रेषणं कुर्याद्दशम्यां शारदोत्सवैः ॥ अनेन विधिना यस्तु देवीं प्रीणयते नरः ॥ स्कंदवमाले देवी तं पुत्रधनकी-
र्त्तिभिः ॥ ॥ लैंगे ॥ कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभेपि च ॥ नवम्यां बोधयेद्देवीं महाविभवविस्तरैः ॥ शुक्लपक्षे चतुर्थ्यां तु
देविकेशविमोक्षणं ॥ प्रातरेव तु पंचम्यां स्नापयेत्सुशुभैर्जलैः ॥ षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेधिवासनं ॥ सप्तम्यां पत्रिकापूजा अ-
ष्टम्यां चाप्युपोषणं ॥ पूजां च सागरश्चैव नवम्यां विधिवद्बलिं ॥ विसर्जनं दशम्यां तु क्रीडाकौतुकमंगलैः ॥ ॥ अथाशौचविशेषः ॥ आ-
श्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके ॥ शावाशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः ॥ सूतके वर्त्तमाने च तत्रोत्पन्ने सदा बुधैः ॥ देवीपू-
जा प्रकर्त्तव्या पशुयज्ञविधानतः ॥ सूतके पूजनं प्रोक्तं दानं चैव विशेषतः ॥ देवीमुद्दिश्य कर्त्तव्यं तत्र दोषो न विद्यते इति ॥ ॥ विष्णु-
रहस्येपि ॥ पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः ॥ तत्कर्त्तव्यं नरैः शुद्धं दानार्चनविवर्जितमिति ॥ तिथितत्त्वेप्युक्तं ॥ आश्विनकृ-
ष्णनवम्यादि शुक्लप्रतिपदादि षष्ठ्यादि सप्तम्यादि वैकं कर्म अनन्तमध्ये आशौचपातेपि न दोषः ॥ संकल्पव्रतसत्रयोरिति ॥ आर-
ब्धं स्वयमकार्यं ॥ अनारब्धं त्वन्येन कारयेदिति दिवोदासः ॥ रजस्वली त्वन्येन कारयेत् ॥ सूतकादिवद्विशेषवचनाभावात् ॥ स्त्री

रत्न
२६२

ग्रां चनवरात्रे तांबूलादिच वर्ज्यं भवति॥ ॥तदुक्तं गारुडे॥ गंधालंकारतांबूलपुष्पमालानुलेपनम्॥ उपवासेन दुष्यंति दंतधा
वनमंजनमिति॥ एतन्नक्तभक्तोपवासविषयं॥ आश्विनशुक्लपंचम्यां उपांगललितात्रतं॥ तत्र यद्यपि कथायां कालविशेषो नो
क्तस्तथापि रात्रौ जागरणं कुर्यात्क्रीडनवादित्रनिःस्वनैः॥ इति रात्रौ जागरोक्तेः शक्तिपूजायां रात्रौ प्राशस्त्याच्च रात्रिव्यापिनी ग्राह्येति
केचित्॥ वस्तुतस्तु वचनं विना रात्रिपूजायां मानाभावात्॥ जागरस्य चांगत्वात्प्रधानवाक्याच्च॥ अन्यथा जागरणोक्ते चंद्रायणेऽपि जने
तथा॥ नारायणे प्रसन्ने वै रात्रियोगो विशिष्यते॥ इति॥ कालहेमाद्रौ वचनाच्च पूर्वविद्धा ग्राह्या॥ रात्रिशब्दः पूर्वोक्तवचनैरिति हे
माद्रिः॥ आश्विनशुक्लपक्षे मूलनक्षत्रे सरस्वतीस्थापनं॥ ॥देवीपुराणे॥ मूले तु स्थापनं देव्याः पूर्वाषाढासु पूजनं॥ उत्तरासु ब
लिं दद्यात् श्रवणे न विसर्जयेदिति॥ रुद्रयामलेऽपि मूलनक्षत्रे सुराधीश पूजनीया सरस्वती॥ पूजयेत्सततं हं देव यावद्वैष्णवमृक्ष
कं॥ नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन॥ पुस्तके स्थापिते देव विद्याकामो द्विजोत्तम॥ मूलमाद्यपादे आवाहनमिति शि
ष्टाः॥ श्रवणाद्यपादे च विसर्जयेत्॥ आदिभागो निशायां तु श्रवणस्य यदा भवेत्॥ संप्रेषणं तदा देव्या दशम्यां च महोत्सव इति
प्रसाराद्युपराणात्॥ अथ षष्ठी॥ देवीपुराणे॥ ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमंत्रणं॥ सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवे
शनं॥ पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणं॥ उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवां॥ श्रवणेन दशम्यां तु प्रणिपत्य विसर्ज
येत्॥ ॥कालिकापुराणे॥ बोधयेद्बिल्वशाखायां षष्ठ्यां देवीफलेषु च॥ सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत्॥ पुनः पूजां

362

राम
२६२

१९०

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तथाष्टम्यां विशेषेण समाचरेत्॥ जागरं च स्वयं कुर्याद्बलिदानं महानिशि॥ प्रभूतबलिदानेन नवम्यां विधिवच्चरेत्॥ विसर्जनं दश
म्यां तु कुर्याद्वै शारदोत्सवे॥ धूलीकर्दमविक्षेपैः क्रीडाकौतुकमंगलैः॥ अत्र सर्वतिथिनक्षत्रयोगादरो रव्यः कल्प॥ तदभावे तु तिथि
रेव ग्राह्या॥ तिथिनक्षत्रयोगे द्वयोरेवानुपालनं॥ योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि इति॥ ॥देवलोके॥ अत्र च पत्रीप्र
वेशात् पूर्वेद्युः सायंकाले षष्ठ्यभावे तत्पूर्वदिनेऽधिवासनं कार्यं॥ सायंकाले तत्तासत्वे त्वधिवासनलोपः॥ षष्ठ्यां सायं प्रकुर्वीत बि(
ल्ववृक्षेऽधिवासनमिति पूर्ववचनादिति कल्पतरुः॥ सायं तिथिः फलातिशयमानार्थं न तु कर्मकलापइत्याचार्य॥ अत्र क्रम॥ बिल्व
समीपं गत्वा देवीं बिल्वं च संपूज्य प्रार्थयेत्॥ ॥तत्र मंत्रः॥ रावणस्य वधार्थाय रामस्यानुग्रहाय च॥ अकाले तु सराणां बोधो देव्यास्त्व
यि कृतः पुरा॥ अहमप्याश्रितः षष्ठ्यां सायाह्ने बोधयाम्यतः॥ श्रीशैलशिखरे जातः श्रीफ — श्रीनिकेतन॥ नेतव्योसि मया गच्छ पूज्यो
दुर्गास्वरूपतः इति॥ एवं देवीमधिवास्य परेदिने निमंत्रितशाखापत्रीप्रवेशपूजां कुर्यात्॥ ॥तत्र लैंगे॥ मूलाभावे तु सप्त
म्यां केवलायां प्रवेशयेत्॥ युग्माभ्यां नवबिल्वस्य फलाभ्यां शाखिकां तथा॥ तथैव प्रतिमां देव्याः स्नात्वा भृशं प्रवेशयेत्॥ अत्र चोपवास
पूजादावोदयिकी सप्तमी ग्राह्या॥ तत्तु युग्मवाक्यात् पूर्वा युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया॥ रवेरुदयमीक्षंते न तत्र तिथि
युग्मतेति वचनात्॥ भगवत्याः प्रवेशादिविसर्गांताश्च याः क्रियाः॥ तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुध इति नंदिकेश्वरपुराणाच्च
तत्रापि घटिकामानेन न्यूनत्वे परा न कार्या॥ व्रतोपवासनियमे घटिकापि या भवेदिति देवलोक्तेः॥ ॥॥पत्रिकाः॥ रंभा कच्ची हरिद्रा च जयंती

CC-0. In Public Domain. Digitization by eGangotri

रत ३६३

बिल्वदाडिमौ ॥ अशोकोमानवृक्षश्च धान्यादिनवपत्रिकाः इति ॥ अस्यामेव सप्तम्यां देवीत्रिरात्रमाहर्धीमतः ॥ आश्विने मासि शुक्ले तु कर्त्तव्यं नव
रात्रकं ॥ प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥ त्रिरात्रं वापि कर्त्तव्यं सप्तम्यादि यथाक्रमं ॥ देवीपुराणे ॥ आश्विने वाथ माघे वा चै
त्रे वा श्रावणेपि वा ॥ कृत्वाष्टम्यादिकर्त्तव्यां त्रिरात्रं शुक्लादिकं हरेत् ॥ यावत्कृष्णाष्टमीं शक्रे उपोष्य तु विधानतः ॥ दानहोमजपैः पूजा कन्या
भोज्यास्तथा त्वहं ॥ महाभैरवरूपेण अस्थिमालाधराश्रये ॥ पूजनीया विशेषेण वस्त्रैर्ग्राममपुरादिषु ॥ ॥ इति मासचतुष्टयेभिधाय ॥ अ
थवा नवरात्रं वा सप्तपंचत्रिकं दिवा ॥ एकभक्तेन नक्तेन याचितो योषिनेः क्रमात् ॥ पूजनीयाश्विने शक्र यावत्कृष्णाष्टमी भवेत् ॥ सर्व
कार्याणि सिध्यंति शक्र नास्त्यत्र संशयः ॥ दिवैव कराच्चमुक्तं ॥ नवरात्रं तु नैशक्र त्रिरात्रं वै कराचं ॥ व्रतं चरति यो भक्त्या सस्मोत्स्वामि
रोद्धिनमिति ॥ ॥ अथ विशेषो भविष्ये ॥ सप्तम्यां नवगेहानि दारुजानि नवानि च ॥ एकं वा वन्निभावेन कारयेन्नृपसमाहितः
दुर्गागृह प्रकर्त्तव्यं चतुरस्रं सुशोभनं ॥ तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तां समां शुभां ॥ तस्यां सिंहासनं शोभनं कंवलाजिनसंयुतं ॥ त
त्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुतां ॥ अजैश्च तु भीरु विरैर्दशभिर्वा विभूषिता ॥ नवग्रहात्मकवर्णाभां त्रिनेत्रां शशिशेखरां ॥ अ
नेककुसुमाकीर्णां कपर्देन सुशोभितां ॥ नित्ये वविंवसन्नद्ध किंकिं – काणनादिनीं ॥ शूलचक्रदराद्यशक्तिवज्रचापासिधारिणीं
घण्टाश्वमालाकरकपानपात्रलसत्करां ॥ तदग्रे छिन्नशिरसं महिषासुरधिराप्लुतं ॥ निःसृताई ततकंठं नालेवर्मासिधारिणं
देवीधृतकरग्रीवं शूलेनोरसि ताडितं ॥ नागपाशेन विक्षिप्तं हर्यक्षेणापि विद्धुतं ॥ वमद्रुधिरवक्त्रेण धन्वतो र्दंसत्तनरूपा ॥ सर्व

363

रम ३६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तोमानवक्केशासेव्यमानासुरैस्तथैति ॥ तत्र देवीप्रकर्त्तव्या हैमी वा राजती तथा ॥ मृद्वार्क्षी लक्षणोपेता स्वकुले प्रपूजयेत् ॥ वार्क्षी
दारुमयी देवीमूर्त्तिस्थापने विशेषो देवीपुराणे ॥ याम्या स्याच्छुभदा दुर्गा पूर्वास्या न्नयवर्द्धिनी ॥ पश्चिमाभिमुखी नित्यं नस्थाप्या सौ
म्यदिङ्मुखी ॥ प्रतिमाभावे विशेषस्तत्रैव ॥ हेमराजतमृद्दारुशैलचित्रार्पिताऽपि वा ॥ खड्गे शूले विना देवी सर्वकामफलप्रदा ॥ यद्य
द्यस्यायुधं प्रोक्तं तस्मिंस्तां प्रतिपूजयेत् ॥ देवीभक्तार्चिताऽपुंसा राज्यायुःसुतसौख्यदा ॥ ॥ कालिकापुराणे ॥ लिंगस्थां पूजयेद्देवीं मंडल
स्थां तथैव च ॥ पुस्तकस्थां महादेवीं पावके प्रतिमासु च ॥ चित्रे च विशिखे खड्गे जलस्थां वापि पूजयेत् ॥ बिल्वपत्रैर्यजेद्देवीं तथा जाती
प्रसूनकैः ॥ नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः ॥ भगलिंगाभिधानैश्च भगलिंगप्रमीतकैः ॥ भगलिंगक्रियाभिश्च प्रीणयेद्वरव
र्णिकां ॥ परैर्नाक्षिप्यते यस्तु यवरान्नाक्षिपत्यपि ॥ तस्य क्रुद्धा भगवती सापं दद्यात्सुदारुणां ॥ चित्रमृण्मय्यादौ स्नानाद्यसंभवे वस्त्रे
वोक्तं ॥ अंतिकस्यापि तेखड्गे स्नापयेद्दर्पणेऽथवेति ॥ ॥ अथ सप्तमीपूजाविधिः ॥ प्रतिपद्युक्तविधिना फलसंकीर्त्तनान्ते नवपत्रि
कामसमयदुर्गापूजाबलिदानानि करिष्ये इति संकल्प पूर्वं निमंत्रितबिल्वसमीपं गत्वा संपूज्य ॥ आकच्छ सर्वकल्याणानि मंत्रं पठि
त्वा ॥ बिल्ववृक्ष महाभाग सदा त्वं संकरप्रिये ॥ गृहीत्वा तव शाखां च देवीपूजां करोम्यहं ॥ शाखाछेदोद्भवं दुःखं न च कार्यं त्वया प्र
भो ॥ गृहीत्वा नवशाखां च पूज्या दुर्गेति वस्मृति ॥ उत्तिष्ठ पत्रिके देवि सर्वकल्याणहेतवे ॥ पूजां गृहाण सकलामस्माकं वरदा भव ॥
मेरुमंदरकैलासहिमवच्छिखरे गिरौ ॥ जातः श्रीफलवृक्षत्वमंबिकायाः सदा प्रिय ॥ ॥ इति संप्रार्थ्य ॥ ॐ छिंधि धि फट्फट्स्वाहेति

रत्न
३६४

छित्वा संपूज्य ॥ ॐ चाउराउवल इति वाद्यघोषेण देवीनां व गृहे प्रवेशय ॥ आरोपितासि दुर्गे त्वं मृण्मय्या श्रीफले पि च ॥ स्थिरा नित्या त्वं
भूत्वा च गृहे त्वं कामदा भवेति स्थिरोक्त्या रंभादिपत्रिका ॥ पंचगव्येन पंचामृतेन स्नापयित्वा वस्त्रेणावेष्ट्य स्थापयेत् ॥ ततः पूर्व
वत्संकल्पं कृत्वा श्मतानादाय देवीमावाहयेत् ॥ ॥ तत्र मंत्र ॥ आवाहयाम्यहं देवि मृण्मय्यां श्रीफलेन तथा ॥ कैलाशशिखरादेवि विं
ध्याद्रेर्हिमपर्वतात् ॥ आगत्य विल्वशाखायां चण्डिके कुरु सन्निधिम् ॥ स्थापितासि मया दुर्गे पूजयत्वां प्रसीद मे ॥ आयुरारोग्यमैश्व
र्यं देहि देवि नमोस्तु ते ॥ दुर्गे दुर्गे स्वरूपासि सुरतेजोमये र्चिते ॥ सदानंदकरे देवि प्रसिद मम सिद्धये ॥ गृह्यहि भगवत्यं वै शत्रु
क्षयजयप्रदे ॥ भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते ॥ पत्रैर्वैश्च फलोपेतै पुष्पैश्च सुमनोहरैः ॥ पत्रैर्वे संस्थिते देवि पूज
ये त्वां प्रसीद मे ॥ दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पये ॥ यज्ञभागान् गृहाणात्वं योगिनीकोटिभिः सहेति ॥ मूलमंत्रेणापाद्यादि
गंधान्तोपचारैः संपूज्य ॥ अमृतोद्भवं वश्रीवृक्षं शंकरस्य सदाप्रियं ॥ विल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरीति विल्वपत्रं ॥ अपा
विष्णुशिवादीनां द्रोणपुष्पं सदाप्रियं ॥ तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये ॥ इति द्रोणपुष्पं निवेद्य धूपादि दक्षिणांतां पूजां मू
लेन कृत्वा प्रार्थयेत् ॥ ॐ महिषघ्नि महामाये चामुण्डे मुण्डमालिनी आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते ॥ कुंकुमेन समालब्धे
चंदनेन विलेपते ॥ विल्वपत्रकृतापीडे दुर्गे हं शरणां गतः ॥ रूपं देहि यशो देहि भगं भगवति देहि मे ॥ पुत्रान्देहि धनं देहि स
र्वान्कामांश्च देहि मे ॥ सर्वमंगलमांगल्य इति च संप्रार्थ्य पत्रिकाः पूजयेत् ॥ कदल्यां ब्रह्माणीं दाडिमे रक्तदन्तिकां ॥ धान्ये लक्ष्मीं हरि

364

राम
३६४

१९९

डयादुर्गामानेवादुर्गा कन्यौकालिकांविल्वेशिवांअशोकेशोकरहितांजयंत्यांकालिकीमावास्यसेपूज्यदुर्गायैवलिंदद्यात् ॥ ॥अथ
दुर्गास्तुतिःपूजावसाने ॥ ततस्तुतिंपठेत् ॥ ॥तदुक्तंशिवरहस्ये ॥ दुर्गांशिवांशान्तिकरींब्रह्माणींब्रह्मणःप्रियां ॥ सर्वलोकप्रणेत्रीञ्चप्र
णमामिसदाशिवां ॥ मंगलांशोभनांशुद्धांनिःकलांपरमांकलां ॥ विश्वेश्वरींविश्वमातांचण्डिकांप्रणमाम्यहं ॥ सर्वदेवमयींदेवींसर्वरोग
भयापहां ॥ ब्रह्मेशविष्णुनमितांप्रणमामिसदाउमां ॥ विंध्यस्थांविंध्यनिलयांदिव्यस्थाननिवासिनीं ॥ योगिनींयोगमाताञ्चचंडिकां
प्रणमाम्यहं ॥ ईशानमातरंदेवीमीश्वरीमीश्वरप्रियां ॥ प्रणतोस्मिसदादुर्गांसंसारार्णवतारिणी ॥ यइदंपठतेस्तोत्रंशृणुयाद्वापि
यो नरः ॥ समुक्तःसर्वपापेभ्योमोदतेदुर्गयासह ॥ ॥अथमहाष्टमी ॥ सावपरयुता ॥ शुक्लपक्षेष्टमीचैवशुक्लपक्षचतुर्दशी ॥
पूर्वविद्धानकर्त्तव्यापरसंयुतेति ॥ ॥ब्रह्मवैवर्त्तेन ॥ स्मृतिसंग्रहे ॥ शरन्महाष्टमीपूजानवमीसंयुतासदा ॥ सप्तमीसंयुतानित्यंशो
कसंतापकारिणी ॥ जंभेनसप्तमीयुक्तापूजितातुमहाष्टमी ॥ इंद्रेणनिहतोजंभस्तस्माद्दानवपुंगवः ॥ तस्मात्सर्वप्रयत्नेनसप्तमी
मिताष्टमी ॥ वर्जनीयाप्रयत्नेनमनुजैःशुभकांक्षिभि ॥ सप्तमीशल्यसंयुक्तमोहाद्ज्ञानतोपिवा ॥ महाष्टमीप्रकुर्वाणोनरकंप्रतिप
द्यते ॥ सप्तमीकलयायत्रपरतश्चाष्टमीभवेत् ॥ तेनशल्यमिदंप्रोक्तंपुत्रपौत्रभयप्रदम् ॥ तथा ॥ पुत्रान्हंतिपशून्हंतिराष्ट्रंस
राजकं ॥ हंतिजातानजातांश्चसप्तमीशहिताष्टमी ॥ तेननात्रत्रिमूर्त्तयेवेधा ॥ तदाद्यघटिकामात्राप्योदयीकीग्राह्याव्रतोपवास
नियमेघटिकैकापियाभवेत् ॥ ॥इतिदेवलोक्ते ॥ ॥इदंभौमेतिप्रशस्ता ॥ अष्टम्यायदिनेसूर्येदिनांतेनवमीभवेत् ॥ ऊनवा

रत्न
२६५

रोभवेत्तत्रश्रूजनीयाप्रयत्नतः॥ ॥इतिवचनात्॥ इयमेवमूलयुक्ताचेन्महानवमीसंज्ञा॥ आश्वयुक्शुक्लपक्षेयाष्टमीमूलेन
संयुता॥ सामहानवमीप्रोक्तात्रैलोक्येपिसुदुर्लभेति स्कांदात्॥ ॥मूलयुक्तातुसप्तमीयुतावेन्याश्चैवमुक्तं॥ ॥दुर्गोत्स
वे॥ मूलेनापिहिसंयुक्तासदात्याज्याष्टमीबुधै॥ लेशमात्रेणासप्तम्या अपिस्याद्यदिदूषितेति॥ ॥देवीपुराणे॥ सप्तमीवेधसं
युक्तायैःकृतातुमहाष्टमी॥ पुत्रदारधनैर्हीनाभ्रमंतीहपिशाचवत्॥ ॥यत्तु॥ सप्तम्यांयदिनेसूर्यपरतोयाष्टमीभवेत्॥ त
त्रदुर्गोत्सवंकुर्यान्नकुर्यादपरेहनीतिविश्वरूपनिबंधवचनं तदाश्विनकृष्णाष्टमीविषयं॥ कन्यायांकृष्णपक्षेतुपूजयित्वा
ष्टमीदिने॥ नवम्यांबोधयेद्देवींगीतवादित्रनिःस्वनैरितिदेवीपुराणे तत्रापिपूजोक्तेरितिहेमाद्रौयानितु॥ भद्रायांभद्रकाल्या
श्चमध्यस्यादर्चनक्रिया॥ तस्मादिसप्तमीविद्धाकार्यादुर्गाष्टमीबुधैरिति॥ ॥यच्चब्राह्मेच॥ आश्विनेतस्यसिताष्टम्यामर्द्धरात्रे
तुपार्वती॥ भद्रकालीसमुत्पन्नापूर्वाषाढासमायुतेति॥ ॥तथा॥ तत्राष्टम्यांभद्रकालिदक्षयज्ञविनाशिनी॥ प्रादुर्भूतामहा
घोरायोगिनीकोटिभिःसह॥ ॥यच्च॥ महाष्टम्याश्विनेमासिशुक्लाकल्याणकारिणी॥ सप्तम्यापियुताकार्यामूलेनतुविशेषतइ
ति॥ तानिपरदिनेष्टम्यभावविषयाणीति॥ यत्तुतत्रैवपरदिनेष्टमीसत्वेपिपूर्वविद्धाविधायकंवचनं॥ सदाष्टमींतुसंप्राप्यहस्ते
यातिदिवाकरः॥ तत्रदुर्गोत्सवंकुर्यान्नकुर्यादपरेहनि॥ तदाष्टमींप्रकुर्वीतसप्तम्यांसहितान्पेतिस्मृतिसंग्रहोक्तेः॥ उत्तराशिथये
यत्रक्षयंयांतिनराधिपः॥ पूर्वाष्टमींतदाकुर्यादन्यथात्वशुभंभवेदिति॥ दुर्गोत्सवोक्तेश्चेतिइदंवचनद्वयंच॥ अहंभद्रावभद्राहंना

365

राम
२६५

वयोरंतरं क्वचित्॥ सर्वसिद्धिप्रदास्यामि भद्रायामर्चिताहमिति देवीपुराणात्॥ तद्विष्टिकरणमध्ये पूजाविधानार्थं॥ विष्टिं त्यक्त्वा महाष्ट
म्यां मम पूजां करोति यः॥ तस्य पूजाफलं तस्मान्नेनाहमवमानितेति॥ ॥तत्रैवोक्तेरिति॥ तथा कालिकापुराणे॥ सप्तम्यां पत्रिकापू
जा अष्टम्यां चाप्युपोषणम्॥ पूजा च जागरश्चैव नवम्यां विधिवद्बलिमिति अष्टम्युपवासश्च पुत्रवता न कार्यः॥ उपवासं महाष्टम्यां पु
त्रवान्न समाचरेत्। यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेदिति॥ ॥तत्रैवोक्तेः॥ ॥आर्ये॥ अतोर्थं पूजनीया सा तस्मिन्नहनि मानवै
उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः॥ पशुभिः पानकैर्हृद्यैर्यज्ञो जागरणेन च॥ दुर्गाश्च हे वशस्त्राणि पूजितव्यानि पण्डितैः॥ वाद्य
भाण्डानि चिह्नानि कवचान्यायुधानि च॥ ॥भविष्ये॥ कन्यागते सवितरि शुक्लपक्षेष्टमी तु या॥ मूलनक्षत्रसंयुक्ता सा महान
वमी स्मृता॥ नवम्यां पूजिता देवी ददात्यभिमतं फलं॥ सा पुण्या सा पवित्रा च सा धन्या सुखदायिनी॥ तस्यां सदा पूजनीया चामुंडा
मुण्डमालिनी॥ सद्देवुक्तैर्नित्यमपि॥ तस्यां ये तु पशुघ्नं ते प्राणिनो महिषादयः॥ सर्वे ते स्वर्गतिं यान्ति घ्नतां पापं न विद्यते॥ याव
न्ते बालये ज्ञात्रे पशुहत्या च नेहन्यते॥ न तदा बलिदानेन पाप्यधूपविलेपनैः॥ यथा संतुष्यते मेषैर्महिषैर्विन्ध्यवासिनी॥ एवं च
विन्ध्यवासिन्यां नवरात्रोपवासतः॥ एकभक्तेन नक्तेन तथा शक्त्या याचितेन च॥ पूजनीया जनैः देवी स्थाने स्थाने पुरे पुरे॥ स्नातैः प्र
मुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः॥ वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः॥ स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु॥ जयाभि
लाषी नृपतिः प्रतिपत्प्रभृतिक्रमात्॥ लोहाभिसारिकं कर्म कारयेद्यावदष्टमी॥ लोहाभिसारिकं विधानं तत्रैवोक्तं॥ प्राग्उदक्प्रवणे

CC-0. In Public Domain. Digitization by eGangotri

रत्न.
२६६

देशे पताकाभिरलंकृतं ॥ मंडपं कारयेद्दिव्यं नवसप्तकरं परं ॥ षोडशहस्तप्रमाणमित्यर्थः ॥ आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभ-
नं ॥ मेखलात्रयसंयुक्तं योन्याश्वत्थदलाभया ॥ राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ॥ आनीय मंडपे तानि सर्वाण्यत्रा-
धिवासयेत् ॥ ततस्तु ब्राह्मणाः स्नाताः शुक्लांबरधराः शुचिः ॥ ओंकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्घृतं ॥ शस्त्रास्त्रमंत्रैर्होतव्यं पायसं
घृतसंयुतं ॥ ऊनशेषं तुरंगाणां राजा तत्र प्रहारयेत् ॥ लोहाभिसारिकं कर्म तेनैतद्दर्षिभिः स्मृतं ॥ धृतपल्ययनानश्वान्गजांश्च
समलंकृतान् ॥ भ्रामयेन्नगरे नित्यं नंदिघोषपुरःसरं ॥ प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः ॥ पूजयेद्राजचिह्नानि फल-
माल्यविलेपनैः ॥ तस्याभिमरराड्राज्ञोः विज्ञेयस्तु सदाहृतः ॥ पूजामंत्रान्नृप वक्ष्यामि पुराणोक्तानहं तथा ॥ यैः पूजिताः प्र-
यच्छंति कीर्त्तिमायुर्यशो बलं ॥ ॥अथ मंत्रा विष्णुधर्मोत्तरोक्ताः ॥ छत्रस्य ॥ यथांबुदश्छादयति शिवायेमां वसुंधरां ॥ तथाच्छाद-
य राजानं विजयारोग्यवृद्धये ॥ ॥ चामरस्य ॥ शशांककरसंकाश क्षीरदंडिरपांडुर ॥ प्रोत्सारयाशु दुरितं चामरामरदुर्लभ-
भं ॥ ॥ अश्वस्य ॥ गंधर्वकुलजातस्त्वं माभूयाः कुलदूषकः ॥ ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥ प्रभावाच्च हुताशस्य
वर्द्धयस्व तुरंगमान् ॥ तेजसा चैव सूर्यस्य मुनीनां तपसा तथा ॥ रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ॥ स्मर त्वं राजपुत्रस्त्वं कौस्तु-
भं च मणिं स्मर ॥ यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथा ॥ भूराहानृतवादी च क्षत्रियश्च पराङ्मुख ॥ सूर्याचंद्रमसौ वायु-
र्यावत्पश्यंति दुष्कृतं ॥ व्रजताश्व तां गतिं क्षिप्रं तच्च पापं भवेत्तव ॥ निष्क्रांतो यदि वा छिन्नो युद्धार्थं निजरंगमा ॥ रिपूंस्तु विजित्य सम- राम २६६

360

२०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रेसह भर्त्रासुखी भवेति ॥ ॥अथ ध्वजस्य ॥ शक्रकेतो महावीर्यश्णामवर्णार्चयाम्यहं ॥ पक्षिराज नमस्तेस्तु तथा रामायणाध्वज
काश्यपेयामृताहर्त्ता नर्गागारे विष्णुवाहन ॥ अप्रमेय दुराधर्ष रणो देवारिसूदन ॥ गरुत्मान् मारुतगतिस्त्वयि सन्निहितो यत
मारवं त्वायुधान्यत्र रक्षत्वं वरिसूनदह ॥ ॥पताकाया ॥ ऊनअष्टवसवोरुद्रा वायुः सोमो महर्षय ॥ नागकिन्नरगंधर्वयक्षभू
तगराग्रहा ॥ प्रथमस्तुसदादित्यैर्भूतेशोमानभिः सह ॥ शक्रः सेनापतिः स्कंदो वरुणाश्चाश्रितस्त्वयि ॥ प्रदहंतुरिपून्सर्वा
नृराजाविजयमृछ्छतु ॥ यानिप्रयुक्तानृपरिभिरायुधानि समं ततः ॥ पतंतु परिशत्रूणां हनानि तवतेजसा ॥ हिरण्यकशिपो
र्युद्धेयुद्धे देवासुरे तथा ॥ कालनेमिवधे यद्वद्यछत्रिपुरघातिने ॥ शोभितासि तथैवाद्य शोभयास्माश्च सत्वरं ॥ नीलान् श्वेतानिमान्
दृष्टा नश्यंत्वाशु नृपारयः ॥ व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधिनिर्जिता ॥ ॥गजस्य ॥ कुमुदैरावणो पद्मपुष्पदंतोथवामनः ॥ सु
प्रतीकोंजनो नीलस्तेष्टौ देवयोनयः ॥ तेषांपुत्राश्च पौत्राश्च वाबान्यष्टौ समाश्रिता ॥ मंदो भद्रो मृगश्चैव गजः संकीर्णस्यवव
वनेवने प्रसूतास्ते यूथानि स्मृ महागिव ॥ पातुत्वां वसवो रुद्रा आदित्याः समरुद्गणा ॥ भर्त्तारं रक्षनागेंद्र स्वामिवत्प्रतिपाल्यतां
भवाप्नुहि जयं युद्धे गमने स्वस्तिनोत्तज ॥ श्रीस्तेसोमाद्बलं विष्णोस्तेजः सूर्यो ज्ञवोनिलात् ॥ स्थैर्यं मेरोर्जयं रुद्रा यशो देवासुरं
दरात ॥ युद्धेरक्षंतु नागास्त्वादिशाश्च सहदैवतैः ॥ अश्विनौ सहगंधर्वैः पातुत्वां सर्वतः सदेति ॥ ॥अथ खड्गमंत्र ॥ असि
र्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मधारस्तथैवच ॥ एतानि तव नामानि स्वयमुक्तानि वेधसा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न ३६७ नक्षत्रं कृत्तिका नेत्रं गुरुर्देवो महेश्वरः ॥ रोहिण्यापश्चशरीरं नेदेवनं च जनार्द्दन ॥ पितापिता महादेवस्त्वं पालय — सर्वदा ॥ नी
लजीमूतसंकाशस्तीक्ष्णादंष्ट्रः कृशोदर ॥ भावशुद्धामर्षणाश्च अमिततेजास्तथैव च ॥ इयं येन धृता क्षोणी हतश्च महिषासुरः
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥ ॥ अथ छुरिकाया ॥ सर्वायुधानां प्रथमं निर्मितासि पिनाकिना ॥ शूलायुधाद्वि
निष्कृष्य कृत्वा मुष्टिग्रहं शुभं ॥ चण्डिकायाः प्रदत्तासि सर्वदुष्टनिवर्हिणी ॥ तया विस्तारिता वासि देवानां प्रतिपादिता ॥ स
र्वसत्त्वाङ्गभूतासि सर्वाशुभनिवर्हिणी ॥ छुरिके रक्ष मां नित्यं शान्तिं यच्छ नमोस्तु ते ॥ ॥ अथ कट्टारकपूजा ॥ रक्षाङ्गानि गजा
न्रक्ष रक्ष वाजिधनानि च ॥ मम देहं सदा रक्ष कट्टारक नमोस्तु ते ॥ ॥ धनुःपूजा ॥ सर्वायुधमहामात्र सर्वदेवारिसूदन ॥ चा
पमां समरे रक्ष साकं शरवरैरिह ॥ धृतं कृष्णेन रक्षार्थं संहाराय हरेण च ॥ त्रयीमूर्त्तिगतं देवधनुरस्त्रं नमाम्यहं ॥ ॥ ॐ
तपूजा ॥ ग्रासपानयशः शत्रून्स्वमनेयानाकमायया ॥ गृहाणाजीवितं तेषां मम सैन्यं च रक्ष मां ॥ ॥ वर्मपूजा ॥ शर्मप्रदस्त्वं स
मरे वर्म सैन्ये यशोयमे ॥ रक्ष मां रक्षणीयोहं तापेनय – नेय – ॥ अथ कनकदण्डमंत्रः ॥ प्रोक्तारणाय दुष्टानां साधूनां र
क्षणाय च ॥ ब्रह्मणा निर्मितश्चासि व्यवहारप्रसिद्धये ॥ यशो देहि सुखं देहि जयदो भव भूपते ॥ ताडय स्वारि दुष्टसर्वान् हेम राम
दण्ड नमोस्तु ते ॥ ॥ अथ दुन्दुभिमंत्र ॥ दुन्दुभे त्वं सपत्नानां घोरो हृदयकम्पनः ॥ सव भूमिप सैन्यानां तथा विजयवर्द्धनः ॥ य ३६७
था जीमूतघोषेण प्रहृष्यन्ति वर्हिणाः ॥ तथास्तु तव शब्देन हर्षोस्माकं मुदावह ॥ यथा जीमूतशब्देन स्त्रीणां त्रासोभिजायते

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथात्र तवशब्देन त्रस्यंत्वस्माद्विषोरगा ॥ ॥ अथशंखमंत्रः ॥ पुरापवत्रपुरापशंखानां च मंगलं ॥ विष्णुनाविधृतोनित्यमतः शांतिं
प्रदोभव ॥ ॥ अथसिंहासनमंत्र ॥ विजयोजयदोजेतारिपुघातीशुभंकरः ॥ दुःखहाधर्मदः शांतः सर्वारिष्टविनाशनः ॥ त्वन्नै
वेसन्निधौयस्मात्तवसिंहामहाबलाः ॥ तेनसिंहासनेनित्यंवेदैर्मंत्रैश्चगीयते ॥ त्वयिस्थितः शिवः शांतस्त्वयिशक्रः सुरेश्वरः
नमस्तेसर्वतोभद्रभद्रदोभवभूपते ॥ त्रैलोक्यजयसर्वस्वसिंहासननमोस्तुते ॥ तथैवकर्मविघ्नानिस्वामिपूजानिषिद्धानिभि
लोहाभिसारिकंकर्मकृत्वेवंमंत्रपूर्वकं ॥ नियमंवनथाष्टम्यांपूर्वाह्णेस्नानमाचरेत् ॥ कुंकुमंचंदनंचंपकवज्जुःसमैःशील
पिष्टैश्च ॥ चर्चितगात्रींदेवींकुसुमैरभ्यर्चयेद्बहुभिः ॥ कुसुदैःसपक्ष्मपुष्पैःसधूपदीपैःसनैवेद्यैः ॥ मांसैर्वलिपहारैर्मंगल
शब्दैःसमुद्भलितैः ॥ विहितच्छत्रैर्यानैःस्यंदनमितशास्त्रधारिजनलोकैः ॥ तुष्टैःपश्चहस्तादिभिर्निवेद्यतेसर्वमेभगवत्यै दु
र्गासापूजनीयावत्तद्दिनेशोराशुभ्यकैः ॥ ततःखड्गंनमस्कृत्यशस्त्रराणांवधसिद्धये ॥ इच्छेतविजयंराज्ञेशुभिक्षंचात्मनोनृपः ॥
शुनःपुनःप्रणाम्यायंसंस्मरन्हृदयेशिवां ॥ सर्वकृत्वेनिकोरव्यअष्टम्यांजागरंनिशि ॥ नटनर्त्तकगीतैश्चकारयेच्चमहोत्सवं ॥ ए
वंहृष्टैर्निशांनीत्वाप्रभातेअरुणोदये ॥ घातयेन्महिषान्मेघानयतोनतकंधरान् ॥ शतमर्द्धशतंवापितदर्द्धंवायथेच्छया ॥ सु
रासवभृतैःकुंभैस्तर्पयेत्परमेश्वरी ॥ कापालिकेभ्यस्तद्देयंदासीदासजनेनतथा ॥ ततोपराह्णसमयेनवम्यांवैरथोस्थितां ॥ भ
वानींभ्रामयेत्राष्ट्रेस्वयंराजासशब्दवान् ॥ कश्चिज्ञोघोषितांवीरोविधृतोयेनखड्गवान् ॥ भूतेभ्यस्तुवलिंदद्यात्मंत्रेणानेनसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न
२६८

मिषं ॥ सरक्तं सजलं वाम्येगंधपुष्पाक्षतैर्युतं ॥ त्रीन् स्त्री न् वारान्तमूले नदिग्वि दिक्षु किरेद्बलि मंत्रश्च ॥ वलिं गृह्णं त्विमे देवा आ
दित्या वसवस्तथा ॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः ॥ डाकिन्यो यक्षवेता
लायोगिन्यः पूतनाः शिवाः ॥ जंभकाः सिद्धगंधर्वा माला विद्याधरा नगाः ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ ज
गतां शांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः ॥ माविघ्नं मा च मे पापं मा सन्तु परिपंथिनः ॥ सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहा
इति ॥ ॥ इति महाष्टमी ॥ ॥ अथ पूजाविधिः ॥ महानवमी तु पूर्वविद्धा तथा ह्या ॥ श्रावणी दुर्गनवमी पूर्वा चैव कुनाशनी ॥ पू
र्वविद्धा प्रकर्त्तव्या शिवरात्रिर्वलेर्दिनमिति ॥ ॥ पाद्मोक्ते ॥ भविष्ये ॥ आश्वयुक्शुक्लपक्षे तु अष्टमीमूलसंयुता ॥ सा महानवमी
नाम त्रैलोक्येपि सुदुर्लभेति ॥ ॥ मूलसूपलक्षणम् ॥ दुर्गा पूजास्तु नवमी मूलाद्यृक्षत्रयान्विता ॥ महती कीर्त्तिता तस्यां दुर्गा
महिषमर्द्दिनी ॥ ॥ इति लैंगात् ॥ ॥ अत्र पूजनदिननिर्णयः ॥ यानि तु ॥ सा कार्योदयगामिन्यां तिथावुदयगामिन्यां इत्यादि
प्रायुक्तानि नवमीभिन्नतिथिपराणि ॥ नवम्यां विशेषोक्तेः ॥ वेधश्च सूर्योदयगो वर्ज्जनीयः ॥ यद्यपि हेमाद्रिमते मुहूर्त्तदयाम्या
पि वेधोस्ति ॥ ॥ तथापि सूर्योदयवेधव ॥ सायंत्रिमुहूर्त्तस्पृव ॥ सायं नृत्तरयात स्यान्न यत्तु नविद्धा तु इति ॥ माधवोक्तो ॥ ते
न त्रिमुहूर्त्तयोगे पूर्वा नवमी ॥ पूर्वोक्तवचनात् ॥ न कुर्यान्नवमीं तात दशम्यां तु कदाचनेति स्कांदे पराविषेधाच्च त्रिमुहूर्त्तयो
गाभावे च निषिद्धापि परैव कार्येति ॥ ॥ यत्तु ॥ नवम्यां व्रजपहोमं समाप्य च वरोपि वे ति संग्रहोक्तेः ॥ व्रतं च जागरश्चैव नव

राप
२६८

368

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म्यां विधिवद्बलिरिति देवीपुराणात् ॥ नवम्यां होमबल्यादि विहितं तत्र आश्विनशुक्लनवमी मुहूर्त्तं वा कला यदि ॥ सा तिथिः सक
ला ज्ञेया लक्ष्मीविद्याजयार्थिभिः ॥ इति सौरपुराणात् ॥ सूर्योदये परं स्थित्वा पूर्णा स्यादपरा यदि ॥ बलिदानेऽत्र कर्त्तव्यं तत्र देशः प्र
भावहः ॥ बलिदाने कृते ह्यष्टम्यां पुत्रभंगो भवेन्नृपेति मदनरत्ने देवीपुराणोक्तबल्यादौ परा कार्या ॥ उपवासादौ तु पूर्वेति मदनरत्ने
उक्तं ॥ यत्तु अष्टम्यां बलिदाने नृपपुत्रनाशो भवेद्ध्रुवमिति ॥ कालिकापुराणात् तत्संधिपूजापरं ॥ अष्टमीनवमीसंधौ तत्तीयाख्य खलु
कथ्यत इति तत्रैवोक्ते ॥ ॥ कामरूपनिबंधे ॥ अष्टम्याः शेषदण्डाश्च नवम्याः पूर्व एव च ॥ तत्र या क्रियते पूजा विज्ञेया सा महा
बला ॥ अष्टमीप्रीतये भवन्त्येव ॥ आश्विने पूजयित्वा तु अर्द्धरात्रे ह्यष्टमीषु च ॥ घातयंति पशून् भक्त्या ते भवंति महाबला ॥ ॥ तथा
कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत् ॥ सोपवासो निशार्द्धे तु महाविभवविस्तरैः ॥ ॥ तथा ॥ पशुघातश्च कर्त्तव्यो बगला
जवधस्तथेति ॥ देवीपुराणात् ॥ ॥ भविष्ये ॥ तस्मादियं महापुण्या नवमी पापनाशिनी ॥ उपोष्या तु प्रयत्नेन सततं सर्वपार्थि
वैः ॥ यत्तु ॥ नंदायां ज्वलयेद्वह्निः पूर्णायां पशुघातने भद्रायां गोकुलक्रीडा तत्र राज्यं विनश्यतीति ॥ नवम्यामपराह्ने तु
बलिदानं प्रशस्यते ॥ दशमीं वर्जयेत्तत्र नात्र कार्या विचारणेति नंदायां दर्शने रक्षा बलिदाने दशाशुभ ॥ भद्रायां गोकुलक्री
डा देशनाशाय जायते ॥ इति ब्रह्मवैवर्त्तनारदादिवचनामि तानि पुनाधिकनिषेधपराणीति मदनरत्ने ॥ ॥ तथा कालिकापु
राणे ॥ नवम्यां बलिदानं तु कर्त्तव्यं वै यथाविधि ॥ जपहोमं च विधिवत्कुर्यात्तत्र विभूतये ॥ ॥ केचित्तु ॥ पूर्वाषाढायुताष्टम्यां

CC-0. In Public Domain. Digitization by eGangotri

पूजा होमाद्युपोषणामिति ॥ पूर्वोक्तदेवीपुराणादष्टम्यां होमवाऽअन्येतु विधिववाक्यदष्टमारभ्य नवम्यां समापयन्ति गौडग्रं
थेष्वपि नवम्यां समापयन्ति गौडग्रंथेष्वपि नवम्यां होम उक्तः ॥ होमे च विशेष उक्तो डामरतंत्रे ॥ पायसं सर्पिषायुक्तं तिलैः शु
क्लैर्विमिश्रितं ॥ होमयेद्विधिवद्भक्त्या दशांशेन नृपोत्तम ॥ रुद्राध्याये यथा होमं मंत्रेणैकेन साधयेत् ॥ ॥ रुद्रयामलेपि
प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा ॥ किंशुकैः सर्षपैः पूगैर्लाजादूर्वांकुरैरपि ॥ यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलै
स्तथा ॥ रक्तचंदनखंडैश्च गुग्गुलैश्च मनोहरैः ॥ प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि वक्रमात् ॥ नवाक्षरेण वा हुत्वा नमो देव्या
इतीनि वेति नवाक्षरः पूर्वोक्तः ॥ रहस्ये तु प्रतिश्लोकं जुहुयात्पायसं तिलसर्पिषैर्युक्तं ॥ अथ बलिदानं ॥ तत्राश्वमेषछागम
हिषमांसासवत्तरोत्तरप्राशस्त्यं फलविशेषश्चान्यतोवसेयः ॥ ॥ बलिप्रकारस्तु देवीपुराणे ॥ कंन्यासंस्थे रवौ शक्रमष्टम्याष्ट
म्यां प्रपूज्य तु ॥ कोशातुष्यैश्च विल्वाद्यजातीपुन्नागचंपकैः ॥ पंचवर्णलक्षणोपेतं गंधपुष्पसमन्वितं ॥ विधिवत्कालिकालीनिज
ष्वा खड्गेन घातयेत् ॥ ॐ कालिकायन्तेश्वरिलोहदंष्ट्रायै नम इति मंत्रः ॥ तदुत्थरुधिरं मांसं गृहीत्वा पूतनाखर्कीविदारीपाप
रासीभ्यः ॥ नैरृतेभ्यः प्रदातव्यं महाकौशिकमंत्रितं ॥ मंत्रस्तु वक्ष्यते ॥ ॥ तथा ॥ तस्याग्रतो नृपः स्नाया कूष्माण्डं नृपैष्टकं ॥ ख
ड्गेन घातयित्वा तु दद्यात्स्कंदविशाखयोः ॥ ब्राह्मणो न च तुष्यां डादिभिर्बलिमनकार्यं ॥ ॥ तदुक्तं कालिकापुराणे ॥ कूष्माण्ड
मिक्षुदंडं च मासं सारसमेव च ॥ एते बलिसमाः प्रोक्तास्तृप्तौ छागः सदा स्मृताः ॥ ॥ रुद्रयामलेपि ॥ छागाभावे तु कूष्माण्डं श्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलंवामनोहरं ॥ वस्त्रसंवेष्टितंकृत्वाछेदयेत्छुरिकादिना ॥ ॥ तथा ॥ ब्राह्मणोनमद्यंदेयंकूष्माण्डंवलिकर्मणि ॥ श्रीफलंवासु
राधीशच्छेदनेवत्कारयेत् ॥ छेदेविकल्पमाषान्नेनवलिंदद्याद्ब्राह्मणोनविजानता ॥ ॥ कालिकापुराणे ॥ उत्तराभिमुखोभू
त्वावलिंपूर्वमुखंतथा ॥ निरीक्ष्यसाधकःपश्चादिमंमंत्रमुदीरयेत् ॥ पशुस्त्वंवलिरूपेणममभाग्यादुपस्थितः ॥ प्रणमामिततः
सर्वरूपिणंवलिरूपिणं ॥ चण्डिकाप्रीतिदानेनदातुरापद्विनाशनं ॥ चामुण्डावलिरूपायवलेतुभ्यंनमोस्तुते ॥ यज्ञार्थेवलयः
सृष्टाःस्वयमेवस्वयंभुवा ॥ अतस्त्वांघातयाम्यद्यतस्माद्यज्ञेवधोऽवधः ॥ ऐंह्रींश्रीमितिमंत्रेणतंवलिंमन्त्ररूपिणं ॥ चिन्त
यित्वान्यसेत्पुष्पंमूर्ध्नितस्यतुभैरव ॥ रसनात्वंचण्डिकायाःसुरलोकप्रसादकः ॥ ह्रूंह्रींखड्गेतिमंत्रेणध्यात्वाखड्गंचपूजयेत्
पूजयित्वाततः ॥ खड्गंआंह्रींफडितिमंत्रकैः ॥ गृहीत्वाविमलंखड्गंछेदयेद्वलिमुत्तमम् ॥ ॐहंह्रूंह्रींकौशिकीतिरुधिरेणा
प्यायतामिति ॥ वलिदानेतुदुर्गायाःसर्वत्रायंविधिःस्मृतः ॥ इति ॥ ॥ अथपशुघातविधिः ॥ तद्दिनेमहिषवलिदानंःस्व
यमुत्तराभिमुखःपूर्वाभिमुखंवलिंनिरीक्ष्यआदौमहिषस्नानं ॥ ॥ ॐअद्येत्यादिममएतज्जन्मनिशत्रुक्षयार्थंपशुश्रेष्ठम
द्याधुनाप्रोक्षितेनभगवतीप्रीत्यैतंमेवाद्यभावय ॥ पशूनांअंगन्यास ॥ शिरसिरुधिरवदनायनमः ॥ वक्षसोवज्रादित्याभ्यांन
मः ॥ मुखेसरस्वत्यैनमः ॥ पृष्ठेमहाभैरवायनमः ॥ उदरेमहोदर्यैनमः ॥ जंघयोभैरव्यैनमः ॥ ह्रूंह्रांहूंह्रौंह्रःसर्वांगायनमः ॥ त
तोमहीषपूजा ॥ ॐअद्येत्यादि ॥ ममएतज्जन्मनिसर्वशत्रुक्षयपूर्वकहर्षविजयकामस्त्वभिरूपवारंमहिषपूजामहंकरिष्येइति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न ३७० संकल्पपूजां कुर्यात् ॥ ततो गंधपुष्पाक्षतयुक्तमर्घपात्रमादाय एतानि पाद्यादीनि महिषाय नमः ॥ गंधं पुष्पमक्षतान् धूपं दीपं नैवेद्यं पृष्ठे
वस्त्रं सिंदूरं विल्वपत्रमालां दत्वा ततः कृतांजलिः पठेत् ॥ ॐ पशो त्वं वलिरूपेण मम भाग्यादुपस्थित ॥ प्रणमामि ततः सर्वरूपिणं वलि
रूपिणं ॥ चण्डिकाप्रीतिदानेन दातुरापद्विनाशनं ॥ चामुण्डावलिरूपाय वले तुभ्यं नमो नमः ॥ यज्ञार्थे पशवः सृष्टाः स्वयमेव स्व
यंभुवा ॥ अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोवधः ॥ इति पठित्वा महिषस्य पृष्ठे पठेत् ॥ मातस्त्वं फेनिलं रक्तं पशोः कण्ठविनिर्गतं
रक्तं पिव महादेवि वलिग्रहण नमोस्तुते ॥ ततो महिषमस्तके यवाक्षतान् दत्वा ततः सुरयाभिषिंचेत् ॥ ॥ ततः प्रार्थना ॥ ॐ म
नस्त आप्यायतां ॥ अग्निः पशुरासीत् ॥ महिष त्वं महावीर धर्मराजस्य वाहन ॥ क्लेशं च रोगनाशं च उत्कृतं मम खंडयं ॥ महिष
त्वं महाकाय सर्वाभीष्टप्रदायक ॥ कुमतिं मम पापं च सर्वशत्रूंश्च नाशय ॥ इति प्रार्थयित्वा ॥ ऐं ह्रीं श्रीं इति मंत्रेण सर्वरूपिणो व
लेमूर्ध्नि पुष्पांजलित्रयेण पूजयेत् ॥ पशुगायत्रीं श्रावयेत् ॥ ॐ पशुपाशाय विद्महे शिरश्छेदाय धीमहि ॥ तन्नः पशुः प्रचोदया
त् ॥ १ ॥ धेनुमुद्रया अमृतीकृत्य उत्सृजेत् ॥ ॥ ततः खड्गपूजा ॥ ॐ अद्य ममैतज्जन्मनि सर्वशत्रुक्षयपूर्वक हर्षविजयकामः पं
चोपचारैः खड्गपूजामहं करिष्ये ॥ खड्गमग्रे स्थापयित्वा ध्यायेत् ॥ ॐ ह्रीं ह्रीं खड्ग इति ध्यात्वा रिक्तांजलिः पठेत् ॥ ॐ रसना त्वं चण्डिका रत्न ३७०
याः सुरलोकप्रदायकः ॥ एतत्पाद्यं च खड्गाय रुद्ररूपाय ते नमः ॥ ॐ ह्रीं कालीवज्रेश्वरी लोहदण्डायै नमः ॥ एवं पाद्यादिना संपूज्य
खड्गं धृत्वा पठेत् ॥ ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मपाल नमोस्तुते ॥ १ ॥ प्रणादेवासुरेष्वे

२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निर्मितोसिजयप्रदः॥ खड्गरूपमहादेवजयंदेहिनमोस्तुते ॥ २ ॥ ततः खड्गोत्थापनमंत्रः॥ ॐकालिकालिमहाकालिकालिकेका
लरात्रिके॥ माहेश्वरीवलिंशूल्लवणिकायेनमोनमः॥ १॥ अथपाशपूजा॥ पाशंपाद्यादिभिः पूजयित्वाविधिमपठेत्॥ पाशत्वंवरु
णाज्ञातः सदावरुणदैवतः॥ अतस्त्वांपूजयामीहममशांतिंप्रयच्छमे ॥ ॥ अथस्तंभपूजा ॥ स्तंपाद्यादिभिः पूजयित्वाविधिना
पठेत्॥ यथावलोगिरिर्शैलहिमवांश्चयथावलः॥ यथावलास्त्वनेभूमौतथात्वमवलोभव॥ ऊशायवजलाम्यादाय॥ ॐअद्यता
दिदेशकालादीनूस्मृत्वाममअमुकदर्शनाभिनंदस्पर्शनाभिपूजनस्तर्पनतर्पणाजनितपुण्यमसमफलप्राप्तिकामनयाअमुंमहि
षंयमदेवतंभगवत्यैत्रिपुरसुंदर्यै॥ ॐह्रांह्रींह्रौंहूःॐफट्घातयिष्ये॥ ततःसमांसरुधिरंशिरसंगृहीत्वा॥ ॐऐंह्रींश्रींकौशि
कीमुराद्येनाप्यायतां॥ एवंरक्तसैंधवकदलीफलकर्पूरघृतकस्तूरीसुगंधपुष्पसहितंरुधिरंगृहीत्वा॥ ॐऐंह्रांह्रींश्रींकौशिकीरु
धिरेणाप्यायतां॥ ॐअद्यस्वकुलशतनरकाउद्धरणापूर्वकब्रह्मलोकमहितत्वकामनयाएतानिपशुरुधिरमांसास्थीनिभगवत्यैउ
ग्रादेव्यैतुभ्यमहंसंप्रददे॥ घोरदंष्ट्रेविशालाक्षिमद्यमांसवलिप्रिये॥ मस्तकंगृहाणदेवित्वंवरंदेहियथेप्सितं॥ इतिरुधिरदानं॥
अथछागोत्सर्वः॥ वलिंस्नापयित्वालोहितमाल्येनवेष्टयित्वाप्रोक्षयेत्॥ ॐस्वयंभूर्वोसुरेवश्वशंकरश्चमहोदयः॥ सदाराश्चस
पुत्राश्चसगणाश्चस्वशक्तयः॥ प्रोक्षंतुत्वांपशुश्रेष्ठंस्तोविश्वासहेतवः॥ ॐअग्नीःपशुरासीत्॥ वावंतेसुधासि॥ मनस्तआप्या
यतां॥ इतिमन्त्रैःसंप्रोक्ष्यछागपाद्यादिभिःपूजयित्वामूलमंत्रेणपुष्पांजलित्रयंदत्वा॥ उत्तराभिमुखोभूत्वावलिपुर्वमुखंतथा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्न ३७१

निरीक्ष्यसाधकः पश्चादिदं मंत्रमुदीरयेत् ॥ छागत्वं बलिरूपेण मम भाग्यादुपस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणं
चण्डिकाप्रीतिदानेन दातुरापद्विनाशनं ॥ वामरूपा बलिरूपायं बलतुभ्यं नमो नमः ॥ ३ ॥ यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभु
वा ॥ अतस्त्वां घातयाम्यद्य यज्ञे वधोऽवधः ॥ ४ ॥ ॐ ह्रां श्रीं इति मंत्रेण बलेन मूर्द्धनि पुष्पं दत्वा कुशतिलयवजलान्यादाय ॐ त
त्सदद्येत्यादि देशकालादि स्मृत्वा मम सदारापत्यस्य सकलापच्छांति नानाविधकल्याणोत्पत्ति दीर्घायुरारोग्यबलपुष्टिरा
जसन्मानप्राप्तिपंचविंशतिवर्षावच्छिन्नदुर्गाप्रीतिकामनया ॐ ह्रीं दुर्गायै एष वह्निदैवत छागबलि दुर्गायै नमः ॥ ततः
पशोः कर्णे जपेत् ॥ हिलि हिलि वज्ररूपधारयै हे हे इमं पशुं प्रदर्शय स्वक्षि नियोजय नमः स्वाहा ॥ ॥ ततः खड्गं ध्यात्वा पू
जयेत् ॥ कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणं ॥ उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ॥ रक्तांबरधरं देवं पाशहस्तं
कुटुंबिनं ॥ पिबमानं च रुधिरं भुंजानं क्रव्यसंहतिं ॥ इति ध्यात्वा ॥ रसालस्त्वं वसिष्ठकायाः सुरलोकप्रसाधकः ॥ ॐ क्रीं खड्गेति
मंत्रेण खड्गं पाद्यादिभिः पूजयेत् ॥ ॐ काली वज्रेश्वरी लोहदंडायै नमः ॥ मे ग्रहणानेन मंत्रेण खड्गमादाय पाणिना ॥ कालरा
त्र्यास्तु मंत्रेण खड्ग — मभिमंत्रयेत् ॥ ॐ ह्रां ह्रीं कालि कालि विकटदंष्ट्रे स्फ्रं स्फ्रुं स्फेत्कारिणि खादय छेदय सर्वदुष्टानि मारय
मारय अमुकं खड्गेन छिंधि छिंधि किलि किलि किंचि किंचि पिब पिब रुधिरं स्फ्रों स्फ्रों किलि किलि कालिकायै नमः ॥ ॥ ततः पु
ष्पांजलिं दद्यात् ॥ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते ॥ पूजयित्वा ततः खड्गं आ

राम ३७१

371

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुं फट् इति मंत्रकैः ॥ गृहीत्वा विमलं खड्गं छेदयेद्बलिमुत्तमं ॥ ॥ अथ कूष्माण्डबलिदानम् ॥ कूष्मांडं यायादिभिः पूजयित्वा
अद्येत्यादि ॥ कूष्माण्डाय महामहिषफलरूपाय महाद्भुतदानवाय श्रीदुर्गात्रिपुरसुंदरी महाष्टमीसंयुक्ता महाकालीशाकं
भरीप्रियाय मम सकलशत्रुउष्टजनान् भक्षय भक्षय स्वाहा इदं कूष्माण्डं मम राष्ट्रं वर्द्धय अनेन कूष्माण्डबलिना महिषमर्दिनी प्रीय
तां ॥ ॥ अद्येत्यादि ॥ सशैलवनकाननभूदानजन्यफलसमफलप्राप्तिकाम इदं कूष्मांडं भगवत्यै दुर्गादेव्यै मया दत्तं ततो बलि
नां रुधिरं तोयं सैंधवसत्फलैः ॥ मधुमिगंधपुष्पैश्च अधिवास्य विधानतः ॥ ॥ छागरुधिरदाने ॥ अद्य शतवर्षाछिन्नदुर्गाप्री
तिकामनया इदं छागरुधिरं भगवत्यै दुर्गादेव्यै मया दत्तं ॥ ऐं ह्रीं कौशिकी रुधिरेणाप्यायतां ॥ स्थाने नियोजयेत् खड्गं शिरश्च स
प्रदीपकं ॥ एवं दत्वा बलिं पूर्णां फलं प्राप्नोति साधकः ॥ ततः शोणितं चतुर्द्धा विभज्य आग्नेये विदारिकायै नमः ॥ नैर्ऋत्यां पाप
राक्षस्यै नमः ॥ वायव्ये पूतनायै नमः ॥ ईशान्यां कालिकायै नमः ॥ वटुकछागघातेन एतच्छागसमसंख्य दशशतवर्षावच्छिन्न
दुर्गाप्रीतिकामनया एतान् छागान् वह्निदेवतान् भगवत्यै दुर्गादेव्यै घातयिष्ये ॥ वटुमेषघातेन एतन्मेषसमसंख्य वर्षस
हस्रावच्छिन्नदुर्गाप्रीतिकामनया एतान् मेषान् वरुणदेवतान् भगवत्यै दुर्गादेव्यै नमः ॥ ॥ अथ वलेश्छिन्नशीर्षपात
विचारः ॥ छिन्नवलेश्च शीर्षन्तु पतितं यत्र यत्र च ॥ शुभं वा वाऽशुभं वापि पश्चादीनां वदत्सुत ॥ छिन्नेशिरस्तथैशान्यां नार
दिक्ष्वथ राक्षसे ॥ पतितं राज्यहानिं च विनाशं च विनिर्दिशेत् ॥ पूर्वादियाम्यवारुणापवायव्यादियथाक्रमात् ॥ आग्नेयं दक्षिणं म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयेलाभंधनंतथा॥ क्रमाद्वलेर्दशोज्ञात्वंछिन्नशीर्षंचभैरवः॥ उत्तरादिक्रमादेवमहिषस्यापिमस्तकं॥ पतितोवाञ्छकात्तांतेग
दतःशृणुतत्पृथक॥ भोग्यंपूर्वमिमनैश्वर्यंविज्ञरिपूजयोभयं॥ राज्यलाभंश्रियंवापिक्रमात्तद्विद्धिभैरव॥ पशूनांचैवसर्वे
षांछागादीनांविशेषतः॥ एवंफलंक्रमाद्विद्याद्भूतेनलभवाग्रजो॥ नलतानांपक्षिणांतुयाम्यनैऋत्ययोर्भयं॥ अन्यत्रतु
श्रियंदद्यात्पतितंनपातितंशिरः॥ ततःस्तुयात॥ त्रिनेत्रेविकरालास्येमुण्डमालाविभूषिते॥ सर्वासुरकृतांतेत्वंखड्गखट्वां
गधारिणि॥ महिषघ्निमहामायेदैत्यदर्पनिसूदनि॥ छागलेनवलेदग्निगृह्णाणहरवल्लभे॥ इमंछागवलिंदेविगृहाणत्वंका
लरात्रिके॥ प्रीताभवमहाकालीरथमांदेविवाणिके॥ शुद्धिवांशांतिकरींचक्षाणींब्रह्मणःप्रियां॥ सर्वलोकप्रणेत्रींचप्रणमा
मिसदाशिव॥ सर्वदेवमयीदेवीसर्वलोकभयापहां॥ ब्रह्मेशविष्णुनमितांप्रणमामिसदाउमां॥ विंध्यस्थांविंध्यनिलयांवि
ध्यस्थानतिवासिनीं॥ योगिनीयोगजननींचंडिकांप्रणमाम्यहं॥ ईशानमातरंदेविमीश्वरीमीश्वरप्रियां॥ प्रणतोस्मिसदां
दुर्गांसंसारार्णवतारिणीं॥ यइदंपठतिस्तोत्रंशृणुयाद्वापियोवरः॥ समुक्तःसर्वपापेभ्योमोदतेदुर्गयासह॥ महिषघ्नि
महामायेचामुण्डेमुण्डमालिनी॥ द्रव्यमारोग्यमैश्वर्यंदेहिदेविनमोस्तुते॥ रूपंदेहियशोदेहिभगंभगवतिदेहिमे॥ पुत्रान्
देहिधनंदेहिसर्वाकामान्प्रदेहिमे॥ कुंकुमेनसमालब्धेचंदनेनविलेपिते॥ विल्वपत्रकृतापीडेदुर्गेहंशरणागतः॥ स
र्वमंगल्यशिवेसर्वार्थसाधिके॥ शरण्येत्र्यंकेगौरीनारायणिनमोस्तुते॥ इतिस्तवंकृत्वाप्रणामंकुर्यात॥ ततःपुष्पांज

गल व

372

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बलिं दद्यात् । इति दुर्गोत्सवोक्तो बलिदानविधिः ॥ ॥ अथातः प्रसंगात् शतचण्डीविधानमुच्यते । रुद्रयामले । शतचण्डीविधानं
च प्रोच्यमानं शृणु यत्नतः ॥ सर्वोपद्रवनाशार्थं शतचण्डीं समारभेत् ॥ षोडशस्तम्भसंयुक्तं मण्डपं वस्त्रभोज्वलं ॥ चतुःकोणायुतां वेदीं
मध्ये कुर्यात्त्रिभागतः ॥ पञ्चहस्तकविस्तारां ऊर्ध्वां कुर्याद्धस्तसंमितां ॥ पंचवर्णरजोभिश्च कुर्यान्मण्डलकं शुभं ॥ पंचवर्णवितानं च किं-
किणीजालमण्डितं ॥ आचार्येणासमं विप्रान् वरयेद्दशसुव्रतान् ॥ ईशान्यां स्थापयेत्कुंभं पूर्वोक्तविधिना हरे ॥ वारुणं च प्रकर्त्तव्यं
कुण्डं लक्षणलक्षितं ॥ मूर्त्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै ॥ तदर्द्धेन तदर्द्धेन तदर्द्धेन महामते ॥ अष्टादशभुजां देवीं कु-
र्यादष्टकरामपि ॥ पट्टपट्टकूलयुग्मछन्नां वेदीमध्ये निधापयेत् ॥ देवीं संपूज्य विधिवज्जपं कुर्युर्दशद्विजाः ॥ शतमावेशनं च वा-
ते जपेन्मंत्रं नवार्णकं ॥ चण्डीसप्तशतीमध्ये सेप्रयेयमुदाहृतं ॥ एकद्वित्रीणि चत्वारि जपेद्दिनचतुष्टयं ॥ रूपाणि क्रमशस्तद्व-
त्पूजनादिकमाचरेत् ॥ पंचमे दिवसे प्रातर्होमं कुर्याद्विधानतः ॥ गुडूचीं पायसं दूर्वां तिलान् शुक्लान् यवानपि ॥ चण्डीपाठस्य
होमं तु प्रतिश्लोकं दशांशतः ॥ होमं कुर्यात्कुहादिभ्यः समिदाज्यसमिदाज्यचरून् क्रमात् ॥ कृत्वा पूर्णाहुतिं दद्याद्विप्रेभ्यो दक्षिणाः
क्रमात् ॥ कपिलां गां वीलमणीं श्वेतां श्वेतछत्रचामरे ॥ अभिषेकं ततः कुर्युः यजमानस्य ऋत्विजः ॥ एवं कृते महेशान सर्वसि-
द्धिः प्रजायते इति ॥ ॥ अथ सहस्रचण्डी । सा च तत्रैवोक्ता ॥ सहस्रचण्डीविधिवत्कुर्याद्विलोमहामते ॥ राज्यभ्रंशे महो-
त्पाते जननाशे महामते ॥ राज्यभ्रंशे महोत्पाते जननाशे महामते ॥ गजमारेश्वमारे च परचक्रभये तथा ॥ इत्यादिविविधे दुःखे भ-

रत्न
३७२

यरोगादिजे भये ॥ सहस्रचंडिकापाठं कुर्याद्वा कारयेत्तथा ॥ जापकास्तु शतं प्रोक्ता विंशद्धस्तश्च मंडपं ॥ भोज्यास्सहस्रं विप्रेन्द्रा गो
शतं दक्षिणादिशेत् ॥ गुरवे द्विगुणां देयं शय्यादानं तथैव च ॥ सप्तधान्यं च भूदानं धेनुश्चैव मनोहर ॥ पंचनिष्कमिता मूर्तिः
कर्त्तव्या वार्द्धमानतः ॥ अष्टादशभुजा देवी सर्वाभरणविभूषिता ॥ अवारितान्नदानं च सहस्रं प्रस्थहे विभो ॥ शतं वा नियताहा
रः पयः पापेन वर्जयेत् ॥ एवं चण्डिकापाठं सहस्रं तु समाचरेत् ॥ तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणेति ॥ वाराहि
तंत्रे ॥ संकटे समनुप्राप्ते दुस्थितस्या – मये तथा ॥ वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥ कुर्याद्यत्नाच्छतावृत्तं ततः संपद्य
ते शुभं ॥ श्रेयोवृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथा परा ॥ मनसा चिंतितं देवि सिद्ध्येदष्टोत्तराच्छतात् ॥ सहस्रावर्तनाल्लक्ष्मीरावृणो
ति स्वयं स्थिरा ॥ भुक्त्वा मनोरथान्कामान्नरो मोक्षमवाप्नुयात् ॥ वराग्र ॥ शतावृत्तिपाठात्सर्वाः सिद्ध्यंति सिद्धयः ॥ इति श्री
नवरात्रे सहस्रचण्डीविधिः ॥ ॥ अथ नवरात्रपारणनिर्णयः ॥ सा च दशम्यां कार्या ॥ आश्विने मासि शुक्ले कर्त्तव्यं नवरात्रकं
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥ त्रिरात्रं वापि कर्त्तव्यं सप्तम्यादि यथाक्रममिति धौम्यवचनात् ॥ नवमी तिथिप
र्यंतं वृद्ध्या पूजाजपादिकमिति प्रागुक्तवचने नवमीपर्यंतं प्रधानभूतपूजांगके उपवासादेश्चांगत्वेन तदन्यर्थत्वात् ॥ भ
वत्पारणाहे स्तनकादिप्राप्तौ नवैव पारणां कुर्यात् ॥ काम्योपवासे प्रक्रांते त्वंतरा मृतसूतके ॥ तत्र काम्यव्रतं कुर्याद्दानार्चनवि
वर्जितमिति माधवीये कौर्मोक्तेः ॥ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ॥ प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकमिति विष्णुव

राम
३७२

373

चनाच्चाशौचमध्येपि तत्कर्तव्यतावगतेः॥ पारणां तत्वाद्व्रतस्य प्रारम्भकत्वेनैवोक्तेः प्रारम्भो वरणां यत्ने संकल्पो व्रतमन्त्रयोः॥ नारी
पुरुषं विवाहादौ श्राद्धे पाकपरिक्रियेति॥ ॥हृद्रयामलेपि॥ सूतकपारणां कुर्यात्सर्वमां होमपूर्वकम्॥ तदन्ते भोजयेद्विप्रा
न्दद्यानं दद्याच्च शक्तितः इति॥ ॥तदन्ते सूतकान्ते॥ एवं स्त्रीभिरपि रजोदर्शनमध्ये कर्तव्यमेव पारणां॥ सम्प्रवृत्तेपि रजसि न
त्याज्यं द्वादशीव्रतमिति माधवीये ऋष्यशृंगवचनात्॥ ॥द्वादशीव्रतमित्युपलक्षणम्॥ प्रारब्धदीर्घतपसां नारीणां यद्र
तो भवेत्॥ न तत्रापि व्रतस्य स्यादुपरोधं कदाचनेति॥ ॥तत्रैव सत्यव्रतवचनात्॥ आशौचमध्येपि सर्वाणि पारणानि
भवन्ति प्रागुक्तकौर्मवचनात् इति सिद्धं॥ ॥अयंचोपवासपारणानिर्णयः॥ सर्वत्र तेष्ववोद्व्यः दशम्यां देवीं विसर्जयेत्
तदुक्तं देवीपुराणे॥ ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकं॥ संप्रेषणां तु कर्तव्यं गीतवादित्रनिःस्वनैः॥ रूपं देहि य
शो देहि भगं भगवति देहि मे॥ पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे॥ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि॥ आ
युरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते॥ इति संप्रार्थ्य देवीं तु ततउत्थापयेद्बुधः॥ उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च॥ कु
रुष्व मम कल्याणमष्टाभिः शक्तिभिः सह॥ गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके॥ व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले
त्विह॥ उत्थाप्य जलं नीत्वा दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते॥ संवत्सरे व्यतीते तु पुनरागमनाय वै॥ इमां पूजां मया दे
वी यथाशक्त्योपपादितां॥ रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् इति॥ जले प्रवाहयेत्॥ इयमेव विजयादशमी सा च

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३७४

द्वितीयदिने श्रवणायोगाभावे पूर्वा ग्राह्या ॥ ॥तत्र स्कांदे॥ दशम्यां तु नरैः सम्यक् पूजनीयापराजि॥ तेशानीदिशमाश्रित्य
अपराह्णे प्रयत्नतः॥ या पूर्णा नवमीयुक्ता तस्यां पूज्या पराजिता॥ क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः॥ नवमीशेषयुक्ता
यां दशम्यां परमराजिता॥ ददाति विजयं देवी पूजिता जयवर्द्धिनी॥ ॥तथा॥ आश्विने शुक्लपक्षे तु दशम्यां पूजयान्नर॥ स(
का दश्यां न कुर्वीत पूजनं चापराजितामिति॥ यदा तु पूर्वदिने श्रवणायोगाभावः॥ परदिने चाल्पापि तद्योगिनी तदा परैव
तथा च कश्यपः॥ उदये दशमी किंचित्संपूर्णैकादशी यदि॥ श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा॥ श्रवणर्क्षे तु पूर्वायां
काकुत्स्थः प्रस्थितो यतः॥ उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नरा इति॥ काले पराह्णे परदिने पराह्णे श्रवणाभावे तु सर्वपक्ष
षु पूर्वैव नारद॥ ईषत्संध्यामतिक्रांतः किंचिदुद्भिन्नतारकः॥ विजयो नाम कालोयं सर्वकामार्थसिद्धिदः॥ इषस्य दशमी शु
क्लां पूर्वविद्धां न कारयेत्॥ श्रवणो वापि संयुक्ता राज्ञां पट्टाभिषेचने॥ सूर्योदये यदा राजन् दृश्यंते दशमी तिथिः॥ आश्विने मा(
सि शुक्ले तु विजया तां विदुर्बुधा॥ अत्रायं निर्गलितार्थः॥ अपराह्णोत्र वेकालः॥ तत्रैव पूजा प्रोक्तेः प्रदोषो गौणः॥ तत्र दिनद्व
ये अपराह्णव्यापित्वे पूर्वा प्रदोषव्याप्तेराधिकारात्॥ दिनद्वये प्रदोषव्यापित्वे पूर्वा प्रदोषव्याप्तित्वे परा॥ अपराह्णव्याप्तेरा
धिक्यात्॥ श्रवणास्तु रोहिणीवदप्रयोजकः॥ दिनद्वये पराह्णस्पर्शे तु पूर्वा॥ तत्रापि परदिने पराह्णे श्रवणासत्त्वे परैवेति दि
क्॥ ॥अत्र विशेषो भविष्ये॥ शमी शुक्लजगन्नाथ भक्तानामभयंकरं॥ अर्चयित्वा शमीयुक्तमर्चयेत्तु ततः शुभ॥ ॥शमीमंत्र

374

राम
३७४

स्तु ॥ गोपथब्राह्मणे ॥ अमंगलानां शमनीं शमनीं दुष्कृतस्य च ॥ दुःस्वप्ननाशनीं धन्यां प्रपद्येऽहं शुभां शमीं ॥ ॥ यथा भविष्ये ॥ शमी
शमयते पापं शमी लोहितकण्टक ॥ धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ करिष्यमाणा यात्रायां यथाकालं सुखं मया ॥ तत्र
निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ॥ इति तथा ॥ गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदं ॥ गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्र
ति ॥ ततो भूषणवस्त्रादि धारयेत्स्वजनैः सहेति ॥ ॥ अत्र बलनीराजनं ॥ तत्र मंत्रः ॥ चतुरंगबलं मह्यं निररिष्टं व्रजंत्विह ॥ सर्वत्र
विजयो मेऽस्तु त्वत्प्रसादात्सुरेश्वरीति ॥ ॥ ज्योतिषे ॥ कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमं ॥ शोभनं खञ्जनं पश्येज्जलगोष्ठस्य स
न्निधौ ॥ आश्विनपूर्णमासी परा ग्राह्या ॥ सावित्रीव्रतमंतरेणाभवतो हे पौर्णमास्यौ परे इति दीपिकोक्ते ॥ ॥ अत्र विशेषस्तिथितत्वे
लैंगे ॥ आश्विने पौर्णमास्यां तु चरेज्जागरणं व्रतं ॥ ॥ तथा ॥ निशीथे वरदा लक्ष्मीः कोजागर्तीति भाषिणीति ॥ तस्मै वित्तं प्रय
च्छामि अक्षैः क्रीडां करोति यः ॥ ॥ अथ कोजागरव्रतपूजापद्धतिः ॥ अत्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन ॥ आश्वयुज्यामाश्व
युजीकर्मेति ॥ तत्र पूर्वाह्णव्यापिनी ग्राह्या दैवकर्मत्वात् ॥ आग्रयणं तु पर्वणि कार्यं ॥ शरद्याग्रयणं नाम पर्वणि स्यान्नवोद्यतमिति
शौनकोक्तेः ॥ श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ॥ कृता रत्नावलीतत्त्वगतआश्विननिर्णयः ॥ ॥ इति श्रीमन्महाराजाधि
राजश्री ५ गीर्वाणयुद्धविक्रमसाहदेवविरचितायां आश्विननिर्णयरत्नं ॥ ॥ अथ कार्त्तिकः ॥ तत्र कार्त्तिकस्नानं ॥ विष्णुस्मृतौ तुला
मकरमेषेषु प्रातःस्नानं विधीयते ॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति सौरमासउक्तः प्राच्याश्चैनदेवाद्रियते ॥ ॥ दक्षि

CC-0. In Public Domain. Digitization by eGangotri

राणां त्वास्तु ॥ आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ॥ कार्त्तिकस्य व्रतानीह तस्यां वै प्रारभेत् सुधीरिति ॥ ॥ हेमाद्रौ चादित्यपुराणे ॥ पू
र्णा आश्वयुजे मासि पौर्णा पौर्णमास्यां समाहितः ॥ इत्युक्त्वा मासमतंत्रं परया च भक्त्या समाप्यते कार्त्तिकपौर्णमास्यामित्यनेनाभिधानाच्चाश्वि
न शुक्लैकादश्यां पौर्णमास्यां वारभ्य कार्त्तिकशुक्लद्वादश्यां पौर्णमास्यां वा समापयेदित्याहु ॥ ॥ विष्णुः ॥ कार्त्तिकं सकलं मासं नित्य
स्नायी जितेंद्रियः ॥ जपन् हविष्यभुक् शांतः सर्वपापैः प्रमुच्यते ॥ अत्र देशविशेषः पाद्मे कार्त्तिकं प्रक्रम्य ॥ ऊरुक्षेत्रे कोटिगुणो गं
गायामपि तत्समः ॥ ततोऽधिकः पुष्करे स्याद् द्वारवत्यां च भार्गव ॥ पुराणपयश्च सप्रैवसुनयो मथुराधिका ॥ दुर्लभः कार्त्तिको विप्र
मथुरायां नृणामिह ॥ यत्रार्चितः स्वकं रूपं भक्तेभ्यः संप्रतीति ॥ इदं च स्नानं काशीस्थपंचनदेति प्रशस्तं ॥ शतं समाः प्रयत्नस्ना
यते यत्राप्यते फलं ॥ तत्कार्त्तिके पंचनदे सकृत्स्नानेन लभ्यते ॥ कार्त्तिके विंदुतीर्थे यो ब्रह्मचर्यपरायणः ॥ स्नास्यत्यनुदिने भानौ
भानुजातस्य भीः कुत इत्यादि काशीखंडोक्तेः भानुजो यमः ॥ ॥ स्नानमंत्रश्च तत्रैव ॥ कार्त्तिकेहं करिष्यामि प्रातः स्नानं जनार्दन
प्रीत्यर्थं तव देवेश दामोदर मया सह ॥ इमं मंत्रं समुच्चार्य मौनी स्नायाद् व्रती नर इति ॥ ॥ अर्घ्यमंत्रोपि तत्रैव ॥ व्रतिनः कार्त्तिके
मासि स्नातस्य विधिवन्मम ॥ गृहाणार्घ्यं मया दत्तं दनुजेंद्रनिषूदन ॥ नित्यनैमित्तिके कृत्स्ने कार्त्तिके पापनाशने ॥ गृहाणार्घ्यं म
या दत्तं राधया सहितो हरे ॥ इमौ मंत्रौ समुच्चार्य यो अर्घ्यं महत् प्रयच्छति ॥ सुवर्णरत्नपुष्पाणां व्रतपूर्णांशत्वे न सुरापवान् ॥ सुवर्णपूर्णां
पृथिवीं तेन दत्ता न संशय इति ॥ एवं संपूर्णस्नानाशक्तौ त्र्यहं स्नायात् ॥ वाराणस्यां पंचनदे त्र्यहं स्नातास्तु कार्त्तिके ॥ अमी ते पुण्यव

375

पुष्पः पुराणभाजो निर्मला इतिः काशीखंडोक्तेः ॥ ॥तथा॥ कार्त्तिके मासि यात्रायैः कृता भक्तितत्परैः ॥ विष्णुतीर्थकृतः स्नानैस्ते यामु
क्तिं नैश्वरत ॥ ॥नृसिंहपुराणे॥ अंगुलिकुसुदैर्देवं योर्च्चयेच्च जनार्दनं ॥ दर्शनात्तस्य देवर्षे नरकं नाशते नरः ॥ विहाय सर्वपुष्पा
णि मुनिपुष्पेण केशवं ॥ कार्त्तिके योर्च्चयेद्भक्त्या वाजपेयफलं लभेत् ॥ ॥स्कान्दे कार्त्तिकमाहात्म्ये ॥ मालतीमालया विष्णुः केत
क्या वैव श्रुजित ॥ समाः सहस्रं सुप्रीतो भवते मधुसूदन ॥ ॥पाद्मे॥ कार्त्तिके नार्च्चितो यैस्तु कमलैः कमलेक्षणः ॥ जन्मकोटिषु
विप्रेन्द्र न तेषां कमला गृहे ॥ ॥तथा॥ कार्त्तिके केशवे पूजा ये यानानाप्तस्तनैः कृता ॥ ते निर्भत्स्य रवेः पुत्रं वसन्ति त्रिदिवे सदा ॥ तुल
सीदललक्षेण कार्त्तिके योर्च्चयेद्धरिं ॥ पत्रे पत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलं ॥ ॥तथा॥ कार्त्तिकमाहात्म्ये धात्रीछायां तु यः कुर्या
त्पिंडदानं महामुने ॥ मुक्तिं प्रयान्ति पितरः प्रसादान्माधवस्य तु ॥ धात्रीफलविलिप्तांगो धात्रिफलविभूषितः ॥ धात्रीफलकृताहा
रो नरो नारायणो भवेत् ॥ धात्रीछायां समाश्रित्य योर्च्चयेच्चक्रधारिणं ॥ पुष्पे पुष्पेश्वमेधस्य फलं प्राप्नोति मानवः ॥ ॥तथा स्कां
दे ॥ कार्त्तिके मासि विप्रेन्द्र धात्रीवृक्षोपशोभिते ॥ वने दामोदरं विष्णुं विप्रान्नैस्तोषयेद्द्विजः ॥ मूलेन पायसेनाथ होमं कुर्याद्विचक्षणः
ब्राह्मणान्भोजयेच्छक्त्या स्वयं भुंजीत बंधुभिरिति ॥ ॥तथा॥ कार्त्तिके द्विदलव्रतं प्रागुक्तं कार्त्तिके द्विदलं त्यजेदिति ॥ ॥पा
द्मेपि ॥ कार्त्तिकमाहात्म्ये ॥ राजिकां मादकं चैव नैवाद्यात्कार्त्तिके व्रती ॥ द्विदलं तिलतैलं च तथान्यन्मनिदूषितं ॥ ॥स्कान्देपि
कार्त्तिके वर्जयेत्तत्र द्विदलं बहुबीजकं ॥ माषमुद्गमसूराश्च चणकाश्च कुलत्थकाः ॥ निष्पावा राजमाषाश्च आढकी द्विदलं स्मृतं

CC-0. In Public Domain. Digitization by eGangotri

रत्न
३७६

नूतनान्यपि जीर्णानि सर्वाण्येतानि वर्जयेत् ॥ ॥ तथा नारदीये ॥ कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु ॥ कार्त्तिके वर्जयेत्कांस्यं
कार्त्तिके शुक्तसंधानं ॥ कांस्ये न त्याज्यभोजनं ॥ ॥ तत्रैव ॥ कार्त्तिके विष्णुमूर्त्यग्रे दीपदानादि वंशजेन ॥ ॥ तथा ॥ कार्त्तिके तु मु-
नादीक्षा नृणां जन्मविमोचनी ॥ तथा ॥ कार्त्तिके कृच्छ्रसेवी यः प्राजापत्यपरोऽथवा ॥ एकान्तरोपवासी वा त्रिरात्रोपोषितोऽथवा
षड्द्वादशपक्षं वा मासं वा वरवर्णिनी ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ उपवासेन भैक्ष्येण राजन्नेन परमं पदं ॥ अन्येपि
नियमाः प्रागुक्ताः ॥ ॥ ब्रह्मवैवर्त्ते ॥ ब्राह्मयो यवगोधूमाः प्रियंगुस्तिलशालयः ॥ रामे हि सात्विकाः प्रोक्ताः स्वर्गमोक्षफल-
प्रदा ॥ ॥ काशीखंडे ॥ ऊर्जे यवान्नमथवा तु नः ॥ वृन्ताकं सूरणां चैव शूकशिंबीश्च वर्जयेत् ॥ ॥ पाद्मे ॥ नोजोवंध्यो विधानयो
व्रतिना केन चित् क्वचित् ॥ तथा नारदीये ॥ अव्रतेन क्षयं यस्य मासं दामोदरप्रियं ॥ तिर्यग्योनिमवाप्नोति नात्र कार्या विचारणा ॥
अथ कार्त्तिके आकाशदीपः पुष्करपुराणे ॥ तुलायां तिलतैलेन सायंकाले समागते ॥ आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति ॥ महतीं
श्रियमाप्नोति रूपसौभाग्यसंपदमिति ॥ ॥ तद्विधिर्भविष्योत्तरे ॥ दिवाकरेऽस्ताचलमौलिभूते गृहाददूरे पुरुषप्रमाणं ॥ यू-
पाकृतिं यज्ञियवृक्षदारुमारोप्य भूमावधनस्य मूर्द्धि ॥ कृत्वाष्टदलाकृती रुयाभिर्भवेदष्टदिशानुसारी ॥ तत्कर्णिकायां
तु महाप्रकाशदीपः प्रदेयो दलगास्तथाष्टौ ॥ निवेदयेद्धर्माय हराय भूम्यै दामोदरायाप्यथ धर्मराजे ॥ प्रजापतिभ्यस्त्वथ सत्पितृ-
भ्यः प्रेतेभ्य एवाथ तमःस्थितेभ्य इति ॥ अपरार्के त्वयं मंत्र उक्तः ॥ ॥ यथा ॥ दामोदराय नभसि तुलायां लोलया सह ॥ प्रदीपं ते प्र-

376

रत्न
३७६

२२१

Nepal Sanskrit University

यज्ञात्मने नमोनंताय वेधसे इति॥ कार्त्तिककृष्णचतुर्थी करकचतुर्थी सा चंद्रोदयव्यापिनी ग्राह्या तत्रैव पूजायुक्ते॥ कार्त्तिक
कृष्णद्वादशी गोवत्ससंज्ञा॥ सा प्रदोषव्यापिनी ग्राह्या दिनद्वये तत्वे वौयुग्मवाक्यात्॥ वत्सपूजा वटश्चैव कर्त्तव्या प्रथमे हनीति
निर्णयामृतेभिधानाच्च॥ ॥अत्रविशेषो भविष्ये॥ सवत्सां तुल्यवर्णां च शालिनीं गां पयस्विनीं। चंदनादिभिरालभ्य पुष्पमा
लाभिरर्च्चयेत्॥ अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः॥ पादमूले तु दद्याद्वै मंत्रेणानेन यादव॥ क्षीरोदार्णवसंभूते
सुरासुरनमस्कृते॥ सर्वदेवमये ग्रास मया दत्तमिदं ग्रसः॥ सर्वदेवमये देवि सर्वदेवैरलंकृते॥ मातर्ममाभिलषितं सफलं
कुरु नंदिनीति प्रार्थयेत्॥ ॥तत्र॥ तद्दिने तैलपक्वं च स्थालीपक्वं युधिष्ठिर॥ गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत्॥ ॥ज्योति
र्निबंधे नारदः॥ आश्विने कृष्णपक्षे तु द्वादश्यादिषु पंचसु॥ तिथिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः॥ नीराजयेयुर्देवांश्च विप्रान्गा
श्च तुरंगमान्॥ ज्येष्ठान्श्रेष्ठान् जघन्यांश्च मातृमुख्याश्च योषित इति॥ ॥स्कांदे॥ कार्त्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे॥ य
मदीपं बहिर्दद्यादपमृत्युर्विनश्यति॥ ॥मंत्रस्तु॥ मृत्युना पाशदंडाभ्यां कालेन श्यामया सह॥ त्रयोदश्यां दीपदानात्सूर्यजः प्री
यतां ममेति॥ कार्त्तिके कृष्णचतुर्दश्यां प्रभाते चंद्रोदये अभ्यंगं कुर्यात्॥ ॥तदुक्तं भविष्योत्तरे॥ कार्त्तिके कृष्णपक्षे च चतुर्दश्यां वि
धूदये॥ अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः॥ ॥स्मृतिदर्पणेपि॥ चतुर्दश्यामाश्वयुजस्य कृष्णा स्वात्यर्धयुक्ता च भवेत्प्रभाते
स्नानं समभ्यर्च्य नरैस्तु कार्यं सुगंधितैलेन विभूतिमाम्यैरिति॥ ॥ब्राह्मे॥ आश्वयुक्कृष्णपक्षस्य चतुर्दश्यां विधूदये॥ तिलतैलेन

रत्न
३७७

कर्त्तव्यं स्नानं नरकभीरुणेति ॥ आश्वयुगिन्यमावास्यांतेमासमभिप्रेत्योक्तं ॥ ॥ तथा ॥ तैले लक्ष्मीर्जले गंगा दीपाकल्याश्चतुर्दशी ॥ प्रा
प्यतिशेषः ॥ प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यतीति ॥ दिनद्वयेपि चंद्रोदये चतुर्दशीसत्वे तदभावेप्यरुणोदये संपूर्णोरवरादे
वा दिनद्वये चतुर्दशीसाम्ये च पूर्वदिनेभ्यंगं कुर्यात् ॥ पूर्वविद्धचतुर्दश्यां कार्तिकस्यासिते नरैः ॥ पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्र
यत्नत इति वचनात् ॥ पूर्वदिने परदिनएव वा सत्वे सैव ग्राह्या दिनद्वये प्यसत्वेप्यरुणोदयव्यापिनी ग्राह्या ॥ पक्षे प्रत्यूषसमये
इत्युक्तेः ॥ वक्ष्यमाणवचनाच्च ॥ तदभावे तु चतुर्दशीह्रासं पूर्वेद्युः प्रवेश्य पूर्वेह्नि त्रयोदशीमध्यएवाभ्यंगं कुर्यादिति दिवोदासः के
विदत्र वचनमपि साधकत्वेन वदंति ॥ तिथ्यादौ भवेद्यावान् ह्रासो वृद्धिः परेहनि ॥ तावान् ग्राह्यः स पूर्वेद्युरदृष्टोपि स्वकर्मणी
ति ॥ ॥ तन्मंदं ॥ न हीदं वचनं पूर्वदिनस्यापूर्वग्राह्यत्वं विधत्ते ॥ तत्के कर्मकर्त्तव्यमपेक्ष्यादौ दिनद्वये कर्मकालव्याप्त्यभावे वाक्यां
तरेणाप्राप्ते वा पूर्वदिनस्य ग्राह्यत्वमुक्तं तत्र प्रत्यक्षकाले तत्तिथेरभावेपि तन्त्रैवानुष्ठानं बोधकमिदं ॥ न चात्र तदस्तीति ॥ यत्किं
चिदेतत् ॥ तेन चतुर्थ्यामगामिनी ग्राह्या अत एव सर्वत्र नारायणः ॥ तथा कृष्णचतुर्दश्यामाश्विनेर्कोदयात्पुरः ॥ यामिन्याः प
श्चिमे यामे तैलाभ्यंगो विशिष्यते इति ॥ मृगांकोदयवेलायां त्रयोदश्यां यदा भवेत् ॥ दर्शे वामंगलस्नानं दुःखशोकभयप्रदमिति
कालादर्शे त्रयोदश्यां निषेधाच्च तेनायमर्थः ॥ तथाग्निहोत्रेष्या वज्री वसायं प्रातः कालेषु व्याप्यकालस्य गुरुत्वं तथात्र चतुर्थ्या
मारुणोदयचंद्रोदयानामनंतरोत्तरस्य व्याप्यत्वान्गुरुत्वमिति ॥ यदपि ॥ त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी ॥ रात्रिशेषे त्वम

377

राम
३७७

२२१

पः क्षयोन्नविवक्षित॥ सूर्योदयात्प्राक्समाप्तौ चंद्रोदयकालसत्वेवत्वयैवानंगीकारात्॥ किंत्वभ्यंगकालात्प्राक्समाप्तिरुपो
त्तरतासत्तापरमिदं॥ अतएवसर्वज्ञनारायणेन॥ नचतुर्थयाममात्रेस्नानमुक्तं॥ तदाचोदाहृतं तथाक्रमस्यचतुर्दशपमिति॥ चतु
र्थयाममात्रेस्नानमुक्तंज्योतिर्निबंधेनारदेपि॥ इषासितचतुर्दश्यादिउक्षयतिथावपि॥ ऊर्जादौस्वातिसंयुक्तेतदादीपावली
भवेत्॥ कुर्यात्संलग्नमेतच्चदीपोत्सवदिनत्रयं॥ यत्तुत्रयोदशीमध्येस्नानमाउस्त्रेषामाशयंनविद्मनइत्यलंभूयसा॥ यदपि
अरुणोदयेतोमत्रेरिक्तायांस्नातियोनरः॥ तस्याब्दिकभवोधर्मोनश्यत्येवनसंशयइतिदिवोदासीयेभविष्यवचनं॥ तत्तु
रव्यकालेरुणोदयेचतुर्दश्यभावेपितत्रैवस्नानत्वमित्येवंपरमितिसर्वैश्शिवंचतुर्थिकोत्सकोरुणोदयइति॥ ॥तथा॥ मद
नरत्नेपाद्मे॥ अपामार्गमथोतुंबीप्रपुन्नाटमथापरं॥ भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै॥ प्रपुन्नाटश्चक्रमर्दः मंत्रश्च
मीतालोष्टसमायुक्तसकंटकदलान्वितः॥ हरपापमपामार्गभ्राम्यमाणःपुनःपुनरिति॥ अस्यामेवप्रदोषेदीपान्दद्यादित्यु
क्तंस्कांदे॥ ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनांभवनेषुमठेषुचेति॥ ॥ब्राह्मे॥ अमावास्याच
तुर्दश्योःप्रदोषेदीपदानतः॥ यममार्गांधकारेभ्योमुच्यतेकार्तिकेनरः॥ ॥लैंगे॥ माषपत्रस्यशाकेनभुक्त्वातत्रदिवानरः॥ प्रे
ताख्यायांचतुर्दश्यांसर्वपापैःप्रमुच्यते॥ अत्रयमतर्पणमुक्तंवृद्धमनुना॥ दीपोत्सवचतुर्दश्यांकार्यंतुयमतर्पणम्॥ ब्राह्मे॥
अपामार्गस्यपत्राणिभ्रामयेच्छिरसोपरि॥ ततश्चतर्पणंकार्यंधर्मराजस्यनामभिः॥ यमायधर्मराजायमृत्यवेचांतकायच॥ वै

CC-0. In Public Domain. Digitization by eGangotri

वैवस्वतायकालायसर्वभूतक्षयायच॥ ओंडुवरायदध्नायनीलायपरमेष्ठिने॥ वृकोदरायचित्रायचित्रगुप्तायवैनमः॥इति॥यज्ञो
पवीतिनाकार्यंप्राचीनावीतिनाथवेति॥ इदंजीवत्पितृकेनापिकार्यं॥ जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोरितियाम्योक्ते
इतिनरकचतुर्दशी॥ ॥कार्त्तिकामावास्यायांप्रातरभ्यंगंकुर्यात्॥ तदुक्तंकालादर्शे॥ प्रत्यूषआश्वयुग्दर्शेकृताभ्यंगादिमंगलः॥
भक्त्याप्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये॥ अस्यव्याख्यानेआदिशब्दात्स्नानंचत्वगुदकस्नानादेरुपसंग्रहः॥ ॥तदुक्तंज्योतिःपराशरे
स्वातिस्थितेरवाविंदुर्यदिस्वातिगतोभवेत्॥ पंचत्वगुदकस्नायीकृताभ्यंगविधिर्नरः॥ नीराजितोमहालक्ष्मीमर्चयन्श्रियमश्
नुते॥ आश्वयुग्दर्शइतिदर्शशब्दःप्रत्यूषस्वातिप्रकृतितिथिपरः॥ ॥तदुक्तंब्राह्मे॥ ऊर्जेकृष्णस्वातिद्वितीयायांततिथिभ्रस्वातिऋक्ष
गे॥ मानवोमंगलस्नायीनैवलक्ष्म्यावियुज्यते॥ ॥तत्रैव॥ इषेभूतेचदर्शेचकार्त्तिकप्रथमेदिने॥ यदास्वातीतदाभ्यंगस्नानंकु
र्यादिनोदये॥ कश्यपसंहितायांतुदीपावलीदर्शंप्रक्रम्यइन्दुक्षयेपिसंक्रान्तौरवौपातेदिनक्षये॥ तत्राभ्यंगोनदोषायःप्रातःपा
पापनुत्तये॥ ॥इतिस्वातियोगंविनाप्यभ्यंगउक्तः॥ ॥मात्स्ये॥ दीपैर्नीराजनादत्रसैषादीपावलीस्मृता॥ अत्रविशेषोहेमाद्रौ
भविष्ये दिवातत्रनभोक्तव्यमृतेबालातुराज्जनात्॥ प्रदोषसमयेलक्ष्मीपूजयित्वाततःक्रमात्॥ दीपवृक्षाश्चदातव्याःशक्त्या
देवगृहेषुच॥ तत्रैवाभ्यंगमभिधाय॥ एवंप्रभातसमयेत्वमावास्यांनराधिप॥ कृत्वातुपार्वणंश्राद्धंदधिक्षीरघृतादिभिः॥ दी
पान्दत्वाप्रदोषेतुलक्ष्मींपूज्ययथाविधि॥ स्वलंकृतेनभोक्तव्यंसितवस्त्रोपशोभिना॥ इयंप्रदोषव्यापिनीग्राह्यातुलासंस्थेस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्तांशौ प्रदोषे भूतदर्शयोः॥ उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनमिति॥ ॥ज्योतिषोक्ते॥ दिनद्वये सत्वे परा॥ दर्शे करजनी
योगे दर्शः स्यात्तु परेऽहनि॥ तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिकेति॥ तिथितत्वे ज्योतिर्वचनात्॥ दिवोदासीये तु प्रदोषस्य क
र्मकालत्वात्॥ अर्द्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहान्॥ अतः स्वलंकृता लिप्ता दीपैर्जाग्रज्जनोत्सवा॥ सुधाधवलिता कार्या
पुष्पमालोपशोभिता इति॥ ब्राह्मोक्तेश्च प्रदोषार्द्धरात्रव्यापिनी मुख्या यद्येकैकव्याप्तौ परैव॥ प्रदोषस्य मुख्यत्वादर्द्धरात्रे तु हेयाभा
वाद्द्वयस्तु अपराह्णे प्रकर्त्तव्यं श्राद्धं पितृपरायणैः॥ प्रदोषसमये राजन् कर्त्तव्या दीपमालिकेति क्रमः॥ संपूर्णा तिथावेव तन्नक्त
र्मकालव्याप्तेर्वलवत्वादित्युक्तं॥ अत्रैव दर्शे पररात्रेर लक्ष्मीनिःसारणमुक्तं मदनरत्ने भविष्ये॥ एवं गते निशीथे तु जने निद्रा
र्द्धलोचने॥ तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः॥ निःकाश्यते प्रहृष्टाभिर्लक्ष्मीः स्वगृहांगणात्॥ ॥अथ महालक्ष्मीपूजा(
विधिः॥ कार्त्तिकशुक्लप्रतिपदि गोक्रीडनमुक्तं निर्णयामृते॥ अस्यामेव रात्रौ बलेः पूजोक्ता हेमाद्रौ भविष्ये॥ कृत्वैतत्सर्वमेवेह
रात्रौ दैत्यपतेर्बलेः॥ पूजां कुर्यान्नृपः साक्षाद्भूमौ मण्डलके शुभे॥ बलिमालिख्य दैत्येन्द्रं वर्णकैः पंचरंगकैः॥ गृहस्य मध्ये शालायां
विशालायां ततोऽर्चयेत्॥ लोकश्चापि गृहस्यान्तः शय्यायां शुक्लतण्डुलैः॥ संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्॥ ॥मंत्र
स्तु पाद्ये॥ बलिराज नमस्तुभ्यं दैत्यदानववंदित॥ इंद्रशत्रोऽमरारातेर्विष्णुसान्निध्यदो भवेति॥ ॥तथा॥ बलिमुद्दिश्य दीयन्ते
दानानि कुरुनंदन॥ यानि तान्यक्षयाण्याहुर्मयैव संप्रदर्शितमिति॥ तदेतत्पूर्वविद्धप्रतिपदि कर्त्तव्यं॥ पूर्वविद्धाप्रकर्त्तव्या शि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्ल
३७९

वरात्रिर्बलेर्दिनमिति ॥ ॥ हेमाद्रौब्राह्मरोक्ते ॥ माधवोपि ॥ वल्मुक्तवंच पूर्वेद्युरूपवासवदाचरेदिति ॥ ॥ निर्णयामृतेपि
याकूः प्रतिपन्मिश्रा नत्रगाः पूजयेन्नृप ॥ पूजनाद्वीर्णिवर्द्धन्ते प्रजा गावो महीपतिरिति ॥ ॥ तथा ॥ भद्रायां गोकुलक्रीडास
देशो वै विनश्यति ॥ भद्रायां द्वितीयायां ॥ ॥ तथा ॥ प्रतिपद्यग्निकरणे द्वितीयायां तु गोर्चनं ॥ छत्रछेदं करिष्यन्ते विघ्नना शकु
लक्षयमिति ॥ ॥ तथा ॥ प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतं ॥ परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः इति ॥ देवलवचनात्
ऽनेन विधिप्रतिप्रतिषेधा ॥ पूर्वदिने प्रतिपत्सायाह्नव्यापित्वे द्वितीयदिने चंद्रदर्शनसंभवे चन्नेया ॥ गवां क्रीडादिने य
त्र रात्रौ दृश्येत चंद्रमा ॥ सोमो राजा नृपश्चून्हंतु सुरभीः पूजकांस्तथेति ॥ पुराणसमुच्चयात् ॥ दिनद्वये सायाह्नव्यापित्वे तु परे
द्युर्ग्राह्या ॥ वर्द्धमानतिथौ नंदा यदा सार्द्धत्रियामिका ॥ द्वितीयावृद्धिगामित्वाडुत्तरा तत्र वोच्यते ॥ इति ॥ ॥ तथा ॥ त्रियामगा
दर्शतिथिर्भवेच्चेत्सार्द्धत्रियामा प्रतिपद्वितीयाद्धे दीयोत्सवे ते मुनिभिः प्रदिष्टे अतोऽन्यथा पूर्वयुते विधेये ॥ इति पुराणसमु
च्चयादिति निर्णयामृतकारः ॥ सार्द्धत्रियामिकेत्यनेन चंद्रदर्शनाभाव उक्तः ॥ द्वितीयायाः पंचधाभक्तदिनचतुर्थांशरूप
पराह्णव्याप्त्यावेव ॥ चंद्रदर्शनसंभवात्तथ यत्वे तद्वत्तद्वयं पूर्वविद्धासंभवे वेदितव्यमिति ब्रूमः ॥ दिनद्वये प्रतिपदः सा
याह्नव्याप्त्यभावे तु पूर्वैव ॥ रात्रौ बलिपूजाविधानेन कर्मकालव्यापित्वात् ॥ परदिने च चंद्रोदयनिषेधादिति दिक् ॥ मद
नरत्ने तु पूर्वविद्धायां गोक्रीडा नीराजनमंगलमालिकेत्युत्तरत्र कार्या ॥ कार्त्तिके शुक्लपक्षे तु विधानद्वितये भवेत् ॥ नारीनी

379

राम
३७९

२९८

CC-0. In Public Domain. Digitization by eGangotri

राजनं प्रातः सायं मंगलमालिका ॥ यदा च प्रतिपत्स्वल्पा नारी नीराजनं भवेत् ॥ द्वितीयायां ततः कुर्यात्सायं मंगलमालिका ॥ यदा
च प्रतिपद्घटिका द्वयं ॥ तस्यां नीराजनं कार्यं सायं मंगलमालिकेति भविष्योक्तेः ॥ प्रातर्वा यदि लभ्येत प्रतिपद्घटिकाशुभा ॥ द्वि
तीयायां ततः कुर्यात्सायं मंगलमालिकां ॥ कार्त्तिके शुक्लपक्षादौ त्वमावास्या घटीद्वयं ॥ देशभंगभयान्नैव कुर्यान्मंगलमालि
कामिति देवीपुराणाच्चेत्युक्तं ॥ अत्र विशेषो हेमाद्रौ ब्राह्मे बलिप्रतिपदं प्रक्रम्य ॥ तस्माद्द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः ॥ तस्मि
न्द्यूते जयो यस्य तस्य संवत्सरं जयः ॥ पराजयो विरुद्धश्च लाभनाशकरो भवेत् ॥ इयितामिश्रसहिते नैयासाव भवेन्निशीति
अत्र गोवर्द्धनपूजादि मार्गपालीपूजनादि चोक्तं हेमाद्रौ निर्णयामृते वत्स्कांदे ॥ प्रातर्गोवर्द्धनं पूज्य द्यूतं चापि समाचरेत् ॥ भूष
णीयास्तथा गावः पूज्याश्चा वाहदोहना ॥ गोवर्द्धनश्च गोमयेन कार्यश्चित्रैर्वा ॥ ॥ मंत्रस्तु ॥ गोवर्द्धन धराधार गोकुलत्राणका
रक ॥ कृष्णबाहुकृतच्छाय गवां कोटिप्रदो भव ॥ ॥ गोमन्त्रः ॥ लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता ॥ घृतं वहति यज्ञा
र्थे मम पापं व्यपोहतु ॥ ॥ तत्रैव स्कांदे ॥ ततोपराह्णसमये पूर्वस्यां दिशि भारत ॥ मार्गपाली प्रबध्नीयात्तुंगे स्तंभे थ पादपे ॥
कुशकाशमयीं दिव्यां लंबकैर्बहुभिर्युतां ॥ दर्शयित्वा गजानश्वान्सायमस्यास्तले नयेत् ॥ कृते होमे द्विजेन्द्रैस्तु बध्नीयान्मार्ग
पालिकां ॥ नमस्कारं ततः कुर्यान्मंत्रेणानेन सुव्रत ॥ मार्गपालि नमस्तेस्तु सर्वलोकसुखप्रदे ॥ विधेयैः पुत्रदाराद्यैः पुनरेहि व्र
तस्य मे ॥ नीराजनं च तत्रैव कार्यं राष्ट्रजयप्रदं ॥ राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः ॥ मार्गपालीं समुल्लंघ्य नीरुजः सुःसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रवाचिता ॥ तत्रैवादित्यपुराणे ॥ ऊशकाशमयीं कुर्यात् वल्मिकां सुदृढां नवां ॥ नामकेनोशजपुत्राही नवर्णालथान्यतः ॥ गृहीत्वा
कर्षयेत्पुस्तां यथासारं पक्रुमुकु ॥ जयेत्त्वही नजातीनां जयोराज्ञल्कवत्सरमिति ॥ यमद्वितीयातु यपद्युनेति ग्राह्येत्तुकं निर्या
यामृतादे ॥ यमद्वितीया मध्याह्नव्यापिनी पूर्वविद्धा वेति हेमाद्रि अत्र विशेषो हेमाद्रौ स्कांदे ॥ ऊर्जे शुक्लद्वितीयायां मपराह्णेर्च
येद्यमं ॥ स्नानं कृत्वातु जायां ‾ यमलोकं न पश्यतीति ॥ ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः ॥ वेष्टितः किन्नरैर्हृष्टैस्तस्मै य
च्छति वांछितं ॥ ॥ तथाभविष्ये ॥ प्रथमा श्रावणे मासि तथा भाद्रपदे परा ॥ तृतीयाश्वयुजे मासि चतुर्थी कार्त्तिकी भवेत् ॥ श्रा
वणो कलुषा नाम तथा भाद्रे च निर्मला ॥ आश्विने प्रेतसंचारा कार्त्तिके याम्यका मतेत्तुका ॥ प्रथमायां प्रदत्तं द्वितीयायां सरस्व
ती पूजा तृतीयायां श्राद्धंत्तुका चतुर्थ्यां सुकं ॥ कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर ॥ यमो यमुनया पूर्वं भोजितः स्वगृ
हेर्चितः ॥ अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ॥ अस्मान्निजगृहे विप्र न भोक्तव्यं ततो नरैः ॥ स्नेहेन भगिनीहस्ताद्भोक्त
व्यं पुष्टिवर्द्धनं ॥ दानानि च प्रदेयानि भगिनीभ्यो विधानतः ॥ स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः ॥ सर्वा भगिन्यः संपूज्या
अभावे प्रतिपन्नकाः ॥ प्रतिपन्ना माता भगिन्य इति हेमाद्रिः ॥ पितृव्यभगिनीहस्तात्प्रथमायां युधिष्ठिरः ॥ मातुलस्य सुताहस्ता
त्कव्यबलवर्द्धनः ॥ यस्यां तिथौ यमुनया यमराजदेवः संभोजितः प्रतिजगत्स्वसृसौहृदेन ॥ तस्यां स्वसुः करतलादिह यो भुन
क्ति प्राप्नोति रत्नसुखधान्यमनुत्तमं सः ॥ ॥ गौतमः ॥ यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत् ॥ अर्घ्यश्चात्र प्रदातव्यो यमाय स

380

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हजद्वये ॥ ॥मंत्र॥ एह्येहि मार्त्तण्ड जयाशा हस्तयमांतकालोकधरामरेशः ॥ आत्तद्विनीयाकृतदेवशृंगां गृहाणार्घ्यं भगवन्न
मस्ते ॥ आतमवातु जानाहं अक्षभक्तमिदं शुभं ॥ प्रीतये यमराजस्य यमुनायाविशेषतः ॥ ज्येष्ठभ्रातृजानेतिस्मार्त्ता ॥ इत्यन्नदा
नमित्यथाऊ ॥ ॥ तस्मात् पुराणोपियातु मोजयनेनारी आतरं भ्रात्रम्यकेनिथौ ॥ अर्च्ययेच्चापिताम्बूलैनसावैधव्यमाप्नुयात्
भ्रातुरायुःक्षयोराजन्नभवेन्नत्र कर्हिचित् ॥ इति ॥ कार्त्तिकशुक्लनवमीयुगादिः ॥ सापौर्वाह्णिकीग्राह्या शुक्लपक्षस्थत्वात्
अत्रैव विष्णुत्रिरात्रं उक्तं पाद्मे ॥ कार्त्तिके शुक्लनवमीमवाप्य विजितेन्द्रियः ॥ हरिं विधाय सौवर्णं तुलस्या सहितं विभुं ॥ पूजये
द्विधिवद्भक्त्या व्रतीतत्र दिनत्रयं ॥ एवं यथोक्तविधिना कुर्याद्वैवाहिके विधिमिति ॥ कार्त्तिकशुक्लैकादश्यां भीष्मपंचकव्रत
मुक्तं ॥ ॥नारदीये॥ अतो नरैः प्रयत्नेन कर्त्तव्यं भीष्मपंचकं ॥ कार्त्तिकस्यामलेपक्षे स्नात्वासम्यग्यतव्रतः ॥ एकादश्यां तु गृ
ह्णीयाद्व्रतं पंचदिनात्मकमिति ॥ तद्विधिस्तु गोमयेन स्नात्वा मौनी यवान्नैः पंचगव्यैर्विशुद्धैः संस्नाप्य संपूज्य पाद्यं पूज्यपा
यसंनिवेद्य स्वादशाक्षरमष्टोत्तरशतं जप्त्वा ॥ ॐ नमो विष्णवे इति घृताक्तान् यवान् व्रीहीन् वाष्टोत्तरशतं हुत्वा भूमौ
स्वपेत् ॥ एवं पंचदिनेषु कुर्यात् ॥ विशेषस्त्वाद्ये हि हरेः कमलैः पादौ संपूज्य त्रिगोमयं प्राश्य ॥ द्वितीये बिल्वपत्रैर्जानुनी संपू
ज्य गोमूत्रं ॥ त्रयोदश्यां भृंगराजेन नाभिं संपूज्य क्षीरं ॥ चतुर्दश्यां करवीरैः स्कंधं संपूज्य दधि ॥ पौर्णमास्यां होमांते लोहीं पापप्र
तिमां खड्गचक्रहस्तां कृष्णवस्त्रवेष्टितां प्रस्थतिलोपरिस्थां कृत्वा धर्मराजनामभिः करवीरैः संपूज्य ॥ यदन्यजन्मनि कृतमिह

CC-0. In Public Domain. Digitization by eGangotri

राम
३८१

जन्मनिवारणं ॥ तत्सर्वं पृथमयानु मत्वा पंचवपूजनादिति ॥ पुष्पांजलिं क्षिप्त्वा कृत्वा प्रतिमां च संपूज्य विप्राय दत्वा विप्रान् संभोज्य
दक्षिणां दत्वा पंचगव्यं प्राश्य पौर्णमास्यां नक्तं भुंजीतेति ॥ ॥ लघुनारदीये ॥ पंचगव्यप्राश्यं पउक्षरेरोतिहिमाद्रि ॥ ॥ हेमाद्रौ
भविष्ये तु ॥ शाकैर्मन्यैर्वा पंचाहं वर्त्तनं तदुक्तं ॥ अंते तदुक्तं ॥ यद्भीष्मपंचकमिति प्रथितं पृथिव्यामेकादशीप्रभृतिपंचदशीनि
रुद्धं ॥ मन्यन्नभोजनमरस्य नरस्य तस्मिन्निष्टं फलं दिशति पांडवशार्गधन्वेति ॥ ॥ तथा पाद्मे ॥ पंचाहं पंचगव्याशी भीष्मार्घ्यं
च पंचकं ॥ अहं त्वपि तथा दद्यान्मंत्रेणानेन सुव्रत ॥ सत्यव्रताय शुचये गांगेयाय महात्मने ॥ भीष्मायैतं ददाम्यर्घ्यमाजन्मब्र
ह्मचारिणे ॥ वैयाघ्रपद्यगोत्रायेति च ॥ सव्येनानेन मंत्रेण तर्पणं सार्ववर्णिकमिति ॥ कार्त्तिकशुक्लद्वादश्यां रेवतीनक्षत्रयो
गहरितायां पारणं कार्यं ॥ तदुक्तं ॥ आभाकासितपक्षेषु मैत्रश्रवणरेवती ॥ संगमे नहि भोक्तव्यं द्वादश्यां द्वादशी हरेर्दिनं ॥ य
दा तु रेवतीयोगे सहिता द्वादशी ॥ सर्वथा लभ्यते तदा रेवत्याश्च तुर्थपादं वर्जयेत् ॥ ॥ वचनं तु प्रागुक्तं ॥ लघुनारदीये ॥ का
र्त्तिके शुक्लपक्षस्य कृत्वा वैकादशीं नरः ॥ प्रातर्दत्वा शुभान् कुंभान् प्रयाति हरिमंदिरं ॥ ॥ वाराहे ॥ एकादशी सोमयुता कार्त्ति
के मासि भामिनी ॥ उत्तराषाढसंयोगे अनेनासां प्रकीर्त्तिता ॥ तस्यां यत्क्रियते भद्रे सर्वमानंत्यमश्नुते ॥ अस्यामेव राज्ञो देवोत्था
पनं तदुक्तं हेमाद्रौ ब्राह्मे ॥ एकादश्यां तु शुक्लायां कार्त्तिके मासि केशवं ॥ प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः इति ॥ ॥ भवि
ष्ये ॥ कार्त्तिके शुक्लपक्षे तु एकादश्यां पृथात्मज ॥ मंत्रेणानेन राजेंद्र देवमुत्थापयेद्द्विज ॥ रामार्चनं चंद्रिकायां तु द्वादश्यां तदुक्तं

381
राम
३८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पारणाहे पूर्वरात्रे पाठादीन्वादयन्गुरुरिति ॥ अत्र देशाचारतो व्यवस्था ॥ तत्रैव देवदेवस्य स्नानं पूर्वमहद्भवेत् ॥ महापूजां ततः
कृत्वा देवमुत्थापयेत्सुधीः ॥ मंत्रास्तु वराहपुराणोक्ताः ॥ ॐ ब्रह्मेंद्ररुद्राग्निकुवेरसूर्यसोमादिभिर्वंदित वंदनीया ॥ बुध्यस्व देवे
श जगन्निवास मंत्रप्रभावेन सुखेन देव ॥ इयं तु द्वादशी देव प्रबोधार्थं विनिर्मिता ॥ त्वयैव सर्वलोकानां हितार्थं शेषशायिना ॥
उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते ॥ त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदं ॥ उत्थितं चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव ॥ गता
मेघा वियच्चैव निर्मलं निर्मला दिशः ॥ शारदानि च पुष्पाणि गृहाण मम केशव ॥ इदं विष्णुरिति प्रोक्तो मंत्र उत्थापने हरेरिति ॥
एवं देवमुत्थाप्य तद्दये चातुर्मास्यव्रतसमाप्तिं कुर्यात् ॥ ॥ नदुकंमारने ॥ चतुर्दश गृह्य वै वीरां चातुर्मास्यव्रतं नरः ॥ कार्त्तिके शु
क्लपक्षे तु द्वादश्यां तत्समापयेत् ॥ लघुनारदीये ॥ चातुर्मास्यव्रतानां च समाप्तिः कार्त्तिके स्मृता ॥ मंत्रश्च सनत्कुमारेणोक्तः ॥ इ
दं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दनेति ॥ ॥ अथ वाराहोक्तो बोधनीविधिः ॥ एकाद
श्यां रात्रौ कुंभे घृतपात्रोपरि हेममाषामितं मत्स्यं पंचामृते न संस्नाप्य कुंकुमवस्त्रयुग्माद्याद्यैः संपूज्य मत्स्यादिदशावताराणां संपू
ज्य जागरं कृत्वा प्रातर्देवमावार्ययेत् वस्त्राद्यैः संपूज्य ॥ जगदादिजगद्रूपो जगदादिरनादिमान् ॥ जगदाद्यो जगद्योनिः प्रीयतां मे ज
नार्दनः ॥ इति दक्षिणां दत्वा ब्राह्मणान्भोजयेदिति ॥ ॥ तथा च ब्राह्मे ॥ महानवम्यां वै रात्रौ भ्रामयेत्स्यंदने स्थितं ॥ उत्थितं देवदेवे
शं नगरे पार्थिवः स्वयं ॥ चतुरो वार्षिकान्मासान्नियमं यस्य यत्कृतं ॥ कथयित्वा द्विजेभ्यस्तद्दद्यात्सदक्षिणां ॥ यस्य भक्ष्य नियम
स

CC-0. In Public Domain. Digitization by eGangotri

मं कृत्वं द्रव्यं दद्यादित्यर्थः ॥ इदं च शुक्लास्तावषयपि कार्यं ॥ अशक्तो चेत्तु पूजामन्येन कारयेत् ॥ कार्त्तिके द्वादशी पौर्णमासी वमन्वादि
सा पौर्वाह्णिकी ग्राह्या शुक्लपक्षस्थत्वात् ॥ कार्त्तिकचतुर्दशी वैकुंठसंज्ञा सा निशीथव्यापिनी ग्राह्या ॥ दिनद्वये तद्व्याप्तौ निशीथप्र
दोषोभयव्यापिनी ग्राह्या ॥ तदुक्तं भविष्ये ॥ कार्त्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप ॥ सोपवासस्सं संपूज्य हरिं रात्रौ जितेंद्रिय
ः ॥ अस्यामेव विश्वेश्वरप्रतिष्ठादिनत्वात् ॥ तन्मध्ये यदोपा नादिक्रियते तदारुणोदयव्यापिनी ग्राह्या ॥ ॥ तदुक्तं सनत्कुमार
संहितायां ॥ वर्षे च हेमलंबाख्ये मासे श्रीमति कार्त्तिके ॥ शुक्लपक्षे चतुर्दश्यां मरुणाभ्युदयं प्रति ॥ महादेवतिथौ ब्राह्मे मुहूर्ते
मणिकर्णिके ॥ स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयत् इति पूर्वदिने वोपवासः ॥ ततः प्रभाते विमले कृत्वा पूजां महाद्भुतां
दद्यात्पारणं महाधर्मिवे नेम्बिनं कृतपारणाः इति तत्रैवोक्तेः ॥ शिवरहस्येपि ॥ ततोरुणोदये जाते स्नात्वा स्नात्वा वा भस्मना ॥ संध्या
समये विश्वेशं मामभ्यर्च्य यथाविधि ॥ मद्भक्तान् भोजयामासुरीश्वर यो वुभुजस्ततः इति ॥ अत्र कार्त्तिकव्रतोद्यापनमुक्तं पाद्मे
कार्त्तिकमाहात्म्ये ॥ ॥ अथोर्जव्रतिनः सम्यगुद्यापनविधिं शृणु ॥ ऊर्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती ॥ तुलस्या उपरिष्टा 382
त्तु कुर्यान्मंडपिकां शुभां ॥ तुलसीमूलदेशे च सर्वतोभद्रमेव च ॥ तस्योपरिष्टात्कलशं पंचरत्नसमन्वितं ॥ पूजयेत्तत्र देवेश रत्न
सौवर्णं गरुडध्वजं ॥ रात्रौ जागरणं कुर्याद्गीतवाद्यादि मंगलैः ॥ ततस्तु पौर्णमास्यां वै सपत्नीकान् द्विजोत्तमान् ॥ त्रिंशन्मिता ३८२
नथैकं वा स्वशक्त्या वा निमंत्रयेत् ॥ अतो देवा इति द्वाभ्यां जुहुयात्तिलपायसं ॥ ततो गां कपिलां दद्यात् पूजयेद्विधिवद्गुरुमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कार्त्तिकी पौर्णमासो परा ग्राह्या ॥ असौ पौर्णमास्यां परे इति दीपिकोक्तेः ॥ ॥ अथ विशेषो हेमाद्रौ ब्राह्मे ॥ उपापमहाकार्त्तिकीस्या
न्नौवेद्योः कृत्तिकासु च ॥ तथा ॥ आग्नेयं तु यदा ऋक्षं कार्त्तिक्यां भवति क्वचित् ॥ महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा ॥ यदा तु
याम्यं भवति ऋक्षं तस्यां तिथौ क्वचित् ॥ तिथिः सापि महापुण्या मुनिभिः परिकीर्त्तिता ॥ प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा इति ॥ ॥ पाद्मे ॥ विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमाः ॥ स योगः पद्मको नाम
पुष्करेष्वतिदुर्लभः ॥ पद्मकं पुष्करे प्राप्य कपिलां यः प्रयच्छति ॥ महित्वा सर्वपापानि वैष्णवं लभते पदं ॥ ॥ यमः ॥ का
र्त्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते ॥ माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः ॥ अस्यामेव सायं काले मत्स्यावतारो जा
त इत्युक्तं पाद्मे ॥ कार्त्तिकमाहात्म्ये ॥ वरान्दत्वा यतो विष्णुर्मत्स्यरूपो भवत्ततः ॥ तस्यां दत्तं हुतं जप्तं तदक्षय्यफलं स्मृतमिति ॥
अत्र त्रिपुरोत्सव उक्तो भार्गवार्चनदीपिकायां ॥ पौर्णमास्यां तु संध्यायां कर्त्तव्यस्त्रिपुरोत्सवं ॥ दद्यादनेन मंत्रेण प्रदीपांश्च
सुरालये ॥ कीटाः पतंगा मशकाश्च वृक्षा जले स्थले ये विचरंति जीवाः ॥ दृष्ट्वा प्रदीपं न च जन्मभागिनो भवंति नित्यं श्वपचा हि
विप्राः ॥ ॥ अथ वृषोत्सर्गोतिप्रशस्तः ॥ तदुक्तं मात्स्ये ॥ कार्त्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत् ॥ शैवं पदमवाप्नोति शि
वव्रतमिदं स्मृतमिति ॥ अथ कार्त्तिके स्वदर्शनमुक्तं काशीखंडे ॥ कार्त्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनं ॥ सप्त जन्म
भवेद्विप्रो धनाढ्यो वेदपारगः इति ॥ ॥ श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ॥ कृतारत्नावलीतत्र कृतः कार्त्तिकनिर्णय

रत्न कृष्णे के पूर्वाः षोडश घटिकाः पुराणाः शेषे प्रास्थवन् ॥ मार्गशीर्षकृष्णाष्टमी सा च रात्रिव्यापिनी ग्राह्या ॥ मार्गशीर्षासिताष्टम्यां काल
३८३ भैरवसन्निधौ ॥ उपोष्य जागरं कुर्वन् सर्वपापैः प्रमुच्यते ॥ इति काशीखण्डात् ॥ ॥ रात्रिव्रतत्वाचगमे : रुद्रव्रतेषु सर्वेषु कर्म
व्यासंमुखी तिथिरिति ॥ ॥ तुल्यवैवर्त्तीव ॥ दिनद्वये शान्तो रात्रिव्याप्ताउन्तरैव ॥ भैरवोत्पत्तेः प्रदोषकालीनत्वादिति केचित् ॥
तत्र ॥ शिवरहस्ये मध्याह्ने भैरवोत्पत्तेश्रवणात् ॥ तथा वतत्रैव ॥ नित्यया चादिकं कृत्वा मध्याह्ने संस्थिते वा विनृपक्रमव्रतस्या
रुद्रेवज्ञानेउक्तं ॥ ततो ग्ररूपादानयास्मन्तः श्रीकालभैरवः ॥ आविरासीत् जदालोकान् भीषयन्नखिला नयीति ॥ अत्रोपवास
स्वप्राधान्यमिमुक्तं तत्रैव ॥ उपोषरास्यां गभूत मर्घ्यदानमिहस्मृतं ॥ तथा जागरणं रात्रौ पूजायामचतुष्टय ॥ ॥ संध्याया
मपि पूजैयोक्ता ॥ तेन मध्याह्नव्यापिनी युक्ता ॥ दिनेशतः संपूर्णायां वा तद्याप्तो पूर्वैवोक्तवचनात् ॥ पारणातु प्रातरेव ॥ या
मेत्रयोर्द्दगामिन्यां प्रातरेवहि पारणेति वचनात् ॥ अत्र च कालभैरवपूजोक्ता चित्रस्थलीसेतौ ॥ कृत्वा च विविधां पूजां महासं 383
भारविस्तरैः ॥ नरो मार्गासिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत् ॥ ॥ तथा ॥ तीर्थकालोदके स्नात्वा कृत्वा तर्पणमत्वरः ॥ विलो
क्य कालराजानं निरयादुद्धरेत्पितॄनिति ॥ इयंच कार्त्तिकस्नानरागौरायां चाप्राभिप्रायेण ॥ मार्गशीर्षशुक्लपंचम्यां नागपूजो रत्न
क्ता हेमाद्रौ स्कान्दे ॥ शुक्ला मार्गशिरे पुण्याश्रावणे या च पंचमी ॥ स्नानदानैर्बहुफला नागलोकप्रदायिनीति ॥ इयं नागपूजायां षष्ठी ३८३
युतैव ग्राह्या ॥ पंचमी नागपूजायां कार्या षष्ठीसमन्विता ॥ तस्यां तु तुषिता नागा इतरा सचतुर्थिकेति मदनरत्ने वचनात् ॥ मार्गशीर्ष

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्लपक्षे चंपाषष्ठीति महाराष्ट्रेषु प्रसिद्धा ॥ सा चकुंजरयुता ग्राह्या ॥ परापुराणोरिति युग्मवाक्यात् ॥ पूर्वाह्णे दैवि कं कुर्यादिति वच
नादस्य चदेवकर्मत्वात् ॥ इयमेव योगविशेषेण चंपेत्युच्यते ॥ तदुक्तं ब्रह्मस्कपुराणे ॥ मत्स्यादिमाहात्म्ये ॥ मार्गे भाद्रपदे शुक्लाप
ष्ठी वैधृतिसंयुता ॥ रविवारेण संयुक्ता सा चंपेतीह कीर्त्तितेति ॥ विशाखा भौमयोगे तु सा चंपेतीह विश्रुतेति मदनरत्ने पाठ
मार्गशीर्षे मले पक्षे षष्ठ्यां वारे शुमालिनः ॥ शततारागते चेंद्रे लिंगस्याद्दक्षिणे गोचरमिति ॥ इयं योगवशेन पूर्वा परा वा कार्या
चंपाषष्ठी सप्तमीयुतेति दिवोदासः इयमेव स्कंदषष्ठी सा पूर्वयुक्ता ॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी ॥ एताः पूर्व
युताः कार्यास्तिथ्यंते पारणं भवेदिति ॥ भद्रके ॥ परेह्णि रात्रावाद्ययामद्वये पारणासंभवेऽपीदं ॥ अन्यथोत्तरैवेति दिवोदास
अब्दपर्यंतं षष्ठीषु सेनानीर्विदारक स्कंद महासेन महाबलः ॥ रुद्रोमाग्निज षड्वक्त्र गंगागर्भ नमोस्तु ते ॥ इति राजतं स्कंदं सं
पूज्य विप्राय दद्यादिति दिवोदासः ॥ मार्गशीर्षशुक्लचतुर्दशी पिशाचमोचनतीर्थे श्राद्धं त्रिस्थलीसेतौ भट्टैरुक्तं ॥ तस्य प्राप्त
पैशाच्यत्वपि त्राणहेतुकत्वे पार्वणत्वादपराह्णव्यापिनी ग्राह्या ॥ अज्ञाननाम पिशाचाद्युद्देशत्वे त्वेकोद्दिष्टत्वान्मध्याह्न
व्यापिनीति ॥ कुलधर्मत्वादौ तूत्तरैव मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः ॥ ॥ तदुक्तं स्कांदे सह्याद्रिखंडे ॥ मार्गशीर्षे
तथा मासि दशमेह्नि सुनिर्मलं ॥ मृगशीर्षयुते पौर्णमास्यां तस्य च वासरे ॥ जनयामास देदीप्यमानं पुत्रमसतीशुभं ॥ तं विष्णु
मागतं ज्ञात्वा अत्रिर्नामाकरोत्स्वयं ॥ दत्तवान्स्वस्य पुत्रत्वाद्दत्तात्रेय इतीश्वरमिति ॥ इयं प्रदोषव्यापिनीति वृद्धाः ॥ मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रत्न ३८४

गपोर्णिमानंतराष्टमीअष्टकाः ॥ एवपौषादिमासत्रयेपि ॥ हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीश्वष्टका
एकस्यां वेत्याश्वलायनोक्तेः ॥ एकस्यामष्टम्यां वैकाकार्येति हरदत्तः ॥ कृष्णविंत्वेवमध्यकाप्रोष्ठपद्यष्टकाभूयः ॥ पि
तृलोके भविष्यतीति पाद्मवचनात् ॥ तत्पूर्वसप्तमीत्पूर्वेद्युस्तत्परनवमीचान्वष्टकाश्च श्राद्धसक्तंकालादर्शे ॥ मार्ग
शीर्षेच पौषेच माघे प्रोष्ठे च फाल्गुने ॥ कृष्णपक्षेतु पूर्वेद्युरान्वष्टक्यां तथाष्टका इति ॥ ॥यत्तुविष्णुः ॥ ॥अमा
वास्यास्तिस्रोष्टका इति ॥ ॥यच्चबौर्मे ॥ ॥अमावास्याष्टकास्तिस्रः पौषमासादिषुत्रिषिति ॥ तच्चतुर्थ्यामना
वश्यकत्वार्थं ॥ यां वाप्यन्यां चतुर्थीस्यात्तां वकुर्यात्प्रयत्नत इति ॥ ॥ वाङ्गुव्रीत्याध्ययनात् ॥ श्राद्धमेतेषुकु
र्वाणो नरकं प्रतिपद्यत इति विष्णूक्तेरितिशूलपाणिः ॥ शाखाभेदाद्व्यवस्थेति तत्त्वं वायुब्रह्माण्डयोः ॥ आद्याधूपै
:सदा कार्या मांसैरन्या सदा भवेत् ॥ शाकैः कार्या तृतीया स्यादेवं द्रव्यगतो विधिः ॥ ॥पौषादिक्रमः ॥ ॥अन्वष्ट 384
कानुप्रागेव निर्णीतं ॥ तत्राष्टम्यपराह्णव्यापिनी ग्राह्या ॥ अथाच्छादनपर्यंतं श्राद्धं पार्वणवद्वेदित्याश्वलाय
नकारिकोक्तेरपराह्णकालत्वाच्च पार्वणस्य पूर्वेद्युरन्वष्टकाश्राद्धयोरष्टम्यनुरोधेन निर्णयः ॥ ॥अ राम
तएव सत्त्वं ॥ ॥पूर्वेद्युः पितृभ्योदद्यात् ॥ जपेद्युरन्वष्टक्यामिति च ॥ अन्वष्टकामकालौ विश्वेदेवौ ॥ इष्टिश्रा ३८४

CC-0. In Public Domain. Digitization by eGangotri

देकृत् दक्षावष्टम्यां कामकालकाविति मात्स्यगीयशंखोक्तेः ॥ ॥अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तं मत्स्यविधा
ने ॥ षभिर्गुभिजपेन्मंत्रं शतवारं तु तद्दिने ॥ आन्वष्टक्यं यदा भूत्वं संपूर्णा याति सर्वथेति ॥ अथ शाक्तो वाश्वला
यन ॥ ॥अथश्वोभूतेष्टकाः पशुनास्थालीपाकेन वा नडहोय वसमाहरेदग्निना वा कक्षमुपोषेदेवामेष्टके
ति न त्वेवाष्टकः स्यादिति ॥ मार्गशीर्षादिषु मलमासे सति नचाष्टका न कार्या ॥ ॥तथा॥ काठकगृह्येपि
महालयाष्टकाश्राद्धोपाकर्मापि यत् ॥ स्पष्टमासविशेषाख्याविहितं वर्जयेन्मलइति ॥ मार्गादिरविवारेषु
काम्यं तु तस्मुक्तं हेमाद्रौ ॥ तत्र भक्ष्यारण्यकानि संग्रहे ॥ पञ्चत्रिंत्वं तुलस्याः त्रिपलमथ घृतं मार्गशीर्षादि भक्ष्यं त
ष्टीमां त्रिप्तिलानां त्रिपलदधि तथा दुग्धकं गोमयं च ॥ त्रिन्वं तोयाञ्जलीनां त्रिमरिचकमथो त्रिः फलाः सक्तवः
स्युर्गोमूत्रं शर्करा सद्गविरिति विधिना भानुवारे क्रमेण ॥ ॥श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ॥ कृतार
त्नावलिं तत्र गतो मार्गस्य निर्णयः ॥ ॥ धनुः क्रमणे पराः षोडशघटिकाः पुण्याः अन्यत्राग्रतः ॥ अत्रोत्सर्ज
ननिर्णयो वक्ष्योपाकर्मप्रसंगात्स्वागे वोक्तः ॥ ॥ कल्पतरौ भविष्ये ॥ ॥ पौषे मासि यदा देवि शुक्लाष्ट
म्या बुधो भवेत् ॥ तस्यां स्नानं जपो होमस्तर्पणं विप्रभोजनं ॥ मत्प्रीतये कृतं देवि शतसाहस्रिकं भवेत् ॥ अत्रैव

CC-0. In Public Domain. Digitization by eGangotri

रोहिण्यार्द्रायोगे तु राम तन्मत्वं न चैव ज्ञेयं ॥ पौषशुक्लैकादशी मन्वादिः ॥ सा चोक्ता प्राक् ॥ पौषपूर्णिमानं नराः सप्तम्यष्ट
मी नवम्योष्टकाख्याः प्राग्युक्ताः ॥ पौषामावास्यायामर्द्धोदयाख्यो योगविशेषः ॥ ॥ तदुक्तं मदनरत्ने ॥ महाभारते ॥ अमार्कपातश्र
वणैर्युक्ता चेत्पुष्यमाघयोः ॥ अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समम् इति ॥ पुष्यमाघयोर्मध्यवर्तिनी पौषपूर्णिमास्यन्तरामा
वास्येत्यर्थः ॥ इति भट्टाः ॥ पुष्यस्य माघस्य वेत्यर्थ उक्तो मदनरत्ने तन्न ॥ हेमाद्रिविरोधात् ॥ तच्चाहिमाघस्यैवोक्तेः ॥ ॥ तथा
दिव्येव योगः शस्तो यं न तु रात्रौ कदाचनेति हेमाद्रौ मदनरत्ने स्कान्दे ॥ माघामायां व्यतीपाते आदित्ये विष्णुदैवते ॥ अर्द्धोदयं त
दित्याऊः सहस्रार्कग्रहैः समं ॥ ॥ तत्रैव ॥ माघमासे कृष्णपक्षे पञ्चदश्यां रवेर्दिने ॥ वैष्णवे न तु ऋक्षे राम व्यतीपा
ते तु उदये भे ॥ द्रतकुर्यादिनमुत्रेन्नयः ॥ ॥ तत्रैव ॥ ॥ ब्रह्मविष्णुमहेशानां सौवर्णीय पलसंख्यया ॥ प्रतिमास्तु प्र
कर्त्तव्यास्तदर्द्धेन द्विजोत्तमः ॥ सार्द्धं शतत्रयं शंभोर्द्रोणान्तिलपर्वतं ॥ कर्त्तव्यो पर्वतौ विष्णुब्रह्मणोः पूर्व-सं
ख्यया ॥ शय्यात्रयं ततः कुर्यादुपस्करसमन्वितं ॥ तिलैर्होमं कृत्वा प्रतिमां दद्यादितिस्मृतं ॥ ॥ स्कान्दे ॥ अर्द्धो
दये तु संप्राप्ते सर्वं गंगासमं जलं ॥ शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंमिताः ॥ यत्किंचिद्दीयते दानं तद्दानं मेरु
सन्निभमिति ॥ ॥ अत्र यन्नविशेषो निर्णयामृते स्कान्दे ॥ चतुःषष्टिपलं मुख्यं अमंत्रं तत्र कारयेत् ॥ चत्वारिंशत्पलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चाथ पंचविंशतिरेव च ॥ ॥अन्नमंत्रेपात्रे॥ तच्चकोस्यमयमित्युक्तं ॥ तत्रैव ॥ एवं सुघटितं कार्यं कांस्यभाजनमुत्तममिति ॥
तथा ॥ निधाय पायसं तत्र पद्ममष्टदलं लिखेत् ॥ पद्मस्य कर्णिकायां तु कर्षमात्रे सुवर्णकं ॥ तदभावे तदर्द्धं वा तदर्द्धं वापि कारये
त् ॥ भूमौ तु तण्डुलैः शुद्धैः कृत्वाष्टदलमुत्तमं ॥ अन्नं तत्स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकं ॥ तेषां पूजा ततः कार्या श्वेतमाल्यैस्सु
शोभनैः ॥ वस्त्रादिभिरलंकृत्य ब्राह्मणाय निवेदयेत् ॥ ॥मंत्रस्तु॥ सुवर्णपायसामंत्रं यस्मादेतत्त्रयीमयं ॥ ॥आपत्सु तारकं य
स्मात्तत्गृहाण द्विजोत्तम ॥ ससमुद्रमेखलां पृथ्वीं सम्यग्दत्वा तु यत्फलं ॥ तत्फलं लभते मर्त्यः कृत्वेदं दानमुत्तममिति ॥ ॥श्रीम
हाराजगीर्वाणयुद्धविक्रमवर्मणा ॥ रत्नावली कृता तत्रगतः पौषविनिर्णयः ॥ अथ माघस्नानं ॥ तत्र विष्णुः ॥ तुलामकरमेषे
षु प्रातः स्नायी सदा भवेत् ॥ हविष्यं ब्रह्मचर्यं च माघस्नाने महाफलमिति सोरस्तासउक्तः ॥ एकादश्यां शुक्लपक्षे पौषमासे
समारभेत् ॥ द्वादश्यां पौर्णमास्यां वा शुक्लपक्षसमापनमिति पाद्मेपि ॥ पौषस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः ॥ मा
समात्रं निराहारस्त्रिकालं स्नानमाचरेत् ॥ त्रिकालमर्चयेद्विष्णुं त्यक्तभोगो जितेन्द्रियः ॥ माघस्यैकादशीं शुक्लां यावद्विद्या
धरोत्तमेति ॥ त्रिकालस्नानमासोपवासविषयं ॥ निराहार इत्युक्तेः ॥ अत्राधिकारिणो भविष्ये ॥ ब्रह्मचारी गृहस्थो वा वानप्र
स्थोथ भिक्षुकः ॥ बालवृद्धयुवानश्च नरनारीनपुंसकाः ॥ स्नात्वा माघे शुभे तीर्थे प्राप्नुवंतीप्सितं फलं ॥ ॥पाद्मे॥ सर्वे
धिकारिणो ह्यत्र विष्णुभक्तो यथा नृप ॥ ब्राह्मे ॥ उष्णोदकेन वा स्नानमशक्तो सति कुर्वते ॥ दत्वेषु सर्वगात्रेषु उष्णोदं न र

CC-0. In Public Domain. Digitization by eGangotri

॥ स्ना
।१८५॥

विशिष्यते॥ ॥स्कांदे॥ पौषान्तुसमतीतायांयावद्दर्शनपूर्णिमामाघमासस्यतावद्धिपूजाविष्णोर्विधीयते॥ पितॄणांदे
वतानांचमूलकंनैवदापयेत्॥ ब्राह्मणोमूलकंभुक्त्वाचरेच्चान्द्रायणव्रतं॥ अन्यथायातिनरकंक्षत्रविट्शूद्रएववा॥ वर्जनीयं
प्रयत्नेनमूलकंमदिरोपमं॥ यदातुमाघमलमासोभवतितदाकाम्यानांतत्रसमाप्तिनिषेधान्मासद्वयंस्नानंतत्तन्नियमाश्च
कर्तव्याः॥ मासोपवासचान्द्रायणादितुमलमासएवसमापयेत्॥ ॥तदुक्तंदीपिकायां॥ नियतत्रिंशद्दिनत्वाद्धिमेमास्यो
रम्यसमापयेत्मलिनेमासोपवासव्रतमिति॥ स्नानारंभेचमंत्रोविष्णुनोक्तः तत्रचोत्थायनियमेगृह्णीयाद्विधिपूर्वकम्
॥माघमासमिमंपूर्णंस्नास्येऽहंदेवमाधव॥ तीर्थस्यास्यजलेनित्यमितिसंकल्पचेतसीति॥ प्रत्यहंमंत्रश्चपाद्मे॥ दुःखदारि
द्र्यनाशायश्रीविष्णोस्तोषणायच। प्रातःस्नानंकरोम्यद्यमाघेपापविनाशनं॥ मकरस्थेरवौमाघेगोविंदाच्युतमाधव॥ स्ना
नेनानेनमेदेवयथोक्तफलदोभव॥ इमंमंत्रंसमुच्चार्यस्नायान्मौनसमन्वितइति प्रत्यहंसूर्य्यार्घ्यमंत्रश्चपाद्मे॥ सवि
त्रेप्रसवित्रेचपरंधामजलेमम॥ त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधेति॥ स्नानकालश्चसूर्योदयः॥ मकरस्थेरवौयाहि
नस्नात्यभ्युदितेरवाविति॥ माघमासेरटन्त्यापःकिंचिदभ्युदितेरवावितिवचनात्॥ संप्राप्तेमाघमासेतुतपस्विजनवल्लभे
॥क्रोशन्तिसर्वेचारिणीसमुत्तिष्ठतिभास्करे॥ उत्तमःसर्वपापानांत्रिविधानांनसंशयइति॥ ॥नारदीयोक्तेः॥ योमाघमा
स्युषसिसूर्यकरामितप्तेस्नानंसमाचरतिचारुनदीप्रवाहे॥ उद्धृत्यसप्तपुरुषान्पितृमातृवंश्यान्स्वर्गंप्रयात्यमरदेहधरोनरोसौ

386

॥ राम ॥
॥ १८५ ॥

CC-0. In Public Domain. Digitization by eGangotri

इतिभविष्योत्तरवचनाच्च॥ आसेत्वरुणोदयेऽत्र॥ अरुणोदयेतुसंप्राप्तेस्नानकालेविचक्षणाः॥ माघवंधिप्तुगंध्यायतनयःस्नातिसु
रपूजितइति॥ ॥तथा॥ अरुणोदयमारभ्यप्रातःकालावधिप्रभो॥ माघस्नानवतांपुरायंक्रमात्तत्रावधारणा॥ उक्तमेतुसनक्षत्रेलु
प्ततारेतुमध्यमे॥ सवितर्युदितेभूपततोहीनंप्रकीर्तितमिति॥ तेनात्रशक्त्यपेक्षयाव्यवस्थाइदंचस्नानंप्रयोगेतिप्रशस्तं॥ काशाः
शनगुणाःप्रोक्तागंगायमुनसंगमे॥ सहस्रगुणितासापिभवेत्पश्चिमवाहिनी॥ पश्चिमाभिमुखीगंगाकालिंद्यासहसंगता॥ हंर
तिकल्पकृतंपापंसामाघेनपदुर्लभेत्यादिपाद्मादिवचोभ्यः॥ ॥ब्राह्मेयत्रकुत्रापिवामाघयागस्मरणान्वितः॥ करोतिमज्जनंतीर्थेस
लभेद्गंगासज्जनं॥ तथासमुद्रेप्यतिप्रशस्तं॥ तदुक्तं॥ प्रभासखंडे॥ माघेमासिचयास्नायान्नरस्तर्येणमावतः॥ पौण्डरीकफलंत
स्यदिवसेदिवसेभवेत्॥ माघस्नानंनित्यकाम्यंमासपर्यंतंस्नामासंभवेत्तुत्र्यहमेकाहंवास्नायात्॥ महामाघींपुरस्कृत्यसस्नौतत्र
दिनत्रयमितिलिंगात्॥ अस्मिन्प्रयोगेत्वशक्तोपिस्नायादपिदिनत्रयम्॥ प्रयागेमाघमासेतुत्र्यहंस्नातस्ययत्फलं॥ नाश्वमेधस
हस्रस्यतत्फलंलभतेभुवीत्यादिवचनात्॥ अत्रमकरसंक्रमरथसप्तमीमाघीतित्र्यहमित्येके॥ माघशुक्लदशम्यादीत्यन्ये॥ मरु
राद्यत्र्यहमित्यपरे॥ माघस्याद्यत्र्यहमितिकेचित्त्रयोदश्यादितिबहवः॥ महामाघींपुरस्कृत्यसस्नौतत्रदिनत्रयमिति॥ ॥पाद्मो
क्तेः॥ एतत्स्यार्थवाहत्वाद्यत्किंचिद्दिनत्रयमितिमद्याः॥ तत्त्वसंदिग्धेषुवाक्यशेषादितिन्यायात्त्रयोदश्याद्येवेति॥ ॥प्रयोगं
विनापिपामे॥ अस्मिन्प्रयोगेत्वशक्तोपिस्नायादपिदिनत्रयं॥ ॥माघस्नानेनियमास्तुनारदीये॥ नवह्निंसेवयेत्स्नातो

CC-0. In Public Domain. Digitization by eGangotri

ला
३८७

यस्नानो पिबरानने ॥ होमार्थे सेवयेद्वह्निं शीतार्थे न कदाचन ॥ अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ॥ त्रिभागस्तु तिलानां
हि चतुर्थः शर्करान्वितः ॥ अनभ्यंगी वरारोहे सर्वमासं नयेद्व्रती ॥ ॥ तथा ॥ अवाहतशरीरस्तु यः कष्टं स्नानमाचरेत् ॥ पदे
पदेश्वमेधस्य फलं प्राप्नोति मानवः ॥ तथा ॥ शंखचक्रधरं देवं माधवं नाम पूजयेत् ॥ वह्निं कृत्वा विधानेन नतनस्त्वेकाशनो भवे
त् ॥ भूशय्या ब्रह्मचर्येण शक्तः स्नानं समाचरेत् ॥ अशक्तो ब्रह्मचर्यादेः स्वेच्छा सर्वत्र कथ्यते ॥ तिलस्नायी तिलोद्वर्ती तिल
होमी तिलोदकी ॥ तिलभुक् तिलदाता च षट्तिलाः पापनाशना इति ॥ ॥ तथा ॥ प्रयागात्स्नं भवेत्काश्यां दशाश्वमेधोत्तरस्य
प्रयागतीर्थे स्नानमुक्तं काशीखण्डे ॥ कार्त्तिक्यां च प्रयागे ये मघसि स्नांति मानवाः ॥ दशाश्वमेधजनितं फलं तेषां भवेद्ध्रुवमि
ति ॥ स्नानोत्तरं मदनपारिजाते विष्णुः ॥ कार्त्तिमो मासि मसुत्सृज्य पूजयेत्पुरुषोत्तमं ॥ अवश्यमेव कर्त्तव्यं माघस्नानमिति २
कृतिः ॥ भविष्योत्तरे तिलमामलकाश्चैव तीर्थे देयास्तु नित्यशः ॥ ततः प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनः ॥ एवं स्नानावसाने तु
भोज्यं देयमवारितं ॥ भोजयेद्द्विजदांपत्यं भूषयेद्वस्त्रभूषणैः ॥ कंबलाजिनरत्नानि वासांसि विविधानि च ॥ चोलकानि ॥ राम ॥
च देयानि प्रच्छादनपटांस्तथा ॥ उपानहौ तथा गुप्तमोचकौ पापमोचकौ ॥ अनेन विधिना दद्यान्माधवः प्रीयतामिति ॥ ॥ ३८७ ॥
पाद्मे ॥ भूमौ शयीत न होतव्यमाज्यं तिलसमन्वितं ॥ अन्नं चैव तथा शक्त्या देयं माघे नराधिप ॥ सुवर्णरक्तिकामात्रं दद्याद्दिवे दिवि
देन था ॥ ॥ माघांते नु विप्रार्त्तानारन्तिथे ॥ त्रिंशत्तु मोदका देयाः ॥ शर्करातिलसंयुता इति ॥ अथैकादशीविधाने व्रतस्यो

387

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

याप्यनंतथेत्तिपाद्मवचनात्पूर्वेह्नि उपवासपूजनादिकृत्वापरेह्नितिलचर्वात्तैरष्टोत्तरशतंहोमंकृत्वासविवेचेतिपूर्वो
क्तमंत्रमुक्त्वा ॥ दिवाकरजगन्नाथप्रभाकरनमोस्तुते ॥ परिपूर्णंकुरुष्वेहमाघस्नानमुषः ॥ पत्नेष्टिनिक्षमापक्षेदिति ॥ मक
रसंक्रांतौहेमाद्रिमतेपरतश्चत्वारिंशद्घटिकाः पुण्याः ॥ त्रिंशत्कर्कटकेनाद्यामकरेतुदशाधिकाः ॥ इतिवसिष्ठवचनात् ॥ माध
वमतेतुविंशतिः ॥ त्रिंशत्कर्कटकेपूर्वामकरेविंशतिःपरेतिवृद्धवशिष्ठोक्तेः ॥ यदातुसूर्योस्तात्पूर्वंसंक्रांतिर्भवतितदाभयम
तेपूर्वमेवपुण्यकालः रात्रौतुप्रदोषेनिशीथेमकरसंक्रमेसाधवमतेद्वितीयदिनस्यैवपुण्यं ॥ पश्चस्तमयवेलायांमकरंयाति
भास्करः ॥ प्रदोषेवार्द्धरात्रेवास्नानंदानंपरेहनीतिवृद्धगार्ग्यवचनात् अस्तमयःप्रदोषःप्रदोषेपूर्वरात्रेःकार्मुकंतुपरित्यज्यझ
षसंक्रमतेरविः ॥ प्रदोषेवार्द्धरात्रेवा ॥ तत्रभोगःपरेहनीति ॥ यत्तुहेमाद्रिणाद्योवाशब्दोयथार्थोद्वितीयस्तथार्थेयथाप्रदो
षेपूर्वेद्युस्तथार्द्धरात्रेपरेह्न्युक्तं ॥ तेनपरेह्निपुण्यंप्रदोषइतिदिनद्वयेपुण्यनिरासार्थमर्द्धरात्रग्रहणंहेमाद्रिस्मृत्यर
र्थसारानंतभट्टादिमतेतुनिशीथात्पूर्वंपश्चाद्वासंक्रांतौपूर्वदिनेवापुण्यं ॥ धनुर्मीनावतिकुम्भकन्याचमिथुनेतथा ॥
पूर्वापरविभागेनरात्रौसंक्रमणंयदा ॥ दिनांतेपंचनाड्यस्तुतदापुण्यतमाःस्मृताः ॥ उदयेपितथापंचदैवेपित्र्येचकर्मणी
तिस्कांदवचनात् ॥ पूर्वापरविभागेनेतिमकरकर्कटभिन्नविषयं ॥ पूर्वोक्तविरोधाद्वचोदितिमदनरत्नेउक्तं ॥ षडशीति
मुखेतीतेअतीतेचोत्तरायणे ॥ इत्यादिविरोधाच्चेति ॥ नपूर्ववाक्यस्तथायमर्थः ॥ रात्रौपूर्वभागेमकरसंक्रमेपरेहन्युदये

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥ ॥३८८॥ पंचनाड्यः पुण्याः॥ रात्र्यर्द्धपरभागे कर्कटसंक्रमे पूर्वदिनांते पंचनाड्य इत्येवं सर्वेषामविरोधमकरे सामान्येन परदिने पुण्य
त्वे पुण्यानीत्ययथार्थमिदं॥ यत्तु देवलपक्षपार्श्वौ॥ आसन्ने संक्रमे पुण्यं दिनार्द्धं स्नानदानयोः॥ रात्रौ संक्रमणे भानोर्विषुवत्य
यने दिवेति॥ ॥अन्नमापव॥ अयने दिवा जाते न दर्द्ध पुण्यं कर्के पूर्वं मकरे त्वं॥ एतन्मध्यं दिनायनपरमिति॥ हेमाद्रिस्तु रात्रौ
विषुवत्यासन्नदिनार्द्धं पुण्यमयने त्वासन्नं दिनं पुण्यं दिने इति पाठं उभयत्र दिनार्द्धं पुण्यमित्याह एतद्देवोक्तं दीपिकायां॥ ॥अ
थायनमथः पश्चात्रिंशी थाश्च वेत्॥ यथासन्नमहः स्नर्द्धमथवा पुण्यमिति॥ तत्वं तु आसन्नसंक्रममित्यस्य विषुवत्येवान्वयः
॥अयने रात्रौ सति दिने पुण्यं॥ कस्मिन्नित्यपेक्षायां कर्के पूर्वोह्नि मकरे परे ह्नीनि वाक्यान्तरवशाद्यथउचमानेन कोपि विरोऽ
धः॥ यत्वनन्तमट॥ ॥अथ त्रिंशी थात्प्राग्यवनमवेत्॥ अयनं विषुवं तत्र प्राग्दिनांतिमनाडिका॥ पंच पुण्यतमाः पश्चात्रिंशी
थार्द्धाद्भवेत्तथा॥ आद्याः परदिनस्यापि तत्वदित्येष निर्णय इति॥ अपरार्केप्येवं॥ अस्तंगते यदा सूर्ये ह्रुषं याति दिवाकरः॥ प्रदोषे
चार्द्धरात्रे वा तत्र पुण्यं दिनद्वयमिति बोधायनवचनात्॥ दिनद्वयं वा पुण्यकालः॥ तदा पुण्यं दिनद्वयमिति बोधायनवच ॥राम॥
नात्॥ दिनद्वयं वा पुण्यकाल॥ तदा पुण्यं दिनांतरमिति मदनरत्ने पाठः॥ गुर्जरप्राच्योदिच्यास्त्विदमेवाद्रियंते॥ अत्रा ॥३८८॥
पिपूर्ववद्व्यवस्थेयं॥ तिथितत्वादिगौडग्रंथास्तु प्रदोषार्द्धरात्रभिन्ने रात्रेः पूर्वभागे पूर्वदिने परभागे च परदिने पुण्यमन्य
संक्रांतिवत्तद्विशेष्य तयोर्निर्देशात्॥ प्रदोषप्रदोषो स्तमयाद्दर्द्धघटिकाद्वयमिष्यते॥ इति वत्सोक्तस्त्याज्य॥ तत्र॥ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्नंगतंइतित्रितयंवैपर्थ्यायने॥ अतःप्रदोषपदेनाह्निनैवरात्रिरुच्यतेअतएवयावन्तोदयन्तेरविरितितिलकगार्ग्यादिभिर्दक्षि
णायनेसर्वरात्रौसंक्रमेपूर्वदिनेमुक्तं॥ वत्सोक्तिरप्यध्ययनादिपरा॥ इत्युभिमुहूर्त्तेप्यपदोषः॥ ॥मकरेदानविशेषोहेमा
द्रौ॥ धेनुंतिलमयींराजन्दद्याद्यस्तूत्तरायणे॥ सर्वान्कामानवाप्नोतिविन्दतेपरमंसुखं॥ ॥विष्णुधर्मेपि॥ उत्तरेत्वयनेविप्रा
वस्त्रदानंमहाफलं॥ तिलपूर्णमनड्वाहंदत्वारोगैःप्रमुच्यतेःइति॥ ॥शिवरहस्येपि॥ तस्यांकृष्णतिलैःस्नानंकार्यंचोद्धर्त्त
नंशुभैः॥ तिलादेयाश्चविप्रेभ्यःसर्वदेवोत्तरायणे॥ तिलतैलेनदीपाश्चदेयाःशिवगृहेशुभाः॥ ॥कल्पतरौकालिकापुरा
णे॥ होमंतिलैःप्रकुर्वीतसर्वदेवोत्तरायणे॥ नान्योदेवायविप्रेभ्योहाटकेनसमंददेत् उत्तरायणमासाद्यनरःकस्मात्स
शोचतितथामकरेरात्रावपिस्नानादिभवतीत्युक्तेप्राक्॥ माघामावास्यायोगविशेषोर्द्धोदयःप्रागेवोक्तः॥ माघकृष्णच
चतुर्दश्यांयमतर्पणमुक्तंहेमाद्रौयमेन॥ उत्तरकाभ्युदितेकालेमाघकृष्णचतुर्दशी॥ स्नानःसंतर्प्यनुयमंसर्वपापैःप्रमुच्य
तेइति॥ माघशुक्लचतुर्थ्यांतुनक्तव्रतपरायणः॥ यत्वाढुण्ढिंचर्चयिष्यन्तितिर्च्यांस्पुरस्सुरडुहामितिकाशीखण्डोक्तं॥ मा
घशुक्लचतुर्थ्यांतुनक्ताहारउपोषितः॥ अर्चयित्वातुयोविघ्नंजागरंतत्रकारयेत्॥ इतिलैङ्गाच्च॥ इयमेवकुण्डचतुर्थी
॥साप्रदोषव्यापिनीग्राह्या॥ माघमासेचतुर्थ्यांतुकुंदपुष्पैः॥ सदाशिवं॥ संपूज्ययोहितन्क्राशीसप्राप्नोतिश्रियंनरःइति
कौर्मोक्तेः॥ माघशुक्लपंचमीश्रीपंचमी॥ ॥तदुक्तंहेमाद्रौवाराहे॥ माघशुक्लचतुर्थींतुवरमाराध्यचश्रियं॥ पंचम्यां

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥
॥३८९॥

कुंदकुसुमैः पूजां कुर्यात्सम्यक्दये ॥ इयं माधवमते पूर्वाह्ने माध्याह्नमते परा ॥ चैत्रशुक्लश्रीपंचमी तिथि दिवोदासः ॥ ॥अत्र
कलशविधिः ॥ तत्रादौ यजमानः कृतनित्यकृत्य उपलिप्ते वितानादिशोभिते गृहे गणेशं पंचगव्यात्मकं उपस्थ ईशानदिग्
विभागे कलशमेकं स्थापयेत् ॥ ॥तत्प्रकारस्तु॥ भूरसीति भूसंस्करणं धान्यमसीति धान्यं संस्थाप्य आजिघ्र कलशमिति अव
णा कलशं स्थापयेत् ॥ वरुणस्योत्तंभनमसीति निर्मलतीर्थजलादिना कलशं पूरयेत् ॥ ॐ अंषघारामिति गंधं क्षिपेत् ॥ ॐ याः
ओषधीः पूर्वा जाता इति मंत्रेण हरिद्रा १ वच २ कुष्ठ ३ मांसी ॥ ४ मुरा ५ शैलेय ॥ ६ चंदन ॥ ७ वचा ॥ ८ कर्चूर ॥ ९ मुस्ताख्या ॥ १० सर्वौषधीः
क्षिपेत् ॥ ॐ ओषधयः समितिय वान् ॥ ॐ काण्डात्काण्डादिति दूर्वा ॥ ॐ अश्वत्थे व इति मंत्रेण अश्वत्थो ॥ १ उदुम्बर ॥ २ प्लक्ष ॥ ३ चूत ॥
४ न्यग्रोधा ॥ ५ ॥ रत्नपंचपल्लवान् ॥ ॐ स्योना पृथिवीति गजस्थानाश्वस्थानवल्मीकसंगमह्रदगोष्ठराजद्वाःस्थ्यासमाहृताः सप्तमृदः फ
लिनीरिति फलानि परिवाजयन्तिः कविरिति सुवर्णरजतमुक्तालाजावर्त्तप्रवालसंज्ञानि पंचरत्नानि ॥ अभावे पंचरत्नानां हेम सर्वत्र यो
जयेदिति वचनात् हिरण्यगर्भ इति हिरण्यं वा ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः ॥ तं धीरासः कवय उन्न ॥राम॥
यन्ति स्वाध्यो मनसा देवयन्त इति वस्त्रयुग्मेन रक्तवस्त्रेण च वेष्टयेत् ॥ ॐ पूर्णादर्वीति धान्यपूर्णपात्रं कलशोपरि न्यसेत् ॥ तदुपरि ॐ ॥३८९॥
तत्त्वायामीति वरुणमावाह्य तत्रासनपाद्यार्घाचमनीयस्नानयज्ञोपवीतचंदनाक्षतपुष्पधूपदीपनैवेद्यदक्षिणादीनि वरुणाय
नम इति ॥ पूजयित्वा वरुणः सांगः सपरिवारः प्रीयतामिति प्रार्थयित्वा कलशाभिमंत्रणं ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा

389

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नदा ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ॥ मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः
स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रि
ता ॥ ॥ ततः कलशप्रार्थना ॥ देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं ॥ त्वत्तोये सर्वती
र्थानि देवाः सर्वे त्वयि स्थिताः ॥ त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ॥ आ
दित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ सान्नि
ध्यं कुरु देवेश प्रसन्नो भव सर्वदा इति कलशं प्रार्थयित्वा ततः अद्येत्यादि वसंतपंचम्यां करिष्यमाणरतिकामपूजानिर्विघ्नपरिस
माप्त्यर्थं गणपत्यादिदेवतापूजनमहं करिष्ये ॥ इति संकल्प्य कलशस्कंधप्रदेशे ॥ ॐ गणानां त्वेति गणपतिं ॥ अंबे अंबिके इति दुर्गां ॥
वायो ये ते इति वायुं ॥ उर्ध्वा अस्य त्याकाशं ॥ अश्विना भैषज्येत्यश्विनीकुमारौ ॥ एवं पंच लोकपालान् संपूज्य ॥ आकृष्णेनेत्यादि नव
ग्रहमंत्रैः सूर्यादिनवग्रहांश्च पूजयित्वा सानुशयं विसृज्य कलशस्याग्रभागे श्वेतवस्त्रे लिखिताष्टदले पीठिकोपरि क्रमेणेन्द्रा
दिदिक्पालान् स्वस्वमंत्रैः पूजयेत् ॥ तन्मंत्राश्च क्रमेण पूर्वाद्यष्टदले त्रातारमिन्द्रमिति पूर्वे इन्द्रं ॥ अग्निं दूतमित्याग्नेये ॥ यमाय
त्वेति दक्षिणे ॥ असुन्वंतमयजमानमिति नैरृत्ये ॥ तत्त्वायामीति वारुणे ॥ वायो ये ते इति वायव्ये ॥ सोमो धेनुमिति उत्तरे वयं सो
मेति ईशान्यां ॥ एतान् पंचोपचारेण पूजयित्वा ॥ ततोष्टदलमध्ये रतिकामौ पूजयेत् ॥ ॐ क्लीं रतिकामौ इहागच्छतमिह तिष्ठतमि

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥ तिस्थापयित्वा॥ ॥आसनपाद्यं॥ अर्घ्यं आचमनीयं॥ स्नानं॥ पंचामृतमंत्रैः पंचामृतस्नानं॥ गंगाजलस्नानं॥ यज्ञोप
॥३९०॥ वीतं पुनराचमनीयं॥ चंदनं॥ अक्षताः पुष्पाणिः धूपः दीपः नानाविधफलपक्वान्नादिनैवेद्यं॥ पुनराचमनीयं॥ तांबूलं
॥पूगीफलं॥ नारिकेरफलं॥ नानाविधसुगंधितैलागुरुकर्पूरश्रीखंडपट्टवासपलाशपुष्परक्तकरवीरादीनि॥ चामर
राद्दर्शादिनी॥ ॐ क्लीं रतिकामाभ्यां नमः॥ दक्षिणांपुष्पांजलिं॥ ॐ क्लीं रतिकामाभ्यां नमः॥ इति पूजयित्वासाष्टांगं प्र
णम्यतो सानुनयं विसृज्य ब्राह्मणान्संपूजयित्वा॥ स्वपूजानिवर्त्य ब्राह्मणमुखाद्दसंतादिरागं श्रुणयात्॥ ततो न्यब्राह्म
णाशीर्वादं श्लोकादीन् श्रुत्वा रतिकामौ विसृज्य कलशोदके नामपल्लवेन ब्राह्मणैरभिषिक्तो यजमानो भूयसीं दक्षि
णां दद्यात्॥ ॥तत्र वाक्यं॥ ॐ अद्येत्यादि देशकालौ संकीर्त्य इंद्रादि दिग्पालाचरणसहित रतिकामपूजासांगता
सिद्ध्यर्थं दक्षिणां यद्द्रव्यं तद्दैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे इति दक्षिणां
दद्यात्॥ इति वसंतपंचमी॥ ॥माघशुक्लसप्तमी रथसप्तमी॥ सा अरुणोदयव्यापिनी ग्राह्या॥ सूर्यग्रहणतुल्या
तु शुक्ला माघस्य सप्तमी॥ अरुणोदयवेलायां तस्यास्नानं महाफलमिति॥ चंद्रिकायां विष्णुवचनात्॥ अरुणोद ॥राम॥
यवेलायां शुक्ला माघस्य सप्तमी॥ प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समेति वचनाच्च॥ ॥यत्तु दिवोदासीये अ ॥३९०॥
चलासप्तमी दुर्गा शिवरात्रिर्महाभर॥ द्वादशी वत्सपूजायां सुखदा प्राग्युता मदेति षष्ठीयुतत्वमुक्तं॥ ॥तद्यथा॥ पूर्वे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्रिघटिकाद्वयंषष्ठीसप्तमीचपरेयुः क्षयपक्षयादरुणोदयात्पूर्वंसमाप्यतेतत्परंज्ञेयं॥ तत्रषष्ठ्यांसप्तमीक्षयंप्रवेष्टुंपारुणोद
यस्नानंकार्यं॥ ॥मदनरत्नेभविष्योत्तरे॥ माघेमासिसितेपक्षेसप्तमीकोटिभास्करा॥ कुर्यात्स्नानार्घ्यदानाभ्यामायुरा
रोग्यसंपदः॥ अत्रविधिर्हेमाद्रौभविष्ये॥ कृत्वापष्ठ्यामेकभक्तंसप्तम्यांनिश्चलंजलं॥ राज्यंतेचालयेथास्वंदत्त्वाशिरसि
दीपकं॥ तथाजलंचकम्पा॥ नकेनचाल्यतेयावत्तावत्स्नानंसमाचरेत्॥ सौवर्णराजतेपात्रेभक्त्यालाबुमयेतथा॥ तैलेन
वर्तिदोतव्यामहारजनरंजिता॥ समाहितमनाभूत्वादत्त्वाशिरसिदीपकं॥ भास्करंहृदयेध्यात्वाइमंमंत्रमुदीरयेत्॥ नमः
स्तेरुद्ररूपायरसानांपतयेनमः॥ वरुणायनमस्तेस्तुहरिवासनमोस्तुते॥ जलेपरिहरेद्दीपंध्यात्वासंतर्पदेवताः॥ चंद
नेनलिखेत्पद्ममष्टपत्रंसकर्णिकं॥ मध्येशिवंसपत्नीकंप्रणवेनचसंयुतं॥ पूर्वादिदलेषुरविभानुविवस्वद्भास्करसवि
त्रर्कसहस्रकिरणसर्वात्मकान्संपूज्यगृहंगच्छेत्॥ स्नानमंत्राश्चकाशीखंडे॥ यद्यज्जन्मकृतंपापंयच्चजन्मांतरार्जितं॥
॥मनोवाक्कायजंयच्चज्ञाताज्ञातंचयेपुनः॥ इतिसप्तविधंपापंस्नानान्मेसप्तसप्तिके॥ सप्तव्याधिसमायुक्तंहरमाकरि
सप्तमि॥ एतन्मंत्रत्रयंजप्त्वास्नात्वापादोदकेनरः॥ केशवादित्यमालोक्यक्षणान्निःकलुषोभवेत्॥ ॥दिवोदासीयेम
दनरत्ने च॥ इक्षुदण्डेनजलेचालयित्वासप्तार्कपत्राणिबदरीपत्राणिचशिरसिविधायपूर्वोक्तैर्मंत्रैः॥ स्नात्वातील
पिष्टमयापूपैर्हेमंसूर्यंसंपूज्यविप्रायदद्यात्॥ ॥अर्घ्यमंत्रोमदनरत्ने॥ सप्तसप्तिवहप्रीतसप्तलोकप्रदीपन॥ सप्त

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना॥
३९१

मीसहितोदेवग्रहराणांर्घ्यंदिवाकरः॥ तत॥ जननीसर्वलोकानांसप्तमीसप्तसप्तिके॥ सप्तव्याहृतिकेदेविनमस्तेसूर्य्यम
ण्डले॥ इतिप्रार्थयेत॥ सौरागमे॥ अर्कपत्रैः सवरदैर्दूर्वाक्षतसचंदनैः॥ अष्टांगविधिनार्घ्यंदद्यादित्यचतुष्टये॥ ॥
अत्रदानविशेषोमदनरत्नेभविष्ये॥ ताम्रपात्रेयथाशक्त्यासरामयेवाथभक्तिमान॥ स्थापयेत्तिलपिष्टंचसघृतंसगुडं
तथा॥ स्नानफलेनच॥ दुष्टदौर्भाग्यदुःखघ्नंमयादत्तंतुतालकं॥ तालकंकरणामरणमितितत्रैवोक्तं दीपयात्रमि-
तिहेमाद्रौ॥ तत्रैवभविष्योत्तरे॥ एवंविधंरथवरंरजवाजियुक्तंहेमंचहेमशतदीधि—तासमेतं॥ दद्याच्चमाघसित
सप्तमिवासरेयःसोसंगचक्रगतिरेवमहींभुनक्ति॥ इयंमन्वादिरपि॥ इयंशुक्लपक्षस्थत्वात्पौर्वाह्णिकीग्राह्या॥ यद
माघोमलमासोभवतितदामासद्वयमन्वादिश्राद्धंकुर्य्यात॥ मन्वादिकेतैर्थिकेचकुर्यान्मासद्वयेपिचेतिस्मृतिचं-
द्रिकोक्तेः॥ माघशुक्लाष्टमीभीष्माष्टमी॥ तदुक्तंहेमाद्रौपाद्मे॥ माघमासिसितेष्टम्यांसतिलंभीष्मतर्पणं॥ श्राद्धं
चयेनरः॥ कुर्युस्तेस्युसंततिभागिनइति॥ ॥भारतेपिशुक्लाष्टम्यांतुमाघस्यदद्याद्भीष्माययोजलिं॥ संवत्सरकृतंपा
पंतत्क्षणादेवनश्यती॥ निषवल्लनिर्वंधेस्मृति अष्टम्यांतुसितेपक्षेभीष्मायतुतिलोदकं॥ अदत्वाविधिवद्विप्राः सर्ववर्णा
द्विजातयः॥ सर्ववर्णैश्चैकैर्द्विजातयइतिसंवोधनं॥ तर्पणमंत्रस्तत्रैव॥ भीष्मःशांतनवोवीरःसत्यवादीजितेंद्रियः॥
आभिरद्भिरवाप्नोतुपुत्रपौत्रोचितांक्रियां॥ वैयाघ्रपद्यगोत्रायसांकृत्यप्रवरायच॥ अपुत्रायददाम्येतज्जलंभीष्‌

391
॥ राम॥
॥३९१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्मायवर्मणे ॥ वसूनामवतारायशंतनोरात्मजायच ॥ अर्घ्यंददामिभीष्माय आबालब्रह्मचारिणे इति ॥ एतच्चजीव
त्पितृकस्यापिभवति ॥ जीवत्पितापितृर्वीनत्तर्पणंयमभीष्मयोरितिपाद्मोक्तेः ॥ एतच्चापसव्येनकार्यमितिदिवो
दासीये ॥ अन्नश्राद्धकाम्यंतर्पणंतुनित्यं ॥ ब्राह्मणाःयाम्यश्चएवगणेदद्युर्भीष्मायतोजलं ॥ संवत्सरकृतंतेषांपुण्यंन
श्यतिसत्तमेति ॥ मदनरत्नेवचनात् ॥ माघशुक्लैकादशीभीमद्वादशी ॥ त्वयाकृतंमिदंवीरत्वन्नाम्नाभविष्यति ॥ सा
भीमद्वादशीप्रोक्तासर्वपापहराशुभेति ॥ ॥ हेमाद्रौपाद्मवचनात् ॥ इदंपूर्वयुताग्राह्यावाक्यात् माघीपूर्णिमत्परेतु
त्कंप्राक् ॥ ॥ तथाहेमाद्रौवाले ॥ मघास्थयोश्चजीवेन्द्वोर्महामाघीतिकथ्यते ॥ ॥ तत्रैवज्योतिषे ॥ मेषवृषेयदासौरिः
सिंहेचगुरुश्चंद्रमा ॥ भास्करःश्रवणर्क्षेचमहामाघीचसास्मृता ॥ ॥ तथाभविष्ये ॥ वैशाखिकार्त्तिकीमाघितिथय
योजीवपूजिताः ॥ स्नानकानविहीनास्तानतेयाःपाण्डुनन्दनतथा ॥ तिलपात्राणिदेयानिकंचुकाःकंबलास्तथेर
ति ॥ माघपूर्णिमानन्तराफाल्गुनकृष्णाष्टम्यांविशेषःकल्पतरौ ॥ फाल्गुनस्यचमासस्यकृष्णाष्टम्यांमहीपितेतु
पक्षस्य ॥ जातादाशरथेःपत्नीतस्मिन्नहनिजानकी ॥ उपोषितोरघुपतिःसमुद्रस्यतटेतदा ॥ रामपत्नीचसंपूज्या
सीताजनकनन्दिनी ॥ फाल्गुनकृष्णचतुर्दशिशिवरात्रिः ॥ साकेषुचिद्वचनेषुप्रदोषव्यापिनीग्राह्येत्युक्तं ॥ केषुचि
न्निशीथव्यापिनीतितत्राद्यामाधवीये ॥ त्रयोदश्यस्तगेसूर्येचतस्रष्वेवनाडिषु ॥ भूतविद्धातुयातत्रशिवराः

CC-0. In Public Domain. Digitization by eGangotri

॥रत्ना॥
॥३९२॥

त्रिव्रतं चरेत्॥ ॥स्मृत्यंतरेपि॥ प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी॥ रात्रौ जागरणं यस्मात्तस्मात्तां परितोष
यत्॥ अत्र प्रदोषो रात्रिः॥ उत्तरार्द्धे तस्या हेतुत्वोक्तेः कामिकेपि॥ आदित्यास्तमये काले अस्ति या चतुर्थी॥ तद्रात्रिः शिव
रात्रिः स्यात्सा भवेदुत्तमोत्तमेति॥ ॥द्वितीयापि॥ नारदसंहितायां॥ अर्द्धरात्रियुता यत्र माघकृष्णचतुर्दशी॥ शि
वरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति॥ ॥ईशानसंहितायां॥ माघकृष्णचतुर्दश्यामादिदेवो महानिशि॥ शिवं
लिंगात्तयोद्भूतः कोटिसूर्यसमप्रभः॥ तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः॥ अर्द्धरात्रादधश्चोर्द्ध्वं युक्ता यत्र
चतुर्दशी॥ तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती॥ नार्द्धरात्रादधश्चोर्द्ध्वं युक्ता यत्र चतुर्दशी॥ नैव तत्र व्रतं कुर्यादा॥
युरैश्वर्यहानितः॥ अर्द्धरात्रिश्च द्वितीययामान्त्यघटी यामाद्यघटीद्वयरूप इति माधवः वचनं तूक्तेर्णाक॥ एवंस
तिपूर्वेद्युरेवोभयव्याप्तौ पूर्वैव॥ तयोदशी यदा देवि दिनभुक्तिप्रमाणतः॥ जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दः
शीति स्कांदोक्तेः॥ दिनभुक्तिरस्तमये जयंती शिवरात्रिश्च कार्ये भद्राजयान्विते इति स्कांदाच्च॥ दिनद्वये निशीथव्या
प्तौ हेमाद्रिमते पूर्वा॥ अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत्॥ पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति पा
द्मवचनात्॥ ॥मदनरत्नेप्येवं॥ गौडा अप्येवमाहुः॥ निर्णयामृते तु सर्वापि शिवरात्रिः प्रदोषव्यापिन्येव॥ अर्द्धरात्र
वाक्यानि कैमुतिन्यायेन प्रदोषस्तावकानीत्युक्तं तन्न॥ अर्द्धरात्रस्य पूर्वकर्मकालत्वोक्तेः व्याप्यार्द्धरात्रं यस्यां तु वर्तते या

॥राम॥
॥३९२॥

392

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चतुर्दशी ॥ तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः ॥ नदर्द्धीषोन्विता भूत्वा सा कार्या व्रतिभिः सदेति ॥ मदने ईशानसंहितो
क्तेः ॥ पूर्वेद्युर्निशीथस्पर्शे परेद्युः प्रदोषस्पर्शे त्वेकैकव्याप्तौ तु पूर्वैव जयायोगस्य प्राशस्त्यात् ॥ ॥ तदुक्तं नागरखंडे ॥ माघफा
ल्गुनयोर्मध्ये असिता या चतुर्दशी ॥ अनंगेन समायुक्ता कर्त्तव्या सा नगतिथिरिति ॥ ॥ पाद्मेपि ॥ अर्द्धरात्रात्पुरस्ता
द्विजयायोगो यदा भवेत् ॥ पूर्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैरिति ॥ ॥ स्कांदेपि ॥ भवेद्यत्र त्रयोदश्यां भूतव्या
प्ता महानिशि ॥ शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति ॥ महतामपि पापानां दृष्ट्वा वै निष्कृतिः परा ॥ तदृष्ट्वा कुर्वतां
पुंसां कृष्णपक्षां तिथिं शिवां मिति ॥ स्कांदे दर्शयोगस्य निंदितत्वाच्च ॥ यदा चतुर्दशी पूर्वेद्युर्निशीथादर्वाक् प्रवृत्ता परेद्यु
रेकव्याप्तिमत्त्वात्परैव ॥ माघासिते भूतदिने हि राजन्नुपैति योगं यदि पंचदश्या ॥ जयाप्रयुक्तां न तु जातु कुर्याच्छिवस्य
रात्रिं प्रियकृच्छिवस्येति वचनात् ॥ एवं दिनद्वये प्रदोषव्याप्त्यभावे निशीथव्याप्तिसत्त्वात् ॥ पूर्वैव तेन दिनद्वये निशी
थव्याप्तौ प्रदोषव्याप्त्या निर्णयः ॥ दिनद्वये प्रदोषव्याप्तौ निशीथव्याप्त्या निर्णयः एकैकव्याप्तौ निशीथे न निर्णयः इ
ति ॥ इयं च रविभौमसोमवारेषु शिवयोगे चातिप्रशस्ता लिंगे ॥ फाल्गुनस्य चतुर्दश्यां कृष्णपक्षसमाहिताः ॥ कृत्ति
वासेश्वरलिंगं ये चर्चयंति निशि वै शुभं ॥ ते यांति परमं स्थानं सदाशिवमनामयं ॥ शिवरात्रिपारणे तु विरुद्धवाक्यानि
दृश्यंते ॥ ॥ स्कांदे ॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्री तथैव च ॥ पूर्वविद्धैव कर्त्तव्या तिथिमान्ते च पारणमिति ॥ ॥

तिथिमध्येपिपारणांस्कांदेउक्तं॥ उपोषणांचतुर्दश्यांचतुर्दश्यांतुपारणं॥ कृतैःसुकृतलक्षैश्चलभ्यतेवाथवानवा॥ ब्रह्माण्डोदर
मध्येतुयानितीर्थानिसंतिवै॥ संस्नातानिभवंतीहभूतायांपारणेकृते॥ तिथीनामेवसर्वासामुपवासव्रतादिषु॥ तिथ्यंतेपार
णंकुर्याद्विनाशिवचतुर्दशीमिति॥ तिथ्यंतेपारणंभवेदितिकल्पाष्टम्यादिविषयमेवनतुशिवरात्रिविषयं॥ तदुपादानंतुपूर्व
युतत्वमात्रकथनार्थं॥ तस्माद्विनाशिवचतुर्दशीमितिपर्युदस्तशिवरात्र्याःसर्वप्रकारेणतिथिमध्यमध्यस्थवस्त्वपारणेतिज्ञेयं॥ मू
ढंचव्रतसंयोगपृथक्कृत्यापेतनित्यंकाम्यंच॥ ॥तथाचमाधवीये॥ स्कांदे॥ परात्परतरंनास्तिशिवरात्रिःपरात्परं॥ नपूजयतिभ
क्त्येशंनित्यंभक्त्याप्रपूजयेन्निवीप्साश्रुतेः॥ अरोगोयदिवाप्युष्येत्क्षीयतेहिमवानपि॥ चलेत्स्येतेकदाचित्तैनिश्चलंहिशिवव्रत
मितिवचनाच्चनित्यता॥ ममभक्तस्तुयोदेविशिवरात्रिमुपोषकः गणानांत्वमक्षयंदिव्यमक्षयंशिवशासनं॥ सर्वान्भुक्त्वामहाभो
गांस्तेनमोक्षमवाप्नुयात्इतिस्कांदात्॥ द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकंतुवेति॥ तत्रैवेशानसंहितावचनात्काम्यतापि
चैव॥ शिवरात्रिव्रतंनामसर्वपापप्रणाशनं॥ आचांडालमनुष्याणांभुक्तिमुक्तिप्रदायकं॥ अत्रजागरोपवासपूजाः॥ समुदि
ताःव्रतंनतुप्रत्येकं॥ समुदितानांफलसंबंधात्॥ ॥यत्तु॥ अथवाशिवरात्रिंचपूजाजागरणेनयेत्॥ तथा॥ अखंडितव्रतोयो
हिशिवरात्रमुपोषयेत्॥ सर्वान्कामानवाप्नोतिशिवेनसहमोदते॥ कश्चित्पुण्यविशेषेणव्रतहीनोपियःपुमान्॥ जागरंकुरुते
तत्रसमुद्रसमतांव्रजेदित्यादिस्कांदे॥ तदनुकल्पत्वादशक्तपरं॥ माघेतरप्रतिमासशिवरात्रिस्तुशिवरात्रिशब्दस्यमाघकृष्णस्य

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दश्यामेव कृत्वा माघमासस्य शेषे या प्रथमा फाल्गुनस्य च ॥ कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्त्तितेति हेमाद्रौ वचनाच्च ॥ ॥
अस्यारम्भो हेमाद्रौ स्कान्दे ॥ आदौ मार्गशिरे मासि दीपोत्सवदिनेपि वा ॥ गृह्णीयान्माघमासे वा द्वादशैव प्रपोषयेत् ॥ एवं द्वादशवर्षे
प्रद्वादशैव नयोषनात् ॥ वरयेदिति शेषः ॥ चतुर्दश्यां वा विधानाचार्यं च कृत्वा ॥ कुंभोपरि न्यसेद्देवमुमया सहितं शिवं ॥ सौवर्णोप्यथ
वारौप्यहं समे संस्थितं शुभे ॥ इत्युक्त्वा हेमीं मूर्त्तिं संपूज्याचरं वरं वा लिंगं पंचामृतसहस्रस्नानपंचाशन्न दर्शान्यतरकुंभैः संस्नाप्य संपू
ज्य जागरं कृत्वा परेद्युः स्नात्वानन्त्रःस्वं श्यनवाहुत्वा विधेभ्योवस्त्राणि गाश्च द्वादश दत्वाचार्याय धेनुशय्यां च दत्वा विप्रान् भोजयेदिति
मदनरत्ने उक्तं ॥ ॥ अथ शिवरात्रिपूजाप्रयोगः ॥ अथामान्तमासेन माघकृष्णचतुर्दश्यां शिवरात्रिव्रतं ॥ न चार्द्धरात्रव्यापिन्यां
कार्यं ॥ ॥ तदुक्तं नारदीयसंहितायां ॥ अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी ॥ शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् ॥
ईशानसंहितायामपि ॥ माघकृष्णचतुर्दश्यामादिदेवो महानिशि ॥ शिवलिंगमभूत्तत्र कोटिसूर्यसमप्रभं ॥ तत्कालव्यापि
नी ग्राह्या शिवरात्रिव्रते तिथिरिति ॥ माघकृष्णत्वं चात्रामान्तमासपरत्वेन ॥ अत एव चतुर्दश्यां तु कृष्णायां फाल्गुने शिवपूजनं
॥ तामुपोष्य प्रयत्नेन विषयान्परिवर्जयेदिति स्मृत्यन्तरवचने पूर्णिमान्तमासोप्युक्तः ॥ महानिशा द्वे घटिके रात्रेर्मध्यमयामयोरिति देवलो
क्तेर्निशीथरूपैव ॥ एवं चार्द्धरात्रशब्दोपि तत्परस्तत्र दिनद्वये निशीथव्याप्तावव्याप्तौ वा परैव ॥ प्रदोषव्याप्तिलाभात् ॥ निशाद्व
ये चतुर्दश्यां पूर्वा त्याज्या परा शुभा ॥ आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी ॥ तद्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्तमोत्तमे

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्ना ॥
॥ ३९४ ॥

ति॥ त्रयोदशी यदा देवी दिनभुक्तिप्रमाणतः॥ जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशी॥ प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतु
र्दशी॥ रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत्॥ अहोरात्रिव्रतं यच्च एकमेव तिथौ गतं॥ तस्यान्तु भययोगिन्या माचरेत्तद
न्तं व्रती कामिकं॥ शिवरहस्यस्य त्वं तरादिवचनाच्च पूर्वदिने निशीथे परदिने प्रदोषे तदा पूर्वैव॥ अर्द्धरात्रात्पुरस्तात्त्वजयायोगो य
दा भवेत्॥ पूर्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैरिति पाद्मे जयायोगस्य विहितत्वात्॥ महतामपि पापानां दृष्टा वै निष्कृतिः परा॥ नर
ष्याकुर्वती पुंसां ऊरूयुक्तां तथा शिवामिति स्कांदे दर्शयोगस्य निन्दितत्वाच्च॥ यत्तु कालचक्रविवेचने त्वेर्दिनद्वये निशीथव्या
प्ताविव पूर्वविधायकान्युत्तरविद्धानिषेधकानि वचनानि सा च काश्यामीत्युक्ता पूर्वैव ग्राह्येत्युक्तं॥ तत्रसमंजसं॥ निशाद्वये च तु
र्दश्यां पूर्वा त्याज्या परा शुभेति माधवाद्युदाहृतकामिकवचनविरोधात्॥ न च पूर्वविधायकानामुत्तरविद्धानिषेधकानां विषयाला
भ इति शंक्यं॥ प्रदोषनिशीथयोर्विधेनिशीथग्राघताया उपोद्वलकत्वेन विषयलाभस्यानुपदमेवोक्तत्वात्॥ प्रदोषव्याप्तिलाभ
व्याप्तिलाभाच्च॥ माघासितेभूतदिनं हि राजन्नुपैति योगं यदि पंचदश्या॥ जयाप्रयुक्तां न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृच्छिव
स्येति हेमाद्रिमाधवाद्युदाहृतपुराणवचनादपि परैव॥ अस्मिंश्च व्रते उपवासजागरणपूजानां फलसंबंधात्त्रयमपि प्रधानं॥
स च नागरखंडे॥ उपवासप्रभावेन बलादपि च जागरात्॥ शिवरात्रिस्तथा तस्य लिंगस्यापि प्रपूजया॥ अक्षयान्लभते भोगा
च्छिवसायुज्यमाप्नुयात् इति॥ इदं च व्रतं संयोगपृथक्त्वन्यायेन नित्यं काम्यं च॥ परात्परतरं नास्ति शिवरात्रिपरात्परं॥ न पूज

॥ राम ॥
॥ ३९४ ॥

394

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यतिभक्त्येदं रुद्रं त्रिभुवनेश्वरं॥ जंतुर्जन्मसहस्रेषु भ्रमते नात्र संशय इति स्कांदे अकरणे प्रत्यवायश्रुतेर्नित्यं शिवं च पूजयित्वा यो
जागर्त्ति च चतुर्दशीं॥ मातुः पयोधररसं न पिबेत्स कदाचनेत्यादिनात्रैव च फलश्रुतेः काम्यमिति॥ विस्तरस्तु तातकृतसमय
मयूखे द्रष्टव्यः॥ पारणां चैतद्व्रते स्कांदे तिथिमध्ये नदंते चोक्तं॥ उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणं॥ कृतैः सुकृतलक्षैश्च
लभ्यते यदि वा न वा॥ ब्रह्मांडोदरमध्ये तु यानि तीर्थानि संति वै॥ संस्थितानि भवंतीह भूतायां पारणे कृते॥ तिथ्यंते पारणं
कुर्याद्विना शिवचतुर्दशीं तथा॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिस्तथैव च॥ एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेत्
इति॥ अनयोर्विरुद्धवचनयोर्व्यवस्थैवं माधवेनोक्ता॥ यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणेति वचनाद्यामत्रयमध्ये चतु
र्दशी॥ समाप्तौ तिथ्यंते तदुत्तरगामित्वे तु प्रातस्तिथिमध्य एवेति॥ नातत्त्वरणास्तु तिथिमध्यकालो मुख्यस्तदंशकालो गौ
णः उत्तरभावित्वादित्याहुः॥ केचित्तु॥ शक्तस्तिथ्यंते अशक्तस्तिथिमध्य एवेत्याहुः॥ न च कृतैः सुकृतलक्षैश्चेत्यादिस्तुतिर
नर्थिकेति वाच्यं॥ आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुता॥ अतः संतप्रशंसंति स्नानमुष्णेन वारिणेत्यादिवदशक्तं
प्रत्येव तिथिमध्यपारणायास्स्तावकत्वेन सार्थकादिति॥ परे तु तिथ्यंतपारणाविधानं न शिवरात्रिपरं किंतु यत्राष्ट
म्यादौ तिथ्यंतपारणाप्राप्तिरस्ति तत्परमेव॥ शिवरात्रिग्रहणं तु पूर्वविद्धाविधानार्थमिति॥ वस्तुतस्तु सा त्वस्तमयप
र्यंतव्यापिनी चेत्परेऽहनि॥ दिवैव पारणां कुर्यात्पारणे नैव दोषभाक्॥ इति शिवरात्रिप्रकरणपठितकालादर्शादि लिखि

॥रत्न॥
॥३९५॥

नवचनादित्तिथिसमाप्तौत्तिथ्यंत्यपरेहनि॥ दिवैवपारणांकुर्यान्पारणानैवदोषः॥ मागिनि शिवरात्रिप्रकरणपठितकालाद
र्शादिलिखितवचनादिच थिसमाप्तौत्तिथ्यंतेत्यथानन्मध्यस्वेति निर्णय॥ ॥अथव्रतविधि॥ मासपक्षाद्युल्लिख्यमम
पापक्षयार्थेअक्षयभोगमोक्षप्राप्त्यर्थंशिवरात्रिव्रतंकरिष्यइतिसंकल्पयोडशोपचारैः॥ शिवपूजांकुर्यात्॥ ॥तत्र
पूजा॥ आगच्छदेवदेवेशमर्त्यलोकहितेछया॥ पूजयामिविधानेनप्रसन्नःसुमुखोभव॥ ॥आवाहनं॥ पादासनंकु
रुष्वात्रनिर्मलंस्वर्णनिर्मितं॥ भूषितंविविधैरत्नैःकुरुत्वंपादुकासनं॥ ॥आसनं॥ गंगादिसर्वतीर्थेभ्योमयाप्र
प्रार्थनयाहृतं॥ तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां॥ ॥पाद्यं॥ गंधोदकेनपुष्पेनचंदनेनसुगंधिना॥ अर्घ्यंगृह
णदेवेशभक्तिंमेह्यचलांकुरु॥ ॥अर्घ्यं॥ मंदाकिन्याःसमानीतंहेमांभोरुहवासितं॥ स्नानायतेमयाभक्त्यानीतंस्वी
क्रीयतांविभो॥ ॥स्नानं॥ वस्त्रंसूक्ष्मंदुकूलंचदेवानामपिदुर्लभं॥ गृहाणत्वमुमाकांतप्रसन्नोभवसर्वदावस्त्रं॥
श्रीखंडंचंदनंदिव्यंमलयाचलसंभवं॥ विलेपनंसुरश्रेष्ठगृहाणपरमेश्वरं॥ गंधं॥ यज्ञोपवीतंसहजंब्रह्मणानिर्
मितंपुरा॥ आयुष्यंभववर्चस्वमुपवीतंगृहाणमे॥ ॥यज्ञोपवीतं॥ त्रिदलंत्रिगुणाकारंत्रिपत्रंचत्रयायुधं॥ त्रिज
न्मनिहरेत्पापंबिल्वपत्रंशिवार्पणं॥ ॥माल्यादीनिसुगंधीनि॥ वनस्पतिरसोधूपोगंधाढ्यःसुमनोहरः॥ आघ्रेयः
सर्वदेवानांधूपोयंप्रतिगृह्यतां॥ ॥धूप॥ आज्यंचवर्त्तिसंयुक्तंवह्निनायोजितंमया॥ दीपंगृहाणदेवेशत्रैलोक्य

३९५

॥राम॥
॥३९५॥

CC-0. In Public Domain. Digitization by eGangotri

तिमिरापह ॥ ॥दीप॥ नैवेद्यं गृह्यतां देव भक्तिर्मे ह्यचलां कुरु ॥ ईप्सितं मे वरं देहि नैवेद्यं प्रतिगृह्यतां ॥ ॥नैवेद्यं॥ पूगीफलं म
हद्दिव्यं नागवल्लीदलैर्युतं ॥ कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यतां ॥ इदं फलं मया दत्तं ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभाव
सो ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ पुष्पाञ्जलिं नीराजनं प्रदक्षिणा ॥ ॥अथ कथा॥ श्रूयतां धर्मसर्वस्व शि
वरात्रौ शिवार्चनं ॥ व्रतेयन विधानेन स्वस्वपुरोपनकर्मणा ॥ कृत्वा स्नानं प्रविभूत्वा धौतवस्त्रसमन्वितः ॥ स्थापयेद्देवदेवेशं
मध्ये विंदसमुद्भवैः ॥ ततः पूजा प्रकर्त्तव्या पूर्वोक्तविधिना ततः ॥ नमो जगत्प्रजगन्नाथ नमस्त्रिभुवनेश्वर ॥ पूजां गृहाण मद्दत्तां
महेश प्रथमे पदे ॥ ॥प्रथमप्रहरपूजा॥ पूर्वेनन्दिं महाकालो गणाम्भंगीच दक्षिणे ॥ वृषस्कन्दौ पश्चिमे च देशाकाले तथोत्त
रे ॥ गंगा च यमुना चैव पार्श्वे चैव व्यवस्थिते ॥ नमो व्यक्ताय सूक्ष्माय नमस्त्रिपुरान्तक ॥ पूजां गृहाण देवेश यथाशक्त्योप
पादितां द्वितीये ॥ बद्धोहं विविधैः पाशैः संसारभयबंधनैः पतितं मोहजाले मां त्वं समुद्धर शंकर ॥ ॥तृतीये॥ चतुर्थे आघवत
॥नमः शिवाय शान्ताय सर्वपापहराय च ॥ शिवरात्रौ मया दत्तं गृहाणार्घ्यं प्रसीद मे ॥ द्वितीये ॥ दुःखदारिद्र्यभावैश्च दग्धो
हं पार्वतीपते ॥ मां त्वं त्राहि महादेव गृहाणार्घ्यं नमोस्तु ते ॥ ॥तृतीये॥ किं न जानासि देवेश तावद्भक्तिं प्रयच्छ मे ॥ स्वपा
दाग्रतले देव दास्यं देहि जगत्पते ॥ ॥चतुर्थे॥ ॐ वैतिय वत्सरं का शिवस्य पूजां शुभ भक्त्यान्नु यथा कथंचित् ॥ स कृष्णपा
त्येव शिवस्य लोकं व्याधोपि पापात्तो शुद्धदीश मस्मात् ॥ इति पूजा ॥ ॥अथ कथा॥ सूत उवाच ॥ सकारणामशेषस्य जगतः

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥राम॥
॥२९८॥

सर्वदा शिव॥ गोब्राह्मणान्नृपांश्चैव शिवं भवतु सर्वदा॥ कैलासशिखरासीनं देवदेवं जगद्गुरुं। पंचवक्त्रं दशभुजं त्रिनेत्रं शूलपाणिनं॥
पिनाकशोभितकरं खड्गखेटकधारिणं॥ कपालखट्वांगधरं शशांककृतशेखरम्॥ कपालधारिणं भीमं वरदं चाभयप्रदं॥ भस्मांगव्याल
शोभाढ्यमस्थिमालाविभूषितं॥ नीलजीमूतसंकाशं सूर्यकोटिसमप्रभं॥ क्रीडंतं च शिवं तत्र गणैश्च परिवारितं॥ विश्वज्यदेवताः
सर्वास्तिष्ठंतं परमेश्वरं॥ तं दृष्ट्वा देवदेवेशं प्रहस्योत्फुल्ललोचना॥ पार्वती परिपप्रच्छ विनयावनता स्थिता॥ गौर्युवाच॥ भर्त्तारं विस्मयो
त्फुल्ललोचना पार्वत्युवाच॥ कथयस्व प्रसादेन यज्ञोप्यव्रतमुत्तमं॥ श्रुतास्त्वयोक्ता देवेश व्रतानां निर्णयाः शुभाः॥ तथा वै दानधर्मश्च
तीर्थधर्मास्त्वयोदिताः॥ नास्ति मे निश्चयो देव श्रांताहं च पुनः पुनः॥ तस्माद्वदस्व मे देव एकं निःसंशयं प्रभो॥ ॥ईश्वर उवाच॥ शृणु
देवि परं गुह्यं व्रतानामुत्तमं व्रतं॥ यन्न कस्यचिदाख्यातं रहस्यं भुक्तिदायकं॥ येनैव कथ्यमानेन यमो विलयतां व्रजेत्॥ तदहं कीर्त्तयि
ष्यामि शृणुष्वैकमना प्रिये॥ माघे तु कृष्णपक्षे तु अविद्यायां चतुर्दशी॥ शिवरात्रिस्तु सा ज्ञेया सर्वयज्ञोत्तमोत्तमा॥ दानैर्यज्ञैस्तपो
भिश्च व्रतैश्च विविधैरपि॥ न तीर्थैः स्नानैर्वै तु रापं यत्तु रापं शिवरात्रितः॥ शिवरात्रिसमं नास्ति व्रतानामुत्तमं व्रतं॥ अज्ञानाज्ज्ञानतो वा ॥राम॥
पि कृत्वा मोक्षमवाप्नुयात्॥ मृतास्ते निरयं त्यक्त्वा गतास्ते शिवसन्निधौ॥ सर्वमंगलशीला च सर्वामंगलनाशिनी॥ भुक्तिमुक्तिः ॥२९८॥
प्रदा वै षा सत्यं सत्यं वरानने॥ ॥देव्युवाच॥ कथं यमपुरं मार्गे त्यक्त्वा देवं व्रजेन्नरः॥ एतन्मे महदाश्चर्यं प्रत्यक्षं कुरु शंकर॥ शं
कर उवाच॥ शृणु देवि यथा वृत्तं कथं पौराणिकीं शुभां॥ यमशासनहंत्रीं च शिवशासनदायिकां॥ कश्चिदासीत् पुरा देवी निषाद

396

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वामयप्रिय॥ प्रत्यन्तदेशवासी च म्लेछराजसत्रकेतनं॥ सीमान्ते स सदा निष्ठेत्क्रुद्धं व परिपालक॥ तत्वापीनो धनुर्द्धारी श्यामाङ्गः कृ-
ष्णकञ्चुकः॥ बद्धगोधाङ्गुलित्राणाः सदैव मृगयारत॥ स एव विधो निषादो सो चतुर्दश्यां दिने शुभे॥ व्यवहारकैश्चद्व्यार्थ देवागारे प्रबं-
धितः॥ तेनापि देवतादृष्ट्वा जनानां वचनं श्रुतं॥ उपवासव्रतानां च शिवः शिव शिवेति च॥ दिनान्ते नैस्तदाक्रूरः प्रातर्द्रव्यं प्रदीयतां
ततो सौ धनुरादाय दक्षिणां नगतः स्वयं॥ आगच्छन्तवनोद्देशं जनतां संचकारस॥ शिवः शिव किमेतद्देवेति नगरे जनाः॥ वनेचरा
न्निरीक्ष्य तु चक्षुर्दिक्षु भ्रमस्तत॥ पदं च पदमार्गं च आश्रयेष्वकरान्मृगान्॥ इतश्चेतश्च धावन्स आमिषेलब्धमानस॥ वनं सपर्वतं
सर्वं भ्रमतस्तदिने गतं॥ संध्या प्रन्तेन ततो किंचिन्मृगश्च करमिति चिरं॥ निराशो लुब्धको जातो नदा प्रस्तंगतो रवि॥ चिन्तयित्वा जलो
पान्ते जागरं जीवघातनं॥ स विधास्याम्यहं रात्रौ निश्चितं मम जीवनं॥ गतो सौ जलसामीप्यं तीरस्थो जलमध्यत॥ शेटं तेकर्तुं मारेभे
आत्मनो गुप्तिकारणात्॥ जालिमध्ये महालिंगमस्ति स्वायंभुवं शुभं॥ विल्ववृक्षो महादिव्यो जालिमध्ये च संस्थितः॥ गृहीत्वा तस्य प
त्राणि मार्गे शुद्धयर्थं मक्षिपत॥ क्षिप्तानि दक्षिणे भागे पत्ताणि लिंगमूर्द्धनि॥ नदेवाभोजनं तस्य आमिषेलुब्धमानस॥ ततः क्षि-
न्तयमानस्य न निद्रासमजायत॥ विल्वजालिगतस्यास्य प्रथमप्रहरो गत॥ ततो जलार्थमायाता हरिणी गर्भसंयुता॥ यो
वनस्था सुरूपा च स्तनपीना सुशोभना॥ निरीक्षती दिशः सर्वा भयाभ्रमत्फुल्ललोचना॥ लुब्धकेनापि मा दृष्टा वाराणगोचरमागता॥ वा
णाश्च संधितस्तेन स्कन्दष्टेन चेतसा॥ चोटयित्वाथ पत्राणि प्रक्षिप्तानि शिवोपरि॥ शिवं देवं सदा ध्यायन् क्षीणे न परिपीडि

॥रत्न॥
॥३९८॥

तः॥ एतस्मिन्नंतरे दृष्टो हरिणा पालुब्धकस्तदा॥ लुब्धकस्य स्वरूपेणाकृतांतइव तिष्ठति॥ दृष्ट्वा तु तस्य संधानं यमदंष्ट्रासमप्र
भं॥ सामगीदिव्यया वाचा लुब्धकं वाक्यमब्रवीत्॥ स्थिरो भव महाव्याध सर्वजीवनिकृंतन॥ किमर्थं मां हनिष्यसि त्वं कथयस्व म
म प्रभो॥ ॥लुब्धक उवाच॥ कुटुंबं पीडितं मे यत् क्षुधया च मया सह वन्यं वै मम गृहे नास्ति तेन त्वां हन्मि शोभने॥ ॥मृग उवाच
॥ जातप्रजागरभावेन जागरो यो धृतोनघ॥ चतुर्थांशेन पापानां विमुक्तो लुब्धकस्तदा॥ लुब्धकस्ततो दृष्ट्वा मृगीं मानुषभाषि
णीं॥ आश्चर्यं परमं दृष्ट्वा किंचिद्धर्मसमन्वितः॥ ॥लुब्धक उवाच॥ मया हि पातिता जीवा उत्तमाधममध्यमाः॥ न श्रुता ईदृ
शी वाणी श्वापदानां कदाचन॥ कस्मिन्देशे त्वमुत्पन्ना कस्मात्स्थानादिहागता॥ कथयस्व प्रयत्नेन परं कौतूहलं हि मे॥ मृ
ग्युवाच॥ शृणु त्वं लुब्धकश्रेष्ठ कथयामि तवाखिलं॥ आसीत्पूर्वं महारम्या स्वर्गे शक्रस्य चाप्सराः॥ अनंतरूपलावण्या
सौभाग्येन विगर्विता॥ सौभाग्यमदभ्रष्टांगो दानवो बलगर्वितः॥ मयैव स्वीकृतो भर्त्ता हिरण्याक्षो महासुरः॥ तेन सार्द्धं मया भु
क्तं चिरकालं यथेप्सितं॥ अन्यस्मिन्दिवसे व्याध क्रीडंत्या मे सुरेण च॥ गतो व्रततिथिः कालो महादेवस्य कोपकृत्॥ वत्स्यहं
प्रेक्ष्य तेन त्वं शंकरस्यायतनं तदा॥ यावत्क्रुद्धाम्यहं तत्र तावन्मां शंकरोब्रवीत्॥ क्व गता त्वं वरारोहे केन वा संगता शुभे॥ किं
वा सौभाग्यगर्वेण नागतासि मम मंदिरं॥ तत्त्वं कथय शीघ्रं त्वं नो वा शापं ददामि ते॥ शापभीत्या मया तत्र हस्तयुक्तं शंकराग्र
तः॥ शृणु देव प्रवक्ष्यामि शापानुग्रहकारक॥ मम स्वामी भर्त्ता विध्वंसदानवेशो महाबलः॥ तेन सार्द्धं मया देव क्रीडितं

॥राम॥
॥३९८॥

निजमंदिरे ॥ तेनाहं नागतास्तीव्रं संतुष्टिसंहारकारक ॥ इत्युक्तवचनं श्रुत्वा सकोपो वाक्यमब्रवीत् ॥ मृगः कामातुरो नित्यं हि
रण्याक्षो भविष्यति ॥ त्वं मृगी तस्य भार्या वै भविष्यति न संशयः ॥ त्यक्त्वा स्वर्गं भवान्देवान् दानवं भोक्तुमिच्छसि ॥ द्वादशा
ब्दानि भो भद्रे भविनाशाय पल्वले ॥ परस्परस्य शोकेन शापान्तोपि भविष्यति ॥ अनुग्रहः कृतस्तेषां शंकरेण कृतः स्वयं ॥ कदा
चिद्दिव्याधवरो मम सान्निध्यमाश्रितः ॥ यथार्थं तस्य संभाषणात्पूर्वजन्म स्मरिष्यसि ॥ अनंतुर्द्धं नदारूढ दृष्ट्वा मोक्षमवाप्स्य
सि ॥ शंकरो न मया दृष्टो वसंत्यस्मिन्महावने ॥ ततो दुःखमनुप्राप्ता मांसमेदो विवर्जिता ॥ गर्भाक्रांता विशेषेण तनवध्या
वेति निश्चितं ॥ तन्तुर्धुं वस्यते तनं भोजनं च भविष्यति ॥ आयास्यति मृगी त्वत्वा मार्गेणानेन लुब्धक ॥ पीना यौवनसंपन्ना
बहुमांसा मदोद्धता ॥ भोजनं सकुटुंबस्य तव सद्यो भविष्यति ॥ अथ तन्यो मृगो व्याध पानार्थं तु जलाशये ॥ आगमिष्यति प्र
त्यूषे क्षुधार्यस्य न संशयः ॥ गर्भं त्यक्त्वा पुनः प्रातर्बालान्संदिश्य वंधुषु ॥ शपथैरागमिष्यामि संदिश्य च सखीजनं ॥ तस्या
द्वचनं श्रुत्वा व्याधो विस्मयमागतः ॥ क्षणमेकं तथा स्थित्वा व्याधो वचनमब्रवीत् ॥ नागमिष्यति चेदन्यो जीवस्त्वमपि
गच्छति ॥ क्षुधया पीडितोहं वै कुटुंबं च विशेषतः ॥ प्रातस्त्वया मम गृहमागंतव्यं यथा यथं ॥ शपथैश्च व्रजत्वं हि यथा मे प्र
त्ययो भवेत् ॥ पृथिवी वायुरादित्यः सत्ये तिष्ठंति देवता ॥ तस्मात्सत्येन गंतव्यं भवत्या स्वगृहं प्रति ॥ तस्य तद्वचनं श्रुत्वा
गर्भिणी सा मृगी तदा ॥ चक्रे सत्यप्रतिज्ञां वै व्याधस्याग्रे पुनः पुनः ॥ ॥ मृगीउवाच ॥ द्विजो भूत्वा तु यो व्याधवेदभ्रष्टो भि

॥ रत्न ॥
३९८

जायंते ॥ स्वाध्यायसंध्यारहितोसत्यशौचविवर्जितः ॥ अविक्रय्याणां विक्रेता अयाज्यानां च याजकः ॥ तस्य पापेन लिप्यामि
यद्यहं नागमे पुनः ॥ त्यजत्यपाश्रिताद्दारान्‌ मातापित्रोरपालके ॥ तेन पापेन लिप्यामि यदि नायामि ते गृहे ॥ दानं दातुं प्रवृ
त्तस्य योन्तरायकरो नरः ॥ तेन पापेन लिप्यामि यदि नायामि ते गृहे ॥ देवद्रव्यं गुरुद्रव्यं ब्रह्मस्वं यो हरेन्नृपः ॥ तेन पापे
न लिप्यामि यदि नायामि ते गृहे ॥ दीपं दीपेन यः कुर्यात्‌ प्रादेन -- धावयेत्‌ ॥ तेन पापेन लिप्यामि यदि नायामि ते गृहे ॥
भर्त्तारं स्वामिमित्रं च आत्मानं बालमेव च ॥ गां विप्रं च गुरुं नारीं यो मारयति दुर्मतिः ॥ तेन पापेन लिप्यामि यदि नायामि ते
गृहे ॥ अवैष्णवे च यत्पापं यत्पापं दाम्भिके जने ॥ अजितेन्द्रियधूर्त्ते च परदोषानुकीर्त्तने ॥ कृतघ्ने च कदर्ये च परदाररते तथा ॥ सदा
चारविहीने च परपीडाप्रदायके ॥ परपैशुन्ययुक्ते च कन्याविक्रयकारके ॥ परापवादसंतुष्टे सर्वधर्मविवर्जिते ॥ वृषलीप
तौ वार्द्धुषिके पित्रोरंतरदायिके ॥ हेतुके बकवृत्तौ च कूटसाक्षिप्रदे तथा ॥ यत्तेषां यातनं कर्म स्यां यदि नायामि ते गृहे ॥ यत्पापं ब्रह्म
हत्यायां पितृमातृवधे तथा ॥ तेन पापेन लिप्यामि यदि नायामि ते गृहे ॥ यत्पापं लुब्धकानां च यत्पापं गरदायिनां ॥ तेन
पापेन लिप्यामि यदि नायामि ते गृहे ॥ द्विभार्यः पुरुषो यस्तु समदृष्ट्या न पश्यति ॥ तस्य पापेन लिप्यामि यदि नायामि ते
गृहे ॥ सकृद्दत्त्वा तु यो कन्यां द्वितीयाय प्रयच्छति ॥ तेन पापेन लिप्यामि यदि नायामि ते गृहे ॥ कथायां कथ्यमानायां अंत
रं कुरुते नरः ॥ तस्य पापेन लिप्यामि यदि नायामि ते गृहे ॥ यति निंदापरो नित्यं वेदनिंदापरो हि यः ॥ तस्य पापेन लि

398

॥ राम ॥
३९८

प्यामियदिनायामितेगृहे॥ यस्यसंग्रहणीभार्याव्रात्सरणींचविशेषतः॥ तस्यपापेनलिप्यामियदिनायामितेगृहे॥ येनश्राद्धेन
योभुंक्तेपतितेनवंद्धयाजके॥ असच्छास्त्रार्थनिरतेपुराणार्थविवर्जितः॥ मूर्खेयाख्यातेनिरतेक्रयविक्रयकेद्विजे॥ एतेषांपाप
कंमह्यंयदिनायामितेगृहे॥ एकाकीमिष्टमश्नातिभार्यापुत्रविवर्जितः॥ आत्मजांगुणसंपन्नांसमानसदृशेवरे॥ नयच्छ
तिःकन्यांनरोवैत्तानदुर्बलः॥ तस्यपापेनलिप्यामियदिनायामितेगृहे॥ मृगीवाक्यंततःश्रुत्वालुब्धकोहृष्टमानसः॥ सं
हृत्यवाणसंधानंमोचहरिणींतदा॥ तस्याभक्तिप्रभावेणलिंगस्यापिप्रपूजनात्॥ तस्मिन्नेववृक्षरोप्राप्तेपराणप्राम्नसीतदा
॥ मंत्रस्ताभयसंमग्नापतिमन्वेष्यतीमुहुः॥ जालिमध्येस्थितेनाथदृष्टासालुब्धकेनतु॥ पुनर्वृक्षस्यपत्राणिशीत्रोट्यित्वाकरेणा
तु॥ क्षिप्तानिदक्षिणेभागेलिंगोपरिदिदृक्षया॥ तस्यावधार्थनेनाथवाणोधनुषिसंयुतः॥ जिघंसस्तत्रैकचित्तेनभक्ष्यार्थं
जिघांसया॥ निरीक्ष्यलुब्धकोयावद्बाणानतस्याविमुंचति॥ तावन्मृगपासंसंदृश्योदृष्टानेविह्वलाभवत्॥ अद्यैवभगिनी
मेपिलुब्धकेनविनाशिता॥ ममकिंजीवितव्येनतस्यादुःखेनपीडिता॥ वरंमृत्युर्नशोकोवैदृष्ट्वाव्याधंविशेषतः॥ एवंसं
चिंत्यहरिणीलुब्धकंवाक्यमब्रवीत्॥ धनुर्धरवरव्याधसर्वजीवनिकृंतनः॥ देहिमेवचनंचैकंपश्चात्त्वंमांनिपातय॥ आ
यातातहरिणीचैकामार्गेणानेनलुब्धकः॥ समायाताथवानेवसत्यंकथयसुव्रतः॥ तच्छ्रुत्वालुब्धकस्तत्रविस्मितेनेक्षणामे
क्षत॥ तस्यास्तयादृशीवाणीअस्याश्चैवतुतादृशी॥ साचैषाचागतानूनंप्रतिज्ञापालनायच॥ अथवान्यासमायातातया

॥राम॥ याकथितापुरा ॥ ॥लुब्धक उवाच ॥ अहोरात्रं कृतं कष्टं कुटुंबार्थं मयामृगि ॥ अधुना त्वां हनिष्यामि देवानास्मरशांकुरु ॥ व्या
॥१९९॥ धोक्तवचनं श्रुत्वा हरिणी दुःखिता भृशं ॥ व्याधं प्राह रुदित्वा वै भो भो व्याध निपातय ॥ तेजो बलं तथा सर्वं निर्दग्धं विरहाग्निना ॥
अहं प्राणान्तमोक्षामि भोजनं तेन जायते ॥ बलवांश्च महातेजा मद्मांससमन्वितः ॥ अन्यश्च पीनगौरांगो मृगो ह्यत्रागमिष्य
ति ॥ अहं च दुर्बलातन्वं मेदमांसविवर्जिता ॥ केवलं पापभाक्त्वं हि मम प्राणविमोचक ॥ मार्गे त्वानेन भो व्याध आगमिष्य
ति स्फुटं ॥ तं हत्वा तव भो व्याध तृप्तिर्नूनं भविष्यति ॥ तयोक्तं लुब्धकः श्रुत्वा किं करोमीति चिन्तयन् ॥ मृगीं प्राह सयुक्तार्थं ए
षमे निश्चयो हृदि ॥ संचित्य लुब्धकः प्राह मृगी शोकातुरां कृशां ॥ सत्यं वद महाभागे प्रत्ययो मे यथा भवेत् ॥ तस्यैतद्वचनं श्रु
त्वा हरिणी दुःखहर्षिता ॥ चक्रे सत्यप्रतिज्ञां तु व्याधस्याग्रे पुनः पुनः ॥ ॥मृगी उवाच ॥ क्षत्रियस्त्वरणं श्रुत्वा संग्रामं यो न
गच्छति ॥ तस्य पापेन लिप्यामि यदि नायामि ते गृहे ॥ भेदयन्ति तडागानि वापीनां च गवामपि ॥ मार्गस्थानं च ये घ्नन्ति स
र्वसत्त्वभयंकरं ॥ तेषां वै पातकं मह्यं यदि नायामि ते गृहं ॥ एतच्छ्रुत्वा तु व्याधेन सापि मुक्ता मृगी तदा ॥ जलं पीत्वा तु वशी ॥राम॥
गता सा स्वं यथागतं ॥ जालिमध्ये स्थितस्यास्य द्वितीयः प्रहरो गतः ॥ त्रुटित्वा विल्वपत्राणि पुनर्देवे नियोजयेत् ॥ पीडि ॥१९९॥
तोतीव क्षीणेन क्षुधया गृहचिन्तया ॥ शिवः शिवेति जल्पन्वै न निद्रामुपलब्धवान् ॥ कृतं सुरार्चनं तेन प्रहरे प्रहरे गते ॥ वी
क्षश्चैव दिशः सर्वाः सत्त्वमार्गान्निरीक्षयन् ॥ लुब्धकेनाथ दृष्टो सो हरिणः स्फुरितेक्षणः ॥ विलोकयन् दिशः सर्वा मा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गेमारोमृगीपदान्‌ ॥ सौम्याप्यबलदर्पाढ्योमदनोन्मत्तपीवर ॥ तेदृष्ट्वावाराम्लुब्धप्याआकर्णांत्तुष्टचेतसा ॥ वारांमुच(
न्तियावद्वैतावद्दृष्टोमृगेराजा ॥ कालरूपंतुतंदृष्ट्वामृगश्चिंतितवान्स्फुटं ॥ निश्चयोमविताम्त्युगोचरस्यागतोयत ॥ भार्या
धारासमामेघव्याधेनेहनिपातिता ॥ तथाविरहितस्याद्यनूनंमृत्युर्भविष्यति ॥ हाहाकालकृतंपापंयद्भार्यादुःखमागतं ॥
भार्ययानसमंसौख्यंगृहेपिचवनेपिच ॥ तयाविनानधर्मोस्तिनार्थकामौविशेषत ॥ वृक्षमूलेपिदयितायत्रतिष्टतितद्गृहं
॥ प्रासादोपितयाहीनःकांतारादतिरिच्यते ॥ धर्मकामार्थकार्येषुभार्यापुंसःसहायिनीविदेशेचगतेनापिसैवविश्वास
कारिणी ॥ नास्तिभार्यासमोबंधुर्नास्तिभार्यासमंसुखं ॥ नास्तिभार्यासमंलोकेनरस्यार्त्तस्यभेषजं ॥ यस्यभार्यागृहे
नास्तिसापिचप्रियवादिनी ॥ अरण्यंतेनगंतव्यंयथारण्यंतथागृहं ॥ एकाधारासमामेभूत्द्वितीयाधारादामम ॥ इत्येवं
चिंतयित्वातुलुब्धकंवाक्यमब्रवीत ॥ ॥मृगउवाच॥ भ्रराफव्याधनरश्रेष्टआमिषाहारभोजन ॥ यत्नेष्टछाम्यहंवीरतद्य
त्कुवदमप्रभो ॥ आगतंहरिणीयुग्मंकेनमार्गेणतद्गतं ॥ त्वयाविनाशितंचाथसत्यंकथयमेधुना ॥ तस्यतद्वचनंश्रु
त्वालुब्धकोविस्मयंगत ॥ असावपिनसामान्योदेवताकाप्यनुत्तमा ॥ उवाचलुब्धकःसत्यस्तस्याग्रेवाक्यमुत्तमम ॥ तेग
तेतेनमार्गेणासत्यंकृत्वाममायतः ॥ ताभ्यांरत्नोसिमुक्तार्थेममत्वमधुनानघ ॥ संप्रतित्वांहनिष्यामिनैवमोक्ष्यामि
कर्हिचित ॥ ॥मृगउवाच॥ तन्मस्त्येकीदृशंताभ्यांवाक्यमुक्तवायत ॥ येनतेप्रत्ययोजातोमुक्तंनश्वरणीद्वयं ॥ तेन

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥४००॥

गतेनमार्गेरायेमृते व्याधेनधुना ॥ ॥व्याधउवाच ॥ तेगतेनेनमार्गेण स्वनाथमृगतंप्रजि ॥ व्याधेनकथितानाभ्यांशपथा
येकृतास्तदा ॥ तच्छ्रुत्वावचनंतस्यहरिणोदुःखमानस ॥ ॥मृगउवाच ॥ तानाभ्यांव्याधयद्युक्तंचतत्करोमिनचान्यथा ॥ यमतेत्वं
गृहंवनमागमिष्यामिनिश्चितं ॥ भार्यामनुमतीमेयकामार्गीप्युधुनामया ॥ गत्वागृहेथमुक्त्वातांआपृछ्यचसुहृज्जना
न ॥ शपथैरागमिष्यामिगृहंतेनात्रसंशय ॥ मदेहस्वगृहेनायनेतुंशक्नकथंचन ॥ नवृथामरणंमेस्यायदित्वंचायघात
ये ॥ ॥लुब्धकउवाच ॥ असत्यंभाषसेधूर्तप्रवारमसिमांवृथा ॥ कृत्वामृत्युस्थितंतत्रनरागच्छतिकोल्पधीः ॥ व्याधस्यवच
नंश्रुत्वाहरिणोवाक्यमब्रवीत ॥ शपथैरागमिष्यामियथातेप्रत्ययोभवेत ॥ ॥व्याधउवाच ॥ मृगत्वंशपथान्ब्रूहिवि
श्वासोमेभवेद्यथा ॥ यथाहिप्रेषयामित्वांस्वगृहंप्रतिकामुक ॥ ॥मृगउवाच ॥ भर्तारंवंचयेद्यास्त्रीस्वामिनंवंचतेन
रः ॥ मित्रंचवंचयेद्यस्तुगुरुद्रोहंकरोतियः ॥ मेदद्येद्यस्तडागानिप्रासादंपातयेन्नरः ॥ प्रवादशीलोयोविप्रः क्रयविक्र
यकारकः ॥ संध्यास्नानविहीनश्चवेदशास्त्रविवर्जितः ॥ मद्यपास्त्रीपुरस्कायेपरनिंदारताश्चये ॥ परस्त्रीसेवकावि
प्राः परपैशून्यसूचकाः ॥ शूद्रान्नभोजिनोयेचभार्यापुत्रांस्त्यजंतिये ॥ वेदनिंदापरायेचवेदशास्त्रार्थनिंदकाः ॥ तेषांवै ॥ राम ॥
पातकंमह्यंपदिनायामितेगृहं ॥ भार्यासंग्रहणीयस्यव्रतशौचविवर्जिता ॥ सर्वाशीसर्वविक्रेताद्विजानामपिनिन्दकः ॥४००॥
॥ त्रिपुवर्णीपृथक्पंथःश्रद्धश्चकरोतिवै ॥ विप्रवाक्यंपरित्यज्यपापराडभिरताः सदाव्रह्मचर्यरताः शूद्रायेचपापराड

400

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संश्रिता ॥ तेषां वै० ॥ तिलास्तैलं घृतं क्षौद्रं लवणासस्तुं तथा ॥ लोहं लाक्षादिकं सर्वं रंगान्नानाविधानपि ॥ विक्रये तानि शूद्रे
णानं क्रेशोषान विद्यते ॥ मद्यमांसविषं दुग्धं नीली चव्रषभं तथा ॥ मीनं क्षीरं सर्पं कूटं त्वन्नं तनकफलानि च ॥ मद्यादिविक्रयं यस्तु
द्रष्टोपि मद्मोहितः ॥ आदित्यविष्णुमीशानं गणाध्यक्षं तु पार्वती ॥ एतास्तु पञ्चगृहंत्यो यो न पूजयते नरः ॥ तस्य पापेन लिं०
॥ यो गोस्पृश्यति पादेन ऽदित्ते केशांस्तु पश्यति ॥ एकाकी मिष्टमश्नाति तस्य पापस्य भागपहं ॥ मातापित्रोरपोष्टा च क्रियाशुद्धिश्च पा
चकः ॥ कन्याशुल्कोपजीवी च देवब्राह्मणनिंदकः ॥ गोग्रामहं तकारं च अतिथीनां च पूजने ॥ ये न कुर्वन्ति गृहिणास्ते पाप
पं भवेन्मम ॥ वृंताकानि पटोलानि कालिंगं तु वनानि च ॥ मूलकं लशुनं कंदं सुसेमकं नशाककं ॥ एतानि भक्षयेद्यस्तु न
रो वै ज्ञानदुर्वलः ॥ तस्यैवं जायते पुष्टिं श्वापदायरामतैरपि ॥ एतेषां पातकं मह्यं यदि नायामि ते गृहे ॥ यः पठेत्स्वरहीनं च
लक्षणेन विवर्जितं ॥ इत्यासुः संचरेद्विप्रो वेदान्तुं कीरयेत्तुयः ॥ विप्रस्य पठतः क्वापि शूद्रोपि यदि वान्त्यजः ॥ वेदोपजीवि
को विप्रो नित्यो मांसशुद्रभोजनः ॥ तस्य पापेन लिप्यामि यदि नायामि ते गृहे ॥ संध्याहीने व्रतभ्रष्टे विप्रे वेदविवर्जिते तेन
पा० ॥ शूद्रान्नेषु च ये सक्ताः शूद्रसंपर्कहर्षिताः ॥ तेषां वै पातकं मह्यं यदि नायामि ते गृहे ॥ लिखकश्चित्रकर्त्ता च वैद्यो
नक्षत्रसूचक ॥ कूटकर्त्ता द्विजो यश्च तस्य पापस्य भागपहं ॥ कूटसाक्षी मृषावादी परद्रव्यस्य तस्करः ॥ परदाराभिगामी च
ये च विश्वासघातकाः ॥ द्रव्येद्रव्यं विनिक्षिप्य पानकूटसमाश्रिताः ॥ वेदपारगाः सदाये च दानदत्त निवारकाः ॥ मन्त्रीरमर

Nepal Sanskrit University, Belmegh ... Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥ ॥४०१॥

र्थहीनं चक्ररूपं व्याधिपीडितं ॥ यानपूजयते नारी रूपयौवनगर्विता ॥ एकादशीं तथा माघे या सा शिवचतुर्दशी ॥ पूर्वविद्धां
प्रकुर्वंति तेषां पापस्य भागपहं ॥ अथ किं बहुनोक्तेन भो लुब्धक नवायतं ॥ यदि नायामि तिगेहं मम सत्यं भवेन्नव ॥ तेन वाक्ये
न संतुष्टो व्याधो वै वीतकल्मषः ॥ संहृत्य धनुषो बाणं मृगो मुक्तो गृहं प्रति ॥ जले पीत्वा तु हरिणाः प्रविष्टो गहनं वनं ॥ गतो सौ
तेन मार्गेण गतं यत्र मृगीद्वयं ॥ लुब्धकेन तदा तत्र जालिमध्ये स्थितेन हि ॥ पतन्पृष्ठे बिल्वपत्राणि त्रोटयित्वा पतन्ति च ॥ शि
वशिवेति जल्पन्वै आश्रु यातो निजाश्रयं ॥ अथो दिने स्वर्यं विवेकं कामाज्जागरे कृते ॥ पापान्मुक्तोप्य सौ सद्यः शिवपू
जाप्रभावतः ॥ यावद्दिशो निरीक्षेत निराशो भोजनं प्रति ॥ तावद्विशुद्धता चान्या मृगी तत्र समागता ॥ दृष्ट्वा मृगीं तदा व्याधो बा
णं धनुषि योजयत् ॥ यावन्मुंचत्यसौ बाणं तावदुक्तं तया तदा ॥ सा बाणं मुंच धर्मात्मन् धर्मं मा मुंच सुव्रत ॥ अहं न वध्या सर्वेषां
मिति शास्त्रविनिश्चितः ॥ राजा तो मिथुनासक्तास्तनयो व्याधिपीडितः ॥ नहं तव्योमृगो राज्ञा मृगी च शिशुना हता ॥ अथवा
धर्ममुत्सृज्य मां हनिष्यसि मानव ॥ बालकं स्वगृहे मुक्त्वा सखीनां च निवेद्य च ॥ शपथे रागमिष्यामि व्याधश्रृणु वचो मम
म ॥ या स्वभर्त्तारमुत्सृज्य परपुंसि रता सदा ॥ तस्याः पापेन लिप्यामि यदि नायामि ते गृहे ॥ मद्यं मांसं विषं दुग्धं नीलीकुं
भफलानि च ॥ एतानि विक्रयं यस्तु नरो मोहसमन्वितः ॥ तस्यास्तद्वचनं श्रुत्वा व्याधो विस्मयमागतः ॥ ततो व्याधेन सा
मुक्ता गता वै विजमंदिरं व्याधोपि तत्र सरस्यं त्याज गामस्वग्रहं प्रति ॥ सर्वेषां वचनं ध्यायन्मृगाणां सत्यवादिनां ॥ एतेषां घा

401

॥ राम ॥ ॥४०१॥

१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तं को नित्यमहं यास्यामि कां गतिं ॥ क्रमात्कृहं समायाता वालकाः क्षुधयाहताः ॥ नान्नमांसं गृहे तस्य भोजनं येन जायते ॥ नि-
रामिषं तु तं दृष्ट्वा निराशास्ते भवंस्तदा ॥ व्याधोपि च तदा तत्र तेषां वाक्यानि संस्मरन् ॥ लुब्धकेन तदा मुक्तो हरिणः श-
पथैर्गतः ॥ स्वमाश्रमं तु संप्राप्तो यत्र तद्धरिणीद्वयं ॥ सद्यः प्रसूता सा चैका द्वितीया रतिलालसा ॥ तृतीयापि समायाता ८
वालकैर्वहुभिर्वृता ॥ सर्वाः समेताः एकत्र मरणे कृतनिश्चयाः ॥ परस्परं प्रजल्पंतो लुब्धकस्य विचेष्टितं ॥ आयातां हरिणीं ८
शुक्लां रूपायां रतिलालसां ॥ कृतकृत्यो भवन्नज्ञस्तेभ्यो वाक्यमथाब्रवीत् ॥ युष्माभिरिह संस्थेयं कर्त्तव्यं धारारक्षणं
व्याधाद्वीपाल्लुब्धकेभ्यो वालका निप्रयत्नतः ॥ अहं सत्यानुगो भार्यो न भुंक्ते मोहसंवृते ॥ भूराहासं तु विज्ञेयस्तस्य जं तथा ८
निरर्थकं ॥ संतानात्स्वर्गमाप्नोति इहकीर्तिश्च शाश्वती ॥ संततिर्यत्नतः पाल्या स्वर्गसौख्यप्रदायिका ॥ अपुत्रस्य गतिर्नास्ति
इहलोके परत्र च ॥ येन केनाप्युपायेन पुत्रमुत्पादयेत्पुमान् ॥ मया च तत्र गंतव्यं यत्र व्याधस्य मंदिरं ॥ सत्यं तु पालनीयं स्यात्सत्ये
धर्मः प्रतिष्ठितः ॥ एतच्छ्रुत्वा तु ता नार्यो वाक्यमूचुः सुदुःखिताः ॥ वयमप्यागमिष्यामस्त्वया सार्द्धं मृगोत्तम ॥ तथा ते विविधे
कांत न स्मराम कदाचन ॥ पुष्पितेषु वनांतेषु नदीनां संगमेषु च ॥ कंदरेषु च शैलानां युष्माभिरक्षिता वयं ॥ न कार्यमप्यस्मा-
कं क्रीडितेन त्वया विना ॥ नारीणां पतिहीनानां जीवितेन किं प्रयोजनं ॥ मितं ददाति हि पिता मितं भ्राता मितं सुतः ॥ अमितस्य तु
दातारं भर्त्तारं का न पूजयेत् ॥ अपि दश्प्रपुत्रा नारी वहुपुत्रसुहृद्वृता ॥ सा शोच्या बंधुवर्गस्य पतिहीना कुलांगना ॥ गंधमाल्ये-

CC-0. In Public Domain. Digitization by eGangotri

॥रत्न॥ स्त्रियो नित्यं प्रियं तेन भर्तुरयन्ततः॥ नातंत्रीवाद्यते वीणा नाचक्रो भ्रमते रथः॥ नापतिः सुखमाप्नोति नारी पुत्रशतैरपि॥ नास्ति भर्त्रो
॥४०२॥ समो धर्मो नास्ति धर्मसमः सुहृत्॥ नास्ति भर्त्रा समो नाथः स्त्रीणां भर्त्ता परा गतिः॥ एवं विलाप्य ता॥ सर्वा भरतो कृतनिश्चया॥
बालकैस्तैः समायुक्ता भर्तृशोकेन दुःखिता॥ मृगस्तासां वचः श्रुत्वा हृदि चिन्तापरो भवेत्॥ गन्तव्यं किं न गन्तव्यं मया व्याधस्य
मन्दिरे॥ एकतः सुकृतं रक्षेद् एकतः सत्यक्षयो भवेत्॥ तद्दन्ति कं न चेद्यामि मम सत्यक्षयो भवेत्॥ वरं पुत्रस्य मरणं भार्यायाश्चात्म
नस्तथा॥ सत्यं कृत्ने परो नित्यमाकल्पं रौरवं व्रजेत्॥ तस्मात्सत्यं पालनीयं नरैः श्रेयोर्थिभिः सदा॥ एवं संचिन्त्य हरिणो धर्मात्
हृदि मतो रमात्॥ ताभिः सहैव शनकैः क्षणात्तदाश्रमं ययौ॥ तस्मिन्नर सिसंस्थात्वा कूर्मन्यासं चकार सः॥ तद्दिने गंधशिरो
पत्न्याशु हृदि ध्यायन् सदाशिवं॥ गानपाने परित्यज्य मैथुनं भोगमेव च॥ कामक्रोधं तथा लोभं मायामोक्षविनाशिनीं॥ वंद
यित्वा तु तं देवं लुब्धकाभिमुखो ययौ॥ तस्य भार्या स्वपुत्राश्च मरणे कृतनिश्चयाः॥ अनाशकं व्रतं गृह्य पृष्ठलग्नाः समाययुः 402
॥ भार्यापुत्रैः परिवृत्तो मृगस्तं देशमागतः॥ क्षुधितो बालकैर्युक्तो लुब्धको यत्र तिष्ठति॥ मृगस्तं देशमागत्य कुर्वन्नेव सम ॥रत्न॥
स्थितः॥ पालयन् सत्यवाक्यानि लुब्धकं वाक्यमब्रवीत्॥ ॥मृग उवाच॥ हत्वा मां पृथमं व्याध पश्चादेताः क्रमेण तु॥ बालका ॥४०२॥
नितत्त॥ पश्चाद् स्वपत्नीं मा विलंबय॥ लुब्धके सत्यमृगा मत्स्या नास्ति दोषः कदाचन॥ वयसा स्याम स्वर्लोकं सत्यपूजा न संश
यः॥ तथा ते सत्कर्तुं वस्य धारणा यात्रा मविष्यति॥ एतद् श्रुत्वा तु वचनं मृगेण परिभाषितं॥ आत्मानं निंदयित्वा तु लुब्धको वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्यमब्रवीत् ॥ ॥व्याधउवाच॥अहोमृगमहासत्त्वगच्छगच्छस्वमाश्रमं॥आमिषेणानकार्य्यंमे ज्ञात्वैतद्भविष्यति॥जीवानां
घातनेपापंवंधनेतर्जनेतथा॥नैवपापंकरिष्यामिकुटुंवार्थेकदाचन॥त्वंगुरुर्ममधर्म्मार्थाउपदेशोमृगोत्तम॥ गच्छगच्छमृगश्रे
ष्ठकुटुंवेनसमन्वितः॥मयात्यक्तानिशस्त्राणिसत्यधर्मेसमाश्रितः॥ ॥मृगउवाच॥कर्मणासमहंज्ञात्वात्वत्सकाशमिहा
गतः॥हन्यतांहन्यतांशीघ्रंत्वत्तोपापंभविष्यति॥मयादत्तापुरावाचातस्यावधोनमाम्यहं॥एतच्छ्रुत्वातुवचनंलुब्धकोवाक्यम
ब्रवीत्॥ ॥लुब्धकउवाच॥त्वंबंधुस्त्वंगुरुस्त्रातात्वंमेमातापितासुहृत्॥मयात्यक्तानिशस्त्राणित्यक्तंमायादिकंवलं॥
कस्यभार्य्याःसुताःकस्यकुटुंवश्चमहामृग॥तैःस्वकर्मचवोधव्यंमृगगच्छयथासुखं॥इत्युक्त्वासततदातत्रौचभंजसशरंधनु
॥मृगंप्रदक्षिणीकृत्यनमस्कृत्यक्षमापयत्॥एतस्मिन्नंतरेनेदुर्देवदुंदुभयोदिवि॥आकाशात्पुष्पवृष्टिश्चपपातसुमनोह
रा॥तदाहूतःसमायातोविमानंगृह्यशोभनं॥ ॥देवदूतउवाच॥अहोव्याधमहासत्त्वसर्वसत्त्वक्षयंकर॥विमानमिदमा
रुह्यसदेहःस्वर्गमाविश॥शिवरात्रिप्रभावेनपातकंतेक्षयंगतं॥उपवासस्त्वसंजातोनिशिजागरणंकृतं॥यामेयामेकृ
तापूजाअज्ञानेनशिवस्यच॥सर्वपापविनिर्मुक्तोगच्छत्वंमदमंदिरं॥विमानेचसमारुह्यसत्यचित्रमदंव्रज॥मृगराजम
हासत्त्वभार्यापुत्रसमन्वित॥भार्यात्रितयसंपन्नोनक्षत्रपदमाप्नुहि॥तवनाम्नातुतदृक्षंलोकेख्यातंभविष्यति॥एत
च्छ्रुत्वातुवचनंलुब्धकेनसमन्वितः॥विमानंतुतदारुह्यनक्षत्रपदमागतः॥हरिणीद्वयमेवैतत्पृष्ठतोमृगमेवच॥तारात्रि

CC-0. In Public Domain. Digitization by eGangotri

तयसंयुक्ते मृगशीर्षे तदुच्यते ॥ ॥बालकादितयं त्वाग्रे तृतीया पृष्ठतो मृगी ॥ पृष्ठतस्तत्र संशान्ता मृगशीर्षस्य सन्निधौ ॥ मृगरा
ट् दृश्यते यापि कक्षे यो मृगश्चन्द्रमं ॥ उपवासं करिष्यन्ति जागरेण समन्वितं ॥ यथोक्तशास्त्रमार्गेण तेषां मोक्षो न संशयः ॥
॥शिवरात्रिसमं नास्ति व्रतं पापक्षयावहं ॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ अश्वमेधसहस्राणि वाजपेयशतानि
च ॥ प्राप्नोति तत्फलं सर्वं नात्र कार्या विचारणा ॥ ॥इति लिंगपुराणे उमामहेश्वरसंवादे शिवरात्रिव्रतं ॥ ॥अथोद्याप
न ॥ हेमाद्रौ स्कांदे ॥ स्कंद उवाच ॥ व्रतस्योद्यापनं कर्म कथं कार्यं च मानवैः ॥ को विधिः कानि द्रव्याणि कथयस्व मम प्रभो ॥ ॥ई
श्वर उवाच ॥ शृणु षण्मुख वत्स त्वं लोकानां हितकाम्यया ॥ उद्यापनविधिं चैव कथयामि तवाग्रतः ॥ यथासंजायते वित्तं भक्तिश्र
द्धासमन्वितं ॥ सम्यग्व्रतकालस्य यतो नित्यं हि जीवितं ॥ चतुर्दश्यां तु कर्तव्यं शिवरात्रिव्रतं शुभं ॥ एकभक्तं त्रयोदश्यां चतु
र्दश्यामुपोषणं ॥ संपाद्य सर्वसंभारान्मंडपं तत्र कारयेत् ॥ वस्त्रैः पुष्पैः समाछन्नं पटवस्त्रैश्च शोभितं ॥ तन्मध्ये लेखयेद्दि
व्यं लिंगतोभद्रमंडलं ॥ अथवा सर्वतोभद्रं मंडपान्तः प्रकल्पयेत् ॥ शोभोपशोभासंयुक्तं दीपैः सर्वत्र सोज्वलं ॥ आचार्यं
वरयेत्तत्र ऋत्विग्भिः सहितं शुचि ॥ शिवरूपाश्च ते विप्राः पूज्याश्चंदनपुष्पकैः ॥ अनुज्ञातैश्च तैर्विप्रैः शिवपूजां समा
रभेत् ॥ रुद्रनाम्नान्ततो तेन ब्राह्मणानामपि पूजयेत् ॥ अव्रणं सजलं कुंभं तस्योपरि तु विन्यसेत् ॥ सौवर्णं राजतं ताम्रं मृन्म(
यं वापि कारयेत् ॥ कुंभोपरि न्यसेद्देवमुमया सहितं शिवं ॥ सौवर्णौ प्रथवा रौप्ये वृषभे संस्थितं शुभे ॥ रत्नालंकरणौ हैमैरलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्स्नश्च पूजयेत् ॥ पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः ॥ वस्त्रयुग्मेन संवेष्ट्य विल्वपत्रैश्च पूजयेत् ॥ उमामाहेश्वरीं मूर्त्तिं पूज
येद्वृषभे स्थितां ॥ सोमं च सगणं चैव पूजयित्वा महेश्वरं ॥ होमं कुर्य्यात्प्रयत्नेन रोद्रमंत्रैर्यथाविधि ॥ ब्राह्मणान्पूजयेद्भक्त्या
भोजयेच्च चतुर्द्दश ॥ आचार्यं च सपत्नीकं वस्त्रालंकारभूषणैः ॥ यज्ञोपवीतवस्त्रादि दद्यात्तेभ्यः पृथक् पृथक् ॥ गां सवत्सां स
वसनां नानालंकारभूषणां ॥ दद्यादाचार्यवर्याय शिवो मे प्रीयतामिति ततः सकुंभां मूर्त्तिं च सवस्त्रां वृषभस्थितां ॥ सर्वालं
कारसहितामाचार्याय निवेदयेत् ॥ व्रतमेतन्मया तं यन्न्यूनं वा पूर्णं वा मे वच ॥ सर्वं संपूर्णतां यातु प्रसादाद्भवतां मम ॥ इति सं
प्रार्थ्य तान्विप्रान्त्रस्तांस्तान्पुनः पुन ॥ अजैकपादमित्यादि दद्यात्कुम्भान्पृथक् ॥ पुराणैः स्तोत्रपाठैश्च रात्रिशेषं नयेद्बु
धः ॥ ततः प्रभातसमये कृत्वा संध्यादिकाः क्रिया ॥ पुनः पूजां प्रकुर्वीत ततो होमं समारभेत् ॥ तिलव्रीहियवैश्चैव पाय
सान्नेन भक्तितः ॥ त्र्यंबकमिति मंत्रेण नमः शंभवेवेति च ॥ गौरीर्मिमायेति मंत्रेण शतमष्टोत्तरं द्वयं ॥ होमं कुर्याच्च मति
मान्विल्वपत्रैश्च नामभिः अजैकपादहिर्बुध्न्यो भवः शर्व उमापतिः ॥ रुद्रः पशुपतिः शंभुर्वरदः शिव ईश्वरः ॥ महादेवो ह
रो भीमो नामान्येवं चतुर्द्दश ॥ पूर्णाहुतिं ततो हुत्वा कर्मशेषं समापयेत् ॥ एतैर्होमः प्रकर्त्तव्यं कुंभदाने पि तान्स्मरेत् ॥ भाज्ये
क्षमापयेद्देवमेभिर्नामपदैः पृथक् ॥ प्रतिमां कुंभसहितामाचार्याय निवेदयेत् ॥ शंभो प्रसीद देवेश सर्वलोकेश्वर प्रभो
तव रूपप्रदानेन मम संतु मनोरथाः ॥ यज्ञोपवीतवस्त्राणि दद्यात्तेभ्यः पृथक् पृथक् ॥ आचार्यं पूजयेद्भक्त्या वस्त्रा

CC-0. In Public Domain. Digitization by eGangotri

लंकारभूषणैः ॥ चतुर्दशघटास्तत्र्या विप्रेभ्यो जलपूरिताः ॥ कुंभोपञ्चोपवीतानि वस्त्राणि च पृथक् पृथक् ॥ पूर्णामेव च वस्त्रा-
णि शय्यां सोपस्करां तथा ॥ द्वादशैव तु गा दद्यात्स्वरियानादिकं तथा ॥ एतैर्होमैः प्रकर्त्तव्यः कुंभदाने पितॄन्स्मरेत् ॥ भोज्य
क्षमापयेद्देवमेभिर्नामपदैः पृथक् ॥ प्रतिमां पूजयेद्भक्त्या आचार्याय निवेदयेत् ॥ अथवा दक्षिणामेव श्रद्धया तु दद्या-
त्तिलान् ॥ व्रतमेतत्कृतं यन्मे पूर्णं वापूर्णमेव वा ॥ सर्वं संपूर्णतां यातु प्रसादाद्भवतां मम ॥ इति संप्रार्थ्य तान् विप्रान्प्र-
णम्य च पुनः पुनः ॥ ततश्च स्वजनैः सार्द्धं स्वयं भुंजीत सव्रती ॥ ॥ इति श्रीस्कान्दे शिवरात्र्युद्यापनं ॥ ॥ माघामावास्या
युगादिः तदुक्तं ॥ माघमासस्य त्वमावास्येति तथान्योपि विशेषो विष्णुपुराणे ॥ माघासिते पंचदशी कदाचिदुपैति
योगं यदि वारुणेन ॥ ऋक्षेण कालः स परः पितॄणां न ह्यल्पपुण्यैः प्रतिलभ्यतेसाविति ॥ वारुणं शतभिषा ॥ ॥ भार-
ते ॥ काले धनिष्ठा यदि नाम तस्मिन्भवेत्तु भूपाल तदा पितृभ्यः ॥ दत्तं तिलान्नं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्मनु-
ष्यैरिति ॥ फाल्गुनी पौर्णमासी होलिका सा यामद्व्यापिनी ग्राह्या ॥ सायाह्ने होलिकां कुर्यात्पूर्वाह्णे क्रीडनं गवामिति वचना-
दिति निर्णयामृते तूक्तं ॥ ॥ ज्योतिर्निबंधे तु ॥ प्रतिपद्भूतभद्रासु यार्चिता होलिका दिवा ॥ संवत्सरं च तद्राष्ट्रं पुरं दह-
ति साद्भुतं ॥ प्रदोषव्यापिनी ग्राह्या पौर्णिमा फाल्गुनी सदा ॥ तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे इति ॥ ना-
रदवचनात् ॥ प्रदोषव्यापिनीत्युक्तं ॥ हेमाद्रौ मदनरत्ने च भविष्ये च ॥ अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हे॥ गोमयेनोपलिप्ते च सचतुष्के गृहांगणे इत्यादिनात्तत्रैव तद्विधानाच्च॥ तेनेयं पूर्वविद्धा॥ श्रावणी दुर्गनवमी दूर्वा चै
व हुताशनी॥ पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनमिति॥ ॥[illegible]॥ दिनद्वयप्रदोषव्याप्तौ परैव॥ पूर्वदिने भद्रा
सत्वात्तत्र च होलिकानिषेधात्॥ तदुक्तं निर्णयामृते मदनरत्ने च पुराणसमुच्चये॥ भद्रायां दीपिता होली राष्ट्रभंगं करोति
वै॥ नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेत्॥ ॥तथा॥ भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा॥ श्रावणी नृपतिं हन्ति
ग्रामं दहति फाल्गुनी॥ दिनार्धात्परतोपि स्यात्फाल्गुनी पूर्णिमा यदि॥ रात्रौ भद्रावसाने तु दीप्यते होलिका तदेति॥ यत्त
तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने च पूर्णिमा क्षयवशात्सायाह्नात्प्रागेव समाप्यते॥ तदा पूर्वदिने संपूर्णरात्रौ
भद्रासत्वात्तत्र तावन्निषेधात्॥ परेह्नि प्रतिपद्येव कुर्यात्॥ सार्धयामत्रयं वा स्याद्द्वितीयदिवसे यदा॥ प्रतिपद्वर्धमा
नाह्नि तदा सा होलिका मता॥ इति भविष्यवचनादिति निर्णयामृतकारः मदनरत्नेप्येवं॥ यत्तु॥ वह्नौ वह्निं परित्यज्य दि
ति भविष्ये॥ वह्नौ होलिकायां वह्निं प्रतिपदं वर्जयेदित्यर्थः तदुक्तं भिषयमिति तत्रैवोक्तं॥ अन्ये तु तस्यां भद्रामुखं त्यक्त्वे
ति॥ प्रदोषव्यापिनी सा स्याद्यदा पूर्वदिने तदा॥ भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनमिति॥ नारदवचनात्
॥ निशागमे प्रपूज्येत होलिका सर्वदा बुधैः॥ न दिवा पूजयेद्धुण्ढां पूजिता दुःखदा भवेदिति दिवोदासीयवचना
त्॥ यामत्रययोर्मुक्ता चेत्प्रतिपत्तु भवेत्तिथिः॥ अत्र भद्रामुखं परित्यज्य कार्या होला मनीषिभिरिति विद्याविनोदे

CC-0. In Public Domain. Digitization by eGangotri

विधानाच्च ॥ भद्रामुखं विहाय पूर्वदिने स्वकार्येत्याह ॥ भद्रामुखं तु ॥ नाघस्कंपंचवदनं गलकेस्तथैकेति रत्नमालो
क्तं शिष्टाचारोप्येवमेव ॥ अत्र चेच्चंद्रग्रहणं तदानंतरोर्वाङ्निशि भद्रावर्ज्यपौर्णमास्यां होलिकादीपनं ॥ अथ परेह्नि यस्तोदयस्त
दा पूर्वदिने भद्रावर्ज्जेराविचतुर्थमे विष्टिपुच्छे वा होला कार्या ॥ ग्रहोत्तरं प्रतिपत्सु वा तत्पूर्वं चरिवा होलानिषेधादिति गौडाः का
लग्रहणमात्राभावाच्च ग्रहणकाले स्वहोला कार्या न च ॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने ॥ स्नात्वा कर्माणि कुर्वीत स्नतम
न्नं विवर्जयेदिति निषेधात् ॥ कथं सूतके होलेति वाच्यं तस्यान्नरादिविषयत्वात् ॥ ॥ पूजामंत्रस्तु ॥ अस्तृक्पाभयसंत्रस्तैः कृ
तात्वं होलि बालिशैः ॥ अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भवेति ॥ यत्तु ॥ हुताशनी मलमासे न भवति ॥ इयं मन्वादि
रपि ॥ सानुपूर्वाह्णिकी ग्राह्या ॥ मलमासे सति मत्वादिश्राद्धं मासद्वये कार्यमित्युक्तं ॥ कृत्यचिंतामणौ ब्राह्मे ॥ नरो दोला
गतं दृष्ट्वा गोविंदं पुरुषोत्तमं ॥ फाल्गुन्यां संयुतो भूत्वा गोविंदस्य पुरं व्रजेत् ॥ चैत्रकृष्णप्रतिपद्दिवसे तोत्सवः ॥ सा चोद
यिकी ग्राह्या ॥ प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवाविति भविष्योक्ते दिनद्वये तथात्वे पूर्वा ॥ वत्सरादौ वसंतादौ बलिरा
ज्ये स्तथैव च ॥ पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति ॥ वृद्धवसिष्ठवचनात् ॥ अत्र विशेषो हेमाद्रौ भविष्ये ॥ चैत्रे ॥ राम ॥
मासि महाबाहो पुण्ये तु प्रतिपद्दिने ॥ यस्तु श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमं ॥ न तस्य दुरितं किंचिन्नाधयो व्याधयो ॥ ४०५ ॥
न पेति ॥ तथा ॥ प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ ॥ कृत्वा चावश्यकर्माणि संतर्प्य पितृदेवताः ॥ वंदयेद्धोलिकाभूतिं

405

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदुःखोपशान्तये ॥ मन्त्रश्च ॥ वंदितासि सुरेन्द्रेण ब्रह्मणा शंकरेण च ॥ अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भवेति ॥ ॥अ
त्र चूतकुसुमं सह चंदनेन सत्यं हि पार्थ पुरुषोथ समाः सुखी स्यात् ॥ ॥मन्त्रस्तु ॥ द्रुतमग्र्यं वसंतस्य माकंदकुसुमं नव ॥ स
चंदनं पिवाम्यद्य सर्वकामार्थसिद्धये इति ॥ चैत्रामावास्यामन्वादि ॥ सा चापराह्णव्यापिनी ग्राह्या कृष्णपक्षस्थत्वात् ॥ ॥
श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ॥ रत्नावलीकृता तन्त्रयानतः फाल्गुननिर्णयः ॥ ॥अथोक्तेषु व्रतेषु सामान्यपूजा
प्रयोगः ॥ तत्र शिवव्रतेषु पार्थिवशिवपूजायाः प्रायेणोक्तत्वात्तत्पूजाप्रकारः पूर्वमभिधीयते ॥ मदाहरणं संघट्टप्रति
ष्ठापनमेव च ॥ स्नपनं पूजनं चैव विसर्जनमतः परं ॥ हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक ॥ पशुपतिः शिवश्चैव महा
देव इति स्मृत ॥ ॐ तत्सदित्यादि सर्वसंकल्पान्ते ॥ अमुकगोत्रोमुकदेवशर्माहं ममुककामनया पार्थिवशिवपूजनमहं क
रिष्ये इति संकल्प्य दीपकलशपूजां विधायाचम्य वं इति मृत्तिकाप्रोक्षणं ॥ ह्रीं गं ग्लौं गणपतये ग्लौं गं ह्रीं इति मंत्रेण गणे
शानिर्माणं ॥ ॐ नमो हराय इति मृद्ग्रहणं ॥ ॐ नमो महेश्वराय इति लिंगनिर्माणं ॥ ॐ नमः शूलपाणये इति लिंगोपरि प्र
प्याक्षतादि दत्वा पीठे प्रतिष्ठापयेत् ॥ ऐं हुं क्षें क्लीं कुमाराय नमः इति कुमारमंत्रेण कुमारमूर्त्तिं विरचयेत् ॥ ॐ पिनाकि
ने नमः इति ध्यात्वा आवाह्य प्राणप्रतिष्ठामंत्रेण प्राणान्प्रतिष्ठाप्य शुद्धस्फटिकसंकाशमित्यादिना ध्यात्वा ॥ ॐ नमः प
शुपतये इति स्नानं ॥ ॐ नमः शिवाय इति गंधपुष्पधूपदीपनैवेद्यानि दत्वा प्रागादि वामावर्त्तेन पूजयेत् पूर्वे ॐ शर्वाय

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ ४०८ ॥

क्षितिमूर्त्तयेनमः॥ ईशाने॥ ॐ भवायजलमूर्त्तयेनमः॥ उत्तरे॥ ॐ रुद्रायतेजोमूर्त्तयेनमः॥ वायव्ये॥ ॐ उग्रायवायुमूर्त्तये
नमः॥ पश्चिमे॥ भीमायाकाशमूर्त्तयेनमः॥ नैरृत्ये॥ ॐ पशुपतयेयजमानमूर्त्तयेनमः॥ दक्षिणे॥ ॐ महादेवायसोमा
मूर्त्तयेनमः॥ आग्नेये॥ ईशानायसूर्यमूर्त्तयेनमः॥ ततः ईशादिपूजानमस्कारश्चदक्षिणा॥ ॐ नमोमहादेवायइतिविस
र्जनं॥ गरोशङ्कमारमंत्राभ्यांतद्विसर्जनं॥ इतिरत्नाकरेपार्थिवपूजा॥ ॥अथविष्णोःसामान्यपूजाविधिः॥ ॐ तत्स
दित्यादिअमुकगोत्रोमुकनामकाममयाविष्णुपूजामहंकरिष्ये इतिसंकल्प॥ ॥अथावाहनम्॥ ॐ सहस्रशीर्षापुरुष
सहस्राक्षःसहस्रपात्॥ सभूमिंसर्वतः स्पृत्वात्यतिष्ठद्दशांगुलं॥ आगच्छागच्छदेवेशतेजोराशेजगत्पते॥ क्रि
यमाणामयापूजांगृहाणसुरसत्तम॥ १॥ अथासनम्॥ ॐ पुरुषःएवेदंसर्वंयद्भूतंयच्चभाव्यं॥ उतामृतत्वस्येशानो
यदन्नेनातिरोहति॥ नानारत्नसमायुक्तंकार्त्तस्वरविभूषितं॥ आसनंदेवदेवस्यप्रीत्यर्थंप्रतिगृह्यताम्॥ २॥ अथ
पाद्यं॥ ॐ एतावानस्यमहिमातोज्यायांश्चपुरुषः॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि॥ गंगादिसर्वती 4०6
र्थेभ्योमयाप्रार्थनयाहृतं॥ तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यताम्॥ ३॥ अथार्घः॥ ॐ त्रिपादूर्ध्वउदैत्पुरु ॥ राम ॥
षः॥ पादोस्येहाभवत्पुनः॥ ततोविष्वङ्व्यक्रामत्साशनानशनेअभि॥ नमस्तेदेवदेवेशनमस्तेधरणीधर॥ नमस्ते ॥ ४०८ ॥
कमलाकांतअर्घ्यंनःप्रतिगृह्यताम्॥ ४॥ अथाचमनीयं॥ ॐ ततोविराडजायतविराजोअधिपुरुषः॥ सजातोअत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रिष्यन्तयश्चाङ्गतिमथोपर ॥ कर्पूरवासितंतोयंमन्दाकिन्याःसमाहृतम् ॥ आचम्यतांजगन्नाथमयादत्तंहिभक्तितः ॥ ५
अथास्नानम् ॥ ॐ तस्माद्यज्ञात्सर्वहुतःसम्भृतम्पृषदाज्यम् ॥ पशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये ॥ गङ्गा
चयमुनाचैवनर्मदाचसरस्वती ॥ तापीपयोष्णीरेवाचताभ्यस्नानार्थमाहृतम् ॥ तोयमेतत्सुखस्पर्शंस्नानायप्रतिगृ
ह्यताम् ॥ ६ ॥ आचमनीयम् ॥ पंचामृतस्नानम् ॥ अथवस्त्रम् ॥ तस्माद्यज्ञात्सर्वहुतः ऋचःसामानिजज्ञिरे ॥ छन्दां
सिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ सर्वभूषाधिकेदेवलोकलज्जानिवारणे ॥ मयोपपादितेतुभ्यंवाससीप्रतिगृ
ह्यताम् ॥ आचमनीयम् ॥ ७ ॥ अथयज्ञोपवीतम् ॥ ॐ तस्मादश्वाअजायन्तयेकेचोभयादतः ॥ गावोहयज्ञि
रेतस्मात्तस्माज्जाताअजावयः ॥ दामोदरनमस्तेस्तुत्राहिमांभवसागरात् ॥ ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्
तम ॥ ८ ॥ अथचन्दनम् ॥ ॐ तंयज्ञंबर्हिषिप्रोक्षन्पुरुषञ्जातमग्रतः ॥ तेनदेवाअयजन्तसाध्याऋषयश्चये ॥
श्रीखण्डचन्दनंदिव्यंगन्धाढ्यंसुमनोहरम् ॥ विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यताम् ॥ ९ ॥ अथपुष्पम् ॥ ॐ यत्पु
रुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकिमस्यासीत्किम्बाहूकिमूरूपादाउच्येते ॥ माल्यादीनिसुगन्धानिमालत्या
दीनिवैप्रभो ॥ मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यताम् ॥ १० ॥ अथधूप ॥ ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्
कृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत ॥ ॐ वनस्पतिरसोदिव्योगन्धाढ्यःसुमनोहरः ॥ आघ्रेयःसर्वदेवा

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥ नांधूयोयंप्रतिगृह्यताम् ॥ ११ ॥ ॥अथ दीप ॥ ॐ चंद्रमामनसोजातश्चक्षोः सूर्योअजायत ॥ श्रोत्राद्वायुश्च प्राणश्च मु
॥ ४०७ ॥ खादग्निरजायत ॥ आज्यंचवर्त्तिसंयुक्तंवह्निनायोजितंमया ॥ दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहम् ॥ १२ ॥ अथनैवेद्य
म ॥ ॐ नाभ्याआसीदन्तरिक्षं शीर्ष्णोद्यौः समवर्त्तत ॥ पद्भ्यांभूमिर्दिशंश्रोत्रात्तथालोकांअकल्पयन् ॥ अन्नंच
तुर्विधंस्वादुरसैः षड्भिः समन्वितम् ॥ अथभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यताम् ॥ इदंफलंमयादेवस्थापितंपुरतस्त
व ॥ तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ १३ ॥ आचमनीयम् ॥ अथताम्बूलम् ॥ ॐ यत्पुरुषेणहविषादेवाय
ज्ञमतन्वत ॥ वसन्तोस्यासिदाज्यंग्रीष्मइध्मश्शरद्धविः ॥ पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं ॥ कर्पूरादिसमायु
क्तंताम्बूलंप्रतिगृह्यताम् ॥ १४ ॥ अथदक्षिणा ॥ ॐ सप्तास्यासन्परिधयस्त्रिसप्तसमिधः कृताः देवायद्यज्ञ
न्तन्वानाअबध्नन्पुरुषंपशुम् ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनन्तपुण्यफलदम् अतः शान्तिंप्रयच्छमे ॥ ॥
नीराजनम् ॥ चन्द्रादित्यौचधरणीविद्युदग्निस्तथैवच ॥ त्वमेवसर्वज्योतींषीआर्त्तिक्यंप्रतिगृह्यताम् ॥ १५ ॥ अथपु ॥ राम ॥
ष्पांजलि ॥ ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानः सचन्तयत्रपूर्वेसाध्याः ॥ ४०७ ॥
सन्तिदेवाः ॥ नमस्तेपुण्डरीकाक्षनमस्ते–मरप्रिये ॥ नमस्तेकमलाकान्तवासुदेवनमोस्तुते ॥ १६ ॥ अथप्रदक्षिणा ॥
॥ यानिकानिचपापानिब्रह्महत्यासमानिच ॥ तानितानिविनश्यन्तुप्रदक्षिणापदेपदे ॥ ॥अथनमस्कार ॥ नमःस

407

22

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वेहित्तार्थायजगद्धारहेतवे॥ साष्टांगोयंप्रणामस्तुधयत्नेनमयाकृतः॥ इतिसामान्यपूजाविधिः॥ ॥अथोपचाराः॥ प
दार्थादर्शे॥ अष्टत्रिंशत्षोडशपंचोपचारकं॥ तान्विभज्यप्रवक्ष्यामिकेतैनैर्ध्वकृतेनचकिम्॥ अर्घ्यंचपाद्यमाचमनंमधुपर्क
मुपस्पर्शम्॥ स्नाननीराजनंवस्त्रमाचमेवोपवीतकं॥ पुनराचमभूषेचदर्पणालोकनंततः गंधपुष्पधूपदीपानैवेद्यंचत
तः क्रमात्॥ पानीयंतोयमाचामंहस्तवासःसततपरम्॥ तांबूलमनुलेपंचपुष्पदानंपुनःपुनः॥ गीतवाद्यंतथानृत्यंस्तुति
श्चैवप्रदक्षिणां॥ पुष्पांजलिनमस्कारावष्टत्रिंशत्समीरितं॥ हस्तवामकरोद्वर्तनार्थः इत्यष्टत्रिंशदुपचाराः॥ आसनंस्वाग
तंचार्घ्यपाद्यमाचमनीयकं॥ मधुपर्काशनस्नानवसनाभरणानिच॥ सुगंधःसुमनोधूपोदीपमन्नेनतर्पणम्॥ मा
लानुलेपनैचैवनमस्कारविसर्जने॥ इतिषोडशोपचाराः॥ ॥अर्घ्यपाद्याचमान्येवमधुपर्काचमान्यपि॥ गंधादयो
निवेद्यांताउपचारादशक्रमात्॥ इतिदशोपचाराः॥ ॥गंधपुष्पधूपदीपानैवेद्यंपंचमेस्मृतमितिपंचोपचाराः॥ पा
द्यार्घ्यंगानियथा॥ दूर्वाचविष्णुक्रांताचश्यामाकंपद्ममेवच॥ पाद्यांगानिचचत्वारिकथितानिसमासतः॥ कर्पूरम
गुरुंपुष्पंदद्यादाचमनीयके॥ सिद्धार्थमक्षतंचैवदूर्वातिलकमेवच॥ पंचगंधफलंपुष्पंमष्टांगोर्घःप्रकीर्तितः॥ स्ना
नेवस्त्रेतथाभक्ष्येदद्यादाचमनीयकम्॥ रजनीसहदेवीचशिरीषंलक्ष्मणापिच॥ महाभडाकुशाग्राशिउद्वर्तनं
मिहोच्यतेइति॥ ॥अथप्रकीर्णारतनम्॥ तत्रगंगास्नानमंत्र॥ विष्णुपादार्घसम्भूतेगंगेत्रिपथगामिनि॥ धर्मद्र

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ ४०८ ॥

वेनिविख्यातेपापमेहरजाह्नवि ॥ १ ॥ इतिगंगास्नानमंत्रः ॥ अथगंडकीस्नानमंत्र ॥ हरिगराउसमुद्भूते सुरासुरनमस्कृते ॥ अघौ
घशमनेदेविपापंमेहरगंडके ॥ २ ॥ इतिगंडकीमंत्रः ॥ ॥ अथकौशिकीमंत्र ॥ गाधिराजसुतेदेविविश्वामित्रसुनेःस्वसः ॥ स्नवी
कमार्येसमार्थेपापमेहरकौशिकि ॥ ३ ॥ अथवाग्मतीमंत्र ॥ नमस्तेवाग्मतीदेविसर्वपापप्रणाशिनी ॥ अघमेघ्नलिनेपापदर्श
नान्नेविराजितम् ॥ ४ ॥ अथगंगासारमंत्र ॥ त्वदेनसरितांनाथत्वदेविसरितांवरा ॥ उभयोःसंगमेस्नात्वामुंचामिदुरितानिवै ॥ ५ ॥
अथनर्मदामंत्रो ॥ नर्मदेनर्मसम्पन्नेसर्वपापहरेशिवे ॥ विषसर्पभयत्राणोयरेपापापहारीहिसाम ॥ ६ ॥ नमोस्तुतेमुनिगणासि
द्धसेवितेनमोस्तुतेशंकरदेहनिःसृते ॥ नमस्कृतेक्षर्मभृतांवरप्रदेनमोस्तुतेसकलपापपाविनि ॥ ॥ अथगोमतीमंत्रः ॥ त्वंदे
विसरितांश्रेष्ठेगोमतीत्वप्रसीदमे ॥ स्वर्धुनीसंगमस्नानात्पापम्मेहरसज्जन ॥ ७ ॥ अथतपनीमंत्र ॥ अग्निश्चतेजोमृडपात्रदेहोरे
तोधाविष्णोरमृतस्यनाभिः ॥ एतद्ब्रुवन्पांडवसत्यवाक्यंततोवगाहेततपनीनदीनाम् ॥ ८ ॥ अथास्नानमंत्रः ॥ पृथ्वित्वयाधृतालोकादेवि
त्वंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरुचासनम् ॥ ९ ॥ अथमृत्तिकामंत्रः ॥ अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे ॥ मृत्तिके
हरमेपापंयन्मयादुष्कृतंकृतम् ॥ उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥ समगात्रंसमारुह्यसर्वपापंव्यपोहय ॥ १० ॥ अथदंतधाव
नमंत्र ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ ॐ भद्रापापमल्लूरुध्वछं सोमोराजापमाग
मन ॥ समेमुखमप्रमार्क्ष्यतेयशसाचबलेनच ॥ ११ ॥ अथपुत्रप्रदेमंत्र ॥ देवकीसुतगोविंदवासुदेवजगत्पते ॥ देहिमेतनयंकृष्णत्वामस॰

॥ रामः ॥
॥ ४०८ ॥

408

23

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हंशरणं गतः॥ १२॥ अथ गरोशस्य॥ ॐ रायमोषस्य दहिता निधिदो रत्नधानुमान्॥ रक्षोहणो वलगहनो वक्रतुण्डाय हुं॥ १३॥ अ
थ ग्रहणमंत्रा॥ योसौ वज्रधरो देव आदित्यानां प्रभुर्मतः॥ सहस्रनयनश्चेन्द्रो ग्रहपीडां व्यपोहतु॥ १४॥ मुखं यः सर्वदेवानां सप्तार्चि
रमितद्युतिः॥ चन्द्रोपरागसम्भूतामग्निः पीडां व्यपोहतु॥ २॥ यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः॥ यमश्चन्द्रोपरागोत्थां ग्रहपी
डां व्यपोहतु॥ ३॥ रक्षोगणाधिपः साक्षान्नीलाञ्जनसमप्रभः॥ खड्गहस्तोतिभीमश्च ग्रहपीडां व्यपोहतु॥ ४॥ प्राणरूपो हि लोकानां
सदा कृष्णमृगप्रियः॥ वायुश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु॥ ५॥ नागपाशधरो देवः सदा मकरवाहनः॥ स जलाधिपतिश्चन्द्रोग्र
हपीडां व्यपोहतु॥ ६॥ योसौ निधिपतिर्देव खड्गशूलगदाधरः॥ चन्द्रोपरागकलुषं धनदोत्र व्यपोहतु॥ ७॥ योसाविंदुधरो देवः पिनाकी
वृषवाहनः॥ चन्द्रोपरागपापानि मनाशयतु शंकरः॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च॥ ब्रह्मविष्ण्वर्करुद्राश्च दहन्तु मम पात
कम्॥ एषमावाहयेत्कुंभान्मंत्रैरेभिश्च वारुणैः॥ एतानेव तथा मंत्रान्स्वर्णपत्रे विलेखयेत्॥ ताम्रपत्रेथवा लिखन ववस्त्रेन थैवस्य॥ म
स्तके यजमानस्य निदध्युस्ते द्विजोत्तमाः॥ कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान्॥ गृहीत्वा स्नापयेत्कुम्भभद्रपीठोपरिस्थितः॥ पूर्वै
रेव तु मंत्रैश्च यजमानं द्विजोत्तमाः॥ अभिषेकं ततः कुर्यान्मंत्रैर्वारुणसूक्तकैः॥ ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः॥ आचार्यं वरयेत्स्व
श्चान्स्वर्णपट्टं निवेदयेत्॥ आचार्ये दक्षिणां दद्याद्गोदानं वस्त्रशक्तितः॥ अनडुद्वस्य मज्जां मनदर्शनविशेषतः॥ पूजयेद्ब्राह्मणानेव वा
ह्मणानपि शक्तितः॥ गंधमाल्यैर्धूपदीपैः पूजयेदिष्टदेवता॥ होमं वापि प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा॥ निवृत्ते ग्रहणे सर्वं ब्राह्मणे

Nepal Sanskrit Collection, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥रत्न॥
॥४०८॥

योविशेषतः॥ दानंचशक्तितोदद्यायदीछेदात्मनोहितं॥ स्नर्पयत्रहेस्नपनामसदामंत्रान्श्चकीर्त्तयेत्॥ अनेनविधिनायस्तुग्रहरोगस्ना
नमाचरेत्॥ नतस्यग्रहरोदोषकदाचिदपिजायतइति॥ ॥अथवृष्टिकारकमंत्रः॥ कंकालीनामचैमस्यदेवीनन्त्राथनंत्रुवे॥ कं
कालीजलेदेवीनिजलेघ्ररयघ्ररय॥ धंधंसन्नदशाणोयंजपेद्दशसहस्रकं॥ अवृष्टिकालराजौचरवोनघांजलेजपेत्॥ कंठमात्रेशुने
वैकंध्यायंदेवीसमाहितः॥ प्रमाणेवृष्टिरत्नलायातिपंचदिवावधि॥ इतिवृष्टिमंत्र॥ जपणगर्भनितिदेवंवर्षयितुकामडडंवरादिसं
मिथोजुहुयात्॥ जपःपित्वेनिशिखगिडेवेनसवारणांदधिमधुघृताक्तानीअपुनंजुहुयान्महावृष्टिर्भवतीति॥ यजुर्विधानेवृष्टिप्र
योगः॥ ॥अथगतराज्यप्रदोमंत्रः॥ अथातःसंप्रवक्ष्यामिइडगणीनष्टराज्यदां॥ इडस्वाणीनमइतिमंत्रैःप्रोक्तःषडक्षरः॥ गुरु
मुनिश्चगायत्रीछंदोदेवीडवल्लभः॥ इंवीजंशक्तिरिंडाणीनमःकीलकमुच्यते॥ वज्रपाशवराभीतिहस्ताश्यामावराम्बरा॥ चतुर्दं
तगजाकल्पछायासंस्थाहिरण्यभा॥ कोणषट्केवंगभूजानवाह्येष्टदलेयजेत्॥ वगलाछिन्नमस्तांचतारांदक्षिणकालिकां॥ धूमा
वतीरुद्रकालीमहाकालीप्रतिक्रियां॥ ततन्मचैस्कतक्षपेतोकेशानापुधामपि॥ लक्षषट्कंजपेन्मंत्रंमालतीकुसुमैर्हुनेत्॥ त्रिमध
रैस्तावदेवराज्यार्थराजवृक्षजै॥ इतिगतराज्यप्रदोमंत्र॥ ॥अथसर्वशांतिकमनुः॥ क्रींहंह्रींहुंफडितिमन्त्कास्वाहांतःसप्तवर्णं ॥राम:॥
क॥ नामादिकेदक्षिणातेविशेषाछांतिकारकं॥ ॥अथसंग्रामविजयमंत्रः॥ तारोडगौदयंप्रोक्तारक्षिणीन्याप्रिरोहिनी॥ दशा ॥४०८॥
क्षरोमनुःप्रोक्ताभजतामिष्टसिद्धिदः॥ नारदर्षिर्विराट्छंदोजयदुर्गाचदेवता॥ नाराद्यैःपंचमंत्रस्यपदैःसर्वेणासमस्तता॥ जातियुक्तै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रंगकृन्निः कामकेन्त्वयथोच्यते ॥ दुर्गे च हृदयं प्रोक्तं दुर्गे च शिर ईरितं ॥ दुर्गायै साच्छिखा वर्म भूतरक्षिणि कीर्तितम् ॥ नारादि दुर्गे द्विनयं
रक्षिण्यक्षिप्रकीर्तितं ॥ नारादिपुगलं दुर्गे रक्षिण्यस्त्रमुदीरितं ॥ मेघश्यामां स्तौ किरीटां त्रिनेत्रां सिंहवाहिनीं ॥ चक्रदलौ खड्गभूलौ
भुजाग्रैर्दधतीं भजे ॥ दौर्गेपीठ प्रयजेद्देवीमुक्तमार्गेण मन्त्रवित् ॥ प्रजपेत्सवलक्षं च तद्दशांशं हुनेद्घृतैः ॥ तर्पणादि ततः कुर्यात्ततः सिद्धो
भवेन्मनुः ॥ अथ सिद्धमनुर्मंत्री प्रयोगानाचरेत्सुधीः ॥ इमं मन्त्रं जपेद्यस्तु प्रविशेच्छत्रुसंगरम् ॥ अशेषेण रिपुं हन्यान्नात्र कार्या वि
चारणा ॥ विवाहे व्यवहारादौ जप्तो विजयदो भवेत् ॥ अनया विद्यया लब्धा पताका ध्वजडुंडुभिः ॥ शृंगशंखादिकं सर्वं यानं सेवा च से
वकं ॥ संजप्तं तत्र संग्रामे सम्यग्विजयदो भवेत् ॥ अथास्याः प्रोच्यते भेदो यथा योरिष्यलेपयेत् ॥ त्राणां वा जायते हारो नमः प्रोक्ताव
पूर्ववित् ॥ द्वादशार्णो भवेन्मंत्रः संग्रामविजयप्रदः ॥ इति संग्रामजयमंत्रः ॥ ॥ अथ गजेन्द्रमोक्षस्तं ॥ शतानीक उवाच ॥ मयाऽपि
देवदेवस्य विष्णोरमिततेजसः ॥ श्रुतासंभूतयः सर्वा जगतः स्तवसुव्रत ॥ यदि प्रसन्नो भगवाननुग्राह्योस्मि वा यदि ॥ तदहं श्रोतुमि
च्छामि नृणां दुःस्वप्ननाशनम् ॥ स्वप्ना हि सुमहाभाग दृश्यंते ये शुभावहाः ॥ फलानि ते प्रयच्छंति तत्गुणान्येव भार्गव ॥ ३ ॥ यद्यनुग्राह्य
पवित्रं च नृणामपि शुभप्रदं ॥ दुःस्वप्नोपशमायालं तन्मे विस्तरतो वद ॥ ४ ॥ शौनक उवाच ॥ इदमेव महाराज पृष्टवांस्ते पितामह ॥
भीष्मं धर्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः ॥ ५ ॥ देवव्रतमहाप्राज्ञं सर्वशास्त्रविशारदं ॥ विनयेनोपसंगम्य पर्यपृच्छद्युधिष्ठिर ॥ ६ ॥
युधिष्ठिर उवाच ॥ दुःस्वप्नदर्शने घोरमवेक्ष्य भरतर्षभ ॥ प्रयतः किं जपेज्जाप्यं विबुद्धः किमनुस्मरेत् ॥ ७ ॥ पितामह महाबाहो केन देमेदो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ रत्न ॥
॥ ४१० ॥

महानयन ॥ न दृष्टश्चो नु मिच्छामि श्रुहि मे वदनांवर ॥ ८ ॥ भीष्म उवाच ॥ शृणु राजन्महावाहो वर्णयिष्यामि तेऽखिलं ॥ दुःस्वप्नदर्शने जप्यं य
द्दैनिकं समाह्निते ॥ ९ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ गजेन्द्रमोक्षणं पुण्यं कृतस्याः कृष्टकर्मणः ॥ १० ॥ सर्वरत्नमयः श्रीमां
स्त्रिकूटो नाम पर्वतः ॥ सुतः पर्वतराजस्य सुमेरोर्भास्करद्युते ॥ ११ ॥ क्षीरोदजलवीच्यग्रैर्धौतामलशिलातल ॥ उत्थितः सागरं भित्वा
देवर्षिगणसेवितः ॥ १२ ॥ अप्सरोभिः समाकीर्णः श्रीमान्प्रश्रवणाकुलः ॥ गंधर्वैः किन्नरैर्यक्षैः सिद्धचारणपन्नगैः ॥ मृगेंद्रैर्यैर्हि
जैश्चैव हनः सौवर्णराजतैः ॥ पुन्नागैः कर्णिकारैश्च पुष्पितैरुपशोभितः ॥ चूतनिम्बकदंबैश्च चंदनागरुचंपकैः ॥ शालैस्तालैस्तमालै
श्च कुटजैश्चार्जुनैस्तथा ॥ १४ ॥ एवं वहुविधैर्वृक्षैः सर्वतः समलंकृतः ॥ नानाधातुज्वलैः शृंगैः प्रस्रवद्भिः समंततः ॥ मृगैः शाखामृगैः
सिंहैर्मातंगैश्च सदामदैः ॥ जीवंजीवकसंघुष्टं चकोरशिखिनादितं ॥ १७ ॥ तस्यैकं कांचनं शृंगं सेवते यं दिवाकरः ॥ नानापुष्पसमाकी
र्णं नानागंधसमाकुलं ॥ द्वितीयं राजतं शृंगं सेवते यं निशाकरः ॥ पाण्डुरांबुदसंकाशं तुषारचयसन्निभं ॥ वज्रेन्द्रनीलवैडूर्यतेजो
भिर्भासयन्नभः ॥ तृतीयं ब्रह्मसदनं प्रकृष्टं मृगसंकुलं ॥ न तत्कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ॥ नातप्ततपसः शैलं ते वै पश्यंति
मानवाः ॥ २१ ॥ तस्य सानुमतः पृष्ठे सरः कांचनपंकजं ॥ कारण्डवसमाकीर्णं राजहंसोपशोभितं ॥ २२ ॥ मत्तभ्रमरसंघुष्टं फुल्लपं
कजशोभितं ॥ कुमुदोत्पलकह्लारपुण्डरीकोपशोभितं ॥ उत्पलैः शतपत्रैश्च कांचनैः समलंकृतैः ॥ पत्रैर्मरकतदलप्रख्यैः पुष्पैः कां
चनसंनिभैः ॥ गुल्मैः कीचकवेणूनां समंतात्परिवारितं ॥ तस्मिन्सरसि दुष्टात्मा विरूपो न्तर्जलाशयः ॥ आसीद्ग्राहो गजेन्द्राणां रा

410

॥ रत्न ॥
॥ ४१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धर्षो महाबल॥ अथ दंतोज्वलमुखः कदाचित्गजयूथप॥ आजगाम सितांत्राभः करेणुपरिवारित॥ मदस्त्रावि महारौद्रः पाश्चा
रौवपर्वत॥ वासयेन्मदगंधेन गिरिमैरावतोपम॥ सगर्जेञ्जनसंकाशो मदाञ्चलितमानस॥ सलीलं पंकजवने यूथमध्यगतो
व्रजन्॥ गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्त्तिना॥ पश्यंतीनां करेणूनां क्रोशंतीनां च दारुणं॥ वारणः संयतः पाशैर्निःप्रयत्न
गतिः कृतः॥ वेष्ट्यमानः सुघोरैस्तु पाशैर्नागो दृढैस्तथा॥ विस्फूर्य च यथाशक्ति विक्रुश्य च महारवान्॥ व्यथितः स निरुत्साहो
गृहीतो घोरकर्मणा॥ परमापदमापन्नो मनसाचिंतयद्धरिं॥ स तु नागवरः श्रीमान्नारायणपरायणः॥ तमेव परमं देवं गतः स
र्वात्मना तदा॥ एकाग्रचिंतयामास विशुद्धेनांतरात्मना॥ जन्मजन्मांतराभ्यासाद्भक्तिमान्गरुडध्वजे॥ आद्यं देवं महात्मानं पूज
यामास केशवं॥ नवमेघप्रतीकाशं शंखचक्रगदाधरं॥ सहस्रशुभनामानं मादिदेवमजं परं॥ २५॥ प्रगृह्य पुष्कराग्रेण कांचनं
कमलोत्तमं॥ आपद्विमोक्षमन्विच्छन्गजः स्तोत्रमुदीरयेत्॥ २६॥ गजेन्द्र उवाच॥ नमो नमः कारणवामनाय नारायणायामित
विक्रमाय॥ श्रीशार्ङ्गचक्रासिगदाधराय नमोस्तु तस्मै पुरुषोत्तमाय॥ आद्याय वेदनिलयाय महोदराय सिंहाय दैत्यनिधना
य चतुर्भुजाय॥ ब्रह्मेंद्ररुद्रमुनिचारणसंस्तुताय देवोत्तमाय वरदाय नमोच्युताय॥ नागेंद्रभोगशयनाशनसुप्रियाय गोक्षीर
हेमशुकनीलघनोपमाय॥ पीतांबराय मधुकैटभनाशनाय भक्तिप्रियाय वरदीप्तसुदर्शनाय॥ नाभिप्रजातकमलस्थचतुर्मु
खाय क्षीरोदकार्णवनिकेतनयशोधराय॥ नानाविचित्रमुकुटांगदभूषणाय सर्वेश्वराय वरदाय नमो वराय॥ विश्वात्मने य

CC-0. In Public Domain. Digitization by eGangotri

रमकारणाकारणाय पुष्कारविंदविमलायतलोचनाय॥ देवेंद्रदानवपरीक्षितपौरुषाय योगेश्वराय विजयाय नमोवराय॥ लो
कायनाय त्रिदशायनाय ब्रह्मायनायात्मभवायनाय॥ धर्मायनायैकजलायनाय महावराहाय सदानतोस्मि॥ अचिंत्यमव्यक्तम
नंतरूपं नारायणं कारणमादिदेवम्॥ युगांतशेषं पुरुषं पुराणं तं वासुदेवं शरणं प्रपद्ये॥ भद्रं परमदेवं यमनादिमध्यं महर्षयो
ब्रह्मविदः सुरेशम्॥ वदंति ये वै पुरुषं सनातनं तं वासुदेवं शरणं प्रपद्ये॥ यदक्षरं ब्रह्म वदंति सर्वगं निशामयंत्यस्य सुखं स्व मुच्य
ते॥ तमीश्वरं तृप्तमनोपमैर्गुणैः परापरं विष्णुमुपैति शाश्वतम्॥ कार्यक्रियाकारणमप्रमेयं हिरण्यनाभं वरपद्मनाभं॥ म
हाबलं वेदनिधिं सुरोत्तमं व्रजामि विष्णुं शरणं जनार्दनं॥ विचित्रकेयूरमहार्हनिष्कं रत्नोत्तमालंकृतसर्वगात्रं॥ पीताम्बरं कांच
नभक्तिचित्रं मालाधरं केशवमभ्युपैति॥ भवोद्भवं वेदविदां वरिष्ठं योगात्मनां सांख्यविदां वरिष्ठं॥ आदित्यचंद्राग्निवपुप्रभावं प्र
भुं प्रपद्येच्युतमात्मभूतं॥ श्रीवत्सांकं महादेवं देवगुह्यमनुत्तमं॥ प्रपद्ये सूक्ष्ममचलं भक्तानामभयप्रदम्॥ प्रभवं सर्वलोकानां
निर्गुणं परमेश्वरं॥ प्रपद्ये मुक्तसंघानां यतीनां परमां गतिम्॥ भगवंतं सुराध्यक्षमक्षरं पुष्करेक्षणं॥ शरण्यं शरणं भक्त्या प्र
पद्ये ब्रह्मणः प्रियं॥ त्रिविक्रमं त्रिलोकेशमाद्यमेकमनामयं॥ भूतात्मानं महात्मानं प्रपद्ये मधुसूदनं॥ क्षेत्रज्ञं पुरुषं यत्तं त्रिगु
णातीतमव्ययं॥ नारायणमणीयांसं प्रपद्ये परमेश्वरं॥ एकाय लोकतत्त्वाय परमात्मने॥ नमः सहस्रशिरसे अनंताय महा
त्मने॥ वरेण्यमनघं देवमृषयो वेदपारगाः॥ कीर्त्तयंति वयं सर्वे तं प्रपद्ये सनातनं॥ नमस्ते पुण्डरीकाक्ष भक्तानामभयप्रद॥ सुब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ण्य न मस्तेनुत्राह्रिमांशरणागतं ॥ भक्तिं न स्यानु संविसनागस्यामोघसंस्तवं ॥ प्रीतिमान भवद्राजन् शंखचक्रगदाधरः ॥ सान्नि॰
ध्यं कल्पयामास तस्मिं स्सरसि माधव ॥ गारुडस्तो गजेंद्रं तं वसं गृह्य सलिलाशयान् ॥ उज्जहाराप्रमेयात्मा तरसैवारिसूदन ॥ स्थल
स्थं दारयामास ग्राहं चक्रेण माधव ॥ मोक्षयामास च गजं पापेभ्यः शरणागतं ॥ स हि देवलशापेन हूहूर्गंधर्वसत्तमः ॥ गजत्वम
गमत्कृष्णान्मोक्षप्राप्य दिवं गतः ॥ शापाद्विमुक्तः स च गजो गंधर्वनाकृतः ॥ ग्राहोपि यक्षतां यातो यः कृष्णेन निपातितः ॥ तस्या
शापविमोक्षोसौ जैगीषव्यकृतो भवेत् ॥ प्रीतात्मा ह्यतिगोविंदः स च सः संसारसागरात् ॥ कृष्णोपि निघ्नन्देवत्वमगतौ नात्र यद्धति
नौ च स्वं स्वं वपुः प्राप्य प्रणिपत्य जनार्दनं ॥ गंधर्वराट्तथा यक्षः परात्रिर्द्वृत्तिमागतौ ॥ इदं चैव महावाहो देवदेवोभ्यभाषत ॥ हृष्टा
मुक्तौ गजग्राहौ भगवान्मधुसूदनः ॥ यो ग्राहं नागराजं च मां चैव प्रणिधानवान् ॥ स्मरिष्यति सरश्चैव तथा मोक्षणं तथा ॥ गुल्मकीच
कवेणूनां तं च शैलवनं तथा ॥ अश्वत्थं भास्करं गंगां नैमिषारण्यमेव च ॥ संस्मरिष्यंति ये मर्त्याः सम्यक्छ्रोष्यंति वापि ये ॥ न ते दुःस्व
प्नपापस्य भोक्तारो मत्परिग्रहान् ॥ सर्वपापैः प्रमोक्षं ते कल्पानां ‾ च भागिनः ॥ भविष्यंति तथा पुण्यां गतिं यास्यंति मानवाः ॥ दुःस्वप्न
वन्त्याणां तेषां शुस्वप्नं च भविष्यति ॥ कौर्मं मात्स्यं च वाराहं वामनं तार्क्ष्यमेव च ॥ नारसिंहं तथा रूपं सृष्टिसंहारकारकं ॥ एतानि प्रातरु
त्थाय संस्मरिष्यंति ये नरा ॥ सर्वपापविनिर्मुक्तास्ते यांति परमां गतिं ॥ एवं मुक्त्वा तु राजेंद्र देवदेवो जनार्दनः ॥ अस्पृशद्गजगंधर्वग्रा
हयक्षं च ततस्तदा ॥ तेन स्पृष्टा तु भौ सद्यो दिव्यमाल्याम्बरान्वितौ ॥ विमाने भिमते प्राप्ये जग्मतुस्त्रिदशालयं ॥ ततो देवपतिः कृष्णो मो॰

॥ रत्न ॥
॥ ४१२ ॥

क्षपितागजोत्तमं॥ ऋषिभिस्तूयमानो हि गुह्यैर्वेदपराक्षरैः॥ गतः स भगवान्विष्णुर्दुर्विज्ञेयगतिः प्रभुः॥ गजेंद्रमोक्षणं दृष्ट्वा स
र्वे ते ब्रह्मपुरोगमाः॥ ब्राह्मणा मनुजाः कृत्वा सर्वे प्राञ्जलयोभवन्॥ गजेंद्रमोक्षणं पुण्यं सर्वपापप्रमोचनम्॥ श्रावयेत्तानरुत्थाय सर्व
पापैः प्रमुच्यते॥ श्रद्धया हि कुरुश्रेष्ठ स्मृतेनेन कथितेन च॥ गजेंद्रमोक्षणेनेह दीर्घमायुरवाप्नुयात्॥ मयापि ते कथितं दिव्यं पवित्रं पाप-
नाशनम्॥ कीर्त्तयस्व महाबाहो महादुःस्वप्ननाशनं॥ कीर्त्यमानश्च विप्रेभ्यः भराद्भ्रमस्माययथोदितं॥ ॥ शौनक उवाच॥ गजेंद्रमो-
क्षणं श्रुत्वा कुंतीपुत्रो युधिष्ठिरः॥ भीष्माज्जागीरथीपुत्रात्स्तूजयामास केशवं॥ ये चापि पाण्डुपुत्रस्य समीपस्था द्विजोत्तमाः॥ तेपि
भीष्मस्य पार्श्वस्थ वासुदेवं प्रणेमिरे॥ वरं वरेण्यं वरदं पद्मनाभं नारायणं ब्रह्मनिधिं सुरेशं॥ तं देवगुह्यं पुरुषं पुराणं वंदे देवं सवि-
दां वरिष्टम्॥ एतत्पुण्यं महाराज नराणां पापकर्मणाम्॥ दुःस्वप्नदर्शने घोरे श्रुत्वा पापात्प्रमुच्यते॥ भक्तिमान्पुण्डरीकाक्षे ग-
जो दुःखद्विजो विनतः॥ तथा त्वमपि राजेंद्र प्रपद्यशरणं हरिं॥ विमुक्तः सर्वपापेभ्यः प्राप्स्यते परमां गतिं॥ ॥ इति विष्णुधर्मे
षु गजेंद्रमोक्षणम्॥ ॥ श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा॥ ग्रंथसौकर्यसिद्ध्यर्थमनुक्रमणिकोच्यते॥ १॥ मंगलप्रथ
मं तत्र श्रीमहाराजवर्णनम्॥ नारायणमुखोद्गीर्णो वेदः सर्वप्रमाणवान्॥ २॥ वेदेन विहितं कर्म दृष्टादृष्टफलं वनन॥ तत्कर्मं-
प्रतिबंधस्य दुरितस्योपशांतये॥ ३॥ गणेशपूजनं चेति क्रमः प्रथमशरितः॥ पुण्याहवाचनं तस्मात्कलशस्थापनक्रमः॥ ४॥ मंग
लप्रार्थनश्चैव पुण्याहस्य विधिर्गतः॥ ततीयेमात्पूजाच चतुर्थे वास्तुपूजनम्॥ पंचमे ग्रहशांतिश्च तत्र पूजाक्रमस्तथा॥ ग्रहाणां च

॥ रामः ॥
॥ ४१२ ॥

412

CC-0. In Public Domain. Digitization by eGangotri

लयस्तद्वद्ग्रहसूक्तक्रमस्तथा ॥ ६ ॥ अग्निस्थापनमंत्रैवग्रहहोमस्ततः परम् ॥ ग्रहदानाभिषेकादिग्रहप्रकरणंगतं ॥ ७ ॥ तुलादानप्रकरणे
तुलानिर्माणमीरितम् ॥ षोडशारादिभद्राणांपूजानंत्रक्रमस्ततः ॥ ८ ॥ दानरूपदानपात्रंदानदेवविनिर्णयः ॥ नानाद्रव्यादिमंत्राणांकथ-
नेतदनंतरम् ॥ ९ ॥ गोदानविधिरत्रैवहरिवंशविधिस्तथा ॥ कस्यचूनेपावमानेनंत्रसूक्तद्वयंगतम् ॥ १० ॥ पुरश्चर्यागमः प्रोक्तः कूर्मचक्रवि-
निर्णय ॥ पुरश्चरणविस्तारस्तत्प्रयोगस्ततः स्मृतः ॥ ११ ॥ भूतशुद्धिस्ततःप्राणप्रतिष्ठामातृका ॥ पीठपूजार्थपूजाचभावनाद्युपचारकं
ततोन्यपटलेचैवसर्वतोभद्रयुग्मकम् ॥ नवनाभंचपंचाब्जंकुलाकुलमतः परम् ॥ १३ ॥ सिद्धसाध्यसुसिद्धारिचक्रंनक्षत्राणाभिधम् ॥
वर्गचक्रंराशिचक्रंमचक्रंगणचक्रकं ॥ १४ ॥ अंस्यचाकडमंचेतितंत्रप्रकरणंगतं ॥ श्रौतप्रकरणेतत्रपौर्णमासेष्टिपद्धति ॥ १५ ॥ दर्शेष्टिक-
थनंचैवतर्पणस्यक्रमस्तथा ॥ निरग्निवैश्वदेवश्चनित्यश्राद्धंततः स्मृतम् ॥ १६ ॥ रुद्रमंत्रविभागश्चपुरश्चर्याक्रमस्ततः ॥ पंचांगरुद्रन्यास-
स्यश्चरुद्रपूजाक्रमस्तथा ॥ १७ ॥ संध्याप्रयोगोगायत्र्याद्विधार्थः कथितः शुभ ॥ पूजाप्रयोगोगायत्र्यान्यासमुद्रादिकंतथा ॥ १८ ॥ अथसंध्या-
कालमानंजपेदेशविनिर्णयः ॥ जपस्वरूपार्थइतिसंध्याप्रकरणंगतं ॥ १९ ॥ विभूतेस्तिलकस्यापिभोजनस्यविनिर्णयः ॥ शयनस्यविधा-
नंचदारोपगमएवच ॥ २० ॥ ततोरक्षाविधानंचश्रावणीनिर्णयेविधि ॥ अथप्रतिष्ठादेवानामधिवासनपूर्विका ॥ २१ ॥ अग्निःसप्तिर्मि-
तीहोकंसूक्तमस्यस्वर्गोचरं ॥ ततादिन्यासकथनेश्रीकराद्यादिप्रकीर्तितम् ॥ २२ ॥ केशवादिततोन्यासोहोमकार्यंततः परं ॥ स्थापनंदेवमू-
र्तीनांचतुर्थीकर्मचोत्तरं ॥ २३ ॥ ततोजलाशयविधिर्वाल्लरणंतंनिमंत्रणं ॥ अत्रैववारुणीदीक्षाततः कुंडस्यसंस्कृतिः ॥ २४ ॥ तर्पणंवारुणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्न ॥
॥ ४१३ ॥

स्नानं प्रतिदिशं ग्रंथ ईरितं ॥ श्राद्धप्रकरणे पूर्वं पार्वणं समुदीरितं ॥ २५ ॥ नांदीमुखं च सांकल्प्यं पार्वणैकोद्दिष्टं तथा ॥ तीर्थश्राद्धं गयाश्राद्धं विस्त
नं समुदीरितं ॥ २६ ॥ प्रेतप्रकरणे तावद्दशाहापेक्ष्य विनिर्णयः ॥ चिंतासां पिंडदानादि दशपिंडविधिस्ततः ॥ दीपमानीयभ घाणां त्रिकाष्टो
परिदानं ततः ॥ काकेभ्यो बलिदानं च पाथेयश्राद्धपद्धतिः ॥ आशौचे नियमास्तत्र अस्थिसंचयनक्रमः ॥ अस्थिक्षेपविधानं च दशाहे निक्रियाक्र
मः ॥ २९ ॥ एकादशाहकृत्यं तु षोडशश्राद्धपद्धति ॥ सपिंडीकरणं तस्मात्ततः पाथेयपद्धतिः ॥ ३० ॥ विनायकस्य पूजा च एकोद्दिष्टं ततः परं ॥
अनाद्येद्दविधिश्चैव प्रथमाद्देति विस्तृतं ॥ ३१ ॥ पालाशप्रकृतिस्तस्मात्पंचकादिमृते विधिः ॥ रजस्वलायामरणे सूतिकामरणे तथा ॥ ३२ ॥
गर्भिण्यादिमृते चैव नारायणबलिस्तथा ॥ अथाशौचप्रकरणे शिशोर्मरणनिर्णयः ॥ ३३ ॥ ततो ह्यनुपनीतस्य पुत्रस्य मरणे तथा ॥ कंन्याया
मरणे चैव ह्युपनीतमृते तथा ॥ ३४ ॥ सोदकादेस्तथाशौचं समगोत्रमृते तथा ॥ अतिक्रांताशौचमतो देशांतरमृते तथा ॥ शवनिर्हरणाशौचं शवा
नुगमने तथा ॥ अतीतस्य तथा मृत्युविशेषः शुद्धिनिर्णयः ॥ ३६ ॥ ततः शंकरजातीनामाशौचं परिकीर्तितं ॥ अतोरसादिपुत्राणां दासादीनां म
शौचकं ॥ ३७ ॥ प्रवृत्ताशौचमध्ये तु अन्याशौचविनिर्णयः ॥ अथाशौचे निषेधाय नियमाश्चापि कीर्तिताः ॥ ३८ ॥ एवं समाप्य पूर्वार्द्धमुत्तरार्द्धं प्र
दर्श्यते ॥ गोत्राणां प्रवराणां च विवाहस्य विधिस्ततः ॥ कंन्यादानविधौ तत्र महासंकल्प ईरितः ॥ चतुर्थी पद्धतिश्चैव गर्भाधानं ततः परं ॥ ४०
अथ पुंसवनं तस्मात्सीमंतोन्नयनं तथा ॥ जातकर्म ततः प्रोक्तं षष्ठीकापूजनं ततः ॥ ४१ ॥ नामकर्म ततश्चैव निःक्रमस्य विधिस्तथा ॥ ततो
न्नप्राशनं चूडाकर्णवेधस्तथैव च ॥ ४२ ॥ औपनायनिकं कर्म वेदारंभस्तथैव च ॥ समावर्तननिमित्ते तत्संस्कारे कथितः क्रमः ॥ वर्षकृत्ये तु चै

413

॥ रत्नः ॥
॥ ४१३ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ रत्न ॥
॥४७४॥

त्रस्य वैशाखस्य च निर्णयः॥ ज्येष्ठाषाढविधिश्चैव श्रावणाश्वयुजोस्तथा॥ ४४॥ कार्त्तिकस्य च मार्गस्य पौषस्यापि विनिर्णयः॥ माघफाल्गुनयोश्चेति
वर्षकृत्यमुदीरितम्॥ ४५॥ प्रकीर्णकं च मंत्रार्थः शांतिप्रकरणं तथा॥ राज्याभिषेककर्मोक्तं ततोनुक्रमणं स्मृतम्॥ ४६॥ ग्रन्थाननेकानवलोक्य सम्य
क्श्रुतिरूपितं कर्मविचारणं तं॥ कृपाविधेयाकृतिनिर्ममो य रिपितेव पुत्रस्य सखेव सख्युः॥ ४७॥ स्निग्धो रसज्ञ नररत्नजातिनिकरैर्विन्यासदक्षो यथास
द्विद्याभरणानि साधु रचयन्शिल्पी जनैः पूज्यते॥ नानाधर्मनिबंधसंग्रहकृतैस्तद्भिः प्रयोगैस्तथा॥ गीर्वाणादिमयुद्धविक्रमनृपो रत्नावलीका
रकः॥ ४८॥ ग्रन्थाः किं जगतीतले बहुविधास्सन्त्यर्थसम्पादकाः श्रामाण्ये रूपशोभिता इति ततो योगकृतो वैमया॥ श्रौतस्मार्तधुरंधरे मम निबंधेव
द्विशेषः क्वचिद्विद्भिः प्रतिगृह्यतामयमहो रत्नावलीसंग्रहः॥ ४९॥ शाके वेदधनञ्जयाग्निवसुधायुक्ते सिते चाश्विने द्वादश्यां शनिवासरे शतभि
षड्नक्षत्रयोगिनि॥ दृष्ट्वा योगवरेश्वकांतिनगरे रत्नावलीनामको गीर्वाणादिमयुद्धविक्रमनृपेणायं निबंधकृतः॥ ५०॥ श्रीमहाराजगी
र्वाणयुद्धविक्रमवर्मणा॥ कृत्वा रत्नावली पूर्णा श्रीविश्वेश्वरार्पिता॥ ५१॥ विद्युद्दामवती घनाम्बरचया प्राप्ता नथा कामिनी॥ याचैवं द्राग्यु
धमन्त्रणाद्भुतसितागमैव रत्नावली॥ नूत्नाकारपयोधराति विमलानीलाम्बुदालम्बिनी· सा विद्यासकनाम्निकानृपशिरोगीर्वाणयुद्धाल्पि॰ ॥ राम: ॥
का॥ ५२॥ ॥ इति श्री गिरिराजचक्रचूडामणिनरनारायणेत्यादि विविधविरुदावली विराजमानमानोन्नत महाराजाधिराज ॥४७४॥
श्री श्री श्री श्री श्री गीर्वाणयुद्धविक्रमसाहदेवकृतो गीर्वाणरत्नावलीनामको धर्मशास्त्रनिबंधः पूर्णतां समगमदिति शिवम्भूयात्॥ शुभम्॥

414

CC-0. In Public Domain. Digitization by eGangotri





राम
१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥नमः ॐ विमलायै नमः॥ ॐ प्रियायै नः॥ ॐ जयायै नमः॥ ॐ कालायै नमः॥ ॐ विशोकायै नमः॥
ॐ इलायै नमः॥ ॥इति दशमंत्रैर्दक्षिणोत्तरसंस्था दशकार्याः॥ एवन्नवनवकैः कोष्ठेरेका
शीतिपदम्॥ ॥इति वास्तुचक्रोद्धारः॥

415

Nepal Sanskrit University, Balmeeki Campus, Kathmandu